मृच्छकटिकम् ।

(प्रकरणम्)

कविप्रवर—

श्रीशूद्रकराजेन विरचितम् ।

शब्दाचार्य-पुराणशास्त्रि-सांख्यरत्न-व्याकरणतीर्थ-काव्यतीर्थ-स्मृतितीर्थोपाधिमता

… प्रणीत

श्रीहरिदाससिद्धान्तवागीश-भट्टाचार्येण

प्रणीतया [illegible] टीकया

वङ्गानुवादेन च सहितम् ।

[illegible] मुद्रापयित्वा … : १३२८ वङ्गाब्दे

… तेनैव

प्रकाशितम् ।

मूल्यं रु मात्रमात्रं ।

मक्कीपुर-सिद्धान्तयन्त्रे
पं। वटकृष्णागायबलुध रोगेन मुद्रितम्।

विज्ञापनम्

हन्त ! दृश्यते खलु जगत्यां प्रायेण सर्ववस्तूनामेव नूतनस्यादरो गरीयान् । नवीनः पुमान् नवीना रमणी नवञ्च नारिकेलमित्यादिकं नवीनं वस्तुजातं कस्यादरं नाकर्षति । संस्कृतग्रन्थविषये तु विपरीत एवायं नियमः ;—तुच्छमपि प्राचीनमतिसमीचीनं मन्यमानः सादरमादत्ते, चमत्कारिणमपि नवीनमरुचिविचलितचित्तश्चक्षुषापि विलोकयितुं विकलते लोकः । अतएवैतद्दुःखसमाक्षेपविकलहृदयः कालिदासोऽपिमालविकाग्निमित्रे —

"पुराणमित्येव न साधु सर्वं
न चापि काव्यं नवमित्यवद्यम् ।"

इति साक्षेपमाख्यातवान् । तत् किमयं भारतस्यैव स्वभावः ? उतवा भारतस्यावनतिस्वभावः ? । तत्र प्राचीनकाले नवीनादरणदर्शनात् भारतस्यावनतिस्वभाव एवायमिति सिद्धान्तयन्ति तत्त्वविदः । ब्रुवन्ति च ते 'यदा पुनरिमे भारतवासिनो विद्वेषविषविक्षोभाः सन्तः स्वदेशीयनवीनमादर्त्तुं शिक्षिष्यन्ते ; प्रवर्त्तिष्यन्ते च तदा नवनवाविष्कारेषु साधारणाः ; तन्मूला चोन्नतिरवश्यम्भाविनीति ।' हन्त ! न जाने तादृशः कालः कदागमिष्यति, वस्तुत एवागमिष्यति नवेति । अस्माकन्तु ईदृशनवीनावहेलनसमय एव नवीनं ग्रन्थं विरचयतां यशोलेशलिप्सापि हृदये नोदयते, व्ययबहुलतया अर्थलिप्सामपि व्यर्थामेव समर्थयामः ; तथापि तु पाठार्थिनां सुविधाविधानाय महीयानयमायास इति ।

१८४४ शकाब्दीय-
सौराषाढ़स्य
द्वाविंशतितमदिवसे

विनीत —
श्रीहरिदासशर्म्मणः
नकीपुर-हरिचरणचतुष्पाठीस्थितस्य ।

नाट्योल्लिखितव्यक्तिगणः।

पुरुषगणः।

सूत्रधारः ··· प्रधाननटः।

चारुदत्तः··· उज्जयिनीस्थो भद्रलोकः।

मैत्रेयः ··· चारुदत्तवयस्यः।

विटः ··· शिक्षितलम्पटो भद्रलोकः।

शकारः ··· राज्ञो भोग्यस्त्रिया भ्राता।

चेटः ··· शकारस्य भृत्यः।

संवाहकः ··· चारुदत्तस्य गात्रमर्द्दकी भृत्यः परञ्च बौद्धसन्न्यासी।

माथुरः ··· द्यूतसभाध्यक्षः।

द्यूतकरः ··· कश्चित् द्यूतसेवी।

दर्द्दुरकः ··· भूतपूर्वं द्यूतसेवी।

कर्णपूरकः ··· वसन्तसेनाभृत्यः।

चेटः ··· वर्द्धमानकनामा चारुदत्तभृत्यः।

शर्विलकः ··· दरिद्रः कश्चित् ब्राह्मणयुवा।

चेटः ··· वसन्तसेनाया गोशकटचालकः।

बन्धुलाः ··· वसन्तसेनाभवनस्थाः केचित् जारजाः।

विटः ··· वसन्तसेनासहचरो भद्रलोकः।

दारकः ··· रोहसेनो नाम चारुदत्तपुत्रः।

स्थावरकः ··· शकारस्य भृत्यः।

आर्य्यकः ··· गोपपुत्रो भावी राजा।

वीरकः ··· पालकराजसेनापतिः

चन्दनकः ··· ”

भिक्षुः ··· संवाहक एव।

शोधनकः ··· विचारालयभृत्यः।

अधिकरणिकः ··· विचारकः।

श्रेष्ठि कायस्थौ ··· विचारालयकर्म्मचारिणौ।

चाण्डालौ ··· घातकौ।

स्त्रीगणः।

नटी ··· सूत्रधारस्य स्त्री।

वसन्तसेना ··· वेश्याकन्या।

रदनिका ··· चारुदत्तस्य दासी।

मदनिका ··· वसन्तसेनाया दासी।

चेटी ··· वसन्तसेनाया अपरा दासी।

वधूः ··· धूतानाम्नी, चारुदत्तस्य पत्नी।

छत्रधारिणी ··· वसन्तसेनाया इतरा दासी।

चेटी ··· धूताया दासी।

वृद्धा ··· वसन्तसेनाया माता।

अथ कविसमयनिरूपणम् ।

यद्यपि शूद्रककवेः समयनिरूपणं स्पष्टप्रमाणाभावेन दुष्करमिव प्रतिभाति, तथाप्यशक्यमित्यपि वक्तुं न शक्यते। तथा च "मृच्छकटिकं सर्वप्राचीनम्" इति हि प्रचरति सम्प्रदायसिद्धश्चिरन्तनः प्रवादः। तत्र चादिमां सीमामन्विष्यता नाधिकं परिश्रमितव्यम्। अस्ति हि मृच्छकटिके चाणक्यनामोल्लेखः, (क) चाणक्यश्च चन्द्रगुप्तमन्त्री, चन्द्रगुप्तश्च ग्रीकदेशीयमहावीरेण आलेकजाण्डारेण सह सम्मिलित आसीत्। आलेकजाण्डारश्च खृष्टजन्मनः पूर्ववर्तिनि ३२७ वत्सरे भारतमाक्रमितुमाजगाम। अतश्च शूद्रको राजा खृष्टजन्मनः पूर्ववर्त्ति ३२७ वत्सरात् परमाविर्भूवेत्यवश्यमेवावधारणीयम्।

पश्चिमां सीमामन्विष्यता तु सर्वमितत् पर्य्यालोचनीयम्। यथा चन्द्रगुप्तपौत्रः खल्वशोकः, नवीनं साम्राज्यमधिगतो नितरामत्याचारेण "चण्डाशोकः" इति निन्दितोपाधिना प्रजाभिराख्यायमानः गच्छता कालेन स्वयमपि स्वकर्म्मणा ग्लानिमापन्नो बौद्धधर्म्ममाश्रयत् तच्च धर्म्मं स्वदेशे भारतवर्षे प्रचारयन् देशान्तरेष्वपि चीनजापानादिषु प्रचारितवान्। अतानन्तरं बौद्धधर्म्मो राजधर्म्मतया राजचेष्टया च भारते प्रायेण सर्वत्रैवास्पदमासादयामास। तेन च तदानीन्तनभारतीयप्रधाननगर्य्यामुज्जयिन्यामपि बौद्धधर्म्मः प्रबलतामुपलेभे इत्यवश्यमङ्गीकार्य्यम्। अथ च मृच्छकटिक एव विपुलतरमार्य्यसनातनधर्म्मानुष्ठानं दृश्यते। यथा कविरयं स्वयमेवाश्वमेधेन यजति; (ख) चारुदत्तो बलिवैश्वदेव

(क) अन्यस्मिन् पलाअन्तो महगम्भेन सुद्दा।
केशविन्दं पलामिदा चाणक्केण्व दोवदी ॥"

मृच्छकटिकप्रथमाङ्के ३९ श्लोकः।

(ख) "परमसमुदयेनाश्वमेधेन चेष्ट्वा" प्रथमाङ्के चतुर्थश्लोकः।

अथ कविसमयनिरूपणम् ।

निर्वाह्यते सन्ध्याद्योपास्ते ; (ग) वसन्तसेनाच स्नात्वा देवपूजां निर्वर्त्तयते ; (घ) ब्राह्मणः शर्विलकः कार्त्तिकेयं नमस्कुरुते, यज्ञोपवीतञ्च दधाति ; (ङ) राजा पालकश्च यज्ञमनुतिष्ठति, यज्ञे पशुहत्याञ्च सूचयति शर्विलकः (च)। तेन च श्रुतिस्मृत्युक्तधर्म्ममयमेवेदं • मृच्छकटिकमिति सर्वथा मन्तव्यम्। ततश्च अशोकेन बौद्धधर्म्मप्रचारात् पूर्वं मिदं शूद्रकेन विरचितमित्यकामेनाप्यवश्यमङ्गीकार्य्यम्। न च संवाहकेन बौद्धसन्न्यासावलम्बनादत्र बौद्धधर्म्माख्यानमप्यस्तीति वाच्यम्(छ) ; विरलं हि तत्। किञ्च तत्पूर्वमेव च बुद्धदेवाविर्भावात् अशोकेन तद्धर्मग्रहणात् प्राक् अराजधर्म्मतया प्रजाभिर्वाञ्छमानो बौद्धधर्म्मो विरलप्रचार आसीत्! ततश्च एकमात्रसंवाहकस्यैव बौद्धधर्म्माश्रयणं दर्शितम्। बहुकालात् परं बौद्धधर्म्मे शैथिल्यमापन्ने भगवता शङ्करेण बौद्धधर्म्मं निरस्य संस्थापिते वा सनातनधर्म्मे शूद्रकेण मृच्छकटिकं निर्म्मितमित्युक्तौ तु तस्य सर्व्वप्राचीनतावादो व्याहन्येत।

अतः खृष्टजन्मपूर्वं तृतीयशताब्दीसमय एव शूद्रकस्याविर्भावसमय इति प्रतीयते। एवञ्च शाकुन्तलनाटकादिभ्यः प्राचीनतया "मृच्छकटिकं सर्वप्राचीनम्" इति साम्प्रदायिकप्रवादोऽपि संगच्छते।

केचित्तु शूद्रककविं खृष्टीयषष्ठशताब्दीयं वदन्ति।

(ग) चारु। "वयस्य! समाप्तजपोऽस्मि। तत् साम्प्रतं गच्छ, मातृभ्यो बलिमुपहर। प्रथमाङ्के

(घ) चेटी। अज्जए! अत्ता आदिसदि ण्हादा भविअ देवदाणं पूअं णिव्वत्तेहि। द्वितीयाङ्के।

(ङ) "नमो वरदाय कार्त्तिकेयाय" "इदं यज्ञोपवीतं प्रमाणसूत्रं भविष्यति।" तृतीयाङ्के

(च) "पशुवत् यज्ञवाटस्थो दुरात्मा पालको हतः।" दशमाङ्के ५१ श्लोकः

(छ) "अज्जए! एदिणा जूदिअरावमाणेण सक्कसमणके हुविस्सं"।

अथ स्वरूपादिनिरूपणम् ।

मृच्छकटिकं नामेदं प्रकरणम् । एतद् वृत्तस्य लौकिकत्वात् कविकल्पितत्वाच्च । यथा साहित्यदर्पणे —

"भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम् ।
शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक् ।
सापायधर्मकामार्थपरो धीरप्रशान्तकः ॥"

तत्र ब्राह्मणश्चारुदत्तो धीरप्रशान्तलक्षणो नायकः । यथा तत्रैव—
'सामान्यगुणैर्भूयान् द्विजादिको धीरप्रशान्तः स्यात् ॥'

अवेश्यावृत्तिर्वेश्याजातीया वसन्तसेना, कुलजा स्वीया धूतादेवी च नायिके । यथा—

"नायिका कुलजा क्वापि वेश्या क्वापि द्वयं क्वचित् ।
तेन भेदास्त्रयस्तस्य तत्र भेदस्तृतीयकः ।
कितवद्यूतकारादिविटचेटकसङ्कुलः ॥"

"कुलस्त्री पुष्पभूषिते । वेश्या तु तरङ्गदत्ते । द्वे अपि मृच्छकटिके ।" इति च तद्वृत्तिः । तेनेदं दर्पणोक्ततृतीयभेदान्तर्गतं प्रकरणम् । प्राधान्यात्तु वसन्तसेनैव नायिकेति लोकवादः ।

'धीरा कलाप्रगल्भा स्यात् वेश्या सामान्यनायिका ।'
'एषापि मदनायत्ता क्वापि सत्यानुरागिणी ।'
'विनयार्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया ।'

तत्रापि धूता मध्या धीरा च । तल्लक्षणन्तु दर्पणादावुन्नेयम् ।

वसन्तसेनाया अभिसारात् पूर्वं पूर्वरागाख्यो विप्रलम्भशृङ्गारः, तस्याश्चारुदत्तगेहेऽवस्थानसमये सम्भोगशृङ्गारः, तथा शकारकर्त्तृकमोटनाच्च परं करुणविप्रलम्भः । यथा

अथ स्वरूपादिनिरूपणम् ।

'श्रवणाद्दर्शनाद्वापि मिथः संरूढरागयोः ।
दशाविशेषो योऽप्राप्तौ पूर्वरागः स उच्यते ॥'

'दर्शनस्पर्शनादीनि निषेवेते विलासिनौ ।
यत्रानुरक्तावन्योन्यं सम्भोगोऽयमुदाहृतः ॥'

'यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर्लभ्ये ।
विमनायते यदैकस्तदा भवेत् करुणविप्रलम्भाख्यः ॥'

बाहुल्येन वैदर्भी रीतिः । तथा च

'माधुर्यव्यञ्जकैर्वर्णै रचना ललितात्मिका ।
अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते ॥'

प्रायेण प्रसादो गुणः । यथा तत्रैव—

'चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः ।
स प्रसादः समस्तेषु रसेषु रचनासु च ॥'

तदत्र संग्रहश्लोकः—

**नेता प्रशान्तो द्विजचारुदत्तः नेत्री तु धूता च वसन्तसेना ।
विभिन्नशृङ्गाररसः किलाङ्गी वैदर्भरीतिश्च गुणः प्रसादः ॥**

मृच्छकटिकम् ।

प्रथमोऽङ्कः ।

पर्य्यङ्कग्रन्थिबन्धद्विगुणितभुजगाश्लेषसंवीतजानो—
रन्तःप्राणावरोधव्युपरतसकलज्ञानरुद्धेन्द्रियस्य ।
आत्मन्यात्मानमेव व्यपगतकरणं पश्यतस्तत्त्वदृष्ट्या
शम्भोर्वः पातु शून्येक्षणघटितलयब्रह्मलग्नः समाधिः ॥१॥

नमो गणेशाय ।

सुवर्णक्षतसद्वर्ण-राजद्राजतशैलवत् ।
सर्वदः सर्वदा भूयात् सशिवः स शिवः शिवः ॥ १॥

कलानिधिः शूद्रकभूपतेरिमां वाक्चन्द्रिकां नित्यनिसर्गनिर्मलाम् ।
टीकाशरन्मे गगने सतां गणे क्रियादपूर्वां किल पूर्वतः प्रियाम् ॥२॥

अथ कश्चित् कविप्रवरो लोकान्तरगतशूद्रकनृपतेः कीर्त्तिनाम्नी. स्थितिप्रत्याशां तदीयदायादात् वाञ्छितार्थलाभाङ्गीकारमादाय मृच्छकटिकं नाम प्रकरणं निर्मातुमिच्छन् तस्य निर्विघ्नसमाप्तये 'रङ्गविघ्नोपशान्त्यर्थं नान्दीमादौ प्रयोजयेत्' इत्यालङ्कारिकवचनप्रामाण्यात् रङ्गविघ्नोपशान्तये सूत्रधारपठनीयां नान्दीमुपनिबध्नाति—

पर्यङ्केति। पर्य्यङ्कस्य साधारणखट्वायाः, यस्याः पादैः सह तिर्य्यग्दण्डानां संयोगस्थले, यो बन्धो बन्धनरज्जुः, तद्वत् द्विगुणितो द्विगुणतामापन्नः, यो भुजगः सर्पः, तेन आश्लेषसंवीते आलिङ्गनवत् दृढवेष्टिते जानुनी

जानुद्वयं यस्य तस्य, सर्पेण दृढबद्धजानुद्वयावस्थया पद्मासनस्थस्येत्यर्थः। एतेन, यथा पादैः सह तिर्य्यग्दण्डानां सन्धिदेशे द्विगुणितरज्जुभिर्दृढबद्धतया उपरि गुरुतरभारपातेऽपि खट्वायाः स्खलनं न सम्भवति, तथा सर्पेण जानुयुगलस्य दृढबद्धतया एकभावेन सुदीर्घकालमप्युपविष्टस्य कदाचिदसहत्वादतर्कितभावेन पद्मासनस्य स्खलनं न सम्भवतीति दर्शितम्।

अन्तः शरीराभ्यन्तर एव, प्राणानां प्राणादिवायुपञ्चकस्य अवरोधेन, व्युपरतं स्वयमेव निवृत्तं सकलं ज्ञानं बाह्यपदार्थबोधो यस्मिन् कर्म्मणि तद्यथा तथा, करणानि इन्द्रियाणि कर्णनयनादीनि येन तस्य। 'सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च' इति सांख्यकारिकोक्तेः प्राणानामिन्द्रियवृत्तिरूपत्वात् तन्निरोधेनैव च वृत्तिमतामिन्द्रियाणामपि निरोधावश्यम्भावात् सकलबाह्यपदार्थज्ञाननिवृत्तिरिति भावः।

तथा तत्त्वदृष्ट्या यथार्थज्ञानेन प्रकृतिपुरुषयोर्विवेकज्ञानेनेत्यर्थः, आत्मन्येव स्वजीवचैतन्य एव, व्यपगतं निवृत्तं करणं शरीरं यस्य तं निराकारमित्यर्थः, आत्मानं ब्रह्मचैतन्यम्, पश्यतः "तत्त्वमसि" इति महावाक्यानुसारेणावलोकयतः अभेदेन जीवात्मपरमात्मानौ ध्यायत इत्यर्थः।

ईदृशस्य शम्भोर्महादेवस्य, शून्यस्य आकाशवन्निराकारतया शून्यप्रायस्य, ब्रह्मचैतन्यस्य, ईक्षणेन प्रागुक्तप्रकारेण दर्शनेन, घटितो निष्पादितः, लयो जीवात्मनः परमात्मनि लीनता यस्मिन् स चासौ ब्रह्मलग्नः परमात्मविषयकश्चेति स तथोक्तः शुद्धचैतन्यविषयक इत्यर्थः, समाधिर्ध्यानम्, वो युष्मान् सामाजिकान् पातु रक्षतु। समाधिकर्त्तृकरक्षणोक्त्या शम्भुकर्त्तृकरक्षणमेवाक्षिप्यत इति बोध्यम्।

अत्र प्रथमचरणे लुप्तोपमालङ्कारः।

स्रग्धरा वृत्तम्— 'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयम्।' इति लक्षणात्॥१॥

अपि च, (क)

पातु वो नीलकण्ठस्य कण्ठः श्यामाम्बुदोपमः।
गौरीभुजलता यत्र विद्युल्लेखेव राजते ॥२॥

(क) अपि च अन्यच्च नान्द्यात्मकं वाक्यान्तरञ्चैतदित्यर्थः।

पात्विति। श्यामो जलपूर्णत्वात् श्यामवर्णः अम्बुदो मेघ एव उपमा उपमानं यस्य सः, नीलः कालकूटविषतेजसा नीलवर्णः कण्ठो यस्य तस्य महादेवस्य, कण्ठो गलदेशः, वो युष्मान् सामाजिकान्, पातु रक्षतु। यत्र कण्ठे, गौर्य्याः पार्वत्याः भुजो लतेव सा, विद्युतो लेखा रेखा इव राजते स्वर्णवर्णत्वात् शोभते।

अत्र "नीलकण्ठस्य कण्ठः" इति लाटानुप्रासः, 'श्यामाम्बुदोपमः" इति आर्थी समासगतोपमा, 'भुजलता' इति अत्र कण्ठे लतायाः असम्भवात् लुप्तोपमैव नतु रूपकम्, 'विद्युल्लेखेव' इति श्रौती समासगतोपमा च, इत्येतेषां परस्परनिरपेक्षतया संसृष्टिः।

পর্য্যঙ্কের সংযোগস্থলের বন্ধনরজ্জুর ন্যায় দ্বিগুণিত সর্প, যাঁহার জানুযুগলকে আলিঙ্গনবৎ বেষ্টন করিয়া রহিয়াছে; শরীরের ভিতরে প্রাণাদি পঞ্চ বায়ুকে অবরুদ্ধ করায় যাঁহার ইন্দ্রিয়সকল রুদ্ধ হইয়া গিয়াছে এবং তাহাতে বাহিরের সকল জ্ঞান নিবৃত্তি পাইয়াছে; যিনি তত্ত্বজ্ঞানবশতঃ নিজের আত্মাতেই নিরাকার পরমাত্মাকে দেখিতেছেন এবং উক্তরূপে শূন্যপ্রায় পরমাত্মার দর্শননিবন্ধন যাঁহার জীবাত্মা পরমাত্মাতে লীন হইয়া রহিয়াছে, সেই মহাদেবের পরমাত্মবিষয়ক ধ্যান, আপনাদিগকে রক্ষা করুক ॥ ১ ॥

(ক) অপি চ। নীলকণ্ঠ মহাদেবের নীলবর্ণমেঘের তুল্য কণ্ঠদেশ, আপনাদিগকে রক্ষা করুক, যে কণ্ঠদেশে বিদ্যুতের রেখার ন্যায় পার্বতীর বাহুলতা বিরাজ করিতেছে ॥২॥

नान्द्यन्ते सूत्रधारः (१) (ख)। अलमनेन परिषत्कुतूहल-

पथ्यावक्त्रं वृत्तम्— 'युजोर्जेन सरिद्भर्तुः पथ्यावक्त्रं प्रकीर्त्तितम्' इति लक्षणात् ॥२॥

(ख) नान्द्यन्त इति। स्तुत्याशीरन्यतरपरा वाक् नान्दी, तस्या अन्ते पाठावसाने, सूत्रधारः प्रधाननटः। आहेति अध्याहर्त्तव्यायाः क्रियायाः कर्त्तृ... । एतत् । अन्यत्राप्येवमूह्यम् ।

तथा च नन्दयति आनन्दयति सर्वान् देवादीन् आशिषा वा सभ्यान् इति इत्यर्थनन्दधातोः पचादित्वादचि प्रज्ञादित्वात् स्वार्थे अणि च स्त्रियामीप्रत्यये नान्दीति रूपम्। तल्लक्षणन्तु साहित्यदर्पणे---

'आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥
मङ्गल्य-शङ्ख-चन्द्राब्ज-कोक-कैरवशंसिनी ।
पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत ॥'

अत्र चात्र सर्वमङ्गलकारिणोर्ह्रगौरीशिवयोः स्पष्टाभिधानात् मङ्गल्यशंसित्वम्, श्लोकद्वये अष्टानां पादानां सत्त्वादष्टपदत्वञ्चोन्नेयम्। तथाहि भरतनाट्यशास्त्रटीकासामभिनवगुप्तः —'पदानि श्लोकावयवभूतानि तिङन्तानि सुबन्तानि वा, श्लोकनैयायपदानि वा, अवान्तररूपाणि वा" इति। नाट्यप्रदीपे च—

'श्लोकपादः पदं केचित् सुप्तिङन्तमथापरे।
परेऽवान्तरवाक्यैक-स्वरूपं पदमूचिरे ॥"

सूत्रधारलक्षणन्तु —'नाटकीयकथासूत्रं प्रथमं येन सूच्यते।
रङ्गभूमिं समाक्रम्य सूत्रधारः स उच्यते ॥

(খ) নান্দীপাঠের পর সূত্রধার। (গ) সভ্যগণের কৌতুক-নাশক অতিরিক্ত নান্দীপাঠের পরিশ্রম নিরর্থক। (ঘ) আমি

(१) सूत्रधारः इत्यतः परमपि सूत्र इत्यधिकः पाठः क्वचित् ।

विमर्दकारिणा परिश्रमेण (ग)। एवमहमार्य्यमिश्रान् प्रणिपत्य विज्ञापयामि,—यदिदं वयं मृच्छकटिकं नाम प्रकरणं प्रयोक्तुं व्यवसिताः; एतत्कविः किल-- (घ)

(ग) ननु विपुलतया प्रधानभूतां द्वादशपदां नान्दीमपहाय कथमष्टपदां प्रयुक्तवानित्याह अलमिति। परिषदः सभ्यगणस्य, यत् कुतूहलम् अभिनयदर्शनकौतुकम्, तस्य विमर्दकारिणा विलम्बजनकतया व्याघातविधायिना, अनेन एतदधिकद्वादशपदनान्दीप्रयोगजनितेन, परिश्रमेणालम्। तथा च उक्ताष्टपदनान्दीप्रयोगेणैव कर्त्तव्यमङ्गलाचरणनिर्वाहात् एतदधिकद्वादशपदनान्दीप्रयोगे केवलं परिषदः कौतुकहानिर्मम च परिश्रमाधिक्यं फलमित्यतस्ततो विरम्यत इति भावः। परिषदमाह मनुः—

त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः।
त्रयश्चाश्रमिणः पूर्वे परिषत् स्याद्दशावरा॥

(घ) एवमिति। वेदोक्तविधिनिषेधाधीनाचारा आर्य्यास्तेषु मिश्राः प्रधानास्तान्, प्रणिपत्य नमस्कृत्य, एवं विज्ञापयामीत्यन्वयः। मृदो मृत्तिकायाः शकटिका क्षुद्रं शकटं यस्मिन्निति मृच्छकटिकम्। एतच्च परस्तात् व्यक्तीभविष्यति। नाम तदाख्यया प्रसिद्धम्, प्रकरणं तदाख्यं रूपकविशेषम्, प्रयोक्तुम् अभिनेतुम्, व्यवसिता उद्यताः। एतस्य मृच्छकटिकनामकप्रकरणस्य, कविर्वर्णयिता रचयिता— द्विरदेन्द्रगतिः इत्यादिना वक्ष्यमाणेनान्वीयते। आर्य्यमाह प्राञ्चः—

कर्त्तव्यमाचरन् काममकर्त्तव्यमनाचरन्।
तिष्ठति प्रकृताचारे स वा आर्य्य इति स्मृतः॥
"प्रधाने मिलिते मिश्रः" इति धरणिः।

সভামহোদয়গণকে প্রণাম করিয়া এইরূপ জানাইতেছি যে, আমরা

द्विरदेन्द्रगतिश्चकोरनेत्रः परिपूर्णेन्दुमुखः सुविग्रहश्च ।
द्विजमुख्यतमः कविर्बभूव प्रथितः शूद्रक इत्यगाधसत्त्वः ॥३॥

साहित्यदर्पणे 'नायिकानायकाख्यानात् संज्ञा प्रकरणादिषु" इत्युक्तेः प्राधिकत्वाभिप्रायात् 'नाम कार्यं नाटकस्य गर्भितार्थप्रकाशकम्' इत्युक्तानुसारात् अस्य नाटकप्रकृतिकत्वाच्च मृच्छकटिकम् इति गर्भितार्थप्रकाशकमेव नाम निर्दिष्टम्। एतच्चास्माभिः साहित्यदर्पणटीकायामप्युक्तम्। प्रकरणलक्षणमाह तत्रैव —

भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम्।
शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक्।
सापायधर्म्मकामार्थपरो धीरप्रशान्तकः ॥

द्विरदेन्द्रेति। द्विरदेन्द्रस्य हस्तिश्रेष्ठस्य गतिरिव गतिर्गमनं यस्य सः हस्तियूथपतिरिव मन्दगमन इत्यर्थः, चकोरः पक्षीव नेत्रं यस्य सः, परिपूर्णं इन्दुश्चन्द्र इव मुखं यस्य सः, शोभनो विग्रहः शरीरं यस्य सः, द्विजेषु क्षत्रियेषु मुख्यतमः स्वजातिधर्म्मपरायणत्वात् प्रधानतमः। न तु ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः इति वचनात् द्विजेषु ब्राह्मणक्षत्रियवैश्येषु मुख्यतमः प्रधानतमो ब्राह्मण एवेति वाच्यम्, समरव्यसनी इति वक्ष्यमाणेन क्षत्रियधर्म्मेण समरव्यसनेन क्षत्रियत्वस्यैव निश्चयात्। तथा अगाधमसीमं सत्त्वं बलं यस्य सः, अतएव शूद्रते शत्रूनिति शूद्रकः पृषोदरादित्वात् साधुः, इति प्रथितः शूद्रक इति नाम्ना प्रसिद्ध इत्यर्थः, कविर्बभूव।

अत्र प्रथमार्द्धे तिसृणां लुप्तोपमानां मिथोनिरपेक्षतया संसृष्टिः।

এই যে মৃচ্ছকটিক নামে প্রকরণ অভিনয় করিতে প্রবৃত্ত হইয়াছি; ইহার কবি—

শূদ্রকনামে প্রসিদ্ধ ছিলেন। তাঁহার গমন করীন্দ্রের ন্যায়, নয়ন চকোর পক্ষীর তুল্য, মুখ পূর্ণচন্দ্রের সমান এবং শরীর পরমসুন্দর ছিল এবং তিনি ক্ষত্রিয়দিগের মধ্যে প্রধান ও অমিত-বল-শালী ছিলেন ॥৩॥

अपि च, (ङ)

ऋग्वेदं सामवेदं गणितमथ कलां वैशिकीं हस्तिशिक्षां ज्ञात्वा, शर्वप्रसादाद्व्यपगततिमिरे चक्षुषी चोपलभ्य ।

कालभारिणी नाम वृत्तम् —विषमे ससजा यदा गुरू चेत् सभरा येन तु कालभारिणीयम् । इति लक्षणात् ॥३॥

(ङ) अपि च अन्यविधगुणभूषितश्चायमित्यर्थः । एवमुत्तरत्रापि ।

ऋग्वेदमिति । शूद्रकः ऋग्वेदम्, सामवेदम्, गणितम् अङ्कशास्त्रम् कलां नृत्यगीतादिचतुःषष्टिप्रकारं कलाशास्त्रम्, विशो वैश्यस्येयमिति वैशिकी कृषिवाणिज्यविद्या ताम्, अथ तथा हस्तिशिक्षां हस्तिभ्यो देयशिक्षां हस्तिशास्त्रमित्यर्थः । अतएव च तत्र विशेषणं पुराणात् परवाङ् परवारणबाहुयुद्धलुब्धः इति । ज्ञात्वा तत्त्विज्ञेभ्यः अवगम्य शर्वस्य महादेवस्य प्रसादादनुग्रहात्, व्यपगतौ विनष्टः तिमिरस्तदाख्यो रोगो ययोस्ते तादृशौ, चक्षुषी नयनद्वयम्, उपलभ्य पुनः प्राप्य च, आदौ द्वयोरेव नयनयोस्तिमिरो नाम रोगो जातः, परन्तु सेवासन्तुष्टशिवानुग्रहात् तद्रोगमुक्तं नवनयुगलं पुनः प्राप्येत्यर्थः, पुत्रं राजानम् आत्मनेव राज्ये अभिषिक्तं वीक्ष्य दृष्ट्वा, परमः साकल्येन महान्, समुदय उपकरणासादनं यस्य तेन, अश्वमेधेन तदाख्येन यागेन, इष्ट्वा यजनं कृत्वा सामान्यव्यापारं प्रति विशेषव्यापारस्य करणत्वाङ्गीकारादुपपत्तिः, अश्वमेधाख्यं यागञ्च कृत्वेत्यर्थः, दशदिनसहितं दशदिवसाधिकम्, शताब्दं शतवत्सरपरिमितम्, आयुः जीवनकालं लब्ध्वा च, अग्निं चिताग्निं प्रविष्टो मृत इत्यर्थः ।

स्रग्धरा वृत्तम् ।

तिमिररोग उक्तो भावप्रकाशे—

"तिमिराख्यः स वै दोषश्चतुर्थं पटलं गतः ।

रुणद्धि सर्वतो दृष्टिं लिङ्गनाश इति क्वचित् ॥"

রাজানং বীক্ষ্য পুত্রং, পরমসমুদয়েনাশ্বমেধেন চেষ্ট্বা,
লব্ধ্বা চায়ুঃ শতাব্দং দশদিনসহিতং শূদ্রকোঽগ্নিং প্রবিষ্টঃ॥৪॥

ননু "নরাশ্বমেধৌ মদ্যঞ্চ কলৌ বর্জ্যৌ দ্বিজাতিভিঃ" ইতি তিথিতত্ত্বধৃতব্রহ্মপুরাণে "দীর্ঘকালং ব্রহ্মচর্য্যং নরমেধাশ্বমেধকৌ" ইত্যাদ্যুদ্বাহতত্ত্বধৃতবৃহন্নারদীয়পুরাণে চ কলাবশ্বমেধনিষেধাৎ শূদ্রকস্য চাপৌরাণিকত্বেন "চাণক্যেনেব দ্রৌপদী"—"যৌগন্ধরায়ণ ইবোদয়নস্য রাজ্ঞঃ" ইতি কলিযুগীয়স্য উদয়নস্য চাণক্যস্য চ উপমাবিন্যাসেন কলিযুগীয়ত্বস্যৈব নিশ্চয়াৎ কথমুক্তং "অশ্বমেধেন চেষ্ট্বা" ইতি চেন্ন, এতন্নিষেধস্য অশ্বমেধনিষ্পাদনে সন্দিগ্ধশক্তিকপরত্বাৎ সন্দিগ্ধশক্তিকস্য চাশ্বমেধানুষ্ঠানপ্রবৃত্তৌ কেবলানর্থপাতস্যৈব সম্ভবাৎ নিশ্চিতশক্তিকস্য তু তন্নিষেধে হেত্বভাবাৎ।

অথ গ্রন্থারম্ভমারভ্য কবিঃ কুর্য্যাৎ ইত্যেবমাদিবাক্যেনালঙ্কারিকৈঃ মঙ্গলাচরণাদিকস্য সকলবিষয়স্যৈব কবেরেব কর্ত্তব্যতোপদেশাৎ মৃতস্য তু কবেস্তৎকরণাসম্ভবাৎ জীবতস্তু অতিকালজ্ঞস্য গণদিনাদিরূপেণ নিজায়ুষ্কালনিরূপণাসম্ভবাৎ "লব্ধ্বা চায়ুঃ শতাব্দং দশদিনসহিতং শূদ্রকোঽগ্নিং প্রবিষ্টঃ" ইত্যুক্তিঃ কথমপি ন সঙ্গচ্ছতে; ইতি চেদত্র ব্রূমঃ—

দশদিনাধিকশতাব্দমায়ুর্লব্ধ্বা শূদ্রকে মৃতে রাজ্যাভিষিক্তাৎ তদাত্মজাৎ লিপ্সিতধনলাভাঙ্গীকারমাসাদ্য সম্পন্নদশালঃ পরং দৈববশাৎ দৈন্যমাপন্নঃ কশ্চন কবিপ্রবরঃ

---

(৪) আর, শূদ্রক ঋগ্বেদ, সামবেদ, অঙ্কশাস্ত্র, নৃত্য-গীতাদি কলাবিদ্যা, কৃষিবাণিজ্যবিদ্যা ও হস্তিশাস্ত্র জানিয়া, মহেশ্বরের অনুগ্রহে তিমিররোগবিহীন নয়নযুগল লাভ করিয়া, পুত্রকে রাজা দেখিয়া, বিপুল আয়োজনে অশ্বমেধযাগ করিয়া এবং একশত বৎসর দশদিন আয়ু পাইয়া, পরে অগ্নিতে প্রবেশ করিয়াছিলেন ॥৪॥

अपि च,

समरव्यसनी प्रमादशून्यः, ककुदं वेदविदां तपोधनश्च ।
परवारणबाहुयुद्धलुब्धः क्षितिपालः किल शूद्रको बभूव ॥५॥

शूद्रककर्त्तृकतापक्षारेण मृच्छकटिकं नामेदं प्रकरणं निर्म्माय तस्मै शूद्रकपुत्राय समर्पयामास। सम्भवति च धनार्थमपि काव्यनिर्म्माणम्। तथा चोक्तम् "काव्यं यशसे ऽर्थकृते" इत्यादि। धावको नाम कविर्लक्षमुद्राविनिमयेन स्वकृतिं रत्नावलीं नाम नाटिकां श्रीहर्षाय राज्ञे ददाविति चालङ्कारिकैर्गीयते "श्रीहर्षादेर्धावकादीनामिव" इति। न च रत्नावल्यामपि समुपलभ्यते तद्विनिमयवार्त्ता; एवमिहापि। अपि च मध्याह्नदिनकरकिरणमध्यवर्त्तिनो जनस्य घनतमसाच्छन्नमहानिशाविभीषिकेव राजचक्रवर्त्तिनः शूद्रकस्य नितान्तनिःस्वचारुदत्तदशा कष्टेनैव कल्पनायामप्याविर्भवति; सुखेनाविर्भवति तु स्वयमेवानुभूयमानतया चारुदत्तवदेव सम्पन्नदशातः परं दैन्यमापन्नस्य जनस्य। सुतरामुक्तः प्रत्यय एव साधीयानिति सुधियः प्रमाणम्।

केचित्तु जीवन्नेव शूद्रको ज्योतिर्गणनाप्रत्ययात् "लब्ध्वा चायुः शताब्दम्" इत्यादिकमाह स्म। "प्रविष्टः" इति तु 'अनागतः' इतिवत् भविष्यति काले क्तप्रत्यय इत्याहुः।

परे तु परप्रक्षिप्तमिदमिति वदन्ति ॥४॥

पुनरपि शूद्रकमेव गुणान्तरेण विशिनष्टि समरेति। शूद्रकः किल शूद्रक इति प्रसिद्धः क्षितिपालो राजा समरे व्यसनी आसक्तिमान्। एतेन महावीर इति ध्वनितम्। वेदविदां ककुदं प्रधानः, तप एव धनं धनवदादरणीयं यस्य सः, परवारणैः शत्रुपक्षीयहस्तिभिः सह बाहुयुद्धे लुब्धः अभिलाषी च बभूव।

এবং সেই রাজা শূদ্রক যুদ্ধোৎসাহী, প্রমাদবিহীন, বেদজ্ঞশ্রেষ্ঠ, তপস্বী ও পরপক্ষীয় হস্তীর সঙ্গে বাহুযুদ্ধাভিলাষী ছিলেন ॥৫॥

अस्याञ्च तत्कृतौ ---(च)

अवन्तिपुर्य्यां द्विजसार्थवाहो युवा दरिद्रः किल चारुदत्तः।
गुणानुरक्ता गणिका च यस्य वसन्तशोभेव वसन्तसेना ॥६॥

एतच्च श्लोकत्रयं भारतीवृत्तेरङ्गम्, कविप्रशंसया तत्प्रबन्धस्यापि प्रशस्यतामूचनेन तव सभ्यानां रुच्युत्पादनात्। यथा साहित्यदर्पणे "उन्मुखीकारः प्रशंसातः प्ररोचना।"

"प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोऽ स्त्रियाम्।" इत्यमरः।

कालभारिणी वृत्तम् ॥५॥

(च) अस्यामिति। शूद्रककृते अस्मिन् प्रकरणे इत्यर्थः।

प्रागेव सभ्यानां सामान्यतो वृत्तान्तावबोधाय नायकं नायिकां रसञ्च सूचयितुमाह अवन्तीति। अवन्तिपुर्य्याम् उज्जयिन्याम्, सार्थं संङ्घिनं वणिक्सम्प्रदायं वहतीति सार्थवाहो वणिक्, द्विजो ब्राह्मणश्चासौ सार्थवाहश्चेति द्विजसार्थवाहो वाणिज्यकारी ब्राह्मण इत्यर्थः, दरिद्रः, चारु देयादिति चारुदत्तः "तिक्कृतौ संज्ञायामाशिषि" इति क्तप्रत्ययान्तः, चारुदत्तो नाम युवा आसीदिति शेषः। यस्य च चारुदत्तस्य, वसन्तस्य ऋतोः पुष्पादिभिः कृता शोभा इव वसन्तस्य उन्मादकस्य ऋतोः सेना इव वसन्तसेना तदाख्या, गुणेन सौन्दर्य्यौदार्य्यादिना अनुरक्ता, गणिका वेश्या, सा तु गणिकाकन्यात्वात् न पुनर्गणिकाचारित्वादिति बोध्यम्।

अत्र श्रौती उपमालङ्कारः।

उपेन्द्रवज्रा वृत्तम् "उपेन्द्रवज्रा प्रथमे लघौ सा" इति लक्षणात् ॥६॥

(চ) তাঁহার কৃত এই মৃচ্ছকটিক প্রকরণে—

উজ্জয়িনীনগরে চারুদত্তনামে, ব্রাহ্মণ জাতীয় অথচ বাণিজ্য-ব্যবসায়ী এক দরিদ্র যুবক ছিলেন এবং বসন্তকালের শোভার ন্যায় বসন্তসেনানামে একটি বেশ্যা, সেই চারুদত্তের গুণে অনুরক্ত হইয়াছিল ॥৬॥

तयोरिदं सत्सुरतोत्सवाश्रयं नयप्रचारं व्यवहारदुष्टताम् ।
खलस्वभावं भवितव्यतां तथा चकार सर्व्वं किल शूद्रको नृपः ॥७॥

तयोरिति । इदं मृच्छकटिकं नाम प्रकरणम्, तयोर्वसन्तसेनाचारुदत्तयोः सत् साधु, यत् सुरतं रमणं तदेव उत्सव आमोदव्यापारः स एव आश्रयो विषयो यस्य तत् । अत्र च शूद्रको नृपः, नयस्य नीतेः प्रचारं परस्तात् प्रायेण सर्व्वत्रैव प्रकाशम्, व्यवहारस्य नवमाङ्के चारुदत्तशकारयोर्विवादविचारस्य, दुष्टतां मृतस्त्रीशरीरमपरीक्ष्यैव निर्वाहितत्वात् असमीचीनताम्, खलानां शकारादीनां स्वभावं चरित्रम्, तथा भवितव्यताम् आर्य्यकराजत्वचारुदत्तमुक्तिप्रभृतिघटिकां नियतिम्, एतत् सर्वं चकार रचितवान् । अतोऽन्येन कविना न किञ्चित् कृतमित्यर्थः ।

अत्र प्रथमचरणात् परम् 'अत' इत्यनभिधानात् न्यूनपदतादोषः, स तु इत्थन्तयोः सत्सुरतोत्सवाश्रये' इति प्रथमचरणपाठेन समाधेयः । द्विजानामसवर्णासु कन्यासूपयमस्तथा इत्यादिकमुद्वाहतत्त्वधृतमादित्यपुराणादिवचनजातमनार्षमेव, किन्तु समाजगतिदर्शिना केनचित् प्रक्षिप्तम् । आर्षत्वेऽपि शूद्रकसमयं यावत् सामाजिकैस्तन्न परिगृहीतम् । अतएव मालविकाग्निमित्रेऽपि 'देव्या वर्णावरो भ्राता' इति दृश्यते । इतश्च वसन्तसेनाया असवर्णत्वेऽपि ब्राह्मणस्य चारुदत्तस्य तत्परिणयो न दोषाय । सुतराञ्च गान्धर्वविवाह-प्रयोजकमिव तयोर्भाविविवाहप्रयोजकं सुरतं निर्द्दोषं परस्परगुणानुरागप्रयुक्तत्वाच्च साध्वेवेति सत्सुरतोत्सवाश्रयम् इत्युक्तमिति दिक् ।

वंशस्थविलं वृत्तम् वदन्ति वंशस्थविलं जतौ जरौ इति लक्षणात् ॥७॥

রাজা শূদ্রক সেই চারুদত্ত ও বসন্তসেনার নির্দোষ রমণোৎসব, নীতির প্রচার, ব্যবহারের (মোকর্দ্দমার) দোষ, খলের চরিত্র এবং দৈব—এই সমস্তই নিবদ্ধ করিয়া গিয়াছেন ॥৭॥

परिक्रम्यावलोक्य च। अये! शून्येयमस्मत्सङ्गीतशाला। क्व नु गताः कुशीलवा भविष्यन्ति?। विचिन्त्य। आं, ज्ञातम्। (छ)

शून्यमपुत्रस्य गृहं, चिरशून्यं नास्ति यस्य सन्मित्रम्।
मूर्खस्य दिशः शून्याः, सर्व्वं शून्यं दरिद्रस्य ॥८॥

(छ) परीति। परिक्रम्य कुशीलवानामन्वेषणार्थं कियन्तं पादक्षेपं कृत्वा। अये इति विषादसूचकमव्ययम्। कुत्सितं शीलमेषामस्तीति कुशीलवा नटाः, केशादित्वात् वप्रत्ययः। आमिति स्मरणार्थमव्ययम्।

अये क्रोधे विषादे च इत्यादिर्मेदिनी। भरता इत्यपि नटाश्चारणाश्च कुशीलवाः इत्यमरः। आं स्मृतौ चावधारणे इति विश्वः।

शून्यमिति। अपुत्रस्य अजातपुत्रस्य मृतपुत्रस्य वा जनस्य, गृहं शून्यं सर्वपदार्थ-रहितमिव प्रतिभातीत्यर्थः चित्तप्रफुल्लतायाः अभावादिति भावः। एवं सर्वत्र। तथा तदेव गृहम्, चिरशून्यं यावज्जीवमेव शून्यम् यस्य जनस्य सत् मित्रं साधुः सखा नास्ति तथा च अविवाहितावस्थायामपुत्रस्यापि गृहं जनकजनन्यादिभिः पूर्णमिव प्रतिभाति तैरेव मनःस्फूर्त्तिसत्त्वात् किन्तु यस्य सन्मित्रं नास्ति तस्य पुत्रादिपरिपूर्णमपि गृहं चिरकालमेव शून्यमिव प्रतिभाति मनःस्फूर्त्तेरभावादिति भावः। मूर्खस्य दिशः स्वभवनं विना अन्या दिशः शून्याः आत्मनः सर्वविषयायोग्यतायाः अभावेन सर्वत्र व्यवहा-रज्ञानाभावादित्याशयः। दरिद्रस्य तु सर्वमेव गृहं दिगादिकञ्च शून्यम्, निर्धनतया

(ছ) (ইতস্ততঃ কয়েক বার পদক্ষেপপূর্ব্বক দর্শন করিয়া)। হায়! আমাদের এই সঙ্গীতশালা যে শূন্য দেখিতেছি। (তা হ'লে) নটগণ কোথায় গেল? (চিন্তা করিয়া) ও! বুঝিতে পারিয়াছি।

অপুত্রক ব্যক্তির গৃহ, শূন্য; যাহার ভাল মিত্র নাই, তাহার গৃহ, চিরকালই শূন্য। মূর্খের সমস্ত দিকই শূন্য; আর দরিদ্রের সকলই শূন্য ॥৮॥

ज्ञातञ्च सङ्गीतकं मया । अनेन चिरसङ्गीतोपासनेन ग्रीष्मसमये प्रचण्डदिनकरकिरणोच्छुष्कपुष्करबीजमिव प्रचलिततारके क्षुधा ममाक्षिणी खटखटायेते (ञ) । तद्यावद्-

सर्वं वैव मनःस्फूर्त्तेरभावादित्यभिप्रायः । एवञ्च ममापि निर्धनतया वेतनलाभाभावात् कुशीलवाः स्वेच्छाचारिणः सन्तः कार्य्यकाल एव यथेष्टस्थानं गता इति श्लोकाशयः ।

अत्र चतुर्ष्वेव चरणेषु चतस्रः प्रतीयमानोत्प्रेक्षाः तथा चा ज्ञातम् इत्यनेन दरिद्रः प्रस्तुतः अपुत्रादयश्चाप्रस्तुताः इतीतरेषां शून्यतारूपैकगुणसम्बन्धात् दीपकालङ्कारः । तथा च अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते इति साहित्यदर्पणलक्षणे अप्रस्तुतप्रस्तुतयोः इति प्रतीयमानत्वेन द्वित्वमविवक्षितम्, तथा तत्र धर्मान्तर्गतगुणस्तु द्रव्यभिन्नो व्यक्तिमन्यादौ ग्राह्य इत्यस्मत्कृताभिनवटीकायाम् । एवमपुत्रादापेक्षया दरिद्रस्य असत्त्वःतेपिशः न्यूनत्वात् व्यतिरेकश्च अमीषां परस्परनिरपेक्षतया संसृष्टः ।

किन्तु एकस्यैव शून्यशब्दस्य पुनः पुनरुपादानेऽपि नानवीकृतत्वदोषः एकविधशब्दप्रयोगस्यैवात्र वैचित्र्याधायकतया रसापकर्षजनकत्वाभावेन सहृदयानामुद्वेगाजनकत्वात् ।

आर्य्या जातिः —यस्याः पादे प्रथमे द्वादशमात्रास्तथा तृतीयेऽपि ।

अष्टादश द्वितीये चतुर्थके पञ्चदश सार्य्या ॥

इति लक्षणात् ॥८॥

(ञ) ज्ञातञ्चेति । चिरं दीर्घकालं सङ्गीतस्य उपासनेन करणेन तत् परिश्रमेणेत्यर्थः । प्रचण्डाः प्रखरा ये दिनकरकिरणास्तैरुच्छुष्कं नितान्तशुष्कं यत् पुष्करं पद्मं तस्य बीजमिव । प्रचलिते घूर्णिते तारके ताराद्वयं ययोस्ते । अक्षिणी

(ঞ) আমি সঙ্গীত করিয়াছি। দীর্ঘকাল এই সঙ্গীত করায়, গ্রীষ্মকালে প্রচণ্ড সূর্য্যের কিরণে শুষ্ক পদ্মের বীজের ন্যায় আমার নয়নযুগল ক্ষুধায় খট খট করিতেছে এবং তারা দুইটী ঘুরিতেছে!

गृहिणीमाहूय पृच्छामि, अस्ति किञ्चित् प्रातराशो नवेति (झ)। एषोऽस्मि भोः! कार्य्यवशात् प्रयोगवशाच्च प्राकृत-भाषी संवृत्तः। (ञ)

अविद अविद भो! चिरसंगीदोवासणेण सुक्खपोक्खरणालाइं विअ मे बुभुक्खाए मिलाणाइं, अङ्गाइं ता जाव गेहं

(ट) अविद अविद भोः! चिरसङ्गीतोपासनेन शुष्कपुष्करनालानीव मे बुभुक्षया म्लानान्यङ्गानि। तद् यावत् गृहं गत्वा जानामि

नयनद्वयम्। खटखटायेते खटखटं कुरुतः। अत्रोपमालङ्कारः।

(झ) तदिति। प्रातरश्यत इति प्रातराशः प्रातःकालीयखाद्यम् पूर्वाह्णपक्वान्नादेः मध्याह्नभोजनेनैव निःशेषितत्वात् इदानीञ्च रात्रियामार्द्धकाले रात्रिपाकसम्पन्नताया असम्भवात् प्रातःकाले यच्चिपीटकादिकं भुज्यते तदस्ति न वेत्यर्थः।

(ञ) एष इति। भो इति सभ्यानां सम्बोधनम्। कार्य्यवशात् स्त्रिया सार्द्धमालापरूपप्रयोजनवशात्। संस्कृतभाषाव्यवहारे सा यदि सर्वं नावबुध्येतेति भावः। प्रयोगवशाच्च कार्य्यतश्चोत्तमादीनां कार्य्यो भाषाविपर्य्ययः इति दर्पणकृदादिभिरालङ्कारिकैः प्रयोजनविशेषे सति उत्तमादीनामपि पात्राणां भाषान्तरव्यवहारनियोगवशाच्चेत्यर्थः।

(ट) अविदेति। अविदेति प्राकृतादिभाषायां खेदविस्मयसूचकमव्ययम्। तस्याभिरुक्तिर्द्विरुक्तिः। शुष्कं यत् पुष्करं पद्मं तस्य नालानि दण्डानि। बुभुक्षया क्षुधा। कुटुम्बिन्या भार्य्यया। भार्य्या जायाथ पुंभूम्नि दाराः स्यात्तु कुटुम्बिनी इत्यमरः।

(ঝ) অতএব গৃহিণীকে ডাকিয়া জিজ্ঞাসা করি '—প্রাতঃকালের খাদ্য কিছু আছে কিনা (ঞ) সভ্য মহাশয়গণ! প্রয়োজনও নিয়ম-বশতঃ এই আমি প্রাকৃতভাষাভাষী হইলাম।

गदुअ आणामि, अत्थि किंपि कुडुम्बिणीए उववादिदं ण वेत्ति (ट)। परिक्रम्यावलोक्य च। एदं तं अम्हाणं गेहं, ता पविसामि। प्रविश्यावलोक्य च। हीमाणहे! किं णु क्खु अम्हाणं गेहे अवरं विअ संविहाणअं वट्टदि। आआमितण्डुलोदअप्पवाहा रच्छा, लोह-कडाह-परिवत्तण-कसणसारो किद-विसेसआ विअ जुअदो अहिअदरं सोहदि भूमी। सिणिद्धेण गन्धेण उद्दीवन्तो विअ अहिअं बाधेदि मं बुभुक्खा।

अस्ति किमपि कुटुम्बिन्या उपपादितं न वेति। (ठ) इदं तदस्माकं गृहम्, तत् प्रविशामि। आश्चर्य्यम्! किं नु खलु अस्माकं गृहे अपरमिव संविधानकं वर्त्तते। आयामितण्डुलोदकप्रवाहा रथ्या, लोह-कटाह-परिवर्त्तन-कृष्णसारा कृतविशेषका इव युवती अधिकतरं शोभते

(ठ) इदमिति। संविधानकम् आयोजनम्। स्वार्थे कप्रत्ययः। आयामिनः सुदीर्घा दूरगामिनः तण्डुलोदकानां तण्डुलप्रक्षालनजलानां प्रवाहा यस्यां सा लोहकटाहानां परिवर्त्तनेन चुल्लीभ्य आनीय स्थापनेन कृष्णः कृष्णवर्णः सारः प्रधानांशो यस्यां सा अतएव कृतौ विशेषकौ मसीतिलकौ यस्याः सा तादृशी युवतीव। अत्रोपमालङ्कारः। उद्दीप्यमानेव वर्द्धमानेव। पूर्वेण पूर्ववर्त्तिना केनचित् जनेन विहितं कृत्वं भूगर्भे प्रोथितमित्यर्थः, निधानं निधिः धनम् इति यावत्, उपपन्नम् लब्धम्। निखिलाभिऽपि आत्मीयभोजनादिभिरुत्सवः क्रियते लोकैरिति हि रीतिः। ओदनमयम् अन्नमयम्।

(ট) হায়! হায়! দীর্ঘকাল সঙ্গীত করায় আমার অঙ্গসমূহ শুষ্ক পদ্মের নালের ন্যায়, ক্ষুধায় ম্লান হইয়া গিয়াছে। অতএব ঘরে যাইয়া জানি যে, গিন্নী কিছু তৈয়ারী করিয়া রাখিয়াছে কি না। (ঠ) (ই ভস্তত

ता किं पुव्वविहिदं णिहानं उववस्नं भवे ? आदु अहं ज्जेव बुभुक्खादो ओदणमअं जीअलोअं पेक्खामि (ढ) णत्थि किल पादरासो अम्हाणं गेहे । पाणाच्चअं बाधेदि मं बुभुक्खा । इध सव्वं णवं विअ संविहाणअं वट्टति । एक्का वण्णअं पीसेदि, अवरा सुमणाइं गुम्फेदि (ड) । विचिन्त्य ।

भूमिः । स्निग्धेन गन्धेन उद्दीप्यमानेव अधिकं बाधते मां बुभुक्षा ।] तत् किं पूर्वविहितं निधानम् उपपन्नं भवेत् ? अथवा अहमेव बुभुक्षातः ओदनमयं जीवलोकं प्रेक्षे । (ढ) नास्ति किल प्रातराशोऽस्माकं गृहे । प्राणात्ययं बाधते मां बुभुक्षा । इह सर्वं नवमिव संविधानकं वर्त्तते । एका वर्णकं पिनष्टि, अपरा सुमनसः गुम्फति । (ड)

(ड) नास्तीति । प्राणानामत्ययो विनाशो यस्मिन् कर्म्मणि तद्यथा तथा । संविधानकम् आयोजनम् । एका काचित् स्त्री वर्णकं हरिद्रादिरञ्जकद्रव्यम् पिनष्टि चूर्णयति । सुमनसः कुसुमानि गुम्फति ग्रथ्नाति ।

কয়েকবার পদক্ষেপপূর্ব্বক দর্শন করিয়া) এই আমাদের সেই ঘর, অতএব প্রবেশ করি। (প্রবেশপূর্ব্বক দর্শন করিয়া) কি আশ্চর্য্য ! আমাদের বাড়ীতে অন্য কোন সমারোহ উপস্থিত হইয়াছে নাকি ? চাউল ধোয়া জলের ধারা, রাস্তার বহুদূরে চলিয়াছে ; লোহার কড়ার কালী লাগায় ভূমিখানি, কৃষ্ণতিলকধারী যুবতীর ন্যায় অধিক শোভা পাইতেছে, ক্ষুধানল স্নিগ্ধগন্ধে উদ্দীপিত হইয়া আমাকে অধিক পীড়া দিতেছে। তবে কি পূর্ব্ব কোন ব্যক্তির রক্ষিত ধনভাণ্ডার পাওয়া গিয়াছে ? না আমিই ক্ষুধার জ্বালায় জগৎটাকে অন্নময় দেখিতেছি। (ঢ) আমাদের ঘরে প্রাতঃকালের খাদ্য কিছু নাই। এদিকে ক্ষুধা আমাকে এত পীড়া দিতেছে যে, প্রাণ যেন বাহির

কিং ণ্বেদং। ভোদু, কুড়ুম্বিণীং সদ্দাবিঅ পরমত্থং জাণিস্সং। (নেপথ্যাভিমুখমবলোক্য) অজ্জে! ইদো দাব। (ঢ)

নটী। (প্রবিশ্য) অজ্জ! ইঅম্হি। (ণ)

সূত্র। অজ্জে! সাঅদং দে? (ত)

কিন্নু ইদম্। ভবতু, কুটুম্বিনীং শব্দায়িত্বা পরমার্থং জ্ঞাস্যামি। আর্য্যে! ইতস্তাবৎ।

(ণ) আর্য্য! ইয়মস্মি। (ত) আর্য্যে! স্বাগতং তে?

(ঢ) কিন্নু ইতি। কুটুম্বিনীং ভার্য্যাম্ শব্দায়িত্বা আহূয় পরমার্থং যথার্থ-বৃত্তান্তম্। বাচ্যৌ নটীসূত্রধারাবার্য্যনাম্না পরস্পরম্ ইতি সাহিত্যদর্পণাৎ আর্য্যে ইতি নট্যাঃ সম্বোধনম্। ইত আগম্যতামিতি শেষঃ।

(ণ) নটীতি। ইয়মহম্ অস্মি আগতাস্মীত্যর্থঃ।

(ত) সূত্রেতি। স্বাগতং সুখেনাগমনং কিমিতি কাকুঃ। আদরপ্রদর্শনায়োক্তিরিয়ম্।

হইয়া যাইতেছে। এখানে সমস্তই যেন নূতন আয়োজন হইয়াছে। একটী স্ত্রীলোক হরিদ্রা চূর্ণ করিতেছে; অপর একটী ফুলের মালা গাঁথিতেছে। (ঢ) (চিন্তা করিয়া) এ ব্যাপারটা কি? হউক; গিন্নীকে ডাকিয়া যথার্থ বৃত্তান্ত জানিব (নেপথ্যের দিকে দৃষ্টিপাত করিয়া) আর্য্যে! এদিকে (আইস)।

(ণ) নটী। (প্রবেশ করিয়া) আর্য্য! এই আমি (আসিয়াছি)।

(ত) সূত্র। আর্য্যে! তোমার শুভাগমন ত?

नटी । आणवेदु अज्जो, को णिओओ अणुचिट्ठीअदुत्ति । (थ)

सूत्र । अज्जे ! । चिरसङ्गीदोवासणेन इत्यादि पठित्वा । अत्थि किं पि अम्हाणं गेहे असिदव्वं ण वेत्ति । (द)

नटी । अज्ज ! सव्वं अत्थि । (ध)

सूत्र । किं किं अत्थि ? । (न)

नटी । तं जधा गुड़ोदणं, घिअं, दही, तण्डुलाइं, अज्जेण अत्तव्वं रसाअणं सव्वं अत्थि त्ति । एव्वं दे देवा आसासेदु । (प)

(थ) आज्ञापयतु आर्य्यः, को नियोगः अनुष्ठीयतामिति ।

(द) आर्य्ये ! अस्ति किमपि अस्माकं गेहे अशितव्यं न वेति ।

(ध) आर्य्य ! सर्वमस्ति । (न) किं किमस्ति ? ।

(प) तद्यथा—गुड़ोदनम्, घृतम्, दधि, तण्डुलाः, आर्य्येण अत्तव्यम् रसायनम्,— सर्वमस्तीति । एवं ते देवा आशासन्ताम् ।

(थ) नटीति । नियोगो भवत आदेशः अनुष्ठीयतां सम्पाद्यतां मयेति शेषः । इति आज्ञापयतु इत्यन्वयः ।

(द) सूत्रेति । अशितव्यं भोक्तव्यम् ।

(प) नटीति । —गुड़श्च ओदनमन्नञ्चेति गुड़ोदनम् । व्यञ्जनविशेषकाणाम् इति समाहारद्वन्द्वे नपुंसकत्वम् । अथवा गुड़युक्तमोदनं गुड़ौदनम् अत्तव्यं

পাইে (থ) নটী। আপনি আদেশ করুন আমি আপনার কোন নি

দিতেছে অনুষ্ঠান করিব।

গিয়াছে (দ) সূত্র। আর্য্যে (দীর্ঘকাল সঙ্গীত করায় ইত্যাদি বলি

(চ) আমাদের ঘরে কিছু খাদ্য আছে কিনা ?।

এখি (ধ) আর্য্য ! সমস্তই আছে।

সূত্র। কিং অম্হাণং গেহে সব্বং অত্থি, আদু পরিহ-সসি?। (ফ)

নটী। স্বগতম্। পরিহসিস্সং দাব। প্রকাশম্। অজ্জ! অত্থি আবণে। [ব]

সূত্র। সক্রোধম্। আঃ, অণজ্জে! এব্বং দে আসা ছিজ্জিস্সদি

(ফ) কিমস্মাকং গৃহে সর্বমস্তি? অথবা পরিহসসি?।

(ব) পরিহসিষ্যামি তাবৎ। আর্য্য! অস্তি আপণে।

(ভ) আঃ অনার্য্যে! এবং তে আশা ছেৎস্যতি, অভাবঞ্চ গমিষ্যসি

লীতব্যম্ রসানাং স্বাদুরসানাম্ অয়নম্ আশ্রয়ীভূতং পায়সপিষ্টকাদি। ইত্যাদিকং সর্বমস্তীত্যর্থঃ। তে তব সম্বন্ধে দেবাঃ এবম্ এতেষামুক্তানাং দ্রব্যাণামস্তিত্বম্, আশাসন্তাম্ আশীর্বাদবিষয়ীকুর্বন্তাম্। এবমিত্যাদিকন্তু স্বগতবদুক্তমিতি বোধ্যম্। অন্যথা সূত্রধারস্য নাস্তিত্বপ্রত্যয়ঃ স্যাৎ।

(ব) নটীতি। আপণে পণ্যবিক্রয়গৃহে। ন তু স্বগৃহে ইত্যাশয়ঃ।

(ভ) সূত্রেতি। এবমিত্থম্। ছেৎস্যতি ছিন্নাভগ্নাভবিষ্যতি। অকর্ম্মকত্ব-বিবক্ষা। অভাবম্ এতেষাং দ্রব্যাণামিতি শেষঃ, গমিষ্যসি প্রাপ্স্যসি। বরস্তন-

(ন) সূত্র। কি কি আছে?।

(প) নটী। তাহা শুনুন—গুড়, ভাত, ঘী, দই, চাউল এবং আপনার যাহা যাহা খান, সেই সব পাকে পায়সপ্রভৃতি আছে। দেবতারা আপনাকে এইরূপ আশীর্বাদ করুন।

(ফ) সূত্রধার। কি আমাদের ঘরে সব আছে? না পরিহাস করিতেছ?।

(ব) নটী। (স্বগত) পরিহাস করিব। (প্রকাশে) আর্য্য! দোকানে আছে।

अभावं अ गमिस्ससि; जं दाणीं अहं वरण्डलम्बुओ विअ दूरं उक्खिविअ पाड़िदो। [भ]

नटी। मरिसेदु मरिसेदु अज्जो। परिहासो क्खु मए किदो। [म]

सूत्र। ता किं उण इदं णवं विअ संविहाणअं वट्टदि, एक्का वसअं पीसेदि, अवरा सुमनाओ गुम्फेदि, इअं अ पञ्चवण्णकुसुमोवहारसोहिदा भूमी। [य]

यदिदानीमहं वरण्डलम्बुक इव दूरमुत्क्षिप्य पातितः।

(म) मृष्यतु मृष्यतु आर्य्यः। परिहासः खलु मया कृतः।

(य) तत् किं पुनरिदं नवमिव संविधानकं वर्त्तते? एका वर्णकं पिनष्टि, अपरा सुमनसो गुम्फति, इयञ्च पञ्चवर्णकुसुमोपहार-शोभिता भूमिः।

म्बुको गुटिका। तथा च यथा खेलाविशेषे गुटिका उत्थाप्य पात्यते, तथापि आशां दत्त्वा पुनरहं निराशः कृत इति भावः। पृथ्वीधरस्तु वरण्डो दीर्घकाष्ठं तस्य लम्बुकस्तत्प्रान्तनिबद्धो मृत्तिकास्थूणः। स हि द्रोण्यां पानीयोद्धारे दूरमुत्थाप्य अधः पात्यते इत्याह।

(म) नटेति। मृष्यतु क्षमताम्।

(ভ) সূত্রধার। (ক্রোধের সহিত) আঃ অনার্য্যে! তোর আশাও এই ভাবে ছিন্ন হইবে এবং তুইও এইসব জিনিষের অভাব অনুভব করিবে। যে হেতু, তুই এখন আমাকে দোলফুলখেলার গুটীর মত দূরে উঠাইয়া ফেলিয়া দিয়াছিস্।

(ম) নটী। আর্য্য! ক্ষমা করুন ক্ষমা করুন। আমি পরিহাসই করিয়াছি।

(য) সূত্রধার। তবে এই সব যেন নূতন আয়োজন হইয়াছে

प्रथमोऽङ्कः ।

नटी । अज्ज उववासो गहिदो । [र]

सूत्र । किंणामधेओ अअं उववासो ? । [ल]

नटी । अहिरूववदी णाम । [व]

सूत्र । अज्जे ! इहलोइओ, आदु पारलोइओ ? । [श]

(र) आर्य्ये ! उपवासो गृहीतः ।

(ल) किं नामधेयोऽयमुपवासः ? ।

(व) अभिरूपपतिर्नाम ।

(श) आर्य्ये ! इहलौकिकः, अथवा पारलौकिकः ? ।

(य) सूत्रेति । पञ्चवर्णानां रक्तनील पीत-कृष्ण-शुभ्राणां कुसुमानाम् उपहारेण निर्व्वपेण शोभिता ।

(र) नटीति । उपवास उपवासात्मकं व्रतम् ।

(व) नटेति । अभिरूपः सुन्दरः पतिर्य्यस्मात् सः । अनेनोपवासेन पतिः सुन्दरो भवतीत्यर्थः । एतेन सूत्रधारस्य कुरूपत्वं सूचितम् ।

(श) सूत्रेति । इह लोके भव इहलौकिकः । क्वचिदुत्तरपदस्य इति परपदे वृद्धिः । ऐहिक एव पत्यौ अभिरूपतासम्पादक इत्यर्थः । परलोके भव इति पार-

---

কেন? এক জন হরিদ্রা চূর্ণ করিতেছে; অপরে ফুলের মালা গাঁথিতেছে এবং পাঁচ রঙ্গের ফুল ছড়াইয়াদেওয়ায় এই জায়গাখানি বেশ দেখা যাইতেছে।

(র) নটী। আর্য্য! আমি একটি উপবাস আরম্ভ করিয়াছি।

(ল) সূত্রধার। এই উপবাসের নাম কি?।

(ব) নটী। ইহার নাম অভিরূপপতি।

(শ) সূত্রধার। আর্য্যে! ইহার ফল কি ইহ লোকেই হইবে? না পরলোকে?।

नटी । अज्ज ! पारलोइओ । (ष)

सूत्र । सरोषम् । पेक्खन्तु पेक्खन्तु अज्ज मिस्सा, ममकेरकेण भत्तपरिव्वएण (१) पारलोइओ भत्ता अन्नेसीअदि । [स]

नटी । अज्ज ! पसीद पसीद । तुमं ज्जेव मम जम्मन्तरे वि भत्ता भविस्ससि त्ति । [२] [ह]

(ष) आर्य्य ! पारलौकिकः ।

(स) प्रेक्षन्ताम् प्रेक्षन्ताम् आर्य्यमिश्राः, मदीयेन भक्तपरिव्ययेन पारलौकिको भर्त्ता अन्विष्यते ।

(ह) आर्य्य ! प्रसीद प्रसीद । त्वमेव मम जन्मान्तरेऽपि भर्त्ता भविष्यसीति ।

लौकिकः । क्वचिदुभयपदस्य त्वुभयपद एव वृद्धिः । जन्मान्तरीयपत्यन्तरे अभिरूप-तात्पर्ययोजक इति तात्पर्य्यम् ।

(स) सूत्रेति । भक्तपरिव्ययेन अन्नव्ययेन । भक्तानां मदीयतया तद्व्ययस्यापि मदीयत्वमेवेति सामानाधिकरण्योपपत्तिः । भर्त्ता अभिरूपाकृतिरिति शेषः । यदीय-द्रव्यं तस्यैवोपकारकरणं न्याय्यमिति मदीयभक्तव्ययेन जन्मान्तरीयपत्यन्तरस्य उपकार-चिकीर्षा नितरामेवान्याय्येति भावः ।

(ह) नटीति । त्वमेवेति । पूर्वजन्मनि या विद्या पूर्वजन्मनि यद्धनं । पूर्वजन्मनि या नारी अग्रे धावति धावति । इति स्मरणादित्याशयः । इति अतः तवैवाभिरूपता सम्पादकत्वान्न मम अन्याय्याचरणमिति भावः ।

(ष) नटी । আর্য্য ! পরলোকে হইবে ।

(স) সূত্রধার । (ক্রোধের সহিত) মহাশয়গণ ! দেখুন দেখুন ! আমার অন্ন ব্যয় করিয়া পরলোকের (সুন্দর) স্বামী খুজিতেছে ।

---

(१) मइएण भत्तपरिव्वएण । (२) ... भविस्ससि त्ति उवक्खिदहि ।

सूत्र । अअं उववासो केण दे उवदिट्ठो ? । [१] [घ]

नटी । अज्जस्स ज्जेव पिअवअस्सेण चुसवुड्ढेण । [२] (क)

सूत्र । सकोपम् । आः दासीए पुत्ता चुन्नवुड्ढा ! कदा णु क्खु तुमं कुविदेण रन्ना पालएण णववहूकेसकलावं विअ सुअन्धं [३] कपिज्जन्तं पेक्खिस्सम् । [ख]

(घ) अयमुपवास: केन ते उपदिष्ट: ? ।

(क) आर्य्यस्यैव प्रियवयस्येन चूर्णवृद्धेन ।

(ख) आ दास्या: पुत्र ! चूर्णवृद्ध ? कदा नु खलु त्वां कुपितेन राज्ञा पालकेन नववधूकेशकलापमिव सुगन्धं कर्त्यमानं प्रेक्षिष्ये ।

(क) नटीति । आर्य्यस्यैव, न पुनर्मम ; प्रियवयस्येन, ननु, आत्मना ; अतो न प्रतारणाया: सम्भावनेति भाव: । चूर्णेन इष्टकादिचूर्णकरणेन चूर्ण-विक्रयेण वा वृद्धो वृद्धिमुन्नतिं प्राप्त इति यथाकथञ्चित् व्युत्पत्ति: ।

(ख) सूत्रेति । पालकेन तदाख्येन । ईषाभावादाह नववधूकेशकलापमिव इति । तथा चाह कातन्त्रवृत्तौ दुर्गसिंह: सुखयितार: आश्लिष्टाङ्गना अथ सुरताः इति । पुष्पमाल्येन सुरभितैलेन च शोभनो गन्ध: ।

(ঘ) নটী । আর্য্য ! প্রসন্ন হউনপ্রসন্নহউন । পরলোকেও আপনিই আমার স্বামী হইবেন ।

(ক্ষ) সূত্রধার । তোমাকে এই উপবাস করিতে কে উপদেশ দিয়াছে ? ।

(ক) নটী । আপনারই প্রিয় সখা চূর্ণবৃদ্ধ ।

(খ) সূত্রধার । (ক্রোধের সহিত) আ বাঁদীর পো চূর্ণবৃদ্ধ !

---

(১) अअमअं उववासो केण उवदिट्ठो । (२) चुसवुड्ढेन (३) केसहत्थं विअ सअन्धं ।

নটী। পসীদদু অজ্জো। অজ্জস্স জ্জেব পারলোইঅো অঅং উববাসো [১]। ইতি পাদয়োঃ পততি। [গ]

সূত্র। অজ্জে! উট্ঠেহি, কধেহি এত্থ উববাসে কেণ কজ্জং?। [২] [ঘ]

নটী। অম্হারিসজণজোগ্গেণ বম্হণেণ উবনিমন্তিদেণ। [ঙ]

(গ) প্রসীদতু আর্য্যঃ! আর্য্যস্যৈব পারলৌকিকঃ অয়মুপবাসঃ।

(ঘ) আর্য্যে! উত্তিষ্ঠ, কথয় অত্র উপবাসে কেন কার্য্যম্?।

(ঙ) অস্মাদৃশজনযোগ্যেন ব্রাহ্মণেন উপনিমন্ত্রিতেন।

(গ) নটীতি। আর্য্যস্যৈব ভবত এব পারলৌকিকঃ—জন্মান্তরে অভিরূপতা—রূপ-ফলসম্পাদকঃ।

(ঘ) সূত্রেতি। কেন জনেন কার্য্যং প্রয়োজনম্।

(ঙ) নটীতি। অস্মাদৃশজনস্য দরিদ্রলোকস্য যোগ্যেন দরিদ্রতয়া উপযুক্তেন উপনিমন্ত্রিতেন ভোজনার্থমাহূতেন কার্য্যমিতি পূর্ব্বেণান্বয়ঃ। উৎকৃষ্টভোজিনো ধনিনো

রাজা পালক ক্রুদ্ধ হইয়া নব বধূর কেশকলাপের ন্যায় কখন তোকে সুগন্ধ অবস্থায় কাটিয়া ফেলিবেন, তাহা আমি দেখিব?।

(গ) নটী। আপনি প্রসন্ন হউন। আপনারই পরলোকীয় ফল-জনক এই উপবাস। (এই বলিয়া পায়ের উপর পড়িল।)

(ঘ) সূত্রধার। আর্য্যে! উঠ, বল—এই উপবাসে কাহাদ্বারা প্রয়োজন সিদ্ধ হইবে?।

(ঙ) নটী। আমাদের মত লোকের পক্ষে উপযুক্ত নিমন্ত্রিত ব্রাহ্মণদ্বারা।

(১) পসীদদু পসীদদু অজ্জো। ণং অজ্জস্স জ্জেব পারলোইঅো অঅং উববাসো অণুচিট্ঠীঅদি (২) ... উট্ঠেহি উট্ঠেহি কধেহি কধেহি ইধ...।

सूत्र। तेन हि गच्छदु अज्जा। अहं पि अम्हारिसजण-जोग्गं बम्हणं उवणिमन्तेमि। [च]

नटी। जं अज्जो आणवेदि। इति निष्क्रान्ता। [छ]

सूत्र। परिक्रम्य! हीमाणहे! ता कधं मए एव्वं सुसमिद्धाए उज्जइणीए अम्हारिसजणजोग्गो बम्हणो अण्णेसितव्वो। विलोक्य। एसो चारुदत्तस्स मित्तं मित्तेओ इधो ज्जेव आअच्छदि

(च) तेन हि गच्छतु आर्य्या। अहमपि अस्मादृशजनयोग्यं ब्राह्मणमुपनिमन्त्रयामि।

(छ) यदार्य्य आज्ञापयति।

(ज) आश्चर्य्यम्? तत् कथम् मया एवं सुसमृद्धायामुज्जयिन्याम् अस्मादृशजनयोग्यो ब्राह्मणः अन्वेष्टव्यः। एष चारुदत्तस्य मित्रं मैत्रेय

दरिद्रगृहे निकृष्टभोजनं दुःखकरमेवेति, ततः पुण्यवैपरीत्येन पापमेव स्यादिति न तेन प्रयोजनमिति भावः।

(च) सूत्रेति। अस्मादृशजनयोग्यं दरिद्रमित्यर्थः। स्वगृह एव व्रतानुष्ठाने तत्र च ब्राह्मणभोजनावश्यकत्वे तत् पूर्वमेवात्मनो भोजनमन्याय्यम्, अभुक्ता स्थितौ च दारुणक्षुधायातना इत्यतः सत्वरतार्थं सूत्रधारस्य आत्मन एव ब्राह्मणनिमन्त्रणाग्रह इति बोध्यम्।

(छ) सूत्रेति। एवम् इत्थम्। मैत्रेयो नाम। अशितुं भोक्तुम् अग्रणीः अग्रवर्त्ती आर्य्योभवान्। एतेनान्योऽपि ब्राह्मणा निमन्त्रणीया इति सूचितम्। सुद्रेषु

(চ) সূত্রধার। তাহা হইলে তুমি যাও, আমিও আমাদের মত লোকের উপযুক্ত ব্রাহ্মণ নিমন্ত্রণ করি।

(ছ) নটী। আর্য্য যাহা আদেশ করেন। (এই বলিয়া নিষ্ক্রান্ত হইল)।

ভোদু, পুচ্ছিস্সং দাব। অজ্জ মিত্তেঅ! অম্হাণং গেহে অসিদুং অগ্গণী ভোদু অজ্জো। (জ)

নেপথ্যে। ভোঃ! অস্সং বম্হণং উবণিমন্তেদু ভবম্। বাবুদো দাণিং অহম্। [ঝ]

ইত এব আগচ্ছতি। ভবতু, পৃচ্ছামি তাবৎ। আর্য্য! মৈত্রেয়! অস্মাকং গেহে অশিতুমগ্রণীর্ভবতু আর্য্যঃ!

ঝ) ভোঃ! অন্যং ব্রাহ্মণমুপনিমন্ত্রয়তু ভবান্। ব্যাপৃত ইদানীমহম্।

ক্ষামগোপাল কুলমিত্রাদিমৌরিণাম্। ভোজ্যান্নতা গৃহস্থস্য ইত্যাদ্যুদাহৃতত্বষ্টতব্রহ্মপুরাণীয়নিষিধস্য তদানীমপিসাধারণসামাজিকৈরপরিগৃহীতত্বাৎ সূত্রধারস্য মৈত্রেয়কুলমিত্রত্বাচ্চ উত্তমব্রাহ্মণ এব চারুদত্তমিত্রং মৈত্রেয়ঃ সূত্রধারেণ ভোক্তুং নির্বাচিতমাসন্ন্যাত ইতি বোধ্যম্।

(ঝ) নেপথ্য ইতি। নেপথ্যং বেশরচনাস্থানম্। ব্যাপৃতঃ কার্য্যান্তরে বিশেষেণাসক্তঃ। অতএব ভোজনার্থং ন বিলম্বিতুমর্হামীতি ভাবঃ। নৈবং প্রত্যোকরমিতম্।

(জ) সূত্রধার। (পদক্ষেপ করিয়া) কি আশ্চর্য্য! তা আমি এইরূপ সুসমৃদ্ধ উজ্জয়িনীনগরে কি করিয়া, আমাদের মত লোকের উপযুক্ত ব্রাহ্মণ অন্বেষণ করিব। (দেখিয়া) এই যে চারুদত্তের মিত্র মৈত্রেয় এদিকেই আসিতেছেন। হউক, জিজ্ঞাসা করিব। আর্য্য! মৈত্রেয়, আমাদের গৃহে ভোজন করিবার নিমিত্ত আপনি অগ্রগামী হউন।

(ঝ) নেপথ্যে। মহাশয়! আপনি অন্য ব্রাহ্মণকে নিমন্ত্রণ করুন! আমি এখন কার্য্যান্তরে ব্যাপৃত রহিয়াছি।

सूत्र। अज्ज! सम्पण्णं भोअणं णीसवत्तं अ। अविअ-दक्खिणा कावि दे भविस्सदि। [ज]

पुनर्नेपथ्ये। भोः जं दाणिं पढमं ज्जेव पच्चादिट्ठोसि, ता को दाणिं दे णिब्बन्धो पदे पदे मं अणुबन्धेदुम्। [१] [ट]

(ज) आर्य्य! सम्पन्नं भोजनं निःसपत्नञ्च। अपि च दक्षिणा कापि ते भविष्यति।

(ट) भोः! यदिदानीं प्रथममेव प्रत्यादिष्टोऽसि; तत् क इदानीं ते निर्बन्धः पदे पदे मामनुबन्धुम्।

(ज) सूत्रेति। भुज्यते यत् तत् भोजनं खाद्यमन्नव्यञ्जनादिकम् सम्पन्नं सर्वथा निष्पन्नम्। अतो न विलम्बसम्भव इति भावः। ननु पीठपात्रादिसम्पादने-नापि कथञ्चिद्विलम्बो भविष्यतीत्याह निःसपत्नञ्चेति। निर्गं विद्यन्ते सपत्नाः प्रतिपक्षाः अपरे भोजकाः यस्य तत् तादृशम्। भवन्तं विना अन्यः कश्चिदपि भोजको नास्तीति ततः पीठपात्रादिसम्पादनेनापि न विलम्बसम्भावनेति भावः। विशेषेण प्रलोभनार्थमाह अपि च दक्षिणेत्यादि।

(ट) पुनरिति। पदे पदे प्रतिपदक्षेपम्, अनुबन्धुं योजनाय अनुरोद्धुम्। निर्बन्ध आग्रहातिशयः। इदमपि नेपथ्यस्यैवोक्तम्।

(ঞ) সূত্রধার। আর্য্য! খাদ্য প্রস্তুত, কোন বাধাও আর নাই আপনার দক্ষিণাও কিছু হইবে।

(ট) পুনরায় নেপথ্যে। মহাশয়! প্রথমেই যে আপনাকে আমি প্রত্যাখ্যান করিয়াছি; তথাপি প্রত্যেক পদক্ষেপে আমাকে অনুরোধ করিবার জন্য আপনার এ কোন্ আগ্রহ!।

सूत्र । पञ्चादिट्ठोह्मि एदिणा । भोदु, अण्णं वम्हणम् उवणिमन्तेमि । (ठ) । इति निष्क्रान्तः ।

आमुखम् । [२] [ड]

(ठ) प्रत्यादिष्टोऽस्मि एतेन । भवतु, अन्यं ब्राह्मणमुपनिमन्त्रयामि ।

(ठ) सूत्रेति । एतेन मैत्रेयेण । अन्यमिति । अन्यथा ममापि भोजनं न स्यात्, तथा च सति दारुणक्षुधायातनेयं दुःसहैव तिष्ठेदिति भावः ।

(ड) आमुखमिति । आ सम्यक् मुखम् अभिनेयवस्तुन आद्यभाग इत्यामुखम् । तच्च प्रस्तावना । तथा च साहित्यदर्पणे—

'नटी विदूषको वापि पारिपार्श्विक एव वा ।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते ॥
चित्रैर्वाक्यैः स्वकार्य्योत्थैः प्रस्तुताक्षेपिभिर्मिथः ।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा ॥'

इदञ्च आमुखं प्रयोगातिशयो नाम । तथा चात्र नट्या व्रतविषयकालोचनारूपे एकस्मिन् प्रयोगे प्रचरति सति "एसो च रुदत्तस्स मित्तं मित्तेओ इधो ज्जेव आअच्छदि" इत्यादिप्रयोगान्तरप्रयोगेण मैत्रेयरूपपात्रस्य प्रवेशः सञ्जात इति । यथा साहित्यदर्पणे—

'यदि प्रयोग एकस्मिन् प्रयोगोऽन्यः प्रयुज्यते ।
तेन पात्रप्रवेशश्चेत् प्रयोगातिशयस्तदा ॥"

लक्षणान्तरप्रसक्तिनिरासप्रकारस्तु साहित्यदर्पणटीकायामेवास्माभिः प्रदर्शित इत्यनुसन्धेयम् ।

(ঠ) সূত্রধার । ইনি প্রত্যাখ্যান করিলেন । হউক, অন্য ব্রাহ্মণ নিমন্ত্রণ করি । (এই বলিয়া চলিয়া গেল) ।

(ড) প্রস্তাবনা ।

(१) वम्हणम् उवणिमन्तेमि । (२) इत्यामुखम् ।

प्रविश्य प्रावारहस्तो मैत्रेयः। "अन्यं वरय" इति पूर्वोक्तं पठित्वा।

अधवा मए वि मित्तेएण परस्स आमन्तणआइं भक्खिदव्वाइं (१)। हा अवत्थे ! तुलेअसि। जो णाम (२) अहं तत्तभवदो चारुदत्तस्स रिद्धीए अहोरत्तं पअत्तणसिद्धेहिं उग्गारसुरहि-गन्धेहिं मोदकेहिं ज्जेव असिदो अब्भन्तरचदु-

---

अथवा मयापि मैत्रेयेण परस्य आमन्त्रणकानि भक्षितव्यानि। हा अवस्थे ! तूलयसि। यो नामाहं तत्र भवतः चारुदत्तस्य ऋद्ध्या अहोरात्रं प्रयत्नसिद्धैः उद्गारसुरभिगन्धैः मोदकैरेव अशितः

(ढ) प्रविश्येति। प्राव्रणोत्यनेन पूर्वकायमिति प्रावारः, करणे घञ्। प्रावार उत्तरीयवस्त्रं हस्ते यस्य सः। 'द्वौ प्रावारोत्तरासङ्गौ' इत्यमरः। अन्यं वरय इत्यादि पूर्वोक्तस्य पुनः पाठो भोजनप्रतिबन्धे कार्य्यान्तरव्यापृतत्वापेक्षया अथवेत्यादि पद्यान्तरस्याभिधानप्रसक्त्यर्थः। मयापि धनिचारुदत्ताश्रितेनापीति तात्पर्य्यम्, परस्य चारुदत्तभिन्नस्य, आमन्त्र्यते आहूयते येभ्य इत्यामन्त्रणकानि आमन्त्रणानन्तरखाद्यानि अन्नादीनि। 'कृत्यल्युटोऽन्यत्रापि" इति तादर्थ्ये ल्युट्, कुत्सायाञ्च कप्रत्ययः। अवस्थे ! वर्त्तमानदैन्यदशे ! तूलयसि तूलं तूलकतुल्यलघुं करोषि लोकमिति शेषः, सर्वविधगौरवहानिकरणादिति भावः। ऋद्ध्या सम्पदा सम्पत्तिस्थितिसमय इत्यर्थः। प्रयत्नेन आदरेण सिद्धैर्निष्पन्नैः, उद्गारेण मोदकेभ्य एव उत्थानेन सुरभिर्घ्राणतर्पणो गन्धो येषां तैः, अशितं भोजनमस्यास्तीति अशितः

(ঢ) উত্তরীয়হস্তে প্রবেশ করিয়া মৈত্রেয়। ("অন্য ব্রাহ্মণ নিমন্ত্রণ করুন" এই পূর্ব্বোক্ত পাঠ করিয়া অথবা আমি মৈত্রেয়ও, পরের বাড়ী ভোজন করিব। হায় অবস্থা। তুমি মনুষ্যকে তূলার ন্যায় লঘু করিয়া থাক। যে আমি, মাননীয় চারুদত্তের সমৃদ্ধির সময়ে অহোরাত্র, যত্নপূর্ব্বক নিষ্পাদিত এবং নাসিকার তৃপ্তিসাধক-সৌরভ,

सालदुआरे उवविट्ठो मल्लअ(२)सदपरिवुदो चित्तअरो विअ अङ्गु-लीहिं छिविअ छिविअ अवणेमि, णअरचत्तरवुसहो विअ रोम-न्थाअमाणो चिट्ठामि। सो दाणिं अहं तस्स दलिद्ददाए जहिं तहिं चरिअ गेहपारावदो विअ आवासणिमित्तं इध आअच्छामि। (७)

अभ्यन्तरचतुःशालद्वारे उपविष्टः मल्लकशतपरिवृतश्चित्रकर इव अङ्गुलीभिः स्पृष्ट्वा स्पृष्ट्वा अपनयामि, नगरचत्वरवृषभ इव रोम-न्थायमानस्तिष्ठामि। स इदानीमहं तस्य दरिद्रतया यस्मिन् तस्मिन् चरित्वा गृहपारावत इव आवासनिमित्तमत्र आगच्छामि।

तम्, अर्थं आदितावत्। अभ्यन्तरे अन्तः चतुःशालं तस्य द्वारे। मल्ल एव मल्लकः अनुकम्पायां कप्रत्ययः। मल्लिका शीतलीयद्रव्यपूर्णपात्राणि नीलपीतादिवर्ण-पात्राणि च तेषां शतेन समूहेन परिवृतः परिवेष्टितः।

"मल्लः पात्रे कपोले च मत्स्यभेदे बलीयसि।" इति मेदिनी। चित्रकरः आलेख्यनिर्म्माता। अपनयामि अपसारयामि। वर्णपात्रशतेन परिवृतश्चित्रकरो यथा—अङ्गुलीभिः स्पृष्ट्वा स्पृष्ट्वा वर्णपात्रेभ्यो बहुतरवर्णानानीय वामकरतलादौ ... निर्म्माय तत्पात्राण्यपसारयति, तद्वत् अहमपि मोदकादि भुक्त्वा

...মুক্ত মোদকই ভোজন করিয়া, ভিতরের চতুঃশালার দ্বারদেশে উপবিষ্ট হইয়া, বহুতর ব্যঞ্জনের পাত্রে পরিবেষ্টিত হইয়া, চিত্রকরের ন্যায় অঙ্গুলিদ্বারা স্পর্শ করিয়া, স্পর্শ করিয়া সরাইয়া রাখি-তাম এবং নগরচত্বরস্থিত বৃষের ন্যায় হনুচালন করিয়া অবস্থান করিয়াছি

(१) पविसिदव्वाइं। (२) ल्लाविं। (३) मल्लक…।

एसोअ अज्जचारुदत्तस्स पिअवअस्सेण चुण्णवुड्ढेण (४) जादीकुसुमवासिदो पावारओ अणुप्पेसिदो सिद्धीकिददेवकज्जस्स अज्जचारुदत्तस्स उवणेदव्वो त्ति। ता जाव अज्जचारुदत्तं पेक्खामि। परिक्रम्य अवलोक्य च। एसो चारुदत्तो सिद्धीकिददेवकज्जो गिहदेवताणं बलिं हरेन्तो (५) इदो ज्जेव आअच्छदि। (ग)

(ग) एष च आर्यचारुदत्तस्य प्रियवयस्येन चूर्णवृद्धेन जातीकुसुमवासितः प्रावारकः अनुप्रेषितः, सिद्धीकृतदेवकार्यस्य आर्यचारुदत्तस्य उपनेतव्य इति। तद्यावदार्यचारुदत्तं प्रेक्षे। एष चारुदत्तः सिद्धीकृतदेवकार्यो गृहदेवतानां बलिं हरन् इत एवागच्छति।

बहुलोकजनमध्ये कुसुमादिपातनेन परिप्लुतः सन् [illegible] नाचानि अङ्गुलीभिः स्पृष्ट्वा स्पृष्ट्वा [illegible] नवकस्य यत् चत्वरमङ्गलं तस्य वृषभो वृषः स इव। उद्गीर्णभुक्तद्रव्यस्य पुनश्चर्वणं रोमन्थः। 'रोमन्थः स्यात् पशुगणो रोमन्थः कीटवर्त्तनम्।' इत्यनेकार्थध्वनिमञ्जरी। रोमन्थायमानः उद्गीर्य पुनश्चर्वणेन ताम्बूलादिचर्वणेन च स्तुतेन आत्मपरिहर्त्यर्थः। तस्य चारुदत्तस्य। गेहपारावत इव गृहपालितकपोत इव। आवासनिमित्तम् अवस्थितिनिमित्तम्।

(ग) एष इति। जातीकुसुमेन वासितः संवर्णादिना सुरभीकृतः। सिद्धी-

---

সেই আমি এখন, চারুদত্তের দরিদ্রতানিবন্ধন, গৃহকপোতের ন্যায় যেখানে সেখানে বেড়াইয়া, বাস করিবার জন্য এখানে আসিয়া থাকি। —

(গ) মাননীয় চারুদত্তের প্রিয়সখা চূর্ণবৃদ্ধ, জাতীকুসুমবাসিত

---

(৪) চুণ্ণবুড্ঢেণ (৫) করেন্তো। —

ততঃ প্রবিশতি যথানির্দ্দিষ্টশ্চারুদত্তো রদনিকা চ। (ঙ)

চারু। ঊর্দ্ধমবলোক্য সনির্ব্বেদং নিশ্বস্য। (১) (ঘ)

যাসাং বলিঃ সপদি মদ্গৃহদেহলীনাং
হংসৈশ্চ সারসগণৈশ্চ বিলুপ্তপূর্ব্বঃ।

কৃতং নিষ্পাদিতং দেবকার্য্যং দেবপূজা যেন তস্য। উপনেতব্যো দাতব্যঃ, ইতি আদিশ্য অনুপ্রেষিতঃ ইত্যন্বয়ঃ। প্রেক্ষে পশ্যামি। 'নাসূচিতং বিশেৎ পাত্রম্" ইতি ভরতোক্তেশ্চারুদত্তপ্রবেশসূচনায়াহ পুনরেষ ইতি। বলিং পূজোপহারম্, হরন্ দদৎ। 'বলিঃ পূজোপহারে স্যাৎ" ইত্যমরঃ।

বিদূষকস্যেয়ং প্রাচ্যা ভাষা — 'প্রাচ্যা বিদূষকাদীনাম্" ইতি সাহিত্য-দর্পণাৎ।

ইদমেব বিদূষকবাক্যমারভ্য দ্বিতীয়াঙ্কসমাপ্তিপর্য্যন্তো মুখসন্ধিঃ। তথা চাত্র বসন্তসেনাচারুদত্তয়োর্ভাবিসমাগমরূপফলস্য প্রথমহেতুভূতঃ পরস্পরানুরাগো বীজং নামার্থপ্রকৃতিঃ। যথা সাহিত্যদর্পণে—

'অল্পমাত্রং সমুদ্দিষ্টং বহুধা যদ্বিসর্পতি।
ফলস্য প্রথমো হেতুর্বীজং তদভিধীয়তে॥"

এবং ভাবিসমাগমরূপমুখ্যফলসিদ্ধয়ে নায়িকায়া বসন্তসেনায়াশ্চারুদত্তং প্রত্যলঙ্কারন্যাসৌৎসুক্যম্ আরম্ভো নামাবস্থা। যথা তত্রৈব

এই উত্তরীয়বসনখানি পাঠাইয়া দিয়াছেন এবং বলিয়াছেন যে, "আর্য্য চারুদত্ত দেবকার্য্যসম্পাদন করিয়া সুস্থ হইলে ইহা তাঁহার নিকট উপস্থিত করিবে।" অতএব আর্য্যচারুদত্তের সহিত সাক্ষাৎ করি। (কতিপয়পদক্ষেপপূর্ব্বক দর্শন করিয়া) এই যে চারুদত্ত, দেবকার্য্য সম্পাদন করিয়া, গৃহদেবতাদিগকে উপহার দিতে দিতে এই দিকেই আসিতেছেন।

(ঙ) তদনন্তর যথানির্দ্দিষ্টরূপে চারুদত্তের ও রদনিকার প্রবেশ।

तास्वेव सम्प्रति विरूढतृणाङ्कुरासु
वीजाञ्जलिः पतति कीटमुखावलीढः ॥८॥

इति मन्दं मन्दं परिक्रम्योपविशति ।

भवेदारम्भ औत्सुक्यं यन्मुख्यफलसिद्धये । ”

एवञ्च ‘ यत्र वीजसमुत्पत्तिर्नानार्थरससम्भवा ।

प्रारम्भेण समायुक्ता तन्मुखं परिकीर्त्तितम् ॥” इति लक्षणसङ्गतिः ।

अस्य च उपक्षेपादीनि द्वादशाङ्गानि सलक्षणानि यथास्थानं वक्ष्यामः ।

(त) तत इति । यथानिर्द्दिष्टः गृहदेवताभ्यो बलिहरणप्रसङ्गः । रदना दन्ता अस्याः सन्तीति रदनिका ‘इन्विषये इको वाच्यः ” इति प्रशंसार्थे इकाप्रत्ययः प्रशस्तदन्तशालित्वादस्या दास्या रदनिकेति नाम ।

(थ) चारु इति । ऊर्द्धविलोकनं दैवोद्देशार्थम् । निर्वेदेन दारिद्र्यजनितया आत्मावमाननया सहेति सनिर्वेदम् ।

यासामिति । यासां मम गृहदेहलीनां गृहसम्मुखस्थस्थानानाम्, बलिः तण्डुलादिपूजोपहारः, सपदि तत्क्षणात् अपक्षव्ययेश्वर्यैः, हंसैः सारसाख्यपक्षिगणैश्च विलुप्तपूर्वः भक्षितपूर्वः। सम्प्रति विरूढाः लोकसञ्चाराभावादुत्पन्नाः तृणाङ्कुरा दूर्वादितृणाङ्कुरा यासु तासु, तास्वेव गृहदेहलीषु, कीटमुखैः अवलीढः आस्वादितः, वीजाञ्जलिः अञ्जलिपरिमितधान्यादिः पतति जीर्णभित्त्युपरिदेशादिति शेषः । अभूतपूर्वमिदं दारिद्र्यकष्टमिति भावः ।

अत्र अप्रस्तुतयोः हंसगण सारसगणयोरेक लोपक्रियाभिसम्बन्धात् तुल्ययोगिता, तथा तृणाङ्कुरोत्पत्ति वीजाञ्जलिपतनरूपकार्य्येण दारिद्र्यरूपकारणस्य स्पष्टसूचनात् पर्य्यायोक्तञ्च

(থ) চারুদত্ত। উর্দ্ধে দৃষ্টিপাতপূর্ব্বক নির্বেদের সহিত নিশ্বাস ত্যাগ করিয়া)

পূর্ব্বে, আমার গৃহের যে সম্মুখস্থভূমিতে, গৃহদেবতাদিগকে তণ্ডুল-

विदू। एसो अज्जचारुदत्तो। ता जाव सम्पदं उवसप्पामि। (उपसृत्य)। सोत्थिभवदे। वड्ढदु भवं। [द]

चारु। अये! सर्वकालमित्रं मैत्रेयः प्राप्तः। सखे! स्वागतम्। आस्यताम्। [ध]

(द) एष आर्य्यचारुदत्तः। तद् यावत् साम्प्रतमुपसर्पामि स्वस्ति भवते। वर्द्धतां भवान्।

अनयोः परस्परनिरपेक्षतया संसृष्टिः द्वयोरपि एकधर्म्माभिसम्बन्धे तुल्ययोगिता भवत्येवेति दर्शितमस्माभिः साहित्यदर्पणटीकायाम्।

चारुदत्तस्य उत्तमपात्रतया शिक्षिततया चेदं संस्कृतं पाठ्यम्। यथा दर्पणे—

पुरुषाणामनीचानां संस्कृतं स्यात् कृतात्मनाम्।

'गृहावग्रहणी देहली' इत्यमरः। "दद्याद्वातं विधातं च बलिं द्वारि गृहस्य च" इति मार्कण्डेयपुराणञ्च।

वसन्ततिलका वृत्तम्—"उक्ता वसन्ततिलका तभजा जगौ गः" इति लक्षणात्॥९॥

(द) विदू इति। स्वस्तिमङ्गलम्। वर्द्धताम्, अभ्युदयेनेति भावः।

প্রভৃতি উপহার দান করিলে, তৎক্ষণাৎ হংস ও সারসপক্ষিগণ তাহা ভক্ষণ করিয়া যাইত; সম্প্রতি সেই ভূমিতেই দূর্ব্বাপ্রভৃতি তৃণাঙ্কুর জন্মিয়াছে এবং কীটমুখ হইতে অর্দ্ধভুক্ত ধান্যাদি বীজ প্রচুর পরিমাণে পতিত হইতেছে॥৯॥

(এই বলিয়া ধীরে ধীরে পাদচারণ করিয়া উপবেশন করিলেন।)

(দ) বিদূষক। এই যে আর্য্য চারুদত্ত। অতএব এখন উঁহার নিকট উপস্থিত হই। (নিকটে যাইয়া) আপনার মঙ্গল হউক, আপনি উন্নতি লাভ করুন।

(ধ) চারুদত্ত। এই যে! সকল সময়ের বন্ধু মৈত্রেয় উপস্থিত।

(घ) शृणोमि माल्यगन्धम् अन्धकारपूरितया पुनर्नासिकया सुव्यक्तम्, पुनर्न प्रेक्षे भूषणशब्दम्।

(क) विट इति। यदुपलक्षयसि यदुपलक्ष्यान्वेष्टुमर्हसि।

(ग) विट इति। सौरभ्येण घ्राणतर्पितकरत्वेन अनुविद्धं युक्तम्, घ्राणतर्पितकरमित्यर्थः, उपलक्षयसीति पूर्वेणान्वयः। 'सुरभिर्घ्राणतर्पणः' इत्यमरः।

(घ) शकार इति। अत्र माल्यगन्धं जिघ्रामि, अन्धकारपूरितया दृष्ट्या

আকাশ যেন কাজল বর্ষা করিতেছে এবং অসৎ পুরুষের সেবার ন্যায় দৃষ্টি বিফলতা প্রাপ্ত হইতেছে ॥৩৪॥

(ক্ষ) শকার। পণ্ডিত! পণ্ডিত! বসন্তসেনাকে অন্বেষণ করি ?।

(ক) বিট। কাণেলীর পুত্র! কোন চিহ্ন আছে কি ? যাহা লক্ষ্য করিয়া অন্বেষণ করিতে পার।

(খ) শকার। পণ্ডিত! পণ্ডিত! কি রকম (চিহ্ন) ?।

(গ) বিট। অলঙ্কারের শব্দ, কিম্বা নাসিকার তৃপ্তিকর মাল্যের গন্ধ।

(१) शुणामि मल्लगन्धं, अन्धआलपूलिदाए उण णाशिआए ण शुव्वत्तं पेक्खामि भूशणशद्दं।

विटः। जनान्तिकम्। वसन्तसेने! (ङ)

काम प्रदोषतिमिरेण न दृश्यसे त्वं
सौदामनीव जलदोदरसन्धिलीना।
त्वां सूचयिष्यति माल्यसमुद्भवोऽयं
गन्धश्च, भीरु! मुखराणि च नूपुराणि ॥३५॥

न प्रेक्षे, न वा सुव्यक्तं शृणोमि भूषणशब्दमिति वक्तव्ये सर्वमेवैतदपार्थमसङ्गतीकम्।

(ङ) विट इति। जनान्तिकलक्षणं यथा साहित्यदर्पणे---

"त्रिपताककरेणान्यानपवार्य्यान्तरा कथाम्।"

अन्योन्यामन्त्रणं यत् स्यात् जनान्ते तज्जनान्तिकम् ॥'

काममिति। हे भीरु! भयशीले! जलदयोर्मेघखण्डयोरुदरे अभ्यन्तरे यः सन्धिः सङ्कीर्णस्थानं तत्र लीना, सौदामनी विद्युदिव, त्वम्, प्रदोषतिमिरेण सन्ध्याकालीनान्धकारेण लीना इति, कामं पर्य्याप्तम् यथा स्यात्तथा न दृश्यसे। किन्तु माल्यसमुद्भवः अयं गन्धश्च, मुखराणि शब्दायमानानि नूपुराणि च, त्वाम्, सूचयिष्यति अनुमापयिष्यति सूचयिष्यन्ति च। तत एव च वचनव्यत्यासः।

अत्र पूर्व्वार्द्धे श्रौती उपमा। उत्तरार्द्धे तु सूचयिष्यतीत्येकया क्रियया गन्धनूपुरयोर्वचनव्यत्ययेनान्वयात् तुल्ययोगिता; तत्कृतविच्छित्तिवशेन माल्यगन्धनूपुरशब्दरूपसाधनात् वसन्तसेनाया अस्तित्वरूपसाध्यज्ञानेन च अनुमानालङ्कारः; इत्युपमानुमानयोर्मिथो निरपेक्षतया संसृष्टिः। सौदामिनीत्यस्य लीनत्वांश एवान्वयेन दृश्यसे इत्यनेनान्वयाभावात् न पुरुषभेदेन भग्नप्रक्रमता दोषः।

वसन्ततिलका वृत्तम् ॥३५॥

(ঘ) শকার। অন্ধকারপূর্ণ নাসিকাদ্বারা সুস্পষ্ট মাল্যগন্ধ শুনিতেছি; কিন্তু অলঙ্কারের শব্দ দেখিতেছি না।

(ঙ) বিট। (জনান্তিকে) বসন্তসেনা! তুইখানি মেঘের ছিদ্রের

श्रुतं ? वसन्तसेने !। (च)

वस। स्वगतम्। सुदं गहिदं अ। नाट्येन भूषणान्युन्नमय्य, माल्यानि चापनीय, किञ्चित् परिक्रम्य, हस्तेन परामृश्य। अम्मो ! भित्तिपरामरिस-सूइदं पक्खदुआरअं क्खु एदं। जाणामि अ संजोएण गेहस्स संवुदं पक्खदुआरअं। (छ)

चारु। वयस्य ! समाप्तजपोऽस्मि। तत् साम्प्रतं गच्छ, मातृभ्यो बलिमुपहर।

(छ) श्रुतं गृहीतञ्च। अहो ! भित्तिपरामर्शसूचितं पक्षद्वारकं खल्वेतत्। जानामि च संयोगेन गेहस्य संवृतं पक्षद्वारकम्।

(च) श्रुतमिति। अत्र काकुरवगन्तव्या, तेन श्रुतं किमित्यर्थः।

(छ) वसम् इति। गृहीतं, तव वाक्यस्य तात्पर्य्यमिति शेषः। उन्नमय्य उपरि उत्तोल्य। अपनीय दूरे निक्षिप्य। परामृश्य संस्पृश्य। भित्तेः परामर्शेन हस्तस्पर्शेन सूचितमनुमापितम्, पक्षद्वारकं पार्श्वद्वारम्। संयोगेन हस्तसंयोगेन। संवृतं कपाटाभ्यामभ्यन्तरादवरुद्धम्।

সঙ্কীর্ণ স্থানে লীন বিদ্যুতের ন্যায়, সন্ধ্যাকালের অন্ধকারে তোমাকে সম্পূর্ণরূপে দেখা যাইতেছে না। হে ভয়শীলে! মাল্য হইতে উৎপন্ন এই গন্ধ ও শব্দায়মান নূপুরগুলি তোমাকে সূচিত করিয়া দিতেছে ॥৩৫॥

(চ) বসন্তসেনা! শুনিলে কি?।

(ঙ) বসন্তসেনা। (স্বগত) শুনিয়াছি এবং বুঝিয়াছি। (অভিনয়ের ধরণে অলঙ্কারগুলি উপরে তুলিয়া এবং মালাগুলি দূরে ফেলিয়া, একটু পাদচারণ করিয়া এবং হস্তদ্বারা স্পর্শ করিয়া) ও! দেওয়াল স্পর্শ করিয়া বুঝিয়াছি —এই খানি পাশের দুয়ার। এবং হাত দিয়া বুঝিতেছি যে, এই পাশের দুয়ার বাড়ীর ভিতর হইতে আবদ্ধ রহিয়াছে।

विदू। भो! ण गमिस्सं। (ज)

चारु। धिक् कष्टम्।

दारिद्र्यात् पुरुषस्य बान्धवजनो वाक्ये न सन्तिष्ठते,
सुस्निग्धा विमुखीभवन्ति सुहृदः, स्फारीभवन्त्यापदः।
सत्त्वं ह्रासमुपैति, शीलशशिनः कान्तिः परिम्लायते,
पापं कर्म्म च यत् परैरपि कृतं, तत्तस्य सम्भाव्यते ॥३६॥

(ज) भोः! न गमिष्यामि।

दारिद्र्यादिति। बान्धवजनो भ्रात्रादिः, दारिद्र्यात् पुरुषस्य वाक्ये न सन्तिष्ठते आदेशादिकं न शृणोतीत्यर्थः, यथा चिरबान्धवो मे वैदग्ध्यं मे वाक्यमिदं न शृणोतीति भावः। सुस्निग्धाः अतीव स्नेहशालिनोऽपि सुहृदः विमुखीभवन्ति दूरात् प्रचारयन्ति। आपदः स्फारीभवन्ति विशाला भवन्ति। सत्त्वम् अध्यवसायः ह्रासमुपैति प्राप्नोति। शीलं स्वभाव एव शशी निर्म्मलत्वाच्चन्द्रः तस्य कान्तिः सौन्दर्य्यम्, परिम्लायते मलिना भवति। तथा परैरपि यत् पापं पापजनकम्, कर्म्म चौर्य्यहत्यादिकं कार्य्यं कृतम्, तस्य दरिद्रपुरुषस्य तत् सम्भाव्यते सम्भवपरतया परैराशङ्क्यते। हन्त! सैव मे दशा ममेदानीं संवृत्तेति भावः।

अत्र अप्रस्तुतात् पुरुषसामान्यात् प्रस्तुतस्य पुरुषविशेषस्य चारुदत्तस्य प्रतीतेरप्रस्तुत-प्रशंसा, एकं कष्टरूपकार्य्यं प्रति बहूनां कारणानामुक्तत्वात् समुच्चयः, शीलशशिन इति निरङ्गं केवलरूपकञ्च इत्थं तेषां परस्परनिरपेक्षतया संसृष्टिः। तथा परस्मैपदा-त्मनेपदयोर्भेदात् एकवचनबहुवचनयोर्भेदात् कर्त्तृवाच्यकर्म्मवाच्ययोर्भेदाच्च बहवो भग्नप्रक्रमतादोषाः, एवं भवन्तीत्यस्य द्विरुक्ततया कथितपदतादोषश्च; इत्थं तेषां समाधानाय श्लोक एवं पठनीयः—

চারুদত্ত। বয়স্য! জপ সমাপ্ত করিয়াছি। অতএব এখন যাও, মাতৃগণকে পূজার উপহার দাও।

(জ) বিদূষক। সখে! আমি যাইব না।

চারুদত্ত। হায়! কি কষ্ট।

अपि च,

सङ्गं नैव हि कश्चिदस्य कुरुते, सम्भाषते नादरात्,
सम्प्राप्तो गृहमुत्सवेषु धनिनां सावज्ञमालोक्यते ।

दारिद्र्यात् पुरुषस्य बान्धवजनाश्लिष्टन्ति नो भाषिते,
सुस्निग्धा विमुखीभवन्ति सुहृदो वृद्धिं प्रयान्त्यापदः ।
उत्साहाः क्षयितां व्रजन्ति विकृतिं शीलेन्दुशोभाक्षया
पापं कर्म च यत् परैरपि कृतं सम्भावयन्त्यस्य तत् ॥

शार्दूलविक्रीड़ितं वृत्तम् ॥३६॥

सङ्गमिति । कश्चिदपि जनः, अस्य दरिद्रस्य, सङ्गं संसर्गम्, नैव हि कुरुते, अवज्ञावशादिति भावः । आदरात् आदरं कृत्वा, न सम्भाषते, दरिद्र जनमिति तात्पर्य्यम् । उत्सवेषु धनिनां गृहं सम्प्राप्तो गतो दरिद्र इत्यर्थः, सावज्ञमालोक्यते जनैरिति शेषः । तथा अल्पः छदः परिच्छदो वेशो यस्य स तादृशो दरिद्रः, लज्जया महाजनस्य भद्रलोकस्य; दूरादेव विहरति विचरति । अतएव निर्धनता दारिद्र्यम्, अपरं प्रकामं पर्य्याप्तम्, मन्वादिभिः पञ्चमं यावत् महापातकं गणितम् इदन्तु षष्ठम् महापातकम्, इत्यहं मन्ये ; तत्तुल्यक्लेशदायकत्वादिति भावः ।

अत्रापि अप्रस्तुतात् दरिद्रसामान्यात् प्रस्तुतस्य दरिद्रविशेषस्य चारुदत्तस्य प्रतीतेरप्रस्तुतप्रशंसा, दारिद्र्यप्रयुक्तमेकं कष्टरूपकार्य्यं प्रति बहुकारणोपन्यासात् समुच्चयः, चतुर्थचरणार्थं प्रति पूर्व्वचरणत्रयगतवाक्यार्थानां हेतुतया वाक्यार्थहेतुकं काव्यलिङ्गम्, निर्धनतायां षष्ठमहापातकत्वोत्प्रेक्षणात् 'मन्ये'शब्दप्रयोगाच्च वाच्या भावाभिमानिनी जात्युत्प्रेक्षा चत्येतेषां पूर्व्ववत् संसृष्टिः ।

মানুষের দরিদ্রতাবশতঃ বন্ধুজন বাক্যের অধীন থাকে না, বিশেষ স্নেহের পাত্র আত্মীয়গণ বিমুখ হইয়া যায় ; আপদ বাড়িয়া উঠে ; উত্তম হ্রাস পায়; চরিত্ররূপ চন্দ্রের কান্তি ম্লান হইয়া যায় এবং অন্যেও যে পাপ কার্য্য করে, তাহাও তাহারই বলিয়া লোকে মনে করে ॥৩৬॥

दूरादेव महाजनस्य विहरत्यल्पच्छदो लज्जया,
मन्ये निर्धनता प्रकाममपरं षष्ठं महापातकम् ॥३८॥

अपि च,

तथा कर्त्तृवाच्यप्रत्ययमध्ये आलोक्यत इति कर्म्मवाच्यप्रत्ययाभिधानात् कुरुते, सम्भाषते' इत्यात्मनेपदं प्रक्रम्य 'विहरति' इति परस्मैपदाभिधानाच्च भग्नप्रक्रमतादोषद्वयम्; तृतीयचरणे समुच्चयार्थं चकारो वाच्यः, किन्तु नोक्त इति वाच्यानभिधानदोषः, एवं षष्ठमित्यनेनैवोपपत्तौ अपरमित्यभिधानात् अधिकपदतादोषश्च; इत्येतेषां परिहाराय 'सम्प्राप्तं गृहमुत्सवेषु धनिनां सावज्ञमालोकते' 'दूरादेव महाजनाद्विहरति चाल्पच्छदः' 'प्रकाममवनौ षष्ठम्' इत्थं पठनीयम्। किन्तु "स एव हि वर—" इत्यादाविव "सङ्गं नैव हि" इत्यत्र 'एव हि' इति शब्दद्वयेन अत्यन्तनियमसूचनान्न निरर्थकत्वदोषः। तथा दरिद्रस्य प्रकृतत्वादेव 'सम्भाषते, आलोक्यते' इत्यनयोर्विभक्तिव्यत्ययेन कर्म्मपदलाभ इति न न्यूनपदतादोषोऽपीति ध्येयम्।

पञ्चविधं महापातकमाह मनुः—

"ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः।
महान्ति पातकान्याहुः संसर्गश्चापि पञ्चमम्॥"

शार्दूलविक्रीडितं वृत्तम् ॥३८॥

আর, কোন লোক দরিদ্রের সংসর্গ করে না, এবং আদর করিয়া আলাপ করে না। দরিদ্র লোক, উৎসবের সময় ধনীদের বাড়ী উপস্থিত হইলে লোকে তাহাকে অবজ্ঞার সহিত দেখিতে থাকে এবং অল্পপরিচ্ছদ দরিদ্রলোক, লজ্জাবশতঃ ভদ্রলোকের দূরে দূরে বিচরণ করে। অতএব আমি মনে করি; —দরিদ্রতা, আর একটি গুরুতর ষষ্ঠ মহাপাতক ॥৩৭॥

दारिद्र्य ! शोचामि भवन्तमेव-
मस्मच्छरीरे सुहृदित्युषित्वा।
विपन्नदेहे मयि मन्दभाग्ये,
ममेति चिन्ता क्व गमिष्यसि त्वम् ॥३८॥

विदू। सवैलक्षम्, भो वअस्स ! जइ मए गन्तव्वं, ता एसा वि मे सहाइणी रदणिआ भोदु। (भ)

(भ) भो वयस्य ! यदि मया गन्तव्यम्, तदेषापि मम सहायिनी रदनिका भवतु।

दारिद्र्येति। हे दारिद्र्य ! भवन्तमेव शोचामि। तथा च 'अयं सुहृत्' इति कृत्वा अस्मच्छरीरे उषित्वा चिरमवस्थाय, मन्दभाग्ये मयि विपन्नदेहे मरणेन विनष्टशरीरे सति, त्वं क्व गमिष्यसि, इति मम चिन्ता वर्त्तते। मादृशदरिद्रान्तराभावात् मम मरणानन्तरं तव वासस्थानाभाव एव भविष्यतीति भावः।

अत्र दारिद्र्यशब्दस्य नपुंसकलिङ्गत्वेऽपि तदर्थस्य धनाभावस्य पुंस्त्वाभिप्रायात् भवन्तमिति पुंसा निर्द्देशः। तथा च वररुचिः —

"शब्दाभिधेये लिङ्गं स्यात् शब्दलिङ्गमथापि वा।
शोभनार्थं कलत्राय दारान् पश्यन्ति शोभनान् ॥"

"अर्थपरत्वात् पुंलिङ्गत्वम्" इति पृथ्वीधरोऽपि। अतएव न च्युतसंस्कारतादोषः। किन्तु 'मन्दभाग्ये मयि विपन्नदेहे सति, त्वं क्व गमिष्यसि' इति वाक्यमध्ये 'मम इति चिन्ता' इति वाक्यान्तरस्य प्रवेशात् गर्भिततादोषः; स तु 'त्वं कुत्र गच्छेरिति मे वितर्कः' इति चतुर्थचरणपाठेन समाधेयः।

इन्द्रवज्रोपेन्द्रवज्रयोर्मेलनादुपजातिर्वृत्तम् ॥३८॥

আরও, হে দারিদ্র্য ! আমি তোমার বিষয়ে এইরূপ শোক করি; তুমি বন্ধু ভাবিয়া আমার শরীরে বাস করিয়া, পরে মন্দভাগ্য আমি মরিয়া গেলে, কোথায় যাইবে, ইহাই আমার চিন্তা ॥৩৮॥

चारु। रदनिके! मैत्रेयमनुगच्छ।

चेटी। जं अज्जो आणवेदि। (ञ)

विदू। भोदि! रदणिए! गेण्ह बलिं पदीवं च। अहं अवावुदं पक्खदुआरअं करेमि। तथा करोति। [ट]

वस। मम अब्भुववत्तिणिमित्तं विअ अवावुदं पक्खदुआरअं, ता जाव पविसामि। दृष्ट्वा। हद्धी! हद्धी! कधं पदीवो!। पटान्तेन निर्वाप्य प्रविष्टा। [ठ]

(ञ) यदार्य्य आज्ञापयति।

(ट) भवति! रदनिके! गृहाण बलिं प्रदीपञ्च। अहमपावृतं पक्षद्वारकं करोमि।

(ठ) मम अभ्युपपत्तिनिमित्तमिव अपावृतं पक्षद्वारकम्, तद् यावत् प्रविशामि। हा धिक्! हा धिक्! कथं प्रदीपः!।

(ट) विद इति। अपावृतम् उद्घाटितकपाटम्।

(ठ) वसम् इति। अभ्युपपत्तिर्ग्रहणं तन्निमित्तमिव।

(ঝ) বিদূষক। (লজ্জার সহিত) বয়স্য! যদি আমারই যাইতে হয়, তবে এই রদনিকাও, আমার সহচারিণী হউক।

চারুদত্ত। রদনিকা! তুমি মৈত্রেয়ের অনুগামিনী হও।

(ঞ) দাসী। আর্য্য যাহা আদেশ করেন।

(ট) বিদূষক। রদনিকা! তুমি পূজার দ্রব্য ও প্রদীপটা ধর, আমি পাশের দুয়ারের কপাট খুলি। (তাহাই করিল।)

(ঠ) বসন্তসেনা। আমাকে ভিতরে লইবার জন্যই যেন কেহ পাশের দুয়ারের কপাট খুলিল; অতএব আমি প্রবেশ করি। (দেখিয়া) হায়! হায়! প্রদীপ রহিয়াছে যে। (বস্ত্রাঞ্চলের দ্বারা প্রদীপ নির্ব্বাপিত করিয়া প্রবেশ করিল।)

चारु। मैत्रेय! किमेतत्?।

विदू। अवावुदपक्खदुआरएण पिण्डीकिदेण वादेण णिव्वाविदो पदीवो। भोदि! रदणिए! णिक्कम तुमं पक्खदुआरएण। अहं पि अब्भन्तरचदुस्सालदो [१] पदीवं पज्जालिअ आअच्छामि। इति निष्क्रान्तः। [ड]

शकारः। भावे! भावे! अस्सेशामि वशन्तशेणिअं?। [ढ]

विटः। अन्विष्यताम् अन्विष्यताम्।

शकारः। तथा कृत्वा। भावे! भावे! गहिदा गहिदा। [ण]

(ड) अपावृतपक्षद्वारेण पिण्डीकृतेन वातेन निर्वापितः प्रदीपः। भवति! रदनिके! निष्क्राम त्व पक्षद्वारकेण। अहमपि अभ्यन्तर-चतुःशालातः प्रदीपं प्रज्वाल्य आगच्छामि।

(ढ) भाव! भाव! अन्विष्यामि वसन्तसेनिकाम्?।

(ण) भाव! भाव! गृहीता गृहीता।

(ड) विदू इति। अपावृतपक्षद्वारेण द्वारा आगतेनेति शेषः, पिण्डीकृतेन एकत्र स्तूपीकृतेन।

(ण) शकार इति। तथा कृत्वा हस्तप्रसारणेन अन्वेषणं कृत्वा तादृशान्वेषणेन विटं धृत्वेत्यर्थः।

চারুদত্ত। মৈত্রেয়! এ, কি?।

(ড) বিদূষক। পাশের দুয়ারের কপাট খোলায় প্রচণ্ড বায়ু আসিয়া দীপটাকে নিবাইয়া ফেলিয়াছে। রদনিকা! তুমি পাশের দুয়ার দিয়া নির্গত হও; আমিও, ভিতরের চতুঃশালা হইতে দীপ জ্বালিয়া নিয়া আসি। (ইহা বলিয়া চলিয়া গেল।)

(ঢ) শকার। পণ্ডিত! পণ্ডিত! বসন্তসেনাকে অন্বেষণকরি?।

(१) चदुःसालादो।

विटः। मूर्ख ! नन्वहम्।

शकारः। इदो दाव भविअ एअन्ते भावे चिट्ठदु।

चेटं गृहीत्वा। भावे ! भावे ! गहिदा गहिदा ! [त]

चेटः। भट्टके ! चेडे हगे। [थ]

शकारः। इदो भावे इदो, चेडे ! भावे चेडे, चेडे भावे। तुम्हे दाव एअन्ते चिट्ठ। पुनरन्विष्य रदनिकां केशेषु गृहीत्वा। भावे ! भावे ! शंपदं गहिदा गहिदा वशन्तशेणिआ। [द]

(त) इतस्तावत् भूत्वा एकान्ते भावस्तिष्ठतु। भाव ! भाव ! गृहीता गृहीता।

(थ) भट्टारक ! चेटोऽहम्।

(द) इतो भावः, इतश्चेटः। भावश्चेटः, चेटोभावः। युवां तावत् एकान्ते तिष्ठताम्। भाव ! भाव ! साम्प्रतं गृहीता गृहीता वसन्तसेनिका।

(त) शकार इति। इतस्तावत् भूत्वा एतद्दिग्वर्त्ती भूत्वा। एकान्ते एकपार्श्वे।

(थ) चेट इति। भट्टारक ! भर्त्तः ! इत्यर्थः।

(द) शकार इति। हस्तनिर्द्देशेनाभिनयति इतो भाव इति। वर्वरतया दृढ़-नियमार्थं पुनरपि क्रमविपरीतक्रमाभ्यां हस्तेन निर्द्दिशति भावश्चेट इति।

বিট। অন্বেষণ কর অন্বেষণ কর।

(ষ) শকার। (অন্বেষণ করতঃ বিটকে ধরিয়া) পণ্ডিত ! পণ্ডিত ! ধরিয়াছি ধরিয়াছি।

বিট। মূর্খ ! এ যে আমি।

(ভ) শকার। এই মুখ হইয়া পণ্ডিত, এক পাশে থাকুন। (আবার অন্বেষণ করিয়া ভৃত্যকে ধরিয়া) পণ্ডিত ! পণ্ডিত ! ধরিয়াছি ধরিয়াছি।

(থ) ভৃত্য। প্রভু! আমি ভৃত্য।

অন্ধআলে পলাঅন্তী মল্লগন্ধেণ সূইদা।
কেশবিন্দে পলামিট্ঠা চাণক্কেণ ব্ব দোবদী ॥৩৯॥
বিটঃ। এষাসি বয়সো দর্পাৎ কুলপুত্রানুসারিণী।
কেশেষু কুসুমাঢ্যেষু সেবিতব্যেষু কর্ষিতা ॥৪০॥

৩৯। অন্ধকারে পলায়মানা মাল্যগন্ধেন সূচিতা।
কেশবৃন্দে পরামৃষ্টা চাণক্যেনেব দ্রৌপদী ॥

অন্ধকার ইতি। অন্ধকারে পলায়মানা ত্বম্; মাল্যগন্ধেন সূচিতা অত্র স্থিততয়া অনুমাপিতা সতী, চাণক্যেন দ্রৌপদীব কেশবৃন্দে কেশকলাপে, পরামৃষ্টা হস্তেন পরামৃশ্য গৃহীতা।

চাণক্যেন দ্রৌপদীবেতি হতোপমম্ ॥৩৯॥

এষেতি। এষা ত্বং বসন্তসেনা বয়সো যৌবনস্য দর্পাৎ গর্বাৎ, কুলপুত্রং সৎকুলাপত্যং চারুদত্তমনুসরতীতি সা যৌবনমদেন চারুদত্তাভিসারিণী সতীত্যর্থঃ, কুসুমাঢ্যেষু পুষ্পমালাভূষিতেষু, সেবিতব্যেষু পরমসুন্দরতয়া সুগন্ধিতৈলাদিনা পরিচার্য্যেষু কেশেষু কর্ষিতা আকৃষ্টা অসি। অস্মানবমত্য চারুদত্তাভিসরণমেব তবাস্মিন্ কেশাকর্ষণে হেতুরিতি ভাবঃ ॥৪০॥

(দ) শকার। এই দিকে পণ্ডিত, এই দিকে ভৃত্য। পণ্ডিত ভৃত্য; ভৃত্য, পণ্ডিত। তোমরা এক পাশে থাক। (পুনরায় অন্বেষণ করিয়া, রদনিকার কেশে ধারণ করিয়া) পণ্ডিত! পণ্ডিত! বসন্তসেনাকে এখন ধরিয়াছি এখন ধরিয়াছি।

অন্ধকারে পলায়ন করিতেছিল, মালার গন্ধে প্রকাশ করিয়া দিয়াছে। তাহার পর চাণক্য যেমন দ্রৌপদীর কেশপাশে ধারণ করিয়াছিলেন; আমিও সেইরূপ কেশপাশে ধারণ করিয়াছি ॥৩৯॥

বিট। বসন্তসেনা! তুমি যৌবনের গর্বে সদ্বংশজাত চারুদত্তের অভিসারিণী হইয়াছিলে; কিন্তু শুশ্রূষার যোগ্য এবং পুষ্পশোভিত কেশকলাপে এখন আকৃষ্ট হইলে ॥৪০॥

शकारः। एशाशि वाशू! शिलशि गहीदा
केशेशु वालेशु शिलोलुहेशु।
अक्कोश विक्कोश लवाहिचण्डं
शम्भुं शिवं शङ्कलमिश्शलं वा [१] ॥४१॥

रद। सभयम्। किं अज्जमिस्सेहिं ववसिदं ?। [ध]

विटः। काणेलीमातः! अन्य एवैष स्वरसंयोगः। [न]

---

(४१) एषासि वासु! शिरसि गृहीता केशेषु वालेषु शिरोरुहेषु।
आक्रोश विक्रोश लपाधिचण्डं शम्भुं शिवं शङ्करमीश्वरं वा।

(ध) किमार्य्यमिश्रैर्व्यवसितम् ?।

एषेति। हे वासु! बालि! शिरसि केशेषु एषा त्वं गृहीतासि। इदानीम् आक्रोश भर्त्सय, विक्रोश जनान्तरमाह्वय, अथवा चण्डं शिवम्, अधि अधिकृत्य उद्द्श्यं त्यर्थः लप विलप। यद्वा अधिचण्डम् अधिकभीषणम्, यथा स्यात्तथा, शम्भुं लप विलप ; तथापि ते नाऽ्याहृतिरिति भाव.।

अत्र केशेष्वित्यादिकं शिवमित्यादिकञ्च पुनरुक्तम्। इन्द्रवज्रा वृत्तम् ॥४१॥

(ध) रद इति। आर्य्यमिश्रैः सभ्यश्रेष्ठैः। व्यवसितम् आरब्धम्।

(न) विट इति। अन्यः वसन्तसेनास्वरात् अन्यविधः। स्वरसंयोगः कण्ठस्वरसम्बन्धः। सुतरां नेयं वसन्तसेनेति भावः।

শকার। হে বালিকে! এই তুমি মস্তকের কেশে ধৃত হইয়াছ। এখন আক্রোশ কর, অথবা কাহাকেও আহ্বান কর, অথবা শিবকে লক্ষ্য করিয়া ভীষণ ভাবে বিলাপ কর ॥৪১॥

(ধ) রদনিকা। (ভয়ের সহিত) মহাশয়েরা আরম্ভ করিয়াছেন কি?।

(ন) বিট। কাণেলীর পুত্র! এই কণ্ঠস্বর যে আর এক রকম।

---

(১) শঙ্কলীশ্শলং বা।

शकारः । भावे ! भावे ! जधा दहिशर -(१) पलिलुद्धाए मज्जालीए शलपलिवत्ते होदि, तधा दाशीए धीए शलपलिवत्ते कड़े । [प]

विटः । कथं स्वरपरिवर्त्तः कृतः । अहो चित्रम् । अथवा किमत्र चित्रम् ।

इयं रङ्गप्रवेशेन कलानां चोपशिक्षया ।
वञ्चनापण्डितत्वेन स्वरनैपुण्यमाश्रिता ॥४२॥

(प) भाव ! भाव ! यथा दधिसरपरिलुब्धाया मार्ज्जार्य्याः स्वरपरिवर्त्तो भवति, तथा दास्याः पुत्र्या स्वरपरिवर्त्तः कृतः ।

(प) शकार इति । दध्नः सरे नवनीताख्ये सारपदार्थे परिलुब्धा अभिलाषिणी तस्याः । दास्याः पुत्र्या वसन्तसेनया ।

इयमिति । इयं वसन्तसेना, रङ्गे अभिनयागारे प्रवेशेन तत्र नानाविधवाचिकाभिनयकरणेनेत्यर्थः कलानां बहुविधगीतानाम् उपशिक्षया, तथा वञ्चनापण्डितत्वेन इयन्तं कालं यावत् परप्रतारणाकरणेन, स्वरनैपुण्यं नानाविधकण्ठस्वरप्रकाशनदक्षताम् आश्रिता प्राप्ता । अतएव वसन्तसेनेवेयं भवितुमर्हतीति भावः ॥४२॥

(প) শকার। পণ্ডিত! পণ্ডিত! দধির সরের লোভী বিড়ালীর যেমন স্বরের পরিবর্ত্তন হয়, সেইরূপ দাসীর কন্যা স্বরের পরিবর্ত্তন করিয়াছে।

বিট। কি স্বরের পরিবর্ত্তন করিয়াছে!। কি আশ্চর্য্য!। অথবা ইহাতে আশ্চর্য্য কি?। (কারণ)

এই বসন্তসেনা রঙ্গালয়ে প্রবেশ, নৃত্য-গীতাদি কলা শিক্ষা এবং প্রতারণায় দক্ষতা এই সব কারণে স্বরের নৈপুণ্য লাভ করিয়াছে ॥৪২॥

(२) दहिच्छलि ... ।

प्रविश्य विदूषकः। ही ही भो! पदोसमन्दमारुदेण पसुव-न्धोवणीदस्स विअ छाअलस्स हिअअं, फुरफुराअदि पदोवो। उपसृत्य रदनिकां दृष्ट्वा। भो! रदणिए!। [फ]

शकारः। भावे! भावे! मणुश्शे मणुश्शे। [ब]

विदू। जुत्तं णेदं, सरिसं णेदं, जं अज्जचारुदत्तस्स दलि-द्ददाए सम्पदं परपुरिसा गेहं पविसन्ति। [भ]

(फ) आश्चर्य्य! भोः! प्रदोषमन्दमारुतेन पशुबन्धोपनीतस्येव छागलस्य फुरफुरायते प्रदीपः। भो रदनिके!॥

(ब) भाव! भाव! मनुष्यो मनुष्यः।

(भ) युक्तं नेदम्, सदृशं नेदम्, यदार्य्यचारुदत्तस्य दरिद्रतया

(फ) प्रविश्येति। पशुर्बध्यते अस्मिन्निति पशुबन्धो यूपकाष्ठं तत्र उपनीतस्य छेदनाय बद्धस्य। फुरफुरायते अतिवकम्पते।

(भ) विदू इति। इदं परगृहप्रवेशमात्रमेव न युक्तम्, गृहस्वामिनोऽपमानजनकत्वादिति भावः। ननु मानहीनस्य गृहप्रवेशे को दोष इत्याह सदृशं नेदमिति। अनुरूपं नेदमित्यर्थः, महामानिन एव गृहत्वादित्याशयः। अत एवाह आर्य्येति।

(फ) প্রবেশ করিয়া বিদূষক। কি আশ্চর্য্য! যূপকাষ্ঠের নিকট উপনীত ছাগলের হৃদয়ের ন্যায় এই প্রদীপ, প্রদোষকালের অল্প বায়ুতে ফুর ফুর করিতেছে। (নিকটে যাইয়া, রদনিকাকে দেখিয়া) রদনিকা!।

(ব) শকার। পণ্ডিত! পণ্ডিত! মানুষ মানুষ!।

(ভ) বিদূষক। ইহা উচিত নহে, ইহা যোগ্যও নহে; যে আর্য্য-চারুদত্তের দারিদ্র্য অবস্থা উপস্থিত হইয়াছে বলিয়া, অন্য লোক তাঁহার বাড়ীতে এখন প্রবেশ করিবে।

रद । अज्ज मित्तेअ ! पेक्ख मे परिभवं । [म]

विदू । किं तव परिह्वो ? आदु अम्हाणं ? । [य]

रद । णं तुम्हाणं ज्जेव । [र]

विदू । किं एसो बलक्कारो ? । [ल]

रद । अधइं । [व]

विदू । सच्चं ? ।[श]

रद । सच्चं । (ष)

साम्प्रतं परपुरुषा मेदं प्रविशन्ति ।

(म) आर्य्य ! मैत्रेय ! प्रेक्षस्व मे परिभवम् ।

(य) किं तव परिभवः ? अथवा अस्माकम् ? ।

(र) ननु युष्माकमेव । (ल) किमेष बलात्कारः ? ।

(व) अथकिम् । (श) सत्यम् ? । (ष) सत्यम् ।

(य) विदू इति । परिभवः अपमानः । आश्रितस्यापमाने आश्रयस्यैव अपमान-पातात् पृच्छति अथवा अस्माकमिति । उत्तरवाक्ये ऽप्येवमेवाशयः ।

(म) রদনিকা । আর্য্যমৈত্রেয় ! আমার অপমান দেখুন ।

(য) বিদূষক । তোমার অপমান ? না আমাদের অপমান ? ।

(র) রদনিকা । আপনাদেরই বটে ।

(ল) বিদূষক । ইহা কি বলাৎকার ? ।

(ব) রদনিকা । হাঁ ।

(শ) বিদূষক । সত্য ? ।

(ষ) রদনিকা । সত্য ।

विदू । सक्रोधं दण्डकाष्ठमुद्यम्य । मा दाव । भो ! सके गेहे कुक्कुरोऽपि दाव चण्डो भोदि, किं उण अहं बम्हणो । ता एदिणा अम्हारिस-जण-भाअधेअ-कुडिलेण दण्डकट्ठेण दुट्ठस्स विअ सुक्खाण-वेणुअस्स मत्थअं दे पहारेहिं कुट्टइस्सं । (स)

विटः । महाब्राह्मण ! मर्षय मर्षय । (ह)

(स) मा तावत् । भोः ! स्वके गेहे कुक्कुरोऽपि तावत् चण्डो भवति, किं पुनरहं ब्राह्मणः । तदेतेन अस्मादृश-जन-भागधेय-कुटिलेन दण्डकाष्ठेन दुष्टस्येव शुष्कवेणुकस्य मस्तकं ते प्रहारैः कुट्टयिष्यामि ।

(स) विदू इति । मा तावत् एवं कुरु इति शेषः । स्वके स्वकीये । चण्डो विक्रमेण कोपनः । अस्मादृशजनानां भागधेयवत् भाग्यवत् कुटिलं वक्रं प्रतिकूलञ्च तेन । दुष्टस्य दुर्जनस्य, अन्यत्र तु घुणजर्ज्जरितस्य शुष्को यो वेणुको वंशदण्डस्तस्य । कुट्टयिष्यामि चूर्णयिष्यामि ।

(ह) विट इति । महाब्राह्मण ! निकृष्टब्राह्मण ! परोपजीवित्वादिति भावः । महच्छब्दस्यायं स्वभावो यत् शब्दविशेषविशेषणीभूतः अर्थविशेषं प्रत्याययतीति । अत एवोक्तम्—

"शङ्खे तैले तथा मांसे वैद्ये ज्योतिषिके द्विजे ।
यात्रायां पथि निद्रायां महच्छब्दो न दीयते ॥

(স) বিদূষক। (ক্রোধের সহিত দণ্ড উত্তোলন করিয়া) এরূপ করিও না। ওরে! নিজের বাড়ীতে কুকুরও, প্রচণ্ড হইয়া থাকে; তা আমি ব্রাহ্মণ আর না হইব কেন?। অতএব আমাদের মত লোকের ভাগ্যের ন্যায় বক্র এই দণ্ডদ্বারা প্রহার করিয়া, ঘুণজর্জ্জরিত শুষ্ক বংশদণ্ডের ন্যায়, তোমার মস্তক চূর্ণ করিব।

(হ) বিট। ওহে মহাব্রাহ্মণ! ক্ষমা কর ক্ষমা কর।

विदू। विटं दृश्ना। ण एत्थ एसो अवरज्झदि। शकारं दृश्ना। एसो क्खु एत्थ अवरज्झदि। अरे रे राअसालअ! संठाणअ! दुज्जण! दुम्मणुस्स! जुत्तं णेदं? जइवि णाम तत्तभवं अज्जचारुदत्तो दलिद्दो संवुत्तो, ता किं तस्स गुणेहिं ण अलङ्किदा उज्जइणी? जेण तस्स गेहं पविसिअ परिअणस्स ईरिसो उवमद्दो करीअदि। (च)

मा दुग्गदोत्ति परिहवो णत्थि कअन्तस्स दुग्गदो णाम।
चारित्तेण विहीणो अड्ढो वि अ दुग्गदो होइ ॥४३॥

(च) नात्र एषोऽपराध्यति। एष खल्वत्र अपराध्यति। अरे रे राजश्यालक! संस्थानक! दुर्जन! दुर्म्मनुष्य! युक्तं नेदम्। यद्यपि नाम तत्रभवान् आर्य्यचारुदत्तो दरिद्रः संवृत्तः, तत् किं तस्य गुणैर्नालङ्कृता उज्जयिनी? येन तस्य गृहं प्रविश्य परिजनस्य ईदृश उपमर्द्दः क्रियते।

(४३) मा दुर्गत इति परिभवो नास्ति कृतान्तस्य दुर्गतो नाम।
चारित्रेण विहीन आढ्योऽपि च दुर्गतो भवति॥

(च) विदू इति। संस्थानमवस्थानमस्यास्तीति संस्थानः, अर्श आदित्वादत्, ततः कुत्सायां कप्रत्ययः। मार्गन्यूपपतिविहितावस्थानकत्वादेवास्य कुत्सितत्वम्। तेन संस्थानक इति शकारस्य नाम। तत तथापि। उपमर्द्दो निग्रहः।

(क) বিদূষক (বিটকে দেখিয়া) এ বিষয়ে এ, অপরাধী নহে। (শকারকে দেখিয়া) এ বিষয়ে এই বেটাই অপরাধী। ওরে রাজার শালা সংস্থান! দুর্জ্জন! দুষ্টমানুষ! ইহা উচিত নহে। মাননীয় আর্য্য চারুদত্ত যদিও, দরিদ্র হইয়া পড়িয়াছেন; তথাপি তাঁহার গুণে কি উজ্জয়িনীকে অলঙ্কৃত করে নাই?। যে তাঁর বাড়ীতে প্রবেশ করিয়া, পরিজনের এইরূপ নিগ্রহ করিতেছিস্!।

विटः । (सवैलक्ष्यम्) महाब्राह्मण ! मर्षय मर्षय । अन्यजनशङ्कया खल्विदमनुष्ठितम्, न दर्पात् । पश्य, — (*)

सकामान्विष्यतेऽस्माभिः —

विदू । किं इमं ? । (क)

(क) किमियम् ? ।

ननु दुर्गतस्य मानहीनस्य परिभवे को दोष इत्याह मेति । दुर्गतः अयं जनो दरिद्र इति कृत्वा, मा परिभवो न निग्रहः कर्त्तव्यः । कुत इत्याह —कृतान्तस्य दैवस्य सकाशे दुर्गतो नास्ति, इति नाम सम्भावयामीत्यर्थः । तथा च सर्वप्रबलं नाम दैवं दुर्गतमपि धनिनम्, धनिनमपि च दुर्गतं कर्त्तुमर्हतीति भवतो दुर्गतत्वे चारुदत्तस्य च धनित्वे वैपरीत्येन निग्रहोऽपि सम्भवेत इति भावः । अपि च चारित्रेण सद्व्यवहारेण विहीन आढ्यो धनवानपि जनः, दुर्गतो भवति ; सर्वैरवज्ञेयत्वादिति तात्पर्य्यम् । तेन त्वमाढ्योऽपि चारित्रविहीनतया दुर्गत एवेति तवापि निग्रहः सम्भवतीति भावः ।

अतएवात्र परार्द्धे सामान्याद्विशेषप्रतीतिरूपः अप्रस्तुतप्रशंसालङ्कारः पूर्व्वार्द्धे च वाक्यार्थहेतुकं काव्यलिङ्गमित्यनयोः संसृष्टिः । किन्तु दुर्गतशब्दस्य असकृदुपादानेऽपि नानवीकृतत्वदोषः ; कथितपदतादोषवदस्यापि उद्देश्यप्रतिनिर्द्देश्यव्यतिरिक्तविषयत्वकल्पनात् प्रायेण समानविषयत्वात् ।

"कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसु ।" इति मेदिनी । आर्य्या जातिः ॥४३॥

(क) विट इति । वैलक्ष्येण लज्जाजनिताप्रतिभत्वेन सहेति सवैलक्ष्यम् ।

सकामेति । अस्माभिः सकामा रमणी अन्विष्यते ।

মানুষ দরিদ্র হইলেই তাহার নিগ্রহ করিতে নাই ; কারণ, দৈবের নিকট দরিদ্র নাই । চরিত্রহীন ধনীও, দরিদ্র হইয়া থাকে ॥ ৪৩॥

* বিট । (লজ্জার সহিত) মহাব্রাহ্মণ ! ক্ষমা করুন ক্ষমা করুন । অন্যলোক মনে করিয়াই এইরূপ করিয়াছে ; কিন্তু দর্পবশতঃ নহে । দেখুন—

विटः। शान्तं पापम्। (ख)—काचित् स्वाधीनयौवना।
सा नष्टा, शङ्कया तस्याः प्राप्तेयं शीलवञ्चना ॥४४॥

सर्वथा इदमनुनयसर्वस्वं गृह्यताम् (ग)। [इति खड्गमुत्सृज्य कृताञ्जलिः पादयोः पतति।

विदू। सप्पुरिस! उट्ठेहि उट्ठेहि। अआणन्तेण मए तुमं उवालद्धे, सम्पदं उण जाणन्तो अणुणेमि। (घ)

(ख) विट इति। शान्तं पापम् उक्तरूपं न वाच्यमित्यर्थः। 'शान्तं पापमनिष्टार्थे' इति कोषः।

काचिदिति। स्वाधीनमेव ननु पित्राद्यधीनं यौवनं यस्याः सा तादृशी, काचित् रमणी अन्विष्यते इत्यन्वयः। किन्तु सा नष्टा अदर्शनं गता पलायिता। तस्याः शङ्कया सन्देहेन, इयं भवत्परिजननिग्रहरूपा, शीलस्य अस्मत्स्वभावस्य वञ्चना तत्कार्यकारितारूपा प्राप्ता। सन्देहवशादेवेदमन्याय्यं कृतं न पुनर्ज्ञानत इति मर्षयितव्यमेवैतदिति भावः।

अत्र नष्टेत्यमङ्गलव्यञ्जकत्वादश्लीलतादोषः, स तु भ्रष्टा इति पाठेन समाधेयः।

(ग) सर्वथेति। इदं क्रियमाणं पादपतनम्, अनुनयस्य सर्वस्वं प्रधानाङ्गम्।

আমরা কোন কামুকীকে অন্বেষণ করিতেছি।—

(ক) বিদূষক। ইহাকে কি?।

(খ) বিট। ওরূপ বলিবেন না।— কোন স্বাধীনযৌবনাকে (বেশ্যাকে) যে, পলাইয়া গিয়াছে; তাহারই সন্দেহে, আমাদের এই চরিত্রচ্যুতি উপস্থিত হইয়াছে ॥৪৪॥

(গ) অতএব, সকল প্রকারে অনুনয়ের সর্বস্ব ইহা (চরণ ধারণ) গ্রহণ করুন। (এই বলিয়া, খড়্গ পরিত্যাগ করিয়া, কৃতাঞ্জলি হইয়া বিদূষকের চরণযুগলে পতিত হইল।)

विटः । ननु भवानेवात्रानुनेयः । तदुत्तिष्ठामि समयतः । (ङ)

विदू । भणादु भवं । (च)

विटः । यदीमं वृत्तान्तमार्य्यचारुदत्तस्य नाख्यास्यसि ।

विदू । ण कधइस्सं । (छ)

(घ) सत्पुरुष ! उत्तिष्ठ उत्तिष्ठ । अजानता मया त्वमुपालब्धः, साम्प्रतं पुनर्जानन् अनुनयामि ।

(च) भणतु भवान् । (छ) न कथयिष्यामि ।

(घ) विदू इति । उपालब्धो निन्दितः । अनुनयामि भवन्तमिति शेषः ।

(ङ) विट इति । अत्र विषये भवानेव अनुनेयो मयेति शेषः, न पुनर्भवता अहमिति एवशब्दस्यार्थः । समयतः कस्माच्चित् शपथात् ।

एष इति । हे विप्र ! एषः जनः ते तव प्रणयः प्रणयपूर्वकशपथः, शिरसा धार्य्यते । येन त्वया, गुणाः सौजन्यादिरूपादय एव शस्त्राणि तैः, शस्त्रवन्तोऽपि वयं निर्जिताः ।

सर्वमेवेत्यारभ्य एतदन्तं ग्रन्थं परिहारो नाम नाट्यालङ्कारः । यथा दर्पणे —

'परिहार इति प्रोक्तः कृतानुचितमार्जनम् ॥

(ঘ) বিদূষক। সাধুপুরুষ! আপনি উঠুন উঠুন। আমি না জানিয়া আপনাকে নিন্দা করিয়াছি; এখন কিন্তু জানিয়া আবার অনুনয় করিতেছি।

(ঙ) বিট। মহাশয়! এবিষয়ে আপনারই অনুনয় আমাদের করা উচিত। তবে একটি শপথ করিলে আমি উঠিতে পারি।

(চ) বিদূষক। আপনি তাহা বলুন।

বিট। যদি এই বৃত্তান্ত আর্য্য চারুদত্তের নিকট না বলেন।

(ছ) বিদূষক। বলিব না।

विट:। एष ते प्रणयो विप्र ! शिरसा धार्य्यते मया ।
गुणशस्त्रैर्वयं येन शस्त्रवन्तोऽपि निर्जिता: ॥४५॥

शकार:। सासूयम्। किं णिमित्तम् उण भावे ! एदश्श दुट्ठवडुअश्श विणअञ्जलिं कदुअ पाएशु णिपड़िदे ?। (ज)

विट:। भीतोऽस्मि।

शकार:। कश्श तुमं भीदे ?। [झ]

विट:। तस्य चारुदत्तस्य गुणेभ्य:।

शकार:। के तश्श (१) गुणा ? जश्श गेहं पविशिअ अशिदव्वं वि णत्थि। (ञ)

(ज) किं निमित्तं पुनर्भाव ! एतस्य दुष्टवटुकस्य विनयाञ्जलिं कृत्वा पादयोर्निपतित: ?।

(झ) कस्मात् त्वं भीत: ?। (ञ) के तस्य गुणा: ? यस्य गेहं प्रविश्य अशितव्यमपि नास्ति।

(ज) शकार इति। हे भाव ! विद्वन् !। विनयसूचकोऽञ्जलिर्विनयाञ्जलिस्तम्।

(ञ) शकार इति। गृहं प्रविश्य स्थितस्य जनस्य अशितव्यं भोक्तव्यमपि अन्नादिकं नास्तीत्यर्थ:।

বিট। হে ব্রাহ্মণ! আপনার এই প্রণয়পূর্ব্বক শপথ, আমি মস্তকে ধারণ করিতেছি। আমরা অস্ত্রধারী হইলেও, যে ব্যক্তি (আপনি) গুণরূপ অস্ত্রে আমাদিগকে জয় করিয়াছেন ॥৪৫॥

(জ) শকার। (অসূয়ার সহিত) পণ্ডিত মহাশয়! আপনি কি জন্য বিনয়সূচক হাত জোড় করিয়া, এই দুষ্ট ব্রাহ্মণের পায়ে পড়িলেন ?

বিট। আমি ভীত হইয়াছি।

(१) के विश्र तश्श।

विटः । मा मैवम् ।

सोऽस्मद्विधानां प्रणयैः कृशीकृतो
न तेन कश्चिद्विभवैर्विमानितः ।
निदाघकालेष्विव सोदको ह्रदो
नृणां स तृष्णामपनीय शुष्कवान् ॥४६॥

स इति । स चारुदत्तः, अस्मद्विधानां धनलुब्धानां जनानाम्, प्रणयैर्याचञाभिः कृशीकृतो धनहीनीकृतः ; न तु असम्यगव्ययैः कृशीकृत इत्याशयः । तेन चारुदत्तेन, विभवैर्धनैर्धनमदैरित्यर्थः, कश्चिदपि जनो न विमानितः अपमानितः । तथा स चारुदत्तः, निदाघकालेषु ग्रीष्मसमयेषु, सोदको जलपूर्णो ह्रद इव, नृणां लोकानाम्, तृष्णां जलपिपासां धनलिप्साञ्च, अपनीय जलदानेन धनदानेन च दूरीकृत्य, शुष्कवान् जलहीनो धनहीनश्च जातः । अतोऽस्य दारिद्र्यमपि श्लाघ्यमेवेति भावः ।

अत्र प्रथमपादे व्याख्यानुसारेणान्यव्यपोहनादार्थी परिसंख्या परार्द्धे पूर्णोपमा च ; अनयोः परस्परनिरपेक्षतया संसृष्टिः ।

"प्रणयः प्रेम्णि विस्रम्भे याचञाप्रसरयोरपि ।" इति विश्वः ।

शुष्कवानिति शुषधातोः क्तवन्तुप्रत्यये "शुषेः कः" इति तकारस्य ककारः ।

इन्द्रवंशावंशस्थविलयोर्मिलनादुपजातिर्वृत्तम् ॥४६॥

(ঝ) শকার। আপনি কাহা হইতে ভীত হইলেন ?।

বিট। সেই চারুদত্তের গুণ হইতে।

(ঞ) শকার। তা'র আবার গুণ কি ? যার ঘরে প্রবেশ করিয়া খাদ্যও পাওয়া যায় না।

বিট। না না, এরূপ বলিও না।

আমাদের মত লোকের প্রার্থনা, চারুদত্তকে ধনহীন করিয়াছে এবং

शकार: । सामर्षम्, के शे गब्भदाशोए पुत्ते ? । (ट)

शूले विक्कन्ते पण्डवे ? शेदकेदू
पुत्ते लाधाए ? लावणे इन्दपुत्ते ? (१) ।
आहो कुन्तीए तेण लामेण जादे
अश्शत्थामि ? धम्मपुत्ते जडाउ ॥४७॥

(ट) क: स गर्भदास्या: पुत्र: ? ।

(४७) शूरो विक्रान्त: पाण्डव: ? श्वेतकेतु: पुत्रो राधाया: ? रावण इन्द्रपुत्र: ? ।

आहो कुन्त्यां तेन रामेण जात: अश्वत्थामा ? धर्म्मपुत्रो जटायु: ? ॥

(ट) शकार इति । गर्भदास्या जन्मावधिदास्या: ।

पुनर्विशेषेण पृच्छति शूर इति । शूरो विक्रान्त इति पाण्डवविशेषणद्वयम् एकार्थकतया पुनरुक्तम् । पाण्डवस्य भीमोऽर्ज्जुनो वा किमित्यर्थ: । एवमेव सर्वत्र काकुरवगन्तव्या । किंवा राधाया: पुत्र: श्वेतकेतु: ? । श्वेतकेतुर्नाम कश्चिदौपनिषदो महर्षि: अथवा इन्द्रस्य पुत्रो रावण: ? । आहो उत, तेन जगत्प्रसिद्धेन रामेण करणेन, कुन्त्यां पाण्डुपत्न्यां जात: अश्वत्थामा ? । किंवा धर्म्मस्य पुत्रो जटायु: ? । न भवानेव प्रशंसतीति भाव: ।

अत्र श्वेतकेतुरित्यादिकं सर्व्वमेव अपार्थम्, शकारवचनत्वात् ।

वैश्वदेवी वृत्तम्, "बाणाश्वैश्छिन्ना वैश्वदेवी ममौ यौ ।" इति लक्षणात् ॥४७॥

চারুদত্ত ধনের অহঙ্কারে কাহাকেও অপমানিত করেন নাই। গ্রীষ্মকালে জলপূর্ণ হ্রদের ন্যায় তিনি মনুষ্যগণের তৃষ্ণা দূর করিয়া শুষ্ক হইয়াছেন ॥৪৬॥

(ট) শকার। সে জন্মদাসীর পুত্র কে?

বীর ও বিক্রমী পাণ্ডব? না রাধার পুত্র শ্বেতকেতু? কিম্বা ইন্দ্রের পুত্র রাবণ? অথবা কুন্তীর গর্ভে রামের ঔরসে উৎপন্ন অশ্বত্থামা? না ধর্ম্মের পুত্র জটায়ু? ॥৪৭॥

---

(१) इन्द्रदत्त: ।

विटः। मूर्ख ! आर्य्यचारुदत्तः खल्वसौ।

दीनानां कल्पवृक्षः स्वगुणफलनतः, सज्जनानां कुटुम्बी,
आदर्शः शिक्षितानां, सुचरितनिकषः, शीलवेलासमुद्रः।
सत्कर्त्ता, नावमन्ता, पुरुषगुणनिधिर्दक्षिणोदारसत्त्वो
ह्येकः श्लाघ्यः स जीवत्यधिकगुणतया, चोच्छ्वसन्तीव चान्ये ॥४८॥

दीनानामिति। दीनानां दरिद्राणां सम्बन्धे स्वगुणा विनयौदार्य्यादय एव फलानि तैर्नतः, कल्पवृक्षः कल्पतरुस्वरूपः ; लिप्सितदातृत्वादिति भावः। सज्जनानां कुटुम्बी गृहिस्वरूपः परिपोषक इत्यर्थः। शिक्षितानामभिज्ञानां जनानाम्, आदर्श आदर्शस्वरूपो दृष्टान्तस्थानमिति तात्पर्य्यम्। सुचरितानां सच्चरित्राणां निकषः कषपाषाणस्वरूपः परीक्षास्थानमित्यर्थः। तथा शीलं सद्वृत्तमेव वेला तीरभूमिस्तस्य समुद्रः समुद्रस्वरूपः। समुद्रो यथा तीरभूमिं नातिक्रामति, अयमपि तथा सद्वृत्तं नातिक्रामतीति भावः। सत्कर्त्ता दानादिभिर्लोकानां सत्कारकः सम्मानकारीति यावत् किन्तु न अवमन्ता कटूक्तिप्रभृतिभिर्नापमानकारी। पुरुषगुणानां तेजस्वितादीनां निधिराश्रयभूतः ; तथा दक्षिणं सरलम् उदारं महच्च सत्त्वं स्वभावो यस्य स तादृशः। अतएव श्लाघ्यः सर्वथा प्रशंसनीयः, स चारुदत्तः, एको हि एक एव च अधिकगुणतया हेतुना जीवति·नानासत्कार्य्यकारितया जीवनप्रयोजनं साधयति, अन्ये तु जनाः, उच्छ्वसन्तीव तादृशसत्कार्य्यकारित्वाभावेन जीवनप्रयोजनसाधनाभावात् मुमूर्षुवत् केवलं श्वासमेव परित्यजन्तीत्यर्थः।

বিট। মূর্খ! উনি মাননীয় চারুদত্ত।

দরিদ্রলোকের পক্ষে, নিজের গুণরূপ ফলে অবনত কল্পবৃক্ষ; সজ্জনের পরিপোষক; শিক্ষিতগণের আদর্শ; সচ্চরিত্রের পরীক্ষাস্থান চরিত্ররূপ তীরভূমির সমুদ্র; লোকের সম্মানকারী, কিন্তু অপমানকারী নহেন; পুরুষের সমস্ত সদ্গুণের আধার; সরল ও উদারস্বভাব; অতএব অতিরিক্ত গুণী বলিয়া সেই এক চারুদত্তই প্রশংসনীয় হইয়া জীবন ধারণ করিতেছেন; আর সকলে যেন কেবল শ্বাস প্রশ্বাস করিতেছে ॥ ৪৮॥

तदितो गच्छाम: ।

शकार: । अगेण्हिअ वशन्तशेणिअं ? । [ठ]

विट: । नष्टा वसन्तसेना । [ड]

शकार: । कधं विअ ? । [ढ]

(ठ) अगृहीत्वा वसन्तसेनिकाम् ? । (ढ) ? ।

अत्र "गाम्भीर्येण समुद्रोऽसि गौरवेणासि पर्वतः" इति दर्पणोदाहरणवत् प्रथमार्ई रूपकयोगो उल्लेखालङ्कार:, चतुर्थपादे तु वाच्या क्रियोत्प्रेक्षा , अनयोर्मिथो निरपेक्षतया संसृष्टि: । तथा गुणफलनत इत्यनेनैव आत्मगुणप्रतीतौ स्वपदमधिकमिति अधिकपदतादोष: ; स तु 'गुणफलविनत:' इति पाठेनैव समाधेय: । किन्तु चतुर्थपादे हिशब्दस्य पूर्वत: पाठेऽपि स्वान्वयिन एव एकशब्दस्य समभिव्याहारात् न अक्रमतादोष: । एवं निपातानामनेकार्थत्वात् प्रथमचकारः शेषविशेषणसमुच्चये, द्वितीयचकारस्य किन्त्वर्थे इति न निरर्थकत्वदोषोऽपि ।

अत्र गुणकीर्त्तनं नाम नाट्यलक्षणञ्च "गुणानां कीर्त्तनं यत्तु तदेव गुणकीर्त्तनम् ।" इति लक्षणात् । "कुटुम्बं पोष्यवर्गेऽपि" इत्यमरमाला । "निकष: शाणफलके निकषा यातुमातरि" इति मेदिनी । शीलं स्वभावे सद्वृत्ते" "वेला काले च जलधेस्तीरनीरविकारयो:" इति च विश्व: । "सत्त्वं द्रव्ये गुणे चित्ते व्यवसायस्वभावयो: । पिशाचादावात्मभावे बले प्राणिषु जन्तुषु" इति हेम: ।

स्रग्धरा वृत्तम् ॥४८॥

(ड) विट इति । नष्टा अदर्शनं गता, अत: कथं ग्रहीष्यसीति भाव: । अत्र नष्टेत्यनेन मरणाद्यर्थव्यञ्जकतया अमङ्गलव्यञ्जकत्वादश्लीलतादोष: पलायितेति पाठेन समाधेय: ।

অতএব চল আমরা এখান হইতে যাই ।

(ঠ) শকার । বসন্তসেনাকে না লইয়া ? ।

(ড) বিট । বসন্তসেনা ত পালাইয়াছে ।

(ঢ) শকার । কেমন ধারা ? ।

विटः । अन्धस्य दृष्टिरिव, पुष्टिरिवातुरस्य,
मूर्खस्य बुद्धिरिव, सिद्धिरिवालसस्य ।
स्वल्पस्मृतेर्व्यसनिनः परमेव विद्या,
त्वां प्राप्य सा रतिरिवारिजने प्रनष्टा ॥४८॥

शकारः । अगेण्हिअ वशन्तशेणिअं ण गमिश्शं । (ण)

विटः । एतदपि न श्रुतं त्वया ? ।

(ण) अगृहीत्वा वसन्तसेनिकां न गमिष्यामि ।

अन्धस्येति । सा वसन्तसेना, अन्धस्य मादकसेवनादिना अन्धीभूतस्य जनस्य, दृष्टिः रूपप्रत्यक्षशक्तिरिव ; आतुरस्य रोगिणः, पुष्टिः स्थूलतेव ; मूर्खस्य बुद्धिर्विवेकशक्तिरिव ; अलसस्य सिद्धिः कार्य्यनिष्पत्तिरिव ; स्वल्पस्मृतेरल्पमेधसः, अथ च व्यसनिनः कामादिविषयान्तरासक्तस्य, परमा उत्कृष्टा विद्येव, अरिजने शत्रुभूते जने रतिरनुराग इव च, त्वां तं तन्न पदार्थम् प्राप्य, प्रनष्टा अदर्शनं गता पलायिता अन्यत्र तु विश्वस्ता । दृष्ट्यादयो यथा प्रथमतः अन्धादीन् प्राप्य परं प्रणश्यन्ति, तथा वसन्तसेनापि त्वां प्राप्य प्रनष्टेत्यर्थः ।

अत्र मालोपमालङ्कारः । तथात्रापि प्रनष्टेत्यमङ्गलव्यञ्जकत्वादश्लीलतादोषः ; 'जाताऽभूत्' इति पाठेन समाधेयः ।

वसन्ततिलका वृत्तम् ॥४९॥

বিট । অন্ধের দৃষ্টির ন্যায়, রোগীর পুষ্টির ন্যায়, মূর্খের বুদ্ধির ন্যায়, অলসের সিদ্ধির ন্যায়, ব্যসনাসক্ত অথচ অল্পমেধাবী ব্যক্তির উৎকৃষ্ট বিদ্যার ন্যায় এবং শত্রুজনের প্রতি অনুরক্তির ন্যায়, সেই বসন্তসেনা তোমাকে পাইয়া, আবার লোপ পাইয়াছে ॥৪৯॥

(ণ) শকার । বসন্তসেনাকে না লইয়া আমি যাইব না ।

বিট । তুমি ইহাও শুন নাই ?

आलाने गृह्यते हस्ती, वाजी वल्गासु गृह्यते ।
हृदये गृह्यते नारी, यदिदं नास्ति गम्यताम् ॥५०॥

शकारः । जइ गच्छसि, गच्छ तुमं ; हगे ण गमिश्शं । (त)

विटः । एवम्, गच्छामि । इति निष्क्रान्तः ।

(त) यदि गच्छसि, गच्छ त्वम् ; अहं न गमिष्यामि ।

आलान इति । हस्ती आलाने बन्धनस्तम्भे गृह्यते बध्यते बद्ध्वा वशीक्रियत इत्यर्थः ; वाजी घोटकः, वल्गासु मुखरज्जुषु, गृह्यते धार्य्यते धारयित्वा वशमानीयते ; तथा नारी हृदये गृह्यते आकृष्यते अनुरागोत्पादनेन हृदयमाकृष्य वशीक्रियत इति तात्पर्य्यम् । यद्यस्मात्, इदं हृदयग्रहणम् अनुरागोत्पादनेन वसन्तसेनायाश्चित्ताकर्षणमित्यर्थः ; नास्ति आवयोर्न वर्त्तते, ततो गम्यतामावाभ्यामिति शेषः, तदर्थं कालविलम्बस्य फलाभावा दिति भावः ।

अत्र नारी प्रस्तुता हस्तिवाजिनौ त्वप्रस्तुतौ इत्थं तेषामेकग्रहणक्रियाभिसम्बन्धाद् दीपकमलङ्कारः । तथा गृह्यते इत्यस्य असकृदुपादानादनवीकृतत्वदोषः, "आलाने हृदये" इत्येकवचनान्तयोर्मध्ये "वल्गासु" इति बहुवचनोपादानात् "हस्ती वाजी" इति पुंलिङ्गयोर्मध्ये "नारी" इति स्त्रीलिङ्गाभिधानाच्च भग्नप्रक्रमता दोषद्वयम् । तेन श्लोकोऽयमेवं पठनीयः—

आलाने गृह्यते हस्ती वल्गायाञ्च तुरङ्गमः ।
हृदये चाङ्गनालोकः यदिदं नास्ति गम्यताम् ॥

तथात्र उदाहरणं नाम नाट्यलक्षणम् । यथा साहित्यदर्पणे—

"यत्र तुल्यार्थयुक्तेन वाक्येनाभिप्रदर्शनात् ।
साध्यतेऽभिमतश्चार्थस्तदुदाहरणं मतम् ॥" ५०॥

হাতীকে বন্ধনস্তম্ভে ধরিতে হয়, ঘোড়াকে মুখরজ্জুতে ধরিতে হয় এবং স্ত্রীজাতিকে হৃদয়ে ধরিতে হয়; যখন ইহা হয় নাই; তখন (এস) যাই ॥৫০॥

(ত) শকার। যদি যা'ন তবে আপনিই যান, আমি যাইব না।

शकारः। गड्डे क्खु भावे अभावं। विदूषकमुद्दिश्य। अले काकपदशीशमत्थका दुट्ठवडुका! उवविश उवविश। (थ)

विदू। उववेसिदा ज्जेव अम्हे। (द)

शकारः। केण?। (ध)

विदू। कअन्तेण। (न)

शकारः। उट्ठेहि उट्ठेहि। (प)

विदू। उट्ठिस्सामो। [फ]

शकारः। कदा?। [ब]

(थ) गतः खलु भावः अभावम्। अरे काकपदशीर्षमस्तक! दुष्टवटुक! उपविश उपविश।

(द) उपवेशिता एव वयम्। (ध) केन?। (न) कृतान्तेन।

(प) उत्तिष्ठ उत्तिष्ठ। (फ) उत्थास्यामः। (ब) कदा?।

(थ) शकार इति। अभावम् अवान्तस्थानाभावम्। काकपदवत् वायसचरणवत् लम्बक्रमियर्थः शीर्षं मस्तकञ्च यस्य तत्सम्बोधनम्। शीर्षमस्तकेति पुनरुक्तम्।

(न) विदू इति। कृतान्तेन दैवेन। "कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसु" इत्यमरः।

বিদূ। ইহাই হউক; আমি যাই। (এই বলিয়া চলিয়া গেল।)

(থ) শকার। পণ্ডিতটা নাশ পাইয়াছে। (বিদূষকের প্রতি) ওরে কাক-পদ-শীর্ষ! দুষ্টব্রাহ্মণ! বস বস।

(দ)। বিদূষক। আমাদিগকে বসাইয়াছেনই ত।

(ধ) শকার। কে?।

(ন) বিদূষক। দৈব।

(প) শকার। উঠ উঠ।

বিদূ। জদা পুণো বি দেব্বং অণুজলং ভবিস্সদি। [ভ]

শকারঃ। অলে! লোদ লোদ। [ম]

বিদূ। লোদাবিদা জ্জেব অম্হে। [য]

শকারঃ। কেণ?। [র]

বিদূ। দুগ্গদীএ। [ল]

শকারঃ। অলে! হশ হশ। [ব]

বিদূ। হসিস্সামো। [শ]

শকারঃ। কদা?। [ষ]

(ভ) যদা পুনরপি দৈবমনুকূলং ভবিষ্যতি। (ম) অরে! রুদিহি রুদিহি।

(য) রোদিতা এব বয়ম্। (র) কেন?। (ল) দুর্গত্যা। (ব) অরে! হস হস।

(শ) হসিষ্যামঃ। (ষ) কদা?।

(ক) বিদূষক। উঠিব।

(ব) শকার। কখন?।

(ভ) বিদূষক। যখন আবারও দৈব অনুকূল হইবে।

(ম) শকার। ওরে! কাঁদ কাঁদ।

(য) বিদূষক। আমাদিগকে কাঁদাইয়াছেই ত।

(র) শকার। কে?।

(ল) বিদূষক। দারিদ্র্য।

(ব) শকার ওরে! হাস হাস।

(শ) বিদূষক। হাসিব।

(ষ) শকার। কখন?।

विदू । पुणो वि ऋद्धीए अज्जचारुदत्तस्स । [स]

शकारः । अले ले (१) दुष्टवडुका ! भणिस्सि मम वअ-णेण तं दलिद्दचालुदत्तकं एशा शशुवण्णा शहिलण्णा णव-णाडअ-दंशणुट्ठिदा शुत्तधालिव्व वशन्तशेणा णाम गणिआदालिआ कामदेवाअदणुज्जाणादो पहुदि तुमं अणुलत्ता, अम्हेहिं बलक्कालाणुणीअमाणा, तुह गेहं पविट्ठा । ता जइ मम हत्थे

.(स) पुनरपि ऋद्धा आर्य्यचारुदत्तस्य ।

(ह) अरे रे दुष्टवटुक ! भणिष्यसि मम वचनेन तं दरिद्रचारुदत्त-कम् । एषा ससुवर्णा सहिरण्या नव-नाटक-दर्शनोत्थिता सूत्रधारीव बसन्तसेना नाम गणिकादारिका, कामदेवायतनोद्यानात् प्रभृति त्वाम-

(ह) शकार इति । सुवर्णैः सुवर्णभूषणैः सहेति ससुवर्णा, सहिरण्येति पद-मपि एतदर्थं समर्थयति पुनरुक्तम् । नवनाटकस्य दर्शनाय तदभिनयप्रदर्शनाय उत्थिता रङ्गालये प्रविष्टा, सूत्रधारी सूत्रधारपत्नी । बलात्कारेण बलप्रयोगेण अनुनीयमाना प्रसाद्यमाना । इयं न्यायविरुद्धोक्तिः, बलप्रयोगेन अनुनयासम्भवात् । अधिकरणे राज्ञो विचारालये, व्यवहारं यं कञ्चिदभियोगम् । निर्यातयस एनां प्रददतः । "निर्या-

(স) বিদূষক। যখন আবারও আর্য্য চারুদত্তের সম্পত্তি হইবে।

(হ) শকার। ওরে দুষ্টব্রাহ্মণ! আমার কথানুসারে সেই দরিদ্র চারুদত্তকে বলিস্—'নূতন নাটক দেখাইবার নিমিত্ত উত্থিত সূত্র-ধারিণীর ন্যায়, স্বর্ণালঙ্কারভূষিতা বসন্তসেনা নামে এই বেশ্যাকন্যা কামদেবোদ্যানে সাক্ষাতের পর হইতে, তোমার প্রতি অনুরক্ত হইয়াছে; কিন্তু এখন আমরা বলপূর্ব্বক অনুনয় করিলে, সে, তোমার বাড়ীতে প্রবেশ করিয়াছে। তা যদি তুমি নিজেই পাঠা

(१) अरे !।

शअं ज्जेव पट्टाविअ एणं समप्पेसि, तदो अधिअलणे ववहालं विणा लहु णिज्जादमाणाह तव मए अणुबद्धा पोदी हुविस्सदि आदु अणिज्जादमाणाह आमलणान्तिके (१) वेले हुविस्सदि । अविअ पेक्ख पेक्ख, (ह)

कक्कालुका गोच्छड़-लित्तवेण्टा,
शाके अ शुक्खे तलिदे हु मांसे ।

नुरक्ता अस्माभिर्बलात्कारानुनीयमाना तव गेहं प्रविष्टा । तद् यदि मम हस्ते स्वयमेव प्रस्थाप्य एनां समर्पयसि, ततोऽधिकरणे व्यवहारं विना शीघ्रं निर्यातयतस्तव मयानुबद्धः प्रीतिर्भविष्यति ; अथवा अनिर्यातयत आमरणान्तिकं वैरं भविष्यति । अपि च प्रेक्षस्व प्रेक्षस्व ।

(५१) कर्कारुको गोमयलिप्तवृन्तः, शाकञ्च शुष्कं, तलितं खलु मांसम् । भक्तञ्च हैमन्तिकरात्रिसिद्धं, लीनायाञ्च वेलायां न खलु भवति पूति ॥

तनं वैरयुक्तौ दाने न्यासार्पणेऽपि च" इति हेमचन्द्रः । मया सार्द्धम् । अनुबद्धा चिरस्थायिनी । अनिर्यातयतः अप्रददतः ।

कर्कारुक इति । गोमयेन लिप्तं वृन्तं वृन्तसंलग्नदेशो यस्य स तथोक्तः, कर्कारुकः कुष्माण्डः ; शुष्कं शाकञ्च ; तलितं घृतभृष्टम्, मांसम् तथा हैमन्तिकायां हैमन्तकालसम्बन्धिन्यां रात्रौ सिद्धं पक्वम्, भक्तमन्नञ्च ; एतत् सर्वम्, वेलायां लीनायाञ्च बहुसमये अतीतेऽपि पूति पर्य्युषितम् न खलु भवति । स्वयमेव चारुदत्तेन वसन्तसेनायां दत्तायां तेन सार्द्धं मम प्रीतिरपि न पर्य्युषिता भविष्यतीति भावः ।

ঠেয়া দিয়া, আমার হাতে সমর্পন কর, তবে বিচারালয়ে বিনা মোকদ্দমায়, তাড়াতাড়ি দিয়াছ বলিয়া, আমার সঙ্গে তোমার চির-স্থায়ী প্রণয় হইবে। আর যদি পাঠাইয়া না দাও, তবে মরণপর্য্যন্ত শত্রুতা হইবে।" আরও, দেখ দেখ,—

(१) मलणान्तिके ।

भत्ते अ हेमन्तिअ-रत्तिसिद्धे
लीणे अ वेले ण हु होदि पूदी ॥५१॥

सोत्थिकं भणिस्सि लहुकं भणिस्सि (१)। तधा भणिस्सि, जधा हगे अत्तणकेलिकाए पासाद-बालग्ग-कवोद-वालिआए उवविट्ठे

(च) स्वस्तिकं भणिष्यसि लघुकं भणिष्यसि। तथा भणिष्यसि यथाहम् आत्मीयायां प्रासाद-बालाग्र कपोत पालिकायामुपविष्टः

अत्राप्रस्तुतानामिव कर्कारुकादीनां पूतित्वरूपैकगुणसम्बन्धात् तुल्ययोगितालङ्कारः। महामूर्खेन शकारेण प्रमत्तवदेव कतिपयं निदर्शनमात्रमभिहितमेतत्; किन्तु सादृश्याभावेन एभिरप्रस्तुतैः प्रस्तुतायाः प्रीतेः प्रतीत्यभावात् न अप्रस्तुतप्रशंसालङ्कारोऽपीति सुधीभिर्मन्तव्यम्।

"कर्कारुकस्तु कुष्माण्डः" इत्यमरः। तलितं विवृणोति भावप्रकाशः—

"शुष्कमांसविधानेन मांसं सम्यक् प्रसाधितम्।
पुनस्तदाज्ये संभृष्टं तलितं प्रोच्यते बुधैः॥"

इन्द्रवज्रा वृत्तम् ॥५१॥

(च) स्वस्तिकमिति। स्वस्तिकं क्षेमं ममानुकूलं यथा स्यात्तथा। लघुकं सत्वरम्। आत्मीयायां स्वकीयायाम्, प्रासादस्य बालं नूतनम् अग्रमुपरिभागो यस्याः

গোময়দ্বারা যাহার বৃন্তদেশ লিপ্ত করিয়া রাখা হয়, সেইরূপ কুষ্মাণ্ড, শুষ্ক শাক, ভর্জিত মাংস এবং হেমন্তকালের রাত্রির অন্ন,— এই সকল বস্তু, দীর্ঘকাল অতীত হইলেও, পর্য্যুষিত হয় না ॥৫২॥

(ক) আমার অনুকূলভাবে বলিবি এবং তাড়াতাড়ি বলিবি। সেইভাবে বলিবি, যাহাতে আমি আমার দালানের নূতন পায়রার

(१) सोत्थिकं भणेस्सि लहुकं भणेस्सि।

শুণামি। অণ্ণধা, জদি ণ ভণেশি, কৱাল-তল-পবিট্ঠ-কবিত্থ গুড়িঅং বিঅ মত্থঅং দে মড়মড়াইশ্শং। (চ)

বিদূ। ভণিস্সং। [ক]

শকারঃ। অপবার্য্য। চেড়ে! গড়ে শচ্চকং জ্জেব ভাবে?। [খ]

চেটঃ। অধইং। (গ)

শকারঃ। তা গিণ্হ অবক্কমম্হ। (ঘ)

চেটঃ। তা গেণ্হদু ভট্টকে অশিং। [ঙ]

শৃণোমি; অন্যথা, যদি ন ভণিষ্যসি, তদা কপাট-তল-প্রবিষ্ট কপিত্থগুলিকমিব মস্তকং তে মড়মড়ায়িষ্যামি।

(ক) ভণিষ্যামি। (খ) চেট! গতঃ সত্যমেব ভাবঃ?। (গ) অথকিম্।

(ঘ) তৎ শীঘ্রমপক্রামাবঃ। (ঙ) তদ্ গৃহ্ণাতু ভট্টারকঃ অসিম্।

সা তাদৃশী, যা কপোতপালিকা পারাবতগৃহমস্ত্যা তস্যাম্। বর্বরতয়া স্বোক্তস্যৈব "অন্যথা" শব্দস্যার্থং বিবৃণোতি যদি ন ভাণিষ্যসি" ইতি। কপিত্থগুলিকং মধ্যশূন্যং কপিত্থফলগোলকম্। মড়মড়ায়িষ্যামি 'মড় মড়' ইতি শব্দং কৃত্বা ভঞ্জয়িষ্যামি।

(খ) শকার ইতি। অপবারিতলক্ষণং যথা সাহিত্যদর্পণে—

"—তদ্ভবেদপবারিতম্। রহস্যন্তু যদন্যস্য পরাবৃত্য প্রকাশ্যতে॥"

(ঘ) শকার ইতি। অপক্রামাব ইতো গচ্ছামঃ।

ঘরগুলির উপরে বসিয়া শুনিতে পাই; যদি না বলিস্, তবে কপাটের ভিতরে প্রবিষ্ট কপিত্থখোলের ন্যায় তোর মাথাটা মড়মড়াইয়া খাইব।

(ক) বিদূষক। বলিব।

(খ) শকার। (গোপনে) ভৃত্য! সত্যই কি পণ্ডিত চলিয়া গিয়াছেন?।

शकारः। तव ज्जेव हत्थे चिट्ठदु। [च]

चेटः। एशे भट्टालके। गेण्हदु णं भट्टके अशिं। [छ]

शकारः। विपरीतं गृहीत्वा।

णिव्वक्कलं मूलकपेशिवण्णं खन्धेण घेत्तूण अ कोशशुत्तं।
कुक्केहि कुक्कीहि अ बुक्कअन्ते जधा शिआले शलणं पलामि ५२

परिक्रम्य निष्क्रान्तौ।

(च) तवैव हस्ते तिष्ठतु। (छ) एष भट्टारकः। गृह्णातु एनं भट्टारकः असिम्।

(५२) निर्वल्कलं मूलकपेशिवर्णं स्कन्धेन गृहीत्वा च कोषसुप्तम्।
कुक्कुरैः कुक्कुरीभिश्च वक्क्यमानो यथा शृगालः शरणं पलाये॥

(छ) चेट इति। भट्टारकः प्रभुः, एष सन्निहित इत्यर्थः अतएव भट्टारक एव एनमसिं गृह्णात्वित्यर्थः।

निर्व्वल्कलमिति। निर्गं विद्यते वल्कलं वल्कलतुल्यवर्णो मलो यत्र तं निर्मल-मित्यर्थः, मूलकस्य पेशिः कोशस्य बहिरावरणस्य वर्ण इव वर्णो यस्य तं रक्तवर्णमिति तात्पर्य्यम्, कोशसुप्तं कोशाभ्यन्तरे स्थितञ्च असिम्, स्कन्धेन गृहीत्वा, कुक्कुरैः कुक्कुरीभिश्च बुक्कमानः पश्चात् पश्चात् शब्दाय्यमानः, शृगालो यथा; तथा अहं शरणं स्वगृहम्, पलाये विटस्य प्रस्थानात् सहायशून्यतया पलाय्य गच्छामि।

अत्र लुप्तोपमाश्रौतोपमयोः संसृष्टिः। उपजातिर्वृत्तम् ॥५२॥

(গ) ভৃত্য। হাঁ।
(ঘ) শকার। তবে আমরা শীগ্‌গির সরিয়া পড়ি।
(ঙ) ভৃত্য। তা হইলে আপনি তরোয়ালখানা নিন্।
(চ) শকার। তোর হাতেই থা'ক।
(ছ) ভৃত্য। প্রভু এই রহিয়াছেন, তা প্রভুই ধারণ করুন।
শকার। (বিপরীতভাবে ধরিয়া)

বিদূ । ভোদি ! রদণিএ ! ণ কখু দে অঅং অবমাণো তত্তভবদো চারুদত্তস্স ণিবেদইদব্বো । দোগচ্চপীড়িঅস্স মণ্ণে দিউণদরা পীড়া হুবিস্সদি । (অ)

রদ । অজ্জ মিত্তেঅ ! রদণিআ কখু অহং সংজদমুহী । [ঝ]

বিদূ । এব্বং ণেদং । [ঞ]

(অ) ভবতি ! রদনিকে ! ন খলু তে অয়মপমানস্তত্রভবতশ্চারুদত্তস্য নিবেদয়িতব্যঃ । দৌর্গত্যপীড়িতস্য মন্যে দ্বিগুণতরা পীড়া ভবিষ্যতি ।

(ঝ) আর্য্য ! মৈত্রেয় ! রদনিকা খল্বহং সংযতমুখী ।

(ঞ) এবমিদম্ ।

কুকুর ও কুকুরীগণ পিছু পিছু ডাকিতে লাগিলে শিয়ালের ন্যায় আমি, নির্ম্মল মূলার আবরণের তুল্যবর্ণ এবং কোষস্থিত অসি, স্কন্ধে ধারণ করিয়া, বাড়ীতে পলাইয়া যাইতেছি ॥৫২॥

(কতিপয় পদক্ষেপ করিয়া শকার ও ভৃত্য চলিয়া গেল)

(অ) বিদূষক । রদনিকা ! তুমি এই অপমানের বৃত্তান্ত, মাননীয় চারুদত্তকে জানাইও না। কারণ তিনি একেই দারিদ্র্যদুঃখে পীড়িত তাহাতে এই ঘটনা জানিলে দ্বিগুণ পীড়িত হইবেন, —ইহা আমি মনে করি ।

(ঝ) রদনিকা । আর্য্যমৈত্রেয় ! আমি রদনিকা ; স্বভাবতই আমার মুখ সংযত ।

(ঞ) বিদূষক । ইহা সত্য বটে ।

चारु। वसन्तसेनामुद्दिश्य। रदनिके! मारुताभिलाषी प्रदोषसमयशीतार्त्तो रोहसेनः। ततः प्रवेश्यतामभ्यन्तरमयम्। अनेन प्रावारकेण छादयैनम्। इति प्रावारकं प्रयच्छति। [ट]

वस। स्वगतम्। कधं परिअणो त्ति मं अवगच्छदि। प्रावारकं गृहीत्वा समाघ्राय च स्वगतं सस्पृहम्। अम्महे! जादीकुसुमवासिदो पावारओ। अणुदासीणं से जोव्वणं पडिभासेदि। अपवारितकेन प्रावृणोति। [ठ]

(ट) कथं परिजन इति मामवगच्छति। अहो! जातीकुसुमवासितः प्रावारकः, अनुदासीनमस्य यौवनं प्रतिभासते।

(ट) चारु इति। वसन्तसेनामुद्दिश्य वसन्तसेनां प्रति रदनिकोद्देशेनेत्यर्थः। रोहतीति रोहा उत्पद्यमाना सेना सैन्यं यस्य स रोहसेन इत्याशंसासूचकं नाम चारुदत्तपुत्रस्य। मारुतं दिवाभागे यथाश्रयं शैत्यसेवनम् अभिलषतीति सः, इदानीं प्रदोषसमयस्य शीतेन आर्त्तः पीड़ितो जात इति शेषः। प्रावारकेण उत्तरीयवस्त्रेण।

(ठ) वसम इति। जातीकुसुमेन वासितः सुरभीकृतः। अनुदासीनं भोगविलासादनिस्पृहम्, अस्य चारुदत्तस्य, प्रतिभासते प्रकाशते, ईदृक्कुसुमवासितप्रावारकग्रहणादिति भावः। एतेनायं मत्सम्भोगविमुखो न भविष्यतीति सूचितम्। अपवारितकेन आत्मनः परावर्त्तनेन, यथा चारुदत्तो न परिचिनोति।

(ট) চারুদত্ত। (বসন্তসেনার প্রতি) রদনিকা! রোহসেন বায়ু-সেবন করিতে অভিলাষী হইয়া এখানে আসিয়াছিল, এখন প্রদোষ-কালের শীতে কষ্ট পাইতেছে; সুতরাং তুমি ইহাকে ভিতরে নিয়া যাও, আর এই চাদর খানা দিয়া ইহাকে আবৃত কর। (এই বলিয়া চাদর খানা দিলেন।)

(ঠ) বসন্তসেনা। (স্বগত) আমাকে পরিজন বলিয়া মনে করিতে-ছেন। (চাদরখানা লইয়া ও আঘ্রাণ করিয়া, স্পৃহার সহিত) ও! জাতী

चारु। ननु रदनिके! रोहसेनं गृहीत्वाभ्यन्तरं प्रविश।

वस। स्वगतम्। अभाइणी(१)क्खु अहं तुम्हे अवभन्तर-स्स। [ङ]

चारु। ननु रदनिके! प्रतिवचनमपि नास्ति। कष्टम्।

यदा तु भाग्यक्षयपीड़ितां दशां-
नरः कृतान्तोपहितां प्रपद्यते।
तदास्य मित्राण्यपि यान्त्यमित्रतां
चिरानुरक्तोऽपि विरज्यते जनः॥५३॥

(ङ) अभागिनी खल्वहं तव अभ्यन्तरस्य।

अत्र चारुदत्तं प्रति वसन्तसेनायाः समुत्पन्नस्य अनुरागस्य बाहुल्येन प्रकाशात् परिकरो नाम मुखसन्ध्यङ्गम्। यथा दर्पणे —

'समुत्पन्नार्थबाहुल्यं ज्ञेयः परिकरः पुनः।'

(ङ) वसम् इति। अभ्यन्तरस्य अभ्यन्तरगमनस्य, अभागिनी अनधिकारिणी; वेश्याजातीयत्वादिति भावः।

यदेति। नरो यदा, कृतान्तेन दैवेन उपहितां विहिताम्, भाग्यक्षयेण सम्पत्तिमूलीभूतसौभाग्यलोपेन पीड़ितां हीनीकृताम्, दशां दारिद्र्यावस्थाम्, प्रपद्यते प्राप्नोति; तदा अस्य नरस्य, मित्राण्यपि सुहृदोऽपि, अमित्रतां शत्रुताम्, यान्ति प्राप्नुवन्ति; तथा चिरानुरक्तोऽपि जनः, विरज्यते विरक्तो भवति।

পুষ্পদ্বারা সুবাসিত এই চাদরখানি! সুতরাং ইহাঁর যৌবন ভোগে অনুদাসীন বলিয়া বোধ হইতেছে। (ফিরিয়া রোহসেনকে আবৃত করিল।)

চারুদত্ত। ও রদনিকা! রোহসেনকে লইয়া ভিতরে প্রবেশ কর।

विदू । रदनिकामुपसृत्य । भो इअं सा रदणिआ । [ढ]

चारु । इयं सा रदनिका । इयमपरा का ?

अविज्ञातावसक्तेन दूषिता मम वाससा ।

वसं । स्वगतम् । णं भूसिदा । (ण)

(ढ) भोः ! इयं सा रदनिका । (ण) ननु भूषिता ।

अत्र परार्द्धे दशावैचित्र्येण समाधानाद्विरोधाभासोऽलङ्कारः । तथा यान्तीति परस्मैपदबहुवचनं प्रक्रम्य विरज्यन्त इत्यात्मनेपदैकवचनस्य प्रयुक्तत्वात् भग्नप्रक्रमता-दोषः ; स च 'चिरानुरक्तास्र विरक्तता जनाः' इति चतुर्थपादपाठेन समाधेयः ।

वंशस्थविलं वृत्तम् ॥५२॥

अविज्ञातेति । अवसक्तेन गात्रसंलग्नेन, मम वाससा मद्गात्रस्पर्शिना प्रावारकेण, दूषिता परपुरुषवस्त्रत्वात् जनितदोषा, अविज्ञाता इदन्तया अपरि-चिता, (इयमपरा का) शरदभ्रेण शरत्कालीयमेघेन, छादिता, चन्द्रलेखेव दृश्यते ? ।

(ড) বসন্তসেনা । (স্বগত) আমি আপনার বাড়ীর ভিতরে যাইবার অধিকারিণী নহি ।

চারুদত্ত । ও রদনিকা ! উত্তরও নাই । কি কষ্ট ! ।

মানুষ যখন সৌভাগ্যলোপনিবন্ধন দৈবকৃত দারিদ্র্য অবস্থা প্রাপ্ত হয়, তখন তাহার মিত্র ও শত্রু হয় এবং চিরানুরক্ত লোকও বিরক্ত হয় ॥৫৩॥

(ঢ) বিদূষক । (রদনিকার নিকটে যাইয়া) সখে ! এই সেই রদনিকা ।

চারুদত্ত । এই সেই রদনিকা ! তবে এই আর একটী কে ? ।

অপরিচিতা এবং আমার বস্ত্র, গাত্রসংলগ্ন হওয়ায় দূষিতা ।

चारु। छादिता शरदभ्रेण चन्द्रलेखेव दृश्यते ॥५४॥

अथवा, न युक्तं परकलत्रदर्शनम् ।

विदू। भो अलं परकलत्तदंसणसङ्काए। एसा वसन्त-सेणा कामदेवाअदणुज्जाणादो पहुदि भवन्तमणुरत्ता। (त)

चारु। अये इयं वसन्तसेना!। स्वगतम् ।

यया मे जनितः कामः क्षीणे विभवविस्तरे ।

क्रोधः कुपुरुषस्येव स्वगात्रेष्वेव सीदति ॥५५॥

(त) भोः! अलं परकलत्रदर्शनशङ्कया। एषा वसन्तसेना कामदेवायतनोद्यानात् प्रभृति भवन्तमनुरक्ता।

अत्र समासगता श्रौतो उपमालङ्कारः। तथा वाससः शुक्लतामप्रतिपाद्य शरदभ्रेणेति शुक्लताव्यञ्जकशरत्पदप्रयोगादधिकपदतादोषः, 'नयनज्योतिषा भाति' इत्यादिदर्पणोदाहरणवत्। 'समायातावसक्तेन दूषिता शुचिवाससा' इति प्रथमार्द्धपाठेनासौ परिहार्य्यः ॥५४॥

(ष) वसम् इति। नन्विस्यवधारणे; तेन भूषितैवेत्यर्थः, प्रियतमस्नेन परत्वाभावात् स्वैव च वसनस्पर्शादिति भावः।

চারুদত্ত। শরন্মেঘে আবৃত চন্দ্রলেখার ন্যায় দেখা যাইতেছে ॥৫৪॥

অথবা পরস্ত্রীদর্শন উচিত নহে।

(ষ) বসন্তসেনা। (স্বগত) নিশ্চয়ই ভূষিতা।

(ত) বিদূষক। সখে! পরস্ত্রী দর্শনের আশঙ্কা করিবেন না। এই বসন্তসেনা, কামদেবোদ্যানে সাক্ষাতের পর হইতে আপনার প্রতি অনুরক্ত হইয়াছেন।

চারুদত্ত। ও! ইনি বসন্তসেনা!। (স্বগত)

ধনসম্পত্তি নষ্ট হইলে পর, যিনি আমার কাম জন্মাইয়াছিলেন; কাপুরুষের ক্রোধের ন্যায় তাহা এখন স্বগাত্রেই লয় পাইয়াছে। ৫৫।

विदू। भो वअस्स! एसो क्खु राअसालो भणादि। (थ)

चारु। किम्?।

विदू। एसा ससुवण्णा सहिरण्णा णव-णाडअ-दंसणुट्ठिदा सुत्तधालि व्व वसन्तसेणा णाम गणिआदालिआ कामदेवाअदणुज्जाणादो पहुदि तुमं अणुलत्ता, अम्हेहिं बलक्कालाणु-णीअमाणा तुह गेहं पविट्ठा। [द]

(थ) भोः! वयस्य! एष खलु राजश्यालो भणति।

(द) एषा ससुवर्णा—इत्यादि प्रागेवानूदितम्।

यथेति। विभवविस्तरे धनसम्पत्तौ, क्षीणे नष्टे सति, यथा वसन्तसेनया, अनितो मे मम कामः सम्भोगाभिलाषः विभवविस्तरे क्षीणे सति, कुपुरुषस्य कापुरुषस्य क्रोध इव स्वगात्रे एव सीदति कम्परोमाञ्चादिभावमुत्पाद्य विलीयते ; न तु अनयोः प्रतिभिव अनयोः समागममपि सम्पादयितुमर्हति, उभयोरपि धनव्ययसापेक्षत्वादिति भावः।

अत्रैवात्र आर्यां परिसंख्यालङ्कारः श्रौतोपमया सङ्कीर्य्यते।

अत्र चारुदत्तस्यापि अनुरागप्रकाशेन "णं सूचिदा" इत्यत एतत्पद्यान्तभावि वसन्तसेनाचारुदत्तयोरुभयोरेवानुरागनिष्पत्तिप्रकाशनात् परिन्यासो नाम मुखसन्ध्यङ्गम्। यथा दर्पणे—

"तन्निष्पत्तिः परिन्यासः।—"

न च सन्ध्यङ्गादीनां नाटकप्रकरणीयत्वेन कथमिदम् प्रकरणरूपके सन्निवेश इति वाच्यम् ; "बिना विमर्शं सर्वं स्यात् नाटकवन्मतम्" इत्यादिना दर्पणकारादिभिर्विशेषतया सर्वेषामेव नाटकधर्माणां प्रकरणादिषु अतिदिष्टत्वात् ॥५५॥

(द) विदू इति। एष सन्दर्भः "ता अह" इत्यादिसन्दर्भवत् प्रागेव व्याख्यातः।

(থ) বিদূষক। সখে! এই রাজার শালা বলিতেছে।

চারুদত্ত। কি বলিতেছে?।

वसन्त। स्वगतम्। बलक्कालाणुणीअमाणेत्ति जं सच्चं अलङ्किदम्हि एदेहिं अक्खरेहिं। (भ)

विदू। ता जइ मम हत्थे सअं ज्जेव पट्टाविअ एणं सम प्पेसि, तदो अधिअरणे ववहारं विणा लहुं णि ादमाणाइ तेव मए अणुबड्ढा पोदो हुविस्सदि। अण्णधा, आमरणन्ति-के वेरे हुविस्सदि। (ज)

चारु। सावज्ञम्। अज्ञोऽसौ। स्वगतम्। अये! कथं देव-तोपस्थानयोग्या युवतिरियम्। तेन खलु तस्यां वेलायाम् (प)

(भ) बलात्कारानुनीयमानेति यत्सत्यम्। अलङ्कृतास्मि एतै-रक्षरैः।

(ज) तद् यदि—हस्तादिकमपि प्राणन्दितम्।

वसन्त इति। यत्सत्यमित्येकमेव पदमिति प्रागप्युक्तम्। अलङ्कृतास्मीति । मत्यनुरागप्रकाशेनात्मनः साधारणभोग्यत्वाप्रकाशादिति भावः।

(प) चारु इति। सावज्ञम् अवज्ञासूचिकां मुखभङ्गीं विधायेत्यर्थः। असौ ।जग्राल, अज्ञो मूर्खः वक्तव्यावक्तव्यज्ञानहीन इति तात्पर्यम्; अवक्तव्यवचनम् अयाज्ञ-वीति भावः। देवता इव उपस्थानस्य उपासनाया आदरस्य योग्या; अलौकिकरूपा-कारा दिव्यान्तिवादित्यर्थः। तस्यां वेलायाम् इतः पूर्वस्मिन् समये।

विदू। "নূতন নাটক দেখাইবার জন্য উত্থিত সূত্রধারিণীর ন্যায় বসন্তসেনা নামে এই বেশ্যাকন্যা, কামদেবোদ্যানে সাক্ষাতের পর হইতে তোমার প্রতি অনুরক্ত হইয়াছে; আমরা বলপূর্ব্বক অনুনয় করিতেছি-লাম এই অবস্থায় তোমার বাড়ীতে প্রবেশ করিয়াছে।"

বসন্তসেনা। (স্বগত) বলপূর্ব্বক অনুনয় করিতেছিলাম ইহা সত্য এই কথাগুলিতে আমি অলঙ্কৃত হইয়াছি।

प्रविश गृहमिति प्रतीयमाना
न चलति भाग्यकृतां दशामवेक्ष्य ।
पुरुषपरिचयेन च प्रगल्भं
न वदति, यद्यपि भाषते बहूनि ॥५६॥

प्रविशेति । गृहं प्रविशेति "रोहसेनं गृहीत्वाभ्यन्तरं प्रविश" इति प्रतीयमाना दासीयोग्यादेशेन व्यथमाना, इयं युवतिरिति शेषः, भाग्यकृतां दशां मम दारिद्र्या-वस्थां दारिद्र्यकृतमेव गृहस्य जीर्णशीर्णतादिकमित्यर्थः, अवेक्ष्य दृष्ट्वा, न चलति गृहा-भ्यन्तरं न प्रविशति स्म ; न खलु भोगविलासिनी प्रचुरधनशालिनी दरिद्रस्य जीर्णगृहे प्रवेष्टुमर्हतीति परिच्छदमालिन्याद्याशङ्कावशादिति भावः । किञ्च, यद्यपि बहूनि भाषते; वेश्यास्वभावादिति भावः ; तथापि पुरुषपरिचयेन मम पुरुषतया ज्ञानेन, प्रगल्भं धृष्टम्, यथा स्यात्तथा न वदति । एतेन लज्जाविनयसौजन्यादिकं व्यज्यते ।

न वदतीति प्रक्रम्य भाषत इति भाषधातोरात्मनेपदस्य चाभिधानाद्भग्नप्रक्रमतादोषः ; 'यद्यपि भूरिवादिनी स्यात्' इति पाठेन समाधेयः ।

तथात्र विलोभनं नाम सन्ध्यङ्गम्—"गुणाख्यानं विलोभनम्" इति लक्षणात् । चलति वदतीति च अतीतसामीप्ये वर्त्तमाना । पुष्पिताग्रा वृत्तम् ॥५६॥

বিদূষক। "তা যদি তুমি নিজেই ইহাকে পাঠাইয়া দিয়া আমার হাতে সমর্পণ কর, তাহা হইলে, বিচারালয়ে বিনা মোকদ্দমায় তাড়াতাড়ি দিয়াছ বলিয়া, আমার সঙ্গে তোমার চিরস্থায়ী প্রণয় হইবে। না হইলে মৃত্যুপর্য্যন্ত শত্রুতা হইবে।"

চারুদত্ত। (অবজ্ঞার সহিত) ও বেটা মূর্খ। (স্বগত) এই যুবতিটী দেবতার ন্যায় আদরের যোগ্য। সেই জন্যই সে সময়ে—

'গৃহে প্রবেশ কর' (দাসীর পক্ষে উপযুক্ত) এই আদেশে দুঃখিত হইয়া; দুরদৃষ্টকৃত অবস্থা দেখিয়া, গৃহে প্রবেশ করে নাই। আর যদিও, বহু কথা বলিয়া থাকে, তথাপি পুরুষের পরিচয় পাইয়া, ধৃষ্টভাবে কিছু বলিতেছে না ॥৫৬॥

প্রকাশম্। ভবতি! বসন্তসেনে! অনেনাবিজ্ঞানাদপরিজ্ঞাত-পরিজনোপচারেণ অপরাদ্ধোঽস্মি। শিরসা ভবতীমনুনয়ামি। (ফ)

বস। এদিণা অণুচিদভূমিআরোহণেন অবরদ্ধা অজ্জং সীসেণ পণমিঅ পসাদেমি। (ব)

বিদূ। ভো! দুবেবি তুম্হে সুখং পণমিঅ কলমকেদারা অণ্ণোণ্ণং সীসেণ সীসং সমাঅদা। অহং পি ইমিণা করহজাণুসরিসেণ সীসেণ দুবেবি তুম্হে পসাদেমি। ইত্যুত্তিষ্ঠতি। (ভ)

(ব) অনেনানুচিতভূমিকারোহণেন অপরাদ্ধা আর্য্যং শীর্ষেণ প্রণম্য প্রসাদয়ামি।

(ভ) ভোঃ! দ্বাবপি যুবাং সুখং প্রণম্য কলমকেদারৌ অন্যোন্যং শীর্ষেণ শীর্ষং সমাগতৌ। অহমপি অমুনা করভজানুসদৃশেন শীর্ষেণ দ্বাবপি যুবাং প্রসাদয়ামি।

(ফ) প্রকাশমিতি। অবিজ্ঞানাৎ বসন্তসেনাত্বেনাপরিচয়াৎ, অবিজ্ঞাতো ভবত্যা অজ্ঞাতপূর্ব্বঃ যঃ পরিজনোপচারো মম দাসীযোগ্যাদিব্যবহারস্তেন।

(ব) বসম্ ইতি। অনুচিতায়াং মম বেশ্যাত্বেনাযোগ্যায়াম্, ভূমিকায়াং ভবদ্-গৃহে আরোহণেন উপস্থিত্যা। আর্য্যং মান্যং ভবন্তম্।

(ভ) বিদূ ইতি। কলমো ধান্যজাতিবিশেষঃ, কেদারস্য ভূমেরালিঃ, তাবিবেত্যর্থঃ। করভঃ করিশাবকঃ তস্য জানুসদৃশেন উচ্চাবচেনেতি তাৎপর্য্যম্। প্রসাদয়ামি অনুনয়ামীতি ভাবঃ।

(প্রকাশ্যে) মাননীয় বসন্তসেনা! আমি চিনি না বলিয়া, না বুঝিয়া দাসীর যোগ্য এই ব্যবহারে অপরাধী হইয়াছি। সুতরাং এখন মস্তক-দ্বারা আপনার অনুনয় করিতেছি।

বসন্তসেনা। আমিই, এই অযোগ্য স্থানে আরোহণ করায় অপ-

चारु। भवतु, तिष्ठतु प्रणयः। [म]

वसं। स्वगतम्। चतुरो मधुरो अ अअं उवण्णासो। ण जुत्तं अज्ज एरिसेण इध आअदाए मए पडिवसिदुं। भोदु, एव्वं

(य) चतुरो मधुरश्चायमुपन्यासः। न युक्तमद्य ईदृशेन इह आगतया मया प्रतिवस्तुम्। भवतु, एवं तावत् भणिष्यामि। यद्येवम्

(म) चारु इति। प्रणयः प्रेम तत्प्रयुक्तः सम्भोग इत्यर्थः, तिष्ठतु अद्य यावत् प्रथमागमने प्रणयालापमात्रस्यौचित्यात् परन्तु तादृशालापादिना प्रणये क्रमशः प्रगाढ़-तामुपगत एव हि सम्भोगस्य महामधुरायमाणत्वादित्याशयः। एतेन सम्भोगेच्छापि वर्णिता द्योतिता।

अतएवात्र युक्तिनाम मुखसन्ध्यङ्गम् "सम्प्रधारणमर्थानां युक्तिः" इति लक्षणात्।

(य) चतुरम् इति। अयमुपन्यासः "तिष्ठतु प्रणय" इति वाक्यविन्यासः, चतुरो निपुणः, गूढ़भावेन सम्भोगेच्छाव्यञ्जकत्वात्, मधुरश्च मम मनोमतत्वात्। ननु तर्हि अवस्थाय सम्भुज्यतामित्याह न युक्तमिति। आगतया प्रणयपरीक्षार्थं मात्रमुपस्थितया मया, ईदृशेन अज्ञातसम्भोगोचितवेशविन्यासादिभावेन, अद्य इह गृहे प्रतिवस्तुम् अत्र स्थातुं न युक्तम्; कामकलानभिज्ञतामनुमाय अस्य विरागोदयसम्भवात् तादृशसुखो-

রাধিনী হইয়াছি। সুতরাং মস্তকদ্বারা নমস্কার করিয়া আপনাকে প্রসন্ন করিতেছি।

বিদূষক। ওহে! তোমরা দু'জনেই সুখে প্রণাম করিয়া, ধান ও আইলের মত পরস্পর মাথায় মাথা মিলাইলে; আমিও এই হাতীর বাচ্ছার হাটুর মত, মাথা দিয়া তোমাদের দু'জনকেই প্রসন্ন করিতেছি (ইহা বলিয়া উঠিল।)

চারুদত্ত। হউক, এখন প্রেম থা'ক।

বসন্তসেনা। (স্বগত) এই বাক্যবিন্যাস টী, নিপুণও বটে, মধুরও বটে। তবে নিজে আসিয়া, এ বেশে আজ এখানে থাকা আমার

दाव भणिस्सं । प्रकाशम् । अज्ज ! जइ एव्वं अहं अज्जस्स अणुगेज्झा, ता इच्छे अहं इमं अलङ्कारअं अज्जस्स गेहे णिक्खिविदुं । अलङ्कारस्स णिमित्तं एदे पावा अणुसरन्ति । [य]

चारु । अयोग्यमिदं न्यासस्य गृहम् । [र]

वस । अज्ज ! अलीअं । पुरुसेसु णासा णिक्खिविअन्ति, ण उण गेहेसु । (ल)

अहमार्य्यस्य अनुग्राह्या, तदिच्छाम्यहमिममलङ्कारकमार्य्यस्य गेहे निक्षेप्तुम् । अलङ्कारस्य निमित्तमेते पापा अनुसरन्ति ।

(ल) आर्य्य ! अलीकम् । पुरुषेषु न्यासा निक्षिप्यन्ते, न पुनर्गेहेषु ।

इत्यासम्भवा इति भावः । निक्षेप्तुं निक्षेपीकर्त्तुं न्यासीकर्त्तुमिति यावत् । कुत इदं निक्षेपीकरणमित्याह अलङ्कारस्येति । एते एवंविधाः शकारविटादयः, पापा दुरभिसन्धिशालिनस्तच्चौर्य्याभिलाषिण इति यावत् । अलङ्काराभावे तु नैषामनुसरणायासइति भावः ।

"चतुरो मधुरश्चायमुपन्यासः" इत्यनेनात्र वसन्तसेनायाः सुखागमनात् प्राप्तिनाम मुखसन्ध्यङ्गम्,—"प्राप्तिः सुखागमः" इति लक्षणात् ।

(र) चारु इति । अयोग्यम्, आवरणाभावेन चौरैरपहरणसम्भवादिति भावः ।

(ल) वसन्त इति । अलीकम् अयथार्थं तवेदं वाक्यमिति शेषः । तत्कारणमाह पुरुषेष्विति ।

উচিত নহে। হউক, এইরূপ বলি। (প্রকাশ্যে) আর্য্য! যদি আমি আপনার এইরূপ অনুগ্রহের যোগ্য হই, তবে আমি এই অলঙ্কার আপনার বাড়ীতে গচ্ছিত রাখিতে ইচ্ছা করি। কারণ, এই অলঙ্কারের জন্যই এই পাপাত্মারা অনুসরণ করে।

চারুদত্ত। এ বাড়ী, গচ্ছিত রাখিবার যোগ্য নহে।

चारु। मैत्रेय! गृह्यतामयमलङ्कारः।

वस। अणुग्गहिदह्मि। (इत्यलङ्कारमर्पयति।) (व)

विदू। (गृहीत्वा।) सोत्थि भोदिए। (श)

चारु। धिङ् मूर्ख! न्यासः खल्वयम्। (ष)

विदू। (अपवार्य।) जइ एव्वं, ता चोरेहिं अवहरीअदु (१)[स]

चारु। अचिरेणैव कालेन। (ह)

(व) अनुगृहीतास्मि। (श) स्वस्ति भवत्यै।

(स) यद्येवम्, तत्, चौरैरपह्रियताम्।

(श) विदू इति। "स्वस्तीत्येव गृह्णीयात्" इति स्मृतेः प्रतिग्रहसूचकेयमुक्तिः।

(ष) चारु इति। अयं न्यासः खलु निक्षेप एव, न पुनर्दानमित्यर्थः; अतः कथं प्रतिग्रहसूचकं स्वस्ति करोषीति भावः।

(स) विदू इति। यदि एवं न्यासश्चेदित्यर्थः। अपह्रियतामिति [illegible] प्रश्नः।

(ह) चारु इति। अपह्रियतामिति सम्बन्धः; गृहस्य जीर्णतया रक्षणासम्भवादिति भावः।

বসন্তসেনা। আর্য্য! ও কথা সত্য নহে। কারণ, লোকে মানুষের হাতেই গচ্ছিত রাখে; কিন্তু বাড়ীতে নহে।

চারুদত্ত। মৈত্রেয়! এই অলঙ্কার রাখ।

বসন্তসেনা। অনুগৃহীত হইলাম। (এই বলিয়া অলঙ্কার দিল)

বিদূষক। (গ্রহণ করিয়া) স্বস্তি। তোমার মঙ্গল হউক।

চারুদত্ত। ধিক্ মূর্খ! এ'যে গচ্ছিত রাখিল।

বিদূষক। (গোপনে) যদি ইহাই হয়, তবে চোরে নিবে।

চারুদত্ত। অচিরকালমধ্যেই।

---

(१) हरिज्जदु।

विदू। एसो से अम्हाणं विस्सासो ?। (क)

चारु। निर्यातयिष्ये। (ख)

वस। अज्ज ! इच्छे अहं इमिणा अज्जेण अणुगच्छिज्जन्ती सकं गेहं गन्तुम्। [ख]

चारु। मैत्रेय ! अनुगच्छ तत्रभवतीम्।

विदू। तुमं ज्जेव एदं कलहंसगामिणीं अणुगच्छन्तो रायहंसो विअ सोहसि। अहं उण बम्हणो जहिं तहिं

(क) एषः अस्या अस्माकं विन्यासः ?।

(ख) आर्य्य ! इच्छाम्यहम् अनेनार्य्येण अनुगम्यमाना स्वकं गेहं गन्तुम्।

(ग) त्वमेव एतां कलहंसगामिनीम् अनुगच्छन् राजहंस इव

(क) विदू इति। अस्या वसन्तसेनायाः, अस्माकं समीपे, एष विन्यासो निक्षेपः किमिति काकुः। अथवा आवश्यकत्वं भवते दानमेवेति भावः।

(ख) चारु इति। निर्यातयिष्ये पुनरप्यमुष्यै अर्पयिष्यामि। अतो न्यास इत्यावमिति भावः।

(ख) वस इति। अनेनार्य्येण विदूषकेण। स्वकं स्वकीयम्।

(ग) विदू इति। शोभस इति ; अतस्त्वयैव गमनमुचितमिति भावः। यस्मिन् यस्मिन् स्थाने, अनं धार्म्मिकलोकैः, चतुष्पथे उपनीतः प्रदत्तः, उपहारः पूजाद्रव्य-

বিদূষক। আমাদের নিকট ইহা কি ইহাঁর গচ্ছিত দ্রব্য ?।

চারুদত্ত। ফিরাইয়া দিব। (সুতরাং গচ্ছিতই বটে)।

বসন্তসেনা। আর্য্য ! এই আর্য্য (বিদূষব) আমার পিছনে যান এই অবস্থায় আমি নিজের বাড়ী যাইতে ইচ্ছা করি।

চারুদত্ত। মৈত্রেয় ! ইহাঁর অনুগমন কর।

जणेहिं चउप्पहोवणीदो उवहारो कुक्कुरेहिं विअ खज्जमाणो विवज्जिस्सं। [ग]

चारु। एवं भवतु, स्वयमेवानुगच्छामि तत्रभवतीम्। तद्राजमार्गविश्वासयोग्याः प्रज्वाल्यन्तां प्रदीपिकाः। (घ)

विदू। वड्ढमाणअ! पज्जालेहि पदीविआओ। (ङ)

चेटः। जनान्तिकम्। अले! तेल्लेण विणा पदीविआओ पज्जालीअन्ति? (च)

मैथिली। अहं पुनर्ब्राह्मणः यस्मिन् तस्मिन् जनैः चतुष्पथोपनीतः उपहारः कुक्कुरैरिव खाद्यमानो विपत्स्ये।

(ङ) वर्द्धमानक! प्रज्वालय प्रदीपिकाः।

(च) अरे! तैलेन विना प्रदीपिकाः प्रज्वाल्यन्ते?।

मिव, कुक्कुरैः खाद्यमानोऽहम्, विपत्स्ये विपन्नो भविष्यामि। अतो मम एकाकिनो गमनं सर्वथा अनुचितमिति भावः।

(घ) चारु इति। राजमार्गविश्वासयोग्या अतीवोज्ज्वला इत्यर्थः। यथा चुद्र-दीपदर्शनेन वञ्चिपुरुषाश्चौरादयो न न स्पर्शायेरन्निति भावः।

(च) चेट इति। अयन्तु चारुदत्तस्य भृत्य इति बोध्यम्। जनान्तिकलक्षणं यथा

विदূষক। তুমিই এই কলহংসগামিনীর অনুগমন করতঃ, রাজহংসের ন্যায় শোভা পাইবে। লোকে চতুষ্পথে উপনীত পূজাদ্রব্য যেমন কুকুরে খায়, সেইরূপ আমি কুকুরের খাদ্য হইয়া বিপন্ন হইব।

চারুদত্ত। এইরূপই হউক; আমি নিজেই ইঁহার অনুগমন করিব। অতএব রাজপথে বিশ্বাসের যোগ্য কতকগুলি প্রদীপ জ্বাল।

বিদূষক। বর্দ্ধমানক! কতকগুলি প্রদীপ জ্বাল।

ভৃত্য। (গোপনে বিদূষকের প্রতি) বিনা তৈলে প্রদীপ জ্বালিব?।

विदू । जनान्तिकम् । भो ! (१) ताओ क्खु अम्हाअं पदीविआओ अवमाणिद-णिद्धण-कामुआ विअ गणिआ णिस्सिणेहाओ दाणिं संवुत्ता । (छ)

चारु । मैत्रेय ! भवतु । कृतं प्रदीपिकाभिः । पश्य—(ज)

उदयति हि शशाङ्कः कामिनीगण्डपाण्डु-
र्ग्रहगणपरिवारो राजमार्गप्रदीपः ।

(छ) भोः ! ताः खल्वस्माकं प्रदीपिकाः, अपमानित-निर्धन-कामुकाः इव गणिकाः, निःस्नेहा इदानीं संवृत्ताः ।

"त्रिपताककरेणान्यानपवार्यान्तरा कथाम् ।
अन्योन्यामन्त्रणं यत् स्यात्तज्जनान्ते तज्जनान्तिकम् ॥"

प्रभुभयेन विदूषकं प्रत्येव भ्रमस्य अनान्तिकभावेनोक्तिरियम् ।

(छ) विदू इति । भो इति चारुदत्तस्य सम्बोधनम् । अपमानितं सन्ताड़न-भर्त्सनादिना विमानितं निर्धनञ्च जनं कामयितुं शीलं यासां ताः । स्नेह-कृतापमानाभावे नायकानां गुरुतरानुनयने कदाचित् स्नेहः स्यादिति अपमानितेति विशेषणम् । धनिनि तु धनलोभादेव स्नेहः प्रदर्श्यते इति निर्धनेति विशेषणम् । तथापि तादृशनायकान् प्रत्यपि कामुकत्वन्तु मायाधनुरोधेनेति बोध्यम् । निर्गतं विगतो स्नेहस्तैलम् अनुरागश्च यासु ताः । अत्र पूर्णोपमालङ्कारः ।

(ज) चारु इति । कृतम् अलम् । कुत इत्याह पश्येति ।

उदयतीति । हि यस्मात् कामिन्या विरहे क्षामायाः रमण्याः गण्डवत् पाण्डुः शुभ्रः, ग्रहगणो नक्षत्रतारकाबृहस्पतिप्रभृतिग्रहः परिवारः परिवेष्टनकारी यस्य सः

বিদূষক । (গোপনে চারুদত্তের প্রতি) সখে ! আমাদের সেই প্রদীপগুলি এখন অপমানিত-দরিদ্র-কামুক বেশ্যাদের মত স্নেহবিহীন (তৈলহীন, প্রেমহীন) হইয়া গিয়াছে ।

চারুদত্ত । মৈত্রেয় ! হউক । প্রদীপের প্রয়োজন নাই । দেখ— রাজপথের প্রদীপস্বরূপ, কামিনীগণের গণ্ডদেশের ন্যায় পাণ্ডু-

तिमिरनिकरमध्ये रश्मयो यस्य गौराः
स्रुतजल इव पङ्के क्षीरधाराः पतन्ति ॥५७॥

सानुरागम् । भवति ! वसन्तसेने ! इदं भवत्या गृहम्, प्रविशतु भवती । (क)

वसन्तसेना । सानुरागमवलोकयन्ती निष्क्रान्ता । (ख)

तथा राजमार्गस्य प्रदीपसमनुरूपः, शशाङ्कश्चन्द्रः, उदयति । यस्य शशाङ्कस्य, गौरा रश्मयः, स्रुतं निःसृतं जलं क्षीरधाराणामिव जलीयभागो यस्मात् तादृशे, पङ्के कर्द्दमे, क्षीराणां दुग्धानां धारा इव, तिमिरनिकरमध्ये अन्धकारराशिमध्ये पतन्ति ।

अत्र प्रथमे पादे लुप्तोपमा, द्वितीये निरङ्गं केवलरूपकम्, द्वितीयार्द्धे च श्रौती उपमा, इत्येतेषां परस्परनिरपेक्षतया संसृष्टिः । "ग्रहगणपरिवारः" इत्यनेन ग्रहान्तराणां किरणमिश्रणेन चन्द्रस्य उज्ज्वलत्वातिशयो व्यज्यते इति नापुष्टार्थत्वदोषः । यथा कृषकाणां कर्द्दमोपरि दुग्धधाराप्रदाने तज्जनानां निःसरणेन तत्कर्द्दमोपरिभागः शुद्ध इव भवति, तथा क्रमशः तिमिरनिकरोपरि चन्द्रस्य शुभ्ररश्मिपातेन तिमिरनिकरनाशात् जगदपि शुभ्रं जातमिति प्रतिपादनार्थं स्रुतजल इति विशेषणमिति च नापुष्टार्थत्वदोषः ।'

मालिनी वृत्तम् ॥५१॥

(क) सानुरागमिति । गच्छन्तीं वसन्तसेनामनुगच्छत एवोक्तिरियमित्यवधेयम् ।

(ख) वसन्तेति । पूर्ववाक्येन सह व अनुरागरूपस्य बीजस्य प्रधानप्रायस्य मतत्वेन पुनरुपस्थितेः समाधानं नाम मुखाङ्गमेतत् । यथा दर्पणे—

"बीजस्यागमनं यत्तु तत् समाधानमुच्यते ।"

বর্ণ এবং গ্রহগণে পরিবেষ্টিত চন্দ্র, উদিত হইতেছেন। জলস্রাবী কর্দ্দমের মধ্যে দুগ্ধধারার ন্যায়, অন্ধকারসমূহের মধ্যে যাঁহার গৌরবর্ণ রশ্মি সকল পতিত হইতেছে ॥৫৭॥

(অনুরাগের সহিত) মাননীয় বসন্তসেনা এই আপনার বাড়ী, আপনি প্রবেশ করুন।

चारु । वयस्य ! गता वसन्तसेना । तदेहि गृहमेव गच्छावः ।

राजमार्गो हि शून्योऽयं रक्षिणः सञ्चरन्ति च ।
वञ्चना परिहर्त्तव्या बहुदोषा हि शर्वरी ॥५८॥

परिक्रम्य । इदञ्च सुवर्णभाण्डं रक्षितव्यं त्वया रात्रौ, वर्द्धमानकेनापि दिवा । (ट)

राजेति । अयं राजमार्गः शून्यः रात्र्यधिकतया पथिकरहितः, तथा रक्षिणः सञ्चरन्ति च केवलप्रहरिण एव परिभ्रमन्ति च । एतेन यानवाहकाद्यभावोऽपि सूचितः । अतएव वञ्चना प्रतारणा दस्युतस्करैरस्यालङ्कारस्यापहरणमित्यर्थः, परिहर्त्तव्या सावधानतया रक्षणेन निवारयितव्या । हि यस्मात्, शर्वरी रात्रिः, बहवो दोषाः दस्यु-तस्कर-प्रतारकादिकर्त्तृव्यविघ्ना यस्यां सा तादृशी ।

अत्र वाक्यार्थहेतुकं काव्यलिङ्गं सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासश्च ; अनयोरङ्गाङ्गिभावेन सङ्करः । तथा प्रथमपादे हिशब्दो वृत्तिपूरणमात्रार्थक इति निरर्थकत्वदोषः ; स च 'अयं राजपथः शून्यः' इति पाठेन समाधेयः ॥५८॥

(ट) परीति । सुवर्णभाण्डं स्वर्णालङ्कारः । "भाण्डं भूषणमात्रेऽपि" इति हारावली ।

বসন্তসেনা। (অনুরাগের সহিত দেখিতে দেখিতে চলিয়া গেল)।

চারুদত্ত। বয়স্য! বসন্তসেনা গিয়াছেন। অতএব আইস; আমরাও, বাড়ী যাই।

কারণ, এই রাজপথ জনশূন্য; কেবল প্রহরীরা বিচরণ করিতেছে। ও দিকে প্রতারণার নিবারণ করিতে হইবে। যে হেতু, রাত্রিতেই বহুতর বিঘ্ন ঘটে ॥৫৮॥

(পাদচারণ করিয়া) এই স্বর্ণালঙ্কার রাত্রিতে তুমি রক্ষা করিবে, আর দিনে বর্দ্ধমান রক্ষা করিবে।

विदू। जधा भवं आणवेदि। (ठ)

इति निष्क्रान्तौ।

इति मृच्छकटिके अलङ्कारन्यासो नाम प्रथमोऽङ्कः॥ (ड)॥

(ठ) यथा भवानाज्ञापयति।

(ड) इतीति। अलङ्कारस्य न्यासो निक्षेपो यस्मिन् सः, नाम नाम्ना अलङ्कारन्यास इत्यर्थः। प्रथमोऽङ्कः समाप्त इति शेषः।

"प्रत्यक्षनेतृचरितो रसभावसमुज्ज्वलः।" इत्यादिकम्—

"अन्तर्निष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्त्तितः।" इत्यन्तमङ्कलक्षणं साहित्यदर्पणादनुसन्धेयमिति।

इति श्रीहरिदाससिद्धान्तवागीशविरचितायां मृच्छकटिकटीकायां
वसन्तसुषमासमाख्यायां प्रथमाङ्कविवरणं समाप्तम्॥०॥

বিদূষক। আপনি যেমন আদেশ করেন। (ইহা বলিয়া উভয়ে চলিয়া গেলেন)।

অলঙ্কারন্যাস নামে প্রথম অঙ্ক সমাপ্ত ॥০॥

—*—

द्वितीयोऽङ्कः।

—:०*०:—

प्रविश्य चेटी। अत्ताए अज्जआसआसं सन्देसेण पेसिदम्हि। ता जाव पविसिअ अज्जआसआसं गच्छामि। परिक्रम्यावलोक्य च। एसा अज्जआ हिअएण किं पि आलिहन्ती चिट्ठदि। ता जाव उपसप्पामि। [क]

ततः प्रविशति आसनस्था सोत्कण्ठा वसन्तसेना मदनिका च। (ख)

(क) माता आर्य्यासकाशं सन्देशेन प्रेषितास्मि। तद् यावत् प्रविश्य आर्य्यासकाशं गच्छामि। एसा आर्य्या हृदयेन किमप्यालिखन्ती तिष्ठति। तद् यावत् उपसर्पामि।

(क) प्रविश्येति। माता वसन्तसेनाया जनन्या, आर्य्याया वसन्तसेनायाः सकाशम्, सन्देशेन केनापि वाचिकेन किञ्चित् वाचिकं वक्तुमित्यर्थः। आलिखन्ती चिन्तयन्ती कमपि विषयं चिन्तयन्तीति तात्पर्य्यम्।

(ख) तत इति। इत्थकार्य्ये एवम्भूतस्थले जहत्स्वार्थलक्षणया सभ्यदृष्टिगोचरत्वं विभ्रातीरर्थोऽभ्युपगन्तव्यः। तेनासनस्थायाः स्वयं प्रवेशो नानुपपन्न इति बोध्यम्।

কোন দাসী প্রবেশ করিয়া। মাতা কোন সংবাদের সহিত আমাকে আর্য্যা বসন্তসেনার নিকট পাঠাইয়াছেন। অতএব প্রবেশ করিয়া আর্য্যা বসন্তসেনার নিকট যাই। (পদক্ষেপপূর্ব্বক দর্শন করিয়া) এই যে আর্য্যা বসন্তসেনা মনে মনে কোন বিষয় চিন্তা করতঃ অবস্থান্ করিতেছেন। তা, উঁহার নিকট যাই।

তদনন্তর আসনস্থ উৎকণ্ঠিত বসন্তসেনার ও মদনিকার প্রবেশ।

वस। हञ्जे! तदो तदो?। [ग]

चेटी। अज्जए! ण किंपि मन्तेसि। किं तदो तदो?। [घ]

वस। किं मए भणिदं?। [ङ]

चेटी। तदो तदो। [च]

(ग) हञ्जे ततस्ततः?।

(घ) आर्य्ये! न किमपि मन्त्रयसि। किं ततस्ततः?।

(ङ) किं मया भणितम्?।

(च) ततस्ततः?।

(ग) वस इति। हञ्जे इति नाट्योक्तौ दास्यादीनां सम्बोधनसूचकमव्ययम्। 'हण्डे हञ्जे हलाह्वानं नीचां चेटीं सखीं प्रति' इत्यमरः। ईदृशेनाप्राकरणिकप्रश्नेन वसन्तसेनाया गाढोत्कण्ठया नितरामन्यमनस्कता व्यज्यते।

(घ) चेटी इति। मन्त्रयसि आलपसि। तथापि 'किं ततस्ततः' इति कथं पृच्छसि इत्यर्थः।

(च) चेटी इति। 'ततस्ततः' इति भणितमित्यर्थः।

বসন্তসেনা। ওলো! তার পর তার পর?।

দাসী (মদনিকা)। আর্য্যে! আপনি কোন বিষয়েই ত আলাপ করিতেছেন না, তবে 'তার পর তার পর" বলিয়া কি জিজ্ঞাসা করিতেছেন?।

বসন্তসেনা। আমি কি বলিয়াছি?।

দাসী। "তার পর তার পর'।

वस। साक्षेपम्। आं, एव्वं ?। [क]

उपसृत्य प्रथमा चेटी। अज्जए ! अत्ता आदिसदि,— ण्हादा भविअ देवदाणं पूअं णिव्वत्तेहि त्ति। [ख]

वस। हञ्जे ! विण्णवेहि अत्तं, अज्ज ण ण्हाइस्सं; ता बम्हणो ज्जेव पूअं णिव्वत्तेदु त्ति। [ग]

चेटी। जं अज्जआ आणवेदि। [घ] इति निष्क्रान्ता।

(क) आं, एवम् ?।

(ख) आर्य्ये ! माता आदिशति, स्नाता भूत्वा देवतानां पूजां निर्वर्त्तयेति।

(ग) हञ्जे ! विज्ञापय मातरम्, अद्य न स्नास्यामि। तद् ब्राह्मण एव पूजां निर्वर्त्तयतु इति।

(घ) यदार्य्या आज्ञापयति।

(क) वस इति। 'आं' इति स्मरणार्थमव्ययम्। 'आं ज्ञाननिश्चययोः' इति मेदिनी। एवं भणितम्? इति काकुः। अनेनाप्यन्यमनस्कता व्यज्यते।

(ग) वस इति। ब्राह्मणः पूजकब्राह्मणः। निर्वर्त्तयतु मम प्रतिनिधिभावेन निष्पादयतु।

বসন্তসেনা। আ! এই রূপ?।

প্রথম দাসী। (নিকটে যাইয়া) মাতা আদেশ করিতেছেন,—'স্নান করিয়া ইষ্টদেবতার পূজা সম্পন্ন কর।'

বসন্তসেনা। ওলো! মাতাকে জানাও,—'আজ স্নান করিব না; তা, ব্রাহ্মণই পূজা সম্পাদন করুন।'

প্রথম দাসী। আপনি যাহা আদেশ করেন। (এই বলিয়া চলিয়া গেল)

মদ। অজ্জএ! সিণেহো পুচ্ছদি, ণ পুরোভাইদা; তা কিং ণেদম্?। (ট)

বস। মদণিএ! কেরিসিং মং পেক্খসি?। (ঠ)

মদ। অজ্জআএ সুণ্ণহিঅঅত্তণেণ জাণামি, —হিঅঅগদং কংপি অজ্জআ অহিলসদি ত্তি। (ড)

বস। সুঠ্ঠু তুএ জাণিদং। পরহিঅঅগহণপণ্ডিআ মদণিআ ক্খু তুমং। (ঢ)

(ট) আর্য্যে! স্নেহঃ পৃচ্ছতি, ন পুরোভাগিতা; তৎ কিং ন্বিদম্?।

(ঠ) মদনিকে! কীদৃশীং মাং প্রেক্ষসে?।

(ড) আর্য্যায়াঃ শূন্যহৃদয়ত্বেন জানামি, হৃদয়গতং কমপি আর্য্যা অভিলষতীতি।

(ঢ) সুষ্ঠু ত্বয়া জ্ঞাতম্। পরহৃদয়গ্রহণপণ্ডিতা মদনিকা খলু ত্বম্।

(ট) মদ ইতি। পুরোভাগিতা কেবলদোষদর্শিত্বম্; তথা চ তবৈতামুৎকণ্ঠিতাবস্থাং বিলোক্য স্নেহবশাদেব পৃচ্ছামি, ন পুনরেতামবস্থায়াং দোষদর্শনাদিত্যর্থঃ। "দোষৈকদৃক্ পুরোভাগী" ইত্যমরঃ।

(ঢ) বস ইতি। পরস্য হৃদয়গ্রহণে চিত্তবৃত্তিবোধে পণ্ডিতা নিপুণা।

মদনিকা। আর্য্যে! স্নেহ জিজ্ঞাসা করিতেছে; কিন্তু দোষদর্শিতা নহে। তা, এ ঘটনাটা কি?।

বসন্তসেনা। মদনিকা! আমাকে কি রকম দেখিতেছ?।

মদনিকা। আপনার হৃদয়ের শূন্যতানিবন্ধন বুঝিতেছি,—আপনি হৃদয়গত কোন লোককে (পাইতে) ইচ্ছা করেন।

বসন্তসেনা। তুমি ঠিক বুঝিয়াছ। পরের মনোবৃত্তি বুঝিতে পণ্ডিতা মদনিকা তুমি কিনা!।

मद। पिअं मे पिअं ! को क्खु णाम अज्ज अज्जमोदीए अणुग्गहिदो मअणूसवे तरुणजणो(१) ता कधेदु अज्जआ, किं राआ, राअवल्लहो वा सेवीअदि ?। (ख)

वस। हञ्जे ! रमिदुमिच्छामि, ण सेविदुम्। (ग)

मद। विज्जाविसेसालङ्किदो किं कोवि बम्हणजुआ कामीअदि ?। (घ)

वस। पूअणीओ मे बम्हणजणो। (ङ)

(ख) प्रियं मे प्रियम्। कः खलु नाम अद्य आर्यमत्या अनुगृहीतो मदनोत्सवे तरुणजनः? तत् कथयतु आर्या, किं राजा, राजवल्लभो वा सेव्यते?।

(ग) हञ्जे ! रन्तुमिच्छामि, न सेवितुम्।

(घ) विद्याविशेषालङ्कृतः किं कोऽपि ब्राह्मणयुवा काम्यते ?

(ङ) पूजनीयो मे ब्राह्मणजनः।

(ख) मद इति। प्रियं … इत्यर्थः। आर्यमत्या मान्यया त्वया। सेव्यते इति … वर्तमाना ; सेविष्यते गुणं विज्ञाय इत्यर्थः।

(ग) वस इति। न सेवितुं न … केवलं गुणं … पितुम्।

(ङ) वस इति। पूज्यपूजकभावे सति रमणमनुचितम्, तस्य सम्मानविपर्ययात्, अतो ब्राह्मणयुवानं न कामयामीति भावः।

মদনিকা। প্রীতিকর আমার বড়ই প্রীতিকর। আর্য্যে মহোৎসবে আপনি কোন্ যুবককে অনুগৃহীত করিলেন, তাহা আপনি বলুন। রাজা না কোন রাজবল্লভের পরিচর্য্যা করিবেন?

বসন্তসেনা।.........আমি পরিচর্য্যা করিতে ইচ্ছা করি না।

মদনিকা। বিদ্যাবিশেষালঙ্কৃত কোন ব্রাহ্মণযুবাকে কামনা করেন?

বসন্তসেনা। ব্রাহ্মণ আমার পূজনীয়।

---

(१) अज्जो क्खु णाम एसो भअवं। अणुग्गहिदो मअणसवो तरुणजणेण।

मद । किं अणेअणअराहिगमण-जणित-विहव-वित्थारो वाणिअ-जुआ वा कामीअदि । (ध)

वस । हञ्जे ! उवारूढ़सिणेहं पि पणइजणं परिच्चइअ देसन्तरगमणेण वाणिअजणो महन्तं विओअजं दुक्खं उप्पादेदि । [न]

मद । अज्जए ! ण राआ, ण राअवल्लहो, ण वम्हणो, ण वाणिअजणो, । ता को दाणिं सो, भट्टिदारिआए कामीअदि? [प]

(ध) किम् अनेक-नगराभिगमन-जनित-विभवविस्तारो वाणिजयुवा वा काम्यते ?

(न) हञ्जे ! उपारूढ़स्नेहमपि प्रणयिजनं परित्यज्य देशान्तर-गमनेन वाणिजजनो महत् वियोगजं दुःखमुत्पादयति ।

(ध) मद इति । अनेकेषु नगरेषु अभिगमनेन वाणिज्यार्थं गमनेन जनितो विभवविस्तारो धनसम्पत्तिर्यस्य सः । वणिजः अपत्यमिति वाणिजः स चासौ युवा चेति सः ।

(न) वस इति । उपारूढ़ उत्पन्नः स्नेहोऽनुरागो यस्य तम्, [illegible] रागिणीं कामिनीम् । अत उपारूढ़स्नेहमित्यनेन बीपसती पुंस, [illegible] पुरुषस्य परस्परप्रेमित्वं सूचितम् ।

মদনিকা। তবে, বহুতর নগরে (সহরে) গমন, যাহার বিপুল সম্পত্তি জন্মাইয়া দিয়াছে; সেই রূপ কোন বণিক্ যুবাকে কি কামনা করেন ? ।

বসন্তসেনা। যাহার হৃদয়ে স্নেহ বদ্ধমূল হইয়াছে, সেরূপ প্রণয়ী জনকেও, পরিত্যাগ করিয়া দেশান্তরে গমন করায় বণিক্ লোক, বড়ই বিরহ দুঃখ উৎপাদন করেন।

মদনিকা। আর্য্যে! রাজা না, রাজবল্লভ নয়, ব্রাহ্মণ না এবং বণিক না, তবে সে কে? যাহাকে আপনি কামনা করেন।

वस। हञ्जे! तुमं मए सह कामदेवाअदणुज्जाणं गदा आसि। (फ)

मद। अज्जए! गदह्मि। (ब)

वस। तहवि मं उदासीणा विअ पुच्छसि?। (भ)

मद। जाणिदं। किं सो ज्जेव? जेण अज्जआ सरणागदा अब्भुववन्ना। (म)

वस। किं णामहेओ क्खु सो?। (य)

(प) आर्य्ये! न राजा, न राजवल्लभः, न ब्राह्मणः, न वाणिजजनः। तत् क इदानीं कः, भर्त्तृदारिकया काम्यते?

(फ) हञ्जे! त्वं मया सह कामदेवायतनोद्यानं गता आसीः।

(ब) गतास्मि। (भ) तथापि मामुदासीनेव पृच्छसि।

(म) ज्ञातम्। किं स एव? येनार्य्या शरणागता अभ्युपपन्ना।

(प) मद इति। यो भर्त्तृदारिकया काम्यत इति यच्छब्दः सामर्थ्यादवगन्तव्यः।

(भ) वस इति। उदासीनेव अविदितवृत्तान्तेव।

(म) मद इति। आर्य्या भवती, शरणागता आश्रयप्रार्थिनी सतीत्यर्थः, अभ्युपपन्ना गृहीता आश्रयदानाय अङ्गीकृतेति तात्पर्य्यम्।

বসন্তসেনা। ওহে! তুমি আমার সঙ্গে কামদেবায়তনোদ্যানে গিয়াছিলে?।

মদনিকা। আর্য্যে! গিয়াছিলাম।

বসন্তসেনা। তথাপি অবিদিতবৃত্তান্তের ন্যায় জিজ্ঞাসা করিতেছ কেন?।

মদনিকা। বুঝিতে পারিয়াছি। কি তিনিই? আপনি শরণাগত হইলে যিনি আশ্রয় দান করিতে স্বীকার করিয়াছিলেন।

বসন্তসেনা। তাঁহার নাম জানি কি?।

मद । सो क्खु सेट्ठिचत्तरे पडिवसदि । (र)

वस । अइ ! णामं पुच्छिदासि । (ल)

मद । सो क्खु अज्जए ! सुगहीदणामहेओ अज्जचारुदत्तो णाम । (व)

वस । सहर्षम् । । साहु ! मदणिए ! साहु । सुट्ठु तुए जाणिदं । (श)

मद । स्वगतम् । एव्वं दाव । प्रकाशम् । अज्जए ! दलिद्दो क्खु सो सुणीअदि । (ष)

(य) किंनामधेयः खलु सः ? । (र) स खलु श्रेष्ठिचत्वरे प्रतिवसति ।

(ल) अयि ! नाम पृष्टासि ।

(व) स खलु आर्य्ये ! सुगृहीतनामधेय आर्य्यचारुदत्तो नाम ।

(श) साधु मदनिके ! साधु, सुष्ठु त्वया ज्ञातम् ।

(ष) एवं तावत् । आर्य्ये ! दरिद्रः खलु स श्रूयते ।

(र) मद इति । श्रेष्ठिचत्वरे वणिजामङ्गने वणिक्पल्ल्यामित्यर्थः ।

(व) मद इति । सुगृहीतं वदान्यत्वेन सर्वैरवधारितं नामधेयं नाम यस्य सः ।

(श) वस इति । सुष्ठु सम्यक् ।

মদনিকা। তিনি বণিকপাড়ায় বাস করেন।

বসন্তসেনা। ওহে! তোমার নিকট নাম জিজ্ঞাসা করিয়াছি।

মদনিকা। আর্য্যে! সকলেই তাঁহার নাম উচ্চারণ করে। তাঁহার নাম 'চারুদত্ত'।

বসন্তসেনা। (আনন্দের সহিত) বেশ্ মদনিকা! বেশ্! তুমি ঠিক জানিয়াছ।

वस । अदो ज्जेव कामीअदि । दलिद्दपुरिससङ्कन्तमणा क्खु गणिआ लोए अवअणीआ भोदि । (स)

मद । अज्जए ! किं हीणकुसुमं सहआरपादवं महुअरीओ उण सेवन्ति ? । (ह)

वस । अदो ज्जेव ताओ महुअरीओ वुच्चन्ति । [च]

(स) अतएव काम्यते । दरिद्रपुरुषसंक्रान्तमनाः खलु गणिका लोके अवचनीया भवति ।

(ह) आर्य्ये ! किं हीनकुसुमं सहकारपादपं मधुकर्य्यः पुनः सेवन्ते ? ।

(च) अतएव ता मधुकर्य्य उच्यन्ते ।

(ष) मद इति । 'एवं तावत्' इत्यत्र अनुरागमस्याः परीक्षिष्ये इति वाक्य-शेषः ।

(स) वस इति । दरिद्रपुरुषे संक्रान्तमासक्तं मनो यस्याः सा । अवचनीया अनिन्दनीया धनलोभित्वेन या निन्दा न विरहितेत्यर्थः ।

(ह) मद इति । सहकारपादपमाम्रतरुम् । किं पुनः सेवन्ते अपि तु कद-अपि नेत्यर्थः । तथा च मधुकर्य्यो यथा हीनकुसुमं सहकारपादपं न सेवन्ते, गणिका अपि तथा हीनधनं पुरुषं न सेवन्ते इति हि रीतिरिति भावः ।

अत्र [illegible] अप्रस्तुतसमात् प्रस्तुतस्य प्रतीतेरप्रस्तुतप्रशंसालङ्कारः ।

(च) वस इति । अतएव हीनकुसुमसहकारपादपसेवनादेव । तथा च

মদনিকা। (স্বগত) এইরূপ বলিব। (প্রকাশ্যে) আর্য্যে! তাঁহাকে দরিদ্র বলিয়া শুনিয়াছি।

বসন্তসেনা। এই জন্যই তাঁহাকে কামনা করি। দরিদ্রপুরুষের প্রতি অনুরাগিণী বেশ্যা, লোকসমাজে অনিন্দনীয়া হয়।

মদনিকা। আর্য্যে! ভ্রমরীগণ পুষ্পবিহীন আম্রবৃক্ষের সেবা করে কি?।

मद। अज्जए! जइ सो मणोसिदो, ता कीस दाणिं सहसा ण अहिसारीअदि?। [क]

वस। हञ्जे! सहसा अहिसारीअन्तो पच्चुअआर-दुव्वलदाए मा दाव सो जणो दुल्लहदंसणो पुणो भविस्सदि। [ख]

(क) आर्य्ये! यदि स मनीषितः, तत् केनेदानीं सहसा नाभिसार्य्यते?।

(ख) हञ्जे! सहसा अभिसार्य्यमाणः प्रत्युपकारदुर्बलतया मा तावत् स जनो दुर्लभदर्शनः पुनर्भविष्यति।

मधु कुर्वन्तीति मधुकर्य्य इति व्युत्पत्त्या भ्रमरीणां मधुकरणावश्यकतया सपुष्पस्वादसेवनमेवावश्यकम्, मम तु धनसम्पत्तिकरणानावश्यकतया धनिसेवनमप्यनावश्यकमेवेति भावः।

अत्र अक्षरसंघातो नाम नाट्यलक्षणम् "वर्णनाक्षरसंघातश्चित्रार्थैरक्षरैर्मतः" इति दर्पणलक्षणात्।

(क) मद इति। स चारुदत्तः, मनीषितः अभिलषितः। अभिसार्य्यते दूतीसंप्रेषणेन तस्यामानीयते।

(ख) वस इति। प्रत्युपकारे मह्यमुपयुक्तधनदाने दुर्बलतया दरिद्रत्वादशक्ततया स जनश्चारुदत्तः। मा न भविष्यति। इति हेतोर्नाभिसार्य्यत इति वाक्यशेषः।

বসন্তসেনা। এই জন্যই তাহাদিগকে 'মধুকরী' বলে।

মদনিকা। আর্য্যে! যদি তাঁহাকে কামনা করিয়া থাকেন, তবে এখনই তাড়াতাড়ি তাঁহাকে সঙ্কেতস্থানে আনাইতেছেন না কেন?।

বসন্তসেনা। ওলো! হঠাৎ তাঁহাকে আনাইলে, তিনি প্রত্যুপকার করিতে কাতর হইবেন, তাহাতে পুনর্বায় তাঁহার দর্শন দুর্লভ হইবে; তাহা না হয় (সেই জন্য হঠাৎ আনাইতেছি না)।

मद। किं एदो ज्जेव सो अलङ्कारो तस्स हत्थे णिक्खित्तो ?। [ग]

वस। सुट्ठु दे जाणिदं। [घ]

नेपथ्ये। अले भट्टा! दश-सुवस्स्स [१] लुद्ध, जूदअरू पपलीणु पपलीणु। ता गेण्ह गेण्ह, चिट्ठ चिट्ठ, दूलात् पदिट्ठोसि। [ङ]

(ग) किम् अतएव सोऽलङ्कारस्तस्य हस्ते निक्षिप्तः ?।

(घ) सुष्ठु ते ज्ञातम्।

(ङ) अरे भट्टारक! दशसुवर्णस्य रुद्धो द्यूतकरः प्रपलायितः प्रपलायितः तद् गृहाण गृहाण। तिष्ठ तिष्ठ, दूरात् प्रदृष्टोऽसि।

(ग) मद इति। अतएव प्रत्युपकारदुर्लभत्वादेव। निक्षिप्तो न्यासीकृतः। तथा च तमलङ्कारं दृष्ट्वैव सुलभदर्शनो भवेदित्याशयः।

(घ) वस इति। सुष्ठु सम्यक्। ज्ञातमिति भावे प्रत्ययात् ते इति कर्त्तरि षष्ठी।

"हञ्जे! तहो तहो" इत्यारभ्य एतदन्तं यावत् उद्भेदो नाम मुखाङ्गमिदम्, अनुरागरूपस्य बीजार्थस्य नायिकागतत्वेन पुनरपि प्ररोहात्।

"बीजार्थस्य प्ररोहः स्यादुद्भेदः" इति दर्पणलक्षणात्।

न च विधानं परिभावनाख्य नाम अङ्गमुल्लङ्घ्य प्रागुद्भेदनिवेशे आलङ्कारिकक्रमविपर्य्यय इति वाच्यम्—'एतानि चाङ्गानि उक्तेनैव पौर्वापर्य्येण भवन्ति। अङ्गान्तराणि तु अन्यथापि' इति दर्पणकर्त्तैवाभिहितत्वात्।

(ङ) 'नासूचितं विशेत् पात्रम्' इत्यालङ्कारिकैरसूचितपात्रप्रवेशनिषेधात् संवाह

মদনিকা। এই জন্যই কি সেই অলঙ্কার তাঁহার হাতে গচ্ছিত রাখিয়াছেন ?।

বসন্তসেনা। তুমি ঠিক জানিয়াছ।

(১) দশসুবর্ণস্য।

প্রবিশ্য অপটীক্ষেপেণ সম্ভ্রান্তঃ সংবাহকঃ। কট্ঠে এসো জুদিঅর-ভাবে। হীমাণহে! (১) (চ)

ণব-বন্ধণ-মুক্কাএ বিঅ, গদ্দহীএ
হা! তাড়িদো ম্হি গদ্দহীএ।

(ঘ) কষ্টএষ দ্যূতকরভাবঃ। আশ্চর্য্যম্!

(১) নব-বন্ধন-মুক্তয়েব গর্দ্দভ্যা হা তাড়িতোঽস্মি গর্দ্দভ্যা।

অস্য প্রবেশং সূচয়িতুং নেপথ্যাৎ, মাথুরস্যোক্তিরিয়ম্। ভট্টারক! সভিক! দশানাং সুবর্ণানাং সমাহার ইতি দশসুবর্ণং তস্য দ্যূতক্রীড়ায়াং পণীকৃত্য হারিতানাং দশসংখ্যকস্বর্ণমুদ্রাণামিত্যর্থঃ, নিমিত্তে ইতি শেষঃ, রুদ্ধ আবদ্ধীকৃতঃ, দ্যূতকরঃ সংবাহকো নাম দ্যূতক্রীড়াকারী। গৃহাণ ধর, তস্য দাপনার্থমিতি ভাবঃ। তিষ্ঠেত্যাদিকন্তু পলায়মানং সংবাহকং প্রত্যেব উক্তমিতি বোধ্যম্।

সুবর্ণপরিমাণমাহ মনুঃ—"পঞ্চকৃষ্ণলকো মাষস্তে সুবর্ণস্তু ষোড়শ"। ইতি।

(চ) প্রবিশ্যেতি। অপটীক্ষেপেণ যবনিকায়া অনপসরণেন, 'পটীক্ষেপো ন কর্ত্তব্য আর্ত্তরাজপ্রবেশনে' ইত্যালঙ্কারিকনিয়মাৎ সংবাহকস্য চ আর্ত্তত্বাদিতি ভাবঃ। সম্ভ্রান্তস্ত্রস্তব্যস্তচিত্তঃ। সংবাহয়তি গাত্রং সম্মর্দ্দয়তীতি সংবাহকঃ। ইমমর্থ-মাত্মা স্বয়মেব পরস্তাৎ ব্যক্তীকরিষ্যতি। কষ্টঃ কষ্টকরঃ।

নবেতি। নবং বন্ধনান্মুক্তা প্রচ্যাবিতা তথা, গর্দ্দভ্যস্তিয়া ইব, গর্দ্দভ্যা বরাটিকয়া দ্যূতার্থরচিতকপর্দ্দকানিক্ষেপেণেত্যর্থঃ, তাড়িতোঽস্মি হারিতসুবর্ণান্ দাতুমশক্তত্বাৎ প্রহৃতো

নেপথ্যে। ও প্রভু! দশখানি মোহরের জন্য আবদ্ধ দ্যূতকর, পলাইল পলাইল; তা ধরুন ধরুন। ওরে! দাঁড়া দাঁড়া; দূর হইতে তোকে দেখিয়াছি।

যবনিকা অপসারণ না করিয়া প্রবেশপূর্ব্বক ব্যস্তচিত্ত সংবাহক। এই দ্যূতকরভাব বড়ই কষ্টকর। (কারণ—)

---

(১) ক্বচিৎ 'হীমাণহে' ইতি পূর্বং পঠিতম্।

অঙ্গলাঅমুক্কাএ বিঅ সত্তীএ,
ঘড়ুক্কো বিঅ ঘাদিদো হ্মি সত্তীএ [১] ॥১॥
লেখঅ-বাবড়-হিঅঅং, সহিঅং দট্টুণ ঝত্তি পব্ভট্টে।
এণ্হিং মগ্গ-ণিবড়িদো[২]কংণু ক্খু সলণং পপজ্জে ॥২॥

অঙ্গরাজ-মুক্তয়েব শক্ত্যা ঘটোৎকচ ইব ঘাতিতোঽস্মি শক্ত্যা ॥

(২) লেখক-ব্যাপৃত-হৃদয়ং সভিকং দৃষ্ট্বা ঝটিতি প্রভ্রষ্টঃ।
ইদানীং মার্গনিপতিতঃ কং নু খলু শরণং প্রপদ্যে ॥

ऽस्मि। হা কষ্টে। পরঞ্চ, অঙ্গরাজেন কর্ণেন মুক্তয়া নিক্ষিপ্তয়া, শক্ত্যা অস্ত্র বি[illegible], ঘটোৎকচস্তদাখ্যো হিড়িম্বাপুত্র ইব, শক্ত্যা যষ্টিবিশেষেণ ঘাতিতোঽস্মি স[illegible]ন প্রয়োজকেন কেনচিত্ প্রযোজ্যেন কর্ত্রা পুনঃ প্রহারিতোঽস্মি।

[illegible]ত্র যমকদ্বয়স্য শ্রৌতোপমাদ্বয়স্য চ মিথো নিরপেক্ষতয়া সংসৃষ্টিঃ।

গর্দ্দভীতি বরাটিকা নাম। গর্দ্দভীশক্তিকে আর্য্যৌতি প্রসিদ্ধতকে কপর্দ্দকনামধেয় ইতি পৃথ্বীধরঃ। 'চিত্রজাতিঃ' ইতি পৃথ্বীধরঃ ॥১॥

লেখকেতি। সভিকং সভাধ্যক্ষম্, লেখ এব লেখকঃ দ্যূতসম্বন্ধীয়যত্কিঞ্চিল্লেখনং তত্র ব্যাপৃতম্ আসক্তং হৃদয়ং যস্য তম্, অতএব মত্পলায়নং লক্ষয়িতুমশক্তমিতি ভাবঃ, দৃষ্ট্বা ঝটিতি তত্ক্ষণাদেব প্রভ্রষ্টস্তেষামবরোধাত্ বিচ্যুতঃ। ইদানীং মার্গে রাজপথে নিপতিত উপস্থিতঃ সন্, কং নু খলু জনম্, শরণং রক্ষকম্ প্রপদ্যে প্রাপ্নোমি।

হায়! বন্ধন হইতে নূতন মুক্ত গর্দ্দভীর ন্যায় বরাটিকা নিক্ষেপ দ্বারা তাড়িত হইয়াছি এবং কর্ণনিক্ষিপ্ত শক্তির ন্যায় যষ্টি দ্বারা, ঘটোৎকচের ন্যায় প্রহারিত হইয়াছি ॥১॥

সভাপতিকে লেখায় ব্যাপৃতচিত্ত দেখিয়া হঠাৎ পলাইয়া আসিয়াছি। এখন পথে আসিয়া পড়িয়াছি; কিন্তু কাহার শরণ লইব? ॥২

(১) বন্ধণবন্ধমুক্কোবিঅ গদ্দহী হা! তাড়িদোম্হি অঙ্গরাঅমুক্কাএ সত্তীএ ঘড়ুক্কো বিঅ ঘাদিদোম্হি। (২) মগ্গণিবড়িদে।

ता जाव एदे सहिअ-जूदिअला अस्सदो मं अण्णेसन्ति, ताव (१) इदो विप्पदीवेहिं पादेहिं एदं सुण्णदेउलं पविसिअ देवीभविस्सं। बहुविधं नाट्यं कृत्वा तथा स्थितः। (छ)

ततः प्रविशति माथुरो द्यूतकरश्च। (ज)

माथुरः। अले भट्टा! दशसुवण्णाह लुद्ध जूदअरु पपलीणु पपलीणु। ता गेण्ह गेण्ह। चिट्ठ चिट्ठ; दूरात् पदिट्ठोसि। (झ)

(छ) तद् यावत् एतौ सभिक-द्यूतकरौ अन्यतो मामन्विष्यतः, तावत् इतो विप्रतीपाभ्यां पादाभ्यामेतत् शून्यदेवकुलं प्रविश्य देवीभविष्यामि।

(झ) अयमंशस्तु प्रागेवानूदितः।

अत्र आत्मनोऽपरत्वेन द्यूतकरस्य द्युतिभेदनात् भेदो नाम मुखसन्ध्यङ्गम्। यथा दर्पणे—

"भेदः संहतिभेदनम्।" इति। "गाथा" इति पृथ्वीधरः॥२॥

(छ) तदिति। विप्रतीपाभ्यां विपरीताभ्याम्। शून्यदेवकुलं देवविग्रहहीनं देवगृहम्। अदेवो देवो भविष्यामीति देवीभविष्यामि। च्वि प्रत्ययः। देवविग्रहवदवस्थास्ये इत्यर्थः। नाट्यमङ्गभङ्गीं। तथा देवविग्रहवत्।

अत्र कपटं नाम नाट्यालङ्कारः। तथा च दर्पणे- "कपटं मायया यत्र रूपमन्यद्विभाव्यते।"

(ज) तत इति। माथुरो नाम कश्चित्। द्यूतकरश्च संवाहकभिन्नः अपरः।

(झ) माथुर इति। प्राग् व्याख्यातमेतत्।

তা, যে পর্য্যন্ত এই সভাপতি ও দ্যূতকর আমাকে অন্যদিকে অন্বেষণ করে ইতি মধ্যে আমি বিপরীতভাবে পদক্ষেপ করিয়া (পিছন ফিরিয়া

---

(१) ताव इक्के।

द्यूतकरः। जइ वज्जसि(৩) पादालं, इन्दं शलणं जासि।
सहिअं वज्जिअ एक्कं, रुद्दो वि ण रक्खिदुं तरइ॥३॥

माथुरः। कहिं कहिं सुसहिअ-विप्पलम्भआ!
पलासि ले! भअपलिवेविदङ्गआ!।

---

(৩) यदि व्रजसि पातालं, इन्द्रं शरणं यासि।
सभिकं वर्जयित्वा एकम्, रुद्रोऽपि न रक्षितुं तरति॥

(৪) कस्मिन् कस्मिन् सुसभिकविप्रलम्भक!
पलायसे रे भयपरिवेपिताङ्गक!

यदीति। यदि त्वं पातालं व्रजसि आत्मरक्षार्थं गच्छसि, अथवा यदि इन्द्रं शरणं यासि रक्षकत्वेन प्राप्नोषि; तथापि एकं सभिकमस्माकं द्यूतसभाध्यक्षं वर्जयित्वा, रुद्रः शिवः, अपिशब्दात् स इन्द्रश्च त्वां रक्षितुं न तरति न पारयिष्यतीत्यर्थः। गाथा जातिः॥३॥

कस्मिन्निति। रे सुसभिक न्याय्यक्रीडाकर्त्तारं सभाध्यक्षं विप्रलम्भयति देयस्यादानात् प्रतारयतीति सः, तत्सम्बोधनम्। भयेन परिवेपितानि सर्वतः कम्पितानि अङ्गानि यस्य तत्सम्बोधनम्। पदे पदे प्रतिपदविक्षेपम् समं समानं विषमं विपरीतप्रकारञ्च यथा स्यात्तथा, स्खलन् गमने भ्रश्यन्, तथा कुलं वंशम्, यशश्च, अतिक्रम्य देयस्यादानेन

যাইয়া) এই শূন্য দেবগৃহে প্রবেশ করিয়া, দেবতা হই। (বহুবিধ অভিনয় করিয়া, দেবতার প্রতিমার ন্যায় থাকিল)।

মাথুর। ওরে প্রভু! দশখানি মোহরের জন্য আবদ্ধ সেই দ্যূতকর পলাইল পলাইল। তা ধর ধর। ওরে! দাঁড়া দাঁড়া। দূর হইতে তোকে দেখিয়াছি।

দ্যূতকর। তুই যদি পাতালে যাইস্, কিম্বা ইন্দ্রের শরণাপন্ন হইস্, তথাপি এক সভাপতি ছাড়া, সে ইন্দ্র বা রুদ্রও, তোকে রক্ষা করিতে পারিবেন না।৩

पदे पदे सम-विसमं खलन्तआ
कुलं जसं अदिकसणं कलेन्तआ ॥४॥

द्यूत। पदं वीक्ष्य। एसो वज्जदि, इयं पणट्ठा पदवी। (अ)

माथुरः। आलोक्य सवितर्कम्। अले! विप्पदीवु पादु। पडिमाशुण्णु देउलु। विचिन्त्य। धुत्ते जूदअले विप्पदीवेहिं पादेहिं देउलं पविट्ठो। (ट)

पदे पदे समविषमं स्खलन्
कुलं यशः अतिकृष्णं कुर्व्वन् ॥

(अ) एष व्रजति, इयं प्रनष्टा पदवी।

मलिनम्, कुर्व्वन् सन्, कस्मिन् कस्मिन् स्थाने पलायसे पलाय्य यासि, नैव तथा शक्ष्यसीति भावः।

रुचिरा वृत्तम्-"जभौ सजौ गिति रुचिरा चतुर्ग्रहैः" इति लक्षणात् ॥४॥

(अ) द्यूत इति। पदं पदचिह्नम्। एष व्रजति, अतः पदचिह्नपातादित्याशयः। प्रनष्टा विलुप्ता, पदवी पन्थाः, इतः परं पदचिह्नापतनादिति भावः। एतेन बहिर्गृहचत्वरस्य मृन्मयत्वं सुद्रवालुकाकीर्णत्वञ्च प्रतीयते।

মাথুর। ওরে ন্যায্য-কার্য্য-কারি-সভাধ্যক্ষ-প্রতারক! ভয়ে তোর অঙ্গ কাঁপিতেছে, তুই প্রতিপদক্ষেপে সমান ও বিপরীতভাবে পড়িয়া যাইতেছিস্, এবং বংশ ও যশকে অতিশয় মলিন করিতেছিস্, এ অবস্থায় কোথায় কোথায় পলাইবি? ॥৪॥

দ্যূতকর। (পদচিহ্ন দেখিয়া) এই যাইতেছে; এই তাহার পথ লোপ পাইল।

द्यूत । ता अणुसरेम्ह । (ठ)

माथुरः । एव्वं भोदु । (ड)

उभौ देवकुलप्रवेशं निरूपयतः । दृष्ट्वा अन्योन्यं संज्ञाप्य । (ढ)

(ट) अरे ! विप्रतीपौ पादौ, प्रतिमाशून्यं देवकुलम्, धूर्त्तो द्यूतकरो विप्रतीपाभ्यां पादाभ्यां देवकुलं प्रविष्टः ।

(ठ) तदनुसरावः । (ड) एवं भवतु ।

(ट) माथुर इति । विप्रतीपौ विपरीतौ देवगृहात् प्रधानपथाभिमुखाविलर्थः पादौ पादचिह्नानि । अतः कश्चित् देवगृहान्निर्गता प्रधानपथमारूढ इति प्रथमतः प्रत्येतव्यमिति भावः ; किन्तु एतत् देवकुलं प्रतिमाशून्यमासीदिति प्राग् दृष्टमित्यर्थः । अतस्तत्पूजाद्यसम्भवेन कस्यचिदेवगृहप्रवेशस्याप्यसम्भवात् विपरीतपदचिह्नस्याप्यसम्भव एवेत्यभिप्रायः । विचिन्त्य तत् किमेतदिति मनसि समालोच्य । विप्रतीपाभ्यां विपरीताभ्यां अस्मत्प्रतारणार्थं रथ्याभिमुखीभूय क्रमशः पश्चादपसरणप्रकारेण विन्यस्ताभ्यामित्यर्थः प्रविष्ट इत्यनुमीयत इति शेषः, नूतनचिह्नदर्शनात् अन्यजनस्य चादर्शनादिति भावः ।

अत्र युक्तिर्नाम नाट्यलक्षणम्–"युक्तिः केनचिदंशेन किञ्चिद् यत्रानुमीयते" इति दर्पणलक्षणात् ।

(ठ) द्यूत इति । अनुसरावः तं संवाहकं नाम द्यूतकरमित्यर्थः ।

(ढ) उभाविति । निरूपयतः अभिनयतः । संज्ञाप्य 'अयमेव स संवाहकः' इति नयनभङ्ग्यादिना ज्ञापयित्वा ।

মাথুর। (দেখিয়া বিতর্কের সহিত) ওরে ! পায়ের চিহ্নগুলি বিপরীতভাবে রহিয়াছে; ওদিকে দেবগৃহও প্রতিমাশূন্য ছিল। (চিন্তা করিয়া) ধূর্ত্ত সেই দ্যূতকর বিপরীতভাবে পদক্ষেপ করিয়া দেবগৃহে প্রবেশ করিয়াছে।

দ্যূতকর। তবে অনুসরণ করি।

মাথুর। তাহাই হউক।

द्यूत । कधं कट्ठमई पड़िमा । (ण)

माथुरः । अले ! णहु णहु । शैलपड़िमा । इति बहुविधं चालयति । संज्ञाप्य च । एव्वं भोदु । एहि जूदं किलेम्ह । बहुविधं द्यूतं क्रीडति । (त)

संवा । द्यूतेच्छाविकारसंवरणं बहुविधं कृत्वा स्वगतम् । अले ! (थ)

(ण) कथं काष्ठमयी प्रतिमा ।

(त) अरे ! नखलु नखलु । शैलप्रतिमा । एवं भवतु । एहि द्यूतं क्रीड़ावः ।

(ण) द्यूत इति । काष्ठमयी प्रतिमा नीलपीतादिवर्णैरञ्जिता दारुमयी विग्रहः मृन्मय्या इत्यस्या उज्ज्वलवर्णादर्शनादिति भावः । कौतुकोक्तिरियम् ।

(त) माथुर इति । शैलप्रतिमा, तथैव कृष्णवर्णत्वादिति भावः । इयमपि कौतुकोक्तिः । संज्ञाप्य 'अयमेव स संवाहकः' इति नयनभङ्ग्या द्यूतकरं ज्ञापयित्वा । अतीवद्यूतासक्तोऽयं संवाहको द्यूतक्रीड़ां पश्यन् स्वयमेवात्मप्रकाशं करिष्यति, तथा च सति महाकौतुकं भविष्यतीति मत्वा आह "एहि द्यूतं क्रीड़ावः" इति ।

দুই জনেই দেবগৃহে প্রবেশ অভিনয় করিল। দেখিয়া, পরস্পর সঙ্কেত করিয়া।

দ্যূতকর। এ যে কাষ্ঠময়ী প্রতিমা।

মাথুর। ওরে! না না। পাষাণময়ী প্রতিমা। (এই বলিয়া নানারকমে সঞ্চালন করিল; পরে সঙ্কেত করিয়া) এই হউক, আয় পাশা খেলি। (ইহা বলিয়া নানারূপ পাশা খেলিতে লাগিল।)

সংবাহক। (নানারকম দ্যূতেচ্ছাবিকার সংবরণ করিয়া স্বগত)

कत्ताशद्दे णिस्साणअश्श हलदि हडक्कं मणुश्शाश्श ।
ढक्काशद्दे व्व णलाधिवश्श पब्भट्टलज्जश्श ॥५॥
जाणामि ण कीलिश्शं, शुमेलु-शिहल-पडण-शन्निहं जुदं ।
तह वि हु कोइलमहुले, कत्ताशद्दे मणं हलदि ॥६॥

(छ) अरे! कत्ताशब्दो निर्धनकस्य हरति हृदयं मनुष्यस्य ।
ढक्काशब्द इव नराधिपस्य प्रभ्रष्टराज्यस्य ॥
[६] जानामि न क्रीडिष्यामि, सुमेरु-शिखर-पतन-सन्निभं द्यूतम् ।
तथापि खलु कोकिलमधुरः, कत्ताशब्दो मनो हरति ॥

अत्रैवात्र परिभावना नाम मुखसन्ध्यङ्गम् । यथा दर्पणे—

"कुतूहलोत्तरा वाचः प्रोक्ता तु परिभावना ।"

कत्ताशब्द इति । इदानीन्तनद्यूतक्रीडायां "पोया" इत्यादिशब्दवत् तदानीन्तन-द्यूतक्रीडायामर्थविशेषे सङ्केतितः कत्ताशब्दः । "माणकम् (क्ली) मुद्राचिह्नित-निष्कादि" इति शब्दकल्पद्रुमः । निष्कश्च चतुःसुवर्णपरिमितः स्वर्णखण्डः "चतुः-सौवर्णिको निष्कः" इति मनुवचनात् । तस्मात् धनसामान्योपलक्षणम् । तथा च प्रभ्रष्टं राज्यं यस्मात्तादृशस्य नराधिपस्य, ढक्काशब्द इव गृहान्तरे महोत्सवे वाद्यमानाया ढक्काया ध्वनिरिव ; अन्येषां द्यूतक्रीडायां कत्ताशब्दः, निर्धनकस्य निर्धनस्य मनुष्यस्य हृदयं हरति आकर्षति । किन्तु आत्मनो योगत्वाभावात् तं कर्त्तुं न शक्नोतीति भावः ।

अत्र अप्रस्तुतनिर्द्धनमनुष्यसामान्याभिधानात् प्रस्तुतस्य निर्द्धनविशेषस्य संवाहकस्य प्रतीतेरप्रस्तुतप्रशंसालङ्कारः श्रौती उपमा च, अनयोर्मिथोनिरपेक्षतया संसृष्टिः ।

विपुला जातिः ॥५॥

जानामीति । सुमेरोः पर्वतस्य शिखरे शृङ्गे स्वर्गात्मके इति भावः, यत् पतनं

ওরে ! ঢাকের শব্দ যেমন রাজ্যহীন রাজার চিত্ত আকর্ষণ করে, সেইরূপ 'কত্তা' শব্দও, ধনহীন মানুষের চিত্ত আকর্ষণ করে ॥৫॥

द्यूत। मम पाठे मम पाठे। (द)

माथुरः। णहु। मम पाठे मम पाठे। [ध]

संवा। अन्यतः सहसोपसृत्य। णं मम पाठे। [न]

द्यूत। लद्धे गोष्ठि। [प]

[द] मम पाठं मम पाठं। [ध] न खलु। मम पाठं मम पाठं।

[न] ननु मम पाठं। [प] लब्धः पुरुषः।

गमनं तत्सन्निभं तत्तुल्यसुखकरमित्यर्थः, द्यूतं न क्रीड़िष्यामि, द्यूतयोगिधनाभावा-दिति भावः, इति जानामि बुध्ये। तथापि खलु कोकिलवत् कोकिलस्वरवत् मधुरः सुश्राव्यः कत्ताशब्दो मनो हरति द्यूतं प्रति आकर्षति।

अत्र समासगता लुप्तोपमालङ्कारः। आर्या च जातिः ॥६॥

(द) द्यूत इति। पाठं इति तत्कालप्रचलितद्यूतक्रीड़ायामर्थविशेषे सङ्केतितः शब्दः।

(प) द्यूत इति। गोष्ठि इति देशीयशब्दः पुरुषार्थे। मम वाहकाख्यो द्यूतकरः पुरुषो लब्ध इत्यर्थः।

সুমেরুর শৃঙ্গে আরোহণের ন্যায় সুখকর পাশকক্রীড়া করিব না-ইহা আমি জানি; তথাপি কোকিলের স্বরের ন্যায় মধুর কত্তাশব্দ, আমার চিত্ত আকর্ষণ করিতেছে ॥৬॥

দ্যূতকর। আমার দিকে আমার দিকে।

মাথুর। নাহে। আমার দিকে আমার দিকে।

সংবাহক। (অন্যদিক্ হইতে হঠাৎ উপস্থিত হইয়া) ওহে! আমার দিকে।

দ্যূতকর। বেটাকে পাইয়াছি।

মাথুরঃ। গৃহীত্বা। অলে লুত্তদণ্ডা! গহীদোসি। পঅচ্ছ তং দশসুবণ্ণ [ফ]

সংবা। অজ্জ দইস্সং। [ব]

মাথুরঃ। অহুণা পঅচ্ছ। [ভ]

সংবা। দইস্সং। পসাদং কলেহি। (ম)

মাথুরঃ। অলে! ণং সংপদং পঅচ্ছ। [য]

সংবা। শিলু পড়দি। ইতি ভূমৌ পততি। [র]

[ফ] অরে লুপ্তদণ্ডক! গৃহীতোঽসি। প্রযচ্ছ তৎ দশসুবর্ণম্।

[ব] অদ্য দাস্যামি। [ভ] অধুনা প্রযচ্ছ। [ম] দাস্যামি প্রসাদং কুরু।

[য] অরে! ননু সাম্প্রতং প্রযচ্ছ। [র] শিরঃ পততি।

(ফ) মাথুর ইতি। লুপ্তঃ অদানাৎ লোপং প্রাপিতঃ দণ্ডঃ পরাজয়দণ্ডস্বরূপঃ দশসুবর্ণাত্মকপণীকৃতপদার্থো যেন তৎসম্বোধনম্।

(ম) সংবা ইতি। প্রসাদমনুগ্রহং কুরু, যথা কালান্তরে দানং স্যাদিতি ভাবঃ।

(র) সংবা ইতি। পততি কেন প্রকারেণ দশ সুবর্ণান্ দদামি ইতি চিন্তা, গলাৎ স্খলতি।

মাথুর। (ধরিয়া) ওরে পণলোপকারী! তোকে ধরিয়াছি, সেই দশখানা মোহর দে।

সংবাহক। আজ দিব।

মাথুর। এখন দে।

সংবাহক। দিব। অনুগ্রহ কর।

মাথুর। ওরে! এখনই দে।

সংবাহক। মাথা খসিয়া পড়িতেছে। (এই বলিয়া ভূতলে পতিত হইল)।

उभौ। बहुविधं ताड़यतः।

माथुरः। एसु तुमं हु जूदिअर मण्डलीए बद्धोसि। [ल]

संवा। उत्थाय सविषादम्। कधं जूदिअर-मण्डलीए बद्धोम्हि। ही एसो अम्हाणं जूदिअलाणं अलङ्घणीए शमए। ता कुदो दइस्सं। [व]

माथुरः। अले! गण्डे कुलु कुलु। [श]

संवा। एव्वं कलेमि। द्यूतकरमुपसृत्य। अद्धं ते देमि, अद्धं मे मुञ्चदु। [ष]

(ल) एष त्वं खलु द्यूतकरमण्डल्या बद्धोऽसि।

(व) कथं द्यूतकरमण्डल्या बद्धोऽस्मि। कष्टम! एषोऽस्माकं द्यूतकराणामलङ्घनीयः समयः। तस्मात् कुतो दास्यामि।

(श) अरे! गण्डं कुरु कुरु। bail surety

(ष) एवं करोमि। अर्द्धं ते ददामि, अर्द्धं मे मुञ्चतु।

(ल) माथुर इति। द्यूतकराणां मण्डल्या समूहेन, बद्धोऽसि 'तत्पणीकृत दशसुवर्णमदत्वा गन्तुं न शक्ष्यसि' इत्येवं नियमेनावद्धीकृतोऽसि।

(व) संवा इति। समयो नियमः। "समयः शपथे" इत्यादि हैमः।

(श) माथुर इति। गण्डं चिह्नं वाच्या तत्पणार्पणकाल नियममित्यर्थः। "ओयाधा" इति भाषा। "गण्डः प्रवीरे चिह्ने स्यात्" इति विश्वः।

(ष) संवा इति। अर्द्धं हारितस्य तस्य दशसुवर्णस्येत्यर्थः।

माथুর ও দ্যূতকর। (বহুবিধ প্রহার করিল)

মাথুর। এই তুই দ্যূতকরমণ্ডলীকর্ত্তৃক বদ্ধ হইলি।

সংবাহক। (উঠিয়া বিষাদের সহিত) দ্যূতকরমণ্ডলীকর্ত্তৃক বদ্ধ হইলাম। হায়! এ যে আমাদের দ্যূতকরদের অলঙ্ঘনীয় নিয়ম। তা কোথা হইতে দি?।

মাথুর। ওরে! ওয়াধা কর্ ওয়াধা কর্।

द्यूत। एव्वं भोदु। (स)

सं वा। सभिकमुपगम्य। अद्धम्म गण्ड कलेमि, अद्ध पि मे अज्जो मुञ्चदु। (ह)

माथुरः। को दोसु, एव्वं भोदु। [ज]

संवा। प्रकाशम्। अज्ज! अद्धे तुए मुक्के ?। [क]

माथुरः। मुक्के। [ख]

संवा। द्यूतकरं प्रति। अद्धे तुए वि मुक्के ?। [ग]

द्यूत। मुक्के। [घ]

(स) एवं भवतु। (ह) अर्द्धस्य गण्डं करोमि, अर्द्धमपि मे आर्य्यो मुञ्चतु।

(ज) को दोषः, एवं भवतु। (क) आर्य्य! अर्द्धं त्वया मुक्तम्।

(ख) मुक्तम्। (ग) अर्द्धं त्वयापि मुक्तम् ?। (घ) मुक्तम्।

(ह) संवा इति। सभिकं समाश्रयं माथुरम्। परत प्रकाशमित्यभिधाना-द नजनान्तिकमिति बोध्यम्। गण्डमिति। पूर्ववदेवार्थः।

(क) संवा इति। मुक्तं परित्यक्तं किमिति काकुः। परमाथ्यं वम्।

সংবাহক। এইরূপ করিতেছি। (দ্যূতকরকে স্পর্শ করিয়া) অর্দ্ধ তোমাকে দি, অর্দ্ধ আমাকে ছাড়িয়া দাও।

দ্যূতকর। এইরূপই হউক।

সংবাহক। (মাথুরের নিকট যাইয়া) অর্দ্ধের ওযাধা করিতেছি, আর অর্দ্ধ আপনি আমাকে ছাড়িয়া দিন।

মাথুর। দোষ কি, এইরূপই হউক।

সংবাহক। (প্রকাশ্যে) মহাশয়! আপনি অর্দ্ধ ছাড়িয়া দিয়াছেন ?।

संवा। संपदं गमिस्सं। [ङ]

माथुरः। पअच्छ तं दससुवण्णं कहिं गच्छसि ?। [च]

संवा। पेक्खध पेक्खध भट्टालआ!। हा सम्पदं ज्जेव एक्काह अद्धे गण्डे कडे, अवलाह अद्धे मुक्के; तह वि मं अवलं सम्पदं ज्जेव मग्गदि। (छ)

(ङ) साम्प्रतं गमिष्यामि। (च) प्रयच्छ तत् दशसुवर्णम्, कस्मिन् गच्छसि ?।

(छ) प्रेक्षध्वं प्रेक्षध्वं भट्टारकाः!। हा, साम्प्रतमेव एकस्य अर्द्धं गण्डं कृतम्, अपरस्य अर्द्धं मुक्तम्; तथापि मामबलं साम्प्रतमेव मार्गयति

(ङ) संवा इति। गमिष्यामि, उभाभ्यामेव युवाभ्यामुभयोरेवार्द्धयोर्मुक्तत्वेन वस्तुतः सम्पूर्णस्यैव मुक्तत्वापातात् तथा च सति ममेदानीं सर्वथैव दायित्वाभावादिति भावः।

(छ) संवा इति। भट्टारकाः! राजानः! मध्यस्थतया राजसम्माननीयाः सभ्याः। एकस्य सभिकस्य। गण्डं बाधा निग्रहः। अपरस्य द्यूतकरस्य। मुक्तं तेनैव द्यूतकरेण परित्यक्तम्। अबलं धनबलहीनं दशसुवर्णं दातुमसमर्थमित्यर्थः। मार्गयति याचते तत् दशसुवर्णं प्रार्थयति इति तात्पर्य्यम्।

মাথুর। ছাড়িয়া দিয়াছি।

সংবাহক। (দ্যূতকরের প্রতি) তুমিও অর্দ্ধ ছাড়িয়া দিয়াছ ?।

দ্যূতকর। ছাড়িয়া দিয়াছি।

সংবাহক। এখন যাই।

মাথুর। সেই দশখানি মোহর দে, যাচ্ছিস্ কোথায় ?।

সংবাহক। দেখুন দেখুন মহাশয়রা। হায়! এখনই একজনের অর্দ্ধে ওয়াধা করিয়াছি, অপরের অর্দ্ধ ছাড়িয়া দিয়াছে। তথাপি আমাকে দুর্ব্বল পাইয়া এখনই আবার চাহিতেছে!।

माथुरः । गृहीत्वा । धुत्तु माथुरु अहं णिउणु । एत्थ तुए ण अहं (१) धुत्तिस्सामि । ता पअच्छ तं लुत्तदण्डआ ! सव्वं सुवण्णं संपदं । (ज)

संवा । कुदो दइस्सं ? । [झ]

माथुरः । पिदरं विक्किणिअ पअच्छ । (ञ)

संवा । कुदो मे पिदा ? । (ट)

माथुरः । मादरं विक्किणिअ पअच्छ । (ठ)

संवा । कुदो मे मादा ? । (ड)

(ज) धूर्त्त ! माथुरोऽहं निपुणः । अत्र त्वया नाहं धूर्त्तयामि, तत् प्रयच्छ तं लुप्तदण्डक ! सर्वं सुवर्णं साम्प्रतम् ।

(झ) कुतो दास्यामि ? । (ञ) पितरं विक्रीय प्रयच्छ (ट) कुतो मे पिता ?

(ज) माथुर इति । गृहीत्वा संवाहकं धृत्वा । निपुणः पराभिप्रायज्ञाने पटुः । त्वया सार्द्धम् । धूर्त्तं धूर्त्तकार्य्यं करोमीति धूर्त्तयामि । लुप्तदण्डक इति पूर्व्ववदेवार्थः ।

মাথুর। (ধরিয়া) ধূর্ত্ত ! আমি মাথুর চতুর। এ বিষয়ে আমি তোর সঙ্গে ধূর্ত্তের কার্য্য করিব না। ওরে পণলোপকারী ! সেই সমস্ত সুবর্ণ এখনই দে।

সংবাহক। কোথা হইতে দিব ?।

মাথুর। পিতাকে বিক্রয় করিয়া দে।

সংবাহক। আমার পিতা কোথায় ?।

মাথুর। মাতাকে বিক্রয় করিয়া দে।

---

(१) एत्थ ण अहं ।

माथुरः । अप्पाणं विक्किणिअ पअच्छ । (ढ)

संवा । करेध पसादं णेध मं लाअमग्गं । (ण)

माथुरः । पसरु । (त)

संवा । एव्वं भोदु । परिक्रामति । अज्जा ! किणिध मं इमस्स सहिअस्स हत्थादो दशेहिं शुवस्णकेहिं । इत्याकाशे । किं भणाध ? 'किं कलइश्शशि" त्ति गेहे दे कम्मकले हुविश्शं । कधं अदइअ पडिवअणं गदे । भोदु एव्वं, इमं अण्णं भणाइश्शं । पुनस्तदेव पठति । कधं एशे वि मं अवधीलिअ गदे । हा ! अज्जचालुदत्तश्श विहवे विहडिदे एशे ण्हु हगे मंदभाए । (थ)

(ठ) स तव विक्रीय प्रयच्छ । (ड) कुतो मे माता ? । (ढ) आत्मानं विक्रीय प्रयच्छ ।

(ण) कुरुत प्रसादम् । नयत मां राजमार्गम् (त) प्रसर ।

(थ) एवं भवतु । आर्य्याः ! क्रीणीध्वं माम् अस्य सभिकस्य हस्तात् दशभिः सुवर्णैः । किं भणत ? 'किं करिष्यसि ?' इति गेहे ते कर्म्म-

(त) माथुर इति । प्रसर राजमार्गं गच्छ ।

(थ) संवा इति । आकाशभाषितलक्षणं यथा दर्पणे—

সংবাহক। আমার মাতা কোথায় ?।

মাথুর। আপনাকে বিক্রয় করি । দে।

সংবাহক। অনুগ্রহ কর, আমাকে রাজপথে নাও।

মাথুর। চল।

সংবাহক। এইরূপই হউক। (পাদচারণ করিতে লাগিল) মহাশয়গণ! দশখানি মোহর দিয়া আমাকে এই সভাধ্যক্ষের হাত

माथुरः। णं देहि। (ट)

संवा। कुदो दइस्सं?। इति पतति। (ध)

माथुरः। कर्षति। (न)

संवा। अज्जा! पलित्ताअध पलित्ताअध। (प)

करो भविष्यामि। कथमदत्त्वा प्रतिवचनं गतः?। भवत्वेवम्, इममन्यं भणिष्यामि। कथमेषोऽपि मामवधीर्य्य गतः?। हा! आर्य्यचारुदत्तस्य विभवे विघटिते एषोऽहं वर्त्ते मन्दभाग्यः।

(ट) ननु देहि। (ध) कुतो दास्यामि?। (प) आर्य्याः परित्रायध्वं परित्रायध्वम्।

"किं ब्रवीषीति यन्नाट्ये विना पात्रं प्रयुज्यते।
श्रुत्वेवानुक्तमप्यर्थं तत् स्यादाकाशभाषितम्॥

कर्म्मकरः उच्छिष्टक्षेपनभाण्डमार्ज्जनादिकार्य्यकारी भृत्यः। अवधीर्य्य अवज्ञाय। विभवे धनसम्पत्तौ, विघटिते विनष्टे, एषोऽहं मन्दभाग्यो वर्त्ते सञ्जातः।

(ध) संवा इति। पतति पादयोरिति शेषः।

(न) माथुर इति। कर्षति तत्सुवर्णं ग्रहणार्थमाकर्षति।

হইব্রে কিঙ্কর। (দেখিয়া শূন্যে) কি বলিলেন—"তুমি কি করিতে পার" ইহা?। আমি আপনার ঘরে কার্য্যকারক (ভৃত্য) হইব। হায়! উত্তর না দিয়াই গেল। হউক, এইরূপ করি, এই অন্য লোককে বলি। (পুনরায় তাহাই বলিয়া) হায়! এ ব্যক্তিও, আমাকে অবজ্ঞা করিয়া গেল। হায়! আর্য্য চারুদত্তের সম্পত্তি নষ্ট হইলে পরই আমি এইরূপ দুর্ভাগ্য হইয়া পড়িয়াছি।

মাথুর। ওরে! দে।

সংবাহক। কোথা হইতে দিব?। (এই বলিয়া পায়ের উপরে পড়িল।)

ततः प्रविशति दर्दुरकः। (फ)

दर्दु। भोः! द्यूतं हि नाम पुरुषस्य असिंहासनं राज्यम्। (ब)

न गणयति पराभवं कुतश्चित्
हरति ददाति च नित्यमर्थजातम्।
नृपतिरिव निकाममायदर्शी
विभववता समुपास्यते जनेन ॥७॥

(फ) ततः इति। दर्दुरो भेकस्तद्वदेव द्यूतक्रीडाकाले रवणात् दर्दुरक इति नाम, संज्ञायाञ्च कप्रत्ययः। नीचत्वात् शिक्षितत्वाच्च संस्कृतं पठति।

(ब) दर्दु इति। हि निश्चितम्। न विद्यते सिंहासनं यस्मिन् तत्, राज्यं राज्यस्वरूपम्। तद्वदेव महामोदकरत्वादिति भावः। नाम इत्यहं सम्भावयामीत्यर्थं अत्राधिक्याद्वैशिष्ट्यं रूपकम्।

महामोदजनकत्वमेव समर्थयति नेति। पूर्वं गणयन्तं द्यूतमिति पदद्वयमानेतव्यम्। तथा च द्यूतं कर्त्तृ, कुतश्चित् पणे धनहारणादिकारणात् पराभवं पराजयम्, न गणयति ग्राह्यमपि धनप्राचुर्यात् न मन्यते; अन्यत्र तु कुतश्चिदपि अन्यस्मात् पुरुषात्, पराभवं न गणयति आत्मनः प्रभावातिशयात् नानुभवति। तथा द्यूतम्,

মাথুর। (টানিতে লাগিল)

সংবাহক। মহাশয়রা! আমাকে রক্ষা করুন আমাকে রক্ষা করুন।

তদনন্তর দর্দুরকের প্রবেশ।

দর্দুরক। ওহে! পাশাটা লোকের পক্ষে সিংহাসনবিহীন রাজ্য।

কোন কারণবশতঃ পরাজয়কে গ্রাহ্য করে না; সর্ব্বদা ধনসমূহ

अपि च। द्रव्यं लब्धं द्यूतेनैव, दारा मित्रं द्यूतेनैव।
दत्तं भुक्तं द्यूतेनैव, सर्वं नष्टं द्यूतेनैव ॥८॥

नित्यं सर्वदा, अर्थजातं पणभूतधनसमूहम् हरति जित्वा विजितजनादानयति, ददाति च स्वयं विजितं सत् जेतृजनाय अर्पयति च। अन्यत्र तु नित्यम्, अर्थजातं धनसमूहम्, हरति प्रजाभ्यः कररूपेण गृह्णाति ; ददाति च सत्पात्रादिभ्यो वितरति च। अतएव विभववता धनिना जनेन, आयं जयेन धनागमं दर्शयतीति आयदर्शि द्यूतम्, आयं पश्यति स्वयमेव पर्यवेक्षत इति आयदर्शी नृपतिरिव, निकामं यथेष्टं यथा स्यात्तथा, समुपास्यते आश्रीयते सेव्यते च।

अत्र 'गणयति, हरति, ददाति' इत्यनेकक्रियाणामेककर्त्तृकारकत्वात् दीपकं पूर्णोपमा च ; अनयोर्गुणप्रधानभावेनाङ्गाङ्गिभावात् सङ्करः।

"आयदर्शी" इति द्यूतपक्षे क्लीवलिङ्गत्वात् ह्रस्व इकारः स्वीकार्यः। पुष्पिताग्रा वृत्तम् ॥७॥

द्रव्यमिति। द्यूतेनैव द्रव्यं धनं लब्धं मयेति शेषः। द्यूतेनैव दाराः कलत्रम् मित्रं सुहृच्च लब्धमिति पूर्वेणैवान्वयः ; धनलाभेन धनीभूय परिणयकरणात् तच्च न प्रातिलोम्येनैव लोकानां सौहृद्यप्राप्तेश्चेति भावः। द्यूतेनैव दत्तं दानं कृतम्, भुक्तं भोगश्च कृतः ; प्रचुरतरधनलाभादित्याशयः। तथा पुनर्द्यूतेनैव, सर्वं पैतृक-सम्पत्त्यादिकमपि नष्टम्, हारितम् [illegible]।

अत्र आयव्ययरूपयोर्विरूपयोर्ल्लाभनाशयोरेकत्र संघटनाद्विषमालङ्कारः। किन्तु "द्यूतेनैव" इति ह्रस्वस्यापि पादान्तस्थत्वेन गुरुत्वाङ्गीकारान्न हतवृत्ततादोषः। न च "यत्पादान्ते लघोरपि गुरुभाव उक्तः तत् सर्वत्र द्वितीयचतुर्थपादविषयम्। प्रथम-तृतीयपादविषयन्तु वसन्ततिलकादेरेव" इति साहित्यदर्पणोक्तेरत्र च आदिपदेन इन्द्र-

---

হরণও করে, দানও করে এবং সম্পত্তিশালী লোক, রাজার ন্যায় আয়-দর্শী পাশাকে যথেষ্ট সেবা করে ॥৭॥

আরও, আমি দ্যূতদ্বারাই ধন লাভ করিয়াছিলাম ; দ্যূত দ্বারাই

अपि च।

त्रेताहृतसर्वस्वः, पावर-पतनाच्च शोषितशरीरः।
नर्दित-दर्शितमार्गः, कटेन विनिपातितो यामि ॥९॥

वंशोपेन्द्रवज्रयोरिव ग्रहणात् अस्य च प्रथमतृतीयपादान्तस्थत्वात् हतवृत्ततादोष एवेति वाच्यम्, तादृशदर्शिभिः प्रमाणाभावात् "विरामस्थं गुरुत्वादन्त्यं विकल्पेन" इति सामान्याभिधानात्। एतच्च साहित्यदर्पणटीकायां हतवृत्तताप्रकरणे बहुधा समालोचितमस्माभिः। न वा "द्यूतेनैव" इत्यस्य वारं वारमभिधानात् अनवीकृतत्व दोष इत्यपि वाच्यम्, ईदृशविषये एकशब्दप्रयोगस्यैव चमत्कारजनकत्वात् शब्दान्तर-प्रयोगस्य तु तदभावादिति सुधीभिर्विभावनीयम्।

विद्युन्माला वृत्तम्—"मो मो गो गो विद्युन्माला" इति लक्षणात् ॥८॥

त्रेतेति। त्रेता "त्रि" इति यस्याः पतितया तत्पतनेनेत्यर्थः हृतं सर्वस्वं यस्य सः; पावरः "पोया" इति यस्य पतितया पतनाच्च शोषितं दासत्वपणस्यापि हरणात् दुश्चिन्तया शुष्कीकृतं शरीरं यस्य सः। नर्दितेन विजेतॄणामानन्दनृत्येन दर्शितो मार्गः अपसरणपथो यस्मै सः; तथा कटेन एतन्नाम्ना द्यूतकर्मणा दास्यामि इति शपथेन तद्दानासम्भवात् शपथभङ्गभीतेनेत्यर्थः, विनिपातितः पातकीकृतोऽपि प्रख्यापितः सन् यामि अनेन दुर्गया मुक्तत्वं गच्छामि।

"अपथे च क्रियाकारे किलिञ्जशवयोः कटः" इति त्रिकाण्डशेषः।

अत्र हारणकार्य्यस्य बहुतरकारणोपन्यासात् समुच्चयोऽलङ्कारः।

इदं द्यूतं तु इदानीं "तुरुनखेला" "फट्खेला" इत्यादिनाम्ना प्रचलतीति प्रतीयते। आर्य्या जातिः ॥९॥

ভার্য্যা ও মিত্র পাইয়াছিলাম; দ্যূতদ্বারাই দান ও ভোগ করিয়াছিলাম এবং দ্যূত দ্বারাই আবার সমস্ত নষ্ট করিয়াছি ॥৮॥

আরও, 'ত্রি' পড়ায় আমার সর্ব্বস্ব হরণ করিয়াছে, 'পোয়া' পড়ায় শরীর শুকাইয়া দিয়াছে; বিজেতাদিগের আনন্দনৃত্য, আমাকে অপ-

অগ্রতোঽবলোক্য। অয়মস্মাকং পূর্ব্বসভিকো মাথুর ইত এবাভিবর্ত্ততে। ভবতু; অপক্রমিতুং ন শক্যতে। তদবগুণ্ঠয়াম্যাত্মানম্। বহুবিধং নাট্যং কৃত্বা স্থিতঃ। উত্তরীয়ং নিরীক্ষ্য। (ম)

অয়ং পটঃ সূত্রদরিদ্রতাং গতো হ্যয়ং পটশ্ছিদ্রশতৈরলঙ্কৃতঃ।
অয়ং পটঃ প্রাবরিতুং ন শক্যতে হ্যয়ং পটঃ সংবৃত এব শোভতে॥১০

(ম) অগ্রত ইতি। পূর্ব্বসভিকঃ পূর্ব্বসভাধ্যক্ষঃ। অপক্রমিতুং পলায়িতুম্, ন শক্যতে, সন্নিহিতত্বাদিতি ভাবঃ। অবগুণ্ঠয়ামি উত্তরীয়বস্ত্রেণাবৃণোমি।

অয়মিতি। অয়ং পটঃ উত্তরীয়বস্ত্রম, সূত্রদরিদ্রতাং তন্তুহীনতাং গতঃ প্রাপ্তঃ, অত্যন্তপুরাতনত্বেন সূত্রাণাং স্খলনাদিতি ভাবঃ। অয়ং পটঃ, ছিদ্রশতৈরলঙ্কৃতঃ, অতীবজীর্ণত্বাদিত্যাশয়ঃ। অয়ং পটঃ, প্রাবরিতুং দেহমাচ্ছাদয়িতুং ন শক্যতে, ন শক্নোতি বৃহদ্বহুচ্ছিদ্রপূর্ণত্বেন প্রায়েণৈবাঙ্গানাং প্রকাশসম্ভবাদিত্যভিপ্রায়ঃ। অতএব অয়ং পটঃ, সংবৃত এব সঙ্কুচিতঃ স্থিত এব শোভতে।

অস্য বক্তুর্দ্দর্দুরকস্য কদাচিৎ শকারবদুচ্ছৃঙ্খলভাষিত্বাৎ ঈদৃশপাঠস্য বৃত্তসম্ভাবেন সম্ভবাচ্চ "অয়ং পটঃ" ইত্যস্য বারং বারমভিধানেঽপি ন অনবীকৃতত্বদোষঃ, নবা হি শব্দদ্বয়স্য বৃত্তিপূরণমাত্রার্থত্বেঽপি নিরর্থকত্বদোষশ্চেতি দিক্।

শক্যতে ইতি দৈবাদিকস্য উভয়পদিনঃ শকধাতোঃ প্রয়োগঃ।

বংশস্থবিলং বৃত্তম্॥১০॥

মরণের পথ দেখাইয়া দিয়াছে এবং প্রতিজ্ঞাভঙ্গ, আমাকে অধঃপাতিত" করিয়াছে ; আমি এই অবস্থায় চলিয়াছি॥৯॥

(সম্মুখে দৃষ্টিপাত করিয়া) এই আমাদের পূর্ব্ববর্ত্তী সভাধ্যক্ষ মাথুর, এই দিকেই আসিতেছে। হউক; পলাইতে পারিব না। অতএব উত্তরীয় বসন দ্বারা আপনাকে আবৃত করি। (নানারূপ অভিনয় করিয়া অবস্থান করিল। পরে উত্তরীয় বসন দেখিয়া)

এই বস্ত্র—সূত্রবিহীন; এই বস্ত্র শত ছিদ্রে শোভিত; সুতরাং

अथवा किमयं तपस्वी करिष्यति (म)। यो हि—

पादेनैकेन गगने द्वितीयेन च भूतले।
तिष्ठाम्युल्लम्बितस्तावद् यावत्तिष्ठति भास्करः ॥११॥

माथुरः। देहि देहि। (१) (य)

संवा। कुदो दइस्सं। (र)

(य) देहि देहि। (र) कुतो दास्यामि ?।

(म) उत्तरूपेण पटेन देहमावृत्य प्रच्छन्नभावेनावस्थानमसम्भावयन्नाह अथवेति। अवगुण्ठनाभावेऽपीत्यर्थः। तपस्वी क्षुद्रः, अयं माथुरः किं करिष्यति परिचयं प्राप्यापि मयीति शेषः, न किमपीत्यर्थः। यः अहम्।

पादेनेति। एकेन पादेन गगने, द्वितीयेन च पादेन भूतले, उल्लम्बित ऊर्द्ध्वलम्बितदेहः सन्, तावत् तिष्ठामि स्थातुं शक्नोमि; भास्करः सूर्यो यावत्तिष्ठति। तथा च अयं माथुर आगत्य तं छादितपटं प्रायमन्नप्राप्य यदि एकं चरणमाकाशे अपरञ्च भूतले यावत् सम्भवं प्रसार्य्य स्थातुमादिशेत्, तथापि तथैव भावेन सूर्य्यास्तमयपर्य्यन्तमेव स्थातुमहं शक्नोमि; ततोऽधिककालं न किमपि कष्टं शक्नुयादिति मम परिचयप्राप्तावपि किं भयमिति भावार्थः। स्वरब्धाच ॥११॥

এই বস্ত্র, দেহ আবরণ করিতে সমর্থ হইবে না; অতএব এই বস্ত্র, সঙ্কুচিত (গুটান, ঘোচান) থাকিলেই শোভা পাইবে ॥১০॥

অথবা এই ক্ষুদ্র বেটা আমার কি করিবে ?।

যে আমি এক পা আকাশে দিয়া, আর এক পা ভূতলে রাখিয়া, যে পর্য্যন্ত সূর্য্য থাকিবে, সেই পর্য্যন্তই ঝুলিয়া থাকিতে পারি ॥১১॥

মাথুর। দে, দে।

সংবাহক। কোথা হইতে দিব।

(१) दापय दापय।

माथुरः । कर्षति ।

दर्दु । अये ! किमेतदग्रतः । आकाशे । किं भवानाह—"अयं द्यूतकरः सभिकेन खलीक्रियते , न कश्चिन्मोचयति" इति ? । नन्वयं दर्दुरो मोचयति । उपसृत्य । अन्तरमन्तरम् । दृष्ट्वा । अये ! कथं माथुरो धूर्त्तः, अयमपि तपस्वी संवाहकः । (ल)

य: स्तब्धं दिवसान्तमानतशिरा नास्ते समुल्लम्बितो
यस्योद्घर्षणलोष्टकैरपि सदा पृष्ठे न जातः किणः ।

(ल) दर्दु इति । अये इति दर्शकविशेषसम्बोधनम् । अग्रतः सम्मुखे , एतत् जनसम्मर्द्दघटनम् , किं कथं जातमिति शेषः । खलीक्रियते हारितपण-ग्रहणार्थम् आक्रोशाधमः क्रियते आबद्धीक्रियते इत्यर्थः । मोचयति तं पणं दत्त्वा उद्धारयति । अन्तरम् अभ्यन्तरप्रवेशाय अवकाशः, दीयतामिति शेषः । वीप्सायां द्विरुक्तिः । एतेन महान् जनसम्मर्द्दः प्रतीयते । तपस्वी दीनः ।

'खलं भूस्थानकल्केषु क्रूरे नीचेऽधमे खलः' इति विश्वः ।

य इति । यो जनः समुल्लम्बित एकं चरणमाकाशे अपरञ्च भूतले यावत्-सम्भवं प्रसार्य्य ऊर्द्ध्वात् लम्बितदेहः, अतएव आनतशिरा अवनतमस्तकः सन्,

মাথুর । (ধরিয়া টানিতে লাগিল)

দর্দুরক । ওহে ! সম্মুখে এ ব্যাপারটা কি ? । (শূন্যে) আপনি কি বলিলেন? "সভাধ্যক্ষ এই দ্যূতকরকে আবদ্ধ করিতেছে; কিন্তু কেহই উহাকে মুক্ত করিতেছে না" এই কথা বলিলেন ? । ওহে ! এই দর্দুরক মুক্ত করিতেছে । (নিকটে যাইয়া) একটু অবকাশ দিন, একটু অবকাশ দিন দেখিয়া) ও ! ধূর্ত্ত মাথুর , এও সেই ক্ষুদ্র সংবাহক ।

যে লোক, দিবসের শেষ পর্য্যন্ত অবনতমস্তকে ঝুলিয়া নিশ্চলভাবে

यस्यैतच्च (१) न कुक्कुरैरहरहर्जङ्घान्तरं चर्व्यते
तस्यात्यायतकोमलस्य सततं द्यूतप्रसङ्गेन किम् ॥१२॥

दिवसान्तं दिवावसानपर्य्यन्तम्, स्वस्थं निश्चलं यथा स्यात्तथा, आस्ते न अवतिष्ठते अहमिव अवस्थातुं न शक्नोतीत्यर्थः। उद्घृष्यन्ते दृढसूच्यग्रतया विदार्य्यन्ते यैरिति उद्घर्षणानि यानि लोष्टकानि वेदनाकरत्वेन कुत्सितानि मृत्पाषाणखण्डानि तैरपि पणप्रदानार्थं तन्निक्षेपैरपीत्यर्थः, यस्य जनस्य पृष्ठे, सदा किणश्चिह्नम्, न जातः सभिकैरिति भावः। यस्य च जनस्य, सभिकैरित्याशयः, दृश्यमानम्, जङ्घाया अन्तरं मध्यभागः, अहरहः प्रत्यहम्, कुक्कुरैः सभिकप्रेरितैरित्यर्थः, न चर्व्यते; उक्तरूपसमुल्लम्बितभावेनावस्थानकाले इति भावः। सततम् अत्यायतः अतीवदीर्घदेहः दीर्घदेहत्वादेव उक्तभावेनावस्थातुमशक्त इत्यर्थः कोमलो मृदुलदेहः कोमलदेहत्वादेव उक्तविधकष्टासहिष्णुरित्यर्थः तस्य, तस्य जनस्य, द्यूतप्रसङ्गेन अक्षक्रीडाव्यापारेण, किं प्रयोजनम्, अपि तु किमपि नेत्यर्थः; तस्य विडम्बनामात्रमेव द्यूतमिति ईदृशकष्टासहिष्णोः संवाहकस्यापि द्यूतं विडम्बनमेवेति भावः।

अत्र अप्रस्तुतजनसामान्याभिधानात् प्रस्तुतसंवाहकरूपजनविशेषप्रतीतेरप्रस्तुतप्रशंसालङ्कारः। तेन च संवाहकापेक्षया आत्मनो दर्दुरस्य तादृशकष्टसहिष्णुताप्रत्यायनात् व्यतिरेकालङ्कारो व्यज्यत इत्यलङ्कारेणालङ्कारध्वनिः।

'लोष्टानि लेष्टवः पुंसि' 'कौलेयकः सारमेयः कुक्कुरो मृगदंशकः" इति च अमरः। लोष्टकैरिति कुत्सायां कप्रत्ययः।

शार्दूलविक्रीडितं वृत्तम् ॥१२॥

থাকিতে না পারে; যাহার পৃষ্ঠে সর্ব্বদা তীক্ষ্ণাগ্র লোষ্ট্র নিক্ষেপ করায়ও চিহ্ন জন্মে নাই এবং কুর্কুরে যাহার এই উরুদেশকে প্রত্যহ চর্ব্বণ করে না, সর্ব্বদা অত্যন্ত দীর্ঘ ও কোমলদেহ সেই লোকের পাশাখেলায় প্রয়োজন কি? ॥১২॥

(१) तस्यैतच्च।

भवतु ; माथुरं तावत् सान्त्वयामि। उपगम्य। माथुर ! अभि-वादये।

माथुरः। प्रत्यभिवादयते।

दर्दु। किमेतत् ?।

माथुरः। अअं दशसुवण्णं धालेदि। (व)

दर्दु। ननु काल्यवर्त्तमेतत्। (श)

वसन्ततिलका वृत्तम्॥३॥

(ङ) चारु इति। भावो विद्वांश्चासौ रेभिलश्चेति तेन। "भावो विद्वान्" इत्यमरः।

(च) विदू इति। द्वाभ्यां काभ्यामित्याह स्त्रिया इति। मनुष्येण पुरुषेण,

লোক বিলম্ব করিতে লাগিলে, চিত্ত-বিনোদনের প্রধান উপায়; বিরহার্ত্তদিগের ধৈর্য্যকারিণী প্রিয়তমাস্বরূপ এবং অনুরক্ত লোকের অনুরাগবৃদ্ধিকারক আমোদের হেতু ॥৩॥

বিদূষক। সখে! আসুন, বাড়ী যাই।

চারুদত্ত। আশ্চর্য্য! বিদ্বান্ রেভিল বেশ্ গাহিয়াছেন।

বিদূষক। আমার কিন্তু দুই কারণেই হাস্য জন্মে—(এক) স্ত্রীলোকে

चारु । वयस्य ! सुष्ठु खल्वद्य गीतं भाव-रेभिलेन । न च भवान् परितुष्टः ? । (क)

रक्तञ्च नाम मधुरञ्च समं स्फुटञ्च
भावान्वितञ्च ललितञ्च मनोहरञ्च ।

दत्त-नव-नास्या इव गृष्टिः, अधिकं सुसूयते, मनुष्योऽपि काकलीं गायन् शुष्क-सुमनो-दाम-वेष्टितो वृद्धपुरोहित इव मन्त्रं जपन्, दृढं मे न रोचते ।

काकलीं सूक्ष्ममधुरध्वनिम्, गायता गानं कुर्वता आविष्कुर्वता । नन्वीदृशभावे को दोषः, येन तव हास्यं जायत इत्याह स्त्रीति । दत्ता नवा नूतना नास्या नासिकारज्जुर्यस्याः सा तादृशी, गृष्टिरेकवारप्रसूता गौरिव । सुसूयते 'सु सु' इत्येवं शब्दं करोति कण्ड्वादित्वात् यक् । इदमस्वाभाविकमित्यतो मे हास्यं जायत इति भावः । शुष्कया सुमनसां पुष्पाणां दाम्ना मालया वेष्टितः परिहितग्रीवः । पुष्पाणां शुष्कतया तद्वेष्टितस्य श्रविकारत्वम्; तथा वार्द्धक्येन पतितदन्ततया विकृतस्वरत्वम्, एवञ्च तादृशपुरोहितस्य तथाविधस्वरेण मन्त्रजपेन विकृतत्वाद् यथा हास्यं जायते, तथा पुरुषस्यापि स्त्रीयोग्यकाकलीगानेन विकृतत्वादेव हास्यं जायत इति भावः ।

(क) चारु इति । परितुष्ट इति काकुः, न परितुष्टः किमित्यर्थः ।

সংস্কৃত পাঠ করে; (দ্বিতীয়) পুরুষে সূক্ষ্মস্বরে গান করে। নাসিকাতে রজ্জু নূতন যোজিত হইলে ধেনুর মত, স্ত্রীলোক সংস্কৃত পাঠ করিবার কালে অত্যন্ত 'সু সু' করে। আর শুষ্ক পুষ্পমাল্যে বেষ্টিত মন্ত্রজপকারী বৃদ্ধ পুরোহিতের ন্যায় সূক্ষ্মস্বরে গানকারী পুরুষ, আমার বেশী ভাল লাগে না।

চারুদত্ত। বয়স্য! বিদ্বান্ রেভিল আজ ভালই গাহিয়াছেন। তুমি সন্তুষ্ট হও নাই কি?।

किंवा प्रशस्तवचनैर्बहुभिर्मदुक्तैः
अन्तर्हिता यदि भवेद्वनितेति मन्ये ॥ ৪ ॥

अपि च ।

तं तस्य स्वरसंक्रमं, मृदुगिरः, श्लिष्टञ्च तन्त्रीस्वनं,
वर्णानामपि मूर्च्छनान्तरगतं तारं, विरामे मृदुम् ।

रक्तञ्चेति । रक्तञ्च स्वश्रवणे लोकानामनुरागजनकञ्च, मधुरं सुश्रावञ्च, समम् पूर्वापरयोरुपयुक्तस्वरञ्च, स्फुटं स्पष्टाक्षरञ्च, भावान्वितं सुन्दरभावयुक्तञ्च, ललितं कोमलञ्च, मनोहरं हृदयाकर्षकञ्च, गीतमिति गद्यस्थेन सम्बध्यते । नाम इति स्वीकारोक्तावित्यर्थः । वा अथवा, मदुक्तैः बहुभिः प्रशस्तवचनैः प्रशंसावाक्यैः किं फलम् ? अपितु, न किञ्चिदित्यर्थः । यदीति वितर्के । तथा च वनिता काचित् स्त्री, अन्तर्हिता रेभिलरूपपुरुषवेशेन प्रच्छन्ना, भवेदिति, यदि वितर्क्य, मन्ये सम्भावयामि ; कथमन्यथा स्त्रीवद्धैदं पुरुषस्य गानं पुष्यमिति भावः ।

अत्र गानोत्कर्षं प्रति रक्तत्वादिबहुतरकारणोपन्यासात् समुच्चयोऽलङ्कारः, 'मन्ये' इति शब्दप्रयोगात् वाच्या भावाभिमानिनी जात्युत्प्रेक्षा च, अनयोरङ्गाङ्गिभावेन सङ्करः ।

"नाम प्राकाश्यसम्भाव्यक्रोधाभ्युपगमेषु च" इति विश्वः । "यदि गर्हावितर्कयोः" इति मेदिनी । वसन्ततिलका वृत्तम् ॥ ৪ ॥

तमिति । गीतसमये विरतेऽपि गानकाले अतीतेऽपि, वर्णानां गानाक्षराणां या मूर्च्छना स्वराणामारोहावरोहस्तदन्तरगतं तन्मध्यावर्त्तिनम्, तारं विशालीभूतम्, अपि

সেই গান অনুরাগজনক, মধুর, পূর্ব্বাপর সমান, সুস্পষ্ট, ভাবযুক্ত, কোমল এবং চিত্তাকর্ষক। আমার বহুতর প্রশংসাবাক্য বলায় প্রয়োজন কি ? আমি তর্ক করিয়া মনে করি যে, কোন স্ত্রীলোক রেভিলরূপে প্রচ্ছন্ন থাকিয়া ঐ গান করিয়াছে ॥৪॥

हेलासंयमितं पुनश्च ललितं रागद्विरुच्चारितं
यत्सत्यं विरतेऽपि गीतसमये गच्छामि शृण्वन्निव ॥ ५ ॥

विदू । भो वअस्स ! आवणन्तर-रच्छा-विभाएसु सुहं कुक्कुरा वि सुत्ता । ता गेहं गच्छम्ह । अग्रतोऽवलोक्य । वअस्स !

(ज) भो वयस्य ! आपणान्तर-रथ्या-विभागेषु सुखं कुक्कुरा अपि

तथा, विरामे अवसाने मृदु सुप्तम्, हेलया अवलीलया संयमितमवरुद्धम्, पुनश्च ललितं कौशलं कोमलभावेन पुनश्च आविष्कृतम्, रागे वसन्तादिरागप्रकाशसमये द्विरुच्चारितं वारद्वयेनाविष्कृतम्, तस्य रेभिलस्य, तं श्रुतपूर्वम्, स्वराणां निषादादीनां संक्रमं परम्पराम्, मृदुगिरः कोमलवाक्यानि, श्लिष्टं गीतेन सह सुसंलग्नम्, तन्त्रीस्वनं वीणातन्त्रीणां निनादञ्च, शृण्वन्निव गच्छामि इति यत्सत्यं यथार्थम् अतएव सर्वथा मञ्जु गेयं तेनेति भावः ।

अत्रापि गानोत्कर्षं प्रति तारत्वादिबहुतरकारणोपन्यासात् समुच्चयः, वाच्या भावाभिमानिनो क्रियोत्प्रेक्षा च ; अनयोरङ्गाङ्गिभावेन सङ्करः । तथा एकवचनान्तपद-समुदायमध्ये "मृदुगिरः" इति बहुवचनप्रयोगात् भग्नप्रक्रमतादोषः, स तु मृदुगिरमिति पाठेनैव समाधेयः ।

मूर्च्छनामाह सङ्गीतदामोदरे—

"क्रमात् स्वराणां सप्तानामारोहश्चावरोहणम् ।
सा मूर्च्छेत्युच्यते ग्रामस्था एताः सप्त सप्त च ॥"

शार्दूलविक्रीडितं वृत्तम् ॥ ५ ॥

(झ) विदू इति । आपणान्तरे हट्टाभ्यन्तरे या रथ्या तस्याः विभागेषु अंशविशेषेषु

আর, গানের সময় অতীত হইলেও, গানাক্ষরের মূর্চ্ছনার মধ্যে উচ্চ, অবসানে কোমল, অবলীলাক্রমে অবরুদ্ধ, রাগের সময় দুইবার উচ্চারিত স্বরলহরী, কোমল বাক্য এবং সুসংলগ্ন বীণাতন্ত্রীর শব্দ,—এই সকল যেন আমি শুনিতে শুনিতে যাইতেছি ॥৫॥

বিদূষক। বয়স্য! হাটের ভিতরে রাস্তার একদিকে কুকুরগুলিও

पेक्ख पेक्ख; एसो वि अन्धआरस्स विअ अवआसं देन्तो, अन्तरिक्खपासादादो ओदरदि भअवं चन्दो। (ज)

चारु। सम्यगाह भवान्।

असौ हि दत्त्वा तिमिरावकाशमस्तं व्रजत्युन्नतकोटिरिन्दुः।
जलावगाढस्य वनद्विपस्य तीक्ष्णं विषाणाग्रमिवावशिष्टम्॥ ६॥

सुप्ताः। तद्गृहं गच्छामः। वयस्य! प्रेक्षस्व प्रेक्षस्व, एषोऽपि अन्धकारस्येव अवकाशं ददत् अन्तरिक्षप्रासादात् अवतरति भगवान् चन्द्रः।

कुक्कुरा अपि मन्ये सुप्ताः निद्रिताः; सुतरां गलिरथ्यका सञ्चारोऽति भावः। अवकाशं प्रसरणस्थानम्। अन्तरिक्षमाकाशमेव प्रासादः निरन्तरं गतागमस्थानत्वाद्धट्टालिका तस्मात्। अत उत्प्रेक्षानिरङ्गकेवलरूपकयोरङ्गाङ्गिभावेन सङ्करः।

असाविति। हि यस्मात्, उन्नता कोटिरग्रदेशो यस्य सः, अत एव जले अवगाढस्य मग्नस्य, वनद्विपस्य वन्यहस्तिनः, अवशिष्टं जलमग्नादवशिष्टम्, तीक्ष्णं सूक्ष्मम् विषाणाग्रमिव दन्ताग्रभाग इव, असौ दृश्यमानः, इन्दुश्चन्द्रः, तिमिरावकाशम् अन्धकारस्य प्रसरणस्थानम् दत्त्वा, अस्तं व्रजति।

अत्र श्रौती उपमालङ्कारः। उपजातिर्वृत्तम्॥ ६॥ नाहि यात १८ अप्रैल २५ ३ ३ भवा

সুখে নিদ্রা যাইতেছে। অতএব আমরা বাটী যাই। সখে! দেখ দেখ ভগবান্ এই চন্দ্রও, অন্ধকারকে যেন বিস্তৃত হইবার স্থান দিয়া, আকাশ-হর্ম্ম্য হইতে অবতীর্ণ হইতেছেন।

চারুদত্ত। তুমি ঠিক্ বলিয়াছ।

কারণ, জলমগ্ন বন্য হস্তীর মগ্নাবশিষ্ট তীক্ষ্ণ দন্তাগ্রের ন্যায়, উন্নতাগ্র ঐ চন্দ্র, অন্ধকারকে বিস্তৃত হইবার স্থান দিয়া, অস্ত যাইতেছেন॥৬॥

বিদূ। ভো! এদং অম্হাণং গেহং। বড্ঢমাণঅ! বড্ঢমাণঅ! উগ্ঘাটেহি দুআরঅং। [ক]

চেটঃ। অজ্জমিত্তেআহ শল-শজ্জোএ শুণীঅদি। আগদে অজ্জচালুদত্তে। তা জাব দুআলঅং শে উগ্ঘাটেমি। তথা কৃত্বা। অজ্জ বন্দামি, মিত্তেঅ! তুমং পি বন্দামি। এত্থ বিত্থিণ্ণে আশণে নিশীদন্তু অজ্জা। [খ]

উভৌ নাট্যেন প্রবিশ্য উপবিশতঃ।

(ক) ভোঃ! ইদমস্মাকং গৃহম্। বর্দ্ধমানক! বর্দ্ধমানক! উদ্ঘাটয় দ্বারকম্।

(খ) আর্য্যমৈত্রেয়স্য স্বরসংযোগঃ শ্রূয়তে। আগত আর্য্যচারুদত্ত তদ্যাবত্ দ্বারমস্য উদ্ঘাটয়ামি। আর্য্য! বন্দে, আর্য্যমৈত্রেয়' ত্বামপি বন্দে। অত্র বিস্তীর্ণে আসনে, নিষীদতমার্য্যৌ।

(ক) বিদূ ইতি। স্বরসংযোগঃ কণ্ঠধ্বনিসম্বন্ধঃ, শ্রূয়তে কর্ণে অনুভূয়তে। আসনে আসনদ্বয়ম্, নিষীদতম্ উপবিশতম্।

বিদূষক। বয়স্য! এই আমাদের বাড়ী। বর্দ্ধমান! বর্দ্ধমান! দ্বার উদ্ঘাটন কর।

ভৃত্য। আর্য্যমৈত্রেয়ের স্বর শুনিতেছি; সুতরাং আর্য্য-চারুদত্ত আসিয়াছেন; অতএব উঁহার জন্য দ্বার উদ্ঘাটন করি। (তাহা করিয়া) আর্য্য! প্রণাম, মৈত্রেয়! আপনাকেও প্রণাম। এই আসন দুই খানি বিস্তৃত আছে; ইহাতে আপনারা উপবেশন করুন।

চারুদত্ত ও বিদূষক অভিনয় অনুসারে প্রবেশ করিয়া উপবেশন করিলেন।

विदू। वड्ढमाणम्र! रदणिम्रं सद्दावेहि पादाइं धोइदुं। [ट]

चारु। सानुकम्पम्। अलं सुप्तजनं प्रबोधयितुम्। [ठ]

चेटः। अज्जमित्तेअ! अहं पाणिअं गेण्हे, तुमं पादाइं धोवेहि। [ड]

विदू। सक्रोधम्। भो वअस्स! एसो दाणिं दासीए पुत्तो भविअ पाणिअं गेण्हेदि, मं उण बम्हणं पादाइं धोवावेदि। [ढ]

(ट) वर्द्धमानक! रदनिकां आह्वापय पादौ धावितुम्!

(ड) आर्य्यमैत्रेय! अहं पानीयं गृह्णामि, त्वं पादौ धाव।

(ढ) भोः वयस्य! एष इदानीं दास्याः पुत्रो भूत्वा पानीयं गृह्णाति, मां पुनर्ब्राह्मणं पादौ धावयति।

(ट) विदू इति। अह्वापय आह्वय। धावितुं शोधयितुं प्रचालयितुमित्यर्थः।

(ठ) चारु इति। सुप्तजनं निद्रितलोकम्, प्रबोधयितुं जागरयितुं चेष्टया; अलमित्यर्थः। तस्या अशान्तिसम्भवात् तन्निषेधार्थेति भावः। एतेन चारुदत्तस्य सुविवेचकत्वं व्यज्यते।

(ड) चेट इति। पानीयं पानीयपात्रम्। धाव करघर्षणेन प्रक्षालय।

(ढ) विदू इति। मामिति प्रयोज्यं कर्त्तृ, कर्म्मतां प्राप्तम्, धावयतीत्यस्य ईलिन-

---

বিদূষক। বর্দ্ধমান! পা ধোয়াইবার জন্য রদনিকাকে ডাক।

চারুদত্ত। (দয়ার সহিত) নিদ্রিত লোককে জাগাইবার প্রয়োজন নাই।

ভৃত্য। আর্য্যমৈত্রেয়! আমি জল লইতেছি, আপনি পাদপ্রক্ষালন করুন।

বিদূষক। (ক্রোধের সহিত) বয়স্য! এ বেটা দাসীর পুত্র হইয়া

चारु। वयस्य! मैत्रेय! त्वमुदकं गृहाण, वर्द्धमानकः पादौ प्रक्षालयतु। [ण]

चेटः। अज्जमित्तेअ! देहि उदअं। [त]

विदूषकस्तथा करोति। चेटश्चारुदत्तस्य पादौ प्रक्षाल्यापसरति। (थ)

चारु। दीयतां ब्राह्मणस्य पादोदकम्।

विदू। किं मम पादोदएहिं; भूमीए ज्जेव मए ताड़िदगद्दहेण विअ पुणोवि लोट्टिदव्वं। [द]

(त) आर्य्यमैत्रेय! देहि उदकम्।

(द) किं मम पादोदकैः; भूम्यामेव मया ताड़ितगर्द्दभेनेव पुनरपि लोठितव्यम्।

त्वात्। तथा च पादप्रक्षालनव्यापारे उदकधारणापेक्षया हस्तेन पादघर्षणस्य निकृष्टकार्य्यतया मय्येव भृत्यकर्त्तव्यत्वमुचितम्; किन्त्वत्र तद्विपरीतमभिधाय मामयम-पमानितवानिति भावः।

(ण) चारु इति। प्रक्षालयतु करघर्षणेन परिशोधयतु। एवं कृते तवापमानः परिहृतो भवतीति भावः।

(थ) विदू इति। तथा करोति वर्द्धमानकहस्ते उदकं ददाति अपसरणन्तु कौतुककरणार्थम्।

এখন জল ধরিবে, আর আমি ব্রাহ্মণ; আমাকে দিয়া পা ধোয়াবে।

চারুদত্ত। সখে! মৈত্রেয়! তুমি জল ধর, বর্দ্ধমান পা ধোয়াউক।

ভৃত্য। আর্য্যমৈত্রেয়! জল দাও।

বিদূষক বর্দ্ধমানের হস্তে জলপাত্র দিল। ভৃত্য চারুদত্তের পা ধোয়াইয়া সরিয়া গেল।

চারুদত্ত। ব্রাহ্মণের পা ধোয়ার জল দে।

चेटः। अज्जमित्तेअ! बम्हणो क्खु तुमं। [ध]

विदू। जधा सव्वणागाणं मज्झे डुण्डुहो, तधा सव्वबम्हणाणं मज्झे अहं बम्हणो। [न]

चेटः। अज्जमित्तेअ! तधावि धोइस्सं। तथा कृत्वा। अज्जमित्तेअ! एदं तं सुवण्णभण्डअं मम दिवा, तुह रत्तिं च। ता गेण्ह। इति दत्त्वा निष्क्रान्तः। [प]

(ध) आर्य्यमैत्रेय! ब्राह्मणः खलु त्वम्।

(न) यथा सर्वनागानां मध्ये डुण्डुभः, तथा सर्वब्राह्मणानां मध्ये अहं ब्राह्मणः।

(प) आर्य्यमैत्रेय! तथापि धाविष्यामि। आर्य्यमैत्रेय! एतत् तत् सुवर्णभाण्डम् मम दिवा तव रात्रौ च, तद्गृहाण।

(द) विदू इति। भुव्यामेव; धूलिपूर्णपादेन शय्यारोहणं तस्या मलिनत्वसम्भवादिति भावः। निर्वेदादुक्तिरियम्।

(ध) चेट इति। ब्राह्मणः खलु त्वम्, अतस्तव पादौ भुवमेव प्रक्षालयामीति वाक्यशेषः।

(न) विदू इति। डुण्डुभो विषविहीनः सर्पविशेषः (ঢোঁড়া সাপ इति वङ्गे प्रसिद्धिः)। अहं ब्राह्मणः,--ब्रह्मतेजोविहीन इति भावः।

(प) चेट इति। तव च रात्रौ, रक्षितव्यमिति नियम आसीदिति शेषः।

বিদূষক। আমার পা ধোয়ার জল দিয়া দরকার কি? আমি তাড়িত গাধার মত, আবারও মাটীতে পড়িয়া গড়াই।

ভৃত্য। আর্য্যমৈত্রেয়! আপনি যে ব্রাহ্মণ।

বিদূষক। সকল সাপের মধ্যে যেমন ঢোঁড়াসাপ, তেমন সকল ব্রাহ্মণের মধ্যে আমি ব্রাহ্মণ।

ভৃত্য। আর্য্যমৈত্রেয়! তথাপি ধোয়াইব। (তাহা করিয়া)

বিদূ। গৃহীত্বা। অজ্জ বি এদং চিঠ্ঠদি। কিং এত্থ উজ্জইণীএ চোরো বি ণত্থি, জো এদং দাসীএ পুত্তং ণিদ্দাচোরং ণ অবহরদি। ভো বঅস্স! অব্ভন্তর-চতুস্সালং পবেসআমি ণং [ফ]

চারু। অলং চতুঃশালমিমং প্রবেশ্য,
প্রকাশনারীধৃত এষ যস্মাৎ।
তস্মাৎ স্বয়ং ধারয় বিপ্র! তাবৎ,
যাবন্ন তস্যাঃ খলু ভোঃ সমর্প্যতে ॥৩॥

(ফ) অদ্যাপি এতৎ তিষ্ঠতি? কিমত্র উজ্জয়িন্যাং চৌরোঽপি নাস্তি? য এতং দাস্যাঃ পুত্রং নিদ্রাচৌরং নাপহরতি। ভো বয়স্য! অভ্যন্তর-চতুঃশালকং প্রবেশয়ামি এনম্।

(ফ) বিদূ ইতি। দাস্যাঃ পুত্রমিত্যধিক্ষেপে। নিদ্রায়াশ্চৌরমপহারকং নিবর্ত্তক-মিত্যর্থঃ। অস্য রক্ষণার্থং সাবধানতাবলম্বনেন নিদ্রা নায়াতীতি ভাবঃ। এনম্ অলঙ্কারম্, প্রবেশয়ামি; চৌরেভ্যো গোপনার্থমিতি ভাবঃ।

অলমিতি। ইমমলঙ্কারম্, চতুঃশালং প্রবেশ্য চৌরেভ্যো গোপনার্থং নীত্বা, অলং চতুঃশালং মা প্রবেশয়েত্যর্থঃ। যস্মাৎ, এষঃ অলঙ্কারঃ, প্রকাশনার্য্যা সর্ব্বত্রৈবাত্ম-প্রকাশকারিণ্যা বেশ্যয়া ধৃতঃ। তথা চ অস্য বহুমূল্যতাগোপনার্থমেব অভ্যন্তরে গোপনং তথাভিপ্রেতম্; কিন্তু সর্ব্বত্রাত্মপ্রকাশকারিণ্যা বেশ্যয়া ধৃততয়া সর্ব্বেষামেব দর্শনেন

আর্য্যমৈত্রেয়! এই সেই স্বর্ণালঙ্কার, আমার দিনে আপনার রাত্রিতে (ইহা রক্ষা করিবার নিয়ম ছিল)। অতএব গ্রহণ করুন।

বিদূষক। (গ্রহণ করিয়া) আজও, ইহা আছে! এই উজ্জয়িনীতে কি চোরও নাই? যে এই নিন্দিত ও নিদ্রানাশক অলঙ্কার অপহরণ করিতেছে না। বয়স্য! ভিতরের চতুঃশালাতে ইহাকে প্রবেশ করাই।

চারুদত্ত। ইহাকে চতুঃশালায় প্রবেশ করাইবার প্রয়োজন নাই;

निद्रां नाटयन् 'तं तस्य स्वरसंक्रमम्' इति पुनः पठति ।

विदू । अवि णिद्दाअदि भवं । (ख)

चारु । अथकिम् ?

इयं हि निद्रा नयनावलम्बिनी ललाटदेशादुपसर्पतीव माम् ।
अदृश्यरूपा चपला जरेव या मनुष्यसत्त्वं परिभूय वर्द्धते ॥८॥

(ख) अपि निद्राति भवान् ? ।

मूल्यज्ञानात् अत निक्षेपस्य च सर्वैरेव ज्ञातत्वात् निरर्थकमेव अभ्यन्तरे गोपनमिति भावः । तस्मात्, भो विप्र ! तावत् स्वयमेव धारय, यावत् तस्या वसन्तसेनायाः समीपे न खलु समर्प्यते ।

अत्र प्रथमार्द्धे उपेन्द्रवज्रा, तृतीयपादे इन्द्रवज्रा, चतुर्थपादे च इन्द्रवंशा इत्थं तेषां मिश्रनादुपजातिर्नाम । तथा च—

'अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ।
इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम ॥७॥

इयमिति । हि तथाहि । नयनावलम्बिनी इयं निद्रा, ललाटदेशात् माम् उपसर्पतीव उपगच्छतीव । अदृश्यरूपा अप्रत्यक्षाकृतिः, चपला चञ्चला अचिरस्थायिनीत्यर्थः, जरा वार्द्धक्यमिव, या निद्रा, मनुष्याणां प्राणिनामिति तात्पर्य्यम्, सत्त्वं बलं चैतन्यशक्तिञ्च, अभिभूय विलोप्य वर्द्धते ।

যেহেতু, এই অলঙ্কার প্রকাশ নারী (বেশ্যা) কর্ত্তৃক ধৃত হইয়াছিল। অতএব হে ব্রাহ্মণ! তুমি নিজেই ইহা রাখ; যে পর্য্যন্ত তাহার নিকট সমর্পণ না করি ॥৭॥

(নিদ্রা'ভিনয় করিতে করিতে "তং তস্য স্বরসংক্রমং' ইত্যাদি শ্লোক পুনরায়পাঠ করিলেন)

বিদূষক। আপনি নিদ্রিত হইতেছেন কি ?।

চারুদত্ত। হাঁ।

নয়নাবলম্বিনী এই নিদ্রা, ললাটদেশ হইতে যেন আমার নিকট

বিদূ। তা সুবেম্ম। নাট্যেন স্বপিতি। (ভ)

ততঃ প্রবিশতি শর্ব্বিলকঃ। (ম)

শর্ব্বি। কৃত্বা শরীর-পরিণাহ-সুখপ্রবেশং
শিক্ষাবলেন চ বলেন চ কর্ম্মমার্গম্।

(ভ) তৎ স্বপিবঃ।

অত্র পূর্ব্বার্দ্ধে ক্রিয়োৎপ্রেক্ষা, পরার্দ্ধে চ পূর্ণোপমা, অনয়োঃ পরস্পরানপেক্ষতয়া সংসৃষ্টিঃ। তথা নিদ্রয়া প্রাণিমাত্রস্যৈব চৈতন্যবিলোপাৎ প্রাণিসামান্যং বক্তব্যং মনুষ্যেতি প্রাণিবিশেষাভিধানাৎ অবিশেষে বিশেষ্যত্বদোষঃ, স চ 'শরীরিণম্' ইতি পাঠেন সমাধেয়ঃ।

'নেত্রাস্যনাসিকাবাহুহৃদয়েভ্যস্তথোরসঃ।
নির্গম্য দর্শনে তস্থৌ ব্রহ্মণো ব্যক্তজন্মনঃ॥'

ইতি মার্কণ্ডেয়পুরাণে যদ্যপি মুখাদিকমপি নিদ্রাস্থানতয়া অভিহিতং তথাপি তেষু নয়নস্যৈব প্রধানত্বাৎ 'নয়নাবলম্বিনী' ইত্যুক্তম্। অতএব উক্তমার্কণ্ডেয়পুরাণবচনেঽপি প্রথমং নেত্রপদমেবাভিহিতম্।

বংশস্থবিলং বৃত্তম্ ॥৮॥

(ম) তত ইতি। শর্ব্বিলক ইতি ডিত্থাদিবৎ সংজ্ঞাশব্দঃ।

কৃত্বেতি। শিক্ষায়াঃ বলেন নৈপুণ্যেন, বলেন শরীরসামর্থ্যেন চ, শরীরস্যৈব

আসিতেছে। জরার (বার্দ্ধক্যের) ন্যায় অদৃশ্যাকৃতি ও চঞ্চলা যে নিদ্রা, প্রাণিগণের চৈতন্যশক্তিকে (বলকে) অভিভূত করিয়া বৃদ্ধি পাইয়া থাকে ॥৮॥

বিদূষক। তা আমরা নিদ্রা যাই। (অভিনয় অনুসারে শয়ন করিল।)

তদনন্তর শর্ব্বিলকের প্রবেশ।

শর্ব্বিলক। আমি শিক্ষানৈপুণ্যে ও শারীরিক সামর্থ্যে সন্ধি

गच्छामि भूमिपरिसर्पणघृष्टपार्श्वो
निर्मुच्यमान इव जीर्णतनुर्भुजङ्गः ॥९॥

नभोऽवलोक्य सहर्षम्। अये! कथमस्तमुपगच्छति स भगवान् मृगाङ्कः। तथाहि— (य)

नृपति-पुरुष-शङ्कित-प्रचारं
परगृह-दूषण-निश्चितैकवीरम्।

परिणाहो विशालता यस्य स चासौ सुखेन अनायासेन प्रवेशो यस्मात् स चेति तम्। 'प्रसन्नकर्कशा भारती' 'भाष्यं प्रसन्नगम्भीरम्' इत्यादिवत् एकस्य विरुद्धत्वविवक्षया कर्म्मधारयः। कर्म्ममार्गं चौर्य्यकार्य्यपथं सन्धिमित्यर्थः, कृत्वा, भूमेर्बहिर्द्देशात् परिसर्पणेन अभ्यन्तरगमनेन घृष्टे सन्धिगात्रेण कृतघर्षणे पार्श्वे यस्य सः, परश्च जीर्णतनुः क्षीणदेहः, भुजङ्गः सर्प इव, निर्म्मुच्यमानस्तेनैव सन्धिना परित्यज्यमानः सन्, गच्छामि अभ्यन्तरमिति शेषः। सर्पोऽपि एवमेव भित्ति-रन्ध्रादभ्यन्तरं प्रविशति।

अत्र पूर्णोपमालङ्कारः। वसन्ततिलका वृत्तम् ॥९॥

(य) नभः आकाशम्। अये इति सम्भ्रमे, कथमिति हर्षे। मृगाङ्कश्चन्द्रः। चन्द्रस्यास्तगमनात् तिमिरावरणेनात्मगोपनसम्भवादनेन चौर्य्यसमय इत्यावेदितस्य हर्षः, अतएव च सम्भ्रमस्वरेण बोध्यम्।

(সিঁধ) নির্ম্মাণ করিয়াছি; ইহা আমার শরীরের বিস্তৃতি অনুসারে নির্ম্মিত হইয়াছে এবং ইহা হইতে সুখে প্রবেশ করা যাইবে। এখন ভূতল হইতে প্রবেশ করিবার সময়ে পার্শ্বদ্বয় ঘর্ষণ প্রাপ্ত হইবে; এই অবস্থায় আমি, ক্ষীণদেহ সর্পের ন্যায় এই সন্ধি হইতে নির্ম্মুক্ত হইয়া ভিতরে প্রবেশ করি ॥৯॥

(আকাশের দিকে দৃষ্টিপাত করিয়া আনন্দের সহিত) ও! সেই মাহাত্ম্যশালী চন্দ্র অস্ত গিয়াছেন।

घन-तिमिर-निरुद्ध-सर्व्वभावा
रजनिरियं जननीव संवृणोति ॥१०॥

वृक्षवाटिकापरिसरे सन्धिं कृत्वा प्रविष्टोऽस्मि मध्यमकम् ।
तद् यावदिदानीं चतुःशालकमपि दूषयामि । भोः ! (२)

'अये क्रोधे विषादे च सम्भ्रमे स्मरणेऽपि च' इति विश्वः । 'कथं हर्षे च गर्हायां प्रकारार्थे च सम्भ्रमे । प्रश्ने सम्भावनायाञ्च —' इति मेदिनी ।

वृणोतीति । घनतिमिरेण गाढ़ान्धकारेण निरुद्धा आवृताः सर्व्वे भावाः पदार्था यया सा तथोक्ता, इयं रजनिः रात्रिः, जननीव मातेव, नृपतिपुरुषैः प्रहरिभिः शङ्कितः सम्भावितः प्रचारो विचरणं यस्य तम्, तथा परगृहस्य दूषणे सन्धिकरणेन विकृतीकरणे निश्चितः नृपतिपुरुषैरेवावधारित एकः अद्वितीय वीरः सुपटुस्तम्, मामिति शेषः, संवृणोति तेनान्धकारेण स्वेनावरणेन च आच्छादयति । सुतरामधुनैव चौर्य्ये प्रवर्त्तितव्यमिति भावः ।

अत्रोपमालङ्कारः । तथा मामिति विशेष्यपदस्यानुक्तत्वात् न्यूनपदतादोषः स च, 'संवृणोति' इत्यत्र 'मां पिधत्ते' इति पाठेन समाधेयः ।

पुष्पिताग्रा वृत्तम् ॥१०॥

(२) वृक्षेति । वृक्षैर्या वाटिका वृतस्थानं तस्य परिसरे प्रान्तभागे । मध्यमकं प्राचीराभ्यन्तरम् । चतसृणां चतुर्द्दिग्वर्त्तिनीनां शालानाम् इष्टकानिर्म्मित-

---

রাজপুরুষেরা (প্রহরীরা) আমার বিচরণের আশঙ্কা করিয়াছিল এবং আমি পরগৃহে প্রবেশ করিতে অদ্বিতীয় পটু ইহা স্থির করিয়াছিল। কিন্তু এখন গাঢ় অন্ধকার জগতের সকল পদার্থকে আবৃত করায় মাতার ন্যায় এই রাত্রি, আমাকে আবৃত করিতেছে ॥১০॥

বৃক্ষাবৃত স্থানের প্রান্তভাগে সন্ধি নির্ম্মাণ করিয়া, প্রাচীরের ভিতরে প্রবেশ করিয়াছি। তা এখন, চতুঃশালাকেও দূষিত করি। (সিঁধ কাটিয়া চক্‌টীকেও বিকৃত করি)

कामं नीचमिदं वदन्तु पुरुषाः, स्वप्ने च यद्वर्द्धते
विश्वस्तेषु च वञ्चनापरिभवश्चौर्य्यं न शौर्य्यं हि तत्।
स्वाधीना वचनीयतापि हि वरं, बद्धो न सेवाञ्जलिः
मार्गो ह्येष नरेन्द्रसौप्तिकवधे पूर्वं कृतो द्रौणिना ॥११॥

गृहाणां समाहार इति चतुःशालकम्, दूषयामि सन्धिकरणेन विकृतीकरोमि। भो इति चौर्य्यनिन्दाजनितविषादे।

'वाटी मार्गे वृतिस्थाने स्यात् कुटीवास्तुनोः स्त्रियाम्।' 'भोस्तु सम्बोधनविषादयोः' इति च मेदिनी।

काममिति। यत् चौर्य्यम्, स्वप्ने लोकस्य निद्रासमये, वर्द्धते बाहुल्येन भवतीत्यर्थः, तथा यः विश्वस्तेष्वपि जनेषु, वञ्चनापरिभवः प्रतारणया द्रव्यापहरणरूपा अवमानना, इदम् उभयमपि कर्म्म, पुरुषा लोकाः, कामं यथेष्टम्, नीचं निकृष्टं, वदन्तु; हि यस्मात् तत् स्वप्ने गोपनकृतं चौर्य्यं प्रतारणाकृतं चौर्य्यञ्च न शौर्य्यं न शौर्य्यकृतम्। तथा च शौर्य्येण विजित्य परस्वापहरणम् न दोषावहम्, 'सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः' इत्यादिना मन्वादिभिरनुमोदितत्वात्; किन्तु चौर्य्येण प्रतारणया च परस्वापहरणं दोषावहमेव, 'ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः' इत्यादिना मन्वादिभिरेव पातकतया परिगणितत्वात चौर्य्ये वञ्चनायाञ्च लोका निन्दां कुर्वन्ति, कुर्वन्तु इति सरलार्थो भावार्थश्च। तथापि स्वाधीना स्वाधीनवृत्तिविषया, वचनीयतापि निन्दापि, वरम ईषत्प्रियेत्यर्थः; ननु कुतो नाम वचनीयतापि वरमित्याह—यतः, सेवाया दासत्वस्य दासत्वकालीन इत्यर्थः, अञ्जलिः अनुनयसूचकः पाणिद्वयसंयोगः, न बद्धः न कृतो भवति। अनुनयसूचकाञ्जलिबन्धनापेक्षया स्वाधीनवृत्तिविषयकनिन्दासहनमपि वरमित्याशयः। ननु तथापि गोपनेन स्वकार्य्यसाधने सज्जनदृष्टान्तो नास्तीत्याह

যে চুরি, লোকের নিদ্রার সময়েই প্রায়শঃ হইয়া থাকে এবং যে চুরি, বিশ্বস্ত লোকের উপরেও প্রতারণার অবমাননারূপে প্রবর্ত্তিত হয় সেই চুরিকে, লোকে অত্যন্ত নীচ কার্য্য বলে, বলুক;

तत् कस्मिन् उद्देशे सन्धिमुत्पादयामि ?। (ल)

मार्ग इति। हि तथाहि, पूर्वं द्वापरान्ते, द्रौणिना विदुष एव द्रोणाचार्य्यस्य पुत्रेण अश्वत्थाम्ना, नरेन्द्रस्य राज्ञो युधिष्ठिरस्य सौप्तिकानां सुप्तानां पुत्रादीनां वधे, एष गोपनेन प्रवेशात्मको मार्गः पन्थाः प्रतारणारीतिरित्यर्थः, कृतः। अतो मादृशजनस्य तादृशाचरणे को दोष इति भावः।

अत्र 'स्वाधीना वचनीयतापि हि वरम्' इति स्वाधीनवृत्तिसामान्येन केवलचौर्य्यविषयकलोकापवादाङ्गीकारस्य समर्थनादर्थान्तरन्यासः, 'स्वाधीना' इत्यादिवाक्यार्थं प्रति 'बद्धः' इत्यादिवाक्यार्थस्य हेतुत्वात् काव्यलिङ्गम्, तथा गोपनप्रवेशसामान्यस्य केवलाश्वत्थामकृतगोपनप्रवेशरूपविशेषेण समर्थनादपरोऽर्थान्तरन्यासश्च इत्येतेषामङ्गाङ्गिभावेन सङ्करः।

तथा दृष्टान्तो नाम नाट्यालङ्कारः —'दृष्टान्तो यत्तु पक्षार्थसाधनाय निदर्शनम्' इति लक्षणात्।

पुरा किल अश्वत्थामा रणाङ्गनशयितदुर्य्योधनान्तिके पञ्चपाण्डववधं प्रतिज्ञाय सुप्तशेषरात्रौ पाण्डवशिविरे गोपनेन प्रविश्य युधिष्ठिरपुत्रादीन् निहतवानिति महाभारतीयवार्त्ता।

शार्द्दूलविक्रीड़ितं वृत्तम् ॥११॥

(ल) तदिति उद्देशे स्थाने।

কারণ, তাহা চুরিই বটে; কিন্তু বীরত্ব নহে। তথাপি স্বাধীন বৃত্তির বিষয়ে নিন্দাও, ভাল; কারণ, তাহাতে অনুনয়সূচক অঞ্জলি বন্ধন করিতে হয় না; বিশেষতঃ পূর্ব্বকালে দ্রোণাচার্য্যের পুত্র অশ্বত্থামা যুধিষ্ঠিরের নিদ্রিত পুত্রপ্রভৃতির বধের বেলায় এই পথ আবিষ্কার করিয়া গিয়াছেন ॥১১॥

তা, কোন স্থানে সন্ধি নির্ম্মাণ করি?।

देशः को नु जलावसेकशिथिलो यस्मिन्न शब्दो भवेत्
भित्तीनाञ्च, न दर्शनान्तरगतः सन्धिः करालो भवेत् ।
क्षारक्षीणतया च लोष्टक-कृशं जीर्णं क्व हर्म्यं भवेत्
कस्मिन् स्त्रीजनदर्शनञ्च न भवेत् स्यादर्थसिद्धिश्च मे ॥१२॥

देश इति । भित्तीनां को नु देशः स्थानम्, जलावसेकेन सततपातितजलेन सिक्ततया शिथिलः श्लथीभूतेष्टकासंयोगः, स्थित इति शेषः, यस्मिन् देशे, शब्द इष्टकोत्पाटनजनितो ध्वनिर्न भवेत् । न दर्शनान्तरं न दृष्टिविषयतां गतः प्राप्तः जनागमनस्थानतया गृहस्थस्य अदृष्टिगोचर इत्यर्थः, अथ च करालो वृहत्तया भीषणः, सन्धिर्भवेत् । तथा क्व कस्मिन् देशे, क्षारेण लवणेन क्षीणतया, हर्म्यं तदीयभित्तिरित्यर्थः, लोष्टकवत् क्षुद्रमृत्तिकाखण्डवत् कृशम् जीर्णञ्च भवेत्; आयासलाघवात्तत्रैव सन्धिः करणीय इति भावः । तथा कस्मिन् देशे, स्त्रीजनदर्शनञ्च न भवेत्, तद्दर्शने तु कामोद्रेकसम्भवादुद्वेग्यीभूतचौर्य्यासम्भव इति भावः । तादृशदेशे सन्धिः कर्त्तव्य इत्यर्थः । अर्थसिद्धिः प्रयोजनीभूतचौर्य्यसिद्धिश्च स्यात् ।

अत्र भवेदिति पदस्य वारं वारमभिधानादनवीकृतत्वदोषः; तथा चतुर्थपादे 'भवेत् स्यात्' इति प्रकृतिविपर्ययो भग्नप्रक्रमतादोषश्च; 'यस्मिन्नशब्दोद्गमः' 'जीर्णं क्व हर्म्यं स्थितम्,' 'न स्यात् कुत्र वधूविलोकनकथा' 'स्यादर्थसिद्धिश्च मे' इति पाठपरिवर्त्तने तु तन्निरासः ।

शार्द्दूलविक्रीडितं वृत्तम् ॥१२॥

ভিত্তির কোন্ স্থান জলসিক্ত হইতে থাকায় শিথিল হইয়াছে, যেখানে শব্দ হইবার সম্ভব নাই এবং কোন্ স্থানটি লোকের দৃষ্টিগোচর হয় না; অথচ সন্ধিটি ভীষণ হয়; কোন্ স্থানের ভিত্তি, লবণে ক্ষীণ হওয়ায়, একটি লোষ্ট্রের ন্যায় কৃশ ও জীর্ণ হইয়াছে; কোন্ স্থানে স্ত্রীলোকের দর্শন না হয়, অথচ আমার কার্য্যসিদ্ধি হয় ॥ ১২ ॥

भित्तिं परामृश्य । नित्यादित्य-दर्शनोदकसेचनेन दूषितेयं भूमिः क्षारक्षीणा ; मूषिकोत्करश्चेह । हन्त ! सिद्धोऽयमर्थः (व) । प्रथममेतत् स्कन्दपुत्राणां सिद्धिलक्षणम् (श) । अत्र कर्म्मप्रारम्भे कीदृशमिदानीं सन्धिमुत्पादयामि । इह खलु भगवता कनकशक्तिना चतुर्विधः सन्ध्युपायो दर्शितः । तद् यथा, पक्के ष्ट-

---

भित्तिमिति । परामृश्य संस्पृश्य । क्षारक्षीणा स्वभावत एव लवणोद्गमेन प्रायेण क्षयमुपगता, इयं भूमिः, नित्यं प्रत्यहमेव आदित्यदर्शने सूर्य्योदयकाले उदकसेचनेन पादप्रक्षालनादिजलसेकेन, दूषिता शिथिलीभूतेष्टका । किञ्च, उत्कीर्य्यते इति उत्करो धूलिराशिः । इह अस्मिन् स्थाने, मूषिकाणामुत्करो धूलिराशिश्च विद्यत इति शेषः । हन्त हर्षे । अयम् अर्थः, सन्धिकर्त्तनरूपं प्रयोजनम्, सिद्धः अनायासेन निष्पन्नः ; क्षारक्षीणत्वात् नित्योदकसेचनेन शिथिलीभूतेष्टकत्वात् मुषिकैरन्तःसारहीनीकृतत्वाच्चेति भावः ।

(श) प्रथममिति । स्कन्दपुत्राणां कार्त्तिकेयसुतानाम् चौराणाम्, एतत् अनायासेन सन्धिकर्त्तनोपयोगिस्थानप्रापणम्, प्रथमं प्रधानम्, सिद्धेर्भाविन्यार्थसिद्धेः, लक्षणम् सूचकम् । चौराः खलु चौर्य्यं कार्त्तिकेयोपदिष्टमिति मान्यमानास्तदनुसारेण प्रवर्त्तमानाः स्कन्दपुत्रा इति गीयन्त इति प्रसिद्धिः ।

(ष) अत्रेति । कर्म्मणः चौर्य्यस्य प्रारम्भे उपक्रमे । कनकं कनकमयी शक्तिरस्त्रविशेषो यस्य तेन, तदाख्येन केनचित् । चौर्य्यशास्त्रकारेण आमेष्टकानाम्

(ভিত্তি স্পর্শ করিয়া) এই স্থানটি লবণে ক্ষীণ হইয়াছে এবং প্রত্যহই সূর্য্যোদয়কালে জল-সিক্ত হওয়ায় শিথিল হইয়া গিয়াছে ; আর এখানে ইঁদুরের মাটীর স্তূপও রহিয়াছে। বেশ্ ! আমার এই প্রয়োজন সিদ্ধ হইয়াছে, কার্ত্তিকেয়ের পুত্র চোরদিগের ইহা কার্য্যসিদ্ধির প্রধান লক্ষণ। এই কার্য্যারম্ভে এখন কি রকম সিঁধ তৈয়ার করি। ভগবান্ কনকশক্তি, এই জগতে চারি প্রকার সন্ধির উপায়

कानामाकर्षणम्, आमेष्टकानां छेदनम्, पिण्डमयानां सेचनम्, काष्ठमयानां पाटनमिति (ष)। तदत्र पक्वेष्टके इष्टिकाकर्षणम्। तत्र—

पद्मव्याकोशं, भास्करं बालचन्द्रं
वापी-विस्तीर्णं, स्वस्तिकं पूर्णकुम्भम्।
तत् कस्मिन् देशे दर्शयाम्यात्मशिल्पं
दृष्ट्वा श्वो यं यद्विस्मयं यान्ति पौराः ॥१३॥

अपक्वेष्टकानाम् पिण्डमयानाम् अशुष्कतया कोमलमृत्तिकामयानां स्थानानामिति शेषः, सेचनं सिचनेन गलितीकरणम्। पाटनं विदारणम्।

पद्मेति। पौराः पुरवासिनो जनाः, श्वः परदिने, यत् आत्मशिल्पम्, दृष्ट्वा विस्मयं यान्ति प्राप्नुवन्ति, तत् तादृशम्, आत्मशिल्पं निजकार्य्यनैपुण्यभूतम्, पद्मवत् व्याकोशं प्रस्फुटं प्रस्फुटितपद्माकारमित्यर्थः, भास्करं भास्करमण्डलाकारं गोलम्, बालचन्द्रम् खण्डचन्द्राकारम्, वापी वापीवच्चतुष्कोणः विस्तीर्णस्तिर्य्यक् लम्बमानः स च स चेति समाहारद्वन्द्वे तत् द्वयम्, स्वस्तिकं स्वस्तिकवत् त्रिकोणम्, पूर्णकुम्भम् पूर्णकुम्भवत् निम्नपीवरमूर्द्ध्वकृशम्, एततसमान्यतमं विम्प्रकारं सन्धिमित्यर्थः, कस्मिन् देशे स्थाने दर्शयामि। इत्यात्मविवेचनम्।

"प्रफुल्लोत्फुल्लसंफुल्लव्याकोशविकचस्फुटाः" इत्यमरः।

वैश्वदेवी वृत्तम्—'बाणाश्वैश्छिन्ना वैश्वदेवी ममौ यौ" इति लक्षणात् ॥१३॥

দেখাইয়াছেন। যথা—পক্ক ইষ্টকের আকর্ষণ, অপক্ক ইষ্টকের ছেদন গলিতমৃত্তিকার সেচন এবং কাষ্ঠময়স্থানের বিদারণ। অতএব এই পক্কেষ্টকাময় ভিত্তিতে ইষ্টকাকর্ষণই কর্ত্তব্য। সে বিষয়ে আবার—

প্রস্ফুটিত পদ্মের মত, সূর্য্যমণ্ডলের মত, নূতন চন্দ্রের মত,

तदत्र पक्केष्टके पूर्णकुम्भ एव शोभते ; तमुत्पादयामि । [स]

अन्यासु भित्तिषु मया निशि पाटितासु
क्षारक्षतासु विषमासु च कल्पनासु ।
दृष्ट्वा प्रभातसमये प्रतिवेशिवर्गो
दोषांश्च मे वदति कर्म्मणि कौशलञ्च ॥१४॥

(स) विविच्य निश्चिन्वन्नाह तदिति । पक्केष्टक देशे । पूर्णकुम्भवदाकारः सन्धिः ।

अन्यास्विति । मया, निशि रात्रौ, क्षारक्षतासु लवणाविर्भावेन स्वयमेव क्षीणासु, अन्यासु अपरापरासु, भित्तिषु, पाटितासु सन्धिकरणार्थं विदारितासु, तथा विषमासु भयङ्करासु, कल्पनासु मम धारणोपायभूतेषु रक्षिणां गृहस्थानाञ्च कौशलेषु च, पाटितासु विनाशितासु, उत्कृष्टतरकौशलाविर्भावेन विफलीकृतासु सतीष्वित्यर्थः ; अथवा कल्पनासु प्राचीरलङ्घनादिकौशलेषु आविष्कृतास्विति शेषः ; प्रतिवेशिवर्गः पल्लीस्थितजनसमूहः, प्रभातसमये, दृष्ट्वा तत् सर्वमवलोक्य, मे मम दोषान् स्वाभाविकचौर्य्यापवादान्, कर्म्मणि चौर्य्यकार्य्ये, कौशलं नैपुण्यञ्च वदति । अत्रापि तादृशवादयोग्यमेव कार्य्यं कर्त्तव्यमिति भावः ।

अत्र वदतीत्येकया क्रियया अप्रस्तुतयोर्दोषकौशलयोः कर्म्मतयाभिसम्बन्धात्

দীর্ঘিকার ন্যায় বিস্তীর্ণ, স্বস্তিকের তুল্য ত্রিকোণ এবং পূর্ণকুম্ভের ন্যায় ; এই কয় রকম সন্ধির মধ্যে নিজের শিল্প (কোন রকম সন্ধি) কোন্ জায়গায় দেখাইব ; যাহা দেখিয়া পুরবাসিগণ, কাল বিস্ময়াপন্ন হইবে ॥১৩॥

তা, এই পক্কেষ্টকাময় ভিত্তিতে পূর্ণকুম্ভের ন্যায় সন্ধিই শোভা পাইবে ; তাহাই নির্ম্মাণ করি ।

আমি রাত্রিতে, লবণাবির্ভাবনিবন্ধন জীর্ণ ভিত্তি কিম্বা অন্যান্য প্রকার ভিত্তি বিদীর্ণ করিলে এবং প্রাচীর লঙ্ঘনপ্রভৃতির ভয়ঙ্কর

नमो वरदाय कुमारकार्त्तिकेयाय, नमः कनकशक्तये ब्रह्मण्य-देवाय (१) देवव्रताय, नमो भास्करनन्दिने, नमो योगाचार्य्याय, यस्याहं प्रथमः शिष्यः । तेन च परितुष्टेन योगरोचना मे दत्ता । (ছ)

तुल्ययोगितालङ्कारः । तुल्ययोगितालक्षणे "पदार्थानाम्" इति बहुवचनस्य अविवक्षितत्वमस्माभिः सप्रमाणमेवोक्तं साहित्यदर्पणटीकायाम् । तथा दोषानिति बहुवचनेन प्रक्रम्य कौशलमित्येकवचनाभिधानात् भग्नप्रक्रमतादोषः ; स च 'दोषम्' इति पाठेनैव समाधेयः ।

वसन्ततिलका वृत्तम् ॥१४॥

(ছ) अथ कर्म्मणि प्रवर्त्तमानो गुरुसम्प्रदायं नमस्कुर्व्वन्नाह नम इति । वरदाय अभीष्टफलदायिने । अन्योऽपि कौमारव्रतावलम्बनात् कुमारः सम्भाव्येत, अतः कार्त्तिकेयपदम् । एवमपरोऽपि कृत्तिकापुत्रतया कार्त्तिकेयः स्यादतः कुमारपदम् । परमेष्ठिगुरुगुरुभावेनास्य नमस्कारः । कनकशक्तिर्नाम कश्चित् द्वितीयचौर्य्यशास्त्रप्रवर्त्तकः, तस्मै ; ब्रह्मण्यदेवाय महाप्रभावशालितया ब्रह्मण्यदेवस्वरूपाय, देवव्रताय देवतापरायणाय । कनकशक्तेर्विशेषणद्वयमेतत् । परापरगुरुभावेनास्य नमस्कारः । भास्करनन्दी नाम कश्चित् तृतीयचौर्य्यशास्त्रप्रवर्त्तकस्तस्मै । परमगुरुत्वेनास्य नमस्कारः ।

কৌশল আবিষ্কার করিলে, প্রভাতকালে প্রতিবেশিগণ তাহা দেখিয়া আমার দোষও বলিবে, কার্য্যে দক্ষতাও বলিবে ॥১৪॥

বরদাতা কুমার কার্ত্তিকেয়কে নমস্কার ; ব্রহ্মণ্যদেবস্বরূপ ও দেবতা-পরায়ণ কনকশক্তিকে নমস্কার ; ভাস্করনন্দীকে নমস্কার এবং যোগাচার্য্যকে নমস্কার ; আমি যাঁহার প্রথম শিষ্য। সেই গুরু যোগাচার্য্য সন্তুষ্ট হইয়া আমাকে, চৌর্য্যের উপায়ভূত রোচনা দিয়াছেন।

(१) ब्रह्मण्याय देवाय ।

अनया हि समालब्धं न मां द्रक्ष्यन्ति रक्षिणः ।
शस्त्रञ्च पतितं गात्रे रुजं नोत्पादयिष्यति ॥१५॥

तथा करोति। धिक् कष्टम्, प्रमाणसूत्रं मे विस्मृतम्। विचिन्त्य। आं, इदं यज्ञोपवीतं प्रमाणसूत्रं भविष्यति। यज्ञोपवीतं हि नाम ब्राह्मणस्य महदुपकरणद्रव्यम्, विशेषतोऽस्मद्विधस्य। कुतः—(च)

योगाचार्य्यो नाम कश्चित्तस्मै। गुरुत्वेनास्य नमस्कारः। यस्य योगाचार्य्यस्य। योगश्चौर्य्योपायस्तत्स्वरूपा रोचना गोपित्तं योगरोचना अनायासेन चौर्य्यसाधनोपायभूता रोचनेत्यर्थः। 'योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु' इत्यमरः। 'गोपित्तं रोचना कूटशाल्मली रोचनः पुमान्' इति त्रिकाण्डशेषः।

अनयेति। हि तथाहि, अनया योगरोचनया, समालब्धं लिप्ताङ्गं माम्, रक्षिणः प्रहरिणो धनरक्षका गृहस्थाश्च, न द्रक्ष्यन्ति। तथा गात्रे एतत्समालब्धे इति भावः, पतितं शस्त्रञ्च, रुजं पीडाम्, न उत्पादयिष्यतीति; सुतरां विशेषगुणशालिनीयं योगरोचनेति भावः।

अत्र योगरोचनाया उत्कर्षप्रतिपादनकार्य्यं प्रति कारणद्वयोपन्यासात् समुच्चयोऽलङ्कारः। तथा द्रक्ष्यन्तीति बहुवचनेन प्रक्रम्य उत्पादयिष्यतीति एकवचनाभिधानात् भग्नप्रक्रमतादोषः, स च 'गात्रे पतितशस्त्राणि करिष्यन्ति च नो रुजम्' इति पाठेन समाधेयः ॥१५॥

(च) तथेति। तथा गात्रे योगरोचनालेपनम्। धिगिति आवश्यकवस्त्वानयन-

---

ইহা দ্বারা গাত্র লেপন করিলে, রাক্ষগণ আমাকে দেখিতে পাইবে না, এবং গাত্রে অস্ত্র পতিত হইলেও, কোন পীড়া জন্মাইবে না ॥১৫॥

(গাত্রে যোগরোচনা' লেপন করিল)। হায়! কি কষ্ট! আমি

एतेन मापयति भित्तिषु कर्म्ममार्गम्
एतेन मोचयति भूषणसम्प्रयोगान् ।
उद्घाटको भवति यन्त्रदृढ़े कपाटे
दष्टस्य कीटभुजगैः परिवेष्टनञ्च ॥१६॥

विस्मरणाद्‌ात्मनिन्दायाम् । प्रमाणसूत्रं मापनरज्जुः । उपकरणद्रव्यं प्रयोजन-साधनं वस्तु । अस्मद्विधस्य चौर्य्यादिप्रवृत्तस्य ।

एतेनेति । एतेन यज्ञोपवीतेन, भित्तिषु, कर्म्मणः परद्रव्यापहरणरूप कार्य्यस्य मार्गः पन्थाः सन्धिरित्यर्थस्तम्, मापयति परिमितं करोति, चौर इति शेषः । एतेन यज्ञोपवीतेन, भूषणसम्प्रयोगान् 'कृद्विहितो भावो द्रव्यवत्प्रकाशते इति न्यायात् सम्प्रयुक्तभूषणानि करचरणादौ दृढ़लग्नानलङ्कारानिति यावत्, मोचयति प्रत्यावयति गृहस्थ इति शेषः । यन्त्रवत् दृढ़ं उभयमुखस्थाने दृढ़संयुक्तं कपाटे, उद्घाटको भवति, लोक इति शेषः । परार्द्धेऽपि एतेनेति सम्बध्यते, तथा च एतेन यज्ञोपवीतेन कपाटोपरिस्थं शङ्कुं बद्ध्वा तदाकर्षणेन लोकः कपाट-योरुद्घाटको भवतीत्यर्थः ।ः तथा कीटभुजगैः दष्टस्य कृतदंशनस्य करचरणादेः, एतेन यज्ञोपवीतेन परिवेष्टनञ्च परिवेष्ट्य बन्धनञ्च भवतीत्यन्वयः; अतएव यज्ञो-पवीतं महदुपकरणद्रव्यमिति भावः ।

মাপিবার সূতা আনিতে বিস্মৃত হইয়াছি। (চিন্তা করিয়া) আ, এই যজ্ঞোপবীতই মাপিবার সূতা হইবে। যজ্ঞোপবীতটা ব্রাহ্মণের পক্ষে বড়ই উপকারের বস্তু; বিশেষতঃ আমাদের মত ব্রাহ্মণের। কারণ—

ইহা দ্বারা দেওয়ালে সিঁধ মাপা যায়; ইহা দ্বারা দৃঢ়লগ্ন অলঙ্কার খোলা চলে; ইহা দ্বারা যন্ত্রের ন্যায় দৃঢ়সংযুক্ত কপাট উদ্‌ঘাটন করা যায় এবং ইহা দ্বারা, কীট ও সর্পের দংশন স্থানে বেষ্টন করিয়া বন্ধন করা চলে ॥১৬॥

মাপয়িত্বা কর্ম্ম সমারভে। তথা কৃত্বা অবলোক্য চ। একলোষ্টাব শেষোঽয়ং সন্ধিঃ। ধিক্ কষ্টম্; অহিনা দষ্টোঽস্মি। যজ্ঞোপবীতেনাঙ্গুলীং বদ্ধা বিষবেগং নাটয়তি। চিকিৎসাং কৃত্বা। স্বস্থোঽস্মি। পুনঃ কর্ম্ম কৃত্বা দৃষ্ট্বা চ। অয়ে! জ্বলতি প্রদীপঃ। তথাহি। (ক)

শিখা প্রদীপস্য সুবর্ণ পিঞ্জরা
মহীতলে সন্ধিমুখেন নির্গতা।

অত্রাপি যজ্ঞোপবীতস্য উৎকর্ষপ্রতিপাদনকার্য্যং প্রতি বহুতরকারণোপন্যাসাৎ সমুচ্চয়ঃ, ভবতীত্যেকয়া ক্রিয়য়া উদ্‌ঘাটকপরিবেষ্টনয়োঃ কর্তৃতয়া অভিসম্বন্ধাত্তুল্যযোগিতা চ, অনয়োরঙ্গাঙ্গিভাবেন সঙ্করঃ। তথা 'এতেন' ইত্যস্য দ্বিরুচ্চারণাৎ কথিতপদতাদোষঃ, উদ্‌ঘাটক ইতি পুংসা প্রক্রম্য পরিবেষ্টনমিতি নপুংসকনির্দ্দেশাৎ ভগ্নপ্রক্রমতাদোষশ্চ; 'লোকৌ বিমোচয়তি' 'পরিবেষ্টকশ্চ' ইতি পাঠেন তয়োঃ সমাধানম্।

বসন্ততিলকা বৃত্তম্ ॥১৫॥

(ক) মাপয়িত্বেতি। কর্ম্ম সন্ধিনির্ম্মাণকার্য্যং। তথা মাপনম্ ইষ্টকাকর্ষণঞ্চ। একং লোষ্টম্ ইষ্টকাখণ্ডম্ অবশেষং যস্য সঃ। অহিনা সর্পেণ। স্বস্থঃ প্রকৃতিস্থঃ। কর্ম্ম তদবশিষ্টলোষ্টনিষ্কাশনম্, দৃষ্ট্বা সন্ধ্যন্তরাৎ গৃহাভ্যন্তরমিতি শেষঃ।

মাপিয়া কার্য্য আরম্ভ করি। (মাপিয়া ও ইষ্টকাকর্ষণ করিয়া দেখিয়া) এই সন্ধিতে একটীমাত্র লোষ্ট্র অবশিষ্ট রহিয়াছে। হায়! কি কষ্ট! সর্পে দংশন করিল। (যজ্ঞোপবীতদ্বারা অঙ্গুলি বন্ধন করিয়া, বিষের বেগ অভিনয় করিতে লাগিল। পরে চিকিৎসা করিয়া) সুস্থ হইয়াছি। (পুনরায় কার্য্য করিয়া এবং দেখিয়া) ওহে! দীপ জ্বলিতেছে।

विभाति पर्य्यन्ततमःसमावृता
सुवर्णरेखेव कषे निवेशिता ॥ १७ ॥

पुनः कर्म्म कृत्वा । समाप्तोऽयं सन्धिः । भवतु ; प्रविशामि । अथवा न तावत् प्रविशामि, प्रतिपुरुषं निवेशयामि । तथा कृत्वा । अये ! न कश्चित् । नमः कार्त्तिकेयाय । प्रविश्य दृष्ट्वा च । अये ! पुरुषद्वयं सुप्तम् । भवतु, आत्मरक्षार्थं द्वारमुद्घाटयामि । कथं जीर्णत्वाद्गृहस्य विरौति कपाटम् । तद् यावत् सलिल-

शिखेति । सुवर्णं स्वर्णमिव पिञ्जरा पिङ्गलवर्णा, सन्धिमुखेन महीतले निर्गता, तथा पर्य्यन्ते प्रान्तदेशे तमसा अन्धकारेण तमोवत् कृष्णवर्णेन कषपाषाणै-कदेशेन च समावृता निरुद्धा, प्रदीपस्य शिखा, कषे कषपाषाणे, निवेशिता निहिता, सुवर्णस्य स्वर्णस्य रेखा इव विभाति ।

अत्र अङ्गभूतया लुप्तोपमया सङ्कीर्णा श्रौती उपमालङ्कारः । तथा सुवर्णशब्दस्य हिरण्यारणात् कथितपदतादोषः, स तु 'हिरण्यरेखेव' इतिपाठेन समाधेयः । वंशस्थविलं वृत्तम् ॥ १७ ॥

(ख) पुनरिति । कर्म्म सन्धिमुखपरिष्काररूपं कार्य्यम् । प्रतिपुरुषं पुरुषप्रतिकृतिं कञ्चित् काष्ठमयं कृत्रिमपुरुषमित्यर्थः । यदि गृहस्थः प्रहरेत् तदा एनं कृत्रिमपुरुषमेव प्रहरेदिति भावः । कश्चिदपि जनो न प्रहरतीति शेषः, अतो नास्ति प्रवेशे काचिदाशङ्केत्याशयः । आत्मरक्षार्थमिति । यदि कश्चित् धर्त्तु-मागच्छेत् तदा तेन उद्घाटितद्वारेण सहसैव निर्गत्य आत्मरक्षां कर्त्तु

স্বর্ণের ন্যায় পিঙ্গলবর্ণ, সিঁধের মুখ দিয়া ভূতলে নির্গত এবং প্রান্তভাগে অন্ধকারে আবৃত প্রদীপের শিখা, কষপাষাণে প্রদত্ত স্বর্ণরেখার ন্যায় দীপ্তি পাইতেছে ॥১৭॥

(পুনরায় সন্ধির মুখ পরিষ্কার করিয়া) সন্ধিনির্ম্মাণকার্য্য শেষ হইয়াছে। হউক, প্রবেশ করি। অথবা নিজে প্রবেশ করিব না,

मन्वेषयामि। क्वनु खलु सलिलं भविष्यति ?। इतस्ततो दृष्ट्वा - सलिलं गृहीत्वा क्षिपन् सशङ्कम्। मा तावत् भूमौ पतत् शब्दमुत्पादयेत्। पृष्ठेन प्रतीक्ष्य कपाटमुद्घाट्य। भवतु, एवं तावदिदानीं परीक्षे। किं लक्ष्यसुप्तम् उत परामार्थसुप्तमिदं द्वयम् ?। त्रासयित्वा परीक्ष्य च। अये! परमार्थसुप्तेनानेन भवितव्यम् (ख)

तथाहि —

शङ्कामीति भावः। गृहस्य जीर्णत्वात् कपाटमपि जीर्णमिति बोध्यम्। अतएव विरौति धारणमात्रमेव शब्दायते। अन्वेषयामि अन्विष्यामि। अन्विष्यत इत्यन्वेषः कर्मणि घञ्, ततश्च तं करोतीति "इनकारित धात्वर्थे" इति इन। केचित्तु मार्गणार्थे इषधातुं चौरादिकमङ्गीकुर्वन्ति। सलिलप्रक्षेपेण आर्द्रं सत् कपाटं न विरुयादिति भावः। पतत् सलिलमित्यर्थः। अतएव सलिलं यथा भूमौ न पतेत् तथैव कपाटोपरि क्षिपामीत्यभिप्रायः। पृष्ठेन पृष्ठदेशे मुखपरिवर्त्तनेन, प्रतीक्ष्य कश्चिदागच्छति नवेति अवेक्ष्येत्यर्थः। लक्ष्यसुप्तं व्याजनिद्रितम्। परमार्थसुप्तं यथार्थनिद्रितम्। द्वयं पुरुषयोरिति शेषः त्रासयित्वा नयनान्तिके छुरिकामुपनीय भयं प्रदर्श्य, परीक्ष्य विशेषनिरीक्षणादिनेति शेषः। अनेन पुरुषद्वयेन, परमार्थसुप्तेन यथार्थनिद्रितेन।

কৃত্রিম পুরুষ প্রবেশ করাই। বেশ্, কেহ নাই। কার্ত্তিকেয়কে নমস্কার। (প্রবেশ করিয়া দেখিয়া) ওহে! দুইটি লোক নিদ্রিত রহিয়াছে। হউক, আত্মরক্ষার্থ দ্বার খুলিয়া রাখি। বাড়ীখানি জীর্ণ বলিয়া কপাট যে শব্দ করিয়া উঠিল। তা জল খুজিয়া দেখি। জল কোথায় আছে। (চারিদিক দৃষ্টি করিয়া, জল গ্রহণ করিয়া নিক্ষেপ করতঃ আশঙ্কার সহিত) ভূতলে পড়িয়া শব্দ উৎপাদন না করে। (পৃষ্ঠের দিক্ নিরীক্ষণ করিয়া কপাট খুলিয়া) হউক, এই

निःश्वासोऽस्य न शङ्कितः सुविशदः तुल्यान्तरं (१) वर्त्तते,
दृष्टिर्गाढ़निमीलिता न विकला नाभ्यन्तरे चञ्चला ।
गात्रं स्रस्तशरीरसन्धिशिथिलं शय्याप्रमाणाधिकं
दीपञ्चापि न मर्षयेदभिमुखं स्याल्लक्ष्यसुप्तं यदि ॥१८॥

निःश्वास इति । अस्य पुरुषद्वयस्य, निःश्वासः । शङ्का अस्य सञ्जातेति शङ्कितः । तथा च न शङ्कितः मनसि शङ्काया न व्यञ्जक इत्यर्थः, तथा सुविशदः विशालतया सुस्पष्टश्च सन्, नतु जागरितस्येव क्षुद्रतया अस्पष्ट । तुल्यमन्तरं व्यवधानं यस्मिन् कर्म्मणि तद् यथा तथा वर्त्तते । जागरितावस्थायान्तु नैव निःश्वासो भवतीति भावः । दृष्टिर्नयनम्, गाढ़निमिलिता अत्यन्तमुद्रिता, किन्तु विकला न विकृतिं न प्राप्ता, तथा अभ्यन्तरे ताराप्रदेशे, चञ्चला न ताराप्रदेशस्य चञ्चल-तया उपरिभागेऽपि चाञ्चल्यं न गतेति तात्पर्य्यम् । व्याजसुप्तस्य तु नैवं भवितुमर्हतीत्याशयः । गात्रं करचरणाद्यङ्गसमूहः, स्रस्ता श्लथीभावेन पतिता ये शरीरसन्धयः शरीरस्य संयोगस्थानानि तैः शिथिलं श्लथीभावेन स्थितम्, तथा शय्याया यत्प्रमाणं परिमाणं ततः अधिकम् अतिरिक्तस्थानगतम् । 'व्याजसुप्तस्य तु गात्रमीदृशं शिथिलं न भवति, सावधानतया च मस्तकचरणादिकं शय्यातो भूमौ न गच्छतीत्यभिप्रायः । तथा यदि लक्ष्यसुप्तम् इदं पुरुषद्वयं व्याजसुप्तं स्यात्, तदा अभिमुखं सम्मुखवर्त्तिनं दीप-ञ्चापि, न मर्षयेत् न सहेत, चक्षुषि तेजःपातेन महोपद्रवसम्भवादिति भावः ।

রূপ এখন পরীক্ষা করি। এই লোক দুইটা কি কপটনিদ্রিত? না যথার্থনিদ্রিত। (ভয় দিয়া, পরীক্ষা করিয়া) ওহে! ইহারা যথার্থ-নিদ্রিতই হইবে। কারণ—

এই লোক দুইটার নিশ্বাস শঙ্কাসূচক নহে, অথচ সুস্পষ্ট এবং সমান ব্যবধানে হইতেছে; নয়ন অত্যন্ত মুদ্রিত, কিন্তু বিকৃত

---

(१) समान्तरम् ।

সমন্তাদবলোক্য। অয়ে! কথং মৃদঙ্গঃ, অয়ং দর্দুরঃ, অয়ং পণবঃ ইয়মপি বীণা, এতে বংশাঃ, অমী পুস্তকাঃ। কথং নাট্যাচার্য্যস্য গৃহমিদম্। অথবা, ভবনপ্রত্যয়াৎ প্রবিষ্টোঽস্মি। তৎ কিং পরমার্থদরিদ্রোঽয়ম্? উত রাজভয়াচ্চৌরভয়াদ্বা ভূমিষ্ঠং দ্রব্যং ধারয়তি?। তন্মমাপি নাম শর্ব্বিলকস্য ভূমিষ্ঠং দ্রব্যম্?। ভবতু, বীজং প্রক্ষিপামি। তথা কৃত্বা। নিক্ষিপ্তং বীজং ন ক্বচিৎ স্ফারীভবতি। অয়ে! পরমার্থদরিদ্রোঽয়ম্। ভবতু, গচ্ছামি। (গ)

অত্র পরমার্থসুপ্তত্বপ্রতিপাদনকার্য্যং প্রতি বহুতরকারণোপন্যাসাৎ সমুচ্চয়ঃ, তত্তদুক্ত-বিচ্ছিত্তিবশাচ্চ উক্তবিধনিঃশ্বাসাদিসাধনেন পরমার্থসুপ্তত্বরূপসাধ্যজ্ঞানাদনুমানালঙ্কারঃ।

"গাত্রং গাত্রাঙ্গনাদৌ ক্লীবমঙ্গে কলেবরে" ইতি মেদিনী। "লম্বং শয়স্থ সংখ্যায়াং লম্বং ছন্দসি সম্মতম্" ইতি বিশ্বঃ।

শার্দ্দূলবিক্রীড়িতং বৃত্তম্ ॥১৮॥

(গ) সমন্তাদিতি। দর্দ্দুরপণবৌ বাদ্যবিশেষৌ। বংশা বংশদণ্ডনির্ম্মিতানি বাদ্যানি পুস্তকানি এষাং সন্তীতি পুস্তকাঃ অর্শ আদিত্বাদৎ পুস্তকানামাধারা ইত্যর্থঃ। কেচিত্তু পুংস্যপি পুস্তকশব্দং বদন্তি। নাট্যাচার্য্যস্যাভিনয়গানাদিশিক্ষকস্য,

---

নহে কিম্বা ভিতরে চঞ্চলও নহে এবং শরীরের সন্ধিস্থানগুলি শিথিল ভাবে পড়িয়া থাকায়, অঙ্গসকলও শিথিল হইয়াছে এবং শয্যার পরিমাণ অপেক্ষায় অধিক হইয়াছে (কোন কোন অঙ্গ মাটীতে গিয়া পড়িয়াছে) আর যদি কপটনিদ্রিত হইত, তবে সম্মুখে দীপ সহ্য করিতে পারিত না।

(চারি দিকে দৃষ্টি করিয়া) ওহে! এই মৃদঙ্গ, এই দর্দ্দুরবাদ্য, এই পণববাদ্য, এই বীণা, এই বাঁশী এবং এই কতকগুলি পুস্তক। তবে

विदू। उत्स्वप्नायते। भो वअस्स ! सन्धी विअ दिज्जदि, चोरं विअ पेक्खामि ; ता गेण्हदु भवं एदं सुवस्सभण्डअं । [घ]

(घ) भो वयस्य ! सन्धिरिव दृश्यते, चौरमिव पश्यामि ; तद् गृह्णातु भवानिदं सुवर्णभाण्डम् ॥

मृदङ्गादीनां तस्यैव प्रयोजनीयत्वादिति भावः। भवनप्रत्ययात् साधारणगृहस्थगृह-विश्वासात्। परमार्थदरिद्रो यथार्थदीनः, धनभाण्डाद्यदर्शनादित्याशयः। भूमिष्ठं भूगर्भप्रोथितम्, द्रव्यं धनम्, धारयति रक्षति। भूमिष्टं द्रव्यं, गुप्तं तिष्ठतीति भावः। सगर्वोक्तिरियम्। एतेन चौर्यविद्यायामात्मनः पुण्यं व्यज्यते। बीजं सर्षपम्। तथा कृत्वा बीजं निक्षिप्य। क्वचित् प्रदेशे न स्फारीभवति विशालीभवति। अभ्यन्तरधनके भूभागे मन्त्रपाठपूर्वकं निक्षिप्तं बीजं स्फीतीभवतीति प्रवादः अतएवाह अयि इत्यादि। गच्छामि किञ्चिदनपहृत्यैवेति शेषः, अस्य दारिद्र्ये न अपहरणयोग्यधनाभावादिति भावः।

(घ) विदू इति। स्वप्ने उच्चारणमुत्स्वप्नः, तं करोतीति उत्स्वप्नायते स्वप्ने प्रलपतीत्यर्थः। "शब्दादीनि करोति" इति करोत्यर्थे क्यङ्, शब्दादीनां नाम-गणत्वात्। सुवर्णभाण्डं स्वर्णालङ्कारम्। मदपेक्षया भवता सावधानतया रक्षणीयत्वादिति भावः।

াক এটা নাট্যশিক্ষকের বাড়ী। অথবা গৃহস্থের বাড়ীর বিশ্বাসে প্রবেশ করিয়াছি। তবে কি এই গৃহস্থ বাস্তবিকই দরিদ্র ; না রাজার ভয়ে কিম্বা চোরের ভয়ে ধন, ভূগর্ভে লুক্কায়িত করিয়া রাখিয়াছে। তা, আমি শর্বিলক ; আমার কাছে আবার ধন, মাটীতে লুকান ?। হউক, সর্ষপ, নিক্ষেপ করি (সর্ষপ নিক্ষেপ করিয়া) নিক্ষিপ্ত সর্ষপ কোথাও ত ফুটিয়া উঠিতেছে না। ওহে ! এ ব্যক্তি বাস্তবিকই দরিদ্র। হউক এখন চলিয়া যাই।

বিদূষক। (স্বপ্নের ভিতরে বলিতে লাগিল) বয়স্য সন্ধি যেন দৃষ্টি

शर्वि। किं नु खलु अयमिह मां प्रविष्टं ज्ञात्वा दरिद्रोऽस्मीत्युपहसति ?। तत् किं व्यापादयामि ? उत लघुत्वादुत्स्वप्नायते। दृष्ट्वा। अये ! जर्जर-स्नानशाटीनिबद्धं दीपप्रभयोद्दीपितं सत्यमेवैतदलङ्करणभाण्डम्। भवतु, गृह्णामि। अथवा न युक्तं तुल्यावस्थं कुलपुत्रजनं पीड़यितुम्। तद्गच्छामि। (ङ)

(ङ) शर्व्विं इति। उपहसतीति। यस्य पित्तलभाण्डमपि न दृश्यते, तस्यैव सुवर्णभाण्डग्रहणोपदेशादुपहास इति बोध्यम्। तत् तस्मादुपहासकरणात् लघुत्वादात्मनो गाम्भीर्यराहित्यात्। जर्जरा पुरातनत्वेन जीर्णा या स्नानशाटी स्नानकालीनपरिधेयवस्त्रं तेन निबद्धं। अलङ्करणभाण्डम् अलङ्कारपात्रम्। तुल्या मत्समाना अवस्था दीनदशा यस्य तम्, कुलपुत्रजनं सत्कुलजातं लोकम्।

গোচর হইতেছে এবং চোর যেন দেখিতেছি ; অতএব তুমি এই স্বর্ণালঙ্কার গ্রহণ কর।

শর্বিলক। এই ব্যক্তি, 'আমি এখানে প্রবেশ করিয়াছি' ইহা জানিয়াই কি 'আমি দরিদ্র' এইভাবে আমাকে উপহাস করিতেছে ? তবে কি ইহাকে মারিয়া ফেলিব ? অথবা এ লোকটা লঘু (হালকা) বলিয়া স্বপ্নের ভিতরে কথা বলিতেছে। (দেখিয়া) ওহে জীর্ণ স্নানশাটী দ্বারা বদ্ধ সত্যই ইহা স্বর্ণালঙ্কার দীপের আলোকে প্রকাশিত হইয়াছে হউক গ্রহণ করি। অথবা এক রকম অবস্থার লোক, বিশেষতঃ সদ্বংশজাত ; সুতরাং ইহাকে উৎপীড়িত করা সঙ্গত নহে। অতএব এখন যাই।

विदू। भो वअस्स ! साविदोसि गोवम्हणकामाए, जइ एदं सुवस्सभण्डअं ण गेण्हसि। (च)

शर्वि। अनतिक्रमणीया भगवती गोकाम्या ब्राह्मणकाम्या च। तद् गृह्णामि। अथवा ज्वलति प्रदीपः, अस्ति च, मया प्रदीपनिर्वापणार्थमाग्नेयः कीटो धार्य्यते। तं तावत् प्रवेशयामि, तस्यायं देशकालः। एष मुक्तो मया कीटो यात्वेव अस्य दीपस्य उपरि मण्डलैर्विचित्रैर्विचरितुम्। एष पक्षद्वयानिलेन निर्वापितो भद्रपीठेन, धिक् कृतमन्धकारम्। अथवा मयापि

(च) भो वयस्य ! शापितोऽसि गोब्राह्मणकाम्यया, यदि एतत् सुवर्णभाण्डं न गृह्णासि।

(च) विदू इति। शापितोऽसि शपथं कारितोऽसि, गौश्च ब्राह्मणश्च तौ तयोः काम्यया अभिलाषेण। तथा च गोब्राह्मणस्य च अभिलाषभङ्गे यत् पातकम्, एतस्य अग्रहणेऽपि तदेव तव पातकं भवेदिति भावः।

(छ) शर्वि इति। भगवती उभयोरपि माहात्म्यात् माहात्म्यवती, गोकाम्या गोरभिलाषभङ्गः, ब्राह्मणकाम्या ब्राह्मणस्य अभिलाषभङ्गश्च। ज्वलति प्रदीपः, अत-एवेदानीमेव ग्रहणे अन्येषां दर्शनसम्भवात् न गृह्णामि इति भावः। आग्नेयः अग्निनिर्वापणकारी, कीटो धार्य्यते, स चास्तीत्यन्वयः। प्रवेशयामि प्रदीप प्रभामण्डलाभ्यन्तरे इति शेषः। देशेन युक्तः कालो देशकालः, मध्यपदलोपी समासः, तादृशकीटप्रवेशनस्य इदं स्थानं अयं समयश्चेत्यर्थः, तन्निवारका-भावात् इदानीमेवालङ्कारस्यापहार्य्यत्वाच्चेति भावः। यात्वेव गच्छतु एव। भद्र-

বিদূষক। বয়স্য ! আমি তোমাকে গরু ও ব্রাহ্মণের অভিলাষ দ্বারা শপথ করাইতেছি, যদি এই অলঙ্কার গ্রহণ না কর।

শর্বিলক। গরুর অভিলাষ ও ব্রাহ্মণের অভিলাষের গুরুতর মহাত্মা

अस्मद्ब्राह्मणकुले न धिक् कृतमन्धकारम्? अहं हि चतुर्वेदविदोऽप्रतिग्राहकस्य पुत्रः शर्विलको नाम ब्राह्मणो गणिकामदनिकार्थमकार्य्यमनुतिष्ठामि। इदानीं करोमि ब्राह्मणस्य प्रणयम्। इति जिघृक्षति। (क)

पीठेन तदाख्येन कीटेन कर्त्रा, पक्षद्वयस्य अनिलेन वायुना करणेन, एष प्रदीपो निर्वापितः, तथैव च अन्धकारं कृतम्। धिगिति तत्कार्य्यनिन्दायाम्। "अन्धकारोऽस्त्रियां ध्वान्तम्" इत्यमरः। इतो निर्वेदोदयादाह अथवेति। मयापि, न केवलमनेन कीटेनेति भावः, अस्मद्ब्राह्मणकुले अन्धकारम् अन्धकारवत् पापमालिन्यं न कृतमिति काकुः, न कृतं किम्? अपि तु कृतमेवेत्यर्थः। अतएव मां धिक् हि यस्मात्। अप्रतिग्राहकस्य असद्दातृत्वसंशयेन पापभयात् कुतश्चिदपि प्रतिग्रहमपि अकृतवत इत्यर्थः। अकार्य्यं चौर्य्यरूपम्। अनुतिष्ठामि करोमि। इतोऽधिकः को नामाधःपात इति भावः। प्रणयं प्रार्थनां प्रार्थनापूरणमित्यर्थः। जिघृक्षति ग्रहीतुमिच्छति।

রহিয়াছে; সুতরাং তাহা অতিক্রম করা যায় না; অতএব গ্রহণ করি। অথবা প্রদীপ জ্বলিতেছে; প্রদীপ নির্বাণের জন্য আমি আগ্নেয় কীট রাখিয়া থাকি, তাহা আমার নিকট আছেও; তাহাকেই প্রেরণ করি; সেই প্রেরণেরই এই স্থান এবং সময়। আমি এই সেই কীট ছাড়িয়া দিলাম; এই দীপের উপরে বিচিত্র মণ্ডলাকারে বিচরণ করিবার জন্য এই কীট চলিয়া যাক। ভদ্রপীঠনামক সেই কীট, পক্ষদ্বয়ের বায়ুদ্বারা এই দীপ নির্বাপিত করিল; হায়! অন্ধকার করিয়া ফেলিল। চতুর্বেদবিৎ এবং অপ্রতিগ্রাহীর পুত্র আমি শর্বিলক নামে ব্রাহ্মণ; এখন বেশ্যা মদনিকার জন্য অকার্য্যের অনুষ্ঠান করিতেছি। এখন ব্রাহ্মণের প্রার্থনা পূরণ করি। (এই বলিয়া গ্রহণ করিতে ইচ্ছা করিল।)

विदू। भो वअस्स! सीदलो दे अग्गहत्थो। (ज)

शर्वि। धिक् प्रमादः। सलिलसम्पर्कात् शीतलो मे अग्रहस्तः भवतु, कक्षयोर्हस्तं प्रक्षिपामि। नाट्येन सव्यहस्तमुष्णीकृत्य गृह्णाति। (झ)

विदू। गहिदं ?। (ञ)

शर्वि। अनतिक्रमणीयोऽयं ब्राह्मणप्रणयः। तद् गृहीतम्। (ट)

(ज) भो वयस्य! शीतलस्ते अग्रहस्तः।

(ञ) गृहीतम् ?।

अत्र मदनिकाया रतिभोगार्थसमीहाकरणात् विलासो नाम प्रतिमुखसन्ध्यङ्गम्,—"समीहा रतिभोगार्था विलास इति कथ्यते।" इति दर्पणलक्षणात्।

(ज विदू इति। हस्तस्याग्रमिति अग्रहस्तः। राजदन्तादित्वात् परनिपातः।

(झ) शर्वि इति। धिगित्यात्मनिन्दायाम्। प्रमादः अनवधानता, सञ्जात इति शेषः, हस्तमनुष्णीकृत्यैव ग्रहणे प्रवृत्तत्वादिति भावः। सलिलसम्पर्कात् कपाटे प्रक्षेपार्थं जलग्रहणात्। कक्षयोः पार्श्व—बाहुमूलयोरभ्यन्तर इति शेषः, प्रक्षिपामि तत्स्थानस्य स्वभावत एवोष्णत्वेन उष्णीकरणार्थमिति भावः। सव्यहस्तं दक्षिणहस्तम्। "सव्यं त्र दक्षिणे। वामे च प्रतिकूले च" इति विश्वः।

(ञ) विदू इति। गृहीतमिति काकुः गृहीतं किमित्यर्थः।

(ट) शर्वि इति। ब्राह्मणस्य प्रणयः प्रार्थना।

বিদূষক। বয়স্য! তোমার হস্তাগ্র যে শীতল।

শর্বিলক। হায়! অসাবধানতা হইয়াছে। জল স্পর্শ করায় আমার হস্তাগ্র শীতল হইয়াছে। হউক, কক্ষদেশে হস্তক্ষেপ করি। (অভিনয় অনুসারে দক্ষিণ হস্ত উষ্ণ করিয়া গ্রহণ করিল।)

বিদূষক। গ্রহণ করিয়াছ?।

विदू। दाणिं विक्किणिद-पण्णो विअ वाणिओ, अहं सुहं सुविस्सं । (ठ)

शर्वि । महाब्राह्मण! स्वपिहि वर्षशतम् । कष्टम्, एवं मदनिकागणिकार्थे ब्राह्मणकुलं तमसि पातितम् । अथवा आत्मा पातितः । (ड)

(ठ) इदानीं विक्रीतपण्य इव वाणिजः अहं सुखं स्वप्स्यामि ।

(ठ) विदू इति । विक्रीतं पण्यं विक्रेयद्रव्यं येन सः, वाणिजो वणिक् । अन्धकारावरणेन दर्शनाभावात् निद्रामोहेन च स्वरापरिज्ञानादित्थं विदूषकस्य व्यत्यय इति बोध्यम् ।

(ड) शर्वि इति महाब्राह्मण! निकृष्टब्राह्मण !। उक्तविधप्रलापैरात्मानो नितान्ताधमत्वप्रतिपादनात् प्रदीपस्थितिकाले ब्राह्मणोचिततिलकादिदर्शनाच्च ईदृशं सम्बोधनमुपपद्यत इत्यवधेयम् । तमसि घोरतमसावृते नरके । ननु एककृतेन पापेन कथं ब्राह्मणकुलसामान्यस्य पातितत्वं स्यादित्याह अथवेति । आत्मा स्वस्य जीवात्मा, पातितः पातित्यास्पदीकृतः, ब्राह्मणस्वामिकाशीतिरत्तिकापरिमितस्वर्णान्यूनस्वर्णस्तेयस्य शूलपाणिप्रभृतिभिः प्रायश्चित्तविवेकादौ महापातकत्वेन व्यवस्थापितत्वात् महापातकस्य च पातित्यजनकत्वादिति भावः ।

पातित्यमाह प्रायश्चित्ततत्त्वधृतम्—"पञ्चैतानि महापातकानि कृत्वा ब्राह्मणः सङ्गिनां नुभाष्यो नानुग्राह्यः अभिशस्तः सर्व्वकर्म्मविवर्जितः पतितसमो भवति ।"

শর্বিলক। এই ব্রাহ্মণের প্রার্থনা লঙ্ঘনীয় নহে। তাই গ্রহণ করিয়াছি।

বিদূষক। বিক্রীত-দ্রব্য বণিকের ন্যায় এখন আমি সুখে নিদ্রা যাইতে পারিব।

শর্বিলক। নিকৃষ্টব্রাহ্মণ! শতবর্ষ নিদ্রা যাও। হায় বেশ্যা মদ-

धिगस्तु खलु दारिद्र्यमनिर्वेदितपौरुषम्।
यदेतद्गर्हितं कर्म्म निन्दामि च करोमि च ॥१९॥

तद्यावत् मदनिकाया निष्क्रयणार्थं वसन्तसेनागृहं गच्छामि। परिक्रम्य अवलोक्य च। (ढ) अये! पदशब्द इव।

धिगिति। न निर्वेदितं कुत्रापि न ज्ञापितं पौरुषं पुरुषकारो येन तत् तादृशम्, दारिद्र्यं खलु धिगस्तु। यद् यस्मात् दारिद्र्यार्हेतोः, एतत् स्वयरूपं गर्हितं कर्म्म निन्दामि च गर्हितत्वादेव, करोमि च गणिकायै दानाय आवश्यकत्वादिति भावः।

अत्र दारिद्र्यस्य धिक्कारं प्रति अनिर्वेदित पौरुषपदस्यार्थो हेतुरिति पदार्थहेतुकं काव्यलिङ्गम्, निन्दामि-करोमीत्यनेकक्रियत्वे कर्म्मेत्येककारकत्वात् दीपकञ्च अनयोः परस्परनिरपेक्षतया संसृष्टिः। न च चकाराभ्यां क्रियासमुच्चय इति वाच्यम्, अतिशयोक्तिमूलकत्वाभावात् दर्पणकृदादिभिः क्रियासमुच्चयस्य अतिशयोक्तिमूलकत्वाङ्गीकारात् ॥१९॥

(ढ) तदिति। निष्क्रयणार्थं विमोचनार्थम् अस्यालङ्कारस्य प्रदानेन वसन्तसेनाया दासीत्वविनिर्मोक्षणार्थमित्यर्थः। अत्र परिसर्पो नाम प्रतिमुखसन्ध्यङ्गम्।

"इष्टनष्टानुसरणं परिसर्प इति कथ्यते" इति दर्पणलक्षणात्।

নিকার জন্য আমি ব্রাহ্মণ বংশকে অন্ধকারে নিপাতিত করিলাম। অথবা আপনাকে নিপাতিত করিলাম।

যাহাতে কুত্রাপি পুরুষকার প্রকাশ করা চলে না, সেই দারিদ্র্যকে ধিক্। যেহেতু এই গর্হিত কার্য্যের নিন্দাও করিতেছি আবার তাহা করিতেছিও ॥১৯॥

অতএব মদনিকাকে মুক্ত করিবার জন্য বসন্তসেনার বাড়ী যাই।

मा नाम रक्षिणः। भवतु, स्तम्भीभूत्वा तिष्ठामि। अथवा मम्मापि नाम शर्व्विलकस्य रक्षिणः?। योऽहम्। (ण)

मार्जारः क्रमणे, मृगः प्रसरणे, श्येनो ग्रहालुञ्चने,
सुप्तासुप्तमनुष्यवीर्य्यतुलने श्वा, सर्पणे पन्नगः।
माया रूप-शरीर- वेश-रचने, वाग् देशभाषान्तरे
दीपो रात्रिषु, सङ्कटेषु डुडुभो, वाजी स्थले, नौर्ज्जले ॥२०

(ण) अयि इति। पदशब्द इव श्रूयत इति शेषः। रक्षिणः—चौरप्रवेशरन्ध्रे हैन रथ्यात आगता राजधान्याः प्रहरिणः, मा नाम न भवन्तु इति शेषः। भवतु-रक्षिणामेवागमनमित्यर्थः, स्तम्भीभूत्वा प्रासादस्य स्तम्भाकारो भूत्वा। ननु तथात्वेऽपि यदि रक्षिणः परिचिनुयुरित्यत आह अथवेति। शर्व्विलकस्य समीपे, रक्षिणः प्रभवेयुरिति शेषः। सगर्व्वोक्तिरियम्।

मार्जार इति। क्रमणे पादविक्षेपे निःशब्दपादसञ्चारे इत्यर्थः, मार्जारो विड़ाल-स्वरूपः। प्रसरणे शीघ्रगमने, मृगो हरिणस्वरूपः। ग्रहेण युक्तमालुञ्चनं ग्रहालुञ्चनं तस्मिन् मध्यपदलोपी समासः वस्तुनो ग्रहणे छेदने चेत्यर्थः, श्येनस्तदाख्यहिंस्रपक्षि-रूपः। सुप्तस्य निद्रितस्य असुप्तस्य जागरितस्य च मनुष्यस्य वीर्य्यतुलने दृष्टिमात्रमेव बलनिरूपणे, श्वा कुक्कुरस्वरूपः, कुक्कुरो हि दृष्टिमात्रमेव अपरकुक्कुरस्य मनुष्यादेश्च बलं निरूपयितुमर्हति। सर्पणे रन्ध्रादिप्रवेशात्मकगमने, पन्नगः सर्परूपः। रूपस्य नीलपीतादिवर्णस्य, शरीरस्य स्त्रीपुरुषाकारस्य, वेशस्य नानादेशीयपरिच्छदस्य च रचने

(পাদক্ষেপ করিয়া দেখিয়া) ওহে! পদশব্দের ন্যায় শুনিলাম। রক্ষীরা যেন না হয়। হউক, স্তম্ভ হইয়া থাকি। অথবা আমি শর্ব্বিলক! আমার নিকট আবার রক্ষী?। যে আমি—

নিঃশব্দ পদসঞ্চারে বিড়াল, দ্রুতগমনে হরিণ, গ্রহণে ও ছেদনে শ্যেন-পক্ষী, নিদ্রিত ও জাগরিত মনুষ্যের বলনিরূপণে কুক্কুর, রন্ধ্র-প্রবেশে সর্প, নানাজাতীয় বর্ণ, স্ত্রী বা পুরুষের আকার এবং নানাদেশীয় বেশ

अपि च।

भुजग इव गतौ गिरिः स्थिरत्वे;
पतगपतेः परिसर्पणे च तुल्यः।

स्थाने, माया साक्षादिन्द्रजालिकविद्यास्वरूपः। देशभाषान्तरे नानादेशीयभाषाभेदे, वाक् साक्षात्सरस्वतीरूपः। रात्रिषु दीपः प्रदीपस्वरूपः; दीपो यथा रात्रौ प्रभावं प्राप्नोति, अहमपि तथैव रात्रौ प्रभावं प्राप्नोमीति भावः। सङ्कटेषु अन्याक्रमणादिना विपत्सु, डुडुमः शृगालस्वरूपः शृगालो यथा कुक्कुरादीनामाक्रमणे पलाय्य आत्मानं रक्षति, अहमपि तथैव अन्याक्रमणे पलाय्य आत्मानं रक्षामीति भावः। स्थले भूभागे, वाजी घोटकरूपः, तद्वदेव भारवहनक्षमः पराक्रमी चेत्याशयः। तथा जले नौर्नौकास्वरूपः, तथैव सन्तरणसमर्थ इत्यभिप्रायः।

अत्र एकस्य शर्विलकस्य क्रमणादिविषयभेदेन अनेकधोल्लेखात् रूपकयुक्त उल्लेखालङ्कारः "गाम्भीर्येण समुद्रोऽसि गौरवेणासि पर्व्वतः" इति दर्पणोदाहृतवत्। तथा सप्तम्येकवचनान्तप्रयोगमध्ये "रात्रिषु सङ्कटेषु" इति तद्बहुवचनान्तप्रयोगात् भग्नप्रक्रमतादोषः, समुच्चयार्थकश्चकारोऽवश्यं वक्तव्यः किन्तु नोक्त इति वाच्यानभिधानदोषश्च; 'वाजी भूमितले, जलेऽस्मि तरणिः, फेरुश्च दुःसङ्कटे' इति पाठे तु तयोः समाधानम् 'न च लिङ्गव्यत्ययादपि भग्नप्रक्रमतान्तरमिति वाच्यम्, उभयलिङ्गयोरपि बहुतरप्रयोगात्। अथवा तत्समाधानार्थमपि एवमेव पाठपरिवर्त्तनं विधेयम्।

डुडुमशब्दः कविदेशे शृगालार्थे प्रसिद्ध आसीदिति मन्महे।

शार्दूलविक्रीडितं वृत्तम् ॥२०॥

उक्तप्रायमेवार्थं भङ्ग्यन्तरेणाह भुजग इति। अहं गतौ अभ्यन्तरगमने, भुजगः सर्प इव; स्थिरत्वे धैर्य्ये, गिरिः पर्व्वत इव। उपमासन्दंशपातादपठितोऽपि इवशब्दो

এই সকল রচনায় মায়া, বিভিন্ন ভাষাতে সাক্ষাৎ সরস্বতী, রাত্রিতে দীপ, সঙ্কটে শৃগাল, স্থলে ঘোড়া এবং জলে নৌকা ॥২০॥

আর আমি গমনে সর্পের ন্যায়, স্থিরতায় পর্ব্বতের ন্যায় দ্রুতগমনে

शशः इव भुवनावलोकनेऽङ्क,
वृक इव च ग्रहणे, बले च सिंहः ॥२१॥

प्रविश्य रदनिका। हद्धी हद्धी वाहिर-दुयार-सालाए पसुत्तो वड्‌ढमाणओ, सोवि एत्थ ण दीसइ। भोदु, अज्जमित्तेअं सद्दावेमि। इति परिक्रामति। (त)

शर्विं। रदनिकां हन्तुमिच्छति। निरूप्य। कथं स्त्री। भवतु गच्छामि। इति निष्क्रान्तः। [थ]

(त) हा धिक् हा धिक्! वहिर्द्वार शालायां प्रसुप्तो वर्द्धमानकः, सोऽप्यत्र न दृश्यते। भवतु, आर्य्यमैत्रेयं शब्दापयामि।

गिरिशब्देनान्वीयते। पारसर्पणे द्रुतगमने पतगपतेर्गरुड़स्य च तुल्यः; भुवनावलोकने एकस्थानस्थ एव जगद्दर्शने शशो मृगविशेष इव; ग्रहणे इष्टवस्तुस्वीकारे, वृको व्याघ्रविशेष इव; बले च सिंह इव। उपमामाहचर्य्यात् सिंहशब्देनापि सह इव-शब्दोऽन्वीयते। अतएव का नाम रक्षिर्भ्यो मम भातिरिति भावः।

अत्रापि एकस्य शर्विलकस्य गत्यादिविषयभेदेन अनेकधोल्लेखान्मालोपमायुक्त उल्लेखालङ्कारः, साहित्यदर्पणादावुल्लेखालङ्कारस्य नियमेनालङ्कारान्तरयुक्तत्वाभिधानात्।

पुष्पिताग्रा वृत्तम् ॥२१॥

(त) प्रविश्येति। शब्दापयामि शब्देनाह्वयामि।

(थ) शर्विं इति। कथं स्त्री, अतएव न हन्तव्या, "अवध्याश्च स्त्रियं प्राहुस्तिर्य्यग्योनिगतेष्वपि" इति शास्त्रादिति भावः। निष्क्रान्तः सन्धिद्वारेणेति शेषः।

গরুড়ের ন্যায়, জগতের দর্শনে শশকের ন্যায়, গ্রহণে ব্যাঘ্রের ন্যায় এবং বলে সিংহের ন্যায় ॥২১॥

প্রবেশ করিয়া রদনিকা। হায় হায়! বহির্দ্বারের গৃহে বর্দ্ধমান নিদ্রা যাইতেছিল; তাহাকেও এখানে দেখিতেছি না। হউক, আর্য্য-মৈত্রেয়কে ডাকি। (এই বলিয়া পাদক্ষেপ করিতে লাগিল)।

रद । गत्वा सवासम् । हद्धी हद्धी अम्हाणं गेहे सन्धिं कप्पिअ चोरो णिक्कमदि । विदूषकमुपगम्य । अज्जमित्तेअ ! उट्ठेहि उट्ठेहि ; अम्हाणं गेहे सन्धिं कप्पिअ चोरो णिक्कन्तो । [द]

विदू । उत्थाय । आः दासीए धीए ! किं भणासि 'चोरं कप्पिअ सन्धी णिक्कन्तो ?" ।[ध]

(द) हा धिक् हा धिक् ! अस्माकं गेहे सन्धिं कल्पयित्वा चौरो निष्क्रामति । आर्य्यमैत्रेय ! उत्तिष्ठ उत्तिष्ठ; अस्माकं गेहे सन्धिं कल्पयित्वा चौरो निष्क्रान्तः ।

(ध) आः दास्याः पुत्रि ! किं भणसि 'चौरं कल्पयित्वा सन्धि-र्निष्क्रान्तः ?' ।

(द) रद इति । गत्वा सन्धिद्वारपर्य्यन्तमिति शेषः कल्पयित्वा निर्म्माय ।

(ध) विदू इति । "हास्यकरः कलहरतिर्विदूषकः स्यात् स्वकर्म्मज्ञः" इत्युक्त-स्वभावतया विपत्प्रस्तावेऽपि विदूषकस्य परिहासोक्तिरिति बोध्यम् ।

শর্বিলক। (রদনিকাকে হত্যা করিতে ইচ্ছা করিল; পরে নির্ণয় করিয়া) এ যে স্ত্রীলোক। হউক এখন চলিয়া যাই। (ইহার পর চলিয়া গেল।)

রদনিকা। (যাইয়া ত্রাসের সহিত) হায় হায়! আমাদের ঘরে সিঁধ কাটিয়া চোর বাহির হইয়া যাইতেছে। (বিদূষকের নিকট গিয়া আর্য্যমৈত্রেয়! উঠুন উঠুন, আমাদের ঘরে সিঁধ কাটিয়া চোর বাহির হইয়া গেল।

বিদূষক। (উঠিয়া) আ দাসীর মেয়ে! কি বলিতেছিস্ 'চোর কাটিয়া সিঁধ বাহির হইয়া গেল?।'

রদ। হদাস! অলং পরিহাসেন। কিং ণ পিক্খসি এণং?। [ন]

বিদূ। আঃ দাসীএ ধীএ! কিং ভণাসি, দুদীঅং বিঅ দুআরঅং উগ্ঘাড়িদং ত্তি। ভো বঅস্স! চারুদত্ত! উট্ঠেহি, উট্ঠেহি অমহ্মাণং গেহে সন্ধিং দইঅ চোরো ণিক্কন্তো।[প]

চারু। ভবতু। ভোঃ! অলং পরিহাসেন। (ফ)

(ন) হতাশ! অলং পরিহাসেন। কিং ন প্রেক্ষসে এনম্?।

(প) আঃ দাস্যাঃ পুত্রি! দ্বিতীয়মিব দ্বারকম্ উদ্ঘাটিতমিতি। ভো বয়স্য! চারুদত্ত! উত্তিষ্ঠ উত্তিষ্ঠ। অস্মাকং গেহে সন্ধিং দত্ত্বা চৌরো নিষ্ক্রান্তঃ।

অতএবাত্র নর্ম্ম নাম প্রতিমুখসন্ধ্যঙ্গম্— "পরিহাসবচো নর্ম্ম" ইতি দর্পণলক্ষণাৎ।

(প) বিদূ ইতি। দ্বারকং দ্বারম্। অজ্ঞানে কপ্রত্যয়ঃ।

(ফ) চারু। ভবতু অসময়ে নিদ্রাভঙ্গ ইতি শেষঃ; অনেন তস্য বাক্যশ্রবণে কৃতে কা পুনরন্যা গতিরিতি ভাবঃ। মম দারিদ্র্যদশায়াঃ সর্ব্বৈরেব বিদিততয়া কিমর্থং চৌরঃ প্রবিশেদিতি মৈত্রেয়স্যোক্তিঃ পরিহাসায়ৈবেতি মন্যমান আহ "অলং পরিহাসেন" ইতি।

রদনিকা। হতাশ! পরিহাসের প্রয়োজন নাই। এই সিঁধ দেখিতেছ না কি?।

বিদূষক। আ দাসীর মেয়ে! বলিতেছিস্ কি! আর একখানা দ্বার যেন উদ্ঘাটন করিয়া ফেলিয়াছে। সখে! চারুদত্ত! উঠ উঠ; আমাদের ঘরে সিঁধ দিয়া চোর বাহির হইয়া গিয়াছে।

চারুদত্ত। হউক সখে! পরিহাসে প্রয়োজন নাই।

विदू। भो! ण परिहासो। पेक्खदु भवं। (व)

चारु। कस्मिन्नुद्देशे?। (भ)

विदू। भो! एसो। (म)

चारु। विलोक्य। अहो! दर्शनीयोऽयं सन्धिः। (य)

उपरितलनिपातितेष्टकोऽयं शिरसि तनुर्विपुलश्च मध्यदेशे।
असदृश-जन-सम्प्रयोगभीरोर्हृदयमिव स्फुटितं महागृहस्य ॥ २२ ॥

(व) भो! न परिहासः प्रेक्षतां भवान्।

(म) भोः! एषः।

(भ) चारु इति। उद्देशे देशे स्थाने इति यावत्, सन्धिरिति शेषः।

(य) चारु इति। दर्शनीय आग्रहेण दर्शनयोग्यः, विशेषनैपुण्यनिर्म्मितत्वेन सुन्दरत्वादिति भावः।

उपरीति। उपरि ऊर्द्ध्वदेशात् तलादधोदेशाच्च निपातिता इष्टका यस्य सः; अतएव मध्यदेशादिष्टकाः स्वयमेव पतिता इति भावः। अतएव च शिरसि उपरिभागे तनुः स्वल्पविस्तारः, मध्यदेशे च विपुलो विशालविस्तारः। तथा च उपरिभागादधोभागाच्च इष्टकापातनेन मध्येष्टकानां स्वयमेव संयोगशैथिल्यान्नि-रवलम्बनतया अनियतभावेन पतनान्मध्यदेशे विशालो भूतः, अत एवाधोदेशेऽपि तनुरेवेति भावः। यदुक्तं शर्व्विलकेनैव—'तदत्र पक्केष्टके पूर्णकुम्भ एव शोभते;

বিদূষক। সখে! পরিহাস নহে; তুমি দেখ।

চারুদত্ত। কোন্ জায়গায়?

বিদূষক। সখে! এই যে।

চারুদত্ত। (দেখিয়া) ওহে! এই সন্ধিটি দৃশ্য বটে।
উপর ও নীচ হইতে ইট ফেলিয়া দিয়াছে; তাহাতে উপরে ও নীচে

कथमस्मिन्नपि कर्म्मणि कुशलता । (र)

विदू । भो वअस्स ! अअं सन्धी दुवेहिं ज्जेव दिसोभवे । अदु आगन्तुएण सिक्खिदुकामेण वा ! अण्णधा इध उज्जइणीए को अम्हाणं घरविहवं ण जाणादि ? । (ल)

(ल) भो वयस्य ! एष सन्धिर्द्वाभ्यामेव दत्तो भवेत् अथवा आगन्तुकेन शिक्षितुकामेन वा । अन्यथा इह उज्जयिन्यां कः अस्माकं गृहविभवं न जानाति ?

तमुत्पादयामि " इति । तथा च असद्दृशजनस्य पातकित्वात् स्वाभ्यन्तरप्रवेशे अयोग्यलोकस्य चौरस्य यः सम्प्रयोगः संसर्गस्तस्माद् भीरोर्भयशीलस्य, महागृहस्य हर्म्मातया मदीयप्रशस्तभवनस्य, हृदयं वक्षःस्थलम् स्फुटितं विदीर्णमिव जातमिति श्लेषः ; तस्यैव द्वारं सन्धिरूपेणेदं प्रकाशत इति भावः ।

अत्र क्रियोत्प्रेक्षालङ्कारः । पुष्पिताग्रा वृत्तम् ॥ २२ ॥

(र) कथमिति । अस्मिन् कर्म्मण्यपि निकृष्टत्वादनादरणीये सन्धिनिर्म्माणकार्य्येऽपि, कुशलता नैपुण्यम् ; सुतरां स्वभावत एवायं निपुणश्चौर इति भावः ।

(ल) विदू इति । उक्तौ द्वावेव विभजते अथवेति । अत्र अथवाशब्दो वाशब्दवदिकल्पार्थे । तथा च आगन्तुकेन देशान्तरादागतेन वा देशान्तरादागतत्वेन अज्ञातोज्जयिनीवृत्तान्ततया तवावस्थामपि अजानता जनेन वेत्यर्थः ; शिक्षितुकामेन वा, नूतनं सन्धिनिर्म्माणमिति शेषः । गृहस्य विभवं धनम् ।

ছোট, এবং মাঝখানে বড় হইয়াছে। সুতরাং অযোগ্য লোকের (চোরের) সংসর্গ করিতে ভীরু এই উৎকৃষ্ট গৃহের হৃদয় যেন বিদীর্ণ হইয়া গিয়াছে ॥২২॥

অ্যাঁ ! একার্য্যেও দক্ষতা ! ।

বিদূষক। বয়স্য ! এই সিঁধ দুই রকম লোকের দেওয়া হইবে ।

चारु। वैदेश्येन कृतोभवेन्मम गृहे व्यापारमभ्यस्यता,
नासौ वेदितवान् धनैर्विरहितं विस्रब्धसुप्तं जनम्।
दृष्ट्वा प्राङ्महतीं निवासरचनामस्माकमाशान्वितः—
सन्धिच्छेदनखिन्न एव सुचिरं पश्चान्निराशो गतः ॥२३॥

विदूषकोक्तिमेवाङ्गीकुर्वन्नाह वैदेश्येनेति। वैदेश्येन भिन्नदेशोत्पन्नेन, जनेन अथवा व्यापारं नवं सन्धिनिर्म्माणकार्य्यम्, अभ्यस्यता शिक्षमाणेन जनेन; मम गृहे कृतोभवेत्; अयं सन्धिरिति शेषः। ननु कुत इदमनुमानमित्याह—असौ सन्धिकारो जनः, धनैर्विरहितम्, अतएव विस्रब्धसुप्तं निःशङ्कभावेन निद्रितं जनम्, न वेदितवान् न ज्ञातवान; एतद्देशवासिभिर्हि मम निर्धनत्वमवश्यमेव वेद्यात् तथा च सन्धिं न कुर्य्यादिति भावः। प्राक् पूर्वं महतीमस्माकं निवासरचनां भवननिर्म्माणम्, दृष्ट्वा, आशान्वितः 'अत्र प्रचुरधनमस्ति, तच्चापहरामि, इत्यमाशाविशिष्टः, सुचिरम् दीर्घकालम्, अन्यथा कथमीदृशः सुन्दरः सन्धिः स्यादिति भावः, सन्धिच्छेदनेन खिन्नः परिश्रान्त एव सन्, पश्चात् निराशो गतः, कियतोऽपि मूल्यवतो द्रव्यस्यादर्शनादित्याशयः।

अत्र प्रथमचरणार्थं प्रति द्वितीयचरणगतवाक्यार्थो हेतुरिति वाक्यार्थहेतुकं काव्यलिङ्गम्, तथा विस्रब्धसुप्तत्वं प्रति 'धनैर्विरहितम्' इति पदस्यार्थो हेतुरिति पदार्थहेतुकं काव्यलिङ्गञ्च; तदुभयकृतविच्छित्तिवशाच्च निर्धनत्वानवगमरूपसाध-

---

এক বিদেশ হইতে আগত লোকের, অথবা শিক্ষাভিলাষী দেশীয় লোকের না হইলে, এই উজ্জয়িনীতে কোন্ ব্যক্তি, আমাদের ঘরের বৈভব না জানে?।

চারুদত্ত। বিদেশীয় কোন লোক কিম্বা শিক্ষাভিলাষী কোন লোক আমার গৃহে এই সন্ধি নির্ম্মাণ করিয়া থাকিবে; যেহেতু ঐ লোক, এই গৃহ যে ধনহীন বা ইহাতে লোকেরা নিরুদ্বেগে নিদ্রা যাইতেছে, ইহা

ততঃ সুহৃজ্জনঃ কিমসৌ কথয়িষ্যতি তপস্বী 'সার্থবাহসুতস্য গৃহং প্রবিশ্য ন কিঞ্চিন্ময়া সমাসাদিতম্" ইতি । (ব)

বিদূ । ভো ! কধং তং জ্জেব চোরহদঅং অণুসোচসি । তেণ চিন্তিদং মহন্তং এদং গেহং, ইদো রঅণভণ্ডঅং সুবণ্ণভণ্ডঅং বা ণিক্কামইস্সামি । অ,লা সবিষাদমাত্মগতম্ । কহিং তং সুবণ্ণ-ভণ্ডঅং । পুনরনুস্ম,ত্য । ভো বঅস্স ! তুমং সব্বকালং ভণাসি

(শ) ভোঃ ! কথং তমেব চৌরহতকমনুশোচসি । তেন চিন্তিতম,—

নেন তস্করস্য বৈদৈশ্যত্বরূপসাধ্যস্যানাদনুমানালঙ্কারঃ । তথা প্রথমপাদে সন্ধিবোধক-পদানভিধানাদিকঃ বিকল্পার্থকবাশব্দানভিধানাচ্চাপরো ন্যূনপদতাদোষঃ, এবং চৌর্য্যমিতি ব্যাপারবিশেষে বক্তব্যে ব্যাপারমিতি সামান্যাভিধানাত্ বিশেষে অবিশেষা-খ্যদোষশ্চ ; 'বৈদেশ্যেন কৃতো গৃহেঽয়মথবা মে চৌর্য্যশিক্ষার্থিনা' ইতি পাঠে তু তেষাং সমাধানম্ ।

শার্দূলবিক্রীড়িতং বৃত্তম্ ।।২৩।।

(ব) তত ইতি । অসৌ সন্ধিকারী জনঃ । তপস্বী শোচ্যঃ, মহতোঽপি পরিশ্রমস্য নিষ্ফলত্বাদিতি ভাবঃ । সার্থবাহসুতস্য বাণিজ্যব্যবসায়িনঃ পুত্রস্য ।

(শ) বিদূ ইতি । হতকো হতাশশ্চাসৌ চৌরশ্চেতি চৌরহতকঃ, 'অপ্রিয়লৌকঃ'

জানিত না । প্রথমে আমাদের প্রকাণ্ড বাড়ী দেখিয়া আশান্বিত হইয়াছিল, পরে দীর্ঘকাল যাবৎ সন্ধিচ্ছেদনে কেবল পরিশ্রান্ত এবং নিরাশ হইয়া চলিয়া গিয়াছে ।।২৩।।

সুতরাং ঐ দুঃখী লোকটা বন্ধুগণের নিকট কি বলিবে যে 'আমি বাণিজ্যব্যবসায়ীর পুত্রের বাড়ীতে প্রবেশ করিয়া কিছুই পাই নাই ?।'

বিদূষক । সখে ! তুমি সেই হতাশ চোরটাকে লক্ষ্য করিয়া

मुक्खो मित्तेअओ, अपण्डिदो मित्तेअओ त्ति। सुट्ठु मए किदं तं सुवस्सभण्डअं भवदो हत्थे समप्पअन्तेण। अस्सधा दासीए पुत्तेण अवहिदं भवे। (अ)

चारु। अलं परिहासेन। (ब)

विदू। भो! जह णाम अहं मुक्खो, ता किं परिहासस्सवि देसआलं ण जाणामि?। (स)

महदेतद् गेहम्, इतो रत्नभाण्डं सुवर्णभाण्डं वा निष्क्रामयिष्यामि। कुत्र तत् सुवर्णभाण्डकम् भो वयस्य! त्वं सर्वकालं भणसि, —'मूर्खो मैत्रेयः, अपण्डितो मैत्रेयः' इति। सुष्ठु मया कृतं तत् सुवर्णभाण्डं भवतो हस्ते समर्पयता। अन्यथा दास्याः पुत्रेण अपहृतं भवेत्।

(स) भोः! यथा नाम अहं मूर्खः, तत् किं परिहासस्यापि देशकालं न जानामि?।

इत्यादिवत् विशेषणस्य परनिपातः। समर्पयतेति। अता बुद्धिमत एव कार्यस्य कृतत्वात् अतः परं मां मूर्खादिकं न ब्रूया इति भाव। दास्याः पुत्रेण सन्धिकारिणा।

(ब) चारु इति। मम हस्ते असमर्पणादयं तव परिहास एवेति भावः।

শোক করিতেছ কেন?। সে চিন্তা করিয়াছিল যে, এখানা প্রকাণ্ড বাড়ী; এ বাড়ী হইতে রত্নের ভাণ্ড বা সোনার ভাণ্ড বাহির করিব। (স্মরণ করিয়া বিষাদের সহিত স্বগত) সেই স্বর্ণালঙ্কার কোথায়?। (পুনরায় স্মরণ করিয়া) সখে! তুমি সকল সময়েই আমাকে বলিয়া থাক যে, "মৈত্রেয় মূর্খ, মৈত্রেয় অপণ্ডিত"। সেই স্বর্ণালঙ্কার তোমার হাতে দিয়া, আমি ভাল করিয়াছি; না হইলে বাঁদীর পো চোর তাহা অপহরণ করিত।

চারুদত্ত। পরিহাসে প্রয়োজন নাই।

चारु । कस्यां वेलायाम् ? । (ङ)

विदू । भो ! जदा तुमं मए भणिदोऽसि, —सीदलो दे अग्गहत्थो । (च)

चारु । कदाचिदेवमपि स्यात् ? । सर्वतो निरूप्य सहर्षम् वयस्य दिष्ट्या ते प्रियं निवेदयामि । (क)

विदू । किं ण अवहिदं ? । (ख)

(च) भोः ! यदा त्वं मया भणितोऽसि, —शीतलस्ते अग्रहस्तः ।

(ख) किं न अपहृतम् ? ।

(ख) विदू इति । यद्या यदि । 'अत्र परिहासस्य न देशकालः' इति जानाम्येवेति भावः । देशे न युक्तः काल इति देशकालः । मध्यपदलोपी समासः ।

(ङ) चारु इति । वेलायां समये ; समर्पितवानिति शेषः ।

(क) चारु इति । एवम् अनेनापितम्, स्यात् भवेत् । अपिशब्दः सम्भावनायाम् इत्थं सम्भावयामीत्यर्थः । दिष्ट्या भाग्येन ।

(ख) विदू । अपहृतं तदलङ्करणमिति शेषः ।

বিদূষক। যদিও আমি মূর্খ হই, তথাপি পরিহাসের জায়গা বা সময় কি বুঝি না ? ।

চারুদত্ত। কোন্ সময় দিয়াছিলে ? ।

বিদূষক। সখে ! যখন আমি তোমাকে বলিয়াছিলাম যে, 'তোমার হস্তাগ্র শীতল।'

চারুদত্ত। এরূপও কি কখন হয় ? । (সকল দিক্ দেখিয়া হর্ষের সহিত) বয়স্য ! ভাগ্যক্রমে তোমার প্রীতিকর সংবাদ জানাইতেছি।

বিদূষক। কি অপহরণ করে নাই ? ।

चारु। हृतम्।

विदू। तधा वि किं पिअं ?। (ग)

चारु। यदसौ कृतार्थो गतः। (घ)

विदू। णासो क्खु सो। (ङ)

चारु। कथं न्यासः। मोहमुपगतः। (च)

विदू। समस्ससदु भवं। जइ णासो चोरेण अवहिदो, तुमं किं मोहं उवगदो ?। (छ)

(ग) तथापि किं प्रियम् ?।

(ङ) न्यासः खलु सः।

(छ) समाश्वसितु भवान्। यदि न्यासश्चौरेणापहृतः, त्वं किं मोहमुपगतः ?।

(घ) चारु। असौ तस्करः, कृतार्थः तदलङ्करणापहरणेन निष्पादितप्रयोजनः। एतदेव प्रियमिति भावः। एतेन चारुदत्तस्य परदुःखकातरत्वमुदारत्वञ्च व्यज्यते।

(ङ) विदू इति। सः अलङ्कारः खलु न्यासः वसन्तसेनाया निक्षेपः। अतस्तदपहरणेन निःस्वतया तत्समानमूल्यालङ्कारान्तरदानासम्भवः, तदृदाने च न्यासापहरणदोष इति न तन्निवेदन कथमपि प्रियं भवितुमर्हतीति भावः।

(च) चारु इति। एतेन विस्मरणवशादेव पूर्वं प्रियमित्युक्तमिति बोध्यम्।

চারুদত্ত। অপহরণ করিয়াছে।

বিদূষক। তাহা হইলে আর প্রিয় কি ?।

চারুদত্ত। যে হেতু, ঐ চোর, প্রয়োজন সাধন করিয়া গিয়াছে।

বিদূষক। সে যে গচ্ছিত ছিল।

চারুদত্ত। হায়! তাহা গচ্ছিত ছিল!। (মূর্চ্ছিত হইলেন)

चारु। समाश्वस्य। वयस्य !

कः श्रद्धास्यति भूतार्थं सर्वो मां तूलयिष्यति ।
शङ्कनीया हि लोकेऽस्मिन् निष्प्रतापा दरिद्रता ॥२४॥

भोः ! कष्टम् ।

यदि तावत् कृतान्तेन प्रणयोऽर्थेषु मे कृतः ।
किमिदानीं नृशंसेन चारित्रमपि दूषितम् ॥२५॥

क इति। को जनः, भूतार्थं 'चौर एव तं न्यासभूतमलङ्कारं हृतवान्' इति यथार्थवृत्तान्तम्, श्रद्धास्यति विश्वसिष्यति, कोऽपि नेत्यर्थः महामूल्यतया सावधानभावेन रक्षणसम्भवादिति भावः। किन्तु सर्वो जनः, माम्, तुलयिष्यति तुलवत् लघुं करिष्यति 'दरिद्रोऽयं स्वयमपहृत्य चौरे अपवादमारोपयति' इतिसमालोचयन् मम लघुत्वं जनयिष्यतीत्यर्थः। हि यस्मात्, अस्मिन् लोके, निष्प्रतापा तेजःप्रकाशसम्भावनयापि रहिता, दरिद्रता शङ्कनीया समस्ताशङ्काविषयीभूता, अतो मम तादृशापवादः शङ्कनीय एवेति भावः।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः।

'भूतं सत्योपमानयोः" इत्यादि हैमः। तूल इव तूलस्तं करिष्यतीति 'इन् कारितं धात्वर्थे' इति इन् ॥२४॥

यदीति। कृतान्तेन दैवेन, मे मम अर्थेषु धनेषु यदि तावत्, प्रणयः प्रेम

বিদূষক। তুমি আশ্বস্ত হও। যখন গচ্ছিত ধন চোরে নিয়াছে, তখন তুমি মূৰ্চ্ছিত হইলে কেন ?।

চারুদত্ত। (চৈতন্য লাভ করিয়া) সখে !

যথার্থ ঘটনা, কে বিশ্বাস করিবে ? কিন্তু সকলেই আমাকে তুলার ন্যায় লঘু মনে করিবে। কারণ, এই জগতে প্রভাববিহীন দারিদ্র্যকে সকলেই আশঙ্কা করে ॥২৪॥

विदू । अहं क्खु अवलविस्सं,—केण दिण्णं ? केण गहिदं ? को वा सक्खि ? त्ति । (ञ)

चारु । अहमिदानीमनृतमभिधास्ये ? । (झ)

भैक्षेणाप्यर्जयिष्यामि पुनर्न्यासप्रतिक्रियाम् ।
अनृतं नाभिधास्यामि चारित्रभ्रंशकारणम् ॥२६॥

(ञ) अहं खलु अपलपिष्यामि, 'केन दत्तम् ? केन गृहीतम् ? को वा साक्षी ? इति ।

प्रेमाबद्धग्रहणमित्यर्थः, कृतः । करोतु तदप्यङ्गीकरोमीति भावः । किन्तु नृशंसेन क्रूरेण तेन कृतान्तेनेति शेषः, इदानीं किं कस्मात्, चारित्रमपि मम चरित्रमपि दूषितं दूषितत्वेन प्रख्यापितम् 'चारुदत्तो न्यासमपहृत्य चरित्रभ्रष्टो जातः' इति निन्दा प्रख्यापितेत्यर्थः, एतदेव कष्टमिति भावः । एतेन चारुदत्तो धनाच्चरित्रं बहु मन्यत इति ध्वनितम् ॥२५॥

(ञ) विदू इति । अपलपिष्यामि मिथ्यात्वेन अपकृष्टं वदिष्यामि, वसन्तसेनाया पुनस्तद्ग्रहणेच्छायां कृतायामिति शेषः ।

(झ) चारु इति । अनृतं मिथ्या, अभिधास्ये वदिष्यामि किमिति काकुः ।

मिथ्याभिधानाभावे तन्न्यासपरिशोधस्य क उपाय इत्याह भैक्षेणेति । भैक्षेणापि भिक्षावृत्त्यापि, न्यासस्य वसन्तसेनाया निक्षिप्तधनस्य प्रतिक्रियां परिशोधं परिशोध-

---

হায়! কি কষ্ট! যদিও বিধাতা আমার ধনে ভালবাসা করিয়াছেন (ভালবাসিয়া তাহা হরণ করিয়াছেন, তাহা করুন) কিন্তু সেই নিষ্ঠুর বিধাতা এখন আমার চরিত্রও, দূষিত করিলেন কেন ॥২৫॥

বিদূষক। নিশ্চয়ই আমি বলিব—'কে দিয়াছে ? কে গ্রহণ করিয়াছে ? কেই বা সাক্ষী ? ।'

চারুদত্ত। আমি এখন মিথ্যা বলিব ? ।

বরং আমি ভিক্ষা করিয়াও, বসন্তসেনার গচ্ছিত অলঙ্কারের পরি-

রদ। তা জাব অজ্জাধূদাএ গদুঅ ণিবেদেমি।
ইতি নিষ্ক্রান্তা। (ঠ)

ততঃ প্রবিশতি চেট্যাসহ চারুদত্তবধূঃ।

বধূঃ। সসম্ভ্রমম্‌। অই। সচ্চং অবরিক্খদসরীরো অজ্জ-উত্তো অজ্জমিত্তেএণ সহ ?। (ট)

(ঠ) তদ্‌ যাবত্‌ আর্য্যধূতায়ৈ গত্বা নিবেদয়ামি।

(ট) অয়ি ! সত্যম্‌ অপরিক্ষতশরীর আর্য্যপুত্র আর্য্যমৈত্রেয়েণ সহ ?

যোগ্যং ধনমিত্যর্থঃ, পুনরর্জয়িষ্যামি ; তথাপি চারিত্রভ্রংশকারণং মত্কৃতং বিচ্যুতিহেতুভূতম্‌, অনৃতং মিথ্যা, ন অভিধাস্যামি ন বদিষ্যামি, চারিত্রভ্রংশস্য উভয়-লোকদূষকত্বাদিতি ভাবঃ ॥২৬॥

(ঠ) রদ ইতি। ধূতা স্বধর্ম্মভ্রংশভয়াত্‌ কম্পিতা তদাখ্যা চারুদত্তস্য পত্নী তস্যৈ। যদি সা কিঞ্চিত্‌ প্রতিকর্ত্তুং শক্নুয়াদিতি ভাবঃ।

(ট) বধূরিতি। সসম্ভ্রমং চিত্তব্যগ্রতাসহিতম্‌। অপরিক্ষতং ধারণাদিকালে চৌরৈণ অবিদীর্ণং শরীরং যস্য সঃ। আর্য্যো মান্যঃ শ্বশুর ইতি যাবত্‌ তস্য পুত্রো ভর্ত্তেত্যর্থঃ।

শোধযোগ্য ধন উপার্জ্জন করিব, তথাপি চরিত্রনাশের কারণ মিথ্যা বলিব না ॥২৬॥

রদনিকা। তা, আর্য্যা ধূতার নিকট যাইয়া ইহা জানাই। (এই বলিয়া চলিয়া গেল)

তাহার পর দাসীর সহিত চারুদত্তবধূর প্রবেশ।

বধূ। (ব্যস্ততার সহিত) ওরে! সত্যই কি আর্য্যপুত্র, আর্য্যমৈত্রে-য়ের সহিত অক্ষতদেহ আছেন ?।

चेटी । भट्टिणि ! सच्चं । किं तु जो सो वेस्साजनकेरको अलंकारओ, सो अवहिदो । (ठ)

वधूः । मोहं नाटयति ।

चेटी । समस्सदु अज्जा धूदा । [ड]

वधूः । समाश्वस्य । हञ्जे ! किं भणासि 'अवरिक्खदसरीरो अज्जउत्तो" त्ति । वरं दाणिं सो सरीरेण परिक्खदो, ण उण चारित्तेण । संपदं उज्जइणीए जणो एव्वं मन्तइस्सदि—'दलिद्ददाए अज्जउत्तेण ज्जेव ईदिसं अकज्जं अणुचिट्ठिदं"त्ति ।

(ठ) भर्त्रि ! सत्यम् । किन्तु यः स वेश्याजनस्य अलङ्कारकः, सोऽपहृतः ।

(ड) समाश्वसितु आर्य्या धूता ।

(ढ) हञ्जे ! किं भणसि — 'अपरिक्षतशरीरः आर्य्यपुत्रः' इति । वरमिदानीं स शरीरेण परिक्षतः, न पुनश्चारित्रेण । साम्प्रतमुज्जयिन्या

अस्य वाक्यस्य धूतया प्रत्यक्षनिष्ठुरतया मन्यमानत्वादेव वज्रं नाम प्रतिमुखसन्ध्यङ्गम् । तथा दर्पणे—'प्रत्यक्षनिष्ठुरं वज्रम्' इति ।

(ढ) वधूरिति । स आर्य्यपुत्रः । परिक्षत इति वरम् ईषत्प्रियम् ; पुनः किन्तु

दासी । স্বামিনি ! সত্য বটে ; কিন্তু সেই যে বেশ্যাটীর অলঙ্কার ছিল, তাহা অপহরণ করিয়াছে ।

বধূ । (মূর্চ্ছা অভিনয় করিল)

দাসী । আর্য্যা ধূতা আশ্বস্তা হউন ।

বধূ । (আশ্বস্ত হইয়া) ওলো ! তুই কি বলিতেছিস্, আর্য্যপুত্র অক্ষতদেহ আছেন ? । তিনি শরীরে পরিক্ষত হইতেন, সেও ভাল

ঊর্দ্ধমবলোক্য নিঃশ্বস্য চ। **ভঅবং কঅন্ত! পোক্খর-বত্ত পড়িদ-জলবিন্দু-চঞ্চলেহিং কীলসি দলিদ্দপুরিসভাঅধেএহিং। ইঅং চ মে একা মাদুঘরলদ্ধা রঅণাবলী চিট্ঠদি, এদং পি অদি-সোণ্ডীরদাএ অজ্জউত্তো ণ গেণ্হিস্সদি। হঞ্জে! অজ্জ-মিত্তেঅং দাব সদ্দাবেহি।** [ঢ]

জন এবং মন্ত্রয়িষ্যতি —'দরিদ্রতয়া আর্য্যপুত্রেণৈব ঈদৃশমকার্য্যমনুষ্ঠিতম্। ভগবন্! কৃতান্ত! পুষ্করপত্রপতিতজলবিন্দুচঞ্চলৈঃ ক্রীড়সি দরিদ্রপুরুষভাগধেয়ৈঃ। ইয়ঞ্চ মে একা মাতৃগৃহলব্ধা রত্নাবলী তিষ্ঠতি। এতামপি অতিশৌণ্ডীরতয়া আর্য্যপুত্রো ন গ্রহীষ্যতি। হঞ্জে! আর্য্যমৈত্রেয়ং তাবৎ শব্দাপয়।

চারিত্রেণ পবিত্রো ন বরমিত্যর্থঃ, শরীরাপেক্ষয়া চারিত্রস্য মূল্যবত্ত্বাদিতি ভাবঃ। মন্ত্রয়িষ্যতি আলোচয়িষ্যতি। ঈদৃশকার্য্যং নিক্ষেপাপহরণরূপং কর্ম্ম। কৃতান্ত! দৈব! পুষ্করস্য পদ্মস্য পত্রে পতিতা যে জলবিন্দবস্তদ্বৎ চঞ্চলৈঃ দরিদ্রপুরুষাণাং ভাগধেয়ৈঃ সৌভাগ্যৈঃ, ক্রীড়সি খেলসি। অতিশৌণ্ডীরতয়া অত্যন্তোদারস্বভাবতয়া। ন গ্রহীষ্যতীতি, স্ত্রীধনগ্রহণস্য নিতান্তকাপুরুষতাব্যঞ্জকত্বাদিতি ভাবঃ। শব্দাপয় আহ্বয়।

ছিল, কিন্তু চরিত্রে নহে। এখন উজ্জয়িনীর লোক এইরূপ আলোচনা করিবে যে? দরিদ্রতাবশতঃ আর্য্যপুত্রই এইরূপ অকার্য্যের অনুষ্ঠান করিয়াছেন। (উপরের দিক্ চাহিয়া নিশ্বাস ত্যাগ করিয়া) হা ভগবন্! বিধে! তুমি, পদ্মপত্র-পতিত জলবিন্দুর ন্যায় চঞ্চল দরিদ্রলোকের ভাগ্যের দ্বারা খেলা কর। মাতার বাড়ী হইতে প্রাপ্ত এই এক ছড় রত্নহারমাত্র আমার আছে; অত্যন্ত উদারস্বভাব বলিয়া আর্য্যপুত্র ইহাও গ্রহণ করিবেন না। ওরে! তুই আর্য্য মৈত্রেয়কে ডাক্ দেখি।

चेटी। जं अज्जा धूदा आणवेदि। विदूषकमुपगम्य। अज्ज-मित्तेय! धूदा दे सद्दावेदि। [ण]

विदू। कहिं सा?। [त]

चेटी। एसा चिट्ठदि, उवसप्प। [थ]

विदू। उपसृत्य। सोत्थि भोदीए। [द]

वधूः। अज्ज! वन्दामि। अज्ज! पुरत्थिआमुहो [१] होहि। [ध]

(ण) यदार्य्या धूता आज्ञापयति। आर्य्य मैत्रेय! धूता त्वां शब्दापयति।

(त) कस्मिन् सा?।

(थ) एषा तिष्ठति, उपसर्प।

(द) स्वस्ति भवत्यै।

(ध) आर्य्य! वन्दे। आर्य्य! पुरस्तान्मुखो भव।

(द) विदू इति। स्वस्ति मङ्गलम्। भवत्यै इति 'नमः स्वस्ति' इत्यादिना चतुर्थी।

(ध) वधूरिति। पुरस्तात् मम सम्मुखे मुखं यस्य सः। अन्यथा सुष्ठु ग्रहणं न सम्भवतीति भावः।

দাসী। আর্য্যা ধূতা যাহা আদেশ করেন। (বিদূষকের নিকটে যাইয়া) আর্য্য মৈত্রেয়! ধূতা তোমাকে ডাকিতেছেন।

বিদূষক। কোথায় তিনি?।

দাসী। এই রহিয়াছেন, আইস।

বিদূষক। (নিকটে যাইয়া) আপনার মঙ্গল হউক।

বধূ। আর্য্য! আপনাকে নমস্কার করি। আর্য্য! আপনি আমার অভিমুখ হউন।

(१) पौरत्थिआमुहो।

विदू । एसो भोदि ! पुरत्थिआमुहो संवुत्तोह्मि । [न]

वधूः । अज्ज ! पडिच्छ इमं । [प]

विदू । किं ण्णेदं ? । [फ]

वधूः । अहं क्खु रअणसट्ठिं उववसिदा आसि । तहिं जधाविहवाहुसारेण वम्हणो पडिग्गाहिदव्वो, सो अ ण पडिग्गाहिदो ; ता तस्स किदे पडिच्छ इमं रअणमालिअं । [व]

(न) एष भवति ! पुरस्तान्मुखः संवृत्तोऽस्मि ।

(प) आर्य्य ! प्रतीच्छ इमाम् ।

(फ) किं न्वेतत् ? ।

(व) अहं खलु रत्नषष्ठीमुपोषिता आसम् । तस्मिन् यथाविभवानुसारेण ब्राह्मणः प्रतिग्राहयितव्यः, स च न प्रतिग्राहितः, तत् तस्य कृते प्रतीच्छ इमां रत्नमालिकाम् ।

(प) वधूरिति । प्रतीच्छ गृहाण ।

(व) वधूरिति । रत्नषष्ठी मुपोषिता षष्ठीतिथौ तदानीं तद्देशप्रचलितव्रतविशेषकरणार्थं कृतोपवासेत्यर्थः । यथाविभवानुसारेण धनसम्पत्त्यनुसारेण, ब्राह्मणः प्रतिग्राहयितव्यो ब्राह्मणाय यत् किञ्चिद्दातव्यमिति तात्पर्य्यम् । स ब्राह्मणः । तस्य प्रतिग्राहणस्य कृते निमित्तं । प्रतीच्छ गृहाण ।

বিদূষক । দেবি ! এই আপনার অভিমুখ হইয়াছি ।

বধূ । আর্য্য ! ইহা গ্রহণ করুন ।

বিদূষক । এ কি ? ।

বধূ । আমি রত্নষষ্ঠীর উপবাস করিয়াছিলাম ; তাহাতে সম্পত্তি অনুসারে ব্রাহ্মণকে প্রতিগ্রহ করাইতে হয়, কিন্তু সে প্রতিগ্রহ করাই নয় । তাই তাহার জন্য এই রত্নহার গ্রহণ করুন ।

विदू गृहीत्वा। सोत्थि। गमिस्सं, पिअवअस्सस्स णिवेदेमि। [भ]

वधूः। अज्जमित्तेअ! मा क्खु मं लज्जावेहि। इति निष्क्रान्ता। (म)

विदू। सविस्मयम्। अह्हो! से महानुभावदा। [य]

चारु। अये! चिरयति मैत्रेयः। मा नाम वैक्लव्यादकार्य्यं कुर्य्यात्। मैत्रेय! मैत्रेय। [र]

(भ) स्वस्ति। गमिष्यामि। प्रियवयस्यस्य निवेदयामि।

(म) आर्य्यमैत्रेय! मा खलु मां लज्जय।

(य) अह्हो! अस्या महानुभावता।

(म) वधूरिति। मा लज्जय पुनरर्पणेन लज्जितां न कुरु। तथा च स्वयं गृहीत्वा आर्य्यपुत्राय देहि, स च यथा न प्रत्याख्यानं करोति, तथैव त्वमाग्रहं कुर्य्या इति भावः।

(य) विदू इति। महानुभावता सातिशयप्रभावशालित्वम् औदार्य्यमित्यर्थः। वेश्यासक्तस्यापि पत्युर्निन्दानिवृत्तये आत्मन एव महामूल्यरत्नमालाप्रदानादिति भावः।

(र) चारु इति। चिरयति चिरं करोति विलम्बते इत्यर्थः। वैक्लव्यात् निर्वेदेन विह्वलत्वात् स्वयमेव रक्षितव्यस्य न्यासस्य धनेन चौरहस्त एव समर्पणेन आत्मधिक्कारोदयादित्यर्थः; अकार्य्यम् आत्महत्यादिरूपम्।

বিদূষক। স্বস্তি, যাই, বয়স্যকে জানাই।

বধূ। আর্য্যমৈত্রেয়! আমাকে লজ্জিত করিবেন না। (এই বলিয়া চলিয়া গেল)

বিদূষক। (বিস্ময়ের সহিত) ইহার আশ্চর্য্য উদারতা!!

চারুদত্ত। ওহে! মৈত্রেয় বড়ই বিলম্ব করিতেছে; বিহ্বলতানিবন্ধন অকার্য্য না করে। মৈত্রেয়! মৈত্রেয়!!

विद् । उपसृत्य । एसोम्हि । गेण्ह एदं । रत्नावलीं दर्शयति ।(ल)

चारु । किमेतत् ? ।

विद् । भो जं दे सरिस-दार-सङ्गहस्स फलं । [व]

चारु । कथं ब्राह्मणी मामनुकम्पते ! । कष्टम् ! इदानीमस्मि दरिद्रः ।

आत्मभाग्यक्षतद्रव्यः स्त्रीद्रव्येणानुकम्पितः ।
अर्थतः पुरुषो नारी, या नारी सार्थतः पुमान् ॥२७॥

(ल) एषोऽस्मि । गृहाण एताम् ।

(व) भोः! यत् ते सदृशदारसंग्रहस्य फलम् ।

(व) विदू इति । सदृशदारसंग्रहस्य स्वयोग्यभार्य्यापरिग्रहस्य । अतएव दारया तव भार्य्यया दत्तमेतदिति भावः ।

आत्मेति । आत्मनो भाग्येन अदृष्टेन क्षतं नष्टं द्रव्यं धनं यस्य सः, स्त्रिया द्रव्येण धनेन अनुकम्पितो दयाविषयीकृतः । तेन किं सम्पन्नमित्याह अर्थत इति । पुरुषः अर्थतः कार्य्यतः, नारी जात इति शेषः ; तथा या नारी, सा अर्थतः, कार्य्यतः पुमान् पुरुषो जातेति शेषः । तथा च अहं पुरुषः सन्नपि भार्य्या एव दयापात्रीभूय तत्कृतसाहाय्यग्रहणात् नारीस्वरूपोऽस्मि, तथा मम भार्य्या च

বিদূষক । (নিকটে যাইয়া) এই যে আছি । ইহা গ্রহণ কর । (রত্ন-হার দেখাইল)

চারুদত্ত । এ কি ? ।

বিদূষক । সখে ! তোমার যোগ্য দারপরিগ্রহের যে ফল ।

চারুদত্ত । হায় ! ব্রাহ্মণী আমার প্রতি দয়া করিতেছেন । কি কষ্ট ! এখন আমি প্রকৃত দরিদ্র হইলাম ।

নিজের অদৃষ্টবশতঃ ধন নষ্ট হইয়াছে ; এখন স্ত্রীর ধনে দয়ার পাত্র

अथवा, नाहं दरिद्रः । यस्य मम—

विभवानुगता भार्य्या सुखदुःखसुहृद्भवान् ।
सत्यञ्च न परिभ्रष्टं यद्दरिद्रेषु दुर्लभम् ॥२८॥

नारी सत्यपि मां प्रति दयाकारिणी भूत्वा मह्यं साहाय्यदानात् पुरुषस्वरूपा जातेति भावः ।

अत्र कार्य्येण कारणसमर्थनरूपोऽर्थान्तरन्यासः, पुरुषे नारीत्वारोपस्य नार्य्यां पुरुषत्वारोपस्य च प्रकृतदारिद्र्यप्रतिपादनोपयोगितया परिणामस्य, अनयोरङ्गाङ्गिभावेन सङ्करः । तथा पुरुष इत्यभिधाय पुमानित्यभिधानात् प्रकृतिविपर्य्यो भग्नप्रक्रमतादोषः, स च 'नारी च पुरुषोऽर्थतः' इति पाठेन समाधेयः । न चैतत्पाठेऽपि पुनः कथितपदतादोष इति वाच्यम्, 'उदेति सविता ताम्रस्ताम्र एवास्तमेति च' इत्यादि-वा... श्यप्रतिनिर्द्देश्यविषयत्वात् कथितपदतायाश्च दर्पणकृदादिभिस्तद्भिन्नविषयताया व्यवस्थापितत्वात् । अतएव हि नारीशब्दस्य द्विःपाठेऽपि न कथितपदतादोष इति ध्येयम् ॥२७॥

विभवेति । भार्य्या विभवानुगता सम्पत्त्यनुसारिणी यादृशी विभवस्तादृश्येव वर्त्तत इत्यर्थः; भवान् सुखदुःखयोरुभयोरेव सुहृत्; तथा दरिद्रेषु यत् सत्यं दुर्लभम्, तत् सत्यञ्च न परिभ्रष्टं भार्य्यायाः साहाय्यान्न विच्युतम् । ईदृशं भार्य्यारत्नं सुहृद्रत्नं सत्यञ्च यस्यास्ति, स कथं दरिद्रो भवितुमर्हतीति भावः ।

अत्र आत्मनोऽदरिद्रताप्रतिपादनकार्य्यं प्रति बहुतरकारणोपन्यासात् समुच्चयोऽलङ्कारः ॥२८॥

হইতেছি। সুতরাং কার্য্যবশতঃ পুরুষ স্ত্রী, এবং যে স্ত্রী, সে পুরুষ হইয়াছে ॥২৭॥

অথবা আমি দরিদ্র নহি। যে আমার—

স্ত্রী, অবস্থার অনুগামিনী; তুমি, সুখে এবং দুঃখেও, বন্ধু। বিশেষতঃ দরিদ্রে যাহা দুর্লভ, সেই সত্যও নষ্ট হয় নয় ॥২৮॥

মৈত্রেয়! গচ্ছ রত্নাবলীমাদায় বসন্তসেনায়াঃ সকাশম্, বক্তব্যা চ সা মদ্বচনাৎ,—"যৎ খল্বস্মাভিঃ সুবর্ণভাণ্ড-মাত্মীয়মিতি কৃত্বা বিশ্রম্ভাৎ দ্যূতে হারিতম্, তস্য কৃতে গৃহ্যতামিয়ং রত্নাবলী" ইতি। [গ]

বিদূ। মা দাব অখাইদস্স অভুত্তস্স অপ্পমুল্লস্স চোরেহিং অবহিদস্স কারণাদো চদুস্সমুদ্দসারভূদা রঅণাবলী" দীঅদি। (ঘ)

(ঘ) মা তাবৎ অখাদিতস্য অভুক্তস্য অল্পমূল্যস্য চৌরৈরপহৃতস্য কারণাৎ চতুঃসমুদ্রসারভূতা রত্নাবলী দীয়তে।

(গ) মৈত্রেয়েতি। বিশ্রম্ভাৎ মমবিশ্বাসাৎ আত্মীয়মিতি কৃত্বা ইত্যন্বয়ঃ।

(ঘ) বিদূ ইতি। অখাদিতস্য অভক্ষিতস্য; বিক্রয়াদিনা খাদনে তু তন্মূল্য-প্রতিদানমুচিতমেবেতি ভাবঃ। অভুক্তস্য অঙ্গে ধারণাদিনা অসম্ভুক্তস্য। সম্ভোগেন পরিক্ষয়েঽপি তন্মূল্যপ্রতিদানং সঙ্গতমেবেতি ভাবঃ। অল্পমূল্যস্যেতি। এতৎসমানমূল্যত্বে তু, এতদ্দানং কথঞ্চিৎ সঙ্গচ্ছত ইত্যাশয়ঃ। চতুর্ণাং সমুদ্রাণাং তদুৎপিতরত্নানামিত্যর্থঃ সারভূতা শ্রেষ্ঠভূতা। মা তাবৎ দীয়তে কেনাপীতি শেষঃ। সুতরাং ত্বয়াপি ন দীয়তামিতি ভাবঃ।

মৈত্রেয়! তুমি এই রত্নহার লইয়া বসন্তসেনার নিকট যাও, আমার কথানুসারে তাঁহাকে বলিবে যে, আমি বিশ্বাসবশতঃ নিজের মনে করিয়া সেই স্বর্ণালঙ্কার পাশা খেলায় হারিয়াছি; তাহার জন্য এই রত্নহার গ্রহণ করুন।

বিদূষক। যাহা বিক্রয় করিয়া খাওয়া হয় নয়, যাহা অঙ্গে ধারণ করিয়া সম্ভোগ করা হয় নয়, যাহার মূল্য অল্প এবং যাহা চোরে অপহরণ করিয়াছে, সেই স্বর্ণালঙ্কারের জন্য, চারি সমুদ্রের সারভূত রত্নহার কেহই দান করে না।

चारु । वयस्य ! मा मैवम् ।

य' समालम्ब्य विश्वासं न्यासोऽस्मासु तया कृतः ।
तस्यैतन्महतो मूल्यं प्रत्ययस्यैव दीयते ॥२८॥

तद्वयस्य ! अस्मच्छरीरस्पृष्टिकया शापितोऽसि, नैनामग्राहयित्वा अत्रागन्तव्यम् । वर्द्धमानक ! [स]

एताभिरिष्टिकाभिः सन्धिः क्रियतां सुसंहतः शीघ्रम् ।
परिवाद-बहुल-दोषान्न यस्य रक्षां परिहरामि ? ॥३०॥

यमिति । तथा वसन्तसेनया, यं विश्वासं समालम्ब्य आश्रित्य, अस्मासु न्यासो निक्षेपः कृतः; तस्य महतः प्रत्ययस्यैव विश्वासस्यैव, एतत् रत्नमालारूपं मूल्यं दीयते, न तु तस्य सुवर्णभाण्डस्य मूल्यमिति भावः ।

अत्र विश्वासस्य मूल्यदानासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिरलङ्कारः । तथा विश्वासमित्यभिधाय प्रत्ययस्येत्यभिधानात् पूर्ववत् भग्नप्रक्रमतादोषः, स च, विश्वासस्यैव दीयते ' इति पाठ न समाधेयः ॥२९॥

(स) तदिति । अस्मच्छरीरस्य स्पृष्टिकया स्पर्शेन, शापितोऽसि शपथं कारितोऽसि । स्वयमेव विदूषकं स्पृशन् उक्तिरियमिति बोध्यम् । ब्राह्मणशरीरस्पर्शेन सञ्जातः शपथो दृढ़ीभवतीत्यभिप्रायः । एनां रत्नमालिकाम् ।

एताभिरिति । एताभिः इष्टिकाभिः, शीघ्रं सन्धिः सन्धिरन्ध्रम्, सुसंहतः सम्यक्

চারুদত্ত। সখে! না না, এরূপ বলিও না।

বসন্তসেনা যে বিশ্বাস অবলম্বন করিয়া, আমার হাতে গচ্ছিত রাখিয়াছিলেন, সেই গুরুতর বিশ্বাসেরই এই মূল্য দিতেছি ॥২৯॥

অতএব সখে! আমার শরীর স্পর্শ দ্বারা তোমাকে শপথ করাইতেছি যে, এই রত্নমালা গ্রহণ না করাইয়া তুমি এখানে আসিবে না। বর্দ্ধমান!

এই ইটগুলি দিয়া তুই সত্বর সিঁধটাকে ভরাট কর্। কারণ,

वयस्य ! मैत्रेय ! भवताप्यकृपण-शौण्डीर्य्यमभिधातव्यम् । (छ)

विदू । भो ! दलिद्दो किं अकिवनं (१) मन्तेदि ? ।[ज]

चारु । अदरिद्रोऽस्मि सखे ! 'यस्य मम— विभवानुगता भार्य्या

(ज) भोः ! दरिद्रः किम् अकृपणं मन्त्रयति ? ।

यत्नः, क्रियताम् । कुत इत्याह— परिवादः 'चारुदत्तः स्वयमेव वसन्तसेनाया न्यासमपहृत्य चौरोपरि तद्दोषारोपणार्थं स्वगृहभित्तावेव सन्धिः कृतः' इत्थं लोकनिन्दायां बहुः प्रचुरो यो दोषो लघुत्वप्रतारकत्वप्रकाशादिस्तस्माद्धेतोः, यस्य सन्धेः, रक्षां स्वरूपेणावस्थितिम्, न परिहरामीति काकुः न परित्यजामि किमित्यर्थः, अपि तु परित्यजाम्येवेति तात्पर्य्यम् । तथा च सति लोकः पूर्व्ववदेव भित्तिदर्शनात् न तं परिवादं कुर्य्यादिति भावः ।

अत्र पूर्व्वार्द्धं प्रति परार्द्धवाक्यार्थस्य हेतुतया काव्यलिङ्गमलङ्कारः ।

आर्य्या जातिः ॥३०॥

(छ) वयस्येति । अकृपणवत् अदीनवत् शौण्डीर्य्यमौदार्य्यं यथा स्यात्तथा, अभिधातव्यं वसन्तसेनासमीपे सर्व्वं वाक्यं वक्तव्यम् । यथा सा नास्माकमुपरि सन्दिहाना भवेदिति भावः ।

(ज) विदू इति । अकृपणमदीनम् अपितु धनितुल्यमित्यर्थः, मन्त्रयति ब्रवीति वक्तुमर्हतीत्यर्थः, कथमपि नेति तात्पर्य्यम्, कदापि स्वभावप्रकाशसम्भवादिति भावः ।

নিন্দাতে বহুতর দোষ আছে বলিয়া যাহা আমি রাখিতে চাহি না ॥ ৩০ ॥

সখে ! মৈত্রেয় ! তুমিও অকৃপণের ন্যায় উদারভাবে বলিবে।

বিদূষক। সখে ! দরিদ্র ব্যক্তি কি অকৃপণ ভাবে বলিতে পারে ? ।

চারুদত্ত। সখে ! আমি দরিদ্র নহি। (যে আমার স্ত্রী, অবস্থার

(१) अकिंचिणं ।

इत्यादि पुनः पठति। तद्‌गच्छतु भवान्। अहमपि कृतशौचः सन्ध्या मुपासे। [क]

इति निष्क्रान्ताः सर्वे।

इति सन्धिच्छेदो नाम तृतीयोऽङ्कः। (२)

(क) चारु इति। कृतं शौचं मूत्रपुरीषत्यागोत्तरमृज्जलप्रक्षालनादि कार्य्यं येन स तथोक्तः सन्, सन्ध्यां प्रातःसन्ध्याम्, उपासे आराधयामि।

इति श्रीहरिदाससिद्धान्तवागीशविरचितायां मृच्छकटिकटीकायां वसन्तसुषमा-समाख्यायां तृतीयाङ्कविवरणं समाप्तम् ॥०॥

অনুগামিনী' ইত্যাদি পুনরায় পাঠ করিলেন) অতএব তুমি যাও। আমিও, শৌচ করিয়া প্রাতঃ সন্ধ্যা করি।

ইহার পরে সকলে নিষ্ক্রান্ত হইল।

সন্ধিচ্ছেদ নামে তৃতীয় অঙ্ক ॥

(२) सन्धिच्छेदो नाम तृतीयोऽङ्कः समाप्तः।

চতুর্থোঽঙ্কঃ।

ততঃ প্রবিশতি চেটী।

চেটী। আণত্তম্হি অত্তাএ অজ্জআএ সআসং গন্তুং। এসা অজ্জআ চিত্তফলঅ-ণিসণ্ণ-দিট্ঠীমদণিআএ সহ কিং পি মন্তঅন্তী চিট্ঠদি। তা জাব উবসপ্পামি। ইতি পরিক্রামতি। (ক)

ততঃ প্রবিশতি যথানির্দ্দিষ্টা বসন্তসেনা মদনিকা চ। (খ)

(ম) আজ্ঞপ্তাস্মি মাত্রা আর্য্যায়াঃ সকাশং গন্তুম্। এষা আর্য্যা-চিত্রফলকনিষণ্ণদৃষ্টির্মদনিকয়া সহ মন্ত্রয়ন্তী তিষ্ঠতি। তদ্‌যাবদুপসর্পামি।

(ক) চেটীতি। মাত্রা বসন্তসেনায়া জনন্যা, আর্য্যায়া বসন্তসেনায়াঃ। চিত্রফলকে নিষণ্ণা স্থিতা দৃষ্টির্যস্যাঃ সা। মন্ত্রয়ন্তী আলপন্তী।

(খ) তত ইতি যথানির্দ্দিষ্টা চিত্রফলকনিষণ্ণদৃষ্টিঃ।

তদনন্তর দাসীর প্রবেশ।

দাসী। বসন্তসেনার মাতা, বসন্তসেনার নিকট যাইবার জন্য আমাকে আদেশ করিয়াছেন। আর্য্যা বসন্তসেনা চিত্রফলকে দৃষ্টি স্থাপিত করিয়া, মদনিকার সঙ্গে কোন বিষয় আলোচনা করতঃ অবস্থান করিতেছেন। তা, উঁহার নিকট উপস্থিত হই। (এই বলিয়া পাদক্ষেপ করিতে লাগিল)

তাহার পর যথানির্দ্দিষ্টরূপে বসন্তসেনা ও মদনিকার প্রবেশ।]

वस। हञ्जे मदणिए! अवि सुसदिसी इअं चित्ताकिदी अज्जचारुदत्तस्स?। (ग)

मद। सुसदिसी। (घ)

वस। कधं तुमं जाणासि?। (ङ)

मद। जेण अज्जआए सुसिणिद्धा दिट्ठी अणुलग्गा। (च)

वस। हञ्जे! किं वेस-वास-दाक्खिस्सेण मदणिए! एव्वं भणासि?। (छ)

(ग) हञ्जे मदनिके! अपि सुसदृशी इयं चित्राकृतिः आर्य्य-चारुदत्तस्य?।

(घ) सुसदृशी।

(ङ) कथं त्वं जानासि?।

(च) येन आर्य्यायाः सुस्निग्धा दृष्टिरनुलग्ना।

(छ) हञ्जे! किं वेशवासदाक्षिण्येन एवं भणसि?।

(ग) वस इति। हञ्जे इति चेटीं प्रति सम्बोधनसूचकमव्ययम्। "हण्डे हञ्जे हलाह्वानं नीचां चेटीं सखीं प्रति" इत्यमरः। चित्ररूपा आकृतिश्चित्राकृतिः। सुसदृशी प्रकृताकृतिसंवादिनी। तथा च सति मदाकृतियोग्या च किमिति भावः।

(छ) वस इति। वेशे वेश्यालये वासेन अवस्थानेन यत् दाक्षिण्यं वाक्पटुत्वं तेन।

বসন্তসেনা। মদনিকা! এই চিত্রের আকৃতি, আর্য্য চারুদত্তের ঠিক্ সমান কি না?।

মদনিকা। ঠিক্ সমান।

বসন্তসেনা। তুমি কি করিয়া জানিলে?।

মদনিকা। যেহেতু, আপনার সুস্নিগ্ধ দৃষ্টি, একেবারে লাগিয়া রহিয়াছে।

मद। अज्जए! किं जो ज्जेव जणो वेसे पड़िवसदि, सो ज्जेव अलीअदक्खिणो भोदि ? । (ज)

वस। हञ्जे ! णाणा-पुरिस-सङ्गेन वेस्साजणो अलीअ-दक्खिणो भोदि ।(झ)

मद। जदो दाव अज्जाए दिट्ठी इध अभिरमदि हिअअं च ; तस्स कारणं किं पुच्छीअदि ? । (ञ)

(ज) आर्य्ये! किं य एव जनो वेशे प्रतिवसति, स एव-अलीकदक्षिणो भवति ? ।

(झ) हञ्जे ! नानापुरुषसङ्गेन वेश्याजनः अलीकदक्षिणो भवति ।

(ञ) यतस्तावत् आर्य्याया दृष्टिरिह अभिरमते हृदयञ्च, तस्य कारणं किं पृच्छ्यते ? ।

(ज) मद इति । अलीकदक्षिणो मिथ्यावाक्पटुः ।

(ञ) मद इति । यतो यत् । आर्य्यायास्तव । इह चित्राकृतौ । अभिरमते आसज्यते । हृदयञ्च अभिरमते इत्यन्वयः । तस्य दृष्टिहृदययोरभिरमणस्य । पृच्छ्यते "अपि सुसदृशी" इत्यनेन कथं जिज्ञास्यते ? परमसुन्दरत्वादियमाकृतिः सर्व्वथैव तव सुसदृशीति नास्त्येव कश्चित् प्रश्नावसरस्तेन च सत्वरमेवाभिसरेति भावः ।

বসন্তসেনা। ওলো মদনিকা! তুমি বেশ্যালয়ে বাস করার ঔদার্য্য বশতই কি এইরূপ বলিতেছ ?।

মদনিকা। আর্য্যে! যে লোকই বেশ্যালয়ে বাস করে, সেই কি মিথ্যা উদারস্বভাব হয় ?।

বসন্তসেনা। ওলো! নানাবিধ পুরুষের সংসর্গে বেশ্যারা মিথ্যা উদার স্বভাব হইয়া থাকে।

মদনিকা। যে হেতু আপনার দৃষ্টি, এই চিত্রে আসক্ত হইয়াছে

वस। हञ्जे! सहीजणादो उवहसणीअदां रक्खामि। (ट)

मद। अज्जए! एव्वं णेदं। सहीजणचित्ताणुवत्ती अबलाजणो भोदि। (ठ)

प्रथमा चेटी। उपसृत्य। अज्जए! अत्ता आणवेदि-गहिदावगुण्ठणं पक्खदुआरए सज्जं पवहणं। ता गच्छ'त्ति। (ड)

(ट) हञ्जे! सखीजनादुपहसनीयतां रक्षामि।

(ठ) आर्य्ये! एवं नेदम्। सखीजनचित्तानुवर्त्ती अबलाजनो भवति।

(ड) आर्य्ये! माता आज्ञापयति—'गृहीतावगुण्ठनं पक्षद्वारि सज्जं प्रवहणं तद् गच्छ' इति।

(ट) वस इति। रक्षामि अभिसरणविलम्बेन निवारयामि। तथा च अनुरक्तिभावमेवाभिसरणे मयाप्रकटिष्णु तामाश्रित्य सखीजन उपहसिष्यति, विलम्बेनाभिसरणे तु नास्ति तस्य सम्भव इति भावः।

(ठ) मद इति। एवं नेदम्-इदानीमेवाभिसरणेऽपि न त्वां सखीजन उपहसिष्यतीत्यर्थः। तत्र हेतुमाह सखीजनेति। तथा च तव सखीजना अपि अबलाजना, एव, त्वमपि च तेषां सखीजन एवेत्यवश्यमेव तैस्तव चित्तमनुवर्त्तितव्यमिति भावः।

(ड) प्रथमेति। गृहीतम् अवगुण्ठनं बहिरावरणं येन तत्, पक्षद्वारे पार्श्वद्वारे, सज्जं प्रस्तुतम्, प्रवहणं गोशकटम्।

এবং চিত্তও আশক্ত হইয়াছে, তাহার কারণ জিজ্ঞাসা করিতেছেন কি?।

বসন্তসেনা। ওলো! সখীজন হইতে উপহাস নিবারণ করিতেছি।

মদনিকা। আর্য্যে! ইহা এরূপ নহে! স্ত্রীলোক সখীজনের চিত্তানুবর্ত্তী হইয়া থাকে।

প্রথম দাসী। (নিকটে যাইয়া) মাতা আদেশ করিতেছেন যে—

वस । हञ्जे ! अज्जचारुदत्तो मं णइस्सदि ? । [ढ]

चेटी । अज्जए ! जेण पवहणेण सह सुवण्ण-दस-साहस्सिओ अलङ्कारओ अणुप्पेसिदो । [ण]

वस । को उण सो ? । [त]

चेटी । एसो ज्जेव राअस्सालो संठाणओ । [थ]

वस । सक्रोधम् । अवेहि । मा पुणो एव्वं भणिस्ससि । [द]

(ढ) हञ्जे ! किम् आर्य्य चारुदत्तो मां नेष्यति ? ।

(ण) आर्य्ये ! येन प्रवहणेन सह सुवर्ण-दशसाहस्रिकोऽलङ्कारः अनुप्रेषितः ।

(त) कः पुनः सः ? ।

(थ) एष एव राजश्यालः संस्थानकः ।

(द) अपेहि । मा पुनरेवं भणिष्यसि ।

(ण) चेटीति । सुवर्णानां दशभिः सहस्रैः क्रीत इति सुवर्णदशसाहस्रिकः ।

(थ) चेटीति । संस्थीयते दीर्घं रवेति संस्थानकः । कुत्सायां कप्रत्ययः ।

"পার্শ্বের দ্বারে বাহিরাবৃত প্রবহণ (গাড়ী) সজ্জিত হইয়াছে। সুতরাং তুমি যাও।"

বসন্তসেনা। ওলো! আর্য্য চারুদত্ত কি আমাকে নিবেন?।

দাসী। আর্য্যে! যিনি প্রবহণের সহিত, দশসহস্র স্বর্ণমুদ্রা দ্বারা ক্রীত অলঙ্কার পাঠাইয়াছেন।

বসন্তসেনা। সে আবার কে?।

দাসী। ইনিই রাজার শালা সংস্থানক।

বসন্তসেনা। (ক্রোধের সহিত) দূর হ। পুনরায় এরূপ বলিস না।

चेटी। पसीददु पसीददु अज्जआ। सन्देसेणम्हि पेसिदा। [ध]

वस। अहं सन्देसस्स ज्जेव कुप्पामि। [न]

चेटी। ता किंत्ति अत्तं विस्सविस्सं। [प]

वस। एव्वं विस्साविदव्वा— 'जइ मं जीअन्तिं इच्छसि ता एव्वं ण पुणो अहं अत्ताए आस्साविदव्वा।' [फ]

(ध) प्रसीदतु प्रसीदतु आर्य्या। सन्देशेनास्मि प्रेषिता।

(न) अहं सन्देशस्यैव कुप्यामि।

(प) तत् किमिति मातरं विज्ञापयिष्यामि ?।

(फ) एवं विज्ञापयितव्या—'यदि मां जीवन्तीमिच्छसि, तदा न पुनरहं मात्रा आज्ञापयितव्या।

(ध) चेटीति, सन्देशेन तव मातुर्वाचिकेन। सुतरां नात्रव ममापराध इति भावः।

(न) वस इति। सन्देशस्य एवम्भूतस्य वाचिकस्य उपरीति शेषः।

(फ) वस इति। पुनरप्येवं विज्ञापने आत्महत्यां करिष्यामीति भावः।

দাসী। আপনি প্রসন্ন হউন প্রসন্ন হউন। (আপনার মাতা এই) খবরের সঙ্গে আমাকে পাঠাইয়াছেন।

বসন্তসেনা। আমি যে এহেন খবরের উপরই ক্রুদ্ধ হইয়া থাকি।

দাসী। তা, মাতাকে কি জানাইব ?।

বসন্তসেনা। এইরূপ জানাইবি—"যদি আমাকে জীবিত রাখিতে ইচ্ছা করেন, তবে পুনরায় যেন মা, আমাকে এরূপ আদেশ করেন না"।

चेटी। जधा दे रोअदि। इति निष्क्रान्ता। [व]

प्रविश्य शर्व्विलकः।—

दत्त्वा निशाया वचनीयदोषं,
निद्राञ्च जित्वा नृपतेश्च रक्ष्यान्।
स एष सूर्य्योदयमन्दरश्मिः
क्षपाक्षयाच्चन्द्र इवास्मि जातः॥ १॥

अपिच। यः कश्चित्त्वरितगतिर्निरीक्षते मां—
सम्भ्रान्तं द्रुतमुपसर्पति स्थितं वा।

(व) यथा ते रोचते।

दत्त्वेति। निशायाः रात्रेरुपरि, वचनीयदोषं "हानिमूलं हि यामिनी" इत्यपवाददोषम्, दत्त्वा स्वयमेव चौर्य्यं विधाय रात्रेरुपरि तन्निमित्तापवाद आरोपयित्वेत्यर्थः, तथा निद्राञ्च नृपतेः रक्ष्यान् साधव इति रक्ष्या रक्षिपुरुषास्तांश्च, जित्वा एकत्र वर्ज्जयित्वा अन्यत्र गुप्तप्रचारेण वञ्चयित्वा, स एषः अस्मि अहम्, क्षपाक्षयात् निशावसानात्, सूर्य्योदयात् मन्दाः अल्पीभूताः रश्मयः किरणा यस्य स तादृशः, चन्द्र इव जातः हीनप्रभावः सम्पन्नः।

अत्रोपमालङ्कारः। इन्द्रवज्रोपेन्द्रवज्रयोर्मेलनादुपजातिर्वृत्तम्॥ १॥

य इति। त्वरिता शीघ्रा गतिर्यस्य स तादृशो यः कश्चिज्जनः, सम्भ्रान्त

দাসী। আপনার যেরূপ অভিপ্রায়। (এই বলিয়া চলিয়া গেল)।

প্রবেশ করিয়া শর্ব্বিলক। রাত্রির উপরে অপবাদ দিয়া, নিদ্রাকে জয় করিয়া এবং রক্ষী রাজপুরুষদিগকে বঞ্চনা করিয়া, রাত্রি শেষ হওয়ায় সূর্য্যোদয় কালে অল্পকিরণ চন্দ্রের ন্যায়, সেই আমি এই হীনপ্রভ হইয়াছি॥ ১॥

আরও দ্রুতগামী যে কোন লোক, ব্যস্তচিত্ত আমাকে দেখে, অথবা

तं सर्वं तुलयति दूषितोऽन्तरात्मा
स्वैर्दोषैर्भवति हि शङ्कितो मनुष्यः ॥ २ ॥

मया खलु मदनिकायाः कृते साहसमनुष्ठितम् । (भ)

परिजनकथासक्तः कश्चिन्नरः समुपेक्षितः

क्वचिदपि गृहं नारीनाथं निरीक्ष्य विवर्जितम् ।

चौर्य्यकरणात् भयव्याकुलचित्तं मां निरूपयति ; वा अथवा, सम्भ्रान्तमिव स्थितं कुत्रचिद्विद्यमानं माम्, द्रुतमुपसर्पति । दूषितः स्वयं चौर्य्यकरणात् प्राप्तापराधः, अन्तरात्मा ममान्तःकरणम्, तं सर्वं जनम्, तुलयति आत्मनो धारकत्वेन आशङ्कते । हि तथाहि, मनुष्यः स्वैः स्वकीयैर्दोषैः, शङ्कितोभवति, शङ्काकारणाभावेऽपीति भावः ।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ।

प्रहर्षिणी वृत्तम्—"त्र्याशाभिर्मनजरगाः प्रहर्षिणीयम्" इतिलक्षणात् ॥२॥

(भ) मयेति । कृते निमित्ते, साहसं स्तेयम् । तथा चोक्तं व्यवहारतत्त्वे नारदः—

"मनुष्यमारणं स्तेयं परदाराभिमर्षणम् ।
पारुष्यमनृतञ्चैव साहसं पञ्चधा स्मृतम् ॥"

परिजनेति । परिजनेन सह कथायां कथोपकथने आसक्तो व्यापृतः, कश्चित् नरः

ব্যস্তচিত্তে আমি দাঁড়াইয়া আছি এমন অবস্থায় যে কোন লোক আমার নিকট দ্রুত আগমন করে, আমার অপরাধী অন্তকরণ, সেই সকল লোককেই (ধরিতে আসিয়াছে বলিয়া) আশঙ্কা করে। কারণ, মানুষ, নিজের দোষেই আশঙ্কিত হইয়া থাকে ॥২॥

আমি মদনিকার জন্য সাহসের কার্য্য করিয়াছি।

পরিজনের সঙ্গে কথোপকথনে আসক্ত কোন লোককে উপেক্ষা

নরপতিবলে পার্শ্বায়াতে স্থিতং গৃহদারুবৎ—
ব্যবসিতশতৈরেবংপ্রায়ৈর্নিশা দিবসীকৃতা ॥ ২ ॥

ইতি পরিক্রামতি।

বস। হঞ্জে! ইমং দাব চিত্তফলঅং মম সঅণীএ ঠাবিঅ তালবেণ্টঅং গেণ্হিঅ লহু আঅচ্ছ। (ম)

(ম) হঞ্জে! ইদং তাবৎ চিত্রফলকং মম শয়নীয়ে স্থাপয়িত্বা, তালবৃন্তকং গৃহীত্বা লঘু আগচ্ছ।

সহসা সন্মুখপতিত ইত্যর্থঃ, সমুপেক্ষিতঃ সমুপেক্ষ্য গন্তুং শক্যম্। পরিজনকথা-সক্তত্বাদন্যমনস্কতয়া তেন নরেণ অলক্ষিতেনৈব সতা ময়া গন্তুং শক্যমিতি ভাবঃ। ক্বচিদপি স্থানে, নার্য্যেব স্ত্রীমাত্রমেব নাথা স্বামিনী যস্য তত্তাদৃশং গৃহং নিরীক্ষ্য বিবর্জিতং তদ্গৃহে চৌর্য্যং ন কৃতম্*, দয়াবির্ভাবাৎ পুরুষকারাভাবা-চ্চেত্যাশয়ঃ। তথা নরপতিবলে রাজধানীরক্ষিপুরুষে, পার্শ্বেন আয়াতে সহসা আগতে সতি, গৃহস্য দারুবৎ স্তম্ভীভূতকাষ্ঠবৎ স্থিতম্। অতএব নরপতিবলে-নাপি নাহং লক্ষিত ইত্যভিপ্রায়ঃ। এবংপ্রায়ৈরীদৃশৈঃ, ব্যবসিতশতৈর্বহুতরব্যাপারৈঃ, নিশা অতীতা রাত্রিঃ, দিবসীকৃতা নির্জনপুণ্যেন দিবসবৎ স্বচ্ছন্দব্যবহারোপ-যোগিনী বিহিতা।

অত্র নিশায়াং দিবসত্বারোপস্য প্রকৃতস্বচ্ছন্দব্যবহারোপযোগিতয়া পরিণামোঽল-ঙ্কারঃ। তেন চাত্মনোঽত্যন্তদক্ষত্বং ব্যজ্যত ইত্যলঙ্কারেণ বস্তুধ্বনিঃ।

হরিণী বৃত্তম্ "ন-স-ম-র-স-লা-গঃ ষড়্বেদৈর্হয়ৈর্হরিণী মতা।" ইতিলক্ষণাৎ ॥ ২ ॥

করিয়া গিয়াছি; কোন স্থানে, স্ত্রীলোকই বাড়ীর রক্ষক ইহা দেখিয়া, সে বাড়ী পরিত্যাগ করিয়াছি এবং রক্ষী রাজপুরুষগণ পার্শ্বে আসিয়া পড়িলে, গৃহের স্তম্ভের ন্যায় অবস্থান করিয়াছি; এইরূপ বহুতর ঘটনায় গত রাত্রিকে দিন করিয়া ফেলিয়াছিলাম ॥৩॥

(এই বলিয়া পদক্ষেপ করিতে লাগিল)

मद। जं अज्जआ आणवेदि। इति फलकं गृहीत्वा निष्क्रान्ता। (य)

शर्वि। इदं वसन्तसेनाया गृहम्। तद्यावत् प्रविशामि।

प्रविश्य। क्वनु मया मदनिका, द्रष्टव्या।

ततः प्रविशति तालवृन्तहस्ता मदनिका।

शर्वि। दृष्ट्वा। अये! इयं मदनिका—

मदनमपि गुणैर्विशेषयन्ती
रतिरिव मूर्त्तिमती विभाति, येयम्।
मम हृदयमनङ्गवह्नितप्तं
भृशमिव चन्दनशीतलं करोति ॥४॥

मदनिके!।

(य) यदार्य्या आज्ञापयति।

(म) वस इति। शयणीये शय्यायाम्। तालवृन्तकं व्यजनम्। लघु द्रुतम्। एतेन तदानीं ग्रीष्माधिक्यं सूचितम्।

मदनमिति। गुणैः रूपविलासादिभिः, मदनमपि कामदेवमपि, विशेषयन्ती विशेषेण मोहयन्ती, इयं मदनिका, मूर्त्तिमती रतिरिव विभाति। या इयम्,

বসন্তসেনা। মদনিকা! এই চিত্র ফলক খানা আমার শয্যার উপরে রাখিয়া, পাখা খানা লইয়া, শীঘ্র আইস।

মদনিকা। আপনি যাহা আদেশ করেন। (এই বলিয়া চিত্রফলক লইয়া চলিয়া গেল।)

শর্বিলক। এই বসন্তসেনার বাড়ী। তা, প্রবেশ করি। (প্রবেশ করিয়া) আমি মদনিকাকে কোথায় দেখিতে পাইব?।

তদনন্তর তালবৃন্ত হস্তে মদনিকার প্রবেশ।

শর্বিলক। (দেখিয়া) ওহে এই মদনিকা—

সৌন্দর্য্যগুণে কামদেবকেও বিশেষভাবে মুগ্ধ করতঃ, মূর্ত্তিমতী রতির

मद । दृष्ट्वा । अम्मो कधं सव्विलओ ! । सव्विलअ ! साअदं ते ? कहिं तुमं ? । (र)

शर्वि । कथयिष्यामि । इति सानुरागमन्योन्यं पश्यतः ।

वस । चिरअदि मदणिआ । ता कहिं णु क्खु सा ? । गवाक्षकेण दृष्ट्वा । कधं एसा केणावि पुरिसकेण सह मन्तयन्ती

(र) अहो कथं शर्विलकः ! । शर्विलक ! स्वागतं ते ? कस्मिन् त्वम् ? ।

(ल) चिरयति मदनिका । तत् कस्मिन् नु खलु सा ? । कथ-

मन्मथतान्तम्, अनङ्गवह्निना कामानलेनोत्तप्तम्, मम हृदयम्, चन्दनेन चन्दन-लेपेन शीतलमिव करोति ।

अत्र प्रथमा वाच्या भावाभिमानिनी ध्वन्युत्प्रेक्षा, द्वितीया च तथैव गुणोत्-प्रेक्षा ; अनयोः परस्परनिरपेक्षतया संसृष्टिः । पुष्पिताग्रा वृत्तम् ॥ ४ ॥

(र) मद इति । अहो इत्याश्चर्य्ये । आकस्मिकप्रियतमदर्शनात् आश्चर्य्यम् । कथं शब्दो हर्षे । स्वागतं सुखेनागमनं, किमिति काकुः । कस्मिन् स्थाने त्वं चलितोऽसीति शेषः ।

(ल) वस इति । गवाक्षकेण क्षुद्रगवाक्षद्वारेण, क्षुद्रार्थे कप्रत्ययः । मन्त्र-

ন্যায় শোভা পাইতেছে ; সেই এই মদনিকা, অত্যন্ত কামানলে সন্তপ্ত আমার হৃদয়কে যেন চন্দন দ্বারা শীতল করিতেছে ॥৪॥

মদনিকা ! ।

মদনিকা । (দেখিয়া) ওহে ! শর্বিলক যে ! শর্বিলক ! তোমার শুভাগমন ত ! । তুমি কোথায় চলিয়াছ ? ।

শর্বিলক । বলিব । (ইহার পর উভয়ে পরস্পর অনুরাগের সহিত দেখিতে লাগিল)

বসন্তসেনা । মদনিকা বড় বিলম্ব করিতেছে । তা সে কোথায় ?

चिट्ठदि । जधा अदिसिणिद्धाए णिच्चलदिट्ठिए आपिवन्ती विअ एदं णिज्झाअदि, तधा तक्केमि-एसो सो जणो एदं इच्छदि अभुजिस्सं कादुं । ता रमदु रमदु । मा कस्सावि पीदिच्छेदो भोदु । णक्खु सद्दाविस्सं । (ल)

मद । सव्विलअ ! कधेहि । (व)

मेषा केनापि पुरुषकेन सह मन्त्रयन्ती तिष्ठति । यथा अतिस्निग्धया निश्चलदृष्ट्या आपिबन्तीव एतं निध्यायति, तथा तर्कयामि —एष स जन एनामिच्छति अभुजिष्यां कर्त्तुम् । तत् रमतां रमताम् । मा कस्यापि प्रीतिच्छेदो भवतु । न खलु शब्दापयिष्यामि ।

(व) शर्विलक ! कथय ।

(ल) ... यतः पुरुषम्, निध्यायति अवलोकयति । "निवर्णनन्तु निध्यानं दर्शनालोकनेक्षणम्" इत्यमरः । स प्रागुक्तः । एनां मदनिकाम् । भुङ्क्ते स्वाम्युच्छिष्टमिति भुजिष्या दासी । "कचिभुजिष्या किष्यन्" । नियोज्य-किङ्करप्रैष्यभुजिष्यपरिचारकाः" इत्यमरः । अभुजिष्यां कर्त्तुम् स्वयं ग्रहणेन मम दास्यान्मोचयितुमित्यर्थः । शब्दापयिष्यामि मदनिकामाह्वयिष्यामि, तथात्वे अनयोः प्रेमालापभङ्गप्रसङ्ग इति भावः ।

(व) मद इति । कथय कस्मिन् स्थाने चलितोऽसीति इदानीमेव ब्रूहीत्यर्थः ।

(গবাক্ষদ্বার দিয়া দেখিয়া) এই মদনিকা যে কোন পুরুষের সঙ্গে আলাপ করতঃ অবস্থান করিতেছে। যখন অতিস্নিগ্ধ ও নিশ্চল দৃষ্টি দ্বারা যেন পান করতঃ ইহাকে দেখিতেছে, তখন আমি মনে করি এই সেই লোক, এই মদনিকাকে অদাসী করিতে ইচ্ছা করে (দাস্যবৃত্তি হইতে মুক্ত করিতে ইচ্ছা করে) তা, ...। কাহারই যেন প্রীতি ছেদ না হয়। আমি ডাকিব না।

মদনিকা শর্বিলক ! বল।

শর্বি। সশঙ্কং দিশোঽবলোকয়তি। (শ)

মদ। সব্বিলঅ! কিং ণ্বেদং? সসঙ্কো বিঅ লক্খীঅসি। (ষ)

শর্বি। বক্ষ্যে ত্বাং কিঞ্চিত্ রহস্যম্। তদ্বিবিক্তমিদম্?। [স]

মদ। অধইং। [হ]

বস। কধং পরমরহস্সং। তা ণ সুণিস্সং। [ক্ষ]

(ষ) শর্বিলক! কিং ন্বিদম্? সশঙ্ক ইব লক্ষ্যসে।

(হ) অথকিম্।

(ক্ষ) কথং পরমরহস্যম্। তত্ ন শ্রোষ্যামি।

(শ) শর্বি ইতি। দিশঃ সর্বাঃ। দিশামবলোকনং বিজনতাপরীক্ষার্থম্।

(স) শর্বি ইতি। রহস্যং গুপ্তবিষয়ম্। ইদং স্থানম্, বিবিক্তং বিজনং কিমিতি কাকুঃ। "বিবিক্তৌ পূতবিজনৌ" ইত্যমরঃ।

(হ) মদ ইতি। অথকিমিত্যেকমেবাব্যয়মঙ্গীকারে। অঙ্গীকারেঽপি চাথকিম্" ইতি হলায়ুধঃ।

(ক্ষ) বস ইতি পরমরহস্যম্ একান্তগোপনীয়ম্, বিবিক্ততাপ্রশ্নাদিতি ভাবঃ।

শর্বিলক। (আশঙ্কার সহিত সকল দিক্ নিরীক্ষণ করিতে লাগিল)

মদনিকা। শর্বিলক! একি? তোমাকে যেন আশঙ্কিত বলিয়া লক্ষ্য করিতেছি।

শর্বিলক। তোমাকে কোন গোপনীয় বিষয় বলিব। সুতরাং এ স্থানটি নির্জন ত?।

মদনিকা। হাঁ।

বসন্তসেনা। অত্যন্ত গোপনীয়! তা আমি শুনিব না।

शर्वि। मदनिके! किं वसन्तसेना मोचयति त्वां निष्क्रयेण?। (क)

वस। कधं मम सम्बन्धिणी कधा। ता सुणिस्सं इमिणा गवक्खेण ओवारिदसरीरा। (ख)

मद। सव्विलअ! भणिदा मए अज्जआ, तदो भणादि जइ मम सच्छन्दो, तदा विना अत्थं सव्वं परिजणं अभुजिस्सं करइस्सं। अध सव्विलअ! कुदो दे एत्तिओ विहवो? जेण मं अज्जआसआसादो मोआइस्ससि। (ग)

(क) कथं मम सम्बन्धिनी कथा। तत् श्रोष्यामि अनेन गवाक्षेण अपवारितशरीरा।

(ग) शर्विलक! भणिता मया आर्य्या; ततो भणति— यदि मम स्वच्छन्दः तदा विना अर्थं सर्वं परिजनमभुजिष्यं करिष्यामि। अथ शर्विलक! कुतस्ते एतावान् विभवः? येन मामार्य्यासकाशात् मोचयिष्यसि।

(क) शर्वं इति। निष्क्रयेन धनविनिमयेन।

(ख) वस इति। अपवारितशरीरा, अन्यथा ममावलोकनेन यद्यनयोरालापनिवृत्तिः स्यादिति भावः।

(ग) मद इति। भणिता 'उपयुक्तधनलाभेन मां मोचयसि नवा' इति पृष्टेत्यर्थः।

শর্বিলক। মদনিকা! বসন্তসেনা ধনের বিনিময়ে তোমাকে ছাড়িয়া দিবেন কি?।

বসন্তসেনা। এ, যে আমার সম্বন্ধেই কথা হইতেছে। তা এই গবাক্ষ দ্বারা আবৃতদেহ হইয়া শুনিব।

মদনিকা। শর্বিলক! আমি আর্য্যা বসন্তসেনাকে জিজ্ঞাসা করিয়া

শর্ব্বি। দারিদ্র্যেণাভিভূতেন ত্বৎস্নেহানুগতেন চ।
অদ্য রাত্রৌ ময়া ভীরু! ত্বদর্থে সাহসং কৃতম্ ॥৫॥

বস। পসণ্ণা সে আকিদী, সাহসকম্মদাএ উণ উব্বে-অণীআ। (ঘ)

(ঘ) প্রসন্না অস্য আকৃতিঃ, সাহসকর্ম্মতয়া পুনরুদ্বেজনীয়া।

আর্য্যা বসন্তসেনা। ছন্দঃ স্বৈরমভিপ্রায়ঃ। 'অভিপ্রায়শ্ছন্দ আশয়ঃ' ইত্যমরঃ। অভুজিষ্যমদাসম্, দাস্যন্মোচয়িষ্যস্যাস্যত্র। বিভবো ধনম্।

দারিদ্র্যেণেতি। হে ভীরু! ভয়শীলে! দারিদ্র্যেণ অভিভূত আক্রান্তস্তেন; অতো মূল্যাদিনা দাতুং ন শক্যামিতি ভাবঃ। তব স্নেহে প্রেমে অনুগতঃ প্রাপ্তস্তেন চ, অতো নিবৃত্তিরপি ন সম্ভবতীতি ভাবঃ। ময়া, অদ্য রাত্রৌ 'উভয়তোঽহরাব বা অহঃ' ইতি দুর্গসিংহোক্তিঃ; গতরাত্রিশেষে ইত্যর্থঃ; ত্বদর্থং তব নিষ্ক্রয়ণার্থং, সাহসং চৌর্য্যম্, কৃতম্ ॥৫॥

(ঘ) বস ইতি। প্রসন্না শান্তা। সাহসং কর্ম্ম যস্যাঃ সা তস্যা ভাবস্তয়া। উদ্বেজয়তীতি উদ্বেজনীয়া উদ্বেগজনিকা। 'কৃত্যল্যুটোঽন্যত্রাপি' ইতি কর্ত্তর্যনীয়ঃ।

ছিলাম; তাহাতে তিনি বলেন—"যদি আমার নিজ হইতে অভিপ্রায় হয়, তবে আমি বিনা ধনেই সকল পরিজনকে মুক্ত করিয়া দিব।" শর্বিলক! এত ধন তোমার কোথা হইতে আসিল? যে, আমাকে আর্য্যা বসন্তসেনার নিকট হইতে মুক্ত করিবে।

শর্বিলক। হে ভীরু! আমি দারিদ্র্যাভিভূত; অথচ তোমার প্রতি অনুরক্ত; তাই, আজ রাত্রিতে তোমার নিমিত্ত সাহসের কার্য্য করিয়াছি ॥৫॥

বসন্তসেনা। ইহার আকৃতি শান্ত; কিন্তু সাহসের কার্য্যে উদ্বে-গেরও বিষয়।

मद। सव्विलअ! इत्थीकल्लवत्तस्स कारणेण उहअं पि संसए विणिक्खित्तं। (ङ)

शर्वि। किं किम्?।

मद। सरीरं चारित्तं च। (च)

शर्वि। अपण्डिते! साहसे श्रीः प्रतिवसति। (छ)

मद। सव्विलअ! अखण्डिदचारित्तोसि। ता ण हु दे मम कारणादो साहसं करन्तेण अच्चन्तविरुद्धं आचरिदं?।(ज)

(ङ) शर्विलक! स्त्रीकल्यवर्त्तस्य कारणेन उभयमपि संशये विनिक्षिप्तम्।

(च) शरीरं चारित्रञ्च।

(ज) शर्विलक! अखण्डितचारित्रोऽसि। तत् न खलु त्वया मम कारणात् साहसं कुर्वता अत्यन्तविरुद्धमाचरितम्?।

(ङ) मद इति। स्त्रीकल्यवर्त्तस्य पूर्वव्याख्यानात् चतस्या अन्याः स्त्रियाः। संशयं स्थापितमन्द है।

(च) मद इति। चौर्य्यकरणाय प्रवृत्तौ गृहस्थकृत कप्रहारसम्भवेन शरीरं तत्कार्य्य प्रकाशसम्भवेन च चारित्रं संशये विनिक्षिप्तमित्यन्वयः।

(छ) शर्वि इति। श्रीः सम्पत्तिः, साहसकारिण एव सम्पत्तिर्भवतीत्यर्थः।

(ज) मद इति। अखण्डितचारित्रोऽसि साधुभावादविच्युतचारित्रोऽसि। इदन्तु

মদনিকা। শর্বিলক! অস্থায়ী স্ত্রীলোকের জন্য তুমি উভয়কেই সংশয়ে ফেলাইয়াছিলে।

শর্বিলক। কি কি?।

মদনিকা। শরীর এবং চরিত্র।

শর্বিলক। মুগ্ধে! সাহসেই লক্ষ্মী বাস করেন।

शर्वि ।

नो मुष्णाम्यबलां विभूषणवतीं फुल्लामिवाहं लतां,
विप्रस्वं न हरामि काञ्चनमथो यज्ञार्थमभ्युद्धृतम् ।
धात्र्युत्सङ्गगतं हरामि न तथा बालं धनार्थी क्वचित्,
कार्य्याकार्य्यविचारिणी मम मतिश्चौर्य्येऽपि नित्यं स्थिता ॥७॥

लोकप्रसिद्धिवशादहं जानामीति भावः । साहसं चौर्य्यम् । न खलु अत्यन्तविरुद्धमाचरितं किमिति काकुः । अत्यन्तविरुद्धमेवाचरितमित्यर्थः ।

नो इति । अहं धनार्थी सन्, फुल्लां फुल्लकुसुमां प्रस्फुटितपुष्पभूषितामित्यर्थः, लतामिव, विभूषणवतीं विशिष्टालङ्कारधारिणीम्, अबलां स्त्रियम्, नो मुष्णामि तद्भूषणविक्रयेण धनग्रहणार्थं नापहरामि ; पुष्पार्थं लताहरणस्येव अलङ्कारार्थं स्त्रीहरणस्य गुरुतरान्याय्यत्वादिति भावः । विप्रस्वं ब्राह्मणस्वत्वास्पदीभूतम्, काञ्चनं स्वर्णम्, न हरामि ; तदपहरणस्य महापातकत्वेन अत्यन्तविरुद्धत्वादित्याशयः । अथो तथा, यज्ञार्थम् अभ्युद्धृतम् आयोजितम् धनरत्नादिकं न हरामि ; तदपहरणस्यापि यज्ञव्याघातकत्वेन नितान्तासङ्गतत्वादित्यभिप्रायः । तथा, क्वचिदपि धात्र्या उपमातुः उत्सङ्गगतं क्रोडस्थितम्, बालं शिशुम्, न हरामि तद्बालविक्रयेण धनलाभार्थं नापहरामि ; तदपहरणस्यापि धात्र्या अपि शोकोदयात् प्राणनाशकत्वेन एकान्तानौचित्यादिति भावः । अतएव मम मतिर्बुद्धिः चौर्य्येऽपि विषये, नित्यं कार्य्याकार्य्यविचा-

---

মদনিকা। শর্বিলক! তোমার চরিত্র, পূর্বে খণ্ডিত হয় নাই। তা, তুমি আমার জন্য সাহস করতঃ, অত্যন্ত বিরুদ্ধ কোন আচরণ কর নাই ত ?।

শর্বিলক। আমি ধনার্থী হইয়া, কখনও, প্রস্ফুটিতপুষ্প লতার ন্যায় অলঙ্কারবতী অবলাকে অপহরণ করি না এবং ব্রাহ্মণের স্বর্ণ,

তদ্বিজ্ঞাপ্যতাং বসন্তসেনা —
অয়ং তব শরীরস্য প্রমাণাদিব নির্ম্মিতঃ ।
অপ্রকাশ্যং হ্যলঙ্কারঃ [১] মৎস্নেহাদ্ধার্য্যতামিতি ॥৭॥

রিণী কর্ত্তব্যাকর্ত্তব্যবিবেকশালিনী সতী, স্থিতা ; সুতরাঞ্চ তব কারণাৎ সাহসং কুর্ব্বতাপি ময়া অত্যন্তবিরুদ্ধং নাচরিতমেবেত্যাশয়ঃ ।

অত্র প্রথমে পাদে শ্রৌতী উপমা দ্বিতীয়ে কাঞ্চন-যজ্ঞার্থদ্রব্যয়োঃ হরামীত্যেকয়া ক্রিয়যা কর্ম্মতয়াভিসম্বন্ধাৎ তুল্যযোগিতা, তৃতীয়ে ধনার্থশব্দয়োঃ পর্য্যায়তয়া আপাততঃ পৌনরুক্ত্যপ্রতীতাবপি পরং ধনপ্রয়োজনীত্যর্থকতয়া পর্য্যবসানাৎ ভিন্নাকারশব্দগতত্বাচ্চ পুনরুক্তবদাভাসঃ, তথা চতুর্থপাদং প্রতি পূর্ব্বপাদত্রয় বাক্যার্থানাং হেতুত্বাৎ বাক্যার্থহেতুকং কাব্যলিঙ্গম্ ; ইত্যেতেষাং গুণপ্রধানভাবেনাঙ্গাঙ্গিভাবাৎ সঙ্করঃ । তথা হরামীত্যস্য দ্বিরুপাদানাৎ কথিতপদতাদোষঃ ; স চ একস্মিন্ হরামীত্যত্র নয়ামীতি পাঠেন সমাধেয়ঃ ।

অত্র ব্রাহ্মণস্যৈব মৈত্রেয়স্য হস্তাৎ সুবর্ণভাণ্ডস্য প্রাগপহৃতত্বেঽপি তদানীং তস্য ব্রাহ্মণত্বেন জ্ঞানাভাবাৎ 'বিপ্রস্বং ন হরামি' ইত্যনেন ন বিরোধঃ । ব্রাহ্মণস্বর্ণহরণস্য মহাপাতকত্বং প্রায়শ্চিত্তবিবেকাদাবনুসন্ধেয়ম্ ।

শার্দ্দূলবিক্রীড়িত বৃত্তম্ ॥৬॥

অয়মিতি । তব বসন্তসেনায়াঃ, শরীরস্য প্রমাণাদিব পরিমাণং গৃহীত্বেব, তয়ৈব এতদুভয়প্রমাণদর্শনাদিতি ভাবঃ, নির্ম্মিতঃ শিল্পিনা কৃতঃ, অয়মলঙ্কারঃ, মৎ-

যজ্ঞের জন্য ; আনীত বস্তু এবং ধাত্রীর ক্রোড়স্থিত বালক হরণ করি না। কারণ, আমার বুদ্ধি চৌর্য্যবিষয়েও, সর্বদা কর্ত্তব্যাকর্ত্তব্য-বিবেকবতী হইয়াই অবস্থান করে ॥৬॥

অতএব বসন্তসেনাকে জানাও—

'তোমার শরীরের পরিমাণ লইয়াই যেন এই অলঙ্কার নির্ম্মিত

(১) অপ্রকাশ্যঃ ।

मद। सव्विलअ! अप्पकासं (२) अलङ्कारओ त्ति दुवेवि ण जुज्जदि (३)। ता उवणेहि दाव पेक्खामि एदं अलङ्कारअं। (झ)

शर्वि। इदमलङ्करणम्। इति साशङ्कं समर्पयति।

मद। निरूप्य। दिट्ठपुरुव्वो विअ अअं अलङ्कारओ। ता भणेहि कुदो दे एसो?। (ञ)

(झ) शर्विलक! 'अप्रकाश्यम् अलङ्कारकः' इति द्वयमपि न युज्यते। तदुपनय तावत् प्रेक्षे एतमलङ्कारकम्।

(ञ) दृष्टपूर्व इवायमलङ्कारः। तद् भण कुतस्ते एषः?।

स्नेहात् स्नेहेन सख्याः ममानुरोधादित्यर्थः, हि निश्चितम्, अप्रकाश्यं जनसमीपे गोप्यं यथा स्यात्तथा त्वया धार्य्यताम् गोपनभावेन धार्य्यं परिधेय इत्यर्थः। इतिशब्दस्य विज्ञाप्यतामिति पूर्वगतेनान्वयः।

अत्र क्रियोत्प्रेक्षालङ्कारः। प्रमाणादिति ल्यब्लोपे पञ्चमी ॥७॥

(झ) मद इति। न युज्यत इति। तथा च अलङ्क्रियते अनेनेति अलङ्कारः। तेन च लोकेभ्यः शोभाप्रदर्शनार्थमेव अलङ्कारधारणम्। एवञ्च अप्रकाश्यञ्चेत् किमर्थमलङ्कारधारणम्? अलङ्कारधारणञ्चेत् कथमप्रकाश्यम्?। विशेषतश्च वेश्याया अलङ्कारधारणजनितशोभायाः स्वमातृदृश्यत्वे उद्वेगस्यैवासिद्धिरिति भावः।

হইয়াছিল; এখন আমার স্নেহে গোপনে এই অলঙ্কার ধারণ কর ॥৭॥

মদনিকা। শর্বিলক! 'গোপন' এবং 'অলঙ্কার ধারণ' এই দুইটিই সঙ্গত হয় না। তা, আন; দেখি এই অলঙ্কার।

শর্বিলক। এই অলঙ্কার। (এই বলিয়া আশঙ্কার সহিত অর্পণ করিল)

(২) অপ্পকাশো।

(৩) অক্কং ণ জত্তো ত্তি দুবেবি ণ জুজ্জদি।

শর্ব্বি। মদনিকে! কিং তব অনেন। গৃহ্যতাম্। (ট)

মদ। সব্বিল! জই মে পচ্চঅং ণ গচ্ছসি, তা কিং ণিমিত্তং মং ণিক্কিণাসি?। (ঠ)

শর্ব্বি। অয়ি! প্রভাতে ময়া শ্রুতং শ্রেষ্ঠিচত্বরে—যথা সার্থবাহস্য চারুদত্তস্য ইতি। (ড)

(ঠ) যদি মে প্রত্যয়ং ন গচ্ছসি, তৎ কিং নিমিত্তং মাং নিষ্ক্রীণাসি?।

(ঞ) মদ ইতি। এষঃ অলঙ্কারকঃ কুতস্তে হস্তগতোঽভূদিতি শেষঃ।

(ট) শর্ব্বি ইতি। অনেন-এতৎপ্রাপ্তিবৃত্তান্তজ্ঞানেন।

(ঠ) মদ ইতি। প্রত্যয়ং বিশ্বাসম্, ন গচ্ছসি ন প্রাপ্নোষি। নিষ্ক্রীণাসি-অলঙ্কারবিনিময়েন স্বায়ত্তীকর্ত্তুমিচ্ছসীত্যর্থঃ। তথা চ প্রিয়া হি নাম সর্ব্ববিশ্বাসস্থানম্ আদাবেব চেৎ তবাবিশ্বাসঃ, তদা তস্যাশ্চিরসঙ্গিত্ব-করণার্থোঽয়মুদ্যমো ব্যর্থ এব তবেতি ভাবঃ।

(ড) শর্ব্বি ইতি। শ্রেষ্ঠিচত্বরে বণিকপল্লাম্। সার্থবাহস্য বণিগ্ব্যবসায়িনঃ।

মদনিকা। (নিরূপণ করিয়া) এই অলঙ্কার যেন পূর্ব্বে দেখিয়াছি বলিয়া বোধ হয়। তা, বল দেখি—ইহা কোথা হইতে তোমার হস্তগত হইল?।

শর্ব্বিলক। মদনিকা! সে খবর দিয়া তোমার দরকার কি?। লও।

মদনিকা। (ক্রোধের সহিত) যদি আমার উপরে বিশ্বাসই না কর, তাহা হইলে আমাকে হস্তগত করিতে চাহ কেন?।

শর্ব্বিলক। ওহে! প্রাতঃকালে বণিক্পাড়ায় আমি শুনিয়াছি যে ইহা বাণিজ্যব্যবসায়ী চারুদত্তের।

वसन्तसेना मदनिका च । मूर्च्छां नाटयतः । (ढ)

शर्वि । मदनिके ! समाश्वसिहि । किमिदानीं त्वम्—

विषादस्रस्तसर्व्वाङ्गी, सम्भ्रमभ्रान्तलोचना ।
नीयमानाऽभुजिष्यात्वं कम्पसे, नानुकम्पसे ॥८॥

अत्र वज्रं नाम प्रतिमुखसन्ध्यङ्गम्, "प्रत्यक्षनिष्ठुरं वज्रम्" इति लक्षणात् ।

(ढ) वसन्तेति । स्वगृहे चौरे प्रविष्टे जानन् गृहस्थोऽवश्यमेव तं धर्त्तुं यतेत; तत्र च चौरोऽपि गृहस्थोपरिप्रहारादिना आत्मानं मोचयितुं चेष्टेत । एवञ्चेत् शर्व्विलककृतप्रहारादिना चारुदत्तस्य अनिष्टसम्भावनया शोकोदयात् वसन्तसेनाया मूर्च्छा, मदनिकायाश्च तत्सम्पर्कादिति बोध्यम् ।

विषादेति । अभुजिष्यात्वम् अदासीत्वम्, नीयमाना एतदलङ्कारविनिमयेन अधुनैव मया प्राप्यमाणा त्वम्, विषादेन शोकेन स्रस्तानि भूमौ पतितानि सर्व्वाणि अङ्गानि यस्याः सा, तथा सम्भ्रमेण भयव्यस्ततया भ्रान्ते घूर्णिते लोचने यस्याः सा तादृशी सती, किं कम्पसे ; किन्तु न अनुकम्पसे मां प्रति न दयसे । तथा च दासीत्वे सत्येव स्वामिन्याः शोकसम्भवे आत्मनोऽपि शोकः प्रदर्शनीय एव, अन्यथा स्वामिन्याः कोपेन अनिष्टसम्भावना स्यात् ; अत्र तु अलङ्कारविनिमयेन त्वं तस्माद्दासीत्वान्मोच्यस एव ; तथापि स्वामिन्याः भयशोकसम्भवेन आत्मनोऽपि भयशोकप्रदर्शनार्थं कम्पनमसङ्गतमेव । एवं मयैव तव अभुजिष्यात्वकरणात् मां प्रति तव दयाकरणमुचितमेवेति भावः ।

अत्र भुजिष्यात्वरूपकारणाभावेऽपि कम्पनरूपकार्य्योत्पत्तेर्विभावना, तथा अभुजिष्यात्वप्रापणरूपकारणे सत्यपि अनुकम्पारूपकार्य्यानुत्पत्तेर्विशेषोक्तिः, अनयोर्मिथो निरपेक्षतया संसृष्टिः ॥८॥

বসন্তসেনা ও মদনিকা মূর্চ্ছা অভিনয় করিল ।

শর্বিলক । মদনিকা ! আশ্বস্ত হও ।

শোকে তোমার সমস্ত অঙ্গ, ভূতলে লুণ্ঠিত হইতেছে এবং ব্যস্ততা-

मद। (ससाध्वसम्)। साहसिअ! ण क्खु तुए मम कारणादो इमं अकज्जं करन्तेण तस्सिं गेहे कोवि वावादिदो परिक्खदो वा?। (ग)

शर्वि। मदनिके! भीतं सुप्ते न शर्विलकः प्रहरति। तस्मात् न कश्चित् व्यापादितो नापि परिक्षतः।

मद। सच्चं?। (घ)

(ग) साहसिक! न खलु त्वया मम कारणादिदमकार्यं कुर्वता तस्मिन् गेहे कोऽपि व्यापादितः परिक्षतो वा?।

(घ) सत्यम्?।

(ग) मद इति। न खलु कोऽपि व्यापादितः परिक्षतो इति काक्वा प्रश्नो व्यक्तः।

(घ) मद इति। अत्रापि काक्वा इदमस्य सत्यं किमित्यर्थः।

বশতঃ মদনাশর পীড়িত হইতেছে, এই অবস্থায় কেন এখন তুমি কি দি-তেছ? অথচ তোমাকে দাসত্ব হইতে মুক্ত করিতেছি, তথাপি কেন দয়া করিতেছ না? ॥৮॥

মদনিকা। (আশঙ্ক হইয়া) সাহসিক! তুমি আমার জন্য এই অকার্য্য করিতে থাকিয়া, সেই বাড়ীতে কাহাকেও হত্যা বা আহত কর নাই ত?।

শর্বিলক। মদনিকা! ভীত বা নিদ্রিত ব্যক্তির উপরে শর্বিলক প্রহার করে না। অতএব আমি কাহাকেও হত্যা বা আহত করি নাই।

মদনিকা। সত্য?।

शर्वि। सत्यम्।

वस। संज्ञां लब्ध्वा। अम्महे! पच्चुज्जीविदम्हि। (थ)

मद। पिअं। [द]

शर्वि। सेर्ष्यम्। मदनिके! किं नाम प्रियमिति?। (ध)

त्वत्स्नेहबद्धहृदयो हि करोम्यकार्य्यं
सद्वृत्तपूर्ब्बपुरुषेऽपि कुले प्रसूतः।

(थ) अहो! प्रत्युज्जीवितास्मि।

(द) प्रियम्।

(थ) वस इति। अम्महे इति। विस्मयार्थं देशीभाषा। प्रत्युज्जीवितास्मि पुनरुद्गतजीवनास्मि, चारुदत्तस्य स्वास्थ्यसंवादलाभादिति भावः।

(ध) शर्वि इति। चारुदत्तस्य स्वास्थ्यवार्त्ता निःसन्दिग्धास्तत्र किं प्रियमित्यर्थः।

त्वदिति। सन्ति साधूनि वृत्तानि व्यवहारा येषां तादृशाः पूर्ब्बपुरुषा यस्मिन् तथोक्ते कुले वंशे, प्रसूतोऽपि जातोऽपि अहम्, तव स्नेहेन प्रणयेन बद्धं हृदयं यस्य स तादृशः, हि निश्चितं यत्, अकार्य्यं कर्त्तव्यविपरीतं निन्दितचौर्य्यकर्म्म करोमि। तथा मन्मथेन कामाग्निना विपन्ना नष्टा गुणाः सच्चरित्रादयो यस्य स तथाविधः सन्नपि, मानं तव गौरवम्, रक्षामि अकृत्येन अबलात्कारेण च प्रवृत्त्या स्थापयामि। इतश्च त्वम्, मां मित्रं वल्लभम् व्यपदिशसि मुखेन ब्रवीषि, अपरञ्च पुरुषं चारुदत्तमित्यर्थः, यासि कर्म्मणा भजसि। वैश्यात्वेन अतीव लघुस्वभावा त्वमिति भावः।

শর্ব্বিলক। সত্য।

বসন্তসেনা। (চৈতন্য লাভ করিয়া) আহা বাঁচিলাম।

মদনিকা। ইহা প্রীতিকর সংবাদ।

শর্ব্বিলক। (ঈর্ষ্যার সহিত) মদনিকা! কি প্রীতিকর সংবাদ?।

যে বংশের পূর্ব্ব পুরুষেরা সৎকার্য্যকারী ছিলেন, সেই বংশে জন্মিয়া আমি, তোমার প্রতি অনুরাগে আবদ্ধচিত্ত হইয়াই, অকার্য্য

रक्षामि मन्मथविपन्नगुणोऽपि मानं

मित्रञ्च मां व्यपदिशस्यपरञ्च यासि ॥९॥

प्राकृतम् । (न) इह सर्वस्वफलिनः कुलपुत्रमहाद्रुमाः ।

निष्फलत्वमलं यान्ति वेश्याविहगभक्षिताः ॥१०॥

मत्पक्षे इमं शर्विलकेन चारुदत्तस्य अभिज्ञानरूपाणां अलङ्काराणां [illegible] स्वामिनी सखी च वसन्तसेना दृष्टा सौहार्द्दहीना च [illegible] इति विभाव्य च इयं मदनिका भयेन कम्पिता शोकेन च सन्ताङ्गी इत्यवधार्य शर्विलकेन पूर्वं "विवादमन्न-सर्वाङ्गी" इत्यादिकमुक्तम् ; इदानीन्तु वसन्तसेनायाः असन्निधाने एव चारुदत्तस्य स्वाच्छन्द्ये निर्माल्यतिशयकरणात् चारुदत्तं प्रत्यं [illegible] विचिन्त्य "[illegible]—" इत्याद्यभिहितमिति बोध्यम् ।

अत्र व्यपदिशसि-यासीत्यनेकक्रियायोगस्वाभिन्य [illegible] कारकत्वात् दीपकमलङ्कारः ।

वसन्ततिलका वृत्तम् ॥९॥

(न) साकूतमिति । आकूतेन मदनिकागत-लब्ध-विरक्ताभिप्रायेन सहेत्यर्थः ।

इहेति । इह जगति, सर्वं स्वं धनमेव फलमेषामस्तीति सर्वस्वफलिनः, कुल-पुत्राः सद्वंशजाता जना एव महाद्रुमा महावृक्षाः, वेश्या एव विहगाः पक्षिणस्तैः भक्षिताः फलखादनेन खादिताः सन्तः, अलमत्यन्तम्, निष्फलत्वं धनरूपफलशून्यत्वम्, यान्ति प्राप्नुवन्ति । अतएव सर्वनाशकरीं वेश्यां धिक् इति भावः ।

अत्र समस्तवस्तुविषयं साङ्गं रूपकमलङ्कारः । तथा निष्फलत्वमित्यत्र सर्वस्वरूपस्य उपमेयस्य अनभिधानात् न्यूनपदत्वदोषः, यान्तीत्यन्तेन वाक्यसमाप्तावपि "कुलपुत्र-महाद्रुमाः" इत्यस्य विशेषणत्वेन पुनश्चतुर्थचरणोपादानात् समाप्तपुनरात्तत्वदोषः, एवं

করিয়াছি এবং কামাবেগে আমার গুণ বিনষ্ট হইলেও, আমি তোমার গৌরব রক্ষা করিতেছি; অথচ তুমি আমাকে প্রিয়ও বলিতেছ, অন্য পুরুষকেও ভজনা করিতেছ ॥৯॥

(অভিপ্রায়ের সহিত) এই জগতে সদ্বংশজাত পুরুষগণ মহাবৃক্ষ ;

अयञ्च सुरतज्वालः कामाग्निः प्रणयेन्धनः।
नराणां यत्र हूयन्ते यौवनानि धनानि च ॥११॥

वेश्याविहगीति उभयोर्योषलाभयोर्लिङ्गभेदात् दर्पणमते भग्नप्रक्रमतादोषश्च; 'वेश्याविहङ्गमैर्भुक्ता यान्त्यलं स्वफलक्षयम्' इति पाठे तु तेषां समाधानम्। न च तथा पाठे स्वशब्दस्य द्विरुपादानात् पुनः कथितपदतादोष इति वाच्यम्, तस्य उद्देश्यप्रतिनिर्देश्यव्यतिरिक्तविषयत्वव्यवस्थापनात् अत्र तु उद्देश्यप्रतिनिर्देश्यविषयकत्वात्।

ननु 'न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत् तदर्थप्रतिपत्तिकरः' इत्यभिधानात् सर्वस्वमेव फलं येषां ते सर्वस्वफला इति बहुव्रीहिणैव सम्पत्तौ कथं मत्वर्थीय इन्प्रत्यय इति चेन्न अत्र प्राशस्त्यार्थे इन्विधानात् तदर्थस्य च बहुव्रीहिणा वक्तुमशक्यत्वात् अतएव हि तदनुशासने 'बहुव्रीहिश्चेत् तदर्थप्रतिपत्तिकरः' इत्यभिधानात् ॥१०॥

अयमिति। अपि चेति शेषः। सुरतमेव ज्वाला अर्चिर्यस्य सः, प्रणयः अनुराग एव इन्धनं काष्ठं यस्य सः, अयं मानुषैरनुभूयमानः, काम एव अग्निः सः, प्राणिमात्र एव वर्त्तत इति शेषः। यत्र कामाग्नौ, नराणां यौवनानि धनानि च हूयन्ते अदृष्टेन निक्षिप्यन्ते घृतादीनि हवींषीव निक्षिप्यमाणानि लोपं प्रयान्तीत्यर्थः। अतएव महानर्थमूलं काममपि धिगिति भावः।

अत्र सुरतादौ ज्वालाद्यारोपः शाब्दः, यौवनादौ हविराद्यारोपस्तु आर्थ इति एकदेशविवर्त्ति रूपकमलङ्कारः ॥११॥

সমস্ত ধন তাহার ফল; কিন্তু বেশ্যারূপ পক্ষিগণ সেই মহাবৃক্ষগুলিকে ভক্ষণ করে, তাহাতে সে গুলি একেবারে নিষ্ফলতা (নির্ধনতা) প্রাপ্ত হয় ॥১০॥

এই কামই অগ্নি; রমণ তাহার শিখা এবং প্রণয় তাহার ইন্ধন, যে অগ্নিতে মানুষের যৌবন ও ধন আহুতি দেয় ॥১১॥

বস। সস্মিতম্। অহো! সে অত্থাণে আবেও। (প)

শর্ব্বি। সর্ব্বথা—

অপণ্ডিতাস্তে পুরুষা মতা মে,
যে স্ত্রীষু চ শ্রীষু চ বিশ্বসন্তি।
শ্রিয়ো হি কুর্ব্বন্তি তথৈব নার্য্যো
ভুজঙ্গকন্যাপরিসর্পণানি ॥১২॥

(প) অহো! অস্য অস্থানে আবেগঃ।

(প) বস ইতি। অস্য শর্ব্বিলকস্য, অস্থানে অবিষয়ে, আবেগ ঈর্ষ্যাপ্রভাবঃ। তথা চ মদনিকা চারুদত্তং প্রতি ন খল্বনুরক্তা, তথাপি অস্যেদৃশী সম্ভাবনা ভ্রমমূলৈবেতি ভাবঃ।

অপণ্ডিতা ইতি। যে পুরুষাঃ, স্ত্রীষু চ শ্রীষু সম্পৎসু চ বিশ্বসন্তি আত্মীয়ত্বেন বিশ্বাসং কুর্ব্বন্তি; তে পুরুষাঃ সর্ব্বথা অপণ্ডিতা অজ্ঞাঃ, মে মম মতা অভিমতাঃ। হি যস্মাৎ, শ্রিয়ঃ সম্পদঃ, তথৈব নার্য্যঃ স্ত্রিয়শ্চ, ভুজঙ্গকন্যানাং সর্পীণাং পরিসর্পণানি তদ্বৎ সর্ব্বতো বক্রগমনানি কুটিলব্যবহারাংশ্চ কুর্ব্বন্তি। সুতরাং তত্তানভিজ্ঞানাত্তেষামপণ্ডিতত্বং যুক্তমেবেতি পরানুরক্তায়াং মদনিকায়ামাত্মীয়ত্বেন বিশ্বাসকরণাদহমপ্যপণ্ডিত এবেতি ভাবঃ।

অত্র অপ্রস্তুতপুরুষসামান্যাভিধানাৎ প্রস্তুতাত্মরূপপুরুষবিশেষপ্রতীতেরপ্রস্তুতপ্রশংসালঙ্কারঃ; স্ত্রিয়ঃ প্রস্তুতাঃ শ্রিয়শ্চাপ্রস্তুতাঃ তাসাঞ্চ—বিশ্বাসরূপৈকধর্ম্মাভিসম্বন্ধাদ্দীপকম্, অপণ্ডিতমননকার্য্যস্য ভুজঙ্গকন্যাতুল্যপরিসর্পণকারণরূপকারণেন সমর্থনাদর্থান্তরন্যাসঃ; পূর্ব্বমেব প্রস্তুতাভিঃ স্ত্রীভিঃ সহ পূর্ব্বার্দ্ধেন প্রস্তুতানাং শ্রীণাং কুর্ব্বন্তীত্যেক-

বসন্তসেনা। (ঈষৎ হাস্যের সহিত) কি আশ্চর্য্য! এই ব্যক্তির দেখিতেছি অস্থানে ঈর্ষ্যার আবেগ হইয়াছে।

শর্ব্বিলক। যাহারা স্ত্রীলোক ও সম্পদের উপরে বিশ্বাস করে; তাহাদিগকে আমি সর্ব্বপ্রকারেই মূর্খ বলিয়া মনে করি। কারণ, সম্পদ ও স্ত্রীলোক, সর্প কন্যার ন্যায় বক্র গমন (কুটিল ব্যবহার) করিয়া থাকে ॥১২॥

स्त्रीषु न रागः कार्य्यो रक्तं पुरुषं स्त्रियः परिभवन्ति ।
रक्तैव हि रन्तव्या विरक्तभावा तु हातव्या ॥१३॥

सुष्ठु खल्विदमुच्यते—(फ)

एता हसन्ति च रुदन्ति च वित्तहेतोः—
विश्वासयन्ति पुरुषं, न तु विश्वसन्ति ।

क्रियाभिसम्बन्धात् तुल्ययोगिता ; तथा अन्यपरिसर्पणं कथमन्ये कुर्वन्तीति वस्तुसम्बन्धोऽसम्भवन् भुजङ्गकन्यानां परिसर्पणानीव परिसर्पणानीति सादृश्यं बोधयतीति निदर्शना च, इत्येतेषां गुणप्रधानभावेनाङ्गाङ्गिभावात् सङ्करः ।

तथा पूर्व्वार्द्धे स्त्रीषु चेति प्रथमं पठित्वा परार्द्धे नार्य्य इति परपाठादस्थानस्थपदतादोषः, स्त्रीशब्देन प्रक्रम्य नारीशब्दाभिधानाद् भग्नप्रक्रमतादोषश्च ; 'स्त्रियो हि कुर्व्वन्ति तथा स्त्रियश्च' इति पाठे तु तयोः समाधानम् ।

उपेन्द्रवज्रेन्द्रवज्रयोर्मेलनादुपजातिर्वृत्तम् ॥१२॥

स्त्रीष्विति । स्त्रीषु रागः प्रेम, न कार्य्यो न विधेयः । कुत इत्याह—स्त्रियः रक्तमात्मानं प्रत्यनुरक्तं पुरुषम्, परिभवन्ति अपमानयन्ति । हि तस्माद्धेतोः रक्तैव आत्मानं प्रति स्वत एवानुरक्ता स्त्री रन्तव्या अनुरागविषयीकर्त्तव्या; तु किन्तु विरक्तभावा पूर्व्वतोऽनुरागविहीना, हातव्या विड़म्बनापरित्यागाय पुरुषेण परित्यक्तव्या । अतएव इयं मदनिकापि विरक्तभावत्वात् भाविपरिभवसम्भवाच्च मया हातव्येति भावः ।

अतएवात्रापि पूर्व्ववदेव अप्रस्तुतप्रशंसालङ्कारः वाक्यार्थहेतुकं काव्यलिङ्गञ्च, अनयोरङ्गाङ्गिभावेन सङ्करः आर्य्या जातिः ॥१३॥

(फ) सुष्ठु इति । प्रशस्तमित्यर्थः । "सुष्ठु दुष्ठु प्रशंसने" इत्यमरः ।

एता इति । एता वेश्याः, वित्तहेतोः पुरुषात् धनादानार्थम्, हसन्ति पुरुषस्य अनु-

---

স্ত্রীলোকের প্রতি অনুরাগ কর্ত্তব্য নহে; কারণ, স্ত্রীলোকেরা অনুরক্ত পুরুষকে অপমানিত করে। অনুরক্তার প্রতিই অনুরাগ কর্ত্তব্য; কিন্তু অননুরক্তাকে পরিত্যাগ করা উচিত ॥১৩॥

লোকে একথা ভালই বলে—

तस्मान्नरेण कुलशीलसमन्वितेन
वेश्याः श्मशानसुमना इव वर्जनीयाः ॥१४॥

रागवर्द्धनार्थम् आत्मनश्च अनुरागव्यञ्जनार्थम्, हास्यं कुर्व्वन्ति च; रुदन्ति अन्नवस्त्राद्यभावं ज्ञापयन्त्यो रोदनं कुर्व्वन्ति च। तथा पुरुषं विश्वासयन्ति, हावभावादिना आत्मानं प्रति विश्वस्तं कुर्व्वन्ति, तु किन्तु, स्वयं पुरुषं न विश्वसन्ति, अविरतधननिष्काशनेन विरक्तिसम्भवादिति भावः। तस्मात् कुलशीलसमन्वितेन सत्कुलोत्पत्तिसद्स्वभावविशिष्टेन नरेण, श्मशानस्य सुमनाः पुष्पमिव, वेश्या वर्जनीयाः, दृष्टितः सौरभतश्च रम्या अपि अमाङ्गलिकत्वादिति भावः।

अत्रापि अप्रस्तुतवेश्यासामान्याभिधानात् मदनिकारूपवेश्याविशेषप्रतीतेरप्रस्तुतप्रशंसालङ्कारः, हसन्तीत्याद्यनेकक्रियाणाम् एता इत्येककर्त्तृकारकत्वात् दीपकम्, श्रौती उपमा च, इत्येतेषामङ्गाङ्गिभावेन सङ्करः। तथा चतुर्थपादे उपमानोपमेययोर्व्वचनभेदात् भग्नप्रक्रमतादोषः, "ज्योत्स्ना इव सिता कीर्त्तिः" इति दर्पणोदाहरणवत्, 'वर्जनीया' इतिबहुवचनस्य उभयत्रान्वयाभावेन सुधियामुद्वेगजनकत्वात्। 'वेश्या श्मशान सुमना इव वर्जनीया' इत्येकवचनान्तपाठे तु तद्दोषपरिहारः। अमरकोषटीकायां रघुनाथेन तथैव पठितश्च।

ननु "स्त्रियः सुमनसः पुष्पम्" इत्यमरकोषे पुष्पसामान्यार्थे बहुवचननिर्द्देशात् "बहवः समाः सिकता वर्षा सुमनसो जलौकसः" इति वामनाचार्य्येण तु बहव इति स्पष्टाभिधानाच्च कथमत्र श्मशानसुमना इति पुष्पसामान्यार्थे एकवचनमिति चेन्न "सुमनाः कुसुमं पुष्पम्" इति नाममालायामेकवचननिर्द्देशात् कातन्त्रपरिशिष्टे श्रीपतिना "पुष्पे च सुमनसो वा" इति पुष्पसामान्यार्थ एव एकवचनबहुवचनयोर्व्विकल्प-

---

বেশ্যারা ধনের জন্য হাসে, আবার কাঁদে এবং আপনাদিগের প্রতি পুরুষদিগকে বিশ্বস্ত করে, কিন্তু আপনারা পুরুষদিগকে বিশ্বাস করে না। অতএব সৎকুল ও সৎস্বভাববিশিষ্ট লোক, শ্মশানস্থ পুষ্পের ন্যায় বেশ্যাদিগকে বর্জন করিবেন ॥১৪॥

अपि च

समुद्रवीचीव चलस्वभावाः
सन्ध्याभ्रलेखेव मुहूर्त्तरागाः।
स्त्रियो हृतार्थाः पुरुषं निरर्थं
निष्पीड़ितालक्तकवत् त्यजन्ति ॥१५॥

दत्वस्य स्पष्टाभिधानात् असरवामनाद्यभिधानस्य तु प्रायिकत्वाभिप्रायात्। केचित्तु श्मशानस्य सुमना मालतीपुष्पमिति व्याचक्षते। तथात्वे तु अविशेषे विशेषाख्यदोषस्य प्रसक्तिरिति ध्येयम्।

वसन्ततिलका वृत्तम् ॥१४॥

समुद्रेति। समुद्रस्य वीचौ तरङ्ग इव, चलस्वभावाश्चलप्रकृतयः, तथा सन्ध्यायां सायंकाले यदभ्रं मेघस्तस्य लेखा रेखा इव, मुहूर्त्तम् अल्पकालस्थायी रागो रक्तिमा अनुरागश्च यासां ताः, स्त्रियो वेश्याः, हृताः पुरुषादाकृष्य गृहीता अर्था धनानि याभिस्तास्तादृश्यः सत्यः, निरर्थं निकृष्टधनम् पुरुषम्, निष्पीड़ितं निष्पीड्य बहिष्कृतरसम् यदलक्तकम् अलक्तकाक्ततूलकादिकं तद्वत् त्यजन्ति। अतः केवलस्वार्थपरायणा वेश्याः सर्व्वथा धिगिति भावः।

अत्रापि पूर्व्ववदप्रस्तुतप्रशंसा, मालोपमा, तद्धितगतश्रौतोपमा च इत्येतेषामङ्गाङ्गिभावेन सङ्करः। तथा पूर्व्ववदेव वचनभेदादुपमागतभग्नप्रक्रमतादोषः, वेश्या इति स्त्रीविशेषे वक्तव्ये स्त्रिय इति तत्सामान्योक्तौ विशेषे अविशेषाख्यदोषश्च।

'समुद्रवीचीव चलस्वभावा सन्ध्याभ्रलेखेव मुहूर्त्तरागा।
वेश्या हृतार्था पुरुषं निरर्थं निष्पीड़ितालक्तकवज्जहाति ॥',

इति पाठेन तु तयोः समाधानम्। उपजातिर्वृत्तम् ॥ १५ ॥

আরও, বেশ্যাদিগের স্বভাব, সমুদ্রতরঙ্গের ন্যায় চঞ্চল এবং বেশ্যাদিগের অনুরাগ, সন্ধ্যাকালীন মেঘরেখার রক্তিমার ন্যায় অল্পকালস্থায়ী আর বেশ্যারা ধন আকর্ষণ করিয়া, নির্ধন পুরুষকে নিষ্পীড়িত অলক্তকের ন্যায় পরিত্যাগ করে ॥১৫॥

स्त्रियो नाम चपलाः— (व) निश्चोष:

अन्यं मनुष्यं हृदयेन कृत्वा, अन्यं ततो दृष्टिभिराह्वयन्ति।
अन्यत्र मुञ्चन्ति मदप्रसेकमन्यं शरीरेण च कामयन्ते ॥ १६ ॥

(व) स्त्रिय इति। चपला अस्थिरचित्ताः, स्त्रियः प्रकरणात् वेश्या इति परपद्यस्थ-क्रियाभिरन्वीयते।

अन्यमिति। हृदयेन अन्यं मनुष्यं कृत्वा मनसा अन्यं पुरुषं कामयित्वेत्यर्थः, ततः परम्, दृष्टिभिरन्यं मनुष्यमाह्वयन्ति। अन्यत्र मनुष्ये, मदप्रसेकं यौवनमदसम्बन्धिनं हावभावादिकम्, मुञ्चन्ति प्रयोजयन्ति, शरीरेण च अन्यं मनुष्यम्, कामयन्ते कामस्य चरमव्यापाररूपं सुरतं निष्पादयन्ति। अतो नितान्तगर्हितस्वभावाः स्वल्पिमाः एवमेव अविश्वसनीया इत्याशयः।

अत्र पूर्ववदप्रस्तुतप्रशंसा, एकवेश्याजातेरनेकार्थचरत्वात् विरुषालङ्कारश्च अनयोः पूर्ववत् सङ्करः। तथा 'वासवाशामुखे भाति इन्दुश्चन्दनविन्दुवत्" इति दर्पणोदाहृतवत् प्रथमद्वितीयचरणयोः सन्धिकरणाभावात् सन्धिविश्लेषदोषः, कृत्वेति क्त्वाप्रत्ययेनैव आनन्तर्यबोधनेऽपि पुनस्तत इत्युपादानादधिकपदतादोषः, अन्यमिति वारं वारमभिधानादनवीकृतत्वदोषः, प्रसेकशब्दस्य विलासार्थावाचकत्वादवाचकत्वदोषः, पूर्वं परस्मैपदद्वयं प्रक्रम्य कामयन्त इत्यात्मनेपदप्रयोगाद्भग्नप्रक्रमतादोषश्च। तेषां परिहाराय श्लोक एवं पठनीयः

'अन्यं मनुष्यं हृदयेन कृत्वाऽपरं पुनर्दृष्टिभिराह्वयन्ति।
अन्यत्र मुञ्चन्ति मदप्रभावं परं शरीरेण च सम्भजन्ति॥"

इन्द्रवज्रा वृत्तम् ॥ १६ ॥

চঞ্চলস্বভাব বেশ্যারা, মনে মনে অন্য পুরুষকে কামনা করিয়া, পরে দৃষ্টিদ্বারা অন্য পুরুষকে আহ্বান করে, অপর পুরুষের প্রতি হাবভাবাদি প্রকাশ করে এবং শরীর দ্বারা অন্য পুরুষের কামপিপাসার নিবৃত্তি করে ॥১৬॥

सूक्तं खलु कस्यापि—(भ)

न पर्वताग्रे नलिनी प्ररोहति
न गर्द्दभा वाजिधुरं वहन्ति ।
यवाः प्रकीर्णा न भवन्ति शालयो
न वेशजाताः शुचयस्तथाङ्गनाः ॥ १७ ॥

(भ) सूक्तमिति । शोभनोक्तिरित्यर्थः । एतेन 'एता हसन्ति च " इत्यादिकं 'न पर्वताग्रे ' इत्यादिकञ्च पद्यं प्राचीनमुद्रितरूपमासीदिति प्रतीयते ।

नेति । नलिनी पद्मिनी पर्वताग्रे , न प्ररोहति नोत्पद्यते , जलाभावात् । गर्द्दभाः , वाजिधुरम् शकटेन अश्ववाह्यभारम् , न वहन्ति वोढुं शक्नुवन्ति , तादृशसामर्थ्याभावात् । प्रकीर्णाः क्षेत्रे निक्षिप्ताः , यवाः , शालयो धान्यानि , न भवन्ति , भिन्नजातीयत्वात् । तथा एवम् , वेशे वेश्यालये जाता अङ्गनाः स्त्रियः , शुचयः कुलस्त्रीवदव्यभिचारितया पवित्रा न भवन्तीत्यर्थः , भिन्नप्रकृतिकत्वादिति भावः :

अत्र मालारूपो दृष्टान्तालङ्कारः । तथा नलिनीत्येकवचनान्तेन प्रक्रम्य अन्यत्र बहुवचनान्तप्रयोगाद्भग्नप्रक्रमतादोषः ; स च 'गिरेर्न पद्मान्युदयन्तिमस्तके , इति पाठेन समाधेयः ।

तथा 'मदनिके ! किं नाम प्रियमिति " एतदारभ्य इत्यन्तसन्दर्भे मदनिकां प्रति शर्विलकस्य विरागात् विधूतं नाम प्रतिमुखसन्ध्यङ्गम् , 'विधूतं स्यादरतिः " इति प्राचां लक्षणात् ।

तथा 'पिब ' इति मदनिकया कथितविषयस्य उपालम्भस्वरूपेण एतावता प्रबन्धेन अनेकधा उत्कीर्त्तनात् अर्थविशेषणं नाम नाट्यालङ्कारः । यथा दर्पणे

কোন ব্যক্তির এই একটি সুন্দর উক্তি—

পদ্মিনী , পর্বতের অগ্রে উৎপন্ন হয় না ; গর্দ্দভগণ ঘোড়ার ভার বহন করিতে পারে না; যব রোপণ করিলে ধান্য হয় না এবং বেশ্যালয়ে উৎপন্ন স্ত্রীলোকেরা কখনও পবিত্র হয় না ॥ ১৭॥

आः, दुरात्मन् चारुदत्तहतक! अयं न भवसि ?।

इति कतिचित्पदानि गच्छति। (म)

मद। (अञ्चले गृहीत्वा।) अइ असम्बद्धभासअ! असम्भावणीए कुप्पसि। (य)

(य) अयि असम्बद्धभाषक! असम्भावनीये कुप्यसि।

'उक्तस्यार्थस्य यत्तु स्यादुत्कीर्त्तनमनेकधा ।
उपालम्भस्वरूपेण तत्स्यादर्थविशेषणम् ॥'

वाजिनोधुः अक्षेण (शकटेन) वाजिरथ्या भारस्तां वाजिधुरमिति कवेरभिप्रायात 'धुरनक्षस्य" इति राजादित्वादत्प्रत्ययो न भवति, अक्षसम्बन्धित्वात्।

उपेन्द्रवज्रावंशस्थविलयोर्मिलनादुपजातिर्वृत्तम्। ईदृशमेलनं ग्रन्थान्तरेऽपि दृश्यते। यथा कातन्त्रपञ्जिकाधृतम्—

'अविश्रमं यावदिदं शरीरं पतत्यवश्यं परिणामदुर्वहम्।" इत्यादि। भाषापरिच्छेदे 'उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये।' इत्यादि ॥ १७ ॥

(म) इदानीं मदनिकायाः प्रियं मत्वा चारुदत्तमाक्रोशति आ इत्यादि। हतकोहताशः। निन्दायां कप्रत्ययं, अग्निस्तोक इत्यादिवच्च तस्य परनिपातः। अयं मदनिकाया अनुरागपात्रीभूतः, न भवसीति काकुः। अचिरादेव त्वां दमयिष्यामीति भावः। गच्छति ततः प्रस्थातुमिति शेषः।

(य) मद इति। गृहीत्वा प्रस्थातुमुद्यतं शर्विलकमिति शेषः। असम्बद्धभाषक! अप्रासङ्गिकप्रलापिन्! वेश्यानिन्दाया अत्र प्रसङ्गाभावादिति भावः। असम्भावनीये मया सम्भावयितुमप्यशक्ये विषये चारुदत्तानुरागे। नाहं चारुदत्तं प्रति अनुरागिणीति तवायं कोपो निरर्थक एवेतिभावः।

ওরে দুরাত্মন্ হতাশ চারুদত্ত! তুই না মদনিকার প্রিয়পাত্র হইয়াছিস্!।

মদনিকা। (শর্বিলকের অঞ্চল ধারণ করিয়া) ওহে! তুমি অপ্রা-

শর্বি। কথমসম্ভাবনীয়ং নাম ?। (র)

মদ। এসো ক্খু অলঙ্কারও অজ্জআকেরও। (ল)

শর্বি। ততঃ কিম্ ?।

মদ। স চ তস্স অজ্জস্স হত্থে বিণিক্খিত্তো। (ব)

শর্বি। কিমর্থম্ ?।

মদ। কর্ণে। এব্বং বিঅ। (শ)

(ল) এষ খল্বলঙ্কার আর্য্যাসম্বন্ধী।

(ব) স চ তস্য আর্য্যস্য হস্তে বিনিক্ষিপ্তঃ।

(শ) এবমিব।

অত্র উপন্যাসো নাম প্রতিমুখসন্ধ্যঙ্গম্, 'উপন্যাসঃপ্রসাদনম্" ইতি দর্পণ-লক্ষণাৎ।

(র) শর্বি ইতি। নাম সম্ভাবয়ামি। ত্বয়ৈব প্রিয়জনস্বাস্থ্যবার্ত্তালাভেন 'প্রিয়' " ইত্যুক্তত্বাদিতি ভাবঃ।

(ল) মদ ইতি। আর্য্যাসম্বন্ধী বসন্তসেনাস্বামিকঃ।

(ব) মদ ইতি। স চ অলঙ্কারঃ, তস্য আর্য্যস্য চারুদত্তস্য, হস্তে, বিনিক্ষিপ্তঃ বসন্তসেনয়া ন্যাসীকৃতঃ।

(শ) মদ। এবমিব উভয়ত্রৈব উভয়োর্য্যাতায়াতপ্রসঙ্গার্থমিব, বিনিক্ষিপ্ত ইতি

সঙ্গিক কথা বলিতেছ এবং আমার যাহা অসম্ভাবনীয়, সেই বিষয়ে তুমি ক্রোধ করিতেছ।

শর্বিলক। অসম্ভাবনীয় হইবে কেন ?।

মদনিকা। এই অলঙ্কার, আর্য্যা বসন্তসেনার।

শর্বিলক। তাহাতে কি হইল ?।

মদনিকা। বসন্তসেনা এই অলঙ্কার আর্য্য চারুদত্তের হস্তে গচ্ছিত রাখিয়াছিলেন।

শর্বিলক। কি নিমিত্ত ?।

शर्वि । सवैलच्यम् । भोः ! कष्टम् । (ष)

छायार्थं ग्रीष्मसन्तप्तो यामेवाहं समाश्रितः ।

अजानता मया सैव पत्रैः शाखा वियोजिता ॥ १८ ॥

वस । कधं एसोवि सन्तप्पदि ज्जेव । ता अजाणन्तेण एदिणा एव्वं अणुचिट्ठिदं । (स)

(स) कथमेषोऽपि सन्तप्यत एव । तदजानता एतेन एवमनुष्ठितम् ।

पूर्वं ग्राखयः । एतेन वसन्तसेनाचारुदत्तौ परस्परानुरागिणाविति, द्योतितम् । स्व मिनोविषयत्वादेव गोपनार्थं कर्णे इत्युक्तम् ।

(ष) शर्वि इति । वैलच्येण लज्जावशादप्रतिभत्वेन सहेति सवैलच्यम् ।

छायेति । ग्रीष्मसन्तप्तः अहम्, छायार्थम् अनातपलाभार्थम्, यामेव शाखाम्, समाश्रितः, भवामीति शेषः । अजानता प्रकृततत्त्वात्मनमवगच्छता मया, सैव शाखा, पत्रैः छायाकारकैः पर्णैः सह, वियोजिता पत्रशातनेन विभक्ता कृता । तथाच कामसन्तप्तोऽहं तत्कामसन्तापशान्त्यर्थं मदनिकां ग्रहीतुं तत्स्वामिन्या यामेव वसन्तसेनां समाश्रितो भवामि ; तस्या एवायमलङ्कार इत्यजानता मया सैव वसन्तसेना, अपहृतेन तेनालङ्कारेण वियोजिता ; अतएव रुष्टा सा वसन्तसेना कदापि तां मदनिकां मह्यं न दास्यतीति दुरदृष्टविमुग्धं मां धिगिति भावः ।

अत्रचाव अप्रस्तुतायाः स्वन याः शाखया अभिधानात् प्रस्तुतायाः समाया वसन्तसेनायाः प्रतीतेरप्रस्तुतप्रशंसालङ्कारः ॥ १८॥

(स) वस इति । एष मदनिकया सह आलपन् जनोऽपि, सन्तप्यत एव सम-

मदनिका । (কানে কানে) এই জন্যই যেন ।

শর্বিলক । (অপ্রতিভতার সহিত) হায় ! কি কষ্ট ।

আমি গ্রীষ্মে সন্তপ্ত হইয়া, ছায়ার জন্য যাহাকে আশ্রয় করিয়াছিলাম, আমি না জানিয়া সেই শাখাটিকেই পত্র বিহীন করিলাম ॥১৮॥

বসন্তসেনা । ইনিও সন্তপ্তই হইতেছেন । তা, না জানিয়াই ইনি এইরূপ করিয়াছেন ।

शर्वि। मदनिके! किमिदानीं युक्तम्?। (छ)

मद। इत्थ तुमं ज्जेव पण्डिओ। (च)

शर्वि। नैवम्। पश्य—

स्त्रियो हि नाम खल्वेता निसर्गादेव पण्डिताः।
पुरुषाणान्तु पाण्डित्यं शास्त्रैरेवोपदिश्यते ॥१८॥

(च) अत्र त्वमेव पण्डितः!

अलङ्कारापहरणादिति शेषः। अजानता मदीयत्वं न अनवगच्छता, एतेन जनेन, एवं चौर्य्यम्। अतोऽस्य गुरुतरापराधो मम च कोपकारणं नास्तीति भावः।

(छ) शर्वि इति। युक्तं कर्त्तुं सुचितम्, वसन्तसेनायाः कोपोपशमायेति शेषः।

(च) मद इति अत्र विषये। पण्डितः सुचतुरत्वात् कर्त्तव्यावधारणक्षमः। अतस्त्व-मेव चिन्तयेति भावः।

स्त्रिय इति। एता स्त्वादृश्यः स्त्रियोहि स्त्रीजातय एव, निसर्गात् स्वभावादेव-शास्त्रोपदेशं विनैवेत्यर्थः, पण्डिता खलु सङ्कटे कर्त्तव्यावधारणनिपुणा एव कथम-न्यथा विभिन्नस्वभावानां पुरुषाणां चित्तवृत्तीरनुसरन्तीति भावः। तु किन्तु, पुरुषाणां पाण्डित्यं नैपुण्यम्, शास्त्रैरेव उपदिश्यते शिक्ष्यते शास्त्रोपदेशेनैव जायत इत्यर्थः। अतो मदपेक्षया तवैव कर्त्तव्यावधारणे योग्यताधिक्यमिति भावः।

अत्र अप्रस्तुतस्त्रीपुरुषसामान्याभिधानात् प्रस्तुतमदनिका-शर्विलकरूपस्त्रीपुरुषविशेष-प्रतीतेरप्रस्तुतप्रशंसा, पुरुषापेक्षया स्त्रीणामाधिक्यप्रतिपादनात् व्यतिरेकश्च; अनयोरेका-श्रयानुप्रवेशरूपः सङ्करः ॥१९॥

শর্বিলক। মদনিকা! এখন কি করা উচিত?।

মদনিকা। এ বিষয়ে তুমিই অভিজ্ঞ।

শর্বিলক। তাহা নহে। দেখ—

এই সকল স্ত্রীলোকেরা স্বভাবতই অভিজ্ঞ; কিন্তু পুরুষদিগের অভি-জ্ঞতা শাস্ত্রশিক্ষাতেই জন্মিয়া থাকে ॥১৯॥

मद । सव्विलअ ! जइ मम वअणं सुणोअदि , ता तस्स ज्जेव महाणुभावस्स पड़िणिज्जादेहि । (क)

शर्वि । मदनिके ! यद्यसौ राजकुले मां कथयति ? [ख]

मद । ण चन्दादो आदवो होदि । [ग]

वस । साहु, मदणिए ! साहु । [घ]

(क) शर्विलक ! यदि मम वचनं श्रूयते, तत् तस्यैव महानुभावस्य प्रतिनिर्य्यातय ।

(ग) न चन्द्रादातपो भवति ।

(घ) साधु , मदनिके ! साधु ।

(क) मद इति । तत् तदा , महानुभावस्य समस्तसद्‌गुणशालितया महाप्रभावस्य , तस्य चारुदत्तस्यैव समीपे प्रतिनिर्यातय स्वयमेव गत्वा प्रत्यर्पय ।

(ख) शर्वि इति असौ चारुदत्तः राज्ञः कुले गृहे विचारकसमीपे इत्यर्थः , मां कथयति मामुद्दिश्य 'एतदलङ्कारस्य चौरकोऽयम्' इति वक्ष्यतीत्यर्थः । तदा तु मे विपत्तिरिति भावः ।

(ग) मद इति यथा चन्द्रादातपो न भवति , तथा सर्वदैव परोपकारिणश्चारुदत्तात् तवापकारो न भविष्यतीति भावः ।

अतएवात्र समादप्रस्तुतात् प्रस्तुतसमप्रतीतेरप्रस्तुतप्रशंसालङ्कारः । तथा प्रगमनं नाम प्रतिमुखसन्ध्यङ्गम् । यथा दर्पणे—

'प्रगमनं वाक्यं स्यादुत्तरोत्तरम् ।'

মদনিকা। শর্বিলক ! যদি আমার কথা শোন, তবে এই অলঙ্কার সেই মহাত্মার নিকটই প্রত্যর্পণ কর ।

শর্বিলক। মদনিকা ! যদি উনি রাজদ্বারে আমাকে বলিয়া দেন ? ।

মদনিকা। চন্দ্র হইতে রৌদ্র হয় না।

বসন্তসেনা। সাধু, মদনিকা ! সাধু।

शर्वि° । मदनिके !

न खलु मम विषादः साहसेऽस्मिन् भयं वा
कथयसि हि किमर्थं तस्य साधोर्गुणां स्त्वम् ? ।
जनयति मम खेदं कुत्सितं कर्म्म लज्जाम् ,
नृपतिरिह शठानां मादृशां किं नु कुर्य्यात् ? ॥२०॥

(घ) वस इति उपयुक्तोत्तरदानात् प्रियतमप्रशंसनाश्रवणाय साधुवादः ।

नेति । अस्मिन् साहसे चोरितद्रव्यस्य पुनःप्रत्यर्पणरूपे मनोबलकार्य्ये मम विषादः अवसादश्चित्तदौर्ब्बल्यमिति यावत भयं वा, न खलु वर्त्तत इति शेषः । हि तथाहि, त्वम् तस्य साधोश्चारुदत्तस्य, गुणान् परापकारनिवृत्ति-परोपकारप्रवृत्तिप्रभृतिधर्म्मान्, किमर्थं कथयसि ? तस्य तादृशगुणानां सर्व्वजनविदिततया ममापि सर्व्वथैव विदितत्वात् नास्ति तव कथनापेक्षा; अतश्च स कथमपि ममापकारं न करिष्यतीत्यवधारणात् मम विषादो नास्तीति भावः । किन्तु इदं कुत्सितं कर्म्म वा सर्व्वगर्हितं चौर्य्यकार्य्यमेव, 'वा स्याद्विकल्पोपमयोरेवार्थे च समुच्चये' इति विश्वः । कर्त्तृ, मम लज्जां जनयति; तत्समीपे गन्तुमिति भावः । ननु भयं कथं नास्तीत्याह — इह अस्मिन् अपराधे, नृपतिर्मादृशां धूर्त्तानाम्, किं नु शासनम्, कुर्य्यात् कर्त्तुं शक्नुयात् ? अपि तु किमपि नेत्यर्थः । नृपतिरादौ मां धर्त्तुमेव न शक्नुयात्, धरणे च प्रमाणोपन्यासनैपुण्येन निर्द्दोष एव प्रतिपादितो भवेयमिति नास्ति भयमिति भावः ।

अत्र व्याख्याप्रदर्शितदिशा वाक्यार्थहेतुककाव्यलिङ्गद्वयस्य मिथो निरपेक्षतया संसृष्टिः । मालिनी वृत्तम् ॥ २० ॥

শর্বিলক । মদনিকা ! এই সাহসের কার্য্যে, আমার মনের দুর্ব্বলতা বা ভয় হইতেছে না ; সুতরাং তুমি কি জন্য সেই সাধুর গুণকীর্ত্তন করিতেছ । এই গর্হিত কার্য্যই, তাঁহার নিকটে যাইতে আমার লজ্জা জন্মাইতেছে । রাজা , এই অপরাধে আমার মত ধূর্ত্তদিগের কি করিতে পারেন ? ॥২০॥

तथापि नीतिविरुद्धमेतत्, अन्य उपायश्चिन्त्यताम्। [ङ]

मद। सो अण्णो अवरो उवाओ। [च]

वस। को क्खु अवरो उवाओ हुविस्सदि। [छ]

मद। तस्स ज्जेव अज्जस्स केरओ भविअ, एदं अलङ्कारअं अज्जआए उवणेहि। [ज]

शवि। एवं कृते किं भवति?

मद। तुमं दाव अचोरो, सो वि अज्जो अरिणो, अज्जआए सकं अलङ्कारअं उवगदं भोदि। [झ]

(च) सोऽयमपर उपायः।

(छ) कः खलु अपर उपायो भविष्यति।

(ज) तस्यैव आर्य्यस्य सम्बन्धी भूत्वा, एतमलङ्कारकमार्य्याया उपनय।

(झ) त्वं तावदचौरः, सोऽपि आर्य्यः अनृणः, आर्य्यायाः स्वकः अलङ्कारक उपगतो भवति।

(ङ) ननु वक्तुं न लज्जसे त्वं विहाय स्वयमेवोपस्थाय [illegible] अर्प्य तामित्याह तथापीति। एतत्—चोरितद्रव्यस्य प्रत्यर्पणाय चौरस्यैव तत्स्वामिसमीपे गमनम्, नीतिविरुद्धं चौरसमाजव्यवहारविरुद्धम्।

(ज) मद इति। तस्यैव आर्य्यस्य चारुदत्तस्य, सम्बन्धी यत्किञ्चिदस्य [illegible] आर्य्याया वसन्तसेनायाः समीपं [illegible]।

তথাপি ইহা নীতিবিরুদ্ধ। অতএব অন্য উপায় চিন্তা কর।

মদনিকা। এই সেই আর একটী উপায়।

বসন্তসেনা। অন্য উপায় কি হইবে?

মদনিকা। তুমি সেই আর্য্যচারুদত্তের লোক হইয়া, এই অলঙ্কার আর্য্যা বসন্তসেনার নিকট লইয়া যাও।

শর্ব্বিলক। এরূপ করিলে কি হইবে?

शर्वि। ननु! अतिसाहसमेतत्। [ञ]

मद। अइ! उवणेहि। अम्बधा अदिसाहसं। (ट)

वस। साहु, मदणिए! साहु। अभुजिस्साए विअ मन्तिदं। (ठ)

(ट) अयि! उपनय। अन्यथा अतिसाहसम्।

(ठ) साधु, मदनिके! साधु। अभुजिष्ययेव मन्त्रितम्।

(ञ) मद इति। सोऽपि आर्य्यः चारुदत्तः, अनृणः, न्यासस्य येन केनापि प्रकारेण पुनः स्वामिनीहस्त एव प्रत्यर्पणादिति भावः। स्वकः स्वकीयः। उपगतः प्राप्तः।

(ञ) शर्वि इति। नन्विति सम्बोधने। 'प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु' इत्यमरः। एतत्—तत्प्रकारेण वसन्तसेनायाः समर्पणम्, अतिसाहसं गुरुतरमनोबलकार्य्यम्, सर्वेषामेव मिथ्याव्यापाराणां प्रतिपादनप्रवृत्तेरिति भावः। तेन तदपि न पारयामीति व्यज्यते।

(ट) मद इति। उपनय वसन्तसेनायाः समीपे एतमलङ्कारमिति शेषः। अन्यथा तस्याप्यकरणे, अतिसाहसं गुरुतरसाहसकार्य्यं स्यादिति शेषः; उभाभ्यामेव चारुदत्तवसन्तसेनाभ्यां राजद्वारे तवाभियोगसम्भवादिति भावः।

(ठ) वस इति। अभुजिष्ययेव अदास्येव, मन्त्रितमुक्तं युक्तिदर्शितमित्यर्थः। प्रायेण बर्बररूपाया दास्या एवं युक्तिदानमशक्यत्वादित्याशयः।

মদনিকা। তুমি চোর হইলে না; চারুদত্তও অনৃণী হইলেন; বসন্তসেনাও নিজের অলঙ্কার পাইলেন।

শর্বিলক। ওহে! এটা গুরুতর সাহসের কাজ।

মদনিকা। ওহে! বসন্তসেনার নিকটেই লইয়া যাও; না হইলেই গুরুতর সাহসের কাজ হইবে।

বসন্তসেনা। সাধু, মদনিকা! সাধু, তুমি অদাসীর ন্যায় বলিয়াছ।

चतुर्थोऽङ्कः।

शर्वि। मयाप्ता महती बुद्धिर्भवतीमनुगच्छता।
निशायां नष्टचन्द्रायां दुर्लभो मार्गदर्शकः॥२१॥

मद। तेण हि तुमं इमस्सिं कामदेवगेहे मुहुत्तअं चिट्ठ, जाव अज्जआए तुह आगमनं णिवेदेमि। (ड)

शर्वि। एवं भवतु।

मद। उपसृत्य। अज्जए! एसो क्खु चारुदत्तस्स सआसादो बम्हणो आअदो। (ढ)

(ड) तेन हि त्वमस्मिन् कामदेवगेहे मुहूर्त्तकं तिष्ठ, यावदार्य्यायै तवागमनं निवेदयामि।

(ढ) आर्य्ये! एष खलु चारुदत्तस्य सकाशात् ब्राह्मण आगतः।

मयेति। भवतीं त्वाम्, अनुगच्छता कर्त्तव्यबोधाय अनुसरता मया, महती बुद्धिः आप्ता प्राप्ता। तथा च नष्टः अस्तमितत्वाददर्शनं गतश्चन्द्रो यस्यां तस्यामन्धकाराच्छन्नायामित्यर्थः निशायाम्, मार्गदर्शकः पथिसमाकुलस्य गन्तव्यपथप्रदर्शको जनः दुर्लभः। तथाहि अन्धकाराच्छन्नायां निशायां पथिभ्रान्तस्य गन्तव्यपथप्रदर्शक इव कर्त्तव्यमूढस्य ममेदानीं कर्त्तव्यमुपदिशन्ती त्वं परमबन्धुरसीत्यभिप्रायः।

अत्र सामान्येन विशेषसमर्थनादर्थान्तरन्यासोऽलङ्कारः॥२१॥

শর্বিলক। তোমার অনুসরণ করিয়া আমি গুরুতর বুদ্ধি লাভ করিলাম। চন্দ্র অস্তমিত হইলে রাত্রিতে পথ প্রদর্শক লোক দুর্লভ॥২১॥

মদনিকা। তা হইলে, আমি আর্য্যা বসন্তসেনার নিকট যে পর্য্যন্ত তোমার আগমন নিবেদন করি, সে পর্য্যন্ত তুমি এই কামদেবগৃহে একটু কাল থাক।

শর্বিলক॥ এইরূপই হউক।

মদনিকা। (বসন্তসেনার নিকট উপস্থিত হইয়া) আর্য্যে! চারুদত্তের নিকট হইতে এই একটি ব্রাহ্মণ আসিয়াছেন।

वस । हञ्जे ! केरअ त्ति कधं तुमं जाणासि ? । (ण)

मद । अज्जए ! अत्तकेरअं पि ण जाणामि ? । (त)

वस । (स्वगतं सशिरःकम्पं विहस्य ।) जुज्जदि । (प्रकाशम् ।) पविसदु । (थ)

मद । जं अज्जआ आणवेदि । (उपगम्य ।) पविसदु सव्विलओ । (द)

(ण) हञ्जे ! (तस्य) सम्बन्धीति कथं त्वं जानासि ? ।

(त) आर्य्ये ! आत्मसम्बन्धिनमपि न जानामि ? ।

(थ) युज्यते । प्रविशतु ।

(द) यदार्य्या आज्ञापयति । प्रविशतु शर्व्विलकः ।

(ण) वस इति । सम्बन्धी चारुदत्तसम्पर्कवान् ।

(त) मद इति । आत्मसम्बन्धिनमपि आत्मीयमपि । भवत्याः प्रियतमसम्बन्धित्वेन भवत्या आत्मसम्बन्धित्वात् भवद्दास्या ममापि आत्मसम्बन्धित्वमस्तीति भावः ।

(थ) वस इति । शिरःकम्पेन अनुमोदनसूचकमस्तककम्पनेन सहेति सशिरःकम्पम् । युज्यते —अस्मिन् जने तवात्मसम्बन्धित्वमिति शेषः, आत्मन एव प्रियतमत्वादिति भावः । पूर्वं मदनिकया वसन्तसेनायाः प्रियतमसम्बन्धित्वेनात्मसम्बन्धित्वमुक्तम्, इदानीं वसन्तसेनया तु तत् प्रियतमत्वेनैव सदात्मसम्बन्धित्वं प्रतिपादितमिति बोध्यम् ।

বসন্তসেনা। ওলো! চারুদত্তের ইহা তুমি কি করিয়া জানিলে?।

মদনিকা। আর্য্যে! নিজের লোককেও জানিনা?।

বসন্তসেনা। (মস্তককম্পনের সহিত হাস্য করিয়া স্বগত) সঙ্গত বটে। (প্রকাশ্যে) প্রবেশ করুন।

शर्विलक। उपसृत्य सलज्जम्। स्वस्ति भवत्यै। (ध)

वस। अज्ज ! वन्दामि। उववसदु अज्जो। (न)

शर्विलक। सार्थवाहस्त्वां विज्ञापयति—जर्जरत्वाद् गेहस्य दूरक्ष्यमिदं भाण्डम्, तद्गृह्यताम्। इति मदनिकायाः समर्प्य प्रस्थितः। [प]

(न) आर्य्ये ! वन्दे। उपविशतु आर्य्यः।

अतएवोक्तमदनिकावाक्यं दर्पणोक्तचतुर्थपताकास्थानम्। तथा च दर्पणे

"द्व्यर्थो वचनविन्यासः सुश्लिष्टः काव्ययोजितः।
प्रधानार्थान्तराक्षेपी पताकास्थानकं परम्॥"

अत्र च मदनिकाशर्विलकपरिणयरूपप्रधानार्थान्तराक्षेप उन्नेयः, परिणीतत्वेन तत्र शर्विलकस्य मदनिकाया आत्मसम्बन्धित्वसम्भवात्।

(ध) शर्विलक इति। सलज्जं लज्जासङ्कोचेन सहेति सर्वत्र लज्जासङ्कोचस्तु आत्मनश्चोरत्वादिति बोध्यम्। भवत्यै स्वस्ति मङ्गलं भवत्विति शेषः। "स्वस्त्याशीःक्षेमपुण्यादौ" इत्यमरः। भवत्यै इति "नमः स्वस्ति" इत्यादिना चतुर्थी।

(प) शर्विलक इति। सार्थवाहो वणिक्, स च प्रकरणाच्चारुदत्तः। अत्र विरूप-

---

মদনিকা। আৰ্য্য যাহা আদেশ করেন। (নিকটে যাইয়া) শর্বিলক প্রবেশ করুন।

শর্বিলক। (নিকটে উপস্থিত হইয়া সলজ্জভাবে) আপনার মঙ্গল হউক।

বসন্তসেনা। আর্য্য! প্রণাম করি। আপনি উপবেশন করুন।

শর্বিলক। বণিক্ (চারুদত্ত) আপনাকে জানাইতেছেন—"আমার বাড়ী জীর্ণ বলিয়া, এই অলঙ্কার রক্ষা করা কষ্ট, তা গ্রহণ করুন।" (এই বলিয়া মদনিকার হস্তে অর্পণ করিয়া প্রস্থান করিবার উদ্যোগ করিল।)

वस। अज्ज! ममावि दाव पड़िसन्देसं तहिं अज्जो णेदु। [फ]

शर्वि। स्वगतम्। कस्तत्र यास्यति?। प्रकाशम्। कः प्रतिसन्देशः?। [ब]

वस। पड़िच्छदु अज्जो मदणिअं। [भ]

(फ) आर्य्य! ममापि तावत् प्रतिसन्देशं तत्रार्य्यो नयतु।

(भ) प्रतीच्छतु आर्य्यो मदनिकाम्।

पदस्यार्थं बाहुशब्दप्रयोगात् चारुदत्तेन सहात्मनः सखित्वेन समानस्थानवर्त्तित्वं सूचितम्, न पुनरनुचरत्वमित्यवधेयम्। गृहस्य जर्ज्जरत्वात् पुरातनतया जीर्णत्वात्, इदं भाण्डं सुवर्णभूषणम्, दुःखेन रक्ष्यत इति दूरक्ष्यं सर्व्वदा सतर्कभावेन रक्षणीयतया कार्य्यान्तर व्यापृतानामस्माकं क्लेशेन रक्षणीयमित्यर्थः। स्वामिन्या वसनभूषणादिकं दास्येव रक्षतीति मदनिकायाः समीपे समर्पणम्। तेन च वसन्तसेनाया धनित्वमौरवातिशयो दर्शित इति बोध्यम्। प्रस्थितः प्रस्थातुमुद्यतः।

(फ) वस इति। आर्य्यो भवान्। तस्मिन् चारुदत्तसमीपे। प्रतिसन्देशं प्रति वाचिकम्।

(ब) शर्वि इति कस्तत्र यास्यति? कोऽपि नेत्यर्थः; लज्जावशादनावश्यकत्वाच्चेति भावः।

(भ) वस इति। प्रतीच्छतु गृह्णातु। अयमेव प्रतिग्रहवृत्तान्तस्तस्मै वक्तव्यः, स एव च मे प्रतिसन्देश इति भावः।

বসন্তসেনা। আর্য্য! আপনি সেখানে আমারও, প্রত্যুত্তর নিয়া যাউন।

শর্বিলক। (স্বগত) কে সেখানে যাইবে?। (প্রকাশ্যে) কি প্রত্যুত্তর?।

বসন্তসেনা। আপনি মদনিকাকে গ্রহণ করুন।

शर्वि। भवति! न खल्ववगच्छामि। [म]

वस। अहं अवगच्छामि। [य]

शर्वि। कथमिव?।

वस। अहं अज्जचारुदत्तेण भणिदा- 'जो इमं अलङ्कारअं समप्पइस्सदि, तस्स तुए मदणिआ दादव्वा।' ता सो ज्जेव एदं दे देदि त्ति एव्वं अज्जेण अवगच्छिदव्वं। [र]

शर्वि। स्वगतम्। अये! विज्ञातोऽहमनया। प्रकाशम्। साधु, आर्य्य चारुदत्त! साधु। [ल]

(य) अहमवगच्छामि।

(र) अहमार्य्यचारुदत्तेन भणिता – 'य इममलङ्कारकं समर्पयिष्यति, तस्य त्वया मदनिका दातव्या"। तत् स एव एतां ते ददातीति एवमार्य्येण अवगन्तव्यम्।

(म) शर्वि इति। न खल्ववगच्छामि- भवत्या वाक्यार्थमिति शेषः प्रार्थनाया अकृतायामपि अप्रासङ्गिकत्वात्वं दानप्रस्तावो मां विस्मापयतीति भावः।

(य) वस इति। सोल्लुण्ठनोक्तिरियम्।

(र) वस इति। एतां मदनिकाम्। आर्य्येण भवता।

শর্বিলক। আমি আপনার কথার অর্থ বুঝিতেছি না।

বসন্তসেনা। আমি বুঝিতেছি।

শর্বিলক। কি রকম?।

বসন্তসেনা। আর্য্য চারুদত্ত আমাকে বলিয়াছেন যে—"এই অলঙ্কার যে নিয়া দিবে, তাহার হস্তে তুমি মদনিকাকে দান করিবে।" তা তিনিই ইহাকে দান করিতেছেন ইহা আপনি জানিবেন।

गुणेष्वेव हि कर्त्तव्यः प्रयत्नः पुरुषैः सदा ।
गुणयुक्तो दरिद्रोऽपि नेश्वरैरगुणैः समः ॥ २२ ॥

अपि च

गुणेषु यत्नः पुरुषेण कार्य्यो न किञ्चिदप्राप्यतमं गुणानाम् ।
गुणप्रकर्षादुडुपेन शम्भोरलङ्घ्यमुल्लङ्घितमुत्तमाङ्गम् ॥ २३ ॥

(ग) भवि इति विश्वातौ मदनिकाप्राथि त्वे नावगतः । कथमन्यथा ईदृश-मसम्भवमुपन्यस्यतीत्याशयः ।

गुणेष्विति । पुरुषैः सदा गुणेष्वेव हि दयौदार्य्यादिगुणार्जनेष्वेव, प्रयत्नः कर्त्तव्यः; न पुनर्धनार्जनादिष्विति भावः । कुत इत्याह—गुणयुक्तो दरिद्रोऽपि जनः, अगुणैः दयौदार्य्यादिगुणविहीनैः ईश्वरैः धनिभिः, न समस्तुल्यः, अपि तु (अधिक एवेत्यर्थः); निर्गुणधनिभिर्जगति साधारणप्रयोजनाभावादिति भावः ।

अत्र गुणयुक्तदरिद्रसामान्यात् चारुदत्तरूपगुणयुक्तदरिद्रविशेषप्रतीतेरप्रस्तुतप्रशंसालङ्कारः, परार्द्धार्थरूपकारणेन पूर्वार्द्धार्थरूपकार्य्यस्य समर्थनादर्थान्तरन्यासश्च; अनयोरङ्गाङ्गिभावेन सङ्करः । "यः कौमारहरः स एव हि वरः—" इत्यादिवत् एव-हि शब्दद्वयमेव अत्यन्तनियमं सूचयतीति न हिशब्दोपादानान्निरर्थकत्वदोषः ॥ २२ ॥

उक्तप्रायमेवार्थं किञ्चिद्विशेषप्रतिपादनार्थं पुनराह गुणेष्विति । पुरुषेण गुणेषु दयौदार्य्यादिगुणार्जनेषु, यत्नः कार्य्यः कर्त्तव्यः । कथमेतदित्याह—गुणानां सताम् किञ्चिदपि वस्तु, न अप्राप्यतमम्, अपि तु सर्वमेव प्राप्यमित्यर्थः । कुत्र दृष्टमेतदित्याह उडुपेन नक्षत्रपतिना चन्द्रेण, गुणप्रकर्षात् अस्मिन्... सौन्दर्य्यशीतलत्वादिगुणातिरेकात्,

शर्व्विलक । (স্বগত) ও ! ইনি আমাকে জানিয়াছেন । (প্রকাশ্যে) সাধু আর্য্যচারুদত্ত ! সাধু !

মানুষ, গুণোপার্জ্জন করিবার জন্য সর্ব্বদা চেষ্টা করিবে। কারণ, গুণবান্ দরিদ্রও নির্গুণ ধনীদিগের সমান নহে ॥ ২২ ॥

আরও, মানুষ, গুণোপার্জ্জন করিবার জন্য চেষ্টা করিবে, কারণ,

বসন্ত। অত্থ এত্থ পবহণবাহও [ক] ...

প্রবিশ্য প্রবহণেন সহ চেটঃ। অজ্জুএ। সজ্জং পবহণং। [খ]

বস। হঞ্জে মদণিএ। সুদিট্ঠং মং করেহি। দিণ্ণাসি। আরুহ পবহণং। সুমরেসি মং। [গ]

(ক) কোঽত্র প্রবহণবাহকঃ?

(খ) আর্য্যে! সজ্জং প্রবহণম্।

(গ) হঞ্জে মদনিকে! সুদৃষ্টাং মাং কুরু। দত্তাসি। আরুহ প্রবহণম্। স্মরসি মাম্।

অলঙ্কার। অন্যৈর্লঙ্ঘয়িতুমারোহুমশক্যমপি, যন্মাম হাটকস্য, উত্তমাঙ্গমস্তকাম, উল্লঙ্ঘিতমারুহম্।

অত্রাপি প্রথমচরণার্থ স্বপকার্য্যস্য দ্বিতীয়চরণার্থ স্বপকারণেন সমর্থনাদর্থান্তরন্যাসঃ, দ্বিতীয়চরণার্থ রূপসামান্যস্য দ্বিতীয়ার্দ্ধার্থ রূপবিশেষেণ সমর্থনাদর্থান্তরন্যাসশ্চ; অনয়োরপি পূর্ব্ববৎ সঙ্করঃ।

অনয়োঃ পুষ্পং নাম প্রতিমুখসন্ধ্যঙ্গম্, "পুষ্পং বিশেষবচনং মতম্" ইতি দর্পণলক্ষণাৎ।

"নক্ষত্রমৃক্ষং ভং তারা তারকাপ্যুডু বা স্ত্রিয়াম্" "উত্তমাঙ্গং শিরঃ শীর্ষং মূর্দ্ধা না মস্তকোঽস্ত্রিয়াম্" ইতি চ অমরঃ। উপেন্দ্রবজ্রা বৃত্তম্ ॥২৩॥

(খ) প্রবিশ্যেতি। গোযানেনাবরুহ্য গোশকটং তেন সহেতি প্রবহণং সুসজ্জিতমলঙ্কৃতমিত্যর্থঃ। চেটো গোশকটচালয়িতা দাসঃ। সজ্জং প্রস্তুতম্।

(গ) বস ইতি। সুদৃষ্টাং প্রফুল্লচিত্ততয়া শোভনদৃষ্টিবিষয়ীভূতাম্। ...

গুণের অপ্রাপ্য কিছুই নাই। চন্দ্র, গুণাধিক্যবশতই, অন্যের অলঙ্ঘনীয় মহাদেবের মস্তক লঙ্ঘন করিয়াছেন ॥২৩॥

বসন্তসেনা। এখানে গোশকটচালক কে আছ?

গোশকটের সহিত প্রবেশ করিয়া ভৃত্য। আর্য্যে! শকট প্রস্তুত।

मद। रुदती। परिच्चत्तम्हि अज्जआए। इति पादयोः पतति। (स)

वस। सम्मदं तुमं ज्जेव वन्दणीआ संवुत्ता। ता गच्छ, आरुह पवहणम्। सुमरेसि मं। (ह)

शर्वि। स्वस्ति भवत्यै। मदनिके!

सुदृष्टः क्रियतामेष शिरसा वन्द्यतां जनः।
यत्र ते दुर्लभं प्राप्तं वधूशब्दावगुण्ठनम् ॥२४॥

(स) परित्यक्तास्मि आर्य्यया।

(ह) साम्प्रतं त्वमेव वन्दनीया संवृत्ता। तद् गच्छ, आरोह प्रवहणम्। स्मरसि मानम्।

परं न कथमपि ते दृष्टिविषयीभविष्यामीति भावः। दत्तासि शर्विलकायेति शेषः। एतेन मदनिका वसन्तसेनायाः क्रीतदासी आसीदिति प्रतीयते। स्मरसीति भविष्यत्सामीप्ये वर्त्तमाना; स्मरिष्यसीत्यर्थः।

(स) मद इति। पादयोः पतति,—प्रस्थानकालीनवन्दनार्थमित्याशयः।

(ह) वस इति। त्वं वन्दनीया, ब्राह्मणपरिगृहीतत्वादित्यभिप्रायः।

सुदृष्ट इति। एष वसन्तसेनारूपो जनः, सुदृष्टः प्रीतिप्रफुल्लनेत्रेण शुभनिरीक्षितः क्रियताम्, एवं शिरसा वन्द्यतां प्रस्थानकालिनो नमस्कारः क्रियताम्। यत्र

বসন্তসেনা। মদনিকা! আমার প্রতি শুভদৃষ্টি কর। তুমি প্রদত্ত হইলে। এখন গাড়ীতে উঠ। আমাকে স্মরণ করিও।

মদনিকা। (কাঁদিতে কাঁদিতে) আপনি আমাকে পরিত্যাগ করিলেন। (এই বলিয়া পায়ের উপর পড়িল)।

বসন্তসেনা। এখন তুমিই বন্দনীয় হইয়াছ। তা যাও, গাড়ীতে উঠ। আমাকে স্মরণ করিও।

শর্বিলক। আপনার মঙ্গল হউক। মদনিকা!
এই ব্যক্তির প্রতি শুভদৃষ্টি কর এবং মস্তক দ্বারা ইহাঁকে প্রণাম কর।

इति मदनिकया सह प्रवहणमारुह्य गन्तुं प्रवृत्तः।

नेपथ्ये। कः कोऽत्र भोः!। राष्ट्रियः समाज्ञापयति— 'एष खलु आर्य्यको गोपालदारको राजा भविष्यतीति सिद्धादेश-प्रत्ययपरित्रस्तेन पालकेन राज्ञा घोषादानीय घोरे बन्धनागारे बद्धः। ततः स्वेषु स्वेषु स्थानेषु अप्रमत्तैर्भवद्भिर्भवितव्यम्। (च)

जने अनुग्रहेण त्वामेव ददाने सतीत्यर्थः, दुर्लभं साधारणस्त्रिया प्रायेण लब्धुमशक्यम्, वधूशब्द एव अवगुण्ठनं सकामपुरुषान्तरदृष्टिनिवारकत्वादावरणम्, ते तव उपरि, प्राप्तमुपस्थितम्। यः खल्वेवमुपकरोति, कस्तं न सुहृदं शिरसा वन्दितञ्च करोतीति भावः।

अत्र पूर्वार्द्धं प्रति परार्द्धवाक्यार्थस्य हेतुतया वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः निरङ्गं केवलरूपकञ्च, अनयोरङ्गाङ्गिभावेन सङ्करः। तथा 'ददाने' इत्येवं यत्किञ्चित्पदस्य अनुक्ततया न्यूनपदत्वदोषः; स च 'यस्मात्ते दुर्लभं प्राप्तम्' इति पाठेन समाधेयः ॥२४॥

(च) नेपथ्य इति। राष्ट्रियो राष्ट्रपाल उपरितनरक्षिपुरुषः। आर्य्यकः सज्जनः। संज्ञायां कप्रत्ययः। 'महाकुलकुलीनार्य्यसभ्यसज्जनसाधवः' इत्यमरः। गोपालदारको गोपसुतः। सिद्धादेशे सिद्धपुरुषवाक्ये यः प्रत्ययो विश्वासस्तेन परित्रस्तो नितान्तभीतस्तेन, पालकेन पालकनाम्ना। घोषात् आभीरपल्लीतः। 'घोष आभीरपल्ली स्यात्' इत्यमरः। भवद्भिरधस्तनरक्षिपुरुषैः, अप्रमत्तैः सावधानैः। यथायमार्य्यको नापसर्त्तुमर्हतीति भावः।

যিনি অনুগ্রহ করিয়া দান করিলে, তুমি দুর্লভ বধূশব্দের আবরণ পাইয়াছ ॥২৪॥

(এই বলিয়া মদনিকার সহিত গাড়ীতে উঠিয়া যাইতে লাগিল)

নেপথ্যে। এখানে কে কে আছ হে! রক্ষিসেনাপতি আদেশ

শর্বি। (আকর্ণ্য।) কথং রাজ্ঞা পালকেন প্রিয়সুহৃদার্য্যকো বদ্ধঃ। কলত্রবানস্মি সংবৃত্তঃ। আঃ কষ্টম্। অথবা—(ক)

দ্বয়মিদমতীব লোকে প্রিয়ং নরাণাং সুহৃচ্চ বনিতা চ।
সম্প্রতি তু সুন্দরীণাং শতাদপি সুহৃদ্বিশিষ্টতমঃ ॥ ২৫ ॥

ভবতু, অবতরামি। (অবতরতি।)

অয়ঞ্চ সন্দর্ভশ্চূলিকা নাম অর্থোপক্ষেপকঃ। যথা দর্পণে—

'অন্তর্যবনিকাসংস্থৈঃ সূচনার্থস্য চূলিকা।'

তথাত্র বিরোধো নাম প্রতিমুখসন্ধ্যঙ্গম্, 'বিরোধো ব্যসনপ্রাপ্তিঃ' ইতি তদীয়লক্ষণাৎ।

(ক) শর্বি ইতি। কলত্রবান্ সদ্যঃপরিগৃহীতস্ত্রীসঙ্গিকঃ। উভয়োরেবাবশ্যরক্ষণীয়ত্বাৎ কং পরিত্যজ্য কং রক্ষিতুং যামীত্যহো কষ্টমিত্যর্থঃ।

অত্র তাপনং নাম প্রতিমুখসন্ধ্যঙ্গম্। যথা দর্পণে—

'উপায়াদর্শনং যত্তু তাপনং নাম তদ্ভবেৎ।'

দ্বয়মিতি। সুহৃচ্চ বনিতা চ ইদং দ্বয়ং বস্তুযুগলম্, লোকে নরাণামতীব প্রিয়ম্, তু কিন্তু, সম্প্রতি কারাবদ্ধে মদার্য্যকে সুন্দরীণাং বনিতানাং শতাদপি, সুহৃদ-

---

করিতেছেন 'আর্য্যকনামে এই গোপবালক রাজা হইবে' কোন সিদ্ধপুরুষের এইরূপ বাক্যে বিশ্বাসবশতঃ ভীত হইয়া, রাজা পালক, গোপপল্লী হইতে আনিয়া ভয়ঙ্কর কারাগারে আবদ্ধ করিয়াছেন। সুতরাং তোমরা স্ব স্ব স্থানে সাবধান হইয়া থাকিবে।

শর্বিলক। (শুনিয়া) কি রাজা পালক, আমার প্রিয়সুহৃদ্ আর্য্যককে আবদ্ধ করিয়াছেন? হায় কি কষ্ট! অথবা—

জগতে, সুহৃদ্ ও ভার্য্যা এই দুইটী বস্তুই, মানুষের অত্যন্ত প্রিয়।
কিন্তু এখন শত সুন্দরী ভার্য্যা হইতেও, সুহৃদ্ অত্যন্ত অধিক ॥২৫॥

হউক, আমি অবতরণ করি। (এই বলিয়া গাড়ী হইতে নামিল)

(मद) सास्रमञ्जलिं बद्ध्वा। एव्वं णेदं। ता परं णेदु मं अज्ज-उत्तो समीवं गुरुअणाणं। (ख)

शर्वि। साधु, प्रिये! साधु। अस्मच्चित्तसदृशमभिहितम्। चेटमुद्दिश्य। भद्र! जानीषि रेभिलस्य सार्थवाहस्य उदवसितम्?। (ग)

(ख) एवमेतत्। तत्परं नयतु मामार्य्यपुत्रः समीपं गुरुजनानाम।

विशिष्टतमः पर्य्यवेक्षणीयत्वे उत्कृष्टतमः। तथा च स्वस्था वनितामुपेक्ष्यापि विपन्नः सुहृत् सर्वथेवेदानीं मया अवेक्षणीय इति भावः।

अत्र पूर्वार्द्धे प्रस्तुतयोरेव सुहृद्वनितयोः प्रियत्वरूपैकगुणसम्बन्धात् तुल्ययोगिता, परार्द्धे च वनितापेक्षया सुहृद आधिक्यवर्णनात् व्यतिरेकः; अनयोर्द्वयोर्निरपेक्षतया संसृष्टिः। तथा वनितेति प्रक्रम्य सुन्दरीणामित्यभिधानात् प्रकृतिविषयो भग्नप्रक्रमतादोषः, स तु सम्प्रति 'तु हन्त तासाम्' इति पाठेन परिहार्य्यः। आर्य्या जातिः॥ २५॥

(ख) मद इति। एवमेतत् त्वया यदुक्तं तत् सत्यमेवेत्यर्थः। तत् तस्मात्, परम् अपरम्, गुरुजनानां समीपम्। वसन्तसेनाया दास्यान्मुक्ततया पुनस्तत्रगमनं नोचितमिति भावः।

(ग) शर्वि इति। अस्माकं चित्तसदृशं चित्तस्यानुरूपम्। मयापि तादृशमेतदेव चिन्तितमित्याशयः। रेभिलस्य तदाख्यस्य, सार्थवाहस्य वणिजः, उदवसितं गृहम्, जानीषे? परिचिनोषि किमिति काकुः।

মদনিকা। (অঞ্জলি বন্ধন করিয়া, অশ্রুপাতের সহিত) ইহা এই রূপ বটে। তবে আমাকে অন্য গুরুজনের নিকট নিন।

শর্বিলক ভাল, প্রিয়ে! ভাল। তুমি আমার অভিপ্রায়ের অনুরূপই বলিয়াছ। (শকটচালকের প্রতি) ভদ্র! তুমি, রেভিলনামক বণিকের বাড়ী চেন?।

चेटः । अधइं । (घ)

शर्वि । तत्र प्रापय प्रियाम् ।

चेटः । जं अज्जो आणवेदि । (ङ)

मद । जधा अज्जउत्तो भणादि । अप्पमत्तेण दाव अज्ज-उत्तेण होदव्वं । इति निष्क्रान्ता । (च)

शर्वि । अहमिदानीम् —

ज्ञातीन् विटान् स्वभुजविक्रमलब्धवर्णान्
राजापमानकुपितांश्च नरेन्द्रभृत्यान् ।

(घ) अथकिम् ।

(ङ) यदार्य्य आज्ञापयति ।

(च) यथा आर्य्यपुत्रो भणति, अप्रमत्तेन तावदार्य्यपुत्रेण भवितव्यम् ।

(च) मद इति । यथा आर्य्यपुत्रो भणति, तथास्त्विति शेषः । अप्रमत्तेन आत्मरक्षायां सावधानेन । अन्यथा राज्ञो विरोधित्वेन विपदाशङ्केतिभावः ।

ज्ञातीनिति । उदयनस्य राज्ञो वत्सराजस्य परिमोक्षणाय, यौगन्धरायणस्तदाख्य-स्तदीयमन्त्रीव, अहमिदानीम्, सुहृदो मित्रस्य आर्य्यकस्य, परिमोक्षणाय, ज्ञातीन्

শকটচালক। হাঁ।

শর্বিলক। সেই খানে প্রিয়াকে লইয়া যাও।

শকটচালক। আপনি যাহা আদেশ করেন।

মদনিকা। আর্য্যপুত্র! আপনি যেরূপ বলিলেন, তাহাতে আপনি সর্ব্বদাই সাবধান হইবেন। (ইহার পর চলিয়া গেল)

শর্বিলক। পূর্ব্বে বৎসরাজ উদয়নের মুক্তির নিমিত্ত, তদীয় মন্ত্রী যৌগন্ধরায়ণের ন্যায় আমি এখন বন্ধু আর্য্যকের মুক্তির জন্য, রাজা

उत्तेजयामि सुहृदः परिमोक्षणाय
यौगन्धरायण इवोदयनस्य राज्ञः ॥ २६ ॥

राज्ञो दायादान्, विटान् 'विटस्तु धूर्त्तः" इत्यादिदर्पणादिलक्षितान् सुचतुरान् जनान्, स्वभुजविक्रमे आत्मबाहुबलप्रकाशे लब्धवर्णा विचक्षणा वीरा इत्यर्थस्तान, तथा राजापमानेन राजकर्त्तृकापमानेन कुपितान् नरेन्द्रभृत्यान् तस्यैव राज्ञः अमात्यांश्च, उत्तेजयामि राज्ञो विरुद्धत्वे उत्साहयामि । तथा सति राज्ञोध्वंसेन वन्दीरार्य्यकस्य मुक्तिर्भविष्यतीति भावः ।

अत्र उत्तेजयामीत्येकया क्रियया अप्रस्तुतानामेव ज्ञात्यादीनां कर्म्मतयाऽभिसम्बन्धात् तुल्ययोगितालङ्कारः श्रौती उपमा च; अनयोर्गुणप्रधानभावेनाङ्गाङ्गिभावात् सङ्करः। तथा राजेतिप्रक्रम्य नरेन्द्रेत्यभिधानात् प्रकृतिविषयो भग्नप्रक्रमतादोषः, एवं यौगन्धरायण उत्तेजयामास अहन्तु उत्तेजयामीति पुरुषभेदात् कालभेदाच्च अपरोऽपि भग्नप्रक्रमतादोषः; किन्तु 'नरेन्द्रभृत्यान्" इत्यत्र 'तदीयभृत्यान्' इति पाठे 'उत्तेजयन् हि फलवान् सुहृदो विमुक्त्यै" इति पाठे च तन्निरासः। न च तथात्वेऽपि यौगन्धरायणः फलवानभवत् अहन्तु फलवान् भविष्यामीति पुनः पुरुषभेदात् कालभेदाच्च भग्नप्रक्रमताया स्तादवस्थ्यमेव; प्रत्युत न्यूनपदतादोषश्चेति वाच्यम्, अनभिहितपदवैषम्ये भग्नप्रक्रमताया अनुपपत्तेः भवत्यादीनामध्याहारे न्यूनपदताया वामनादिभि रनङ्गीकृतत्वाच्च ।

चन्द्रसेनो नाम उज्जयिनीराजो वत्सराजमुदयनं केनापि कारणेन कारागारे बद्धवान् । वत्सराजमन्त्री यौगन्धरायणस्तु चन्द्रसेनस्य ज्ञात्यादीनुत्तेज्य वत्सराजमुद्धारयामासेति कथासरित्सागरोपाख्यानमत्र द्रष्टव्यम् ।

'लब्धवर्णो विचक्षणः' इत्यमरः । वसन्ततिलका वृत्तम् ॥ २६ ॥

পালকের জ্ঞাতিবর্গকে, চতুর লোকসকলকে, আত্ম-বাহু-বলপ্রকাশে বিচক্ষণ বীরগণকে এবং রাজকর্তৃক অপমান বশতঃ ক্রুদ্ধ রাজকর্ম্মচারীদিগকে (রাজার বিরুদ্ধে) উত্তেজিত করিব ॥২৬॥

অপি চ। প্রিয়সুহৃদমকারণে গৃহীতং
রিপুভিরসাধুভিরাহিতাত্মশঙ্কৈঃ।
সরভসমভিপত্য মোচয়ামি
স্থিতমিব রাহুমুখে শশাঙ্কবিম্বম্ ॥ ২৭ ॥

ইতি নিষ্ক্রান্তঃ।

প্রবিশ্য চেটী। অজ্জএ! দিট্টিআ বড্ঢসি। অজ্জচারুদত্তস্স সআসাদো বম্হণো আঅদো। (চ)

(চ) আর্য্যে! দিষ্ট্যা বর্দ্ধসে। আর্য্যচারুদত্তস্য সকাশাৎ ব্রাহ্মণ আগতঃ।

প্রিয়েতি। আহিতা ধৃতা আত্মশঙ্কা আর্য্যকাদাত্মবিপদাতঙ্কো যৈস্তৈঃ, অসাধুভিঃ রিপুভিঃ পালকাদিভিঃ, কারণস্যাভাবঃ অকারণং তস্মিন্ সত্যপি, গৃহীতং কারাগারনিবদ্ধম্, অতএব রাহুমুখে শশাঙ্কবিম্বমিব তত্রৈব স্থিতম্, প্রিয়সুহৃদমার্য্যকম্, সরভসং সবেগম্, অভিপত্য উপস্থায় মোচয়ামি। অত্র শ্রৌতী সমাসগতোপমালঙ্কারঃ। অধ্যবসায়ো নাম নাট্যালঙ্কারশ্চ; "প্রতিজ্ঞাধ্যবসায়কঃ" ইতি দর্পণলক্ষণাৎ।

"রভসো বেগহর্ষয়োঃ" ইতি বিশ্বঃ। পুষ্পিতাগ্রা বৃত্তম্ ॥ ২৭ ॥

আর, আশঙ্কিত দুরাত্মা শত্রুগণ, প্রিয়সুহৃদ্ আর্য্যককে অকারণে কারাগারে আবদ্ধ করিয়াছে; তিনি এখন, রাহুমুখে চন্দ্রমণ্ডলের ন্যায় সেখানে অবস্থান করিতেছেন। সুতরাং আমি বেগে উপস্থিত হইয়া তাঁহাকে মুক্ত করিব ॥২৭॥ (এই বলিয়া চলিয়া গেল)

(প্রবেশ করিয়া দাসী। আর্য্যে! ভাগ্যবশতঃ আপনি উন্নতিলাভ করিতেছেন। আর্য্য চারুদত্তের নিকট হইতে একটী ব্রাহ্মণ আসিয়াছে।

वस। अहो! रमणीअदा अज्ज दिवसस्स। ता हञ्जे! सादरं बन्धुलेण समं पवेसेहि णं। (छ)

चेटी। जं अज्जआ आणवेदि। इति निष्क्रान्ता। (ज)

विदूषको बन्धुलैन सह प्रविशति।

विदू। ह्णीह्णी भो! तवच्चरणकिलेसविणिज्जिदेण रक्खसराआ रावणो पुप्फकेण विमाणेण गच्छदि अहं उण बम्हणो अकिदतवच्चरणकिलेसोवि णरणारीजणेण (१) गच्छामि। (झ)

(छ) अहो! रमणीयता अद्य दिवसस्य। तत् हञ्जे! सादरं बन्धुलेनसमं प्रवेशय एनम्।

(ज) यदार्य्या आज्ञापयति।

(झ) ह्णीह्णी भोः! तपश्चरणक्लेशविनिर्जितेन राक्षसराजो रावणः पुष्पकेण विमानेन गच्छति; अहं पुनर्ब्राह्मणोऽकृततपश्चरणक्लेशोऽपि नरनारीजनेन गच्छामि।

(छ) वस इति। बन्धुलैन "परगृहललिताः—" इत्यादिवक्ष्यमाणजातीयेन पुरुषविशेषसमूहेन। एनं ब्राह्मणम्।

(झ) विदू इति। 'ह्णीह्णी' इत्येकमेव हर्षद्योतकमव्ययम्। तथा च मेदिनी

বসন্তসেনা। অদ্যকার দিনের বড়ই রমণীয়তা দেখিতেছি। অতএব ঝি! বন্ধুলগণের সহিত তাঁহাকে সাদরে প্রবেশ করাও।

দাসী। আপনি যাহা আদেশ করেন। (এই বলিয়া চলিয়া গেল)

বন্ধুলগণের সহিত বিদূষকের প্রবেশ।

বিদূষক। বেশ্ বেশ্। রাক্ষসরাজ রাবণ, তপস্যা করার ক্লেশে

---

(१) णरणारीजणेण।

चेटी। पेक्खदु अज्जो अम्हकेरकं गेहदुआरं। (ञ)

विदू। अवलोक्य सविस्मयम्। अहो! सलिल-सित्त-मज्जिद-किद-हरिदोवलेपणस्स, विविह-सुअन्धि-(१) कुसुमोवहार-चित्त-लिहिद-भूमिभाअस्स, गअणतलालोअण कोदूहल दूरुण्णा-मिद सीसस्स, दोलाअमाणावलम्बिदैरावणहत्थ व्भमाइद मल्लिआदाम गुणालङ्किदस्स, समुच्छिद दन्ति दन्ततोरणाव-

(ञ) प्रेक्षतामार्य्यः अस्मदीयं गृहद्वारम्।

(ट) अहो! सलिल-सिक्त-मार्जित-कृत-हरितोपलेपनस्य, विविध सुगन्धिकुसुमोपहारचित्रलिखितभूमिभागस्य, गगनतलालोकन कौतूहलदूरोन्नमितशीर्षस्य, दोलायमानावलम्बितैरावणहस्त भ्रमायित-मल्लिकादामगुणालङ्कृतस्य, समुच्छ्रितदन्तिदन्त तोरणावभासितस्य,

"हाहोशब्दो विस्मयहर्षयोः।" तपसा क्लेशेन विनिर्जितं विनिर्जित्य कुबेरा-दानीतं तेन। गच्छतीति अध्याहर्त्तव्यमहमद दोषी वर्त्तमाना। नरदुनी नारीजन-सनेन पुष्पकारूढ़ेनैवेति भावः। अहो मम सौभाग्यमिति भावः।

(ट) विदू इति। अत्र षष्ठ्यन्तपदानि वसन्तसेनाभवनद्वारस्येति वक्ष्यमाणस्य

নির্জ্জিত পুষ্পকবিমানে গমন করিতেন; আর (গরীব) ব্রাহ্মণ আমি, তপস্যা করার ক্লেশ না করিয়াও, নর-নারীগণের সঙ্গে গমন করিতেছি!।

দাসী। আর্য্য! আপনি আমাদের গৃহদ্বার দর্শন করুন।

বিদূষক। (দর্শন করিয়া বিস্ময়ের সহিত) কি আশ্চর্য্য! বসন্তসেনার ভবনদ্বারের কি অদ্ভুত সৌন্দর্য্য! এখানে প্রথমে জলধারা ধৌত করিয়াছে এবং মার্জন করিয়াছে, পরে হরিদ্বর্ণ রঞ্জকদ্রব্য লেপন করিয়াছে, নানাবিধ সুগন্ধি পুষ্প সুন্দরভাবে বিন্যস্ত করায়, ইহার ভূমিভাগ যেন

(१) सुगन्ध—

ভাসিদস্স, মন্দারস্সণোব্ব হারীবসোহিণা পবণবলন্দোলণা ললন্তব স্ত্রগ্গহত্থেণ 'ইদো এহি' ত্তি বাহরন্তেণ বিঅ মং সোহগ্গপ্পআসিণিব্বহীণোব্বলাহিদস্স, তোরণধরণত্থম্ভবেদি-আ ণিক্কিণ্ণ সমুহসন্তহরিদচন্দপল্লবললামফটিহ মঙ্গল-

---

মন্দারলোপহারশোভিনা পবনবলান্দোলনাচঞ্চলাগ্রহস্তেন 'ইত এহি' ইতি ব্যাহরতেব মাং সৌভাগ্যপ্রকাশিনির্ব্বহণোপরাগাভিরম্যস্য, তোরণধরণস্তম্ভবেদিকানিঃক্ষিপ্তসমুল্লসদ্ধরিতচন্দনপল্লবললামস্ফটিকমঙ্গল-

---

বিশেষণানি। আদৌ সলিলেন সিক্তং ধৌতম্ অনন্তরঞ্চ মার্জ্জিতং কৃতং হরিতেন হরিদ্বর্ণেন গন্ধদ্রব্যেণ উপলেপনং যস্য তস্য তস্য। ক্রমাৎ দ্বয়োর্দ্বয়োঃ পদয়োঃ কর্ম্মধারয়ঃ।

বিবিধানাং সুগন্ধিকুসুমানামুপহারৈঃ সুন্দরভাবেন বিন্যস্তৈঃ চিত্রে লিখিত ইব আলেখ্যপটে লিখিত ইব ভূমিভাগো যত্র তস্য।

গগনতলস্য আলোকনায় যৎ কৌতূহলং তেন দূরে অত্যুচ্চে উন্নমিতমুত্তোলিতং রূপং মস্তকং যেন তস্য, তস্যেবেত্যর্থঃ। অত্র প্রতীয়মানোৎপ্রেক্ষালঙ্কারঃ।

দোলায়মানো বায়ুবেগেন সঞ্চলিতঃ অবলম্বিতঃ নীচৈ লম্বিতঃ তথা ঐরাবণহস্তস্য ভ্রমো যস্মিন্ স ইব আচরিত ইতি ঐরাবণহস্তভ্রমায়িতঃ ঐরাবত-হস্তিনঃ শুণ্ডাভ্রমজনক ইত্যর্থঃ যঃ মল্লিকাদামগুণো মল্লিকাকুসুমমালাসূত্রং তেন অলঙ্কৃতস্য ভূষিতস্য।

সমুচ্ছ্রিতেন অত্যন্তোচ্চেন দন্তিদন্ততোরণেন হস্তিদন্তনির্ম্মিততোরণেন অবভাসিতস্য শোভিতস্য।

চিত্রপটে চিত্রিত করিয়া রাখা হইয়াছে। আকাশতলদর্শন করিবার কৌতুকবশতঃ, মস্তক যেন অতিদূরে উত্তোলন করিয়াছে। বায়ুবেগে আন্দোলিত, অধোলম্বিত এবং ঐরাবতহস্তীর শুণ্ডের ভ্রমজনক মল্লিকা-পুষ্পমালায় এই দ্বারটী অলঙ্কৃত হইয়াছে। অত্যুচ্চ হস্তিদন্তের তোরণে

कलसाहिरामो हअ पास्सस्स, महासुरवक्खत्थलदुब्भेज्ज वज्ज णिरन्तरपरिविद्धकणअकवाडस्स, दुग्गदजण मणोरहाआसकारस्स, वसन्तसेणा भवण दुआरस्स, सस्सोरिअदा। जं सच्चं मज्झत्थस्स वि जणस्स बलादिट्ठिं आआरेदि। (ग)

कलशाभिरामोभयपार्श्वस्य, महासुरवक्षःस्थल दुर्भेद्य वज्र निरन्तरपरिविद्ध कनककपाटस्य, दुर्गतजन मनोरथायासकारस्य, वसन्तसेनाभवन द्वारस्य, श्रीकता। यत्सत्यं मध्यस्थस्यापि जनस्य बलाद्दृष्टिमाकारयति।

महारत्नानां चन्द्रकान्तादीनामुपहारेण ग्रथनेन शोभित इति तेन, पवनवलन वायुवेगेन या आन्दोलना सञ्चालनं तया लम्बचञ्चलः अधोलम्बमानकम्पितः अग्रहस्तो हस्ताग्रं यस्य तेनेव स्थितेनेत्यर्थः। माल्यादिदत्तेनेव वदतेव स्थितेन, सौभाग्यपताकानिवहेन सौभाग्यसूचकपताकासमूहेन, उपशोभितस्य। अत्र प्रतीयमानोत्प्रेक्षावाच्योत्प्रेक्षयोरेकवाचकानुप्रवेशरूपः सङ्करः।

तोरणधारणस्य ये स्तम्भाः स्थूणास्तेषां या वेदिका मूले वद्धभूमयस्ताम् निःक्षिप्तैः स्थापितैः, मङ्गलकलसः शोभमानाः हरिताः पल्लवर्णाः च्युतपल्लवा आम्रकिसलयानि येषु तैः, लतामालासुत्प्लाना स्फाटिकेन तन्निर्मिता इत्यर्थः ये मङ्गलकलसा माङ्गलिकपूर्णकुम्भास्तैः, अभिरामं मनोहरम् उभयपार्श्वं यस्य तस्य तथोक्तस्य।

এই দ্বারদেশ শোভিত হইয়াছে। চন্দ্রকান্তপ্রভৃতি মহারত্ন গ্রথিত থাকায় শোভিত, বায়ুর আন্দোলনে চঞ্চল এবং অধোলম্বিত, সুতরাং হস্তাগ্রের ন্যায় অবস্থিত, তাহতে 'এইদিকে আইস' এই কথাই যেন আমাকে বলিতেছে, —এই রূপ সৌভাগ্যসূচক পতাকাসমূহে এই দ্বারদেশ শোভিত হইয়াছে। তোরণধারণস্তম্ভের নীচের বেদি দুইটীর উপরে উৎকৃষ্ট স্ফটিকময় বহুতর মাঙ্গলিক কুম্ভ স্থাপিত করা হইয়াছে; সে

चेटी। एदु एदु। इमं पढमं पओट्ठं पविसदु अज्जो।(ठ)

विदू। प्रविश्यावलोक्य च। हीही भो! इदो वि पढमे पओट्ठे ससि-सङ्ख मृणालसच्छाआओ, विणिहिदचुण्णमुट्ठिपाण्डुराओ, विविहरअणपडिबद्धकञ्चणसोवाणसोहिदाओ, पासाद

(ठ) एतु एतु। इमं प्रथमं प्रकोष्ठं प्रविशतु-आर्य्यः।

(ड) हीही भोः! इतोऽपि प्रथमे प्रकोष्ठे शशिशङ्खमृणाल सच्छायाः, विनिहित चूर्णमुष्टिपाण्डुराः, विविध-रत्न-प्रतिबद्ध काञ्चन

'ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुषु'' इत्यमरः।

महासुराणां हिरण्याक्षादीनां वक्षःस्थलवत् दुर्भेद्यानि, वज्रहीरकैः हीरकमयशङ्कुभिरित्यर्थः प्रतिबद्धानि उपरिस युक्तानि च कणककपाटानि यत्र तस्य।

तथा दुर्गतानां दरिद्राणां जनानां ये मनोरथा अभिलाषास्तेषाम् आयासं वारं वारमाकर्षतीन परिश्रमं करोतीति तस्य तथोक्तस्य, वसन्तसेनाया भवनद्वारस्य, अहो सश्रीकता शोभाशालित्वम्। यत् इत्यमीतन्निश्चितमित्यर्थः, यत् मध्यस्थस्य उदासीनस्य विषयनिःस्पृहस्य जनस्य दृष्टिम्, बलात् आकारयति आमन्त्रयति आकर्षतीत्यर्थः, एतद्भवनद्वारमिति शेषः।

(ड) विदू इति। इतोऽपि अस्मिन्नपि। प्रकोष्ठे कक्षान्तरे। शशिनश्चन्द्रस्य

গুলির উপরে হরিদ্বর্ণ সুন্দর আম্রপল্লব দেওয়া হইয়াছে; তাহাতে দ্বারের উভয় পার্শ্ব অতি মনোহর দেখা যাইতেছে। ইহার সুবর্ণময় কপাটদ্বয় মহাসুরের বক্ষঃস্থলের ন্যায় দুর্ভেদ্য এবং ঘন ঘন হীরকশঙ্কু (পেরেক) দ্বারা বিদ্ধ রহিয়াছে। আর, এই দ্বারদেশটী, দরিদ্রলোকের অভিলাষের পরিশ্রমজনক। সুতরাং এই দ্বারদেশ, বলপূর্ব্বক, উদাসীন ব্যক্তিরও দৃষ্টি আকর্ষণ করে।

দাসী। আর্য্য আসুন আসুন, এই প্রথম প্রকোষ্ঠে প্রবেশ করুন।

पन्तिओ, ओलम्बिद मुत्ता दामेहिं फटिअवादाअणमुहचन्देहिं निज्झाअन्ती विअ उज्जइणिं। सोत्तिओ विअ सुहोवविट्ठो णिद्दाअदि दोवारिओ। सदहिणा कलमोदणेण पलोहिदा ण भक्खन्ति वाअसा वलिं सुधासवण्णदाए। आदिसदु भोदी। (ङ)

सोपानशोभिताः, प्रासादपङ्क्तयः, अवलम्बितमुक्तादामभिः स्फटिकवातायनमुखचन्द्रैर्निध्यायन्तीव उज्जयिनीम्। श्रोत्रिय इव सुखोपविष्टो निद्राति दौवारिकः। सदध्ना कलमौदनेन प्रलोभिता न भक्षयन्ति वायसा वलिं सुधासवर्णतया। आदिशतु भवती।

शङ्खस्य मृणालस्य च समानाश्छायाः कान्तयो यासां ताः। 'छाया सूर्य्यप्रिया कान्तिः प्रतिविम्बमनातपः" इत्यमरः। विनिहितैः सर्वत्र समानभावेन स्थापितैः चूर्णमुष्टिभिः मुष्टि-मुष्टिपरिमितचूर्णैः, पाण्डुराः शुभ्रवर्णाः। तथा विविधरत्नैः प्रतिबद्धानि खचितानि यानि काञ्चनसोपानानि तैः शोभिताः। अवलम्बितानि अधोलम्बितानि मुक्तादामानि सूत्रग्रथितमौक्तिकानि मुक्तामयहाराश्च येषु तैः, स्फटिकवातायनान्येव स्फटिकनिर्म्मितगवाक्षा एव मुखचन्द्रास्तैः, उज्जयिनीम्, निध्यायन्तीव अवलोकयन्तीव। अत्र रूपकसङ्कीर्णः क्रियोत्प्रेक्षालङ्कारः; तेन च उज्जयिन्याः शोभातिशयो व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः।

श्रोत्रियो ब्राह्मणविशेषः। सुखोपविष्टः—एकत्र उत्कटविषयस्पृहाभावेन निश्चिन्तत्वात्, अन्यत्र तु गृहस्य सुरक्षिततया निश्चिन्तत्वादिति भावः। अत्र समासगतश्रौतोपमालङ्कारः।

विदूषक। (প্রবেশপূর্ব্বক দর্শন করিয়া) ওহে! অত্যন্ত আশ্চর্য্য ত। এই প্রথম প্রকোষ্ঠে চন্দ্র, শঙ্খ ও মৃণালের সমান-কান্তিসমন্বিত, মুষ্টিপরিমিত চূর্ণ প্রদান করায় শুভ্রবর্ণ এবং নানাবিধ-রত্ন-খচিত-স্বর্ণময় সোপানে শোভিত প্রাসাদশ্রেণী, লম্বিত-মুক্তামালাসমন্বিত স্ফটিক-

চেটী। এদু এদু অজ্জো। ইমং দুদিঅং পওট্ঠং পবিসদু অজ্জো। (ঢ)

বিদূ। (প্রবিশ্যাবলোক্য চ) হীহী ভো! ইধো বি দুদিএ পওট্ঠে পজ্জন্তোবণীদ-জবস-ভুস-কবল-সুপুট্ঠা তেল্লব্ভঙ্গিদবিসাণা

(ঢ) এতু এতু আর্য্যঃ। ইমং দ্বিতীয়ং প্রকোষ্ঠং প্রবিশতু আর্য্যঃ।

(ণ) হীহী ভোঃ! ইতোঽপি দ্বিতীয়ে প্রকোষ্ঠে পর্য্যন্তোপনীত-যবস বুষ-

---

শ্রোত্রিয়মাহ শব্দতত্ত্বে দেবলঃ—'একাং শাখাং সকল্পাং বা ষড়্‌ভিরঙ্গৈরধীত্য বা ষট্‌কর্ম্মনিরতো বিপ্রঃ শ্রোত্রিয়ো নাম ধর্ম্মবিৎ ॥"

তথা বায়সাঃ কাকাঃ, সদধ্না দধিযুক্তেন, কলমস্য ধান্যবিশেষস্য ওদনেন অন্নেন তদ্বিনির্ম্মিতেনেত্যর্থঃ, প্রলোভিতা লুব্ধীকৃতা অপি, সুধাসমবর্ণতয়া বলিঃ [illegible] ভ্রমবশান্নয়ঃ বলিং ব্রাহ্মণপ্রভৃতিমানবৈর্দত্তং গৃহস্থস্য নিত্যকর্ত্তব্যং দধিমিশ্রিতকলমৌদনরূপমুপহারম্, ন ভক্ষয়ন্তি, সমন্তাল্লিপ্তসুধাভ্রমাদিতি ভাবঃ।

অত্র বায়সানামন্নেপি সুধাভ্রমাদ্ ভ্রান্তিমানলঙ্কারো বাচকাভাবাদ্ ব্যজ্যতে। আদিশতু গন্তব্যপথমিতি শেষঃ।

(ণ) বিদূ ইতি। পর্য্যন্তে সমীপান্তে উপনীতানামুপস্থাপিতানাং যবসানাং

ময় গবাক্ষরূপ মুখচন্দ্রদ্বারা উজ্জয়িনী নগরীকে যেন দর্শন করিতেছে। দৌবারিকগণ, শ্রোত্রিয় ব্রাহ্মণের ন্যায় সুখে উপবেশন করিয়া নিদ্রা যাইতেছে। কাকপক্ষিগণ অন্নের লোভী হইয়াও, চূর্ণলেপের সমানবর্ণ বলিয়া, (তাহার ভ্রমবশতঃ) দধিযুক্ত কলমধান্যতণ্ডুলের শুভ্র অন্নরূপ পূজোপহার ভক্ষণ করিতেছে না। তুমি গন্তব্য পথ বলিয়া দাও।

দাসী। আর্য্য আসুন আসুন, এই দ্বিতীয় প্রকোষ্ঠে প্রবেশ করুন।

বিদূষক। (প্রবেশপূর্ব্বক দর্শন করিয়া) ওহে! বড়ই আশ্চর্য্য ত।

वद्धा पवहण-वइल्ला। अण्णं अक्खदरो अवमाणिदो विअ कुलीणो दीहं णीससदि सेरिहो। इदोअ अवणीदजुज्झस्स मल्लस्स विअ मद्दीअदि गीवा मेसस्स। इदो इदो अवराणं अस्साणं केसकप्पणा करीअदि अण्णं अवरो पाड़च्चरो विअ दिढ़वद्धो

कवल-सुपुष्टा स्तैलाभ्यक्तविषाणा वद्धाः प्रवहणवलीवर्द्दाः। अयमन्यतरः अवमानित इव कुलीनः दीर्घं निःश्वसिति सैरिभः। इतश्च अपनीतयुद्धस्य मल्लस्येव मर्द्द्यते ग्रीवा मेषस्य। इत इतो अपरेषामश्वानां

घासानां वुषाणां धान्यत्वचाञ्च कवलैर्ग्रासैः सुपुष्टाः पुष्टदेहाः, तैलेन अभ्यक्तानि लिप्तानि विषाणानि शृङ्गानि येषां ते तथोक्ताः, प्रवहणवलीवर्द्दाः शकटवाहिनो वृषभाः, वर्त्तन्त इति शेषः।

'घासो यवसम्' 'कड़ङ्गरो वुषं क्लीवे धान्यत्वचि पुमांस्तुषः' इति चामरः।

कुलीन उच्चकुलोत्पन्नो जनः। सैरिभो महिषः। अत्रोपमालङ्कारः। न चात्र 'हरवन्नीलकण्ठोऽयं विराजति शिखावलः' इति दर्पणोदाहृतवत् उपमानस्य जातिगताधिक्यादनुचितार्थत्वदोषः इति वाच्यम्, कौतुककरणाय ईदृशवैधर्म्याभिधानस्यैव विदूषकस्य स्वभावत्वात्।

'लुलापो महिषो वाहद्विषत्कासरसैरिभाः' इत्यमरः।

अपनीतं निवारितं युद्धं यस्य तस्य। अत्राप्युपमालङ्कारः। पूर्ववदत्रानुचितार्थत्वदोषाभावः।

এই দ্বিতীয় প্রকোষ্ঠেও, কতকগুলি শকটচালক বৃষ বদ্ধ আছে, (উহাদের) সম্মুখে প্রদত্ত ঘাস ও চিটা ভক্ষণ করিয়া, উহারা খুব পুষ্ট হইয়াছে এবং উহাদের শিংগুলিতে তৈল মাখিয়া রাখিয়াছে। এই আর একটা মহিষ, অপমানিত কুলীনের ন্যায় দীর্ঘনিশ্বাস ত্যাগ করিতেছে। এদিকে আবার যুদ্ধ হইতে নিবারিত মল্লযোদ্ধার ন্যায় মেষের গ্রীবা মর্দ্দন করিয়া দিতেছে। এইখানে এইখানে আবার ঘোটকগণের কেশ রচনা

मन्दुराए साहामिओ । अन्यतोऽवलोक्य च । इदो अ कूरच्चुअ-तेल्लमिस्सं पिण्डं हत्थी पडिच्छावीअदि मेत्थपुरिसेहिं । आदिसदु भोदी । (ण)

चेटी । एदु एदु अज्जो । इमं तदिअं पओट्ठं पविसदु अज्जो । (त)

विदू । प्रविश्य दृष्ट्वा च । हीही भो ! इधो वि तदिए पओट्ठे इमाइं दाव कुलउत्तजणोववेसणणिमित्तं विरचिदाइं आसन-

(চ) বিদূ ইতি। নবনলিনবৎ পদ্মকলিকাবৎ কোমলং সুকুমারম্। প্রতীষ্টা গৃহীতা।

বিদূষক। উপবিষ্ট হইলাম।

চারুদত্ত। বয়স্য! সে কার্য্যের বৃত্তান্ত বল।

বিদূষক। সে কার্য্য নষ্ট হইয়াছে

চারুদত্ত। তিনি কি রত্নমালা গ্রহণ করেন নাই?।

বিদূষক। আমাদের এত ভাগ্য আসিবে কোথা হইতে?। মস্তকে নূতন পদ্মের ন্যায় অঞ্জলি বন্ধন করিয়া গ্রহণ করিয়াছে।

চারুদত্ত। তবে 'নষ্ট হইয়াছে" বলিতেছ কেন?

विदू । भो ! कधं ण विणट्ठं ? जं अभुत्तस्स अपीदस्स चोरेहिं अवहिदस्स अप्पमुल्लस्स सुवण्णभण्डअस्स कारणादो चदुस्समुद्द सारभूदा रअणमाला हारिदा । [छ]

चारु । वयस्य ! मा मैवम् ।

यं समालम्ब्य विश्वासं न्यासोऽस्मासु तया कृतः ।
तस्यैतन्महतो मूल्यं प्रत्ययस्यैव दीयते ॥ ७ ॥

विदू । भो वअस्स ! एदं पि मे दुदिअं सन्दावकारणं, जं सहीजण-दिण्ण-सण्णाए पडन्तोवारिदं मुहं कदुअ, अहं

(छ) भोः ! कथं न विनष्टम् ? यत् अभुक्तस्य अपीतस्य चौरैरपहृतस्य अल्पमूल्यस्य सुवर्णभाण्डस्य कारणात् चतुःसमुद्रसारभूता रत्नमाला हारिता ।

(ज) भो वयस्य ! एतदपि मे द्वितीयं सन्तापकारणम्, यत्

यमिति । व्याख्यातमेतत् प्राक् ।

(ज) विदू इति । सखीजनेषु दत्ता संज्ञा उपहासाय सङ्केतो यया तया

বিদূষক । ওহে ! নষ্ট না হইবে কেন ? যেহেতু, যাহা ভোগ করা হয় নাই, যাহা পান করা হয় নাই, যাহা চোরে নিয়াছে এবং যাহার মূল্য অল্প, সেই স্বর্ণালঙ্কারের জন্য, চারি সমুদ্রের সার-ভূত রত্নমালা হারাইয়াছি ।

চারুদত্ত । বয়স্য ! না, না, এরূপ বলিও না । কারণ—

বসন্তসেনা আমাদের উপর যে বিশ্বাস অবলম্বন করিয়া, গচ্ছিত রাখিয়াছিলেন ; ইহা সেই গুরুতর বিশ্বাসেরই মূল্য দিয়াছি ॥৭॥

বিদূষক । বয়স্য ! ইহাও আমার দ্বিতীয় সন্তাপের কারণ যে,— বসন্তসেনা, সখীকে সঙ্কেত জানাইয়া, বস্ত্রদ্বারা মুখ আবৃত করিয়া

উবহসিদো, তা অহং বম্হণো ভবিঅ দাণিং ভবন্তং সীসেণ পড়িঅ বিঞ্ঞবেমি ণিবত্তীঅদু অপ্পা ইমাদো বহু-পচ্চবাআদো গণিআপসঙ্গাদো। গণিআ ণাম পাদুঅন্তর-প্পবিট্টা বিঅ লেট্টুআ দুক্খেণ উণ ণিরাকরীঅদি। অবিঅ, ভো বয়স্স! গণিআ, হত্থী, কাঅত্থও, ভিক্খু, চাটো, রাসহো অ, জহিং এদে ণিবসন্তি, তহিং দুট্টা বি ণ জাঅন্তি। [জ]

সখীজন-দত্ত-সংজ্ঞয়া পটান্তাপবারিতং মুখং কৃত্বা অহমুপহসিতঃ। তদহং ব্রাহ্মণো ভূত্বা ইদানীং ভবন্তং শীর্ষেণ পতিত্বা বিজ্ঞাপয়ামি নিবর্ত্ততামাত্মা অস্মাৎ বহু প্রত্যবায়াৎ গণিকাপ্রসঙ্গাৎ। গণিকা নাম পাদুকান্তরপ্রবিষ্টা ইব লেষ্টুকা, দুঃখেন পুনর্নিরাক্রিয়তে। অপিচ ভো বয়স্য! গণিকা, হস্তী, কায়স্থঃ, ভিক্ষুঃ, চাটঃ, রাসভশ্চ, যত্র এতে নিবসন্তি, তত্র দুষ্টা অপি ন জায়ন্তে।

বসন্তসেনয়া। পটান্তেন বসনাঞ্চলেন অপবারিতম্ আবৃতম্। 'বিহস্য সখী মুখং পশ্যন্তী" ইত্যেতদেব উপহাসত্বেন সম্ভাব্যেদমভিহিতম্। শীর্ষেণ মস্তকেন পতিত্বা তব পাদয়োরিতি শেষঃ। বহবঃ প্রত্যবায়াঃ পাপানি যস্মিন্ তস্মাৎ। লেষ্টুকা ক্ষুদ্রলোষ্ট্রম্। নিরাক্রিয়তে নিষ্কাশ্যতে। কায়স্থঃ কূটলেখকঃ। চাটঃ শঠঃ। রাসভো গর্দ্দভঃ। দুষ্টা অপি সাধূনাং কা কথা যৎকিঞ্চিদ্দোষান্বিতা অপি জনাঃ ন জায়ন্তে সংসৃষ্টা ন ভবন্তীত্যর্থঃ, দোষাধিক্যসম্ভবাদিতি ভাবঃ।

আমাকে উপহাস করিয়াছে। অতএব আমি ব্রাহ্মণ হইয়া, মস্তক দ্বারা (তোমার পায়ে) পড়িয়া, তোমাকে জানাইতেছি যে, তুমি বহুতর পাপজনক এই বেশ্যাসংসর্গ হইতে আপনাকে নিবৃত্ত কর। কারণ, জুতার ভিতরে প্রবিষ্ট ক্ষুদ্র ঢিলের ন্যায় বেশ্যাকে অতিকষ্টে আবার বাহির করিতে হয়। বয়স্য! আরও শোন,— বেশ্যা, হস্তী, কায়স্থ, ভিক্ষুক, শঠ ও গর্দ্দভ ইহারা যেখানে বাস করে, সেখানে দূষিত লোকেরাও সম্মিলিত হয় না।

चारु । वयस्य ! अलमिदानीं सर्वं परिवादमुक्त्वा ; अवस्थयैवास्मि निवारितः । पश्य— [क]

वेगं करोति तुरगस्त्वरितं प्रयातुं—
प्राणव्ययान्न चरणास्तु तथा वहन्ति ।
सर्वत्र यान्ति पुरुषस्य चलाः स्वभावाः—
खिन्नास्ततो हृदयमेव पुनर्विशन्ति ॥ ८ ॥

(क) चारु इति । अवस्थयैव दारिद्र्यदशयैव । धनिभोग्या वेश्या दरिद्राणां भोगाय न सम्भवतीति तन्निवारणमनावश्यकमेवेति भावः ।

वेगमिति । तुरगः अश्वः, त्वरितं प्रयातुं वेगं करोति, तु किन्तु, चरणास्तस्य पादाः, प्राणव्ययात् अत्यन्तपरिश्रमेण सामर्थ्यनाशात् हेतोः, तथा वेगेन न वहन्ति न चलन्ति । चलाश्चञ्चलाः, पुरुषस्य मनुष्यस्य, स्वभावा मनोवृत्तयः, सर्वत्र साध्येषु असाध्येषु च सर्वेष्वेव विषयेषु यान्ति ; ततः खिन्नाः श्रान्ताः असाध्यविषयभ्रमणेन केवलक्लान्ताः सन्तः, पुनः हृदयमेव विशन्ति । सुतरां वसन्तसेनासम्भोगोपयोगि-धनाभावात् तवोपदेशं विनापि मनसो मे स्वत एव ततो निवृत्तिसिद्धिरिति भावः ।

अत्र दृष्टान्तोऽलङ्कारः, तथा अप्रस्तुतात् पुरुषसामान्यात् प्रस्तुतस्य चारुदत्तरूप-पुरुषविशेषस्य प्रतीतेरप्रस्तुतप्रशंसा ; अनयोरङ्गाङ्गिभावेन सङ्करः ।

वसन्ततिलका वृत्तम् ॥ ८ ॥

চারুদত্ত। বয়স্য ! সমস্ত অপবাদ বলিবার এখন প্রয়োজন নাই, কারণ, আমি অবস্থা দ্বারাই নিবারিত আছি। দেখ—

অশ্ব শীঘ্র গমন করিবার জন্য, বেগ অবলম্বন করে ; কিন্তু পরিশ্রমে বল নষ্ট হওয়ায় তাহার চরণ সে রূপ বেগে চলিতে পারে না। মানুষের চঞ্চলমনোবৃত্তিও, সকল বিষয়েই যায় ; কিন্তু (সে কার্য্য সাধন করিতে না পারিয়া) খিন্ন হইয়া, সে বিষয় হইতে পুনরায় চিত্তেই প্রবেশ করে ॥৮॥

अपि च । वयस्य !

यस्यार्थास्तस्य सा कान्ता, धनहार्य्यो ह्यसौ जनः ।
स्वगतम् । न, गुणहार्य्यो ह्यसौ जनः । प्रकाशम् ।
वयमर्थैः परित्यक्ताः, ननु त्यक्तैव सा मया ॥८॥

यस्येति । यस्य जनस्य, अर्थाः धनानि सन्ति ; सा कान्ता रमणी वसन्तसेना, तस्य जनस्य भवति । हि यस्मात् असौ वसन्तसेनारूपो जनः, धनेन हार्य्य आयत्ता-कर्त्तव्यः । उक्तं 'धनहार्य्यः' इति वाक्यं सम्पूर्णमिथ्येति विभाव्य आत्मनो मिथ्यावादित्वदोषपरिहारायाह नेति । धनहार्य्य इति यदुक्तं तन्नेत्यर्थः, हि यस्मात्, असौ जनः, गुणैर्दयादाक्षिण्यादिभिः, हार्य्य आयत्तीकरणयोग्यः, धनग्रहणस्य प्रस्तावमप्यकृत्वा केवलगुणदर्शनेनैव मां प्रत्यनुरक्तिदर्शनादिति भावः । ननु तथापि धनेनैव त्वं यदि तां हरसीत्याह वयमहमित्यर्थः अर्थैर्धनैः, परित्यक्ता नितान्तनिर्धना इत्यर्थः ; अतएव ननु हे वयस्य ! मया सा कान्ता त्यक्तैव । अतएव नास्ति तदोद्वेगकारणमिति भावः ।

अत्र चतुर्थचरणार्थं प्रति तृतीयचरणगतवाक्यार्थस्य हेतुत्वात् काव्यलिङ्गमलङ्कारः । तथा पूर्वार्द्धे लिङ्गभेदात् परार्द्धे च वचनभेदाद्भग्नप्रक्रमतादोषद्वयम् ; 'यस्या-र्थास्तस्य सा कान्ता धनहार्य्येव खल्वसौ । (स्वगतम्) न, गुणहार्य्येव खल्वसौ (प्रकाशम्) अहमर्थैः परित्यक्तः ननु त्यक्तैव सा मया' इति पाठे तु तत्समाधानम् ।

तथा स्वगतप्रकाशभावाभ्यामीदृशस्खलनावलम्बनात् अभूताहरणं नाम गर्भसन्ध्यङ्गम्—'तत्र व्याजाश्रयं वाक्यमभूताहरणं मतम्" इति दर्पणलक्षणात् ॥ ९ ॥

আরও । বয়স্য ! যাহার ধন আছে, সেই রমণী তাহার ভোগ্য । কারণ, ঐ লোক ধনপ্রাপ্য । (স্বগত) তাহা নহে ; ঐ লোক গুণ-প্রাপ্য । (প্রকাশ্যে) আমি ধনহীন ; সুতরাং বয়স্য ! আমি তাহাকে ত পরিত্যাগ করিয়াছিই ॥৯॥

विदू। अधोऽवलोक्य स्वगतम्। जधा एसो उद्धं पेक्खिअ दीहं णिस्ससदि; तधा तक्केमि—मए णिवारिअन्तस्स अधिअदरं वड्ढिदा से उक्कण्ठा। ता सुट्ठु क्खु एव्वं वुच्चदि—'कामो वामो" त्ति। प्रकाशम्। भो वअस्स! भणिदं च ताए—"भणेहि चारुदत्तं अज्ज पदोसे मए एत्थ आअन्तव्वं" त्ति। ता तक्केमि रअणावलीए असन्तुट्ठा अवरं मग्गिदुं आअमिस्सदि त्ति। (ञ)

चारु। वयस्य! आगच्छतु, परितुष्टा यास्यति। (ट)

(ञ) यथा एष ऊर्द्ध्वं प्रेक्ष्य दीर्घं निश्वसिति; तथा तर्कयामि—मया निवार्य्यमाणस्य अधिकतरं वृद्धा अस्य उत्कण्ठा। तत् सुष्ठु खल्वेवमुच्यते 'कामो वामः" इति। भो वयस्य! भणितञ्च तया—"भण चारुदत्तम्—अद्य प्रदोषे मया अत्र आगन्तव्यम्" इति तत् तर्कयामि रत्नावल्या अपरितुष्टा अपरं मार्गयितुमागमिष्यतीति।

(ञ) विदू इति। अत्र उत्कण्ठेत्यन्तवाक्ये क्रमो नाम गर्भसन्धेरङ्गम्। यथादर्पणे—'भावतत्त्वोपलब्धिस्तु क्रमः स्यात्—।"

वामः निवारितो विवर्द्धत इत्येवं प्रतिकूलः। तया वसन्तसेनया। मार्गयितुमन्वेष्टुं प्रार्थयितुमित्यर्थः।

(ट) चारु इति। परितुष्टा महार्घवस्त्रालाभादिति भावः।

বিদূষক। (নীচের দিকে দৃষ্টিপাত করিয়া) যখন ইনি উপরের দিকে চাহিয়া নিশ্বাস ত্যাগ করিতেছেন, তখন আমি মনে করি যে,—আমি নিবারণ করায় ইহার উৎকণ্ঠা অত্যন্ত বৃদ্ধি পাইয়াছে। অতএব লোকে একথা ভালই বলে যে,—"কাম, সর্ব্বদাই প্রতিকূল।" (প্রকাশ্যে) বসন্তসেনা বলিয়াছেও —"চারুদত্তকে বলিবে যে অদ্য রাত্রিতে আমি এখানে আসিব।" সুতরাং আমি মনে করি যে, রত্নমালায় সন্তুষ্ট হয় নাই, তাই অন্য কিছু চাহিতে আসিবে।

चेटः । प्रविश्य । अवेध माणहे । (ठ)

जधा जधा वस्सदि अब्भखण्डे ,

तधा तधा तिम्मदि पुट्ठिचम्मे ।

जधा जधा लग्गदि सीदवादे

तधा तधा वेवदि मे हलक्के ॥१०॥

प्रहस्य ।

वंसं वाए सत्तच्छिद्दं सुसद्दं ,

वीणं वाए सत्ततन्तिं णदन्तिं ।

(ठ) आवेत मानवाः! ।

यथा यथा वर्षति अभ्रखण्डम् , तथा तथा तिम्यति पृष्ठचर्म्म ।

यथा यथा लगति शीतवातस्तथा तथा वेपते मे हृदयम् ॥१०॥

वंशं वादयामि सप्तच्छिद्रं सुशब्दं,

वीणां वादयामि सप्ततन्त्रीं नदन्तीम् ।

(ठ) चेट इति । कुम्भीलकनामा वसन्तसेनाया दासोऽयम् । हे मानवाः ! अवेत मम वक्तव्यार्थमवगच्छत ।

यथेति । अभ्रखण्डं मेघखण्डः , यथा यथा वर्षति , तथा तथा मम पृष्ठस्य चर्म्म , तिम्यति आर्द्रो भवति । शीतवातः शीतलवायुः , यथा यथा लगति गात्र-लग्नो भवति , तथा तथा मे मम हृदयम् , वेपते शैत्यातिशयात् कम्पते । उपेन्द्रवज्रा वृत्तम् ॥१०॥

চারুদত্ত । সখে ! আসুক , সন্তুষ্ট হইয়া যাইবে ।

(বসন্তসেনার) ভৃত্য । (প্রবেশ করিয়া) হে মানবগণ ! আমার বক্তব্য বিষয় অবগত হও ।

মেঘখণ্ড যেমন যেমন বর্ষা করে , তেমন তেমন পিঠের চামড়া ভিজিয়া যায় । আর যেমন ঠাণ্ডা বাতাস লাগে , তেমন তেমন আমার বুক কাঁপে ॥১০॥

गीअं गाए गद्दहस्साणुलूअं
के मे णाणि तुम्बुलु णालदे वा ॥११॥

आणत्तम्हि अज्जआए वसन्तसेणाए—'कुम्भीलआ! गच्छ तुमं मम आगमणं अज्जचारुदत्तस्स णिवेदेहि'त्ति। ता जाव अज्ज-

---

गीतं गायामि गर्द्दभस्यानुरूपं
को मे गाने तुम्बुरुर्नारदो वा ॥११॥

(ङ) आज्ञप्तोऽस्मि आर्य्यया वसन्तसेनया,—'कुम्भीलक! गच्छ

वंशमिति। सप्त छिद्राणि रन्ध्राणि यत्र तम्, सुशब्दं मधुरध्वनिम्, वंशं वेणुम् वादयामि; सप्त तन्त्री यस्यास्ताम्, नदन्तीं मधुरं शब्दायमानां वीणाञ्च, वादयामि। तथा गर्द्दभस्य अनुरूपं तुल्यं गीतम् गायामि। किन्तु गाने विषये मे मम समीपे तुम्बुरुर्नाम प्रसिद्धगायकोगन्धर्वः, तथैव प्रसिद्धगायको नारदो देवर्षिर्वा कः? अपि तु कोऽपि नेत्यर्थः। नितान्तनिकृष्ट इति भावः।

अत्र गर्द्दभस्यानुरूपमिति आर्थी उपमालङ्कारः। गर्द्दभतुल्यवक्तृकत्वादेव नोपमागतानुचितार्थत्वदोषः, न वा 'वाए' इति द्विरुपादानादपि कथितपदतादोषः।

मालिनी वृत्तम् ॥११॥

(ङ) आज्ञप्त इति। प्रविष्टकेन प्रवेशभङ्गीविशेषेण मुखं तिर्य्यक् कृत्वा कपाट-

---

(হাস্য করিয়া) আমি যে বাঁশী বাজাই, তাহাতে সাতটি ছাঁদা আছে এবং তাহার শব্দ সুন্দর; আর আমি যে বীণা বাজাই, তাহাতে সাতটি তাঁড় আছে এবং সে বীণা শব্দ করে এবং আমি গর্দ্দভের অনুরূপ গান করিয়া থাকি, গানে আমার কাছে তুম্বুরু বা নারদই বা কে? ॥১১॥

আর্য্যা বসন্তসেনা আমাকে আদেশ করিয়াছেন যে,—"কুম্ভী-

चारुदत्तस्स गेहं गच्छामि । परिक्रम्य प्रविश्यावलोक्य च । एसो चारुदत्तो रुक्खवाडिआए चिट्ठदि ; एसो वि सो दुट्ठवडुओ । ता जाव उवसप्पामि । कधं ढक्किदं दुआरं रुक्खवाडिआए । भोदु, एदस्स दुट्ठवडुअस्स सण्णं देमि । इति लोष्टगुटिकां क्षिपति । [ड]

विदू । अए ! को दाणिं एसो पाआरवेट्ठिदं विअ कइत्थं मं लोट्ठएहिं ताडेदि ? । [ढ]

त्वम्, मम आगमनम् आर्य्यचारुदत्तस्य निवेदय' इति । तद् यावत् आर्य्यचारुदत्तस्य गेहं गच्छामि । एष चारुदत्तो वृक्षवाटिकायां तिष्ठति एषोऽपि स दुष्टवटुकः । तद् यावदुपसर्पामि । कथमाच्छादितं द्वारं वृक्षवाटिकायाः । भवतु एतस्य दुष्टवटुकस्य संज्ञां ददामि ।

(ढ) अये ! क इदानीमेष प्राकारवेष्टितमिव कपित्थं मां लोष्टकैस्ताडयति ? ।

रन्ध्रात् इष्टेत्यर्थः । दुष्टवटुको धूर्त्तब्राह्मणो विदूषक इत्यर्थः । लोष्टगुटिका वटिकावत् क्षुद्रलोष्टानि ।

(ढ) विदू इति । प्राकारवेष्टितं समन्तात् प्राचीरावृतम् ।

লক ! তুমি যাও, আমার আগমন আর্য্য চারুদত্তের নিকট জানাও ।” তা আমি আর্য্য চারুদত্তের বাড়ী যাই । (পাদক্ষেপপূর্ব্বক প্রবেশের ভঙ্গী করিয়া দেখিয়া) এই যে চারুদত্ত উদ্যানে রহিয়াছেন, সেই দুষ্ট ব্রাহ্মণটাও এই । তা, উহাদের নিকটে যাই । উদ্যানের দুয়ার যে ঢাকা রহিয়াছে । হউক, এই দুষ্ট ব্রাহ্মণটাকে সঙ্কেত করি । (এই বলিয়া কতকগুলি ছোট ঢিল ছুড়িল ।)

বিদূষক । ওহে ! প্রাচীরবেষ্টিত কপিত্থফলের উপরে যেমন ঢিল ছোড়ে, সেইরূপ এ কে আমার উপরে এখন ঢিল ছুড়িতেছে ? ।

चारु। आराम-प्रासाद-वेदिकायां क्रीड़द्भिः पारावतैः पातितं भवेत्। [ग]

विदू। दासीए पुत्त! दुट्ठ! पारावअ! चिट्ठ चिट्ठ, जाव एदिणा दण्डकट्ठेण सुपक्कं विअ चूअफलं इमादो पासादादो भूमीए पाडइस्सं। इति दण्डकाष्ठमुद्यम्य धावति। [त]

चारु। यज्ञोपवीते आकृष्य। वयस्य! उपविश। किमनेन। तिष्ठतु दयितासहितस्तपस्वी पारावतः। [थ]

चेटः। कधं पारावदं पेक्खदि, मं ण पेक्खदि। भोदु, अवराए लोट्टगुड़िआए पुणो वि ताड़इस्सं। तथा करोति। [द]

(त) दास्याः पुत्र! दुष्ट! पारावत! तिष्ठ तिष्ठ, यावदेतेन दण्डकाष्ठेन सुपक्कमिव चूतफलम् अस्मात् प्रासादात् भूमौ पातयिष्यामि।

(द) कथं पारावतं प्रेक्षते, मां न प्रेक्षते। भवतु, अपरया लोष्ट-गुटिकया पुनरपि ताड़यिष्यामि।

(ग) चारु इति। आरामस्य उपवनस्य या प्रासादवेदिका अट्टालिकाया उपरि पारावतावस्थानार्थमेव निर्म्मितः स्थानविशेषस्तस्याम्। पातितं लोष्टम्।

(थ) चारु इति। तपस्वी क्षुद्रतया दयायोग्यः।

চারুদত্ত। উদ্যানের অট্টালিকার উপরে যে বেদি রহিয়াছে, তাহাতে খেলা করিবার সময়ে (বোধ হয় পায়রাগুলি এই ঢিল ফেলিয়া দিয়াছে।

বিদূষক। বাঁদীর পো! দুষ্ট পায়রা! থাক্ থাক্, এই লাঠী দিয়া, পাকা আমের মত তোদের এই দালানের উপর হইতে মাটীতে ফেলাইয়া দিব। (এই বলিয়া লাঠী উঠাইয়া দৌড়াইল।)

চারুদত্ত। (যজ্ঞোপবীতে আকর্ষণ করিয়া) বয়স্য! উপবেশন কর। ইহা দিয়া কি হইবে?। ক্ষুদ্র কপোত প্রিয়তমার সহিত (আছে) থাক্।

বিদূ। দিশোঽবলোক্য। কধং কুম্ভীলঅো! তা জাব উবসপ্পামি। উপসৃত্য দ্বারমুদ্ঘাট্য। অরে কুম্ভীলঅ! পবিশ। সাঅদং দে?। [ধ]

চেট:। প্রবিশ্য। অজ্জ! বন্দামি। [ন]

বিদূ। অরে! কহিং তুমং ঈদিসে দুদ্দিণে অন্ধআরে আঅদো?। [প]

চেট:। অলে! এশা শা। [ফ]

বিদূ। কা এসা কা?। [ব]

(ধ) কথং কুম্ভীলক:! তদ্ যাবদুপসর্পামি। অরে কুম্ভীলক! প্রবিশ। স্বাগতং তে?।

(ন) আর্য্য! বন্দে।

(প) অরে! কস্মিন্ ত্বমীদৃশে দুর্দ্দিনে অন্ধকারে আগত:?।

(ফ) অরে! এষা সা।

(ব) কা এষা কা?।

(প) বিদূ ইতি। দুর্দ্দিনে মেঘাচ্ছন্নে দিনে। কস্মিন্ নিমিত্তে।

ভৃত্য। কি আশ্চর্য্য! পায়রা দেখিতেছে আমাকে দেখিতেছে না!। হউক, আর একটি ছোট ঢিল দিয়া আবারও তাড়ন করি।

বিদূষক। (চারিদিক্ চাহিয়া) কুম্ভীলক যে!। তা উহার নিকটে যাই। (নিকটে যাইয়া দ্বার উদ্ঘাটন করিয়া) ওরে কুম্ভীলক! প্রবেশ কর। তোর শুভাগমন ত?।

ভৃত্য। (প্রবেশ করিয়া) আর্য্য প্রণাম করি।

বিদূষক। ওরে! তুই কি জন্য এইরূপ দুর্দ্দিনের অন্ধকারে আসিয়াছিস্?।

ভৃত্য। ও ঠাকুর এই সে।

বিদূষক। কে এই কে?

चेटः । एशा शा । [भ]

विदू । किं दाणिं दासीए पुत्ता ! दुव्भिक्खकाले वुड्ढरङ्को विअ उद्धकं सासाअसि 'एसा सा सा" त्ति ! (म)

चेटः । अले ! तुमं पि दाणिं इन्द-मह-कामुको विअ सुट्ठु किं काकाअसि 'का का' त्ति (य)

(भ) एषा सा ।

(म) किमिदानीं दास्याः पुत्र ! दुर्भिक्षकाले वृद्धरङ्क इव ऊर्द्ध्वकं सासायसे 'एषा सा सा' इति ।

(य) अरे ! त्वमपीदानीमिन्द्रमखकामुक इव सुष्ठु किं काकायसे 'का का' इति ? ।

(म) विदू इति । वृद्धरङ्कः कृपणवृद्धः दीनो वृद्धजन इवेत्यर्थः, ऊर्द्ध्वकम् अत्यन्तम्, 'एसा सा सा' इति एवंरूपेण, सासायसे सासेत्यव्यक्तं शब्दं करोषि । तदानीं ताद्दशवृद्धस्तु क्षुधार्त्ततया सासायते त्वन्तु कथमिति भावः । "रङ्कः कृपणमन्दयोः" इति हेमचन्द्रः ।

(य) चेट इति । इन्द्रमखमिन्द्रयागं तत्र दत्तोपहारमित्यर्थः कामयितुं भोजनायाभिलषितुं शीलमस्येति स तथोक्तः काक इवेति शेषः, सुष्ठु सम्यक्, 'काका' इति एवं रूपेन काकायसे काकेत्यव्यक्तं शब्दं करोषि । काकस्तु इन्द्रमखद्रव्यभक्षणेच्छया काकायते त्वन्तु कथमित्याशयः ।

ভৃত্য। এই সে।

বিদূষক। ওরে দাসীর ছেলে! দুর্ভিক্ষের সময় দরিদ্র বৃদ্ধ লোকের ন্যায় তুই কেন এখন "এসা সা সা" এইরূপ অত্যন্ত 'সাসা' করিতেছিস্ ?।

ভৃত্য। ওরে ঠাকুর! তুমিই বা কেন ইন্দ্রযাগের দ্রব্য কামুক কাকের মত "কাকা" এইরূপ খুব কাকা করিতেছ ?।

বিদূ। তা কহেহি। (র)

চেটঃ। স্বগতম্। ভোদু, এব্বং ভণিস্সং। প্রকাশম্। অলে পণ্হং দে দইস্সং। (ল)

বিদূ। অহং দে মুণ্ডে গোড়ং (১) দইস্সং। (ব)

চেটঃ। অলে! জাণাহি দাব, তিন হি কস্সিং কালে চূআ মোলেন্তি ?। (শ)

বিদূ। অরে দাসীএ পুত্তা! গিম্হে। (ষ)

(র) তৎ কথয়।

(ল) ভবতু, এবং ভণিষ্যামি। অরে! প্রশ্নং তে দাস্যামি।

(ব) অহং তে মুণ্ডে পাদং দাস্যামি।

(শ) অরে! জানীহি তাবৎ, তিন হি কস্মিন্ কালে চূতা মুকুলয়ন্তি ?।

(ষ) অরে দাস্যাঃ পুত্র! গ্রীষ্মে।

(শ) চেট ইতি। চূতা আম্রতরবঃ মুকুলয়ন্তি মুকুলং কুর্ব্বন্তি মুকুলং ধারয়ন্তীত্যর্থঃ।

(ষ) বিদূ ইতি। চূততরীমুকুলধারণকালে আতপতাপসাধর্ম্ম্যাৎ গ্রীষ্ম ইত্যুক্তম্।

বিদূষক। তা বল্!

ভৃত্য। (স্বগত) হউক, এই ভাবে বলিব। (প্রকাশ্যে) ওরে তোমার নিকট একটা প্রশ্ন দিব।

বিদূষক। আমিও তোর মাথায় পা দিব।

ভৃত্য। ঠাকুর! বোঝ দেখি, তা কোন কালে আমগাছ বৌল ধরে ?।

---

(১) গোড্ডং।

চেটঃ। সহাসম্। অলে! ণহি ণহি। (স)

বিদূ। স্বগতম্। কিং দাণিং এত্থ কহিস্সং ?। বিচিন্ত্য। ভোদু, চারুদত্তং গদুঅ পুচ্ছিস্সং। প্রকাশম্। অরে! মুহুত্তঅং চিট্ঠ। চারুদত্তমুপসৃত্য। ভো বঅস্স! পুচ্ছিস্সং দাব, কস্সিং কালে চূআ মোলেন্তি ?। (হ)

চারু। মূর্খ! বসন্তে।

বিদূ। চেটমুপগম্য। মুক্খ। বসন্তে। (ঘ)

চেটঃ। দুদিঅং দে পণ্হং দইস্সং। সুসমিদ্ধাণং গামাণং কা লক্খঅং কলেদি ?। (ক)

(স) অরে! নহি নহি।

(হ) কিমিদানীমত্র কথয়িষ্যামি ?। ভবতু, চারুদত্তং গত্বা প্রক্ষ্যামি। অরে মুহূর্ত্তকং তিষ্ঠ। ভো বয়স্য! প্রক্ষ্যামি তাবৎ,—কস্মিন্‌কালে চূতা মুকুলয়ন্তি ?।

(ঘ) মূর্খ! বসন্তে।

(ক) দ্বিতীয়ং তে প্রশ্নং দাস্যামি। সুসমৃদ্ধানাং গ্রামাণাং কা রক্ষাং করোতি ?।

বিদূষক। ওরে দাসীর ছেলে! গ্রীষ্মকালে।

ভৃত্য। (হাস্যের সহিত) ওরে ঠাকুর! না না।

বিদূষক। (স্বগত) এখন এ বিষয় কি বলিব ?। (চিন্তা করিয়া) হউক, যাইয়া চারুদত্তকে জিজ্ঞাসা করি। (প্রকাশ্যে) ওরে! একটু কাল থাক্। (চারুদত্তের নিকটে যাইয়া) বয়স্য! জিজ্ঞাসা করি, কোন্ কালে আমগাছ বোল ধরে ?।

চারুদত্ত। মূর্খ! বসন্তে।

বিদূষক। (ভৃত্যের নিকট যাইয়া) মূর্খ! বসন্তে।

विदू। अरे रच्छा। (ख)

चेटः। सहासम्। अले! णहि णहि। (ग)

विदू। भोदू, संसए पड़िदम्हि। विचिन्त्य। भोदु, चारुदत्तं पुणो वि पुच्छिस्सं। पुनर्निवृत्य चारुदत्तं तथैवोदाहरति। (घ)

चारु। वयस्य! सेना।

विदू। चेटमुपगम्य। अरे दासीए पुत्ता! सेणा। (ङ)

(ख) अरे! रथ्या।

(ग) अरे! नहि नहि।

(घ) भवतु, संशये पतितोऽस्मि। भवतु, चारुदत्तं पुनरपि प्रक्ष्यामि।

(ङ) अरे दास्याः पुत्र! सेना।

(ख) विदू इति। रथ्याया अभावे गमनागमनाद्यसम्भवेन लोकानां क्रमेण ध्वंसप्राप्तेः ग्रामाणामेव ध्वंससम्भवादित्याशयः।

(घ) विदू इति। तथैवोदाहरति—'वअस्स! सुसमिद्धाणं गामाणं का रक्खां करेदि' इत्यं पृच्छतीत्यर्थः।

भृত্য। তোমার নিকট আর একটি প্রশ্ন দিব। কে সুসমৃদ্ধ গ্রাম গুলিকে রক্ষা করে?।

বিদূষক। ওরে! রাস্তা।

ভৃত্য। (হাস্যের সহিত) ওরে ঠাকুর! না না।

বিদূষক। হউক, সন্দেহের মধ্যে পড়িয়াছি। (চিন্তা করিয়া) হউক আবারও, চারুদত্তকে জিজ্ঞাসা করিব। (পুনরায় যাইয়া, সেই ভাবেই চারুদত্তের নিকট উল্লেখ করিল।)

চারুদত্ত। সখে!—সেনা।

चेटः। अले! दुवे वि एक्कश्शिं कदुअ शिग्घं भणाहि। (च)

विदू। सेणावसन्ते। (छ)

चेटः। णं पलिवत्तिअ भणाहि। (ज)

विदू। (कायेन परिवृत्य) सेणावसन्ते। (झ)

चेटः। अले मुक्खवडुका! पदाइं पलिवत्तावेहि। (ञ)

(च) अरे! द्वे अपि एकस्मिन् कृत्वा शीघ्रं भण।

(छ) सेनावसन्ते।

(ज) ननु परिवर्त्त्य भण।

(झ) सेनावसन्ते।

(ञ) अरे मूर्खवटुक! पदे परिवर्त्तय।

(च) चेट इति। द्वे अपि वसन्त इति सेनेति च पृथक् पृथगुच्चारित पदद्वयमपि।

(छ) विदू इति। आसत्तिक्रमेणैव सेनापदं पूर्व्वमुपात्तम्।

(ज) चेट इति। परिवर्त्त्य 'सेणावसन्ते' इति पदद्वयस्य यादृशः क्रमः कृतस्तद्विपरीतं क्रमं कृत्वा आदौ वसन्तपदं पश्चाच्च सेनापदं विन्यस्येत्यर्थः।

(झ) विदू इति। विदूषकेण तु 'परिवर्त्त्य' इति चेटोक्तेः कायमिति कर्म्मपदं मनसि कृत्वा कायपरिवर्त्तनं कृतमिति बोध्यम्।

বিদূষক। (ভৃত্যের নিকট যাইয়া) ওরে দাসীর ছেলে! সেনা।

ভৃত্য। ঠাকুর! দুইটা পদকেই একত্র করিয়া শীঘ্র বল।

বিদূষক। সেনাবসন্ত।

ভৃত্য। ওরে ফিরাইয়া বল।

বিদূষক। (দেহ ফিরাইয়া) সেনাবসন্ত।

विदू । पादौ परिवर्त्य । सेणावसन्ते । (ट)

चेटः । अले मुक्ख ! अक्खलपदाइं पलिवत्ताविहि ।(ठ)

विदू । विचिन्त्य । वसन्तसेणा । [ड]

(ट) सेनावसन्ते ।

(ठ) अरे मूर्ख ! अक्षरपदे परिवर्त्तय ।

(ड) वसन्तसेना ।

(ञ) चेट इति । पदे परिवर्त्तय—'सेनावसन्ते' इति पदद्वयं विन्यस्तविपरीतं कृत्वा उच्चारय इत्याशयः ।

(ट) विदू इति । पादौ चरणौ, परिवर्त्य विन्यस्तविपरीतौ कृत्वा । एतत्तु 'पदाइं' इति चेटोक्तः 'पादौ' इत्यर्थमवधार्य्य विदूषकेण कृतमित्यवधेयम् ।

(ठ) चेट इति अक्षरपदे 'सेणावसन्ते' इति वर्णघटितपदद्वयम् । यथा हैमः—"पदं स्थाने विभक्त्यन्ते शब्दे वाक्यैकवस्तुनोः । त्राणे पादे पादचिह्ने व्यवसायापदेशयोः ॥"

(ड) विदू इति । विचिन्त्य तादृशाक्षरपदपरिवर्त्तने 'वसन्तसेणा' इत्येव शब्दः स्यात् ; तथा सति च 'वसन्तकाले सेना सैन्यम्' इत्यर्थस्यैव सम्भवात् ईदृशे काले वसन्तसेनाभृत्यस्य ईदृशोक्तिरसम्बद्धैव स्यात् अतो वसन्तसेनानाम्नो वेश्यैवेयम् इति विभाव्येत्यर्थः । अतएव 'वसन्ते' इति प्राक् पठितेऽपि तदन्तगतां विभक्तिं विहाय उच्चारयति 'वसन्तसेणा' इति ।

ভৃত্য । ওরে ! মূর্খ বামুণ ! পদদ্বয় পরিবর্ত্তিত কর ।

বিদূষক । (চরণদ্বয় পরিবর্ত্তিত করিয়া) সেনাবসন্ত ।

ভৃত্য । ওরে মূর্খ ! অক্ষরঘটিত পদদ্বয় পরিবর্ত্তিত কর ।

বিদূষক । (চিন্তা করিয়া) বসন্তসেনা ! ।

चेटः । एशा शा आअदा । (ढ)

विदू । ता जाव चारुदत्तस्स णिवेदेमि । उपसृत्य । भो चारुदत्त धणिओ दे आअदो । (ण)

चारु । कुतोऽस्मत्कुले धनिकः ? । (त)

विदू । जइ कुले णत्थि, ता दुआरे अत्थि । एसा वसन्तसेणा आअदा । (थ)

चारु । वयस्य ! किं मां प्रतारयसि ? । (द)

(ढ) एषा सा आगता ।

(ण) तद् यावत् चारुदत्तस्य निवेदयामि । भो चारुदत्त ! धनिकस्ते आगतः ।

(थ) यदि कुले नास्ति, तद् द्वारे अस्ति । एषा वसन्तसेना आगता ।

अहो ! परमवर्वरं विदूषकं नितान्तनीचं वेश्याभृत्यञ्च पुरस्कृत्य सर्वथा, सम्भवपरम् ईदृशव्यापारकलापं निवध्नता कविना महत् कौतुकमाविष्कृतं श्रोतॄणाम् ।

(ण) विदू इति । धनिको धनी उत्तमर्ण इत्यर्थः ।

(त) चारु इति । अस्मत्कुले कोऽपि धनिको नास्तीत्याशयः ।

(द) चारु इति । ईदृशे दुर्दिने तस्या आगमनासम्भवात्तवेयमुक्तिः प्रतारणापरैवेति भावः ।

ভৃত্য। এই তিনি আসিয়াছেন।

বিদূষক। তা চারুদত্তের নিকট জানাই। (নিকটে যাইয়া) চারুদত্ত ! তোমার মহাজন আসিয়াছেন।

চারুদত্ত। আমাদের বংশে মহাজন কোথায় ?।

বিদূষক। যদিও বংশে নাই, তথাপি দুয়ারে আছে। এই যে বসন্তসেনা আসিয়াছে।

विदू । जइ मे वअणं ण पत्तिआअसि, ता एदं कुम्भीलअं पुच्छ । अरे दासीए पुत्ता ! कुम्भीलअ ! उवसप्प । (ध)

चेटः । उपसृत्य । अज्ज ! वन्दामि । (न)

चारु । भद्र ! स्वागतम् ? । कथय —सत्यं प्राप्ता वसन्तसेना ? ।

चेटः । एसा सा आअदा वसन्तसेणा । (प)

चारु । सहर्षम् । भद्र ! न कदाचित् प्रियवचनं निष्फलीकृतं मया । तद्गृह्यतां पारितोषिकम् । इत्युत्तरीयं प्रयच्छति ।

(ध) यदि मे वचनं न प्रत्ययसे, तत् एतत् कुम्भीलकं पृच्छ । अरे दास्याः पुत्र ! कुम्भीलक ! उपसर्प ।

(न) आर्य्य ! वन्दे ।

(प) एषा सा आगता वसन्तसेना ।

(ध) विदू इति । प्रत्ययसे विश्वसिषि । अयधातुरयमात्मनेपदी ।

চারুদত্ত। সখে আমাকে প্রতারণা করিতেছ কেন ? ।

বিদূষক। যদি আমার বাক্যে বিশ্বাস না কর, তবে এই কুম্ভীলককে জিজ্ঞাসা কর। ওরে দাসীর ছেলে ! কুম্ভীলক ! নিকটে আয়।

ভৃত্য। (নিকটে যাইয়া) আর্য্য প্রণাম করি।

চারুদত্ত। ভদ্র ! তোমার শুভাগমন ত ? । বল— সত্যই কি বসন্তসেনা আসিয়াছেন ? ।

ভৃত্য। এই সেই বসন্তসেনা আসিয়াছেন।

চারুদত্ত। (আনন্দের সহিত) ভদ্র ! আমি কখনও প্রিয়বাক্য নিষ্ফল করি নাই। তা পারিতোষিক গ্রহণ কর। (এই বলিয়া উত্তরীয় বস্ত্র দান করিলেন।)

चेटः। गृहीत्वा प्रणम्य सपरितोषम्। जाव अज्जआए णिवेदेमि।
इति निष्क्रान्तः। (फ)

विदू। भो! अवि जाणासि — किं णिमित्तं ईदिसे दुद्दिणे आअदेत्ति?। (ब)

चारु। वयस्य! न सम्यगवधारयामि।

विदू। मए जाणिदं। अप्पमुल्ला रअणावली, बहुमुल्लं सुवस्सभण्डअं त्ति ण परितुट्ठा अवरं मग्गिदुं आअदा। (भ)

चारु। स्वगतम्। परितुष्टा यास्यति।

(फ) यावदार्य्यायै निवेदयामि।

(ब) भोः! अपि जानासि? किं निमित्तमोदृशे दुर्द्दिने आगतेति।

(भ) मया ज्ञातम्। अल्पमूल्या रत्नावली, बहुमूल्यं सुवर्णभाण्डकम् इति न परितुष्टा अपरं मार्गयितुमागता।

(भ) विदू इति रत्नावली भवता या दत्ता। सुवर्णभाण्डकं वसन्तसेनया न्यासीकृतः स्वर्णालङ्कारः।

ভৃত্য। (গ্রহণপূর্ব্বক প্রণাম করিয়া সন্তোষের সহিত) আর্য্যার নিকট জানাই। (ইহা বলিয়া চলিয়া গেল।)

বিদূষক। ওহে! বুঝিতে পারিয়াছ কি? এইরূপ দুর্দ্দিনে আসিয়াছে কেন।

চারুদত্ত। সখে! ঠিক বুঝিতে পারি নাই।

বিদূষক। আমি বুঝিয়াছি; রত্নমালার মূল্য অল্প, সোনার অলঙ্কারের মূল্য বেশী; এইজন্য সন্তুষ্ট না হইয়া আর কিছু চাহিতে আসিয়াছে।

চারুদত্ত। (স্বগত) সন্তুষ্ট হইয়া যাইবে।

ততঃ প্রবিশতি উজ্জ্বলাভিসারিকাবেশেন বসন্তসেনা সোৎকণ্ঠা, ছত্রধারিণী, বিটশ্চ। (ন)

বিটঃ। বসন্তসেনামুদ্দিশ্য।

অপদ্মা শ্রীরেষা, প্রহরণমনঙ্গস্য ললিতং,
কুলস্ত্রীণাং শোকো, মদনবরবৃক্ষস্য কুসুমম্।
সলীলং গচ্ছন্তী রতিসময়লজ্জাপ্রণয়িনী
রতিক্ষেত্রে রঙ্গে প্রিয়পথিকসার্থৈরনুগতা ॥১২॥

(ন) তত ইতি সোৎকণ্ঠা চারুদত্তনিমিত্তমুৎকণ্ঠিতা। বৃষ্টিনিবারণায় বসন্তসেনায়া উপরি ছত্রং ধারয়তীতি সা তাদৃশী কাচিৎ দাসী। বিটশ্চ প্রাগুক্তলক্ষণো বসন্তসেনায়া এব কশ্চিৎ সহচরঃ।

অপদ্মেতি। রতিশ্চারুদত্তং প্রতি অনুরাগঃ, সময়োঽভিসরণনিয়মো, গুপ্তপ্রস্থানাদিঃ লজ্জা চ তাসাং প্রণয়িনী তাভিবিশিষ্টেত্যর্থঃ। এতেন ধনলোভরাহিত্যাদিসূচনাৎ বেশ্যাস্বস্থা মহানুৎকর্ষো ব্যজ্যতে। প্রিয়পথিকাঃ স্বপ্রমতয়ো দয়িতপান্থা এব সার্থাঃ সঙ্গিনস্তৈঃ, অনুগতা অনুসৃতা। অনেন পথি দুর্জনধর্ষণাভীতিমত্ত্বমপি সূচিতম্। তথা রঙ্গে রঙ্গালয় ইব আমোদকরে, রতিক্ষেত্রে সঙ্কেতস্থানে, সলীলং গচ্ছন্তী। অমুনা চ মনোহরত্বং ব্যজ্যতে। এষা বসন্তসেনা, অপদ্মা নিত্যসন্নিহিতপদ্মরহিতা, শ্রীর্লক্ষ্মীস্বরূপা, অলৌকিকরূপলাবণ্যাদিমত্ত্বাদিতি ভাবঃ; ললিতং কোমলম্, অনঙ্গস্য কামদেবস্য, প্রহরণমস্ত্রম্ অস্ত্রস্বরূপা, অঙ্গবিদারণাকর-

তদনন্তর উজ্জ্বল অভিসারিকাবেশে উৎকণ্ঠিতা বসন্তসেনা, ছত্রধারিণী ও বিটের প্রবেশ।

বিট। (বসন্তসেনাকে উদ্দেশ করিয়া) পদ্মবিহীন লক্ষ্মী, কামদেবের কোমল অস্ত্র, কুলবধূগণের শোকজনক এবং উৎকৃষ্ট কামতরুর পুষ্প এই এই বসন্তসেনা, রঙ্গালয়ের ন্যায় সঙ্কেত স্থানে লীলার সহিত যাইতেছেন;

वसन्तसेने ! पश्य पश्य ।

गर्जन्ति शैलशिखरेषु विलम्बिविम्बा
मेघा वियुक्तवनिताहृदयानुकाराः ।
येषां रवेण सहसोत्पतितैर्मयूरैः
खं वोज्यते मणिमयैरिव तालवृन्तैः ॥१३॥

णात् अथ च लचास्य विजयसाधनादित्याशयः ; कुलस्त्रीणां शोकः शोकजनिका, ताभिरप्राप्यरूपलावण्यादिलाभादित्यभिप्रायः ; तथा मदनः काम एव वरः श्रेष्ठो वृक्षस्तस्य कुसुमं कुसुमस्वरूपा, तत्सम्बन्धेऽपि चरमशोभनीयतालाभादिति भावः ।

अत्र अपद्मा पद्माभिन्नापि श्रीरिति विरोधः पद्मरहितेति च तत्समाधान-मिति विरोधाभासः अधिकारूढवैशिष्ट्यरूपकञ्च त्यनयोः प्रथमे वाक्ये एकाश्रयानु-प्रवेशरूपः सङ्करः, द्वितीये केवलमधिकारूढवैशिष्ट्यं रूपकम् तृतीये शोक शोक-जनकयोरभेदेनाभिधानात् हेतुर्नामालङ्कारः, चतुर्थ अश्लिष्टशब्दनिबन्धनं केवलपरम्परितरूपकम्, इत्येतेषां परस्परनिरपेक्षतया पुनः संसृष्टिः । संसृष्टि-सङ्करयोरपि पुनः संसृष्टिसङ्करौ सम्भवत इति दर्शितमस्माभिः साहित्यदर्पणटीकायां तत्प्रकरणे ।

शिखरिणी वृत्तम् — "रसै रुद्रैश्छिन्ना य-म-न-स भ-ला-गः शिखरिणी" इति लक्षणात् ॥१२॥

गर्जन्तीति शैलशिखरेषु, पर्व्वतशृङ्गेषु विलम्बीनि जलभारेण लम्बमानानि बिम्बानि मण्डलानि येषां ते, तथा वियुक्तानां पतिविरहितानां वनितानां हृदयमनुकुर्व्वन्तीति ते जलपूर्णत्वात् विरहदुःखाच्च मलिना इति भावः, मेघा गर्जन्ति । येषां मेघानाम्,

ইহাঁর অনুরাগ, অভিসারের নিয়ম ও লজ্জা এই সকলই আছে এবং আমরা প্রিয়পথিকগণ সঙ্গী হইয়া, ইহাঁর পশ্চাৎ পশ্চাৎ যাইতেছি ॥১২॥

বসন্তসেনা! দেখ দেখ—

বিরহিণী রমণীগণের হৃদয়ের অনুকরণকারী মেঘসমূহ, পর্ব্বতশৃঙ্গে

अपि च ।

पङ्क-क्लिन्नमुखाः पिबन्ति सलिलं धाराहता दर्दुराः,
कण्ठं मुञ्चति बर्हिणः समदनो, नीपः प्रदीपायते ।
सन्न्यासः कुलदूषणैरिव जनैर्मेघैर्वृतश्चन्द्रमाः,
विद्युन्नीचकुलोद्गतेव युवतिर्नैकत्र सन्तिष्ठते ॥१४॥

रवेण गर्जनेन, सहसा उत्पतितैरुड्डीनैः मयूरैः कलाभिः, मणिमयैः तदन्मयूरपक्षाणां विचित्रत्वादिति भावः, तालवृन्तैर्व्यजनैरिव, खमाकाशम्, वीज्यते वातेन शीतलीक्रियते ।

अत्र विलम्बिबिम्बा इति व्यञ्जनसङ्घस्य अनेकधा सकृत्साम्यात् छेकानुप्रासः, द्वितीये पादे आर्थी उपमा, चतुर्थे च श्रौती उपमा ; इत्येतेषां मिथो निरपेक्षतया संसृष्टिः ।

हृदयानुकारा इति कर्म्मण्यण् । वसन्ततिलका वृत्तम् ॥१३॥

पङ्केति । पङ्कैः वृष्टिपातवेगेनोत्थितैस्तरलकर्द्दमैः क्लिन्नानि अक्तानि मुखानि वक्त्राणि येषां ते, तथा धाराभिर्वृष्टिजलासारैः आहतास्ताड़िताः, दर्दुरा भेकाः सलिलं वृष्टिजलं पिबन्ति । समदनो मेघागमादेव कामावेगविशिष्टः, बर्हिणो मयूरः, कण्ठं स्वरम्, मुञ्चति मेघागमेनानन्दोदयादेव करोतीत्यर्थः । नीपः कदम्बतरुः, प्रदीपायते खद्योतावलीविलसनात् प्रदीपवदाचरति । कुलदूषणैः आत्मपातित्यादिना कुलस्य दोषजनकैर्जनैः, सन्न्यासः प्रव्रज्याधर्म्म इव, मेघैश्चन्द्रमाः, वृत एकत्र आच्छादितः

অন্বিত হইয়া গর্জন করিতেছে ; যাহাদের রবে ময়ূরগণ, তৎক্ষণাৎ উড্ডীন হইয়া, মণিময় তালবৃন্ত দ্বারাই যেন আকাশকে ব্যজন করিতেছে ॥১৩॥

আর, কর্দ্দম-লিপ্ত-মুখ ও বৃষ্টিধারায় আহত ভেকগণ, বৃষ্টির জল পান করিতেছে ; কামার্ত্ত ময়ূরগণ রব করিতেছে ; কদম্ববৃক্ষ প্রদীপের ন্যায় আচরণ করিতেছে, বংশের দোষ জনক যেমন সন্ন্যাসধর্ম্মকে কলঙ্কিত

वस । भाव ! सुट्ठु दे भणिदं । (य) एषा हि—

मूढ़े ! निरन्तरपयोधरया मयैव
कान्तः सहाभिरमते यदि किं तवात्र ।
मां गर्जितैरिति मुहुर्विनिवारयन्ती
मार्गं रुणद्धि कुपितेव निशा सपत्नी ॥१५॥

(य) भाव ! सुष्ठु ते भणितम् ।

अन्यत्र कलङ्कितः । तथा च दुर्जना ब्रह्महत्यादिमहापातकानुष्ठानेनात्मनः पातित्यं विदधति, यदा तु स्ववंशजास्तैः सह न व्यवहरन्ति तदा ते कुलाद्बहिर्भूय सन्नाम-माश्रित्य तं कलुषीकुर्वन्तीति भावः । तथा नीचकुलोद्गता युवतिरिव, विद्युत् एकत्र पुरुषे स्थाने च, न सन्तिष्ठते नानापुरुषं नानास्थानञ्च गच्छतीत्यर्थः ।

अत्र द्वितीये पादे क्यङ्गतोपमा, परयोस्तु श्रौतोपमाद्वयमित्येषामपि पूर्ववत् संसृष्टिः ।

"भेकै मण्डूकवर्षाभूशालूरप्लवदर्दुराः" "मयूरो बर्हिणो बर्ही" इति च अमरः । 'कण्ठो गले सन्निधाने ध्वनौ मदनपादपे" इति विश्वः ।

शार्दूलविक्रीड़ितं वृत्तम् ॥१४॥

(य) वस इति । सुष्ठु सम्यक् । भणितमिति भावे क्तः । अतएव ते इत कर्त्तरि षष्ठी ।

मूढ़े इति । हे मूढ़े ! परसुखदुःखानभिज्ञे ! वसन्तसेने ! निरन्तरा वायुवेगात् घनीभूताः पयोधरा मेघा यस्यां तया, अन्यत्र तु निरन्तरौ पीवरत्वात् घनीभूतौ पयो-

করে, মেঘসমূহও সেইরূপ চন্দ্রকে আবৃত করিয়াছে এবং নীচবংশোৎপন্ন যুবতির ন্যায় বিদ্যুৎ একত্র থাকিতেছে না ॥১৪॥

বসন্তসেনা। পণ্ডিত ! আপনি ভাল বলিয়াছেন। কারণ—

হে বিবেচনাবিহীন বসন্তসেনে ! ঘনপয়োধরা আমার সঙ্গে প্রিয়তম চারুদত্ত যদি রমণ করেন, তবে ইহাতে তোমার অনিষ্ট কি ? এই কথা

विटः। भवतु एवं तावत्, उपालभ्यतां तावदियम्। (र)

वस। भाव! किमनया स्त्री-स्वभाव-दुर्विदग्धया उपालब्धया। पश्यतु भावः। (ल)

धरौ स्तनौ यस्यास्तया, मयैव सह, कान्तः पति यदि अभिरमते, तदा अत्र रमणविषये, तव किम् अनिष्टम्? अपि तु किमपि नेत्यर्थः, सपत्नीत्वेन उभयोरेव समानाधिकारादिति भावः। इति एवम्भूतैः, गर्जितैर्मेघगर्जनैः दर्पोद्धतवाक्यैश्च, मुहुर्वारं वारम्, मां वसन्तसेनाम्, विनिवारयन्ती कुपिता सपत्नीव, एषा निशा इयं रात्रिः, मार्गं चारुदत्तान्तिके मम गमनपथम्, रुणद्धि अन्धकारावरणेन कपाटरोधादिना च प्रतिबध्नातीव। अतो मेघकर्त्तृकावरणविषये यदभणितं तत् सुष्ठु एवेति भावः।

अत्र श्रौती उपमा, प्रतीयमाना भावाभिमानिनी क्रियोत्प्रेक्षा च अनयोरेकाश्रयानुप्रवेशरूपः सङ्करः।

"स्त्रीस्तनाब्दौ पयोधरौ" इत्यमरः। वसन्ततिलका वृत्तम् ॥१५॥

(र) विट इति। एवमनेन प्रकारेण, भवतु निशाकर्त्तृकस्तव मार्गरोध इति शेषः, त्वयापि इयं निशा, उपालभ्यताम् निन्द्यताम्। सपत्नीनां परस्परमेवं व्यवहारस्तु, जगति चलत्येवेति भावः। खलुशब्दवत् तावच्छब्दद्वयं वाक्यालङ्कारे सोत्प्रासोक्तिरियम्।

(ल) वस इति। हे भावः! विद्वन्! स्त्रीस्वभावेन दुर्विदग्धया असम्भवविषयप्रार्थनाकारिण्येत्यर्थः, उपालब्धया निन्दितया, अनया निशया, किं फलमिति

বলিয়াই যেন এই রাত্রি, কুপিত সপত্নীর ন্যায় গর্জন দ্বারা আমাকে বারংবার নিবারণ করতঃ, আমার গমনের পথ রোধ করিতেছে ॥১৫॥

বিট। হউক এরকম; তুমিও ইহাকে (রাত্রিকে) নিন্দা কর।

বসন্তসেনা। পণ্ডিত! স্ত্রীস্বভাববশতঃ আবদারকারিণী এই রাত্রিকে নিন্দা করিয়া কি ফল হইবে? আপনি দেখুন—

मेघा वर्षन्तु गर्जन्तु मुञ्चन्त्वशनिमेव वा ।
गणयन्ति न शीतोष्णं रमणाभिमुखाः स्त्रियः ॥१६॥

विटः । वसन्तसेने ! पश्य पश्य । अयमपरः—

पवन-चपल-वेगः स्थूलधारा- शरौघः
स्तनित-पटह-नादः स्पष्ट-विद्युत्-पताकः ।

शेष: । ननु उपालम्भस्याप्यकरणे मार्गरोधानिवृत्तस्तव कान्तान्तिके गमनमसम्भवमेवेत्याह पश्यन्तीति । मम निश्चयमवगच्छत्वित्यर्थः ।

कोऽसौ निश्चय इत्याह मेघा इति । मेघा गर्जन्तु, वर्षन्तु; वा अथवा, अशनिं वज्रमेव, मुञ्चन्तु क्षिपन्तु । तथापि रमणाभिमुखा रतिवल्लोरन्तिक-गामिन्यः स्त्रियः, शीतोष्णं वर्षणकृतं शीतम् अशनिमोचनकृतमुष्णं वा न गणयन्ति स्वकार्य्यबाधकत्वेन अवधारयन्ति अपि तु तत्तद्बाधाशतमतिक्रम्यैव स्वकार्य्यं साधयन्तीत्यर्थः । सुतरामहमपि एतद्बाधाशतमतिक्रम्य तव गच्छाम्येवेति भावः ।

अत्र पूर्वार्द्धे अनेकक्रियाणामेककर्त्तृकारकत्वाद्दीपकमलङ्कारः, द्वितीयार्द्धे तु अप्रस्तुतस्त्रीसामान्यात् प्रस्तुतवसन्तसेनारूपस्त्रीविशेषप्रतीतेरप्रस्तुतप्रशंसा, अनयोःपरस्पर-निरपेक्षतया संसृष्टिः ।

मार्गो नाम गर्भसन्धेरङ्गम्— "तत्त्वार्थकथनं मार्गः" इति दर्पणलक्षणात् ।

शीतेन युक्तं उष्णं इति शीतोष्णः शाकपार्थिवादित्वान्मध्यपदलोपिसमासाश्रयणेन शीतोष्णमित्येकवचनोपपत्तिः ॥१६॥

पवनेति । पवनेन वायुना चपलवेगो द्रुतवेगो यस्य सः, पवन इव चपल-

মেঘ বর্ষা করুক, গর্জন করুক কিম্বা বজ্রপাতই করুক; তথাপি পতির প্রতি ধাবিত স্ত্রীলোক, সে শীত বা উষ্ণ গ্রাহ্য করে না ॥১৬॥

हरति करसमूहं खे शशाङ्कस्य मेघो
नृप इव पुरमध्ये मन्दवीर्य्यस्य शत्रोः ॥१७॥

वस । एव्वं णेदं । ता कधं एसो अवरा—(व)

(व) एवमेतत् । तत् कथमेषः अपरः ।

वेगो यस्य स च; स्थूलाधारा वृष्टिधारा शरौघ इव यस्य सः, स्थूलधारेव शरौघो यस्य स च; स्तनितं गर्जितं पटहनादो जयढक्काशब्द इव यस्य सः, स्तनितमिव पटहनादो यस्य स च; तथा स्पष्टा सर्व्वैर्दृश्यमाना विद्युत् पताकेव यस्य सः स्पष्टा विद्युदिव पताका यस्य स च, अयमपरो मेघः, पुरमध्ये शत्रोरिव वाटीमध्ये-मन्दवीर्य्यस्य अल्पीकृतबलस्य, शत्रोः शत्रुनृपस्य, नृपो विजयी राजेव, खे आकाशे मन्दवीर्य्यस्य अल्पतेजसः, शशाङ्कस्य चन्द्रस्य करसमूहं किरणनिकरं राजग्राह्यधनराशिञ्च, हरति आवृणोति बलेन गृह्णाति च ।

अत्र नृप इवेत्युपमासाहचर्य्यात् पूर्व्वविशेषणेष्वपि उक्तविधोपमितसमासस्यैवाश्रयणात् पूर्णोपमालङ्कार एव, नतु रूपकम् न वा उपमारूपकयोः सन्देहसङ्कर इति ध्येयम् ।

मालिनी वृत्तम् ॥१७॥

বিট। বসন্তসেনা! দেখ দেখ—

এই আর একখানা মেঘের বায়ুকর্ত্তৃক গুরুতর বেগ উৎপন্ন হইয়াছে (রাজার পক্ষে বায়ুর ন্যায় দ্রুতবেগবান্—), বাণসমূহের ন্যায় স্থূল বৃষ্টির ধারা পতিত হইতেছে, ঢাকের শব্দের ন্যায় গর্জ্জন চলিতেছে এবং পতাকার ন্যায় বিদ্যুৎ প্রকাশ পাইতেছে। সুতরাং কোন প্রবল রাজা যেমন শত্রুর বাড়ীর ভিতরে (প্রবেশ করিয়া) সেই দুর্ব্বল শত্রুর নিকট হইতে কর (খাজনা) সমূহ গ্রহণ করেন, সেইরূপ এই মেঘ, আকাশে অল্পতেজ চন্দ্রের কিরণসমূহ হরণ (আবরণ) করিতেছে ॥১৭॥

एतैरेव यदा गजेन्द्रमलिनैराध्मातलम्बोदरैः
गर्जद्भिः सतड़िद्वलाकशवलैर्मेघैः सशल्यं मनः ।
तत् किं प्रोषित-भर्त्तृ-वध्य-पटहो हाहा हताशो वकः
प्रावृट् प्रावृड़िति व्रवीति शठधीः चारं चते प्रक्षिपन् ॥१८॥

एतैरिति । गजेन्द्रवत् मलिनैर्नीलवर्णैः, आध्मातानि जलपूर्णतया स्फीतानि लम्बानि लम्बितानि च उदराणि अभ्यन्तरदेशा येषां तैः, गर्जद्भिः, तड़िद्भिर्विद्युद्भिः वलाकाभिर्वकपक्षिश्रेणीभिश्च सह विद्यमाना इति सतड़िद्वलाका अतएव च शवला विचित्रवर्णा स्तैस्तादृशैः, एवैरेव मेघैः, यदा यस्मिन् काले, मनः प्रोषितभर्त्तृकाणामिव चित्तम्, सशल्यं दारुणवियोगवेदनोदयात् शल्यविद्धमिव भवतीत्यर्थः। तत्तस्मिन्नेव काले, प्रोषिता विदेशवासिनी भार्य्या विरहिण इत्यर्थः भर्त्तारः पतय एव वध्या दुःसह-विरहवेदनया वधयोग्या जना स्तेषु पटहः प्रचारणढक्कास्वरूपः, वध्यहृदयविदारकशब्द-कारित्वादिति भावः; हता जलहङ्क्षा नाशिता आशा चञ्चुद्वारा मत्स्यधारणलालसा यस्य सः, अतएव शठा दुरभिसन्धिशालिनी धीर्बुद्धिर्यस्य सः वकः पक्षी, चते चतस्थाने चारं लवणम्, प्रक्षिपन् संयोजयन् चतस्थाने चारं प्रक्षिपन्निव भूयो वेदना कुर्व्वन् सन्नित्यर्थः, हा हा दारुणखेदे, किं कस्मात्, 'प्रावृट् प्रावृट्' इति व्रवीति इत्यमिव रौति। चतस्थाने पूर्व्वत एव वेदना प्रवृत्ता तत्र च पुनः चारक्षेपे यथा सा वेदना दुःसहैव जायते, तथा प्रोषितभर्त्तारः स्वत एव विरहवेदनया दूनाः, तत्र च पुनः प्रावृड़ागमनं दुःसहवेदनाकरमेवेति तत्कारको वकः शठधीरेवेति भावः ।

বসন্তসেনা। ইহা এইরূপই বটে।

যাহার বর্ণ, গজেন্দ্রের ন্যায় মলিন, যাহার অভ্যন্তরদেশ জল-ভারে পূর্ণ এবং লম্বিত হইয়াছে এবং বিদ্যুৎ ও বকশ্রেণী সংযুক্ত থাকায় যাহাকে বিচিত্র দেখা যাইতেছে, গর্জনকারী এই সেই সকল মেঘদ্বারাই যখন বিরহীদিগের হৃদয় শল্যবিদ্ধের ন্যায় হইতেছে, হায়! হায়! সেই সময়েই বিরহীদিগের বধ্য-পটহস্বরূপ, দুষ্টবুদ্ধি ও হতাশ

विटः। वसन्तसेने! एवमेतत्। इदमपरं पश्य—

बलाका-पाण्डुरोष्णीषं विद्युदुत्क्षिप्तचामरम्।
मत्त-वारण-सारूप्यं कर्त्तुकाममिवाम्बरम् ॥१९॥

अत्र प्रथमे पादे लुप्तोपमा द्वितीये सशल्यमित्यत्र प्रतीयमाना गुणोत्प्रेक्षा, तृतीये अश्लिष्टशब्दनिबन्धनं परम्परितरूपकम्, चतुर्थे बकरवमात्रस्य 'प्रावृट्' इत्यं सम्भावना-करणात् इवाद्यभावाच्च प्रतीयमाना गुणोत्प्रेक्षा, तथा क्षते बककर्त्तृकक्षारप्रक्षेपाभावात् वस्तुसम्बन्धासम्भवेन 'क्षते क्षारं प्रक्षिपन्निव' इति सादृश्याक्षेपात् असम्भवद्वस्तुसम्बन्धरूपा निदर्शना, इत्येतेषां परस्परनिरपेक्षतया संसृष्टिः। तथा तृतीयपादे तदिति तच्छब्द-स्यैदित्यर्थे अवाचक इत्यवाचकत्वदोषः, स च 'तस्मिन् किन्नु वियोगि-वध्य-पटहः' इति पाठेन समाधेयः।

लम्बन्त इति लम्बानि, लम्बतेः पचादित्वादच्। प्रदर्शितप्रकारवक्रोक्तिरनन्तरं सतड़िद्बलाकाश्च ते शबला श्चेति कर्म्मधारयः।

शार्दूलविक्रीड़ितं वृत्तं ॥१८॥

बलाकेति। अम्बरम् आकाशं, बलाका बकपक्षिश्रेणिरेव पाण्डुरं शुभ्रम् उष्णीषं शिरोवेष्टनं यस्य तत्तादृशम्, विद्युदेव उत्क्षिप्तमुत्तोलितं चामरं यस्य तत्तथाभूतम्, अतएव मत्तो यो वारः राजहस्ती तस्य सारूप्यं समानरूपत्वम्, कर्त्तुकाममिव कर्त्तुमभिलाषीव वर्त्तत इति शेषः, राजहस्तिनोऽपि तादृशोष्णीष-चामरसत्त्वादिति भावः।

अत्र पूर्वार्द्धे निरङ्गं मालारूपकम्, द्वितीयार्द्धे च आर्थी उपमा वाच्या गुणोत्प्रेक्षा, इत्येतेषां गुणप्रधानभावेनाङ्गाङ्गिभावात् सङ्करः।

कर्त्तुकाममिति "तुमः काममनसोः" इति तुमो मकारलोपः ॥१९॥

এই আর একটা বকপক্ষী ক্ষতস্থানে লবণ নিক্ষেপ করতঃ, 'প্রাবৃট্' 'প্রাবৃট্' (বর্ষাকাল বর্ষাকাল) এই রূপ করিয়া কেন ডাকিতেছ? ॥১৮॥

বিট। বসন্তসেনা! ইহা এইরূপই বটে। এই আর একটা দেখ—

वस । भाव ! प्रेक्षस्व प्रेक्षस्व । (व)

एतैरार्द्र-तमालपत्र-मलिनैरापीतसूर्य्यं नभः,
वल्मीकाः शरताड़िता इव गजाः सीदन्ति धाराहताः ।
विद्युत् काञ्चनदीपिकेव रचिता प्रासादसञ्चारिणी,
ज्योत्स्ना दुर्ब्बलभर्त्तृकेव वनिता प्रोत्सार्य्य मेघैर्हृता ॥२०॥

(व) भाव ! प्रेक्षस्व प्रेक्षस्व ।

एतैरिति । आर्द्रतमालपत्राणीव मलिना जलपूर्णतया नीलवर्णास्तैस्तादृशैः, एतैर्मेघैः, नभआकाशं कर्त्तृ, आपीतो दिवस एव ग्रस्त आवृत इत्यर्थः सूर्य्यो यस्य तत् तादृशमासीदिति शेषः । ईदृशव्याख्यायान्तु नानुपपत्तिः अन्यथा प्रदोषवर्णनाप्रक्रमात् "कुपितेव निशा सपत्नी" इत्याद्यभिहितत्वाच्च तत्र सूर्य्यासम्भवेन अनिवार्य्यानुपपत्तिप्रसक्तिरित्यवधेयम । वल्मीका उपदीकाकृतमृत्तिकास्तूपाः, धाराभिर्वृष्टिपरम्पराभिराहताः सन्तः, शरताड़िता गजा इव, सीदन्ति क्रमान्मृत्तिकास्खलनेन क्रमशः क्षयमापद्यन्ते अवसन्नाश्च भवन्ति । विद्युत्, प्रासादसञ्चारिणी सौधोपरिसञ्चारिणी, काञ्चनदीपिकेव स्वर्णनिर्म्मितदीपभाण्डमिव, रचिता विधिना निर्म्मिता । तथा, मेघैः ज्योत्स्ना, दुर्ब्बलो भर्त्ता यस्याः सा तादृशी वनितेव, प्रोत्सार्य्य बलादपसार्य्य, हृता आहृता नीता च ।

বকপঙ্ক্তিশ্রেণীস্বরূপ শুভ্রবর্ণ উষ্ণীষ ধারণ করিয়াছে এবং বিদ্যুৎস্বরূপ চামর উত্তোলন করিয়াছে, সুতরাং আকাশ যেন মত্ত হস্তীর সাদৃশ্য ধারণ করিতে ইচ্ছুক হইয়াছে ॥১৯॥

বসন্তসেনা। পণ্ডিত ! দেখুন দেখুন।

আকাশ, আর্দ্রতমালপত্রের ন্যায় মলিনবর্ণ এই সকল মেঘ দ্বারা (দিনের বেলায়ই) সূর্য্যকে একেবারে পান (আবরণ) করিয়াছিল; উইর মাটিগুলি, বৃষ্টির ধারায় আহত হইয়া, শরতাড়িত হস্তীর ন্যায়

विटः। वसन्तसेने! पश्य पश्य।

एते हि विद्युद्गुण-बद्ध-कक्षा
गजा इवान्योन्यमभिद्रवन्तः।
शक्राज्ञया वारिधराः सधारा
गां रूप्यरज्ज्वेव समुद्धरन्ति ॥२१॥

अत्र प्रथमे पादे लुप्तोपमा, अन्येषु तु प्रत्येकमेव श्रौतोपमा, इत्थं तेषां मिथोनिरपेक्षतया संसृष्टिः।

"वातूलूल्य नाकुश्च वल्मीकं पुंनपुंसकम्" इत्यमरः।

शार्दूलविक्रीडितं वृत्तम् ॥२०॥

एत इति। हि तथाहि। विद्युतो गुणा रज्जव इव तैर्बद्धाः सम्बद्धाः संयताश्च कक्षा बाहुमूलानि मध्यदेशाश्चयेषां ते, अन्योन्यमभिद्रवन्तः परस्परमभिधावन्तो गजा इव सधारा वृष्टिधारासहिताः, एते वारिधरा मेघाः, शक्रस्य मेघपतेरिन्द्रस्य आज्ञया आदेशेन रूप्यरज्ज्वा रजतनिर्म्मितरश्मिना, गां पृथिवीम्, समुद्धरन्तीव समुत्तोलयन्तीव; वृष्टिधाराणां रूप्यरज्जुतुल्यशुभ्रवर्णत्वात् लम्बितत्वात् भूतलसंयुक्तत्वाच्चेति भावः।

अत्र पूर्वार्द्धे गजा इवेत्युपमासाहचर्य्यात् विद्युद्गुणेत्यत्रापि उपमितसमास एव न्याय्य इति पूर्णोपमैव, परार्द्धे तु वाच्या क्रियोत्प्रेक्षा, इत्यनयोर्मिथो निरपेक्षतया संसृष्टिः।

ক্রমশঃ অবসন্ন হইতেছে; বিধাতা, বিদ্যুৎকে অট্টালিকার উপরিসঞ্চারিণী স্বর্ণদীপের ন্যায় করিয়াছেন এবং মেঘসমূহ, দুর্বলভর্তৃকা রমণীর ন্যায় জ্যোৎস্নাকে অপহৃত করিয়া হরণ করিয়াছে ॥২০॥

বিট। বসন্তসেনা! দেখ দেখ—

রজ্জুর ন্যায় বিদ্যুৎদ্বারা যাহাদের কক্ষদেশ (বাহুমূল, মধ্যভাগ) বদ্ধ হইয়াছে, সেই বৃষ্টিধারা সমন্বিত এই মেঘসমূহ, হস্তিসমূহের ন্যায়

अपि च। पश्य—

महावाताध्मातैर्महिष-कुल-नीलैर्जलधरैः
चलैर्विद्युत्पक्षैर्जलधिभिरिवान्तःप्रचलितैः।
इयं गन्धोद्दामा नव-हरित-शष्पाङ्कुरवती
धरा धारापातैर्मणिमयशरैर्भिद्यत इव॥२२॥

गजानां पृष्ठोपरिपीठबन्धनरज्जूनां लम्बितत्वात् मेघोपरि च विद्युतां स्वतएव तथैव लम्बमानत्वात् विद्युद्गुणवद्धकक्षा इति विशेषणमुभयत्रापि सङ्गच्छते।

"कक्षो वीरुधि दोर्मूले" इत्यादि हैमः।

इन्द्रवज्रोपेन्द्रवज्रयोर्मेलनादुपजातिर्वृत्तम्॥२१॥

महेति। महावातेन प्रभञ्जनवायुना आध्मातैराहतैः अतएव चलैर्गमनशालिभिः तरङ्ग-चलनाच्चलितैरिव च प्रतीयमानैः, विद्युत् एव विद्युत्प्रतिविम्बान्येव च पक्षाः पतत्राणि येषां तैः, अतएव स्वतोऽपि चलनशक्तिरिति भावः अन्तः स्वाभ्यन्तर एव च प्रचलितैः, एकत्र क्षुद्रमेघानां तथा चलनात् अन्यत्र तु क्षुद्रतरङ्गचलनादिति भावः महिषकुलवत् नीलैः, इदन्तु उभयत्रापि समानम्, जलधिभिरिव समुद्रैरिव विशालायतनैरिति भावः, जलधरैर्मेघैः कर्त्तृभिः मणिमयशरै रत्नविद्युत्खचिततया मणिमय-शरस्वरूपैः, धारापातैर्वृष्टिधारानिक्षेपैः करणैः, गन्धेन नववृष्टिपातजनितसौरभेण

পরস্পর ধাবিত হইয়া, ইন্দ্রের আদেশে, রৌপ্যরজ্জু দ্বারা পৃথিবীকে যেন উত্তোলন করিতেছে॥২১॥

আরও, দেখ—অভ্যন্তরসঞ্চলিত সমুদ্রের ন্যায়, গুরুতর বায়ুর আঘাতে সঞ্চলিত, বিদ্যুৎরূপ পক্ষবিশিষ্ট এবং মহিষসমূহের ন্যায় নীল-বর্ণ মেঘসমূহ, বৃষ্টিধারাপাতদ্বারা, অত্যন্তগন্ধবতী ও হরিতবর্ণনূতন-তৃণাঙ্কুরশালিনী এই পৃথিবীকে মণিময় শর দ্বারাই যেন বিদীর্ণ করিতেছে॥২২॥

वस। भाव ! एसो अवरो— (ग्र)

एह्येहीति शिखण्डिनां पटुतरं केकाभिराक्रन्दितः
प्रोड्डीयेव बलाकया सरभसं सोत्कण्ठमालिङ्गितः ।
हंसैरुज्झितपङ्कजैरतितरां सोद्वेगमुद्वीक्षितः ।
कुर्व्वन्नञ्जनमेचका इव दिशो मेघः समुत्तिष्ठति ॥२३॥

(ग्र) भाव ! एष अपरः—

उद्दामा उत्कटा तीव्रगन्धशालिनीत्यर्थः तथा नवा नूतनाः हरिताः पालाशवर्णाः शष्पाणां तृणानामङ्कुरा अस्याः सन्तीति सा तादृशी, धरा पृथिवी, भिद्यते विदार्य्यत इव ।

अत्र प्रथमे पादे लुप्तोपमा, द्वितीये निरङ्गं केवलरूपकम्, पूर्णोपमा च, चतुर्थे तथैव रूपकं क्रियोत्प्रेक्षा च ; तथा प्रथमार्द्धे एकस्य तकारस्य सकृत्साम्यम् एकस्य लकारस्य च असकृत् साम्यमिति वृत्त्यनुप्रासः, द्वितीयार्द्धे च धरा धारेति व्यञ्जनानामनेकधा सकृत् साम्यमिति छेकानुप्रासश्च, इत्येतेषां परस्परनिरपेक्षतया संसृष्टिः ।

शिखरिणी वृत्तम् ॥२२॥

एह्येहीति । शिखण्डिनां मयूराणां केकाभिः स्वरावलीभिः, पटुतरं सुस्पष्टं एहि एहि इति इत्थम्, आक्रन्दित आहूत इव, बलाकया बकपक्षिश्रेण्या सरभसं सवेगं प्रोड्डीय, सोत्कण्ठमालिङ्गित इव, उभयत्रापि प्रेमबन्धुत्वादिति भावः, तथा उज्झितानि नष्टप्रायत्वादिव परित्यक्तानि पङ्कजानि पङ्कजवनानि यैस्तैः हंसैः मानसं यियासुभिरिति

বসন্তসেনা। পণ্ডিত !

এই আর একখানা মেঘ, ময়ূরগণের কেকারবে সুস্পষ্টভাবে 'আইস আইস' বলিয়াই যেন আহূত হইয়া, বেগে উড্ডীন বকপক্ষীশ্রেণী-কর্ত্তৃক উৎকণ্ঠার সহিতই যেন আলিঙ্গিত হইয়া এবং পদ্মবনপরিত্যাগি-হংসসমূহকর্ত্তৃক অত্যন্ত উদ্বেগের সহিত দৃষ্ট হইয়া, দিক্‌সকলকে কজ্জল দ্বারাই যেন শ্যামবর্ণ করতঃ আকাশে উঠিতেছে ॥২৩॥

विटः । एवमेतत् । तथाहि पश्य—

निष्पन्दीकृत-पद्म-षण्ड-नयनं नष्ट-क्षपा-वासरं
विद्युद्भिः क्षण-नष्ट-दृष्ट-तिमिरं प्रच्छादिताशामुखम् ।
निश्चेष्टं स्वपितीव सम्प्रति पयोधारा-गृहान्तर्गतं
स्फीताम्भोधर-धाम-नैक-जलद-च्छत्रापिधानं जगत् ॥२४॥

भावः, सोद्वेगम् अप्रियत्वात् सत्रासं यथा स्यात्तथा अतितरामुद्वीक्षितः अतिरेकेण ऊर्द्धं दृष्ट्या दृष्टः, एषः अपरो मेघः, दिशः, अञ्जनेन कज्जलेन मेचकाः श्यामवर्णा इव कुर्वन्, समुत्तिष्ठति गगने नूतनमाविर्भवति ।

अत्र पूर्वार्द्धे पूर्ववाक्येऽपि इवानुषङ्गात् वाच्यं क्रियोत्प्रेक्षाद्वयम्, परार्द्धे चैका गुणोत्प्रेक्षा, इत्येतेषां मिथो निरपेक्षतया संसृष्टिः । तथा यथा राजापक्षपुरवासिभिः सादरमाहूतः, तत्रत्यबन्धुभिश्च सोत्कण्ठमालिङ्गितः, पलायनेच्छुभिरितरपुरवासिभिश्च सोद्वेगं दृष्टः कश्चित् विपक्षो राजा तन्नगरदाहाग्निधूमेन दिशः श्यामलाः कुर्वन् सिंहासने समुत्तिष्ठति तद्वदिति शब्दशक्तिमूलो वस्तुध्वनिः ।

"क्रन्दने रोदनाह्वाने" इत्यमरः । शार्दूलविक्रीडितं वृत्तम् ॥२३॥

निष्पन्दीति । निष्पन्दीकृतं रुचिद्वायोरभावात् निद्रावेशाच्च निश्चलीकृतं निर्निमेषीकृतञ्च पद्मषण्डं पद्मसमूह एव नयनं येन तत्तादृशम्, नष्टौ अदर्शनं गतौ सूर्यनक्षत्रादिविशेषचिह्नाभावेन निर्णेतुमशक्यावित्यर्थः क्षपावासरौ रात्रिदिवसौ यस्मिन् तत्तथोक्तम्, विद्युद्भिः क्षणं नष्टानि पुनश्च दृष्टानि विद्युदभावकाले पुनर्दृष्टानीत्यर्थः तिमिराणि अन्धकारा यस्मिन् तत् तथाभूतम्, प्रच्छादितानि मेघैः कपाटैश्च आवृतानि आशामुखानि दिङ्मण्डलानि द्वाराणि च यस्य तत्तादृशम्, पयसां वृष्टिजलानां धारा पयोधारा तत्प्रधानं गृहं पयोधारागृहं तस्य अन्तर्गतम्, तथा स्फीता वृद्धिं प्राप्ताः ये अम्भोधरा मेघास्तेषां धामनि गृहे आकाशे इत्यर्थः ये

বিট। ইহা এইরূপই বটে। তাহাই দেখ —

পদ্মবনরূপ নয়ন নিস্পন্দ হইয়াছে, দিন বা রাত্রির কিছু ঠিক্ নাই;

वस। भाव ! एव्वं णेदं । ता पेक्ख पेक्ख — (ष)

गता नाशं तारा उपकृतमसाधाविव जने
वियुक्ताः कान्तेन स्त्रिय इव न राजन्ति ककुभः ।
प्रकामान्तस्तप्तं त्रिदशपति-शस्त्रस्य शिखिना
द्रवीभूतं मन्ये पतति जलरूपेण गगनम् ॥२५॥

(ष) भाव ! एवमेतत् । तत् प्रेक्षस्व प्रेक्षस्व—

नैकै बहुतरा जलदा मेघास्त एव छत्राणि तैरपिधानमाच्छादनं यस्य तत्तथोक्तम् जगत् कर्त्तृ, सम्प्रति निश्चेष्टं वायुसञ्चाराभावात् निष्पन्दं सत्, स्वपितीव निद्रातीव ।

अत्र पद्मषण्डे नयनत्वारोपः जलदे छत्रत्वारोपश्च शाब्दः जगति विशालपुरुषत्वारोपस्त्वार्थं इत्येकदेशविवर्त्ति रूपकं क्रियोत्प्रेक्षा च, अनयोरङ्गाङ्गिभावेन सङ्करः। तथा पूर्वार्द्धे एकस्यैव नष्टशब्दस्य द्विरुपादानात् कथितपदतादोषः, चतुर्थपादे अम्भोधरैरभिधाय जलदेत्यभिधानाद्भग्नप्रक्रमतादोषश्च; 'नष्टचपावासरम्' इत्यत्र 'लुप्तचपावासरम्' इति पाठेन चतुर्थपादे 'सान्द्राकाशविसारिभूरिजलदच्छत्रापिधानम्' इति पाठेन च तयोः समाधानं विधेयम् ।

'गमिकर्म्मीकृतनैकनीवृता' इत्यादिवत् नैकत्र अभावार्थकनशब्देन समासात् 'स्वरेऽक्षरविपर्य्ययः' इति न विपर्य्ययः। शार्दूलविक्रीडितं वृत्तम् ॥२४॥

गतेति। असाधौ जने उपकृतमुपकार इव, तारा नक्षत्रम्, नाशं लोपं गता ।

বিদ্যুতের জন্য ক্ষণকাল অন্ধকার নষ্ট হইতেছে আবার দেখা যাইতেছে এবং সমস্ত দিঙ্‌মুখ আচ্ছাদিত হইয়া গিয়াছে ; এই অবস্থায় জলধারা-গৃহের অন্তর্গত জগন্মণ্ডল, বৃদ্ধিপ্রাপ্ত মেঘের বাটিতে (আকাশে) বহুতর মেঘরূপ ছত্রে আবৃত হইয়া, নিশ্চেষ্ট অবস্থায় এখন যেন নিদ্রা যাইতেছে ॥ ২৪ ॥

বসন্তসেনা। ইহা এইরূপই বটে। তা দেখুন দেখুন—

নক্ষত্র সকল, অসজ্জনের প্রতি কৃত উপকারের ন্যায় লোপ

अपि च । पश्य—

उन्नमति नमति वर्षति, गर्जति मेघः करोति तिमिरौघम् ।
प्रथमश्रीरिव पुरुषः, करोति रूपाण्यनेकानि ॥२६॥

कान्तेन पत्या, वियुक्ता विरहिताः स्त्रिय इव, ककुभो दिशः, न राजन्ति न शोभन्ते । तथा विदशपतेर्देवराजस्य यत् शस्त्रं वज्रादिकं तस्य शिखिना अग्निना प्रकामं पर्य्याप्तं यथा स्यात्तथा अभ्यस्तम् अभ्यस्तरसस्तप्तम्, गगनमाकाशम् कर्त्तृ, द्रवीभूतं सीसकादिवत् तरलीभूतं सत्, जलरूपेण, वृष्टिवारिरूपेण पततीति मन्ये ।

अत्र पूर्वार्द्धे श्रौतमुपमाद्वयम्, परार्द्धे च मन्ये इत्युत्पादानीहाभ्यां भावाभिमानिनी सापह्नवा क्रियोत्प्रेक्षा, इत्येतेषां परस्परनिरपेक्षतया संसृष्टिः । तथा प्रथमपादे नारीपक्षतशब्दयोर्लिङ्गवैषम्येण गतेत्यस्यापि वैषम्यावश्यकत्वात् 'सुधेव विमलश्चन्द्रः' इति दर्पणोदाहरणवद्भग्नप्रक्रमतादोषः, स च 'उपकृतिरसाधाविव जने' इति पाठेन परिहार्य्यः ।

शिखरिणी वृत्तम् ॥२५॥

उन्नमतीति । मेघः, उन्नमति वायुभरेण कदाचिदूर्द्धं गच्छति, रथ्याजलाशयादिनिर्म्माणेन देशोन्नतिं करोति च; नमति अधोलम्बते, परदारगमनादिना आत्मनोऽवनतिं करोति च; जलानि वर्षति, धनानि ददाति च; गर्जति, उद्धतवाक्यं वदति च; तथा तिमिरौघं गाढ़ावरणेन अन्धकारराशिम्, अपकारकरणेन लोकानां मनोमालिन्यञ्च करोति । अतएव प्रथमा श्रीर्धनसम्पत्तिर्यस्य स तादृशः पुरुष इव, अनेकानि रूपाणि अवस्थाः करोति ।

পাইয়াছে; দিক্‌সমূহ, পতিবিরহিণী রমণীর ন্যায় শোভা পাইতেছে না; আর দেবরাজের অস্ত্রের অগ্নিতে অত্যন্ত সন্তপ্ত আকাশ, যেন তরল হইয়া জলরূপে পতিত হইতেছে ইহা আমি মনে করি ॥২৫॥

আরও দেখুন—

মেঘ উঠিতেছে, নামিতেছে, বর্ষা করিতেছে, গর্জ্জন করিতেছে

विटः । एवमेतत् ।

विद्युद्भिर्ज्वलतीव, संविहसतीवोच्चैर्बलाकाशतैः,
माहेन्द्रेण विवल्गतीव धनुषा धाराशरोद्गारिणा ।
विस्पष्टाशनि-निस्वनेन रसतीवाघूर्णतीवानिलैः,
नीलैः सान्द्रमिवाहिभिर्जलधरैर्धूपायतीवाम्बरम् ॥२७॥

अत उन्नमतीत्यादीनामनेकक्रियाणां मेघ इत्येककर्तृकारकत्वात् दीपकम् श्रौती उपमा, वाक्यार्थहेतुकं काव्यलिङ्गञ्च, इत्येतेषामङ्गाङ्गिभावेन सङ्करः । तथा करोतीत्येकस्यैव शब्दस्य द्विरुच्चारणात् कथितपदतादोषः, स च परार्द्धे करोतीत्यत्र धत्ते इति पाठेन समाधेयः । आर्य्या जातिः ॥२६॥

विद्युद्भिरिति । अम्बरमाकाशं कर्त्तृ, विद्युद्भिर्ज्वलतीव अनलावलीढ़ो भवतीव, विद्युतामनलवर्णत्वात् उच्चैरूर्द्ध्वस्थितैः बलाकाशतैर्बकपक्षिश्रेणीसमूहैः, संविहसतीव सम्यक् विहसितं करोतीव, बकानां हास्यवत् शुभ्रवर्णत्वात्; धारा वृष्टिधारा एव शरा वाणधारास्तान् उद्गिरतीति तेन तादृशेन, माहेन्द्रेण इन्द्रसम्बन्धीयेन धनुषा, विवल्गतीव धरया सह युध्यत इव; विस्पष्टस्तीव्रतया सुव्यक्तः योऽशनेर्निस्वनः वज्रस्य ध्वनिस्तेन, रसतीव सिंहनादं करोतीव; अनिलैर्वायुभिर्वायुरोगप्रभावैरित्यर्थः आघूर्णतीव भ्रमतीव; तथा अहिभिः सर्पैरिव, नीलैर्नीलवर्णैः जलधरैर्मेघैः, सान्द्रं घनं यथा स्यात्तथा, धूपायतीव अगुरुप्रभृति कृष्णधूमैः स्वाङ्गानि सुरभीकरोतीव ।

अत्र प्रथमे पादे क्रियोत्प्रेक्षाद्वयम्, द्वितीये निरङ्गकेवलरूपकसङ्कीर्णा एका क्रियोत्

এবং অন্ধকার সমূহ জন্মাইতেছে। (অতএব বলিতে হইবে যে) প্রথম সমৃদ্ধি সম্পন্ন মানুষের ন্যায় মেঘ, বহুতর রূপ ধারণ করিতেছে ॥২৬॥

বিট। ইহা এইরূপই বটে।

আকাশ বিদ্যুৎ দ্বারা যেন জ্বলিতেছে, ঊর্দ্ধে উত্থিত বকপঙ্ক্তিশ্রেণী দ্বারা যেন হাস্য করিতেছে, বৃষ্টিধারারূপ-বাণবর্ষী ইন্দ্রধনু দ্বারা যেন

বস। জলধর! নির্লজ্জস্ত্বং যন্মাং দয়িতস্য বেশ্ম গচ্ছন্তীম্।
স্তনিতেন ভীষয়িত্বা ধারাহস্তৈঃ পরামৃশসি ॥২৮॥

ভোঃ শক্র!

কিং তে হ্যহং পূর্ব্বরতিপ্রসক্তা
যস্ত্বং নদস্যম্বুদসিংহনাদৈঃ।

প্রেক্ষা, তৃতীয়ে ক্রিয়োৎপ্রেক্ষা দ্বয়ম্ চতুর্থে চ শ্লেষোপমাসঙ্কীর্ণা একা ক্রিয়োৎপ্রেক্ষা, ইত্যেতেষামলঙ্কারাণাং মিথো নিরপেক্ষতয়া সংসৃষ্টিঃ।

শার্দ্দূলবিক্রীড়িতং বৃত্তম্ ॥২৭॥

জলেতি। হে জলধর! মেঘ! ত্বং নির্লজ্জঃ; যদ্ যস্মাৎ, দয়িতস্য বল্লভস্য, বেশ্ম গৃহম্, গচ্ছন্তীমভিসরন্তীং মাম্, স্তনিতেন গর্জ্জনেন, ভীষয়িত্বা ভীতাং কারয়িত্বা, ধারা বৃষ্টিপরম্পরা এব হস্তাস্তৈঃ, পরামৃশসি সংস্পৃশসি। অন্যানুরাগিণীং রমণীং স্পৃশতো নির্লজ্জত্বং ভবত্যেবেতি ভাবঃ।

অত্র প্রিয়ভবনং গচ্ছন্তীং রমণীং কেনচিৎ কণ্ঠাদিধ্বনিনা ভীষয়িত্বা পশ্চাৎ হস্তেন স্পৃষ্ট্বা সমাশ্বাসয়তঃ পুরুষস্য ব্যবহারসমারোপাৎ সমাসোক্তিরলঙ্কারঃ।

আর্য্যা জাতিঃ ॥২৮॥

কিমিতি। ভোঃ শক্র! হে ইন্দ্র! অহং কিং তে তব, পূর্ব্বা পূর্ব্ববর্ত্তিনী যা রতিস্তাং প্রত্যেবানুরাগস্তত্র প্রসক্তা হি সম্বদ্ধৈব আসম্? যৎ ত্বম্, অম্বুদঃ সিংহ ইব তস্য বিশালমেঘস্যেত্যর্থঃ নাদৈর্ধ্বনিভিঃ, নদসি মম নিবারণায় গর্জ্জসি। যা নাম স্ত্রী

যুদ্ধ করিতেছে, সুস্পষ্ট বজ্রধ্বনি দ্বারা যেন সিংহনাদ করিতেছে, বায়ু (রোগ) দ্বারা যেন ঘুরিতেছে এবং সর্পের ন্যায় নীলবর্ণ মেঘ দ্বারা যেন নিবিড়ভাবে গাত্র সুগন্ধ করিতেছে ॥২৭॥

বসন্তসেনা। মেঘ! তুমি লজ্জাশূন্য; যেহেতু, আমি প্রিয়তমের বাড়ী যাইতেছি, এই অবস্থায় আমাকে গর্জন দ্বারা ভীত করিয়া, বৃষ্টি-ধারারূপ হস্তদ্বারা স্পর্শ করিতেছ ॥২৮॥

হে ইন্দ্র! আমি কি পূর্ব্বে অনুরাগ বশতঃ তোমার প্রতি আসক্ত

न युक्तमेतत् प्रियकाङ्क्षिताया
मार्गं निरोद्धुं मम वर्षपातैः ॥२९॥

अपि च ।

यद्वदहल्याहेतोर्मृषा वदसि शक्र ! गौतमोऽस्मीति ।
तद्वन्ममापि दुःखं निरवेक्ष्य निवार्य्यतां जलदः ॥३०॥

पूर्व्वमात्मानं प्रत्यनुरक्ता भूत्वा इदानीं पुरुषान्तरं याति, तां स्त्रियं प्रति पूर्व्वनायकस्य गर्जनं सङ्गतमेव ; किन्तु नाहं कदापि भवन्तं प्रत्यनुरक्ता आसम्, सुतरां वल्लभमभिसरन्तीं मां प्रति निवारणाय तवेदं गर्जनमसङ्गतमेवेति भावः । तथा प्रियेण वल्लभेन चारुदत्तेन काङ्क्षिताया अभिलषिताया मम त्वत्सम्पर्करहिताया इति भावः, वर्षपातैर्वृष्टिपातनैः, मार्गं पन्थानम्, एतत् निरोद्धुं निरोधनम्, न युक्तमुचितम् । निःसम्पर्का साधारणी स्त्री यथेच्छमेव गच्छतु, तत्र का नाम तव हानिरित्याशयः ।

अत्र 'किं ते अहं पूर्व्वरतिप्रसक्ता वासम् ? अपि तु कथमपि न' इत्यर्थान्तरापत्त्यादर्थापत्तिरलङ्कारः । इन्द्रवज्रोपेन्द्रवज्रयोर्मिलनादुपजातिर्वृत्तम् ॥२९॥

यद्वदिति । हे शक्र ! अहल्याहेतोः अहल्याख्यगौतमपत्नीसङ्गमहेतोः, यद्वत् यथा त्वम्, 'गौतमोऽस्मि' इति मृषा मिथ्यावाक्यम्, वदसि उक्तवानित्यर्थः ; निरतिशयकामावेशदुःखादिति भावः । तद्वत् तथा, ममापि दुःखं निरतिशयकामावेशवशादेव जातमिति भावः । निरवेक्ष्य निःशेषेण मनसा पर्य्यालोच्य, जलदो मत्प्रतिबन्धकोऽयं मेघः, निवार्य्यताम् । तथा च यादृशकामावेगदुःखात् त्वया मिथ्याभिधाय गुरुपत्नीसङ्गम

ছিলাম? যে তুমি সিংহতুল্য মেঘের শব্দ দ্বারা (আমাকে বারণ করিবার জন্য) শব্দ করিতেছ। আমি প্রিয়তম চারুদত্তের অভিলষিত হইয়া যাইতেছি, এ অবস্থায় বৃষ্টিপাতদ্বারা আমার এই পথ রোধ করা তোমার উচিত নহে ॥২৯॥

আর হে ইন্দ্র! তুমি যেমন পূর্ব্বে অহল্যার জন্য "আমি গৌতম"

अपि च ।

गर्ज वा वर्ष वा शक्र ! मुञ्च वा शतशोऽशनिम् ।
न शक्याहि स्त्रियो रोद्धुं प्रस्थिता दयितं प्रति ॥३१॥
यदि गर्जति वारिधरो गर्जतु तन्नाम निष्ठुराः पुरुषाः ।
अयि विद्युत् ! प्रमदानां त्वमपि च दुःखं न जानासि ॥३२॥

रूपं निरतिशयमकार्य्यमनुष्ठितम्, तादृशकामावेगदुःखादेवाहं प्रियमभिसरामि इदञ्च तादृशं नाकार्य्यम् सुतरां तद्दुःखं पर्य्यालोच्य प्रतिबन्धकीभूतास्यास्य मेघस्य दयया निवारणं तवोचितमेवेति भावः ।

वदसीति "प्रयोगतश्च" इत्यतीते वर्त्तमाना ।

पुराकिल महर्षिगौतमभार्य्याया अहल्याया रूपेण मोहित इन्द्रस्तस्य शिष्यो नाम भूत्वा तदीयाश्रमे स्थितः । अथ कदाचिद् गौतमो ब्राह्मे मुहूर्त्ते सन्ध्यावन्दनार्थं नदीं गतः, अत्रावसरे इन्द्रो गौतमरूपमास्थाय गौतम एवाऽऽगतोऽस्मीत्यभिधाय च अहल्यया सह रेमे । इति भारतोपाख्यानं द्रष्टव्यम् ।

आर्य्या जातिः ॥३०॥

गर्ज्जेति । हे शक्र ! त्वं गर्ज वा, वर्ष वा, शतशः अशनिं वज्रं मुञ्च निक्षिप वा । तथापि दयितं प्रति प्रस्थिताः कामावेगादित्याशयः, स्त्रियः, रोद्धुं नहि नैव शक्या । सुतरामहमपि तथैव नैव रोद्धुं त्वया शक्येति भावः ॥३१॥

यदीति । वारिधरो मेघः, यदि गर्जति, तन्नाम गर्जतु । यतः पुरुषा निष्ठुरा निर्द्दयाः । तथा च वारिधरस्यापि लिङ्गसाम्येन पुरुषत्वादिति भावः । अयि विद्युत् !

এইরূপ মিথ্যা বাক্য বলিয়াছিলে, সেইরূপ আমারও, দুঃখ দেখিয়া মেঘগুলিকে নিবারণ কর ॥৩০॥

আরও, হে ইন্দ্র! তুমি গর্জ্জন কর, বর্ষণ কর, কিম্বা শত শত বজ্রপাত কর; তথাপি প্রিয়তমের প্রতি প্রস্থিত কামিনীদিগকে বাধা দিতেপারিবে না ॥৩১॥

মেঘ যদি গর্জ্জন করে, তা গর্জ্জন করুক; কারণ পুরুষগণ নিষ্ঠুর।

विटः। भवति! अलमलमुपालम्भेन। उपकारिणी एवेयम्। (स)

ऐरावतोरसि चलेव सुवर्णरज्जुः—
शैलस्य मूर्द्धि निहितेव सिता पताका।
आखण्डलस्य भवनोदरदीपिकेयम्
आख्याति ते प्रियतमस्य हि सन्निवेशम् ॥३३॥

त्वमपि च लिङ्गसाम्यात् स्त्री सतीति भावः, प्रमदानां स्त्रीणां दुःखं न जानासि ; एतदेव महत्कष्टमित्याशयः। एतेन विद्युतः सर्व्वदैव प्रस्फुरणेन पथः प्रदर्शनमुचितमिति सूचितम्।

अत्र "निष्ठुराः पुरुषाः" इति सामान्येन "वारिधरो गर्जतु नाम" इति विशेष समर्थनादर्थान्तरन्यासः, तदुत्थापिता च पुंलिङ्गसाम्येन वारिधरे पुरुषव्यवहारसमारोपात् समासोक्तिरित्यनयोरङ्गाङ्गिभावेन सङ्करः, पुनर्विद्युति च स्त्रीलिङ्गसाम्येन स्त्रीव्यवहार-समारोपादपरा समासोक्तिः, तयोश्च मिथो निरपेक्षतया पुनः संसृष्टिः।

आर्य्या जातिः ॥३२॥

(स) विट इति। उपालम्भेन विद्युतस्तिरस्कारेण। इयं विद्युत्। कुत उपकारिणीत्याह ऐरेति। हि यस्मात् ऐरावतस्य इन्द्रहस्तिन उरसि वक्षसि। एतेन ऐरावतवक्षसस्य विशालत्वमेवाक्षिप्यते, न तु शुभ्रत्वमपि, तस्याविवक्षितत्वात्। चला चञ्चला सुवर्णरज्जुरिव। शैलस्य पर्व्वतस्य, मूर्द्धि उपरिभागे, निहिता स्थापित

হে বিদ্যুৎ! তুমিও, স্ত্রীলোকদিগের দুঃখ জাননা! ॥৩২॥

বিট। বসন্তসেনা! বিদ্যুৎকে তিরস্কার করিও না। কারণ এই বিদ্যুৎ তোমার উপকারিণী।

ঐরাবতহস্তীর বক্ষে চঞ্চল স্বর্ণরজ্জুর ন্যায়, পর্ব্বতের মস্তকে স্থাপিত শুভ্র পতাকার ন্যায় এবং ইন্দ্রের গৃহের ভিতরের প্রকাশকারিণী এই বিদ্যুৎ, তোমার প্রিয়তমের আবাস স্থানের সূচনা করিয়া দিতেছে ॥৩৩॥

বস। ভাব! এব্বং। তং জ্জেব এদং গেহং। [ছ]

বিটঃ। সকল-কলাভিজ্ঞায়া ন কিঞ্চিদিহ তবোপদেষ্টব্য-মস্তি। তথাপি স্নেহঃ প্রলাপয়তি। অত্র প্রবিশ্য কোপোঽত্যন্তং ন কর্ত্তব্যঃ। [জ]

যদি কুপ্যসি নাস্তি রতিঃ, কোপেন বিনাথবা কুতঃ কামঃ ?।

(ছ) ভাব! এবম্। তদেব এতদ্ গেহম্।

সিতা শুভ্রা তদ্বন্নির্ম্মলেত্যর্থঃ। পতাকেব; তথা আখণ্ডলস্য ইন্দ্রস্য, যদ্ভবনোদরং মেঘস্থানরূপং গৃহাভ্যন্তরং তস্য দীপিকা প্রকাশিকা, ইয়ং বিদ্যুৎ, তে তব, প্রিয়জনস্য চারুদত্তস্য, সন্নিবেশমাবাসস্থানম্, আখ্যাতি সূচয়তি। পরিচায়য়তীত্যর্থঃ।

অত্র শ্রৌতোপময়োর্মিথো নিরপেক্ষত্বাৎ সংসৃষ্টিঃ। বসন্ততিলকা বৃত্তম্ ॥৩৩॥

(ছ) বস ইতি। এবং ত্বয়া যদুক্তং তৎ সত্যমেবেত্যর্থঃ। তদেবাহ তদেবেতি।

(জ) বিট ইতি। সকলাঃ কলাশ্চতুঃষষ্টিপ্রকারাঃ কৌশলবিদ্যা অভিজানাতীতি তস্যা ইত্যুপদেষ্টব্যত্বাভাবে হেতুঃ। স্নেহস্ত্বাং প্রতি বাৎসল্যম্, প্রলাপয়তি অনর্থকং কিঞ্চিন্মাং বাদয়তি। সকলকলাভিজ্ঞায়াস্তে তাদৃশোপদেশস্যানাবশ্যকত্বাদেবানার্থক্যমিতি ভাবঃ। অত্যন্তং ন কর্ত্তব্য ইত্যনেন কিঞ্চিৎ কর্ত্তব্য এবেতি সূচিতম্।

যদীতি। যদি কুপ্যসি অত্যন্তমেব কোপান্বিতা ভবসি, তদা রতিঃ সুরতং নাস্তি, তাদৃশকোপেনৈব অত্যন্তপৃথক্করণীয়ত্বাদিতি ভাবঃ। অথবা কোপেন বিনা ঈষৎকোপমপি

বসন্তসেনা। পণ্ডিত! ইহাই বটে। সেই বাড়ীই এই।

বিট। তুমি সমস্ত কলাবিদ্যাতেই অভিজ্ঞ; সুতরাং তোমাকে কিছুই উপদেশ দিবার নাই। তথাপি স্নেহ আমাকে অনর্থক বলাইতেছে। তুমি এখানে প্রবেশ করিয়া অত্যন্ত কোপ করিবে না।

যদি গুরুতর কোপ কর, তবে সম্মিলন হইবে না; আবার একে-

कुप्य च कोपय च त्वं, प्रसीद च त्वं प्रसादय च कान्तम्
॥३४॥

भवतु, एवं तावत्। भो भोः! निवेद्यतामार्य्यचारुदत्ताय— (क)

एषा फुल्ल-कदम्ब-नीप-सुरभौ काले घनोद्भासिते
कान्तस्यालयमागता समदना हृष्टा जलार्द्रालका।

विनेतार्थः, कुतः कामः सुरतादिकामामोदः? कुतोऽपि भेतार्थः; कोपाभावादात्रिभोदग्राभावेन तादृशामोदासम्भवादित्याशयः। अतः कर्त्तव्यमाह कुप्य चेति। कुप्य च तदपराधविशेषदर्शनच्छलेनात्मन ईषत्कोपं दर्शय; कान्तम्, कोपय च छलात् स्वापराधप्रकटनेन ईषत्कोपान्वितं कुरु। तथा प्रसीद च तदनुनयमात्रेणैव प्रसन्ना भव; कान्तम्, प्रसादय च अपमानममत्वा अनुनयेन प्रसन्नञ्च कुरु। एवं कृते च कामामोदः सर्व्वथैव भवेदित्यभिप्रायः।

अत्र पूर्व्वार्द्धे अर्थापत्तिरलङ्कारः। परार्द्धे चान्योन्यालङ्कारो व्यज्यते। शिक्षा नाम नाट्यालङ्कारः "शिक्षायाद्युपदेशनम्" इति दर्पणलक्षणात्। गीतिर्ज्जातिः ॥३४॥

(क) भवत्विति अत्रैव मत्प्रलापविराम इति शेषः। एवं तावदुच्चैर्ब्रवीमीति शेषः।

एषेति। समदना सकामा, अतएव हृष्टा रोमाञ्चैर्व्विभूषिता, जलार्द्रैः...

বারে কোপ না করিলে কামামোদ হইবে না। সুতরাং আপনিও, ঈষৎ কোপ প্রকাশ করিবে, প্রিয়তমকেও ঈষৎ কুপিত করিবে, আপনিও প্রসন্ন হইবে, প্রিয়তমকেও প্রসন্ন করিবে ॥৩৪॥

হউক, এই ভাবে বলি। ওহে! আর্য্য চারুদত্তকে জানাও।

প্রস্ফুটিত-পুষ্পান্বিত কদম্ববৃক্ষদ্বারা মনোহর এবং মেঘ-পরিশোভিত

विद्युद्वारिदगर्जितैः सचकिता त्वद्दर्शनाकाङ्क्षिणी
पादौ नूपुर-लग्न-कर्द्दम-धरौ प्रक्षालयन्ती स्थिता ॥३५॥

चारु। आकर्ण्य। वयस्य! ज्ञायतां किमेतदिति।

विदू। जं भवं आणवेदि। वसन्तसेनामुपगम्य सादरम्। सोत्थि भोदीए। (ख)

(ख) यद्भवानाज्ञापयति। स्वस्ति भवत्यै।

आर्द्रा अलकाश्चूर्णकुन्तला यस्याः सा, विद्युद्भिः वारिदानां मेघानां गर्जितैर्गर्जनैश्च सचकिता सभया, तथापि तव चारुदत्तस्य दर्शनाकाङ्क्षिणी एषा काचित् रमणी, फुल्लानि प्रस्फुटितानि कदम्बानि तदाख्यकुसुमानि येषु तादृशैर्नीपैः कदम्बाख्यैरेव तरुभिः सुरभिर्मनोहरस्तस्मिन्, तथा घनेन मेघेन उद्भासिते परिशोभिते, काले वर्षासमये, कान्तस्य प्रियतमस्य, आलयमागता सती, नूपुरयोर्लग्नान् पादक्षेपकाले संसक्तान् कर्द्दमान् धरत इति तौ तादृशौ पादौ, प्रक्षालयन्ती स्थिता, द्वारदेशे इति शेषः। अतो द्वारमुद्घाट्य एनां गृहाण इत्याशयः।

अत्र कदम्ब-नीपशब्दयोः पर्य्यायतया आपाततस्तदर्थस्य पुनरुक्ततया प्रकाशात् परन्तु व्याख्यातरूपेण भेदात् भिन्नाकारशब्दगतत्वाच्च पुनरुक्तवदाभासोऽलङ्कारः। फुल्लेत्यादिभिः कालस्योद्दीपकत्वम्, जलार्द्रालकेत्यादिविशेषणैश्च कामवेगातिरेकादेव ईदृशकष्टं स्वीकृत्याप्यागता इति च सूचितमिति न अपुष्टार्थत्वदोषः।

शार्दूलविक्रीडितं वृत्तम् ॥३५॥

এই সময়ে, কামার্ত্তা, রোমাঞ্চিতদেহা এবং বিদ্যুৎপ্রকাশ ও মেঘগর্জনে সচকিতা এই রমণী, আপনার দর্শনাভিলাষিণী হইয়া, আপনার বাটীতে উপস্থিত হইয়াছেন; বৃষ্টির জলে ইঁহার কেশকলাপ আর্দ্র হইয়া গিয়াছে এবং ইনি, চরণযুগলের নূপুরে সংলগ্ন কর্দ্দম প্রক্ষালন করতঃ অবস্থান করিতেছেন ॥৩৫॥

চারুদত্ত। (শ্রবণ করিয়া) সখে! জান দেখি এ ব্যাপারটা কি।

বস। অজ্জ! বন্দামি। সাঅদং অজ্জস্স?। বিটং প্রতি। ভাব! এসা ছত্তধারিআ ভাবস্স জ্জেব ভোদু। (গ)

বিটঃ। স্বগতম্। অনেনোপায়েন নিপুণং প্রেষিতোঽস্মি। প্রকাশম্। এবং ভবতু। ভবতি! বসন্তসেনে! (ঘ)

সাটোপ-কূট-কপটানৃতজন্মভূমেঃ
শাঠ্যাত্মকস্য রতি-কেলিকৃতালয়স্য।

(গ) আর্য্য! বন্দে। স্বাগতমার্য্যস্য?। ভাব! এষা ছত্রধারিকা ভাবস্যৈব ভবতু।

(গ) বস ইতি। ছত্রধারিকা আত্মনো দাসী, ভাবস্যৈব তব বিটস্যৈব, ভবতু ত্বৎপরিচ্ছদধারিণীতি শেষঃ।

(ঘ) বিট ইতি। উপায়েন ইতঃ প্রস্থানানুমতিকৌশলেন। প্রেষিতোঽস্মি স্বগৃহং প্রতীতি শেষঃ। এবম্- ইয়ং মমৈব ছত্রধারিকা।

সাটোপেতি। আটোপেন গর্ব্বেণ সহ বিদ্যমানানীতি সাটোপানি যানি কূট-কপটানৃতানি প্রতারণা-ছল-মিথ্যাচরণানি তেষাং জন্মভূমিরুৎপত্তিস্থানরূপস্য, তেষাং বেশ্যাযামেব বাহুল্যেনোৎপত্তেরিতি ভাবঃ; শাঠ্যং ধূর্ত্ততৈব আত্মা সারভূততয়া জীবনরূপং যস্য তস্য, রতিকেলিভিরনুরাগলীলাভিঃ কৃত আলয় আশ্রয়ো যস্য তস্য, তথা

বিদূষক। আপনি যাহা আদেশ করেন। (বসন্তসেনার নিকট যাইয়া আদরের সহিত) আপনার মঙ্গল হউক।

বসন্তসেনা। আর্য্য! প্রণাম করি। আপনার শুভাগমন ত? বিটের প্রতি) পণ্ডিত! এ, আপনারই ছত্রধারিণী হউক।

বিট। (স্বগত) এই ভাবে কৌশলে প্রেরিত হইলাম। (প্রকাশ্যে) ইহাই হউক। বসন্তসেনা!

গর্ব্বের সহিত প্রতারণা, ছল ও মিথ্যা আচরণের যাহা জন্মভূমি; শঠতা যাহার জীবন, রতিলীলা যাহাকে আশ্রয় করিয়া থাকে এবং

वेश्यापणस्य सुरतोत्सवसंग्रहस्य
दाक्षिण्य-पण्य-सुख-निष्क्रय-सिद्धिरस्तु ॥३६॥

इति निष्क्रान्तो विटः।

वस। अज्जमित्तेअ! कहिं तुम्हाणं जूदिअरो? । (ङ)

विदू। स्वगतम्। ह्रीह्री भो! जूदिअरो त्ति भणन्तीए अलङ्किदो पिअवअस्सो। प्रकाशम्। भोदि! एसो क्खु सुक्ख-रुक्ख-वाडिआए। (च)

(ङ) आर्य्य मैत्रेय! कस्मिन् युष्माकं द्यूतकरः? ।

(च) ह्रीह्री भोः! द्यूतकर इति भणन्त्या अलङ्कृतः प्रियवयस्यः। भवति! एष खलु शुष्क-वृक्ष-वाटिकायाम्।

सुरतोत्सवो रमणामोद एव संग्रहः सञ्चयो लाभो यस्मिन् तस्य, वेश्या एव आपणो विनिमयस्थानत्वाद्विपणिस्तस्य त्वद्रूपस्येत्यर्थः, दाक्षिण्यमौदार्य्यमेव पण्यं विक्रेयद्रव्यं तस्य सुखेन निष्क्रयसिद्धिः प्रतिशोधनिष्पत्तिरस्तु, चारुदत्तेन यादृशमौदार्य्यं दातव्यम्, त्वयापि तत्प्रतिशोधभावेन तादृशमेवौदार्य्यं देयमित्यर्थः। अस्य लाभस्य सुरतोत्सव एवेति प्राक् प्रदर्शितमिति भावः।

अत्र समस्तवस्तुविषयं साङ्गं रूपकमलङ्कारः, प्रथमे पादे एकस्य टकारस्य असकृत्साम्यात् वृत्त्यनुप्रासः, चतुर्थे च 'ण्य' इति व्यञ्जनसंघस्य अनेकधा सकृत् साम्यात् छेकानुप्रास इत्येतेषां परस्परनिरपेक्षतया संसृष्टिः।

वसन्ततिलका वृत्तम् ॥३६॥

(ङ) वस इति। द्यूतकरश्चारुदत्तः। चारुदत्तेनैव स्वमिथिलमुवर्णभाण्डस्य द्यूते हारितत्वाभिधानात् कौतुकाय ईदृशोक्तिरिति बोध्यम्।

রমণামোদ যেখানে লাভ, সেই বেশ্যারূপ দোকানখানির ঔদার্য্যরূপ বিক্রেয় দ্রব্যের সুখে বিনিময়সিদ্ধি হউক ॥৩৬॥

(এই বলিয়া চলিয়া গেল)

বসন্তসেনা। আর্য্য মৈত্রেয়! আপনাদের দ্যূতকর কোথায়?।

বস। অজ্জ! কা তুম্হাণং সুক্খ-রুক্খ-বাডিআ বুচ্চদি?। (ছ)

বিদূ। ভোদি! জহিং ণ খাইঅদি ণ পীইঅদি। [জ]

বসন্তসেনা স্মিতং করোতি।

বিদূ। তা পবিসদু ভোদী। [ঝ]

বস। জনান্তিকম্। এত্থ পবিসিঅ কিং মএ ভণিদব্বং?। [ঞ]

(ছ) আর্য্য! কা যুষ্মাকং শুষ্ক-বৃক্ষ-বাটিকা উচ্যতে?।

(জ) ভবতি! যস্মিন্ ন খাদ্যতে ন পীয়তে।

(ঝ) তৎ প্রবিশতু ভবতী।

(ঞ) অত্র প্রবিশ্য কিং ময়া ভণিতব্যম?।

(চ) বিদূ ইতি। অলঙ্কৃতঃ, দারিদ্র্যাপবাদমপনীয় ধনিত্বসূচনাৎ ধনাভাবে দ্যূতকরত্বাসম্ভবাদিত্যাশয়ঃ। শুষ্কবৃক্ষবাটিকায়া জীর্ণ-বিরল-তরুময়োদ্যানে।

(ছ) বস ইতি কা কীদৃশী স্থলী।

(জ) বিদূ ইতি। এতেন যৌগিকস্যাপি শুষ্কবৃক্ষবাটিকাশব্দস্য পানভোজনাসম্ভবস্থল্যাং স্বকল্পিতসঙ্কেতঃ প্রদর্শিত ইতি বোধ্যম্। অতএব কৌতুকাৎ বসন্তসেনা স্মিতং করোতি।

বিদূষক। (স্বগত) ভাল ভাল! বসন্তসেনা প্রিয়বয়স্যকে দ্যূতকর বলিয়া অলঙ্কৃত করিয়াছেন। (প্রকাশ্যে) বসন্তসেনা! ইনি শুষ্কবৃক্ষ-বাটিকায় রহিয়াছেন।

বসন্তসেনা। আর্য্য! আপনাদের শুষ্কবৃক্ষবাটিকা বলে কোন্‌টাকে?

বিদূষক। বসন্তসেনা! যেখানে লোকে খায় না, পান করে না।

(বসন্তসেনা ঈষৎ হাস্য করিল)

বিদূষক। তা, আপনি প্রবেশ করুন।

चेटी। जूदिअर! अवि सुहो दे पदोसो? त्ति। (ट)

वस। अवि पारइस्सं?। (ठ)

चेटी। अवसरो ज्जेव पारइस्सदि। (ड)

(ट) द्यूतकर! अपि सुखस्ते प्रदोषः? इति।

(ठ) अपि पारयिष्यामि?।

(ड) अवसर एव पारयिष्यति।

(अ) वस इति। जनान्तिकलक्षणं यथा दर्पणे —

'त्रिपताककरेणान्यानपवार्य्यान्तरा कथाम्।

अन्योन्यामन्त्रणं यत् स्याज्जनान्ते तज्जनान्तिकम्॥'

एतेनात्यन्तौत्सुक्यावशादस्याः कर्त्तव्यमूढत्वमुपस्थितमिति सूचितम्।

(ट) चेटीति। अपिः प्रश्ने। सुखः सुखकरः। अथवा भवदौत्सुक्यावशादसुखकर इति भावः। इति भणितव्यमिति पूर्व्वेणान्वयः।

(ठ) वस इति। अपि पारयिष्यामि एवं भणितुं समर्था भविष्यामि किमित्यर्थः। एतेन "प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः" इत्युक्तलक्षणः प्रलयाख्यसात्त्विकभाव एव चारुदत्तदर्शने आविर्भविष्यतीति द्योतितम्।

(ड) चेटीति। अवसरस्तादृशसन्निधानसमय एव पारयिष्यति उक्तविधं भणितुं त्वां समर्थां करिष्यति; तादृशावसरस्य सलीलालापजनने सर्व्वत्रैव शक्तिदर्शनादिति भावः।

বসন্তসেনা। (দাসীর প্রতি চুপি চুপি) এখানে প্রবেশ করিয়া আমার কি বলিতে হইবে?।

দাসী। দ্যূতকর! এই প্রদোষকাল আপনার সুখ জন্মাইতেছে ত?।

বসন্তসেনা। সমর্থ হইব কি?।

দাসী। সময়ই আপনাকে সমর্থ করিবে।

विदू। पविसदु भोदी। (ढ)

वस। प्रविश्योपसृत्य च पुष्पैस्ताड़यन्ती। अइ जूदिअर? अवि-सुहो दे पदोसो?। [ण]

चारु। अवलोक्य। अये वसन्तसेना प्राप्ता! सहर्षमुत्थाय। अयि प्रिये!

सदा प्रदोषो मम याति जाग्रतः
सदा च मे निश्वसतो गता निशा।
त्वया समेतस्य विशाललोचने!
ममाद्य शोकान्तकरः प्रदोषकः ॥३७॥

(ढ) प्रविशतु भवती।

(ण) अयि द्यूतकर! अपि सुखस्ते प्रदोषः?।

(ण) वस इति। पुष्पैस्ताड़यन्ती चारुदत्तदेहोपरि पुष्पाणि निक्षिपन्तीत्यर्थः। सदेति। सदा प्रत्यहम्, जाग्रत एव मम प्रदोषो रात्रिर्याति। अतीतसामीप्ये वर्त्तमाना। त्वच्चिन्तावशादिति भावः सदा च प्रत्यहञ्च, निश्वसत एव निशा गता। त्वद्वियोगेन शोकोदयादित्याशयः। किन्तु हे विशाललोचने! अद्य त्वया समेतस्य सम्मिलितस्य मम, प्रदोषकः सा रात्रिः, शोकान्तकरः संहर्त्ता इति शेषः, चिरप्रार्थितत्वत्सम्मेलनस्यैव लाभादिति भावः।

বিদূষক। আপনি প্রবেশ করুন।

বসন্তসেনা। (প্রবেশপূর্ব্বক নিকটে যাইয়া, পুষ্প দ্বারা তাড়ন করতঃ) দ্যূতকর! প্রদোষকাল আপনার সুখ জন্মাইতেছে ত?।

চারুদত্ত। (দেখিয়া) ওহে! বসন্তসেনা উপস্থিত হইয়াছেন। (আনন্দের সহিত উঠিয়া) প্রিয়ে!

প্রত্যহ জাগরিত অবস্থায় আমার রাত্রি অতীত হইয়াছে এবং প্রতিদিন নিশ্বাস ত্যাগ করিতে করিতে আমার রাত্রি চলিয়া গিয়াছে।

तत् स्वागतं भवत्यै ?। इदमासनम्, अत्रोपविश्यताम्। [त]

विदू। इदं आसणं, उवविसदु भोदी। [थ]

वसन्तसेना आसीना। ततः सर्व्वे उपविशन्ति।

चारु। वयस्य! पश्य पश्य—

(थ) इदमासनम्, उपविशतु भवती।

अत्र शोकान्तकरत्वं प्रति त्वया समेतस्येतिपदस्यार्थो हेतुरिति पदार्थहेतुकं काव्यलिङ्गमलङ्कारः। तथा सदेतिपदस्य द्विरभिधानात् कथितपदतादोषः, प्रदोषशब्दस्य रजनीमुखवाचकतया रात्रिमात्रस्यावाचकत्वादवाचकत्वदोषः, 'जाग्रतः निश्वसतः' इत्युभयोः परमेव नियमार्थक एवशब्दो वक्तव्यः किन्तु नोक्त इति नियमे अनियमाख्यदोषश्च। तेन च पूर्वार्द्धमेवं पठनीयम् 'विनिश्वसन्नेव च जाग्रदेव च नयाम्यहं प्रत्यहमेव यामिनीम्।'

वंशस्थविलं वृत्तम् ॥२७॥

(त) तदिति। स्वागतं कुशलेनागतं किमित्यर्थकतया भवत्यै इत्यत्र "आशिष्यर्थकुशलमद्रायुष्यार्थैः" इति चतुर्थी। केचित्तु तादर्थ्ये इति वदन्ति।

কিন্তু আজ তোমার সহিত সম্মিলিত হইয়াছি; সুতরাং হে বিশালনেত্রে! সেই প্রদোষ আমার আজ শোক-নিবৃত্তিকর হইয়াছে ॥৩৭॥

অতএব তোমার শুভাগমন ত?। এই আসন, ইহাতে উপবেশন কর।

বিদূষক। এই আসন; আপনি উপবেশন করুন।

(বসন্তসেনা বসিল; তার পর সকলে বসিল)

চারুদত্ত। বয়স্য! দেখ দেখ—

वर्षोदकमुद्गिरता, श्रवणान्तविलम्बिना कदम्बेन ।
एकः स्तनोऽभिषिक्तो, नृपसुत इव यौवराज्यस्थः ॥३८॥

तद्वयस्य ! क्लिन्ने वाससी वसन्तसेनायाः, अन्ये प्रधान-वाससी समुपनीयेतामिति । [द]

विदू । जं भवं आणवेदि । (ध)

(ध) यद्भवानाज्ञापयति ।

वर्षोदकमिति । वर्षोदकं वृष्टिजलविन्दुसमूहम्, उद्गिरता निपातयता, श्रवणान्तविलम्बिना कर्णप्रान्तदेशलम्बिना, कदम्बेन शोभार्थं धृतकदम्बपुष्पेन, वसन्तसेनाया एकः स्तनः, यौवराज्यस्थो नृपसुतो राजपुत्र इव, अभिषिक्तः स्नपितः, स्वोद्गीर्णैरेव जलविन्दुभिरिति भावः ।

अत्र द्वितीयपादे छेकानुप्रासः, समुदाये तु श्रौतोपमा इत्यनयोः परस्परनिरपेक्षतया संसृष्टिः । उपमालङ्कारेण च स्तनस्य नृपसुतवत् परमादरणीयत्वं स्पृहणीयत्वं सावधानतया रक्षणीयत्वं प्रभाववत्त्वञ्च व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः ।

तथा द्वितीयपादे माधुर्य्यगुणः, अन्यत्र तु प्रसादगुणः, उक्तविधौ चालङ्कारादिभ्येषां योगात् भूषणं नाम नाट्यलक्षणम् । यथा दर्पणे—

'लक्षणानि, गुणैः सालङ्कारैर्योगस्तु भूषणम् ।'

लक्षणानां सूत्ररूपतया 'सूत्रे लिङ्गं संख्या कालश्चातन्त्राणि' इति न्यायेन गुणैरिति बहुवचनस्याविवक्षितत्वादत्र लक्षणसङ्गतिः । आर्य्या जातिः ॥३८॥

(द) तदिति । क्लिन्ने वृष्टिजलैरार्द्रीभूते । प्रधानवाससी उत्तमवस्त्रद्वयम् ।

কর্ণপ্রান্তলম্বী কদম্বপুষ্প, বৃষ্টিজলবিন্দু উদ্গিরণ করতঃ, যৌবরাজ্যস্থ রাজপুত্রের ন্যায় একটী স্তনকে অভিষিক্ত করিয়াছে ॥৩৮॥

অতএব সখে! বসন্তসেনার কাপড় দুইখানি ভিজিয়া গিয়াছে; আর দুইখানি ভাল কাপড় লইয়া আইস।

বিদূষক। আপনি যাহা আদেশ করেন।

चेटी। अज्जमित्तेअ! चिट्ठ तुमं, अहं ज्जेव अज्जअं सुस्सूसइस्सं। तथा करोति। [न]

विदू। अपवारितकेन। भो वअस्स! पुच्छामि दाव तत्थभोदिं किं पि। [प]

चारु। एवं क्रियताम्। [फ]

विदू। प्रकाशम्। अध किं णिमित्तं उण ईदिसे पणट्ठ-चन्दालोए दुद्दिण अन्धकारे आअदा भोदी?। [ब]

(न) आर्य्यमैत्रेय! तिष्ठ त्वम्, अहमेवार्य्यां शुश्रूषयिष्यामि।

(प) भो वयस्य! पृच्छामि तावदत्रभवतीं किमपि।

(ब) अथ किं निमित्तं पुनरीदृशे प्रनष्टचन्द्रालोके दुर्द्दिनान्धकारे आगता भवती?।

(न) चेटीति। तथा करोति — गात्रप्रोञ्छनेन आनीतपेटिकादिभ्यो वसनद्वय-माविष्कृत्य तत्परिधापनादिना च शुश्रूषयतीत्यर्थः।

(प) विदू इति। अपवारितकेन अपवारितप्रकारेण। संज्ञायां कप्रत्ययः।

(फ) चारु इति। एवं स्वाभिमतः प्रश्नः। कौतुकलाभाय अनुज्ञेयम्।

(ब) विदू इति। प्रनष्टो मेघावरणेन तिरोहितश्चन्द्रालोको यस्मिन् तस्मिन्।

দাসী। আর্য্যমৈত্রেয়! আপনি থাকুন, আমিই আর্য্যার পরিচর্য্যা করিব। (তাহাই করিতে লাগিল)

বিদূষক। (চারুদত্তের প্রতি চুপি চুপি) বয়স্য! আমি বসন্তসেনাকে কিছু জিজ্ঞাসা করি?।

চারুদত্ত। এই রূপ কর।

বিদূষক। (প্রকাশ্যে) চন্দ্রালোকবিহীন এইরূপ দুর্দ্দিনের অন্ধকারে আপনি কি নিমিত্ত আসিয়াছেন?।

চেটী। অজ্জএ! উজুও বম্হণো। [ভ]

বস। ণং ণিউণোত্তি ভণাহি। [ম]

চেটী। এসাক্খু অজ্জআ এব্বং পুচ্ছিদুং আঅদা, 'কিত্তিঅং তাএ রঅণাবলীএ মুল্লং'ত্তি। [য]

বিদূ। জনান্তিকম্। ভো! ভণিতং মএ, জধা অপ্পমুল্লা রঅণাবলী, বহুমুল্লং সুবণ্ণভণ্ডঅং, ণ পরিতুট্টা, অবরং মগ্গিদুং আঅদা। [র]

(ভ) আর্য্যে ঋজুকো ব্রাহ্মণঃ।

(ম) ননু নিপুণ ইতি ভণ।

(য) এষা খলু আর্য্যা এব প্রষ্টুমাগতা,—'কিয়ত্তস্যা রত্নাবল্যা মূল্যম্' ইতি।

(র) ভোঃ! ভণিতং ময়া,—যথা অল্পমূল্যা রত্নাবলী, বহুমূল্যং সুবর্ণভাণ্ডকম্, ন পরিতুষ্টা, অপরং মার্গয়িতুমাগতা।

(ভ) চেটীতি। ঋজুকঃ সরলবুদ্ধিঃ। মদনাবেগাদেবাগতেতি সুবোধবিষয়মপ্যনুক্ত্বা আগমনকারণস্য পৃষ্টত্বাদিতি ভাবঃ।

(ম) বস ইতি। নিপুণশ্চতুরঃ কূটবুদ্ধিরিতি যাবৎ, অয়ং ব্রাহ্মণ ইতি পূর্ব্বেণান্বয়ঃ, মদাগমনপ্রয়োজনম্ মম্মুখে নৈব প্রকাশয়িতুমভিপ্রেতত্বাদিতি ভাবঃ।

দাসী। আর্য্যে! ব্রাহ্মণ সরল মানুষ।

বসন্তসেনা। ওহে! 'চতুর' এই কথা বল।

দাসী। এই আর্য্যা, এইরূপ জিজ্ঞাসা করিতে আসিয়াছেন যে, সেই রত্নমালার মূল্য কত'

বিদূষক। (চারুদত্তের প্রতি চুপি চুপি) বয়স্য! আমি ত বলিয়াছি যে অল্পমূল্যা রত্নমালা, আর বহুমূল্য স্বর্ণালঙ্কার; সুতরাং সন্তুষ্ট না হইয়া আরও চাহিতে আসিয়াছে।

चेटी। सा क्खु, अज्जआए अत्तणा केरकेत्ति भणिअ जूदे हारिदा, सोअ सहिओ राअ-वात्थहारी ण जाणीअदि कहिं गदो त्ति। [ल]

विदू। भोदि! मन्तिदं ज्जेव मन्तीअदि। [व]

चेटी। जाव सो अण्णेसीअदि, ताव एदं ज्जेव गेण्ह सुवस्सभण्डअं। इति दर्शयति। [श]

(ल) सा खलु आर्य्यया आत्मीयेति भणित्वा द्यूते हारिता। स च सभिको राजवार्त्ताहारी न ज्ञायते कुत्र गत इति।

(व) भवति! मन्त्रितमेव मन्त्र्यते।

(श) यावत् सः अन्विष्यते, तावदिदमेव गृहाण सुवर्णभाण्डकम्।

(ल) चेटीति। पूर्वं विदूषकेण सुवर्णभाण्डविघटनवृत्तान्तो यथा निवेदितः, चेट्यपि तथैव रत्नावल्या विघटनवृत्तान्तं कौतुकाय निवेदयति सेत्यादि।

(व) विदू इति। मन्त्रितमेव मन्त्र्यते, मया तत्सुवर्णभाण्डहारणं यथा कथितम्, त्वयापि रत्नावलीहारणं तथैव कथ्यते इत्यर्थः। इदन्तु चेटीवाक्यासमाप्तावेवोक्तम्।

(श) चेटीति। वक्तव्यमेव समापयति यावदिति। स सभिकः, अन्विष्यते तस्मा एव रत्नावल्यास्तस्य तस्य वा युष्माकं प्रत्यर्पणार्थमस्माभिर्मार्ग्यते। गृहाण रक्षितुमर्थमिति भावः। दर्शयति सुवर्णभाण्डमिति शेषः। कौतुकार्थोक्तिरियम्।

दासी। আর্য্যা, আপনার বলিয়া সেই রত্নমালা পাশাখেলায় হারিয়াছেন; অথচ সেই সভাপতি রাজার দূত বলিয়া কোথায় গিয়াছেন তাহা জানিতে পারা যায় নাই।

বিদূষক। ওহে! আমি যাহা বলিয়াছিলাম, তাহাই বলিতেছ।

দাসী। যাবৎ সেই সভাপতির অন্বেষণ করি, তাবৎ এই স্বর্ণালঙ্কার গ্রহণ করুন। (এই বলিয়া দেখাইল)

विदूषको विचारयति । (ध)

चेटी । अदिमेत्तं अज्जो णिज्झाअदि, ता किं दिट्ठ-पुरुव्वो दे ? । [स]

विदू । भोदि ! सिप्पकुसलदाए ओबन्धेदि दिट्ठिं । [ह]

चेटी । वञ्चिदोसि दिट्ठीए । तं ज्जेव एदं सुवण्ण-भण्डअं । [च]

विदू । सहर्षम् । भो वअस्स ! तं ज्जेव एदं सुवण्ण-भण्डअं, जं अम्हाणं गेहे चोरेहिं अवहिदं । (क)

(स) अतिमात्रमार्य्यो निध्यायति, तत् किं दृष्टपूर्वं ते ? ।

(ह) भवति ! शिल्पकुशलतया अवबध्नाति दृष्टिम् ।

(च) आर्य्य ! वञ्चितोऽसि दृष्ट्या । तदेवैतत् सुवर्णभाण्डकम् ।

(क) भो वयस्य ! तदेवैतत् सुवर्णभाण्डकम्, यदस्माकं गेहे चौरैरपहृतम् ।

(ध) विदू इति । विचारयति पूर्वं निक्षेपीकृतं सुवर्णभाण्डमिदं न वेति दृष्टि विशेषेण विविनक्ति ।

(स) चेटीति । निध्यायति अवलोकयति । इयमपि कौतुकोक्तिः ।

(ह) विदू इति । शिल्पकुशलतया निर्म्माणनैपुण्येन, मम दृष्टिम्, अवबध्नाति आबद्धीकरोति, अयमलङ्कार इति शेषः । सौन्दर्य्यातिरेकादेवेदमतिमात्रं पश्यामि न पुनस्तदेवेदं न वेति विवेचनायेति भावः ।

বিদূষক বিচার করিতে লাগিল।

দাসী। আপনি যে অত্যন্ত দেখিতেছেন, তবে কি আপনার ইহা পূর্ব্বে দেখা ছিল ? ।

বিদূষক। ওহে ! নির্ম্মাণনৈপুণ্যবশতঃ আমার দৃষ্টি আবদ্ধ করিতেছে।

দাসী। দৃষ্টি তোমাকে বঞ্চনা করিতেছে। সেই স্বর্ণালঙ্কারই এই

চারু। বয়স্য!

যোঽস্মাভিশ্চিন্তিতো ব্যাজঃ কর্ত্তুং ন্যাসপ্রতিক্রিয়াম্।
স এব প্রস্তুতোঽস্মাকং কিন্তু সত্যং বিড়ম্বনা ॥৩৮॥

বিদূ। ভো বঅস্স! সচ্চং সবামি বহ্মণ্ণেণ। (খ)

চারু। প্রিয়ং নঃ প্রিয়ম্। (গ)

(খ) ভো বয়স্য! সত্যং শপে ব্রাহ্মণ্যেন।

য ইতি। ন্যাসস্য বসন্তসেনয়া পূর্ব্বং নিক্ষিপ্তস্য চৌরৈরপহৃতস্য তস্য সুবর্ণভাণ্ডস্য প্রতিক্রিয়াং প্রতিশোধং কর্ত্তুম্, অস্মাভির্যো ব্যাজশ্ছলম্, চিন্তিতশ্চিন্তয়িত্বা আবিষ্কৃতঃ আসাং সমীপে প্রকাশিত ইত্যর্থঃ, অস্মাকং সমীপেঽপি, স এব তাদৃশ এব ব্যাজঃ, প্রস্তুত আভিঃ প্রক্রান্তঃ প্রকাশিতঃ। তথা চ যথা বয়ং তস্য সুবর্ণভাণ্ডস্য দ্যূতহারণরূপং ছলং প্রকটিতবন্তঃ, ইমা অপি তথৈব তস্যা রত্নাবল্যা দ্যূতহারণরূপং ছলং প্রকাশিতবত্য ইতি সরলার্থঃ। কিন্তু বিড়ম্বনা ইয়ং প্রতারণা ইতি সত্যম্। তথা চ নেদং তৎ সুবর্ণভাণ্ডম্, কিন্তু অস্মাকমাশ্বাসনায় তত্তুল্যমেব অলঙ্কারান্তরং প্রদর্শিতমিতি ভাবঃ ॥৩৮॥

(খ) বিদূ ইতি। ব্রাহ্মণ্যেন ব্রাহ্মণত্বেন সত্যং শপে 'তদেবেদং সুবর্ণভাণ্ডম্' ইতি ধ্রুবং শপথং করোমি।

(গ) চারু ইতি। নঃ অস্মাকম্, প্রিয়ং তস্যৈব পুনর্দর্শনমিতি শেষঃ।

বিদূষক। (আনন্দের সহিত) সখে! সেই স্বর্ণালঙ্কারই এই, যাহা আমাদের বাড়ী হইতে চোরে নিয়াছিল।

চারুদত্ত। সখে! গচ্ছিত স্বর্ণালঙ্কারের প্রতিশোধ করিবার জন্য, আমরা যে ছল আবিষ্কার করিয়াছিলাম, ইহারাও আমাদের নিকট সেই ছলই আরম্ভ করিয়াছে। কিন্তু বাস্তবিকপক্ষে ইহা বিড়ম্বনা ॥৩৮॥

বিদূষক। বয়স্য! আমি ব্রাহ্মণত্ব দ্বারা সত্য শপথ করিতেছি যে সেই স্বর্ণালঙ্কারই এই।

চারুদত্ত। প্রিয়, আমাদের প্রিয়ই বটে।

विदू । जनान्तिकम् । भो ! पुच्छामि णं कुदो एदं समासादिदं त्ति ? । (घ)

चारु । को दोषः ? । (ङ)

विदू । चेट्याः कर्णे । एव्वं विअ ? । (च)

चेटी । विदूषकस्य कर्णे । एव्वं विअ । (छ)

चारु । किमिदं कथ्यते ? । किं वयं वाह्याः ? । (ज)

विदू । चारुदत्तस्य कर्णे । एव्वं विअ । (झ)

(घ) भोः ! पृच्छामि ननु कुत इदं समासादितमिति ।

(च) एवमिव ।

(छ) एवमिव ।

(झ) एवमिव ।

(ङ) चारु इति । को दोषः ? तादृशप्रश्ने इति शेषः ।

(च) विदू इति । एवमिव ? केनचित् युष्मत्प्रणयिना अस्मदगृहादपहृत्य पुनर्युष्मभ्यं दत्तं किमित्यर्थः ।

(छ) चेटीति । स्वीकरोति एवमिवेति ।

(ज) चारु इति । इदं गुप्तम् । वाह्या बहिर्लोकाः, यत् श्रोतुमपि न शक्नुम इति भावः ।

(झ) विदू इति । एवमिवेति प्राक् प्रदर्शितमेव गुप्तं ब्रवीतीति बोध्यम् ।

বিদূষক। (চারুদত্তের প্রতি চুপি চুপি) বয়স্য! আমি জিজ্ঞাসা করি যে ইহা কোথা হইতে পাইলে ?।

চারুদত্ত। দোষ কি ?।

বিদূষক। (দাসীর কাণে কাণে) এই রকম কি ?।

দাসী। (বিদূষকের কাণে কাণে) এই রকমই।

চারুদত্ত। তোমরা কি বলিতেছ ?। আমরা কি বাহিরের লোক ?।

चारु। भद्रे ! सत्यं तदेवेदं सुवर्णभाण्डम् ?। (ञ)

चेटी। अज्ज ! अधइं। (ट)

चारु। भद्रे ! न कदाचित् प्रियनिवेदनं निष्फलीकृतं मया। तद्गृह्यतां पारितोषिकमिदमङ्गुलीयकम्। इत्यनङ्गुलीयकं हस्तमवलोक्य लज्जां नाटयति। (ठ)

वस। आत्मगतम्। अदो ज्जेव कामीअसि। (ड)

चारु। जनान्तिकम्। भोः ! कष्टम्। (ढ)

(ट) आर्य्ये ! अथकिम्।
(ड) अतएव काम्यसे।

(ञ) चारु इति। अत्र काक्वा प्रश्नो व्यज्यते।

(ट) चेटीति। अथकिं तदेवेदमित्यर्थः।

(ठ) चारु इति। निक्षिप्तस्य तस्यैव सुवर्णभाण्डस्य पुनः प्राप्त्या आत्मकलङ्कः सर्व्वथा निरस्त इत्यस्य प्रीतिरिति बोध्यम्। नाटयति अभिनयति।

(ड) वस इति। अतएव सर्व्वत्र न्याय्यकारित्वादेव। काम्यसे रमणायाभिलष्यसे। एतेनास्या अपि गुणानुरागो व्यज्यते।

(ढ) चारु इति। जनान्तिकं केवलविदूषकान्तिक एवेत्यर्थः। अस्य लक्षणमुक्तम्।

विदूषक। (চারুদত্তের কাণে কাণে) এই রকম।

চারুদত্ত। ভদ্রে ! সত্য কি সেই স্বর্ণালঙ্কারই এই ?।

দাসী। আর্য্য ! হাঁ।

চারুদত্ত। ভদ্রে আমি কখনও প্রিয় নিবেদন নিষ্ফল করি নাই। অতএব পারিতোষিক এই অঙ্গুরীয়কটী গ্রহণ কর। (ইহা বলিয়া, অঙ্গুরীয়কশূন্য হস্ত দর্শন করিয়া লজ্জা অভিনয় করিলেন)।

বসন্তসেনা। (স্বগত) এই জন্যই আপনাকে কামনা করি।

धनैर्वियुक्तस्य नरस्य लोके किं जीवितेनादित एव तावत् ।
यस्य प्रतीकारनिरर्थकत्वात् कोपप्रसादा विफलीभवन्ति ॥४०॥

अपि च ।

पक्षविकलश्च पक्षी, शुष्कश्च तरुः सरश्च जलहीनम् ।
सर्पश्चोद्धृतदंष्ट्रस्तुल्यं लोके दरिद्रश्च ॥४१॥

धनैरिति । लोके जगति, धनैर्वियुक्तस्य विच्छिन्नस्य निर्धनस्य नरस्य, आदित एव प्रथमत एव जन्मत एवेत्यर्थः, किं तावत् जीवितेन जीवनेन फलमिति शेषः, किमपि नेत्यर्थः। अत्र हेतुमाह- यस्य नरस्य, प्रतीकारे कोपप्रसादयोरेव प्रतिक्रियायां कर्त्तव्यव्यापारे इत्यर्थः निरर्थकत्वादात्मनोनिर्निमित्तत्वादशक्तत्वादित्यर्थः, कोपप्रसादाः क्रोधसन्तोषाः, विफलीभवन्ती। तथा च धनाभावेन अपकारिणः प्रत्यपकारासामर्थ्यात् उपकारिणः प्रत्युपकारासामर्थ्याच्च यस्य क्रोधः सन्तोषश्च विफलीभवति, तस्य जन्मतः परमेव मरणमुचितमिति सरलार्थः। अतएव अस्मै पारितोषिकदानासम्भवेन सन्तोषस्य वैफल्यात् ममापि जीवनं निष्फलमेवेति भावः।

अत्रएवात्र अप्रस्तुतनिर्धननरसामान्यात् निर्धननरविशेषचारुदत्तप्रतीतेरप्रस्तुतप्रशंसा पूर्व्वार्द्धं प्रति परार्द्धस्य हेतुत्वात् वाक्यार्थहेतुकं काव्यलिङ्गञ्च अनयोरङ्गाङ्गिभावेन सङ्करः।

वसन्ततिलका वृत्तम् ॥४०॥

पक्षेति। पक्षविकलः पतत्रविहीनः पक्षी च, शुष्कस्तरुश्च, जलहीनं सरः सरोवरञ्च, उद्धृतदंष्ट्र उत्पाटितविषदन्तः सर्पश्च, दरिद्रो जनश्च, एतत् सर्व्वं लोके जगति

চারুদত্ত। (বিদূষকের প্রতি চুপি চুপি) হায়! কি কষ্ট।

জগতে নির্ধন লোকের জন্ম হইতেই জীবনের ফল কি? উপযুক্ত কার্য্য করিতে অসমর্থ বলিয়া, যাহার ক্রোধ ও প্রসন্নতা নিষ্ফল হইয়া যায় ॥৪০॥

আর, পক্ষবিহীন পক্ষী, শুষ্ক বৃক্ষ, জলশূন্য সরোবর, উদ্ধৃতদন্ত সর্প এবং নির্ধন মনুষ্য; জগতে এই সকলই সমান ॥৪১॥

अपि च।

> शून्यैर्गृहैः खलु समाः पुरुषा दरिद्राः
> कूपैश्च तोयरहितैस्तरुभिश्च शीर्णैः।
> यद्दृष्टपूर्व्व-जन- सङ्गम-विस्मृताना- मालोपमा
> मेवं भवन्ति विफलाः परितोषकालाः ॥४२॥

तुल्यं समानम् ; उड्डयनस्य छायादानस्य जलदानस्य दर्शनस्य अभीष्टकार्य्यकरणस्य च असम्भवादिति भावः।

अत्रापि पूर्व्ववदप्रस्तुतप्रशंसा आर्थी मालोपमा चानयोरपि पूर्व्ववत् सङ्करः।

आर्य्या जातिः ॥४१॥

शून्यैरिति। दरिद्राः पुरुषाः, शून्यैर्जनरहितैर्गृहैः, तोयरहितैः कूपैश्च, शीर्णैः शुष्कैस्तरुभिश्च, खलु निश्चितम्, समाः समानाः। यद् यस्मात्, दृष्टपूर्व्वस्य ज्ञातसौहार्द्दस्येत्यर्थः जनस्य सङ्गमेन सम्मिलनेन विस्मृतानां विस्मृतात्मदैन्यानां तेषां दरिद्रपुरुषाणामिति तात्पर्य्यम्, परितोषकालाः सन्तोषप्रयुक्तदाना-दिकरणसमयाः, एवमनेन प्रकारेण विफला भवन्ति। तथा च दृष्टपूर्व्वाया वसन्तसेनायाः सम्मिलनानन्देन मया खल्वात्मदैन्यं सर्व्वथैव विस्मृतम्, तेन च अङ्गुलीयकदाने प्रवृत्तस्य मे तदङ्गुलीयकाभावादयं परितोषकालो विफल एव भूत इति भावः।

अत एवात्रापि पूर्व्ववदप्रस्तुतप्रशंसामालोपमयोः सङ्करः।

वसन्ततिलका वृत्तम् ॥ ४२ ॥

আরও, নির্ধন মানব, শূন্য গৃহ, জলহীন কূপ ও জীর্ণ বৃক্ষের সমান; যেহেতু পূর্ব্বপরিচিত (বন্ধু) জনের সম্মেলনবশতঃ আত্মবিস্মৃত নির্ধনের সন্তোষের সময়গুলি এই ভাবেই বিফল হইয়া যায় ॥৪২॥

विदू। भो अलं अदिमेत्तं सन्तप्पिदेण। प्रकाशं सपरिहासम्। भोदि! समप्पीअदु मम केरिआ ण्हाण-साडिआ। (थ)

वस। अज्जचारुदत्त! जुत्तं णेदं इमाए रअणावलीए इमं जणं तुलइदुं। (त)

(थ) भोः! अलमतिमात्रं सन्तापितेन। हे भवति! समर्प्यतां मम स्नानशाटिका।

(त) आर्य्यचारुदत्त! युक्तं नेदम् अनया रत्नावल्या इमं जनं तूलयितुम्।

(थ) विदू इति। सन्तापितेन आत्मनैव दारिद्र्यदुःखं विभाव्य सन्तप्तीकृतेन मनसेत्यर्थः। स्नानशाटिका स्नानकाले परिधेयवस्त्रम्। अत्र स्नानशाटिका-समर्पणोपन्यासेन पूर्वदत्तरत्नावलीप्रत्यर्पणं सूचितम्। आत्मनः सुवर्णभाण्डप्राप्तौ तद्रत्नावलीप्रत्यर्पणस्य सर्वथैवौचित्यादिति भावः।

(त) वस इति। रत्नावल्या सुवर्णभाण्डस्थाने दत्तयेत्यर्थः, इमं जनं मामिति तात्पर्य्यम्, तूलयितुं तूलकवत् लघूकर्त्तुम्। तथा च तस्य विघटितस्य सुवर्णभाण्डस्य स्थाने यदि ततोऽनल्पमूल्यं यत्किञ्चिदपि द्रव्यं न दीयते तदा यदि वसन्तसेना राजद्वारे तदर्थमभियोगं कुर्य्यात् लोकसमाजे वा निन्देदिति मत्वैव सा रत्नावली दत्ता; तादृशसम्भावनयैव च मां भवान् तूलकवत् लघुमेव कृतवान्। वस्तुतो नाहं तत्सुवर्णभाण्डार्थं किञ्चिदप्यकरिष्यमिति भावः। एतेन वसन्तसेनाया अपि महदौदार्य्यं व्यज्यते।

বিদূষক। সখে! বেশী সন্তাপ করিবার প্রয়োজন নাই। (প্রকাশ্যে পরিহাসের সহিত) বসন্তসেনা! আমার স্নানের শাড়ীখানি দিন।

বসন্তসেনা। আর্য্য চারুদত্ত! এই রত্নমালাদ্বারা এই ব্যক্তিকে তুলার ন্যায় করা আপনার সঙ্গত হয় নাই।

चारु । सविलक्षस्मितम् । वसन्तसेने ! पश्य पश्य (थ)

कः श्रद्धास्यति भूतार्थं सर्वो मां तुलयिष्यति ।
शङ्कनीया हि लोकेऽस्मिन् निष्प्रतापा दरिद्रता ॥ ४३ ॥

विदू । हञ्जे ! किं भोदीए इध ज्जेव सुविदव्वं ? । [द]

चेटी । विहस्य । अज्जमित्तेअ ! अदिमेत्तं दाणिं उज्जुअं अत्ताणअं दंसेसि । [ध]

विदू । भो वयस्स ! एसो क्खु ओसारन्तो विअ सुहो-

(थ) हञ्जे ! किं भवत्या इहैव स्वप्तव्यम् ? ।

(द) आर्य्यमैत्रेय ! अतिमात्रमिदानीम् ऋजुमात्मानं दर्शयसि ।

(थ) चारु इति । विलक्षस्मिताभ्यां लज्जामन्दहासाभ्यां सहेति सविलक्षस्मितम् ।
क इति । व्याख्यातपूर्वमिदं पद्यम् ।

(द) विदू इति । हञ्जे इति सखीभावेन वसन्तसेनाया एव सम्बोधनम् । इहैव गृहे, स्वप्तव्यं रात्रौ शयितव्यम् । तथा च तदा तदर्थमायोजनं करोमीति भावः ।

(ध) चेटीति । रात्राविह शयनार्थमेवेयमागता इति बुद्ध्वापि तदर्थं प्रश्नकरणादिति भावः ।

চারুদত্ত। (লজ্জা ও অল্পহাস্যের সহিত) বসন্তসেনা! দেখ দেখ—
যথার্থ বিষয় কে বিশ্বাস করিবে? সকলেই আমাকে তুলার ন্যায় লঘু মনে করিবে। কারণ এই জগতে প্রভাববিহীন দরিদ্রতাকে সকলেই আশঙ্কা করে ॥৪৩॥

বিদূষক। বসন্তসেনা! তুমি কি এইখানেই শয়ন করিবে?।

দাসী। (হাস্য করিয়া) আর্য্যমৈত্রেয়! তুমি যে এখন আপনাকে বড়ই সরল বলিয়া দেখাইতেছ।

वविट्ठं जणं पुणोवि वित्थारिवारिधाराहिं पविट्ठो पज्जस्सो । [न]

चारु । सम्यगाह भवान् ।

अमूर्हि भित्त्वा जलदान्तराणि पङ्कान्तराणीव मृणालसूच्यः ।
पतन्ति चन्द्रव्यसनाद्विमुक्ता दिवोऽश्रुधारा इव वारिधाराः ॥४४॥

(न) भो वयस्य ! एष खलु अपसारयन्निव सुखोपविष्टं जनं पुनरपि विस्तारि-वारि-धाराभिः प्रविष्टः पर्जन्यः ।

(न) विदू इति । एष पर्जन्यो मेघः, विस्तरिवारिधाराभिर्विशालवृष्टिभिः, सुखोपविष्टं जनम्, अपसारयन्निव गृहाभ्यन्तरादौ प्रेरयन्निव प्रविष्टः अस्यां वृक्षवाटिकायामुपस्थितः ।

अमूरिति । हि तथाहि, अमूर्वारिधाराः, मृणालस्य सूच्यः सूक्ष्माग्रभागाः, पङ्कान्तराणीव संसक्तकर्द्दमाभ्यन्तराणीव, जलदान्तराणि मेघाभ्यन्तरदेशान्, भित्त्वा विदार्य्य, चन्द्रस्य इन्दोः पत्युश्च व्यसनात् मेघावरणरूपविपत्तेः मरणरूपविपत्तेश्च हेतोः, विमुक्ता आकाशान्नयनाच्च स्खलिताः, दिव आकाशस्य भार्य्यायाश्च, अश्रुधाराः पतिव्यसनजनिता नयनधारा इव पतन्ति ।

अत्र पूर्वार्द्धे श्रौती उपमा, परार्द्धे तु चन्द्रदिवोर्लिङ्गसाम्येन नायकनायिकाव्यवहारसमारोपात् समासोक्तिर्जात्युत्प्रेक्षा च इत्येतेषामङ्गाङ्गितया सङ्करः ।

उपजातिर्वृत्तम् ॥ ४४ ॥

বিদূষক। সখে! এই মেঘ বিস্তৃত বৃষ্টিধারা দ্বারা সুখোপবিষ্ট লোকদিগকে যেন সরাইতে থাকিয়া, আবারও আকাশে প্রবেশ করিয়াছে।

চারুদত্ত। তুমি ঠিক্ বলিয়াছ।

কারণ, মৃণালের অগ্রভাগ যেমন অন্য কর্দ্দম বিদারণ করে, সেইরূপ এই বৃষ্টিধারা, অন্য মেঘ বিদারণ করিয়া, চন্দ্রের বিপত্তিনিবন্ধন আকাশকর্ত্তৃক বিমুক্ত অশ্রুধারার ন্যায় পতিত হইতেছে ॥৪৪॥

अपि च।

धाराभिरार्य्यजनचित्तसुनिर्म्मलाभिः
चण्डाभिरर्जुन-शर-प्रतिकर्कशाभिः।
मेघाः स्रवन्ति बलदेव-पट-प्रकाशाः
शक्रस्य मौक्तिकनिधानमिवोद्गिरन्तः॥ ४५॥

प्रिये! पश्य पश्य—

एतैः पिष्ट-तमाल-वर्णकनिभैरालिप्तमम्भोधरैः
संसक्तैरुपवीजितं सुरभिभिः शीतैः प्रदोषानिलैः।

धाराभिरिति। बलदेवस्य नीलाम्बरस्य बलरामस्य यः पटो नीलवसनं तद्वत् प्रकाशो दीप्तिर्येषां ते तादृशा मेघाः, आर्य्यजनस्य साधुलोकस्य चित्तवत् सुनिर्म्मलाभिः, तथा अर्जुनशरवत् प्रतिकर्कशाभिरत्यन्तकठिनाभिः, अतएव चण्डाभिर्भयानकाभि धाराभिः, शक्रस्य दिवस्पतेरिन्द्रस्य, मौक्तिकनिधानं मुक्तानिधिं निधितो मुक्ताराशिमित्यर्थः, उद्गिरन्तो निःसारयन्त इव, स्रवन्ति गलन्ति।

अत्र लुप्तोपमानुप्राणिता क्रियोत्प्रेक्षा सङ्कीर्य्यते। तथा तृतीयपादे वाक्यसमाप्तावपि तदङ्गतस्य मेघा इत्यस्य विशेषणतया चतुर्थपादोपादानात् समाप्तपुनरात्ततादोषः; स च तृतीयचतुर्थपादयोः पौर्व्वापर्य्यविपर्य्यासेन समाधेयः।

वसन्ततिलका वृत्तम् ॥ ४६ ॥

एतैरिति। अभीष्टसमागमे मेघेन शुल्कदायिना नायकेन च सह सम्मिलनै

আরও, বলরামের বস্ত্রের ন্যায় নীলবর্ণ মেঘ সকল, সাধুলোকের চিত্তের ন্যায় নির্ম্মল এবং অর্জ্জুন-বাণের ন্যায় কঠিন ও ভয়ঙ্কর ধারা দ্বারা ইন্দ্রের ভাণ্ডার হইতে মুক্তারাশি যেন উদ্গিরণ করতঃ গলিত হইতেছে ॥৪৫॥

প্রিয়ে দেখ দেখ—

মর্দ্দিত তমালপত্রের ন্যায় নীলবর্ণ এই মেঘ সমূহ, আকাশকে ব্যাপ্ত

एषाऽम्भोद-समागम-प्रणयिनी स्वच्छन्दमभ्यागता
रक्ता कान्तमिवाम्बरं प्रियतमा विद्युत् समालिङ्गति
॥ ४६ ॥

वसन्तसेना शृङ्गारभावं नाटयन्ती चारुदत्तमालिङ्गति ।

प्रणयिनी अभिलाषिणी, स्वच्छन्दं यथेच्छम, अभ्यागता उपस्थिता, रक्ता लोहितवर्णा अनुरक्ता च, एषा विद्युत्, प्रियतमा स्त्री, कान्तं दयितमिव, पिष्टं शिलादौ मर्द्दितं यत् तमालं तमालपत्रं तदेव वर्णकं रञ्जनद्रव्यं तन्निभैः तत्तुल्यैः कृष्णवर्णैः, अम्भोधरैर्मेघैः, आलिप्तं व्याप्तमनुलिप्तञ्च, तथा संसक्तैः पिण्डीभूतैर्वितायैः, सुरभिभिर्घ्राणतर्पकैः, शीतैः शीतलैः, प्रदोषानिलैः सायंकालीनवायुभिः, उपवीजितं संश्लिष्टम्, अम्बरमाकाशम्, समालिङ्गति सुसंयुक्तं करोति आश्लिष्यति च ।

अत्र लिङ्गसाम्येन विद्युति स्त्रियाः नायिकायाः अम्भोदे मुल्कदायिनी नामकस्य अम्बरे अनुरागभाजो नायकस्य च व्यवहारसमारोपात् समासोक्तिः प्रथमपादगतया लुप्तोपमया चतुर्थपादगतया श्रौतोपमया च गुणभावेनाङ्गभूतया सङ्कीर्य्यते । तेन च 'वसन्तसेने ! त्वमपि मामेवम् समालिङ्ग' इति वस्तु व्यज्यत इत्यलङ्कारेण वस्तुध्वनिः ।

अतएव च प्रार्थना नाम गर्भसन्धेरङ्गम् । तथा च दर्पणे—
'रतिहर्षोत्सवानान्तु प्रार्थनं प्रार्थना भवेत् ।'

शार्द्दूलविक्रीडितं वृत्तम् ॥४७॥

করিয়াছে এবং পিণ্ডীভূত, সুগন্ধি ও শীতল প্রদোষবায়ু, আকাশকে ব্যজন করিতেছে; আবার অনুরক্ত প্রিয়তমা, যেমন প্রিয়তমকে আলিঙ্গন করে, সেইরূপ মেঘ-সম্মেলনাভিলাষিণী, ইচ্ছানুসারে উপস্থিত ও রক্তবর্ণ এই বিদ্যুৎ, আকাশকে আলিঙ্গন করিতেছে ॥৪৫॥

वसन्तसेना शृङ्गारभावं नाटयन्ती चारुदत्तमालिङ्गति ।

चारु । स्पर्शं नाटयन् प्रत्यालिङ्ग्य ।

भो मेघ ! गम्भीरतरं नद त्वं, तव प्रसादात् स्मरपीड़ितं मे ।
संस्पर्शरोमाञ्चितजातरागं कदम्बपुष्पत्वमुपैति गात्रम् ॥ ४७ ॥

विदू । दासीए पुत्त ! दुद्दिण ! अणज्जो दाणिं सि तुमं, जं अत्तभोदिं विज्जुआए भाआवेसि । (प)

(प) दास्याः पुत्र ! दुर्द्दिन ! अनार्य्य इदानीमसि त्वम्, यदत्र-भवतीं विद्युता भाययसि ।

भो इति । भो मेघ ! त्वं गम्भीरतरं नद ध्वन । कुत इत्याह-तव प्रसादात् नादेनानुग्रहात्, स्मरपीड़ितं कामार्त्तम्, मे मम गात्रम्, संस्पर्शेण वसन्तसेनाया आलिङ्गनेन रोमाञ्चितञ्च तत् जातो रागः सुरतानुरागो यस्मिन् तच्चेति तत्तथोक्तं सत्, कदम्बपुष्पत्वं कदम्बपुष्पवत् परिस्फीतत्वम्, उपैति प्राप्नोति दयितान्तिके ईदृशगात्रभाव-लाभ आमोदायैवेति भावः ।

अत्र कदम्बपुष्पत्वं कदम्बपुष्पतुल्यत्वमिति साद्दश्याक्षेपादसम्भवद्वस्तुसम्बन्धा निदर्श-नालङ्कारः । उपजातिर्वृत्तम् ॥४७॥

(प) विदू इति । अनार्य्यः असाधुः । अत्र भवतीं माननीयां वसन्तसेनाम् ।

বসন্তসেনা শৃঙ্গারের অবস্থা অভিনয় করতঃ চারুদত্তকে আলিঙ্গন করিল।

চারুদত্ত। (স্পর্শসুখ অভিনয় করতঃ প্রত্যালিঙ্গন করিয়া)

হে মেঘ! তুমি অতিগম্ভীরভাবে গর্জন কর; তোমার অনুগ্রহে কামার্ত্ত এবং প্রিয়াস্পর্শে রোমাঞ্চিত ও জাতানুরাগ আমার গাত্র, কদম্বপুষ্পত্ব প্রাপ্ত হইয়াছে ॥৪৭॥

বিদূষক। বাঁদীর পো! দুর্দ্দিন! এখন তুই বড়ই অসৎ হইয়াছিস্; যে হেতু, তুই বিদ্যুৎ দ্বারা বসন্তসেনাকে ভীত করিতেছিস্।

चारु। वयस्य ! नार्हस्युपालब्धुम् ।

वर्षशतमस्तु दुर्द्दिनमविरतधारं शतह्रदा स्फुरतु ।

अस्मद्विधदुर्लभया यदहं प्रियया परिष्वक्तः ॥ ४८ ॥

अपि च। वयस्य !

धन्यानि तेषां खलु जीवितानि ये कामिनीनां गृहमागतानाम् ।

आर्द्राणि मेघोदकशीतलानि गात्राणि गात्रेषु परिष्वजन्ति ॥४८॥

अत्र त्रोटकं नाम गर्भसन्ध्यङ्गम्— "त्रोटकं पुनः। संरब्धवाक्" इति दर्पणवचनात् ।

वर्षेति। वर्षशतं यावत्, अविरता धारा वृष्टिधारा यस्मिन् तत्तादृशं दुर्द्दिनमस्तु शतह्रदा विद्युत् स्फुरतु उन्मिषतु च। यद् यस्मादहम्, अस्मद्विधानां दरिद्रजनानां दुर्लभया धनप्राप्यत्वेन दुष्प्रापया, प्रियया वसन्तसेनया, परिष्वक्तः आलिङ्गितः। एतेन वेश्यासु वसन्तसेनायाः परमोत्कर्षः सूचितः ।

अतएवात्र उदाहरणं नाम गर्भसन्ध्यङ्गम्। यथा दर्पणे—

"उदाहरणमुत्कर्षयुक्तं वचनमुच्यते ।" आर्य्या जातिः ॥४८॥

धन्यानीति। ये जनाः, गृहमागतानां स्वयमेव स्वगृहे उपस्थितानाम्, कामिनीनां कामुकीनां स्त्रीणाम्, मेघोदकशीतलानि आर्द्राणि गात्राणि अङ्गानि गात्रेषु स्वाङ्गेषु, परिष्वजन्ति आलिङ्गन्ति, तेषां खलु जनानाम्, जीवितानि धन्यानि। सुतरां स्वयमेवागतगृहमागताया वसन्तसेनाया ईदृश्यालिङ्गनलाभान्ममापि जीवितं धन्यमेवेति भावः

চারুদত্ত। সখে! তুমি উহাকে তিরস্কার করিতে পার না।

শত বৎসর যাবৎ অবিরত ধারায় দুর্দ্দিন হউক এবং বিদ্যুৎস্ফুরিত হইতে থা'ক। যে হেতু, আমাদের মত লোকের পক্ষে দুর্লভ প্রিয়তমা আমাকে আলিঙ্গন করিয়াছেন ।৪৮।

আরও, সখে! তাহাদের জীবনই ধন্য; যাহারা, গৃহে স্বয়ং আগত

प्रिये ! वसन्तसेने !

स्तम्भेषु प्रचलित-वेदि-सञ्चयान्तं
शीर्णत्वात् कथमपि धार्य्यते वितानम् ।
एषा च स्फुटित-सुधा-द्रवानुलेपात्
संक्लिन्ना सलिल-भरेण चित्रभित्तिः ॥ ५० ॥

ऊर्द्ध्वमवलोक्य । अये ! इन्द्रधनुः । प्रिये ! पश्य पश्य—

अतएवात्र अप्रस्तुतजनसामान्यात् चारुदत्तरूपजनविशेषप्रतीतेरप्रस्तुतप्रशंसालङ्कारः । इन्द्रवज्रा वृत्तम् ॥४९॥

स्तम्भेष्विति । प्रचलितो वायुवेगेन कम्पितः वेदिसञ्चये उपरिबद्धभूमिसमूहनिकटे अन्तः प्रान्तभागो यस्य तत्ताद्दृशम्, वितानं चन्द्रातपः, शीर्णत्वात् स्तम्भानामेव पुरातनतया जीर्णत्वात् हेतोः, कथमपि नितान्तकष्टेन, स्तम्भेषु धार्य्यते बन्धनेन रक्ष्यते । एतेन वितानस्य नितान्तसञ्चलनात् जीर्णस्तम्भानामेव महती पतनाशङ्का सूच्यते । एषा च चित्रा नानास्थाने स्खलितमयतया विचित्ररूपा भित्तिः, स्फुटित-सुधाद्रवानुलेपात् सुधातुल्यशुभ्रवर्णस्य चूर्णलेपस्य त्रुटितत्वाद्धेतोरित्यर्थः, सलिलभरेण त्रुटितचूर्णलेपरन्ध्रतः प्रविष्टेन वृष्टिजलप्रवाहेण संक्लिन्ना अत्यन्तमेव क्लिन्ना । अत एवास्या अपि जीर्णभित्तेर्नितरामेव पतनाशङ्केति भावः ।
प्रहर्षिणी वृत्तम् ॥ ५० ॥

কামিনীদিগের বৃষ্টিজলে শীতল ও আর্দ্র গাত্র, গাত্রে রাখিয়া আলিঙ্গন করিতে পারে ॥৪৯॥

প্রিয়ে ! বসন্তসেনে ! উপরের বেদির নিকটে চন্দ্রাতপের প্রান্তভাগ, বায়ুবেগে অত্যন্ত কম্পিত হইতেছে ; সুতরাং জীর্ণস্তম্ভে উহার বন্ধন, ঐ চন্দ্রাতপকে কোন প্রকারে ধরিয়া রাখিয়াছে । এদিকে চূর্ণের লেপ ভাঙ্গিয়া পড়ায় এই বিচিত্র দেওয়াল, জলের প্রবাহে আর্দ্র হইয়া গিয়াছে ॥৫০॥

विद्युज्जिह्वेनेदं महेन्द्रचापोच्छ्रितायतभुजेन।
जलधर-विवृद्ध-हनुना विजृम्भितमिवान्तरीक्षेण॥ ५१॥

तदेहि, अभ्यन्तरमेव प्रविशाव:। इत्युत्थाय परिक्रामति। (फ)

तालीषु तारं, विटपेषु मन्द्रं, शिलासु रूक्षं, सलिलेषु चण्डम्।
सङ्गीतवीणा इव ताड्यमानास्तालानुसारेण पतन्ति धारा:॥५२॥

विद्युदिति। विद्युदेव जिह्वा लम्बमानत्वात् लोहितवर्णत्वाच्च रसना यस्य तेन, महेन्द्रचापम् इन्द्रधनुरेव उच्छ्रितौ उत्तोलितौ आयतौ दीर्घौ भुजौ परस्परसंलग्न-बाहुद्वयं यस्य तेन, तथा जलधरो मेघ एव विवृद्धा लम्बिता हनुर्यस्य तेन, अन्तरीक्षेण आकाशेन सिंहरूपेणेत्यर्थ:, विजृम्भितमिव जृम्भा कृतेव, लम्बितजिह्वा-दितत्साधर्म्यदर्शनादिति भाव:। एतेन प्रचण्डगर्जनवज्रपतनयो: सम्भावनापि व्यज्यते।

अत्र विद्युदादौ जिह्वात्वाद्यारोप: शाब्द: अन्तरीक्षे सिंहत्वारोपस्तु आर्थ इत्येकदेशविवर्त्ति रूपकं क्रियोत्प्रेक्षया सङ्कीर्य्यते।

आर्य्या जाति:॥ ५१॥

(फ) तदिति। तत् तस्मात् स्तम्भभित्तिभङ्गसम्भवात् प्रचण्डगर्जन-वज्रपतनयो: सम्भवाच्च हेतोरित्यर्थ:।

तालीष्विति। तालानुसारेण गीततालानुसरणेन, ताड्यमाना वाद्यमाना:, सङ्गीत

(উপরের দিকে চাহিয়া) ওহে ইন্দ্রধনু উঠিয়াছে। প্রিয়ে! দেখ দেখ—

আকাশ যেন এই হাই তুলিতেছে; কারণ বিদ্যুৎ ইহার জিহ্বা; ইন্দ্রধনু ইহার উত্তোলিত দীর্ঘবাহু এবং মেঘ ইহার প্রসারিত হনু॥৫১॥

অতএব আইস, আমরা ভিতরে যাই। (এই বলিয়া উঠিয়া পাদক্ষেপ করিতে লাগিলেন)

তালে তালে বাদ্যমান সঙ্গীতবীণার ন্যায় বৃষ্টির ধারা; তালবনে

इति निष्क्रान्ताः सर्वे ।

दुर्दिनो नाम पञ्चमोऽङ्कः ॥०॥

वीणाः सङ्गीतप्रवृत्तवीणा इव, धारा वृष्टिपरम्पराः, तालीषु तालवनेषु, तारमुच्चमुच्चं यथा स्यात्तथा, विटपेषु तरुशाखासु, मन्द्रं गम्भीरं यथा स्यात्तथा, शिलासु प्रस्तरेषु, रुक्षं कर्कशस्वरं यथा स्यात्तथा, एवं सलिलेषु तड़ागादिजलेषु, चण्डं तीव्ररवं यथा स्यात्तथा, पतन्ति, युगपदेवेति भावः ।

अत्र एकस्या एव वृष्टिधारायाः युगपदेव तालीवनाद्यनेकगोचरत्वात् विशेषो नामालङ्कारः श्रौतोपमया सङ्कीर्य्यते ।

इन्द्रवज्रोपेन्द्रवज्रयोर्मेलनादुपजातिर्वृत्तम् ॥ ५२ ॥

इति श्रीहरिदाससिद्धान्तवागीशभट्टाचार्य्यविरचितायां मृच्छकटिकटीकायां वसन्त-सुषमा-समाख्यायां पञ्चमाङ्कविवरणं समाप्तम् ॥ ० ॥

উচ্চশব্দে, বৃক্ষের শাখায় গম্ভীর শব্দে, প্রস্তরের উপর কর্কশশব্দে এবং জলে তীব্রশব্দে পতিত হইতেছে ॥৫২॥

(ইহার পরে সকলে চলিয়া গেল)

দুর্দ্দিননামক পঞ্চম অঙ্ক সমাপ্ত ।

—○*○—

ततः प्रविशति चेटी। *

चेटी। कधं अज्ज वि अज्जआ ण विबुज्झदि। भोदु, पविसिअ पडिबोधइस्सं। इति नाट्येन परिक्रामति। (क)

ततः प्रविशति आच्छादितशरीरा प्रसुप्ता वसन्तसेना।

चेटी। निरूप्य। उत्थेदु उत्थेदु अज्जआ। पभादं संवुत्तं। (ख)

(क) कथमद्यापि आर्य्या न विबुध्यते। भवतु, प्रविश्य प्रबोधयिष्यामि।

(ख) उत्तिष्ठतु उत्तिष्ठतु आर्य्या। प्रभातं संवृत्तम्।

* तत इति। चेटी चारुदत्तस्यैव काचिद्दासी।

তদনন্তর দাসীর প্রবেশ।

দাসী। আর্য্যা বসন্তসেনা এখনও জাগিতেছেন না কেন। হউক, প্রবেশ করিয়া উঁহাকে জাগাই। (এই বলিয়া অভিনয়ের প্রকারে পাদক্ষেপ করিতে লাগিল)

তদনন্তর আবৃতশরীরে নিদ্রিত অবস্থায় বসন্তসেনার প্রবেশ।

দাসী। (দেখিয়া) আর্য্যা উঠুন উঠুন; প্রভাত হইয়াছে।

वस । प्रतिबुध्य । कधं रत्ति ज्जेव पभादं संवुत्तं ? । (ग)

चेटी । अम्हाणं एसो पभादो, अज्जआए उण रत्ति ज्जेव । (घ)

वस । हञ्जे ! कहिं उण तुम्हाणं जूदिअरो ? । (ङ)

चेटी । अज्जए ! वड्ढमाणअं समादिसिअ पुप्फकरण्डअं जिण्णुज्जाणं गदो अज्जचारुदत्तो । (च)

(ग) कथं रात्रिरेव प्रभातं संवृत्तम् ? ।

(घ) अस्माकमेतत् प्रभातम्, आर्य्यायाः पुनः रात्रिरेव ।

(ङ) हञ्जे ! कुत्रेदानीं पुनर्युष्माकं द्यूतकरः ? ।

(च) आर्य्ये ! वर्द्धमानकं समादिश्य पुष्पकरण्डकं जीर्णोद्यानं गत आर्य्यचारुदत्तः ।

(ग) वस इति । एतेन सुरतामोदेन रात्रिमतिवाह्य प्रभातप्रायसमये निद्रा सूचिता ।

(घ) चेटीति । आर्य्यायास्तव, पुनः रात्रिरेव, इदानीमपि निद्रितत्वादिति भावः ।

(ङ) वस इति । द्यूतकरश्चारुदत्तः ।

(च) चेटीति । वर्द्धमानकं तदाख्यं भृत्यम् । पुष्पाणां करण्डकं पात्रविशेष इति पुष्पकरण्डकं नाम जीर्णोद्यानं पुरातनोपवनम् ।

বসন্তসেনা । (জাগিয়া) রাত্রিই প্রভাত হইল কি করিয়া ? ।

দাসী । আমাদের নিকট এটা প্রভাত ; কিন্তু আপনাদের নিকট রাত্রিই ।

বসন্তসেনা । ওলো ! তোমাদের দ্যূতকর কোথায় ? ।

দাসী । আর্য্যে ! আর্য্য চারুদত্ত, বর্দ্ধমানকে আদেশ করিয়া পুষ্পকরণ্ডকনামক জীর্ণোদ্যানে গিয়াছেন ।

वस । किं समादिसिअ ? । (छ)

चेटी । जोएहि रात्तीए पवहणं । वसन्तसेना गच्छदु त्ति । (ज)

वस । हञ्जे ! कहिं मए गन्तव्वं ? । (झ)

चेटी । अज्जए ! जहिं चारुदत्तो । (ञ)

वस । चेटीं परिष्वज्य । सुठ्ठु ण णिज्झाइदो रात्तीए, त[illegible]अज्ज पच्चक्खं पेक्खिस्सं । हञ्जे ! किं पविट्ठा अहं इह अब्भन्तर चदुस्सालअं ? । (ट)

(छ) किं समादिश्य ? ।

(ज) योजय रात्रौ प्रवहणम् । वसन्तसेना गच्छतु इति ।

(झ) हञ्जे ! कस्मिन् मया गन्तव्यम् ? ।

(ञ) आर्य्ये ! यस्मिन् चारुदत्तः ।

(ट) हञ्जे ! सुष्ठु न निध्यातो रात्रौ, तदद्य प्रत्यक्षं प्रेक्षिष्ये । हञ्जे ! किं प्रविष्टा अहमभ्यन्तरचतुःशालकम् ? ।

(ञ) चेटीति । रात्रौ आगामिन्यामिति शेषः । प्रवहणं गोयानम् । गच्छत्विति सम्भावनायां लोट् ।

(ट) वस इति । सुष्ठु सम्यक्, न निध्यातो न दृष्टः; आमोदविह्वलत्वादिति भावः । अद्य दिवस एवेत्यर्थः । प्रेक्षिष्ये चारुदत्तमिति शेषः ।

বসন্তসেনা। কি আদেশ করিয়া ? ।

দাসী । "রাত্রিতেই গাড়ী জুড়িয়া রাখ , বসন্তসেনা যাইবেন ।"

বসন্তসেনা । ওলো ! আমার কোথায় যাইতে হইবে ? ।

দাসী । আর্য্যে ! যেখানে চারুদত্ত (গিয়াছেন) ।

বসন্তসেনা । (দাসীকে আলিঙ্গন করিয়া) আমি রাত্রিতে ভাল

चेटी। ण केवलं अब्भन्तरचदुस्सालअं, सव्वजणस्स वि हिअअं पविट्टा। (ठ)

वस। अवि सन्तप्पदि चारुदत्तस्स परिअणो ?। (ड)

चेटी। सन्तप्पिस्सदि। (ढ)

वस। कदा ?। (ण)

चेटी। जदा अज्जआ गमिस्सदि। [त]

(ठ) न केवलमभ्यन्तरचतुःशालकम्, सर्वजनस्यापि हृदयं प्रविष्टा।

(ड) अपि सन्तप्यते चारुदत्तस्य परिजनः ?।

(ढ) सन्तप्स्यति।

(ण) कदा ?।

(त) यदा आर्य्या गमिष्यति।

(ठ) चेटीति। हृदयं प्रविष्टा स्नेहपात्रीभूतेत्यर्थः सर्वत्रैव सद्व्यवहारादित्याशयः।

(ड) वस इति। परिजनः परिवारः स्त्री धूतेति यावत्। मत्समागमादिति भावः।

(त) चेटीति। यदा गमिष्यति, तदा चारुदत्तस्य परिजनः सन्तप्स्यतीत्यर्थः,

---

করিয়া দেখিতে পারি নাই; তা আজ প্রত্যক্ষে দেখিব। ওলো! আমি কি ভিতরের চতুঃশালায় প্রবেশ করিয়াছি ?।

দাসী। কেবল ভিতরের চতুঃশালায় নহে, আপনি সকল লোকের হৃদয়েও প্রবেশ করিয়াছেন।

বসন্তসেনা। চারুদত্তের স্ত্রী কি দুঃখিত হইয়াছেন ?।

দাসী। দুঃখিত হইবেন।

বসন্তসেনা। কখন ?।

দাসী। যখন আপনি যাইবেন।

वस । तदो मए पढमं सन्तप्पिदव्वं । साअनयम् । हञ्जे ! गेण्ह एदं रअणावलिं, मम बहिणिआए अज्जा-धूदाए गदुअ समप्पेहि । भणिदव्वं च—अहं सिरिचारुदत्तस्स गुण-णिज्जिदा दासी तदा तुम्हाणं पि, ता एसो तुह ज्जेव कण्ठा-हरणं होदु रअणावली । [थ]

चेटी । अज्जए ! कुविस्सदि चारुदत्तो अज्जाए दाव । [द]

(थ) ततो मया प्रथमं सन्तप्तव्यम् । हञ्जे ! गृहाण एतां रत्नावलीम्, मम भगिन्यै आर्य्यधूतायै गत्वा समर्पय; वक्तव्यञ्च—'अहं श्रीचारु-दत्तस्य' गुणनिर्जिता दासी, तदा युष्माकमपि; तदेषा तवैव कण्ठाभरणं भवतु रत्नावली ।

(द) आर्य्ये ! कुपिष्यति चारुदत्त आर्य्यायै तावत् ।

भवत्या अदर्शनादित्याशयः । एतेन धूतावसन्तसेनयोः परस्परसद्व्यवहारजातसौहार्द्द धूतायाः परमपातिव्रात्यञ्च व्यज्यते ।

(थ) वस इति । ततस्तदा । मया प्रथमं सन्तप्तव्यमिति । धूताया गुणेन तया मे क्रीतप्रायत्वादिति भावः । गुणेन दयादाक्षिण्यादिना निर्जिता आयत्तीकृता, दासी तदा चारुदत्तस्य दासीत्वे, युष्माकमिति गौरवाद्बहुवचनं तवापीत्यर्थः, अहं दासी-त्वेन?, पतिपत्न्योरभिन्नत्वादिति भावः । तत् तस्मात् तवापि दासीत्वादित्यर्थः । तवैवेति । ईदृशोत्तमरत्नावल्या दासीकण्ठभरणत्वानौचित्यादित्याशयः ।

(द) चेटीति । कुपिष्यति : दत्तस्य पुनर्ग्रहणेन कार्पण्यप्रकाशादिति भावः ।

বসন্তসেনা । তখন আমারই প্রথম দুঃখিত হইতে হইবে । (অনু-নয়ের সহিত) ওহে ! এই রত্নমালা গ্রহণ কর, আমার ভগিনী আর্য্যা ধূতাকে যাইয়া ইহা দিবে এবং বলিবে—'আমি শ্রীচারুদত্তের গুণ নির্জ্জিত দাসী ; তাহা হইলে আপনার ও (দাসী) ; অতএব এই রত্নমালা আপনারই কণ্ঠের অলঙ্কার হউক ।'

वस। गच्छ ण कुविस्सदि। [ध]

चेटी। गह्णिअ। जं आणवेदि। इति निष्क्रम्य पुनः प्रविश्यति।

अज्जए! भणादि अज्जा धूदा— अज्जउत्तेण तुम्हाणं पसादीकिदा, ण जुत्तं मम एदं गेण्हिदुं। अज्जउत्तो ज्जेव मम आहरणविसेसो त्ति जाणादु भोदी। [न]

ततः प्रविशति दारकं गृहीत्वा रदनिका।

(ध) गच्छ, न कुपिष्यति।

(न) यदाज्ञापयति। भणति आर्य्या धूता—'आर्य्यपुत्रेण युष्माकं प्रसादीकृता न युक्तं ममैतां ग्रहीतुम्। आर्य्यपुत्र एव मम आभरणविशेषः इति जानातु भवती।

(ध) वस इति। न कुपिष्यति, मत्पुत्रस्य भाण्डप्राप्तौ रत्नावलीप्रत्यर्पणौचित्येन तद्‌ग्रहणस्यानौचित्यादिति भावः।

(न) चेटीति। प्रसादीकृता प्रसन्नतया दत्तेत्यर्थः। ननु न गृह्यते चेत् तदा वधू-भरणाभाव इत्याह आर्य्यपुत्र एवेति। एतेनापि परमपातिव्रात्यं व्यज्यते।

दासী। আর্য্যে! তাহা হইলে চারুদত্ত ধূতার উপরে ক্রুদ্ধ হইবেন।

বসন্তসেনা। যাও; ক্রুদ্ধ হইবেন না।

দাসী। (গ্রহণ করিয়া) যাহা আদেশ করেন। (এই বলিয়া চলিয়া যাইয়া আবার প্রবেশ করিল) আর্য্যে! আর্য্যা ধূতা বলিলেন—"আর্য্যপুত্র আপনাকে সন্তোষপূর্ব্বক দিয়াছেন; সুতরাং ইহা গ্রহণ করা আমার উচিত নহে। আর্য্যপুত্রই আমার বিশেষ অলঙ্কার, ইহা আপনি জানিয়া রাখুন।"

रद । एहि वच्छ ! सअड़िआए कीलम्ह । [प]

दार । सकरुणम् । रदणिए ! किं मम एदाए मट्टिआ-सअ-ड़िआए, तं ज्जेव सोवस-सअड़िअं देहि । (फ)

रद । सनिर्व्वेदं निश्वस्य । जाद ! कुदो अम्हाणं सुवस-वव-हारो ? । तादस्स पुणो वि रिद्धीए सुवससअड़िआए कीलिस्ससि । ता जाव विणोदेमि णम्, अज्जआ-वसन्तसेणाआए समीवं उवसप्पिस्सं । उपसृत्य । अज्जए ! पणमामि । (ब]

(प) एहि वत्स ! शकटिकया क्रीड़ावः ।

(फ) रदनिके ! किं मम एतया मृत्तिकाशकटिकया ; तामेव सौवर्णशकटिकां देहि ।

(ब) जात ! कुतोऽस्माकं सुवर्णव्यवहारः ? । तातस्य पुनरपि ऋद्ध्या सुवर्णशकटिकया क्रीड़िष्यसि । तद् यावद्विनोदयाम्येनम् ; आर्य्यावसन्तसेनायाः समीपमुपसर्पिष्यामि । आर्य्ये प्रणमामि ।

(प) रद इति । शकटिकया क्षुद्रशकटेन ।

(ब) रद इति । तातस्य चारुदत्तस्य, पुनरपि ऋद्ध्या दैवतप्रसादात् भाविन्या धनसम्पदा । तदित्यादिका तु स्वगतवदुक्तिः । विनोदयामि आश्वासयामि ।

তাহার পর একটি বালক লইয়া রদনিকার প্রবেশ ।

রদনিকা। বৎস ! আইস, গাড়ীখানি দিয়া খেলা করি ।

বালক। (করুণস্বরে) রদনিকা ! এই মাটীর গাড়ী দিয়া আমার কি হইবে ? সেই সোণার গাড়ীখানি আমাকে দাও ।

রদনিকা। (আত্মাবমাননার সহিত নিশ্বাস ত্যাগ করিয়া) বৎস ! আমাদের সোণার ব্যবহার হইবে কোথা হইতে ? । বাবার পুনরায় সম্পত্তি হইলে সোনার গাড়ী দিয়া খেলা করিবে । তা, ইহাকে আশ্বস্ত

वस। रदणिए! साअदं दे?। कस्स उण अअं दारओ? अणलङ्किद-सरीरो वि चन्दमुहो आणन्देदि मम हिअअं।[भ]

रद। एसो क्खु अज्जचारुदत्तस्स पुत्तो रोहसेणो णाम। (म)

वस। बाहू प्रसार्य। एहि मे पुत्तअ! आलिङ्ग। इत्यङ्के उपवेश्य। अणुकिदं अणेण पिदुणो रूवं। (य)

(भ) रदनिके! स्वागतं ते?। कस्य पुनरयं दारकः? अनलङ्कृतशरीरोऽपि चन्द्रमुख आनन्दयति मम हृदयम्।

(म) एष खलु आर्य्यचारुदत्तस्य पुत्रो रोहसेनो नाम।

(य) एहि मे पुत्रक! आलिङ्ग। अनुकृतमनेन पितुः रूपम्।

(भ) वस इति। दारको बालकः। चन्द्र इव मुखं यस्य सः।

(म) रद इति। रोहति दैवानुग्रहादुत्पद्यत इति रोहा, रोहा सेना यस्य स इति यथा कथञ्चित्व्युत्पत्तिः।

করি; আর্য্যা বসন্তসেনার নিকট যাই; (নিকটে যাইয়া) আর্য্যে! প্রণাম করি।

বসন্তসেনা। রদনিকা! তোমার শুভাগমন ত?। এ বালকটি কাহার?। অনলঙ্কৃতদেহ হইলেও, চন্দ্রবদন এই বালক আমার চিত্তকে আনন্দিত করিতেছে।

রদনিকা। এটি আর্য্য চারুদত্তের পুত্র; ইহার নাম 'রোহসেন'।

বসন্তসেনা। (বাহুদ্বয় প্রসারণ করিয়া) আইস আমার পুত্র! আলিঙ্গন কর। (এই বলিয়া কোলে বসাইয়া) এ যে পিতার রূপের অনুসরণ করিয়াছে।

রদ। ণ কেবলং রূবং সীলং পি তক্কেমি। এদিণা অজ্জ-চারুদত্তো অত্তাণঅং বিণোদেদি। (র)

বস। অধ কিংণিমিত্তং এসো রোঅদি ?। (ল)

রদ। এদিণা পড়িবেসিঅ-গহবই-দারঅ-কেরিআএ সুবণ্ণ-সঅড়িআএ কীলিদং, তেণঅ সা ণীদা, তদো উণ তং মগ্গন্তস্স মএ ইঅং মট্টিআ-সঅড়িআ কদুঅ দিণ্ণা। তদো ভণাদি—"রদণিএ! কিং মম এদাএ মট্টিআ-সঅড়িআএ, তং জ্জেব সোবণ্ণ-সঅড়িঅং দেহি" ত্তি। (ব)

(র) ন কেবলং রূপম্, শীলমপি, তর্কয়ামি। এতেন আর্য্যচারুদত্ত আত্মানং বিনোদয়তি।

(ল) অথ কিংনিমিত্তমেষ রোদিতি ?।

(ব) এতেন প্রতিবেশিক-গৃহপতি-দারকস্য সুবর্ণশকটিকয়া ক্রীড়িতম্, তেন চ সা নীতা, ততঃ পুনস্তাং মার্গয়তো ময়া ইয়ং মৃত্তিকা-শকটিকা কৃত্বা দত্তা। ততো ভণতি—"রদনিকে! কিং মম এতয়া মৃত্তিকা-শকটিকয়া, তামেব সৌবর্ণ-শকটিকাং দেহি" ইতি।

(র) রদ ইতি। এতেন পুত্রেণ আত্মানং চিত্তম্, বিনোদয়তি দারিদ্র্যাদাত্মনি নিরাশোঽপি আশ্বাসয়তি।

(ব) রদ ইতি। এতেন বালকেন, প্রতিবেশিকঃ প্রতিবেশো স্বগৃহসন্নিহিতঃ যো গৃহ-

---

রদনিকা। কেবল পিতার রূপের নহে, স্বভাবেরও অনুকরণ করিয়াছে ইহা আমি মনে করি। আর্য্য চারুদত্ত ইহা দ্বারা আপনাকে আশ্বস্ত করেন।

বসন্তসেনা। এ, কি জন্য রোদন করিতেছে ?।

রদনিকা। এ, প্রতিবেশী কোন বণিক-বালকের সোনার গাড়ী

বস। হদ্ধী হদ্ধী। অঅং পি ণাম পর-সম্পত্তীএ সন্তপ্প-দি। ভঅবং কঅন্ত! পোক্খর-বত্ত-পড়িদ-জলবিন্দু-সরিসেহিং কীলসি তুমং পুরিস-ভাঅধেএহিং। ইতি সাস্রা। জাদ! মা রোদ, সোবণ্ণ-সঅড়িআএ কীলিস্সসি। (ঞ)

দার। রদণিএ! কা এসা?। (ট)

(ঞ) হা ধিক্ হা ধিক্! অয়মপি নাম পরসম্পত্ত্যা সন্তপ্যতে। ভগবন্! কৃতান্ত! পুষ্কর-পত্র পতিত জলবিন্দু-সদৃশৈঃ ক্রীড়সি ত্বং পুরুষ-ভাগধেয়ৈঃ। জাত! মা রুদিহি, সৌবর্ণশকটিকয়া ক্রীড়িষ্যসি।

(ট) রদনিকে! কা এষা?।

পবিবং ধিক্ তস্য দারকো বালকস্তস্য। তেন চ প্রাতিবেশিকগৃহপতিদারকেণ, সা সুবর্ণ-শকটিকা। মার্গয়ত: অন্বিষ্যত: প্রার্থয়ত ইত্যর্থ:।

(ঞ) বস ইতি। অয়মপি ভূতপূর্ব্বধনিনশ্চারুদত্তস্য পুত্রোঽপি। কৃতান্ত! হে বিধে! পুষ্করস্য পদ্মস্য পত্রে পতিতা যে জলবিন্দবস্তৎসদৃশৈরত্যন্তচঞ্চলৈরিত্যর্থ:। পুরুষাণাং লোকানাং ভাগধেয়ৈর্ভাগ্যৈ:, ক্রীড়সি খেলসি খেলনগুটিকাবৎ কদাচিদূর্দ্ধং নয়সি কদাচিদগোপয়সীত্যর্থ:।

দিয়া খেলা করিতেছিল, সে বালক তাহা নিয়া গিয়াছে, তার পর তাহা খুঁজিতেছিল; তাহার পর আমি মাটী দিয়া এই গাড়ী খানি করিয়া দিয়াছি। তাই বলিতেছে—'রদনিকা! এই মাটির গাড়ী দিয়া আমার কি হইবে? সেই সোণার গাড়ীখানি আমাকে দাও।"

বসন্তসেনা। হায়! হায়! এও, পরের সম্পদে দুঃখিত হইতেছে। ভগবন্! দৈব! পদ্মপত্র-পতিত জলবিন্দুর তুল্য মানুষের ভাগ্য দ্বারা তুমি খেলা কর। বৎস! রোদন করিও না; সোণার গাড়ী দিয়া তুমি খেলা করিবে।

বালক। রদনিকা! ইনি কে?।

वस ! पिदुणो दे गुणणिज्जिदा दासी । (स)

रद । जाद ! अज्जआ दे जणणी भोदि । (ह)

दार । रदणिए ! अलिअं तुमं भणासि, जइ अम्हाणं अज्जआ जणणी, ता कीस अलङ्किदा ? । (च)

वस । जाद ! मुद्धेण मुहेण अदिकरुणं मन्तेसि । नाट्येनाभरणान्यवताय्यं रुदती । एसा दाणिं दे जणणी संवुत्ता, ता गेण्ह एदं अलङ्कारअं, सोवस-सअडिअं घडाविहि ।(क)

(स) पितुस्त गुणनिर्जिता दासी ।

(ह) जात ! आर्य्या ते जननी भवति ।

(च) रदनिके ! अलीकं त्वं भणसि, यद्यस्माकमार्य्या जननी, तत् केन अलङ्कृता ? ।

(क) जात ! मुग्धेन मुखेन अतिकरुणं मन्त्रयसि । एषा इदानीं ते जननी संवृत्ता । तद्गृहाणैतमलङ्कारकम्, सौवर्ण-शकटिकां घटय ।

(ह) रद इति । जननी जननीस्थानपातिनी, पितृभोग्यत्वादिति भावः ।

(च) दार इति । अलीकं मिथ्या । केन हेतुना । एतेनात्मनो जनन्याः सर्व्वदैवानलङ्कृतत्वं व्यज्यते ।

(क) वस इति । मुग्धेन सुन्दरेण । अतिकरुणमतीवशोकोद्दीपकम्, मन्त्रयसि ब्रवीषि । घटय शिल्पिना निर्म्मापय ।

বসন্তসেনা। তোমার পিতার গুণনির্জিত দাসী।

রদনিকা। বৎস! ইনি তোমার মাতা হন।

বালক। রদনিকা! তুমি মিথ্যাকথা বলিতেছ; যদি ইনি আমার মাতা হইবেন, তবে অলঙ্কৃত হইলেন কেন?।

বসন্তসেনা। বৎস! মনোহর মুখদ্বারা অতিদুঃখের কথা বলিতেছ।

दार । अवेहि, ण गेण्हिस्सं, रोदसि तुमं । (ख)

वस । अश्रूणि प्रमृज्य । जाद ! ण रोदिस्सं । गच्छ कील । अलङ्कारैर्मृच्छकटिकां (१) पूरयित्वा । जाद ! कारेहि सोवण्ण-सअड़िअं । [ग]

इति दारकमादाय निष्क्रान्ता रदनिका । (घ)

(ख) अपेहि, न ग्रहीष्यामि, रोदिषि त्वम् ।

(ग) जात ! न रोदिष्यामि, गच्छ, क्रीड़ । जात ! कारय सौवर्णशकटिकाम ।

(ख) दार इति । अपेहि अपसर, न ग्रहीष्यामि एतमलङ्कारसमूहमिति शेषः, यतस्त्वं रोदिषि, एतद्दानदुःखादिति भावः ।

(ग) वस इति । मृच्छकटिका रोहसेनस्यैव खेलोपकरणीभूतमृत्तिकानिर्म्मित क्षुद्रशकटम् ।

(घ) इतीति । दारकसान्त्वनव्याजेन उदारहृदयाया वसन्तसेनाया एतदग्रहणमेव किं रदनिकाया अभिप्रेतमासीत् ? ।

(অভিনয় প্রকারে অলঙ্কারসমূহ অবতারণ করিয়া রোদন করিতে করিতে) এই এখন তোমার মাতা হইলাম। তা এই অলঙ্কারসমূহ গ্রহণ কর, ইহা দ্বারা সোণার গাড়ী তৈয়ার করাও।

বালক। দূর হও, আমি লইব না, তুমি কাঁদিতেছ।

বসন্তসেনা। (চোখের জল মুছিয়া) বৎস! কাঁদিব না। যাও খেলা কর। (অলঙ্কার দিয়া মাটীর গাড়ী পূরণ করিয়া) বৎস! সোণার গাড়ী তৈয়ার করাও।

(ইহার পর রদনিকা বালকটীকে লইয়া চলিয়া গেল)

(१) मृच्छकटिकम् ।

प्रविश्य प्रवहणाधिरूढश्चेटः। लदणिए! लदणिए! णिवेदेहि अज्जआए वसन्तसेणाए—'ओहालिअं पक्खदुआलए सज्जं पवहणं चिट्ठदि। [ङ]

प्रविश्य रदनिका। अज्जए! एसो वड्ढमाणओ विण्णवेदि— 'पक्खदुआरए सज्जं पवहणं" त्ति। [च]

वस। हञ्जे! चिट्ठदु मुहुत्तअं, जाव अहं अत्ताणअं पसाधेमि [छ]

(ङ) रदनिके! रदनिके! निवेदय आर्य्यायै वसन्तसेनायै—"अपवारितं पक्षद्वारके सज्जं प्रवहणं तिष्ठति।'

(च) आर्य्ये! एष वर्द्धमानको विज्ञापयति— 'पक्षद्वारे सज्जं प्रवहणम्' इति।

(छ) हञ्जे! तिष्ठतु मुहूर्त्तकम्, यावदहमात्मानं प्रसाधयामि।

(ङ) प्रविश्येति। चेटः—वर्द्धमानाख्यश्चारुदत्तस्य भृत्यः। अपवारितं स्त्रीलोकागमनोपयोगिभावेन वसनावृतम्, प्रवहणं गोयानम्, पक्षद्वारके पार्श्वद्वारे, सज्जं प्रस्तुतम्।

(छ) वस इति। प्रसाधयामि कान्तसाक्षात्कारोपयोगितया अलङ्करोमि।

শকটারূঢ় ভৃত্য প্রবেশ করিয়া। রদনিকা! রদনিকা! আর্য্যা বসন্তসেনার নিকট জানাও—'পার্শ্বের দুয়ারে আবৃত অবস্থায় গাড়ী প্রস্তুত রহিয়াছে।'

রদনিকা প্রবেশ করিয়া। আর্য্যে! এই বর্দ্ধমান জানাইতেছে— 'পার্শ্বের দুয়ারে গাড়ী প্রস্তুত।'

বসন্তসেনা। ওলো! কিছু কাল বিলম্ব করুক, যাবৎ আমি আপনাকে অলঙ্কৃত করি।

रद। निष्क्रम्य। वड्ढमाणआ! चिट्ठ मुहुत्तअं, जाव अज्जआ अत्ताणअं पसाधेदि। [ञ]

चेटः। हीही भो! मए वि जाणत्थरणकं विसुमरिदं, ता जाव गेण्हिअ आअच्छामि। एदे णस्सा-लज्जु-कडुआ वइल्ला। भोदु, पवहणेण ज्जेव गदागदिं करिस्सं। इति निष्क्रान्तश्चेटः। [झ]

वस। हञ्जे! उवणेहि मे पसाहणं, अत्ताणअं पसाधइस्सं। इति प्रसाधयन्ती स्थिता। (ञ)

(ञ) वर्द्धमानक! तिष्ठ मुहूर्त्तकम्, यावदार्य्या आत्मानं प्रसाधयति।

(झ) हीही भोः! मयापि यानास्तरणं विस्मृतम्, तद्‌ यावद्‌ गृहीत्वा आगच्छामि। एते नस्य-रज्जु-कटुका बलीवर्द्दाः। भवतु, प्रवहणेनैव गतागतिं करिष्यामि।

(ञ) हञ्जे! उपनय मे प्रसाधनम्, आत्मानं प्रसाधयिष्यामि।

(झ) चेट इति। यानस्य अस्य गोशकटस्य आस्तरणम् उपरिपातनवस्त्रम्। नस्या नासिकारन्ध्रे प्रवेशिता या रज्जवस्ताभिः कटुका दुःसहा नितान्तवेगवन्त इत्यर्थः। बलीवर्द्दा वृषभाः। गतागतिं करिष्यामि, तथैव वेगोपशमो भवेदिति भावः।

रदनिका। (निर्गত হইয়া) বর্দ্ধমান! একটু কাল বিলম্ব কর, যাবৎ আর্য্যা আপনাকে অলঙ্কৃত করেন।

ভৃত্য। ওহো! আমিও, গাড়ীর আস্তরণ খানি ভুলিয়া আসিয়াছি। তাহা নিয়া আসি। এই গরুগুলিও, নাকে দড়ি দেওয়ায় পাগলা হইয়া পড়িয়াছে। হউক, গাড়ী লইয়াই গমনাগমন করিব। (এই বলিয়া ভৃত্য চলিয়া গেল)

প্রবিশ্য প্রবহণাধিরূঢ় স্থাবরকশ্চেটঃ। আণত্তোম্হি লাঅ-শালঅ-শণ্ঠাণেণ—"থাবলআ! পবহণং গেণ্হিঅ পুপ্ফকলণ্ডঅং জিণ্ণুজ্জাণং তুলিদং আঅচ্ছেহি" ত্তি। ভোদু, তহিং জ্জেব গচ্ছামি। বহধ বইল্লা! বহধ। পরিক্রম্যাবলোক্য চ, কধং গামশঅলেহিং লুদ্ধে মগ্গে। কিং দাণিং এত্থ কলইশ্শং সাটোপম্। অলে লে! ওশলধ ওশলধ। আকর্ণ্য। কিং ভণাধ?—"এশে কশ্শ কেলকে পবহণে" ত্তি। এশে লাঅ-শালঅ-শণ্ঠাণ-কেলকে পবহণে ত্তি। তা শিগ্ঘং ওশলধ। অবলোক্য।

(ট) আজ্ঞপ্তোঽস্মি রাজ-শ্যালক-সংস্থানেন—"স্থাবরক! প্রবহণং গৃহীত্বা পুষ্পকরণ্ডকং জীর্ণোদ্যানং ত্বরিতমাগচ্ছ" ইতি। ভবতু তত্রৈব গচ্ছামি। বহত বলীবর্দ্দৌ! বহতম্। কথং গ্রামশকটৈঃ রুদ্ধো মার্গঃ। কিমিদানীমত্র করিষ্যামি? অরে রে! অপসরত অপসরত। কিং ভণত—"এতত্ কস্য প্রবহণম্?" ইতি। এতত্ রাজ-শ্যালক

(ট) প্রবিশ্যেতি। পর্ব্বতাদিস্থাবরবত্ জড়ত্বাত্ স্থাবরকো নাম। সংজ্ঞায়াং কপ্রত্যয়ঃ। চেটঃ শকারস্য ভৃত্যঃ। রাজ্ঞঃ শ্যালকো ভোগ্যবনিতায়া ভ্রাতা যঃ সংস্থানো নাম তেন। পুষ্পাণাং করণ্ডকং পাত্রবিশেষ ইতি ইদমপি পুষ্পকরণ্ডকং নাম। বলীবর্দ্দৌ! হে বৃষভৌ! বহতং যুবাং গচ্ছতম্। সাটোপং সগর্ব্বম্। সভিক্

বসন্তসেনা। ওলো! আমার অলঙ্কার আন, আপনাকে অলঙ্কৃত করিব। (এই বলিয়া অলঙ্কৃত করিতে থাকিল)

শকটারূঢ় স্থাবরকনামক ভৃত্য প্রবেশ করিয়া। রাজার শালা সংস্থান, আমাকে আদেশ করিয়াছেন যে—"স্থাবরক! গাড়ী লইয়া পুষ্পকরণ্ডকনামক জীর্ণোদ্যানে তাড়াতাড়ি আয়" হউক, সেই খানেই যাই। চল, গরু! চল। (গমনপূর্ব্বক দর্শন করিয়া) গ্রামের গাড়ীতে পথ যে রুদ্ধ হইয়া গিয়াছে। এখন এখানে কি করি?। (গর্ব্বের

कधं एशे अवले शहिअं विअ मं पेक्खिअ शहशज्जेव जूद-पलाइदे विअ जूदिअले ओहालिअ अत्ताणअं अस्सदो अवक्कन्ते। ता को उण एशे?। अधवा किं मम एदिणा?। तुलिदं गमिश्शं। अले ले गामेलुआ! ओशलध ओशलध। किं भणाध—"मुहुत्तअं चिट्ठ, चक्कपलिवट्टिं देहि" त्ति। अले ले! लाअ-शालअ-शण्ठाण-केलके हग्गे शूले चक्क-पलिवट्टिं दइश्शं?। अधवा एशे एआइ तवश्शी। ता एव्वं कलेमि,

संस्थानस्य प्रवहणमिति। तत् शीघ्रमपसरत। कथम् एषः अपरः सभिकमिव मां प्रेक्ष्य सहसैव द्यूतपलायित इव द्यूतकरः अपवार्य्यात्मानम् अन्यतः अपक्रान्तः। तत् कः पुनरेषः?। अथवा किं मम एतेन?। त्वरितं गमिष्यामि। अरे रे ग्राम्याः! अपसरत अपसरत। किं भणथ—"मुहूर्त्तकं तिष्ठ, चक्रपरिवृत्तिं देहि" इति।

द्यूतसभाध्यक्षमिव। अपवार्य्य गोपयित्वा, अन्यतः अन्यस्यां दिशि, अपक्रान्तः अपसृतः ग्राम्या ग्रामीणा यानवाहकाः! ग्राम्यत्वेन अशिक्षिता इति ध्वन्यते। चक्रस्य परिवृत्तिं परिवर्त्तनस्थानम्। शूरो वीरः, राजश्यालस्यैव भृत्यत्वादिति भावः, चक्रपरिवृत्तिम् स्वयमपसृत्य तव चक्रपरिवर्त्तनस्थानम्, दास्यामि इति काकुः दास्यामि किं? कथमपि नेत्यर्थः, एवम्भूतस्थले अपसरत एवापमानादिति भावः। एकाकी, अतएव तपस्वी क्षुद्रः, सुतरामस्याग्रतो गमने मम न विलम्बाधिक्यं भवेदतो मम प्रवहणापसारण-

সহিত) ওরে! ওরে! সর সর। (শুনিয়া) কি বলিতেছিস্ "এখানা কাহার গাড়ী?।" এখানা রাজার শালা সংস্থানের গাড়ী। তা, শিগ্গির সর্। (দেখিয়া) এই আর একটা লোক, দ্যূতসভাপতির ন্যায় আমাকে দেখিয়া, দ্যূতপলায়িত দ্যূতকরের ন্যায়, আত্মগোপন করিয়া, হঠাৎ অন্যদিকে সরিয়া পড়িল। তা, এটা কে?। অথবা ইহাকে দিয়া আমার কি হইবে?। শীগ্গির যাই। ওরে! ওরে! গ্রাম্যগণ!

এদং পবহণং অজ্জ-চালুদত্তস্স রুক্খবাড়িআএ পক্খদুআলএ থাবেমি। ইতি প্রবহণং সংস্থাপ্য। এসো ম্হি আঅদে। ইতি নিষ্ক্রান্তঃ। (ট)

চেটী। অজ্জএ ণেমিসদ্দো বিঅ সুণীঅদি, তা আঅদো পবহণো (ঠ)

অরে রে রাজ-শ্যালক-সংস্থানস্য অহং শূরঃ চক্রপরিবৃত্তিং দাস্যামি ?। অথবা এষ একাকী তপস্বী। তদেবং করোমি, এতৎ প্রবহণমার্য্যচারুদত্তস্য বৃক্ষবাটিকায়াঃ পক্ষদ্বারকে স্থাপয়ামি। এষোঽস্মি আগতঃ।

(ঠ) আর্য্যে! নেমিশব্দ ইব শ্রূয়তে, তদাগতং প্রবহণম্।

নিবেশিতমিতি ভাবঃ। এতন্মদীয়ম্। নিষ্ক্রান্তঃ, সম্মুখবর্ত্তীনি মার্গাবরোধকানি শকটানি অপসারয়িতুমিতি বোধ্যম্।

(ঠ) চেটীতি। নেমিশব্দ ইব চক্রপ্রান্তশব্দ ইব। প্রবহণচলনে তচ্চক্রঘূর্ণনাদিতি ভাবঃ।

সর সর। কি বলিতেছ—“একটু কাল থাম, চাকা ঘুরাইবার জায়গা দাও ?”। ওরে! ওরে! রাজার শালা সংস্থানের লোক এবং বীর-পুরুষ হইয়া আমি আবার তোর চাকা ঘুরাইবার জায়গা দিব ?। অথবা এই ক্ষুদ্র লোকটা একাকী। অতএব এইরূপ করি ;—আমার এই গাড়ী খানাকে আর্য্য চারুদত্তের বৃক্ষবাটিকার পাশের দুয়ারে রাখি। (ইহা বলিয়া গাড়ী রাখিয়া) এই আমি আসিয়াছি। (এই বলিয়া চলিয়া গেল)

দাসী। আর্য্যে! চক্রের প্রান্তভাগের শব্দ শুনিতেছি। সুতরাং গাড়ী আসিয়াছে।

वस। हञ्जे ! गच्छ, तुवरदि मे हिअअं। ता आदि-सेहि पक्खदुआरअं। (ड)

चेटी। एदु एदु अज्जआ। (ढ)

वस। परिक्रम्य। हञ्जे ! वीसम तुमं। (ण)

चेटी। जं अज्जआ आणवेदि। इति निष्क्रान्ता। (त)

वस। दक्षिणाक्षिस्पन्दं सूचयित्वा प्रवहणमधिरुह्य च। किं णेदं फुरदि दाहिणं लोअणं ?। अधवा चारुदत्तस्स ज्जेव दंसणं अणिमित्तं पमज्जइस्सदि। (थ)

(ड) हञ्जे ! गच्छ, त्वरते मे हृदयम्। तदादिशाय पक्षद्वारकम्।

(ढ) एतु एतु आर्य्या।

(ण) हञ्जे ! विश्राम्य त्वम्।

(त) यदार्य्या आज्ञापयति।

(थ) किन्नु इदं स्फुरति दक्षिणं लोचनम् ?। अथवा चारुदत्तस्यैव दर्शनमनिमित्तं प्रमार्ज्जयिष्यति।

(ड) वस इति। गच्छ मम गत इति शेषः। त्वरते चारुदत्तसकाशं गन्तुमित्यर्थः।

(ण) वस इति। विश्राम्य विश्रामं कुरु त्वमिदानीं गन्तुमर्हसीति तात्पर्य्यम्।

(थ) वस इति। दक्षिणाक्षिस्पन्दने स्त्रीणामशुभमाह गर्गः—

বসন্তসেনা। ওহে ! চল, আমার হৃদয় ত্বরা করিতেছে। অত-এব পাশের দুয়ার কোন দিক্ বল।

দাসী। আর্য্যা আসুন আসুন।

বসন্তসেনা। (পদক্ষেপ করিয়া) ওহে ! তুমি বিশ্রাম কর।

দাসী। আর্য্যা যাহা আদেশ করেন। (এই বলিয়া চলিয়া গেল)

বসন্তসেনা। দক্ষিণ চক্ষু-স্পন্দন অভিনয় করিয়া এবং গাড়ীতে

प्रविश्य स्थावरकश्चेटः। ओशालिदा मए शअडा, ता जाव गच्छामि। इति नाट्येनाधिरुह्य चालयित्वा स्वगतम्। भालिके पवहणे। अधवा चक्क-पलिवट्टिआए पलिश्शन्तश्श भालिके पवहणे पडिभाशेदि। भोदु, गमिश्शं। जाध गोणा! जाध। (द)

(द) अपसारिता मया शकटाः, तद् यावद्गच्छामि। भारिकं प्रवहणम्। अथवा चक्र-परिवृत्तिकया परिश्रान्तस्य भारिकं प्रवहणं प्रतिभासते। भवतु, गमिष्यामि। यातं गावौ! यातम्।

"दक्षिणे लाभं बन्धुदर्शनं वा" इत्याद्यभिधाय "स्त्रीणामेतत् फलमविकलं दक्षिणे वैपरीत्यम्" इति।

चारुदत्तस्य दर्शनं कर्त्तृ अनिमित्तं दक्षिणाक्षिस्पन्दनसूचितमशुभम्, प्रमार्जयिष्यति निवर्त्तयिष्यति, तस्य सुब्राह्मणत्वादिति भावः। तदाह शुद्धितत्त्वे देवलः—

'लोकेऽस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः।
हिरण्यं सर्पिरादित्य आपो राजा तथाऽष्टमः॥
एतानि सततं पश्येन्नमस्येदर्चयेत् यः।
प्रदक्षिणञ्च कुर्वीत तस्य चायुर्न हीयते॥"

(द) प्रविश्येति। शकटा मत्पथरोधका इत्यर्थः। भारिकं भारेण संसृष्टं भारवत्तया प्रतीयमानमित्यर्थः। परत्राप्येवम्। प्रतिभासते प्रतीतिविषयो भवति। हे गावौ! वृषौ! यातं गच्छतम्, युवामिति शेषः।

উঠিয়া) দক্ষিণ চক্ষু স্পন্দিত হইতেছে কেন। অথবা চারুদত্তের দর্শনই এই দুর্লক্ষণ প্রশমিত করিবে।

স্থাবরকনামক ভৃত্য প্রবেশ করিয়া। আমি গাড়িগুলি সরাইয়া দিয়া আসিয়াছি। তা এখন যাই। (এই বলিয়া অভিনয় প্রকারে গাড়ীতে উঠিয়া, চালাইয়া স্বগত) গাড়ী খানা ভারী বলিয়া বোধ হইতেছে। অথবা চক্র পরিবর্ত্তন করায় আমি পরিশ্রান্ত হইয়া পড়িয়াছি, তাই গাড়ী খানা ভারী বলিয়া বোধ হইতেছে। হউক, যাই। চল, গরু! চল।

नेपथ्ये । अरे रे दोवारिआ ! अप्पमत्ता सएसु सएसु गुम्मट्ठाणेसु होध । एसो अज्ज गोवालदारओ गुत्तिअं भञ्जिअ, गुत्तिवालअं वावादिअ, बन्धणं भेदिअ, परिब्भट्ठो अवक्कमदि । ता गेण्हध गेण्हध । (ध)

प्रविश्य अपटीक्षेपेण सम्भ्रान्त एकचरणलग्ननिगड़ः अवगुण्ठित आर्य्यकः परिक्रामति । (न)

(ध) अरे रे दौवारिकाः ! अप्रमत्ताः स्वकेषु स्वकेषु गुल्मस्थानेषु भवत । एषोऽद्य गोपालदारको गुप्तिं भङ्क्त्वा, गुप्तिपालकं व्यापाद्य, बन्धनं भित्त्वा, परिभ्रष्टः अपक्रामति । तद् गृह्णीत गृह्णीत ।

(ध) नेपथ्य इति । स्वकेषु स्वकीयेषु, गुल्मस्थानेषु रक्षणप्रदेशेषु, अप्रमत्ताः सावधानाः । गोपालदारक आर्य्यको नाम गोपबालकः, गुप्तिं कारागारम् । गुप्तिपालकं कारागाररक्षकम् । बध्यते अनेनेति बन्धनं शृङ्खला तत्, भित्त्वा छित्त्वा, परिभ्रष्टः कारागारात् विच्युतः, अपक्रामति पलायते ।

'गुल्मः सेनाघट्टभिदोः सैन्यरक्षणरुग्भिदोः ।' इति मेदिनी ।

'गुप्तिः कारागृहे प्रोक्ता भूगर्त्ते रक्षणे यमे ।' इति विश्वः ।

(न) प्रविश्येति । 'पटीक्षेपो न कर्त्तव्य आर्त्तराज्ञ वेशने' इति नियमात् आर्य्यकस्यार्त्तत्वादपटीक्षेपेणेत्युक्तम् । यवनिकाया अनपसारणेनेत्यर्थः । सम्भ्रान्तः शङ्कितचित्तः एकस्मिन् चरणे लग्नो निगड़ः शृङ्खला यस्य सः, अवगुण्ठित लोकेभ्य आत्मगोपनार्थमावृतसर्वदेहः ।

নেপথ্যে । ওরে দৌবারিকগণ ! স্ব স্ব রক্ষাস্থানে সাবধান হও । এই গোপতনয় আর্য্যক, কারাগার ভাঙ্গিয়া, কারাগাররক্ষককে হত্যা করিয়া শিকল ছিঁড়িয়া, বাহির হইয়া পালাইতেছে । তা, ধর ধর ।

(এক চরণে শিকল সংলগ্ন ও আবৃতদেহ অবস্থায় আর্য্যক, যবনিকা অপসারণ না করিয়া ব্যস্তভাবে প্রবেশ করিয়া বিচরণ করিতে লাগিল)

चेटः। स्वगतम्। महन्ते णअलीए सम्भमे उप्पण्णे, ता तुलिदं तुलिदं गमिस्सं। इति निष्क्रान्तः। (प)

आर्य्यकः। छित्त्वाहं नरपतिबन्धनापदेश—
व्यापत्ति-व्यसन-महार्णवं महान्तम्।
पादाग्र-स्थित-निगडैक-पाश-कर्षी
प्रभ्रष्टो गज इव बन्धनाद्भ्रमामि ॥१॥

(प) महान् नगर्य्यां सम्भ्रम उत्पन्नः, तत् त्वरितं त्वरितं गमिष्यामि।

(प) चेट इति। शकारस्य भृत्योऽयं स्थावरको नाम। सम्भ्रमस्त्वरा। वसन्तसेनां नीत्वा निष्क्रान्तोऽयमिति बोध्यम्।

छित्त्वेति। अहम्, महान्तम्, नरपतेर्बन्धनं कारागारे आबद्धीकरणमेव अपदेशश्छलं यस्य स चासौ, व्यापत्तिः प्रहारादिविशेषरूपा विपत्तिः व्यसनं हत्यारूपममङ्गलञ्च तद्रूपो महार्णवश्चेति तम्, छित्त्वा तीर्त्वा, बन्धनात् प्रभ्रष्टो गज इव, पादाग्रे स्थितं निगडं शृङ्खलामेव एकं पाशं बन्धनरज्जुं कर्षतीति स तथोक्तः सन्, भ्रमामि विचरामि। किमतःपरं करोमीति भावः।

अत्र पूर्वार्द्धे अपदेशपदेन प्रकृतबन्धनप्रतिषेधेन महार्णवत्वस्थापनादपह्नुतिः, आपत्ति-व्यसनशब्दयोरर्थस्य आपाततः पुनरुक्ततया प्रतीतेः परञ्च व्याख्यानरूपेण तद्भेदात् भिन्नाकारशब्दगतत्वाच्च पुनरुक्तवदाभासः, परार्द्धे श्रौतोपमा चालङ्कारा इत्येतेषां परस्परनिरपेक्षतया संसृष्टिः।

'व्यसनं त्वशुभे सक्तौ' इत्यादि मेदिनी। प्रहर्षिणी वृत्तम् ॥१॥

ভৃত্য। (স্বগত) নগরে গুরুতর হুলস্থূল পড়িয়া গিয়াছে; অতএব তাড়াতাড়ি যাই। (এই বলিয়া চলিয়া গেল)

আর্য্যক। আমি, রাজার কারাগারে আবদ্ধীকরণচ্ছলে গুরুতর বিপদ ও অমঙ্গল-সমুদ্র উত্তীর্ণ হইয়া, বন্ধনভ্রষ্ট হস্তীর ন্যায়, চরণাগ্রস্থ-শৃঙ্খল-রজ্জু আকর্ষণ করতঃ বিচরণ করিতেছি ॥১॥

भो: ! अहं खलु सिद्धादेश-जनित-परित्रासेन राज्ञा पालकेन घोषादानीय विशसने गूढ़ागारे बन्धनेन बद्धः । तस्माच्च प्रियसुहृच्छर्विलक-प्रसादेन बन्धनात् परिभ्रष्टोऽस्मि । अश्रूणि विसृज्य । (फ)

भाग्यानि मे यदि तदा मम कोऽपराधः,
यद्बन्धनाग इव संयमितोऽस्मि तेन ।
दैवी च सिद्धिरपि लङ्घयितुं न शक्या
गम्यो नृपो बलवता सह को विरोधः ? ॥२॥

(फ) भो इति । भो इति दैवसम्बोधने । सिद्धस्त्रिकालज्ञः कश्चित् योगसिद्धः पुरुषस्तस्य 'आदेशेन आर्य्यको राजा भविष्यति' इत्येवं वाक्येन जनितः परित्रासो भयं यस्य तेन । घोषादाभीरपल्लीतः । विशस्यते हिंस्यते अपराधी अस्मिन्निति विशसनं वध्यस्थानं तस्मिन् । 'शसु हिंसायाम्' इति शसधातोराधकरणे युट् । गूढ़ागारे गुप्तगृहे बध्यते अनेनेति बन्धनं शृङ्खला तेन ।

घोष आभीर पल्लीस्यात् इत्यमरः ।

भाग्यानीति । यदि मे मम भाग्यानि राजत्वप्राप्तिघटकशुभादृष्टानि सन्ति, तदा मम कः अपराधः ? अपि तु कोऽपि नेत्यर्थः, ऐहिकचेष्टाभावादिति भावः । यद् यस्मादपराध हेतोः, तेन राज्ञा, अस्मि अहम्, वन्यो नागो हस्तीव, संयमितः कारागारे बद्धः । इदन्तु तेन गुरुतरमन्याय्यं कृतमिति भावः । ननु भाविन्यास्तव

হায় ! রাজাপালক, সিদ্ধপুরুষের আদেশ জনিত ভয়ে, আমাকে গোপপল্লী হইতে আনিয়া, বধ্যস্থানে গুপ্তগৃহে শৃঙ্খল দ্বারা বদ্ধ করিয়াছিলেন, প্রিয়সুহৃৎ শর্বিলকের অনুগ্রহে সেই বন্ধন হইতে মুক্ত হইয়াছি। (চোখের জল মুছিয়া)

রাজ্যলাভ করিবার শুভাদৃষ্টই যদি আমার থাকে, তবে তাহাতে আমার অপরাধ কি ? যে, বন্য হস্তীর ন্যায় আমাকে রাজা বদ্ধ

তত্ কুত্র গচ্ছামি মন্দভাগ্যঃ । বিলোক্য । ইদং কস্যাপি সাধো-রনাবৃতপক্ষদ্বারং গেহম্ । (ব)

ইদং গৃহং ভিন্নমদত্তদণ্ডো বিশীর্ণসন্ধিশ্চ মহাকপাটঃ ।
ধ্রুবং কুটম্বী ব্যসনাভিভূতাং দশাং প্রপন্নো মম তুল্যভাগ্যঃ ॥২॥

রাজত্বসিদ্ধিবারণার্থং তেন বন্ধনং কৃতমিতি কথং তদন্যাঘ্যমিত্যাহ দৈবী ভাগ্যবিহিতা, সিদ্ধিঃ রাজত্বপ্রাতিনিষ্পত্তিরপি, লঙ্ঘয়িতুং কেনাপি বারয়িতুং ন শক্যা । অথ বন্ধেন ত্বয়ৈবাসৌ রাজা আক্রম্যতামিত্যাহ নৃপো বিদ্যমানো রাজা, গম্যঃ শরণভাবেন প্রাপ্যঃ । কথমেতদিত্যাহ বলবতা সহ দুর্বলস্য কো বিরোধঃ, স্ববিনাশহেতুত্বাত্ কোঽপি নৈত্যর্থঃ । সুতরাং মমাপি তদাক্রমণপ্রবৃত্তিরেব নোচিতেতি ভাবঃ ।

অত্র পূর্বার্দ্ধে অর্থাপত্তিসঙ্কীর্ণা শ্রৌতোপমা, দ্বিতীয়ার্দ্ধে চ অর্থাপত্তিসঙ্কীর্ণঃ সামান্যেন বিশেষসমর্থনরূপোঽর্থান্তরন্যাস ইত্যনয়োঃ পরস্পরনিরপেক্ষতয়া সংসৃষ্টিঃ ।

বসন্ততিলকা বৃত্তম্ ॥২॥

(ব) তদিতি । সাধোশ্চৌর্য্যাদিদোষহীনস্য, অন্যথা গৃহস্যেদৃশী দশা ন স্যাদিতি ভাবঃ । অনাবৃতম্ উদ্ঘাটিতকপাটং পক্ষদ্বারং পার্শ্বদ্বারং যস্য তত্ । তথা চ প্রবেশাবধিক-মন্দভাগ্য ইত্যন্তসন্দর্ভে বিদ্রবো নাম গর্ভসন্ধ্যঙ্গম্ তথা চ দর্পণে । "শঙ্কাভয়ত্রাসকৃতঃ সম্ভ্রমো বিদ্রবো মতঃ ।"

ইদমিতি । ইদং গৃহং বাটী, ভিন্নং পুরাতনতয়া বিদীর্ণভিত্তিকম্; বিশীর্ণো ঘুণক্ষততয়া জীর্ণঃ সন্ধিঃ সংযোগস্থানং যস্য স তাদৃশঃ, ন দত্তো দণ্ডঃ অর্গলং

করিলেন। কেহই ভাগ্যবিহিত কার্য্যসিদ্ধিকে লঙ্ঘন করিতে পারে না। রাজার নিকটেই যাইতে হইবে; কারণ বলবানের সহিত বিরোধ কি ॥২॥

তা, মন্দভাগ্য আমি কোথায় যাই। (দেখিয়া) এই বাড়ী খানি কোন সজ্জনের হইবে, ইহার পার্শ্বদ্বারও অনাবৃত রহিয়াছে।

এই বাড়ীর দেওয়ালগুলি জীর্ণ হইয়া গিয়াছে এবং ইহার প্রকাণ্ড

तदत्र तावत् प्रविश्य तिष्ठामि ।

नेपथ्ये । जाध गोणा ! जाध । (भ)

आर्य्यकः । आकर्ण्य । अये ! प्रवहणमित एवाभिवर्त्तते ।

भवेद्गोष्ठीयानं न च विषमशीलैरधिगतं
वधूसंयानं वा, तदभिगमनोपस्थितमिदम् ।
वहिर्नेतव्यं वा प्रवर-जन-योग्यं विधिवशात्
विविक्तत्वाच्छून्यं मम खलु भवेद्दैवविहितम् ॥४॥

(भ) यात गावौ ! यातम ।

यस्य स तादृशस्य महाकपाटो वर्त्तते । अतएव मम तुल्यभाग्यस्तुल्यदुरदृष्टः, कुटुम्बी एतद्गृहस्वामी, ध्रुवं निश्चितमेव, व्यसनेन दारिद्र्यविपदा अभिभूता आक्रान्ता तां दशामवस्थाम्, प्रपन्नः प्राप्तः, इति तर्कयामीति भावः । अत्र गृहस्य भिन्नत्वादिलिङ्गेन गृहस्वामिनो दारिद्र्यदशाप्राप्तिरूपसाध्यज्ञानादनुमानं नाम गर्भसन्ध्यङ्गम् "लिङ्गादूहोऽनुमानता" इति लक्षणात् ।

उपेन्द्रवज्रा वृत्तम् ॥३॥

(भ) नेपथ्य इति । वर्द्धमानकाख्यस्य चारुदत्तभृत्यस्योक्तिरियम् ।

अथ वर्द्धमानकेनानीयमानं गोशकटं विकल्प्य तर्कयति भवेदिति । इदं प्रवहणम्, विषमशीलैर्दूषितस्वभावैर्जनैः, अधिगतमध्यारूढम्, गोष्ठीयानं वेश्यानु-

कপাটের সংযোগস্থান বিশীর্ণ হইয়া গিয়াছে, অথচ অর্গলও দেওয়া নাই। সুতরাং ইহার মালিক আমারই তুল্যভাগ্য হইবেন এবং নিশ্চয়ই দারিদ্র্যাভিভূত দশা প্রাপ্ত হইয়াছেন ॥৩॥

অতএব এই বাড়ীতে প্রবেশ করিয়া অবস্থান করি।

নেপথ্যে। যা, গরু ! যা।

আর্য্যক। (শুনিয়া) ওহে ! গাড়ীখানা এই দিকেই আসিতেছে। এই গাড়ীখানা, দুর্জনাধিষ্ঠিত উৎসবসমাজের গাড়ী হইবে বলিয়া

ततः प्रवहणेन सह प्रविश्य वर्द्धमानकश्चेटः। हीमाणहे! आणी-दे मए जाणत्थलके। लदणिए! णिवेदेहि अज्जआए वशन्त-शेणाए 'अवत्थिदे शज्जे पवहणे अहिलुहिअ पुप्फकलण्डअं जिण्णुज्जाणं गदुच्छ अज्जआ।" (म)

(म) आश्चर्य्यम्। आनीतं मया यानास्तरणम्। रदनिके! निवेदय

ष्ठयोत्सवसमाजगानम्, न च नहि भवेत्; तथात्वे अस्य शान्तभावो न स्यादिति भावः। तर्हि कस्येदमित्याह शून्यम् आरोहिरहितम्, इदं प्रवहणम्, वधूसंयानं स्त्रीलोकयानं तस्या वध्वाः स्त्रीलोकस्यैव अभिगमनाय इतः परमारूढ़ायाः सत्याः यत्र क्वचिद्गमनाय उपस्थितं वा भवेत्; वा अथवा, विविक्तत्वात् पवित्रत्वात् सुरापावाद्यपवित्रवस्तुरहितत्वाद्धेतोः, प्रवरजनयोग्यं श्रेष्ठलोकगमनयोग्यम्, इदं प्रवहणम्, विधिवशात् विधानवशात् तस्यैव प्रवरजनस्य आदेशवशादित्यर्थः, बहिर्नेतव्यं कस्मिंश्चित् बहिर्देशे चालकेन नेयं भवेत्। यथा तथा वा अस्तु इति भावः। दैवेन शुभादृष्टेन विहितम् आनीतम् इदं प्रवहणम्, मम खलु भवेत् आरोहणोपयोगीति शेषः, आरोहिशून्यत्वाद्देवेति भावः।

अत्र रूपं नाम गर्भसन्ध्यङ्गम् "रूपं वाक्यं वितर्कवत्" इति लक्षणात्।
"विधिर्विधाने दैवे च" इति "विविक्तौ पूतविजनौ" इति चामरः।
शिखरिणी वृत्तम् ॥ ४ ॥

(म) तत इति। हीमाणहे इत्याश्चर्य्यार्थे देशीयभाषापदम्, आश्चर्य्यञ्च यत् कदापि न विस्मृतं तस्यैव यानास्तरणस्य विस्मरणादिति बोध्यम्।

বোধ হয় না; তবে আরোহিরহিত ইহা স্ত্রীলোকের গাড়ী, তাহাকে লইয়া যাইবার জন্য উপস্থিত হইয়া থাকিবে; কিম্বা পবিত্র বলিয়া, কোন প্রধান লোকের উপযুক্ত এই গাড়ী, তাঁহারই আদেশে বাহিরে নিয়া যাইবে। যাহা হউক, শুভাদৃষ্ট কর্ত্তৃক আনীত এই গাড়ী এখন আমারই আরোহণের উপযোগী হইবে ॥৪॥

তদনন্তর বর্দ্ধমাননামক চারুদত্তের ভৃত্য, গাড়ীর সহিত প্রবে

आर्य्यकः। आकर्ण्य। गणिकाप्रवहणमिदं बहिर्यानञ्च। भवतु, अधिरोहामि। इति स्वैरमुपसर्पति। (य)

चेटः। श्रुत्वा। कधं णेउलसद्दे! ता आअदा क्खु अज्जआ अज्जए! इमे णस्स-कट्‌आ वइल्ला, ता पिट्‌ठदो ज्जेव आलु- हदु अज्जआ। [र]

आर्य्यकस्तथा करोति। (ल)

आर्य्यायै वसन्तसेनायै 'अवस्थितं सज्जं प्रवहणम् अधिरुह्य पुष्प-करण्डकं जीर्णोद्यानं गच्छतु आर्य्या।

(र) कथं नूपुरशब्दः! तदागता खलु आर्य्या। आर्य्ये! इमौ नस्य-कटुकौ बलीवर्द्दौ; तत् पृष्ठत एवारोहतु आर्य्या।

(य) आर्य्यक इति। वसन्तसेनायाः परिचितत्वाद्‌गणिकाप्रवहणमिदमिति निर्द्धारणम्, पुष्पकरण्डकजीर्णोद्यानस्य बहिःस्थितत्वात् बहिर्यानञ्चेति निर्द्देशश्च। स्वैरं मन्दम्। अन्यथा यदि परिचिनुयादिति भावः।

(र) चेट इति। आर्य्यकस्य पादलग्नशृङ्खलाशब्दे नूपुरशब्द इति भ्रमो जातः, अतएव तदित्याद्युक्तम्। नस्यं नासिकारन्ध्रप्रवेशितरश्मिभिः कटुका कष्टा इत्यर्थः, तेन च शृङ्गप्रहारसम्भव इति भावः।

(ल) आर्य्यक इति। तथा करोति पश्चाद्भागेन प्रवहणमारोहति।

করিয়া। ওহে! আমি গাড়ীর আস্তরণ আনিয়াছি। রদনিকা! তুমি আর্য্যা বসন্তসেনাকে জানাও যে,—'গাড়ী প্রস্তুত হইয়া অবস্থান করি-তেছে, আপনি আরোহণ করিয়া, পুষ্পকরণ্ডকনামক জীর্ণোদ্যানে যান।'

আর্য্যক। (শুনিয়া) এখানি বেশ্যার গাড়ী এবং বাহিরে যাইবে হউক, আরোহণ করি। (এই বলিয়া আস্তে আস্তে নিকটে গেল)

ভৃত্য। (শুনিয়া) নূপুরের শব্দ হইতেছে, সুতরাং বসন্তসেনা

চেটঃ। পাদুপ্ফাল-চালিদাণং ণেউলাণং বীসন্তো সদ্দো, ভলক্কন্তে অ পবহণে; তধা তক্কেমি সম্পদং অজ্জআএ আলূঢ়াএ হোদব্বং; তা গচ্ছামি। জাধ গোণা জাধ। ইতি পরিক্রামতি। (ব)

প্রবিশ্য বীরকঃ। অরে রে অরে জঅ-জঅ-মাণ-চন্দনঅ-মঙ্গল-ফুল্লভদ্দ-প্পমুহা! (শ)

(ব) পাদোৎফালচালিতানাং নূপুরাণাং বিশ্রান্তঃ শব্দঃ, ভারাক্রান্তঞ্চ প্রবহণম্, তথা তর্কয়ামি 'সাম্প্রতমার্য্যয়া আরূঢ়য়া ভবিতব্যম্, তদ্‌গচ্ছামি। যাতং গাবৌ! যাতম্।

(শ) অরে রে অরে জয়-জয়মান-চন্দনক-মঙ্গল-পুষ্পভদ্র-প্রমুখাঃ!

(ব) চেট ইতি। পাদয়োরুৎফালেন আরোহণকালে উত্তোলনেন চালিতানাং স্থানান্তরং নীতানাং নূপুরাণাং যঃ শব্দো জাতঃ স বিশ্রান্ত ইত্যর্থঃ। আরূঢ়য়া আরুহ্য স্থিতয়া।

(শ) প্রবিশ্যেতি। বীরকো নামায়ং সেনাপতিঃ, জয়াদিকন্তু তদধীনং সেনানীপঞ্চকম্।

আসিয়াছেন। আর্য্যে! নাকে দড়ি দেওয়ায় এই গরু দুইটা বড়ই পাগলা হইয়া গিয়াছে; সুতরাং আপনি পিছনের দিক্ হইতেই আরোহণ করুন।

(আর্য্যক তাহাই করিল)

ভৃত্য। চরণযুগলের উত্তোলনে সঞ্চালিত নূপুরের শব্দ এখন বিরত হইয়াছে, গাড়ীও ভারাক্রান্ত হইয়াছে; তাহাতে আমি মনে করি,—এখন বসন্তসেনা আরূঢ় হইয়াছেন; তা এখন যাই। যা, গরু! যা। (এই বলিয়া যাইতে লাগিল)

বীরকনামক সেনাপতি, প্রবেশ করিয়া। ওরে ওরে জয়-জয়মান-চন্দনক-মঙ্গল-পুষ্পভদ্রপ্রভৃতি বীরগণ!

किं अच्छध (१) वीसद्धा जो सो गोवालदारओ रुद्धो ।
भेत्तुण समं वच्चइ णरवइ-हिअअं बन्धनं अ ॥५॥

अले ! पुरत्थिमे पदोली-दुआरे चिट्ठ तुमं, तुमं पि पच्छिमे तुमं पि दक्खिणे, तुमं पि उत्तरे । जोवि एसो पावारखण्डो,

किं स्थ विश्रब्धाः, यः स गोपालदारको रुद्धः ।
भित्त्वा समं व्रजति नरपति-हृदयं बन्धनञ्च ॥५॥

अरे ! पुरस्तात् प्रतोलीद्वारे तिष्ठ त्वम्, त्वमपि पश्चिमे त्वमपि

किमिति । विश्रब्धाः 'सर्वत्र शान्तिरेव स्थिता' इति विश्वस्ताः, किं स्थ कथं तिष्ठथ यूयम्; उद्विग्नैरेव युष्माभिर्भवितव्यमिति भावः । तत्र कारणमाह—स भावि-राज्याधिकारितया सिद्धादिष्टः, यो गोपालदारको रुद्धः, स इत्यर्थः, समं युगप-देव, नरपतिहृदयम् बध्यते अनेनेति बन्धनं शृङ्खलाच भित्त्वा विदार्य्य उद्वेगेनाकुली-कृत्य खण्डयित्वा च व्रजति पलायते ।

अत्र बन्धनभेदनं कारणं नरपतिहृदयभेदनञ्च तत्कार्य्यमित्यनयोर्य्यौगपद्याभिधा-नेन कार्य्यकारणयोः पौर्वापर्य्यविपर्य्ययरूपा अतिशयोक्तिः, एकभेदनक्रियया बन्धन-नरपतिहृदययोः कर्म्मतया अभिसम्बन्धात्तुल्ययोगिता च, अनयोरेकाश्रयानुप्रवेशरूपः सङ्करः । आर्य्या जातिः ॥५॥

(ष) अरे इति । पुरस्तात् पूर्वस्मिन्, प्रतोल्या रथ्याया रथ्यापार्श्ववर्त्तिन्यित्यर्थः

তোমরা বিশ্বস্ত রহিয়াছ কেন? সেই যে গোপালবালকটাকে রুদ্ধ করা হইয়াছিল, সে একদাই রাজার হৃদয় ও বন্ধনশৃঙ্খল ভেদ করিয়া পলাইয়াছে ॥৫॥

ওরে তুমি পূর্ব্বদিকে রাস্তার দ্বারে থাক, তুমিও পশ্চিম দিকে,

(१) अच्छध ।

एदं अहिरुहिअ चन्दणेण समं गदुअ अवलोएमि । एहि चन्दणअ ! एहि, इदो दाव । (ष)

प्रविश्य सम्भ्रान्तश्चन्दनकः । अरे रे वीरअ-विसल्ल-भीमङ्गअ-दण्डकालअ-दण्डसूर-प्पमुहा ! (स)

आअच्छध वीसत्था तुरिअं जत्तेह लहु करेज्जाह ।
लच्छी जेण ण रण्णो पहवइ गोत्तन्तरं गन्तुम् ॥६॥

दक्षिणे, त्वमपि उत्तरे। योऽपि एष प्राकारखण्डः, एतमधिरुह्य चन्दनेन समं गत्वा अवलोकयामि। एहि चन्दनक! एहि, इतस्तावत्।

(स) अरे रे वीरक-विशल्य-भीमाङ्गद-दण्डकालक-दण्डशूर-प्रमुखाः!

आगच्छत विश्रब्धा त्वरितं यतध्वं लघु कुरुत ।
लक्ष्मीर्येन न राज्ञः प्रभवति गोत्रान्तरं गन्तुम् ॥६॥

द्वारे। इदन्तु जयं प्रत्यभिहितम्, मन्त्रीयनक्रमात्। त्वमपि जयमालः पश्चिमे प्रतीलीद्वारे तिष्ठेत्यन्वयः। त्वमपि मङ्गल इत्यर्थः, चन्दनकस्य पृथगभिधानात्। त्वमपि पुष्पभद्र उत्तरे। प्राकारखण्डः ईष्टकादर्शनार्थमेव निर्म्मित उच्चैष्टकास्तम्भः।

(स) प्रविश्येति। सम्भ्रान्तो व्यस्तचित्तः। अत्र वीरकादयः सैन्याः।

आगच्छतेति। विश्रब्धाः 'पलायितमार्यकमवश्यमेव धरिष्यामः' इति विश्वस्ताः

তুমিও দক্ষিণদিকে এবং তুমিও উত্তর দিকে থাক। আর এই যে প্রাচীরের খণ্ড দেখা যাইতেছে, চন্দনকের সহিত যাইয়া আমি ইহাতে উঠিয়া দেখি। আইস, চন্দনক! এই দিকে আইস।

চন্দনক ব্যস্তভাবে প্রবেশ করিয়া। ওরে ওরে বীরক—বিশল্য—ভীমাঙ্গদ—দণ্ডকালক-দণ্ডশূর-প্রভৃতি বীরগণ!

অবি অ।

উজ্জাণেসু সহাসু অ, মগ্গে ণঅরীঅ আবণে ঘোসে।
তং তং জোহহ তুরিঅং, সঙ্কা বা জাঅএ জত্থ ॥৭॥
রে রে বীরঅ! কিং কিং, দরিসেসি ভণাহি দাব বীসদ্ধং।
ভেত্তূণ অ বন্ধণঅং, কো সো গোবালদারঅং হরই ॥৮॥

অপি চ। উদ্যানেষু সভাসু চ মার্গে নগর্য্যাপণে ঘোষে।
তং তমন্বিষ্যত ত্বরিতং শঙ্কা বা জায়তে যত্র ॥৭॥
রে রে বীরক! কিং কিং দর্শয়সি ভণাহি তাবদ্বিস্রব্ধং।
ভিত্ত্বা চ বন্ধনকং কঃ স গোপালদারকং হরতি ॥৮॥

সন্তো যূয়মাগচ্ছত, ত্বরিতং যতধ্বং তং ধর্ত্তুমিতি শেষঃ, লঘু শীঘ্রং কুরুত তদন্বেষণমিত্যুপস্কারঃ। যেন উক্তবিধেন যুষ্মাকং ব্যাপারেণ, রাজ্ঞঃ পালকস্য, লক্ষ্মীঃ গোত্রান্তরম্ আর্য্যকাশ্রয়েণ ক্ষত্রিয়বংশাদ্ গোপবংশম্, গন্তুং ন প্রভবতি ন শক্নোতি।

আর্য্যা জাতিঃ ॥৬॥

উদ্যানেষ্বিতি। উদ্যানেষু, সভাসু, মার্গে পথিমাত্রে, নগর্য্যা উজ্জয়িন্যাঃ আপণে ক্রয়বিক্রয়স্থানে, ঘোষে আভীরপল্লীষু, ত্বরিতং তং বন্ধনখণ্ডয়িতারং জনম্, তমার্য্যকঞ্চ, অন্বিষ্যত, যত্র স্থানে বা শঙ্কা তয়োরবস্থানসন্দেহো জায়তে, তত্রাপ্যন্বিষ্যতেত্যর্থঃ। আর্য্যা জাতিঃ ॥৭॥

রে রে ইতি। রে রে বীরক! কিং কিম্ আর্য্যকস্য চিহ্নমিত্যর্থঃ, দর্শয়সি দর্শ-

---

তোমরা বিশ্বস্ত হইয়া আইস, শীঘ্র তাহাকে ধরিবার চেষ্টা কর, তাড়াতাড়ি তাহার অন্বেষণ কর, যাহাতে রাজলক্ষ্মী অন্য বংশে যাইতে না পারে ॥৬॥

আরও, উপবনে, সভায়, পথে, নগরের দোকানে, কিম্বা গোয়ালপাড়ায় অথবা যেখানে সন্দেহ জন্মিবে, সেইখানে আর্য্যক ও তাহার বন্ধনমোচককে শীঘ্র অন্বেষণ কর ॥৭॥

कस्स ट्ठमो(१) दिणअरो, कस्स चउत्थो अ वट्टए चन्दो।
छट्ठो अ भग्गव-गहो, भूमिसुओ पञ्चमो कस्स ॥९॥

कस्याष्टमो दिनकरः कस्य चतुर्थश्च वर्त्तते चन्द्रः।
षष्ठश्च भार्गवग्रहो भूमिसुतः पञ्चमः कस्य ॥९॥

यितुं शक्नोषि? तद्‌ यदि विश्रब्धं विश्वस्तं यथा स्यात्तथा भणसि, तदा महत्येव सुविधा भवेदिति शेषः। बन्धनकं बन्धनशृङ्खलाम्, छित्त्वा खण्डयित्वा, यो गोपालदारकमार्य्यकं हरति, किञ्चेति चार्थः। स जनः कः?।

अत्र 'आर्य्यकस्य चिह्नम्' इत्यादिपदानामनुक्तत्वेऽपि न न्यूनपदतादोषः, प्रत्युत गुण एव, वक्तुरुद्वेगमयत्वात् 'उत्कालानन्दमग्नादेः स्यान्न्यूनपदता गुणः' इति दर्पणोक्तेः। गीतिर्जातिः ॥८॥

कस्येति। इतः श्लोकद्वयेन युग्मकं बोध्यम्। चन्दनके मयि जीवति सति, यो गोपालदारकं हरति, स जनः कः? एवं दिनकरो रविः, कस्य जनस्य अष्टमः जन्मराशितोऽष्टमराशिगत इत्यर्थः। एवमन्यत्रापि। 'पीडामष्टमगः करोति नितराम्' इति शास्त्रादष्टमस्थरवेर्गुरुतरपीडाजनकत्वादस्मदादिभिर्म्महदुत्पीडनं भवेदिति भावः। परत्राप्येवम्।

चन्द्रश्च कस्य चतुर्थो वर्त्तते।। 'नैवरोगं चतुर्थः' इति वचनादस्मदादिभिर्नय-नोत्पाटनं भावीत्याशयः।

ওরে ওরে বীরক! তুমি আর্য্যকের কি কি চিহ্ন দেখাইতে পার, তাহা যদি ভাল করিয়া বল, (তবে বড়ই সুবিধা হয়)। যে, বন্ধন ছেদন করিয়া গোপবালক আর্য্যককে হরণ করিয়াছে, সে লোকটা কে? ॥৮॥

রবি কাহার অষ্টম? চন্দ্র কাহার চতুর্থ? শুক্র কাহার ষষ্ঠ? মঙ্গল কাহার পঞ্চম হইয়াছেন? ॥৯॥

---

(१) कस्स अट्ठमो।

भण कस्स जम्म-छट्ठो जीवो णवमो तहेअ सूरसुओ ।
जीअन्ते चन्दणए, को सो गोवालदारअं हरइ ॥१०॥

वीरकः । भड ! चन्दणआ ! (ह)

भण कस्य जन्मषष्ठो जीवो नवमस्तथैव सूरसुतः ।
जीवति चन्दनके कः स गोपालदारकं हरति ॥१०॥

(ह) भट ! चन्दनक ! ।

भार्गवग्रहः शुक्रश्च कस्य षष्ठो वर्त्तते । 'भृगुर्नाशं कुर्य्यात्' इति शास्त्रात्तस्य मृत्युरेव भविष्यतीत्यभिप्रायः ।

भूमिसुतो मङ्गलः कस्य पञ्चमो वर्त्तते । 'असून् छिणोति च पञ्चमः' इति ज्योतिर्वचनात् मरणमेव भावीति भावः ।

जीवो बृहस्पतिः, कस्य जन्मनो जन्मराशेः षष्ठः षष्ठराशिस्थो वर्त्तते । 'अशुभमपि च कुर्य्यादरिष्टे' इत्युक्तेर्यावज्जीवं कारावासादिरूपमशुभं भवेदित्याशयः ।

सूरसुतः शनिश्च, कस्य नवमस्तथैव वर्त्तते । 'धर्मे धनचयः" इति वचनात्तस्य महानर्थं दण्डो वा भवेदित्यभिप्रायः इत्येतत् सर्वं भण ब्रूहि ।

नन्विदृशज्योतिःशास्त्राभिज्ञो वक्ता कथमसंस्कृतं वक्तीति चेन्न कुतोऽप्येतन्मात्रमाकर्णाभिहितत्वाद्वस्तुतस्त्वशिक्षितत्वात् ।

प्रथमा आर्य्या, द्वितीया च गीतिः॥९—१०॥

(ह) वीरक इति । हे भट ! योद्धः ! । "भटा योधाश्च योद्धारः" इत्यमरः ।

এবং বল—বৃহস্পতি কাহার জন্মরাশি হইতে ষষ্ঠ-রাশি-গত হইয়াছেন? অথবা শনি কাহার নবম রাশি-গত হইয়াছেন?। চন্দনক জীবিত থাকিতে যে গোপবালক আর্য্যককে হরণ করিয়াছে, সে বেটা কে? ॥১০॥

বীরক। হে যোদ্ধৃপুরুষ! চন্দনক!

अवहरइ कोवि तुरिअं, चन्दणअ ! सवामि तुज्झ हिअएण।
जह (१) अद्धुइद-दिणअरे, गोवालअ-दारओ खुड़िदो ॥११॥

चेटः । जाध गोणा ! जाध । (ख)

चन्द । दृष्ट्वा । अरे रे ! पेक्ख पेक्ख । (क)

ओहारिओ पवहणो, वच्चइ मज्झेण राअमग्गस्स ।
एदं दाव विआरह, कस्स कहिं पवसिओ पवहणो त्ति
॥ १२ ॥

अपहरति कोऽपि त्वरितं चन्दनक ! शपे तव हृदयेन ।
यथा अर्द्धोदितदिनकरे गोपालक-दारकः खुटितः ॥ ११ ॥

(ख) यातं गावौ यातम् ।

(क) अरे रे ! प्रेचस्व प्रेचस्व ।

अपवारितं प्रवहणं व्रजति मध्येन राजमार्गस्य ।
एतत्तावद्विचारय कस्य कुत्र प्रेषितं प्रवहणमिति ॥ १२ ॥

अपेति । हे चन्दनक ! तव हृदयेन शपे शपथं करोमि एतत् सत्यं ब्रवीमीत्यर्थः ; कोऽपि जनः, त्वरितमपहरति आर्य्यकमिति शेषः । यथा यतः स आर्य्यकाख्यो गोपालदारकः, अर्द्धोदितो दिनकरो यस्मिन् तादृशे समये खुटितः पलायितः ; तेन चहस्वनखण्डनाभावे आर्य्यकस्य पलायनासम्भव एवेति भावः ।

खुट इति सौत्रो धातुः, खुड़ित इत्येव देशीयप्रयोगो वा । आर्य्या जातिः ॥११॥

(ख) चेट इति । अयन्तु वर्द्धमानको नाम चारुदत्तभृत्यः ।

হে চন্দনক ! আমি তোমার হৃদয় দ্বারা শপথ করিতেছি, কোনও লোক অপহরণ করিতেছে। যে হেতু, সেই গোপবালক, সূর্য্য অর্দ্ধ উদিত হইলে পলায়ন করিয়াছে ॥১১॥

ভৃত্য। যা, গরু ! যা।

চন্দনক। (দেখিয়া) ওরে রে ! দেখ দেখ —

---

(१) इह ।

वीरकः। अवलोक्य। अरे पवहणवाहआ! मा दाव एदं पवहणं वाहेहि। कस्सकेरकं एदं पवहणं? को वा इध आरूढ़ो? कहिं वा वजइ?। (ख)

चेटः। एसे क्खु पवहणे अज्जचालुदत्ताह कॆलके, इध अज्जआ वशन्तशेणा आलूढा, पुप्फकरण्डअं जिस्सुज्जाणं कीलिदुं चालुदत्तश्श णीअदि। (ग)

(ख) अरे प्रवहणवाहक! मा तावदेतत् प्रवहणं वाहय। कस्यैतत् प्रवहणम्? को वा इहारूढ़ः? कुत्र वा व्रजति?।

(ग) एतत् खलु प्रवहणमार्य्यचारुदत्तस्य, इह आर्य्या वसन्तसेना आरूढ़ा, पुष्पकरण्डकं जीर्णोद्यानं क्रीड़ितुं चारुदत्तस्य नीयते।

अर्पेति। अपवारितं वसनावगुण्ठितं प्रवहणम्, राजमार्गस्य मध्येन मध्यमार्गेन व्रजति। कस्य प्रवहणं कुत्र प्रेषितम्, एतत्तावत् विचारय विचार्य्य पश्य अवार्य्यको वर्त्तते न वेत्यर्थः। गीति र्जातिः॥ १२॥

(ग) चेट इति। क्रीड़ितुं विहर्त्तुं,मुत्सुकेति शेषः। चारुदत्तस्य समीपे।

রাজপথের মধ্য দিয়া এক খানা আবৃত গাড়ী যাইতেছে; এখানা কাহার প্রেরিত গাড়ী কোথায় যাইতেছে, ইহা বিচার করিয়া দেখ॥১২॥

বীরক। (দেখিয়া) ওরে গাড়ীচালক! এই গাড়ী চালাইস্ না। এখানা কাহার গাড়ী? ইহাতে কে আরোহণ করিয়াছে? কোথায়ই বা যাইতেছে?।

ভৃত্য! এ গাড়ী আর্য্য চারুদত্তের, ইহাতে আর্য্যা বসন্তসেনা আরোহণ করিয়াছেন, বিহার করিবার নিমিত্ত, চারুদত্তের নিকট পুষ্পকরণ্ডকনামক জীর্ণোদ্যানে নিয়া যাইতেছি।

বীরকঃ। চন্দনমুপসৃত্য। এসো পবহণবাহও ভণাদি—'অজ্জচারুদত্তস্স পবহণং, বসন্তসেণা আরূঢ়া, পুপ্ফকরণ্ডঅং জিণ্ণুজ্জাণং ণীঅদিত্তি। (ঘ)

চন্দ। তা গচ্ছদু। (ঙ)

বীরকঃ। অণবলোইদো জ্জেব ?। (চ)

চন্দ। অধই। (ছ)

বীরকঃ। কস্স পচ্চএণ ?। (জ)

চন্দ। অজ্জচারুদত্তস্স। (ঝ)

(ঘ) এষ প্রবহণবাহকো ভণতি 'আর্য্যচারুদত্তস্য প্রবহণম্, বসন্তসেনা আরূঢ়া, পুষ্পকরণ্ডকং জীর্ণোদ্যানং নীয়তে' ইতি।

(ঙ) তদ্গচ্ছতু।

(চ) অনবলোকিত এব।

(ছ) অথকিম্।

(জ) কস্য প্রত্যয়েন ?।

(ঝ) আর্য্যচারুদত্তস্য।

(জ) বীরক ইতি। প্রত্যয়েন বিশ্বাসেন।

বীরক। (চন্দনকের নিকট যাইয়া) এই গাড়ীর চালক বলিতেছে, "আর্য্য চারুদত্তের গাড়ী, বসন্তসেনা আরোহণ করিয়াছেন, পুষ্পকরণ্ডক নামক জীর্ণোদ্যানে নিয়া যাইতেছি।"

চন্দনক। তা, যাউক।

বীরক। না দেখা অবস্থায়ই ?।

চন্দনক। হাঁ।

বীরক। কাহার বিশ্বাসে ?।

वीरकः। को अज्जचारुदत्तो ? का वा वसन्तसेणा ? जेण अणवलोइदं वज्जइ। (ञ)

चन्द। अरे अज्जचारुदत्तं ण जाणासि ? ण वा वसन्तसेणिअं ?। जइ अज्जचारुदत्तं वसन्तसेणिअं वा ण जाणासि, ता गअणे जोण्हासहिदं चन्दं पि तुमं ण जाणासि (ट)

को तं गुणारविन्दं, सीलमिअङ्कं जणो ण जाणादि ?।
आवस्स-दुक्ख-मोक्खं चउ-साअर-सारअं रअणं ॥ १२ ॥

(ञ) क आर्य्यचारुदत्तः ? का वा वसन्तसेना ? येनानवलोकितं व्रजति।

(ट) अरे आर्य्यचारुदत्तं न जानासि ? न वा वसन्तसेनिकाम् ? यदि आर्य्यचारुदत्तं वसन्तसेनिकां वा न जानासि, तद् गगने ज्योत्स्नासहितं चन्द्रमपि त्वं न जानासि।

कस्तं गुणारविन्दं शीलमृगाङ्कं जनो न जानाति ?।
आपन्न-दुःख-मोचं चतुःसागरसारं रत्नम् ॥ १२ ॥

(ट) चन्द इति। अत्र परवाक्यं वस्तुसम्बन्धोऽसम्भवन् अतिप्रसिद्धयोश्चारुदत्त वसन्तसेनयोरज्ञानं निकटप्रत्यक्षयोश्चन्द्रज्योत्स्नयोरज्ञानमिवेति सादृश्यं बोधयतीति निदर्शनालङ्कारः।

চন্দনক। আর্য্য চারুদত্তের।

বীরক। আর্য্য চারুদত্ত কে ?। বসন্তসেনাই বা কে ? যে না দেখা অবস্থায়ই যাইবে।

চন্দনক। ওহে! তুমি আর্য্য চারুদত্ত, কিম্বা বসন্তসেনাকে জান না ? যদি আর্য্য চারুদত্ত ও বসন্তসেনাকে না জান, তবে আকাশে জ্যোৎস্নার সহিত চন্দ্রকেও তুমি জান না।

दो ज्जेव पूअणीआ, एत्थ णअरीए तिलअभूदा अ ।
अज्जा वसन्तसेणा, धम्मणिही चारुदत्तो अ ॥ १४ ॥

द्वावेव पूजनीयौ अत्र नगर्य्यां तिलकभूतौ च ।
आर्य्या वसन्तसेना धर्म्मनिधिश्चारुदत्तश्च ॥ १४ ॥

कं इति । गुणा दया दाक्षिण्यादयः अरविन्दानीव यस्य तं पद्मतुल्यलोभनीयगुणकमित्यर्थः, शीले मृगाङ्कश्चन्द्र इव तं चन्द्रतुल्यनिर्म्मलस्वभावमिति तात्पर्य्यम् आपन्नानां विपन्नानां दुःखस्य मोक्षो मोचनं यस्मात् तम्, तथा चतुर्णां सागराणां सारमुत्तमं रत्नं रत्नस्वरूपम्, तं चारुदत्तम्, को जनो न जानाति? अपि तु सर्व एव जानातीत्यर्थः ।

अत्र पूर्वार्द्धे लुप्तोपमाद्वयम्, परार्द्धे च निरङ्गं केवलरूपकमित्येतेषामिथो निरपेक्षतया संसृष्टिः । तथा पूर्वार्द्धे वाक्यसमाप्तावपि तन्निष्ठस्य विशेषणतया परार्द्धस्य पुनरुपादानात् समाप्तपुनरात्तता दोषः, स च अर्द्धयोर्विपरीत पाठेन समाधेयः ।

आर्य्या जातिः ॥ १३ ॥

द्वाविति । तिलकभूतौ श्रेष्ठावित्यर्थः । आर्य्या वेश्यात्वेऽपि साधुस्वभावा । अत्र पूजनीयावित्येकया क्रियया वसन्तसेनाचारुदत्तयोः कर्म्मतयाभिसम्बन्धात् तुल्ययोगितालङ्कारः । आर्य्या जातिः ॥ १४ ॥

যাঁহার দয়াদাক্ষিণ্যপ্রভৃতিগুণ, পদ্মের ন্যায় স্পৃহণীয়; যিনি স্বভাবে চন্দ্রের তুল্য নির্ম্মল; যাঁহা হইতে বিপন্নজনের দুঃখের মুক্তি হইয়া থাকে এবং যিনি চতুঃসমুদ্রের উত্তম রত্নস্বরূপ, সেই চারুদত্তকে কে না চেনে? ॥১৩॥

আর্য্যা বসন্তসেনা এবং ধর্ম্মনিধি চারুদত্ত-এই দুই জনই, এই উজ্জয়িনী নগরে পূজনীয় এবং তিলকস্বরূপ ॥১৪॥

वीरकः। अरे चन्दणआ! (ठ)

जाणामि चारुदत्तं, वसन्तसेणं अ सुट्ठु जाणामि।

पत्ते अ राअकज्जे, पिदरं पि अहं ण जाणामि॥१५॥

आर्य्यकः। स्वगतम्। अयं मे पूर्व्ववैरी, अयं मे पूर्व्वबन्धुः। यतः— (ड)

एककार्य्यनियोगेऽपि नानयोस्तुल्यशीलता।

विवाहे च चितायाञ्च यथा हुतभुजोर्द्वयोः॥१६॥

(ठ) अरे चन्दनक!

जानामि चारुदत्तं वसन्तसेनाञ्च सुष्ठु जानामि।

प्राप्ते च राजकार्य्ये पितरमपि अहं न जानामि॥१५॥

जानामीति। सुष्ठु सम्यक्। राजकार्य्ये च प्राप्ते अनुसन्धानात्मके कस्मिंश्चित् राजकार्य्ये उपस्थिते, अहं पितरमपि आत्मनो जनकमपि न जानामि विश्वास्यतया न गणयामि, किं पुनश्चारुदत्तादीनिति भावः।

अत्रार्थापत्तिरलङ्कारः, आर्य्या च जातिः॥१५॥

(ड) आर्य्यक इति। अयमङ्गुल्या निर्द्दिष्टो वीरकः। अयञ्च चन्दनकः। अत उभयोरुपरि एकविधैव धारणा न कर्त्तव्येति भावः। अत्र हेतुमाह यत इति।

एकेति। एकस्मिन् मम धारणरूपे कार्य्ये नियोगेऽपि राज्ञा व्यापारितत्वेऽपि,

---

वीरक। ওরে চন্দনক! আমি চারুদত্তকে চিনি এবং বসন্তসেনা-কেও ভালরকম চিনি। কিন্তু রাজকার্য্য উপস্থিত হইলে আমি পিতাকেও চিনি না॥ ৫॥

আর্য্যক।(স্বগত) এই বীরক আমার পূর্ব্বের শত্রু, আর এই চন্দনক আমার পূর্ব্বের বন্ধু। সুতরাং—

যেমন এক দাহ কার্য্যে নিয়োগ থাকিলেও বিবাহে, ও চিতাতে দুইটী

चन्द । तुमं तन्तिलो सेणावई रस्रो पच्चइदो एदे धारिदा मए वइल्ला, अवलोएहि । [ढ]

वीरकः । तुमं पि रस्रो पच्चइदो वलवई, ता तुमं ज्जेव अवलोएहि । (ण)

(ढ) त्वं तन्त्रिलः सेनापतिः राज्ञः प्रत्ययितः, एतौ धारितौ मया वलीवर्द्दौ, अवलोकय ।

(ण) त्वमपि राज्ञः प्रत्ययितो वलपतिः, तत त्वमेव अवलोकय ।

अनयोर्वीरकचन्दनकयोः, तुल्यशीलता समानः स्वभावो न स्यात् । यथा विवाहे च चितायाञ्च द्वयोर्हुतभुजोरग्न्योर्न तुल्यशीलता । तथा च यथा वह्नेर्दहनरूपे एकस्मिन कार्य्ये नियोगेऽपि विवाहे हविषो दहनं मङ्गलजननञ्च, चितायाञ्च शरीरस्यैव दहनममङ्गलजननञ्च, तथा चन्दनकेन धृत्वा मम मोचनम्, वीरकेण तु धृत्वा हननं कर्त्तव्यमिति भावः ।

अत्र श्रौती उपमालङ्कारः । तथा च्छिप्तिर्नाम गर्भसन्धेरङ्गञ्च—

"रहस्यार्थस्य तूद्भेदः छिप्तिः स्यात्" इति दर्पणलक्षणात् ॥१६॥

(ढ) चन्द इति । तन्त्रं प्राधान्यमस्यास्तीति तन्त्रिलः प्रधानः पृषोदरादित्वात् साधुः । "तन्त्रं प्रधाने शुद्धान्ते सूत्रवापे परिच्छदे" इत्यमरः । प्रत्ययोऽस्य सञ्जात इति प्रत्ययितो विश्वस्तः । अवलोकय आर्य्यकोऽस्ति न वेति परीक्षस्व ।

(ण) वीरक इति । वलपतिरमाधीनत्वेऽपि कियतमन्यपतिः ।

আগুণের সমান স্বভাব হয় না, সেই রূপ ইহাদেরও এক কার্য্যে নিয়োগ থাকিলেও সমান স্বভাব হইবে না ॥১৬॥

চন্দনক । তুমি প্রধান সেনাপতি এবং রাজার বিশ্বস্ত, সুতরাং আমি এই গরু দুইটা ধরিয়াছি, তুমি দেখ ।

বীরক । তুমিও রাজার বিশ্বস্ত এবং সেনাপতি ; সুতরাং তুমিই দেখ ।

चन्द। मए अवलोइदं तुए अवलोइदे भोदि ?। (त)

वीरकः। जं तुए अवलोइदं तं रसा पालएण अवलोइदं। (थ)

चन्द। अरे! उसामेहि धुरं। (द)

चेटस्तथा करोति।

आर्य्यकः। स्वगतम्। अपि रक्षिणो मामवलोकयन्ति ?। अशस्त्रश्चास्मि मन्दभाग्यः। अथवा—(ध)

(त) मया अवलोकितं त्वया अवलोकितं भवति ?।

(थ) यत् त्वया अवलोकितं तत् राज्ञा पालकेनावलोकितम्।

(द) अरे! उन्नमय धुरम्।

(त) चन्द इति। मत्परीक्षणं त्वत्परीक्षणतुल्यं भवति न वेत्यर्थः। मया अवलोकितेऽपि यदि पुनस्त्वयापि मय्यविश्वासेनावलोकयितव्यम्, तदा मयायं परिश्रमो नाङ्गीकर्त्तव्य इति भावः।

(थ) वीरक इति। तव परीक्षणं साक्षाद्राजपरीक्षणतुल्यमेव भवेदित्यर्थः। सुतरां त्वमेवावलोकयितुमर्हसीति भावः।

(द) चन्द इति। अरे इति चेटसम्बोधनम्। धुरम् आरोहणस्थानस्थं यानादिभारम्, उन्नमय उत्तोल्यापसारय, येनाहमारोढुमर्हामीति भावः।

(ध) आर्य्यक इति। अपिशब्दः प्रश्ने।

চন্দনক। আমার দেখায়ই তোমার দেখা হইবে ?।

বীরক। যাহা তুমি দেখিবে, তাহা রাজা পালকেরই দেখা হইবে।

চন্দনক। ওরে! ভার নামা।

(ভৃত্য তাহা করিল)

ভীমস্যানুকরিষ্যামি বাহুঃ শস্ত্রং ভবিষ্যতি ।
বরং ব্যয়চ্ছতো মৃত্যুর্ন গৃহীতস্য বন্ধনে ॥১৩॥
অথবা, সাহসস্য তাবদনবসরঃ । (ন)

চন্দ । নাট্যেন প্রবহণমারুহ্যাবলোকয়তি ।

ভীমস্যেতি । ভীমস্য দ্বিতীয়পাণ্ডবস্য, অনুকরিষ্যামি অনুকরণং করিষ্যামি । কীদৃগিত্যাহ—বাহুর্মম ভুজ এব শস্ত্রং ভবিষ্যতি, ভীমবৎ বাহুযুদ্ধমেব করিষ্যামীত্যর্থঃ । ননু শস্ত্রধারিভিঃ সহ বাহুযুদ্ধে মৃত্যুরবশ্যম্ভাবীত্যাহ—ব্যায়চ্ছতো ব্যায়ামং কুর্ব্বতঃ বাহুভ্যাং যুদ্ধমানস্যেত্যর্থঃ মৃত্যুর্বরম্, কিঞ্চিৎপুরুষকারপ্রকাশাদিত্যাশয়ঃ ; কিন্তু বন্ধনে কারায়াম্, গৃহীতস্য স্থাপিতস্য ন, নির্জীববৎ পুরুষকারাভাবাদিতি ভাবঃ ।

অত্র প্রথমপাদে শ্রৌতী উপমা, দ্বিতীয়ার্দ্ধে সামান্যেন পূর্ব্বার্দ্ধবিশেষসমর্থনরূপোঽর্থান্তরন্যাসশ্চ, অনয়োরঙ্গাঙ্গিভাবেন সঙ্করঃ ।

ভীমস্যেতি শেষে ষষ্ঠী "তস্য চানুকরোতি হি" ইতি দীপিকাপ্রয়োগবৎ, "তদানুকুর্য্যাদ্বিশদস্য তস্যাস্তাম্রৌষ্ঠপর্য্যস্তরুচঃ স্মিতস্য" ইতি কুমারোক্তবচ্চ ॥১৩॥

(ন) অথবেতি । সাহসস্য বহুভিঃ শস্ত্রধারিভিঃ সহ অশস্ত্রস্যৈকাকিনো যুদ্ধরূপস্যেত্যর্থঃ, একাঘাতাদেব মৃত্যুসম্ভবেন পুরুষকারপ্রকাশস্যাপ্যসম্ভবাদিতি ভাবঃ ।

(প) চন্দ ইতি । কিতবত্বাদস্য সংস্কৃতাধ্যয়নম্ । যথা দর্পণে—

"যোষিৎসখীবালবেশ্যাকিতবাপ্সরসাং তথা ।

আর্য্যক । (স্বগত) রক্ষীরা কি আমাকে দেখিতে পাইবে ? মন্দভাগ্য আমি, শস্ত্রবিহীন রহিয়াছি । অথবা—

ভীমের অনুকরণ করিব, বাহুই অস্ত্র হইবে । কারণ, যুদ্ধের ব্যায়াম করিতে করিতে মৃত্যু হওয়াও ভাল, কিন্তু কারাগারে স্থাপিত অবস্থায় নহে ॥১৩॥

অথবা ইহা সাহসের সময় নহে ।

চন্দনক । (অভিনয়ের ধরণে গাড়ীতে উঠিয়া দেখিতে লাগিল)

आर्य्यकः । शरणागतोऽस्मि ।

चन्द । संस्कृतमाश्रित्य । अभयं शरणागतस्य । (य)

आर्य्यकः । त्यजति किल तं जयश्री

र्जहति च मित्राणि बन्धुवर्गश्च ।

भवति च सदोपहास्यो

यः खलु शरणागतं त्यजति ॥१८॥

वेदव्यासार्थं प्रदातव्यं संस्कृतस्थान्तरान्तरा ॥

भयस्याभाव इत्यभयम्, अभावार्थेऽव्ययीभावः ।

त्यजतीति । यः खलु जनः, शरणागतं जनं त्यजति ; जयश्रीर्जयलक्ष्मीस्तं किल त्यजति, कापुरुषत्वज्ञानीति भावः । मित्राणि सुहृदश्च, तं जहति त्यजन्ति, बन्धुवर्गो भ्रात्रादिश्च तं जहाति उभयत्रापि निर्दयत्वज्ञानेनात्मनामप्युपकारित्वासम्भवबोधादित्याशयः । सदा उपहास्यश्च भवति, वीरज्ञानेन शरणागतत्वात् परञ्च तत्त्यागे कापुरुषताप्रकाशादित्यभिप्रायः ।

अत्र शरणागतत्यागस्य अन्याय्यताप्रतिपादनकार्य्यं प्रति बहुतरकारणोपन्यासात् समुच्चयोऽलङ्कारः । तथा एकवचनान्तक्रियाणां मध्ये जहतीति बहुवचनप्रयोगाद्भग्नप्रक्रमतादोषः, त्यजतीति पदस्य द्विरुपादानात् कथितपदतादोषश्च ; 'जहाति च मित्रं बन्धुवर्गश्च' इति तृतीयचरणपाठेन 'यः शरणागतं वर्जयति' इति चतुर्थचरणपाठेन च तयोः समाधानम् ।

आर्य्या जातिः ॥१८॥

আর্য্যক। আমি আপনার শরণাগত হইলাম।

চন্দনক। (সংস্কৃত ভাষা অবলম্বন করিয়া) শরণাগতের ভয় নাই।

আর্য্যক। বিজয় লক্ষ্মী, সুহৃদগণ ও ভ্রাত্রাদি বন্ধুবর্গ তাহাকে ত্যাগ করে এবং সে সর্ব্বদাই উপহাস্য হইয়া থাকে, যে ব্যক্তি শরণাগতকে ত্যাগ করে ॥১৮॥

চন্দ। কধং অজ্জও গোবালদারও সেণবিত্তাসিদো বিঅ পত্তরহো সাউণিঅস্স হত্থে ণিবড়িদো! বিচিন্ত্য। এসো অণবরাধো সরণাঅদো অজ্জচারুদত্তস্স পবহণং আরূঢ়ো পাণপ্পদস্স মে অজ্জসব্বিলঅস্স মিত্তং ; অণ্ণদো রাঅ-ণিওও। তা কিং দাণিং এত্থ জুত্তং অণুচিট্ঠিদুং ?। অধবা, জং ভোদু তং ভোদু, পঢ়মং জ্জেব অভঅং দিণ্ণং। (ফ)

(ফ) কথমার্য্যকো গোপালদারকঃ শ্যেনবিত্রাসিত ইব পত্ররথঃ শাকুনিকস্য হস্তে নিপতিতঃ। এষোঽনপরাধঃ শরণাগতঃ আর্য্যচারুদত্তস্য প্রবহণমারূঢ়ঃ প্রাণপ্রদস্য মে আর্য্য শর্ব্বিলকস্য মিত্রম্ ; অন্যতো রাজনিয়োগঃ। তৎ কিমিদানীমত্র যুক্তমনুষ্ঠাতুম্ ?। অথবা, যদ্ভবতু তদ্ভবতু, প্রথমমেবাভয়ং দত্তম্।

(ফ) চন্দ ইতি। শ্যেনেন তদাখ্যপক্ষিবিশেষেণ বিত্রাসিতো ভয়ং প্রাপিতঃ, পত্ররথো বকাদিঃ ক্ষুদ্রপক্ষীব। শাকুনিকস্য শকুনিনাশকস্য পক্ষিমারকস্য। অনপরাধঃ, অতো যথা কিয়ানপি দণ্ডো ন স্যাত্তথাস্মাভির্যতিতব্যমিতি ভাবঃ। শরণাগতঃ, অতঃ সর্ব্বথৈব রক্ষিতব্য ইত্যাশয়ঃ। আর্য্যেতি। অতঃ পরমসজ্জনগৌরবরক্ষার্থমপি মায়ং নিগৃহীতব্য ইত্যভিপ্রায়ঃ। প্রাণেতি। অতশ্চ বস্তুতঃ পরমমিত্রত্বাদিবায়ং রক্ষণীয় ইতি তাৎপর্য্যম্।

চন্দনক। হায়! শ্যেন-ত্রাসিত ক্ষুদ্রপক্ষী যেমন ব্যাধের হস্তে পতিত হয়, সেইরূপ এই গোপবালক আর্য্যককে দেখিতেছি। (চিন্তা করিয়া) এই ব্যক্তি—নিরপরাধ, শরণাগত, আর্য্য চারুদত্তের শকটে আরূঢ়, বিশেষতঃ আমার প্রাণদাতা আর্য্য শর্বিলকের মিত্র; অন্য দিকে রাজার আদেশ। সুতরাং এখন এ বিষয়ে কি করা উচিত ?। অথবা যা হউক, তা হউক ; প্রথমেই অভয় দিয়াছি।

सीदाभअप्पदाणं, दत्तस्स परोवआर-रसिअस्स ।
जइ होइ, होउ णासो, तहवि अ लोए गुणो ज्जेव ॥१९॥

सभयमवतीर्य्य । दिट्ठो अज्जो । इत्यर्द्धोक्ते । ण, अज्जआ वसन्तसेणा । तदो एसा भणादि—'जुत्तं णेदं, सरिसं णेदं, जं अहं अज्जचारुदत्तं अहिसारिदुं गच्छन्ती राअमग्गे परिभूदा ।' [ब]

भीताभयप्रदानं ददतः परोपकाररसिकस्य ।
यदि भवति, भवतु नाशस्तथापि च लोके गुण एव ॥१९॥

(ब) दृष्ट आर्य्यः । न, आर्य्या वसन्तसेना । तदेषा भणति—'युक्तं नेदं सदृशं नेदम्, यदहमार्य्यचारुदत्तमभिसर्त्तुं गच्छन्ती राजमार्गे परिभूता ।'

भीतेति । भीताय जनाय अभयप्रदानं ददतः कुर्व्वत इत्यर्थः, तथा परोपकारे रसिकः अनुरागी तस्य तादृशस्य जनस्य, यदि नाशः कुतोऽपि कारणान्मृत्युर्भवति, स भवतु ; तथापि च लोके लोकसमाजे गुण एव स नाशो भद्र एव अत आर्य्यकस्य रक्षया यदि मम मृत्युर्भवेत् तदा सोऽपि श्लाघ्य एवेति भावः ।

आर्य्या जातिः ॥१९॥

(ब) सभयमिति । आर्य्यः खल्वार्य्यक एव संज्ञायां कप्रत्ययात् । एवमुक्तौ

যে, ভীত ব্যক্তিকে অভয় দান করিয়াছে এবং যে, পরের উপকার করিতে অনুরাগী ; তাহার যদি মৃত্যু হয়, হউক ; তথাপি তাহা গুণই ॥১৯॥

(সভয়ে অবতীর্ণ হইয়া) আর্য্যকে দেখিয়াছি (এই অর্দ্ধোক্তির পর) না ; আর্য্যা বসন্তসেনাকে দেখিয়াছি। তাহার পর ইনি বলিলেন—"ইহা

वीरकः । चन्दणआ ! एत्थ मह संसओ समुप्पण्णो ।[अ]

चन्द । कधं दे संसओ ? । [म]

वीरकः । सम्भम-घग्घरकण्ठो,

तुमं पि जादोसि, जं तुए भणिदं ।

दिट्ठो मए क्खु अज्जो,

पुणोवि अज्जा वसन्तसेणेत्ति ॥२०॥

(अ) चन्दनक ! अत्र मम संशयः समुत्पन्नः ।

(म) कथं ते संशयः ? ।

सम्भ्रम-घर्घर-कण्ठस्त्वमपि जातोऽसि, यत्त्वया भणितम् ।

दृष्टो मया खलु आर्य्यः पुनरप्यार्य्या वसन्तसेनेति ॥२०॥

तदैवार्य्यकस्य महाविपत्तिरित्याशङ्क्य निषेधति नेति । आर्य्यो नेत्यर्थः । युक्तमुचितम् । सदृशं सेनापतेर्योग्यम् । अभिसर्त्तुमभिसारप्रकारेण प्राप्तुम् । परिभूता निरुध्य दर्शनेनापमानिता ।

अत्र उद्वेगो नाम गर्भसन्ध्यङ्गम्, "नृपादिजनिता भीतिरुद्वेगः परिकीर्त्तितः" इति लक्षणात् । तथा आर्य्या इति वक्तव्ये भयव्याकुलतया आर्य्य इत्युक्तत्वात् भ्रंशो नाम नाट्यलक्षणञ्च,—"दृप्तादीनां भवेद्भ्रंशो वाच्यादन्यतरद्वचः" इति दर्पणलक्षणात् ।

सम्भ्रमेति । त्वमपि, सम्भ्रमेण भयव्यस्ततया, घर्घर एतद्रूपः अस्पष्टः कण्ठः स्वरो यस्य स तादृशो जातोऽसि ; यत् त्वया भणितञ्चेत्यर्थः । गीतिर्जातिः ॥२०॥

সঙ্গত নহে ; ইহা অনুরূপও নহে ; যে আমি চারুদত্তের অভিসারে যাইতেছি, এই অবস্থায় আমাকে রাজপথে অপমানিত করা হইল।"

বীরক । চন্দনক ! এ বিষয়ে আমার সংশয় জন্মিল।

চন্দনক । কেন তোমার সংশয় জন্মিল ? ।

বীরক । ব্যস্ততাবশতঃ তোমার কণ্ঠস্বর 'ঘর্ ঘরে' হইয়া গিয়াছে ;

एत्थ मे अप्पच्चओ । [य]

चन्द । अरे ! को अप्पच्चओ तुह ? । वअं दक्खिणत्ता अव्वत्तभासिणो । खस-खत्ति-खड़ो-विलअ—[१] कस्साट-प्पावरण-दविड़-चोल-चोण-वब्बर-[२]खेर-खाण-मुख-मधुघाद-पहुदीणं मिलिच्छजादीणं अणेअ-देस-भासाभिण्णा जहेट्ठं मन्तआम,—'दिट्ठो दिट्ठा वा अज्जो अज्जआ वा' । [र]

(य) अत्र मे अप्रत्ययः ।

(र) अरे ! कः अप्रत्ययस्तव ? । वयं दाक्षिणात्या अव्यक्तभाषिणः । खस-खत्रि-खड़ा-खड़्डो-विलय-कर्णाट-प्रावरण-द्रविड़-चोल-चीन-बर्व्वर-खेर-खान-मुख-मधुघात-प्रभृतीनां म्लेच्छजातीनाम् अनेकदेशभाषाभिज्ञा यथेष्टं मन्त्रयामः—'दृष्टो दृष्टा वा, आर्य्यः आर्य्या वा ।

(य) अत्रेति । अत्र "आर्य्या वसन्तसेना" इत्युक्तौ, अप्रत्ययः अविश्वासः ।

(र) चन्द इति । अव्यक्तं लिङ्गाद्यसङ्गततया अस्पष्टार्थसूचकं पदं भाषितुं शीलं येषां ते । खसादयो म्लेच्छाचारास्तद्देशीयाः क्षत्रियाः । यथेष्टम् इच्छानुसारेण शब्दानामर्थलिङ्गत्वनियममननुसृत्य त्वर्थः । मन्त्रयामो ब्रूमः ।

বিশেষতঃ তুমি প্রথমে বলিলে —"আমি আর্য্যকে দেখিয়াছি" আবার বলিলে— "আর্য্যা বসন্তসেনাকে দেখিয়াছি" ॥২০॥

ইহাতে আমার অবিশ্বাস হইয়াছে।

চন্দনক। ওরে! তোমার অবিশ্বাসটা কি? আমরা দাক্ষিণাত্যের লোক, অস্পষ্টভাষী। খস, খত্তি, খড়্ডু, বিলয়, কর্ণাট, কর্ণ, প্রাবরণ, দ্রবিড়, চোল, চীন, বর্ব্বর, খের, খান, মুখ ও মধুঘাত প্রভৃতি ম্লেচ্ছ-

(१) विलअ- ।

(२)—बर्व्वर- ।

वीरकः। णं अह्नं पि पलोएमि। राअ-अस्सा एसा। अह्नं रणो पच्चइदो। [ल]

चन्द। ता किं अह्नं अप्पच्चइदो संवुत्तो। [व]

वीरकः। णं सामि-णिओओ। [श]

चन्द। स्वगतम्। अज्जगोवालदारओ अज्जचारुदत्तस्स पवहणं अहिरुहिअ अवक्कमदि त्ति जइ कहिज्जदि, तदो अज्ज चारुदत्तो रणा सासिज्जइ; ता को एत्थ उवाओ ?। विचिन्त्य।

(ल) ननु अहमपि प्रलोकयामि। राजाज्ञा एषा। अहं राज्ञः प्रत्ययितः।

(व) तत् किमहमप्रत्ययितः संवृत्तः ?।

(श) ननु स्वामिनियोगः।

(ष) आर्य्य-गोपालदारकः आर्य्यचारुदत्तस्य प्रवहणमधिरुह्य अपक्रामतीति यदि कथ्यते, तदा आर्य्यचारुदत्तो राज्ञा शिष्यते, तत्

(श) वीरक इति। स्वामिनियोगो राजाज्ञा। तद्वशादेवाहं पुनः प्रलोकयामि, न पुनस्तवाप्रत्ययितत्वादिति भावः।

(ष) चन्द इति। आर्य्य आर्य्यकाख्यो गोपालदारक आर्य्यगोपालदारकः।

জাতিদিগের অনেক দেশভাষায় আমরা অভিজ্ঞ; সুতরাং আমরা ইচ্ছানুসারে বলিয়া থাকি— 'দৃষ্ট, অথবা দৃষ্টা; আর্য্য, অথবা আর্য্যা।'

বীরক। ওহে! আমিও দেখিব। রাজার আদেশ। আমি রাজার বিশ্বস্ত লোক।

চন্দনক। তবে কি আমি অবিশ্বাস্য হইলাম ?।

বীরক। ওরে প্রভুর আদেশ।

कण्णाट-कलह-प्पओअं करेमि । प्रकाशम् । अरे वीरअ ! मए चन्दणकेण पलोइदं पुणो वि तुमं पलोएसि, को तुमं ? । [ष]

वीरकः । अरे ! तुमं पि को ? । (स)

चन्द । पूइज्जन्तो माणिज्जन्तो तुमं अप्पणो जादिं ण सुमरेसि । (ह)

कोऽत्र उपायः ? । कर्णाट-कलह-प्रयोगं करोमि । अरे वीरक ! मया चन्दनकेन प्रलोकितं पुनरपि त्वं प्रलोकयसि, कस्त्वम् ? ।

(स) अरे ! त्वमपि कः ? ।

(ह) पूज्यमानो मान्यमानस्त्वमात्मनो जातिं न स्मरसि ।

अपक्रामति पलायते । शिष्यते दण्डयिष्यते । भविष्यत्सामीप्ये वर्त्तमाना । राजविद्विष्टस्यार्य्यकस्य संश्रयदानादिति भावः । एतेनार्य्यकस्य शासनं सुतरामेवायातम् । कर्णाटकलहप्रयोगं कर्णाटदेशीयरीत्या विवादानुष्ठानम् । तथात्वे तदपदेशेन आर्य्यकापसारणं सुकरमेव भविष्यतीति भावः ।

(ह) चन्द इति । मान्यमानः सम्मानपात्रीक्रियमाणः । उभयत्रापि सेनापतित्वादिति भावः ।

চন্দনক। (স্বগত) গোপবালক আর্য্যক, আর্য্য চারুদত্তের গাড়ীতে উঠিয়া পলাইয়াছে— ইহা যদি বলি, তবে রাজা আর্য্য চারুদত্তের দণ্ড করিবেন। সুতরাং এখন উপায় কি ?। (চিন্তা করিয়া) কর্ণাটদেশীয় রীতি অনুসারে বিবাদ আরম্ভ করি। (প্রকাশে) ওরে বীরক! আমি চন্দনক যাহা দেখিয়াছি, তুই আবার তাহা দেখিবি, তুই কে ?।

বীরক। ওরে! তুই বা কে ?।

वीरकः । सक्रोधम् । अरे ! का मह जादी ? । (च)

चन्द । को भणउ ? । (क)

वीरकः । भणउ । (ख)

चन्द । अहवा ण भणामि । (ग)

जाणन्तो वि हु (१) जादिं,
तुज्झ अ ण भणामि सील-विहवेण ।
चिट्ठउ महच्चिअ मणे,
किं हि (२) कइत्थेण भग्गेण ॥२१॥

(च) अरे का मम जातिः ? ।

(क) को भणतु ? ।

(ख) भणतु ।

(ग) अथवा न भणामि ।

जानन्नपि खलु जातिं तव च न भणामि शीलविभवेन ।
तिष्ठतु ममैव मनसि किं हि कपित्थेन भग्नेन ॥

(क) चन्द इति । कः आवयोर्मध्ये वातर इत्यर्थः, भणतु वदेदिति तात्पर्य्यम् । 'विध्यादिषु सप्तमी च' इति चकारात् पञ्चमी ।

(ख) वीरक इति । भणतु भवानेव वदतु, तत्प्रस्तावोत्थापकत्वादिति भावः ।

চন্দনক। তুই পূজিত হইতেছিস্, সম্মানিত হইতেছিস্; কিন্তু নিজের জাতিটা স্মরণ করিস্ না ! ।

বীরক। (ক্রোধের সহিত) ওরে! আমার জাতিটা কি ? ।

চন্দনক। কে বলিবে ? ।

বীরক। আপনিই বলুন ।

চন্দনক। অথবা, আমি বলিব না। ।

(১) वि हि ।

(२) किं च ।

वीरकः। णं भणाउ भणाउ। (घ)

चन्दनकः संज्ञां ददाति। (ङ)

वीरकः। अरे! किं णेदं ?। (च)

चन्द। सिस्स-सिलाअल-हत्थो पुरिसाणं कुच्च-गण्ठि-सण्ठवणो।

कत्तरि-वावुद-हत्थो तुमं पि सेणावई जादो ॥२२॥

(घ) ननु भणतु भणतु।

(च) अरे! किन्त्विदम् ?।

शीर्षशिलातलहस्तः पुरुषाणां कूर्च्च-ग्रन्थि-संस्थापनः।

कर्त्तरी-व्यापृत-हस्तस्त्वमपि सेनापतिर्जातः॥

जानन्निति। तव खलु जातिं जानन्नपि अहम्, शीलविभवेन स्वभावसम्पत्त्या आत्मनः सत्स्वभाववशेनेत्यर्थः, न च भणामि तां तव जातिं नहि वदामि; तव जातेः कुत्सितत्वेन तदुद्घोषणे सत्स्वभावभङ्गप्रसङ्गादिति भावः। अतएव मम मनस्येव, सा जातिस्तिष्ठतु। हि तथाहि, कपित्थेन फलेन भग्नेन, किं फलम्? किमपि नेत्यर्थः। तथा च यथा सुदृश्यत्वेन विल्वफलतुल्यस्य कपित्थफलस्य भङ्गे शून्याभ्यन्तरमवलोक्य लोकानां महती विरक्तिर्जायते, तथा सेनापतित्वेन चविशयवदेवादरणीयस्य तव जात्युद्घोषणे तदाकर्ण्य लोकानां महत्यवज्ञा जायेतेति भावः।

अतएवात्र अर्थापत्तिदृष्टान्तयोरेकाश्रयानुप्रवेशरूपः सङ्करः।

आर्य्या जातिः॥२१॥

(ङ) चन्देति। संज्ञां सङ्केतम् उत्तानवामकरतलोपरि तिर्य्यग् दक्षिणकरान्दोलनरूपं नापितजातिसूचकं सङ्केतं करोतीत्यर्थः।

তোমার জাতি জানিয়াও, আমি স্বভাবের গুণে তাহা বলিব না। তাহা আমার মনেই থাক; কারণ কদ্বেল ভাঙ্গিয়া কি হইবে? ॥২১॥

বীরক। ওহে! বলুন বলুন।

চন্দনক সঙ্কেত করিল।

বীরক। ওরে! একি রে?।

वीरकः । अरे चन्दणआ ! तुमं पि माणिज्जन्तो अप्पणो केरिकं जादिं ण सुमरेसि । (छ)

चन्द । अरे ! का मह चन्दणअस्स चन्दविसुद्धस्स जादी ? (ज)

(छ) अरे चन्दनक ! त्वमपि मान्यमान आत्मनो जातिं न स्मरसि ।

(ज) अरे ! का मम चन्दनकस्य चन्द्रविशुद्धस्य जातिः ? ।

शीर्णेति । शीर्णं बहुकालं यावत् क्षुरघर्षणात् क्षयप्राप्तम् शिलातलं प्रस्तरखण्डं हस्ते वामकरतले यस्य सः, पुरुषाणां कूर्चग्रन्थिं श्मश्रुगुच्छं संस्थापयति संहरति छिनत्तीति सः, तथा कर्त्तर्या श्मश्रुकर्त्तनास्त्रेण क्षुरेण व्यापृता व्यासक्तौ हस्तौ दक्षिणकरौ यस्य स तादृशः नापितजातीय इत्यर्थः, त्वमपि सेनापतिर्जातः । अतो नितान्तनीचस्य अत्युच्चपदलाभात् दम्भाधिक्यमिति भावः । अत्र हस्त इत्यस्य द्विरुपादानात् कथितपदतादोषः, स च 'कत्तरिवावुदपाणी' इति पाठेन समाधेयः । तथा

गर्हणं नाम नाट्यलक्षणम् । यथा दर्पणे—

'दूषणोद्घोषणायान्तु भर्त्सना गर्हणन्तु तत् ।'

'कूर्चमस्त्री भ्रुवोर्मध्ये श्मश्रुकैतवयोरपि' इति त्रिकाण्डशेषः । 'परासुप्राप्तपञ्चत्वपरेत-प्रेत-संस्थिता' 'कृपाणी कर्त्तरी समे' इति चामरः ।

आर्या जातिः ॥२२॥

চন্দনক। যাহার বাম হস্তে জীর্ণ প্রস্তরখণ্ড, যিনি পুরুষগণের শ্মশ্রুগুচ্ছ ছেদন করিয়া থাকেন এবং যাহার দক্ষিণ হস্ত ক্ষুরসংযুক্ত থাকে, এ হেন তুমিও সেনাপতি ॥২২॥

বীরক। ওরে চন্দনক! তুইও সম্মানের পাত্র হইয়া, নিজের জাতি স্মরণ করিতেছিস্ না!।

वीरकः । को भणउ ? । (झ)

चन्द । भणउ भणउ । (ञ)

वीरकः । नाट्येन संज्ञां ददाति । (ट)

चन्द । अरे किं णेदं । [ठ]

वीरकः । अरे ! सुणाहि सुणाहि । (ड)

जादी तुज्झ विसुद्धा, मादा भेरी पिदा वि दे पडहो ।

दुम्मुह ! करड़अ-भादा, तुमं पि सेणावई जादो ॥२३॥

(झ) को भणतु ? ।

(ञ) भणतु भणतु ।

(ठ) अरे ! किन्तु इदम् ।

(ड) अरे । शृणु शृणु ।

जातिस्तव विशुद्धा, माता भेरी पितापि ते पटहः ।

दुर्म्मुख ! करटकभ्राता त्वमपि सेनापतिर्जातः ॥

(ट) वीरक इति । अत्रापि संज्ञां जातिसूचकसङ्केतम् ऊर्द्धतो निम्नं संयुक्त-मुष्टिबद्धकरद्वयस्य समाकर्षणरूपं वाद्यनिर्म्माणकालीनं चर्म्मकारजातिसूचकसङ्केत--मित्यर्थः ।

जातिरिति । विशुद्धा निर्म्मला तव जातिः । सोल्लुण्ठनोक्तिरियम् । तथाच ते

চন্দনক। ওরে! চন্দ্রের মত নির্ম্মল চন্দনক আমি; আমার আবার জাতি কি রে?।

বীরক। কে বলিবে?।

চন্দনক। আপনিই বলুন, আপনিই বলুন।

বীরক। (অভিনয়ের ধরণে সঙ্কেত করিল)

চন্দনক। ওরে! এ কি রে?।

বীরক। ওরে! শোন্ শোন্।

चन्द । सक्रोधम् । अहं चन्दणओ चम्मारओ ! ता पलोएहि पवहणं । [ढ]

वीरकः । अरे पवहणवाहआ ! परिवत्तावेहि पवहणं पलोइस्सं । (ण)

(ढ) अहं चन्दनकश्चर्म्मकारः ! तत् प्रलोकय प्रवहणम् ।

(ण) अरे प्रवहणवाहक ! परिवर्त्तय प्रवहणं प्रलोकयिष्यामि ।

तव माता भेरी दुन्दुभिः, स्वनिर्म्माणद्वारा चिरपरिपालनादिति भावः । पितापि पटहो ढक्का, स्वनिर्म्माणद्वारैव अन्नदानादित्याशयः । तथा हे दुर्म्मुख ! कटुक्तिकारिन् ! करटकोऽपि वाद्यविशेषो भ्राता, स्वनिर्म्माणद्वारा जीविकाया आनुकूल्यकरणादित्यभिप्रायः । एतेन चर्म्मकारजातिः सूचिता, तदानीं चर्म्मकारस्यैव वाद्यनिर्म्माणनियमात् ईदृशस्त्वमपि सेनापतिर्जातः । अतएव च नीतान्तनीचस्य अत्युच्चपदलाभात् दम्भाधिक्यमिति भावः ।

अत्र क्षोभो नाम नाट्यालङ्कारः 'अधिक्षेपवचःकारी क्षोभः प्रोक्तः स एव तु' इति दर्पणलक्षणात् ।

'करटो वाद्यभेदे' इति मेदिनी । आर्य्या जातिः ॥२३॥

(ड) चन्द इति । चर्म्मकार इति काकुः कथमपि नेत्यर्थः । चन्दनको वस्तुत एव न चर्म्मकारः, प्रतिवादकरणात् ; वीरकस्तु वस्तुत एव नापितः, प्रतिवादाकरणादिति बोध्यम् ।

তোর জাতি খুব বিশুদ্ধ! কারণ, তোর মাতা হইল ভেরী; পিতা হইল ঢাক এবং ডুগি হইল ভাই; ওরে দুর্ম্মুখ! এহেন তুইও সেনাপতি হইয়াছিস্ ! ॥২৩॥

চন্দনক। (ক্রোধের সহিত) কি আমি চন্দনক চামার! তা দেখ্ (দেখি) গাড়ী।

বীরক। ওরে গাড়ীচালক! গাড়ী ফিরা, আমি দেখিব।

घेटः। तथा करोति।

वीरकः प्रवहणमारोढुमिच्छति, चन्दनकः सहसा केशेषु गृहीत्वा पातयति पादेन ताड़यति च।

वीरकः। सक्रोधमुत्थाय। अरे! अहं तुए वीसत्थो राअआण्त्तिं करेन्तो सहसा केसेसु गेण्हिअ पादेण ताड़िदो। ता सुणु रे! अहिअरणमज्झे जइ दे चउरङ्गं ण कप्पावेमि, तदो ण होमि वीरओ। (त)

(त) अरे! अहं त्वया विश्वस्तो राजाज्ञां कुर्वन् सहसा केशेषु गृहीत्वा पादेन ताड़ितः। तत् शृणु रे! अधिकरणमध्ये यदि ते चतुरङ्गं न कल्पयामि, तदा न भवामि वीरकः।

(थ) वीरक इति। विश्वस्तो राज्ञ इति शेषः। अधिकरणमध्ये विचारालयाभ्यन्तरे। चत्वारि अङ्गानि अवयवाः प्रकारा यस्य तं तादृशं दण्डमिति शेषः मस्तक-मुण्डन-वेत्राघात-धनादान-वहिष्करणात्मकचतुर्विधमेव दण्डमित्यर्थः। कल्पयामि करामि।

(भृत्य তাহাই করিল)

(বীরক গাড়ীতে উঠিবার চেষ্টা করিল; চন্দনক হঠাৎ কেশাকর্ষণ পূর্ব্বক তাহাকে ভূতলে পাতিত করিয়া পাদপ্রহার করিল)

বীরক। (ক্রোধের সহিত উঠিয়া) ওরে! আমি রাজার বিশ্বস্ত এবং রাজারই আদেশ পালন করিতেছিলাম, এই অবস্থায় তুই হঠাৎ কেশাকর্ষণ করিয়া আমাকে পাদপ্রহার করিলি? তা শোন্ রে! বিচারালয়ের মধ্যে আমি যদি তোর চারিপ্রকার দণ্ড না করাই তবে আমি বীরকই নই।

चन्द । अरे ! राअउलं अहिअरणं वा वच्च । किं तुए-सुणअ-सरिसेण ? । (थ)

वीरकः । तह । इति निष्क्रान्तः । (द)

चन्द । दिशोऽवलोक्य । गच्छ रे पवहणवाहआ ! गच्छ जइ-को वि पुच्छेदि, तदो भणसि 'चन्दणअ-वीरएहिं अवलोइदं पवहणं वच्चइ । अज्जे ! वसन्तसेणे ! इमं च अहिणाणं दे देमि । इति खड्गं प्रयच्छति । (ध)

(थ) अरे ! राजकुलमधिकरणं वा व्रज । किं त्वया शुनकसदृशेन ? ।

(द) तथा ।

(ध) गच्छ रे प्रवहणवाहक ! गच्छ । यदि कोऽपि पृच्छति, ततो भणिष्यसि 'चन्दनक-वीरकाभ्याम् अवलोकितमिदं प्रवहणं व्रजति" । आर्य्ये ! वसन्तसेने ! इदञ्च अभिज्ञानं ते ददामि ।

(थ) चन्द इति । शुनक-सदृशेन कुक्कुरतुल्येन त्वया किं मम कर्त्तव्यमिति शेषः ।

(द) वीरक इति । तथा शुनकसदृश एवास्मीत्यर्थः । साक्रोशोऽयं स्वीकारः ।

(ध) चन्द इति । सर्वदिगवलोकनम् अन्यो रथी आगच्छति न वेति ज्ञानार्थम् । अभिज्ञायते अनेनेति अभिज्ञानम् आवयोरवलोकनचिह्नमित्यर्थः । वसन्तसेने इति छलेन आर्य्यकस्यैव सम्बोधनम्, अन्यथा यद्यन्यो रथी शृणुयात् प्रवहणवाहको

চন্দনক। ওরে! রাজবাড়ী বা বিচারালয়ে যা। কুকুরের তুল্য তুই আমার কি করিবি?।

বীরক। তাই। (এই বলিয়া চলিয়া গেল)

চন্দনক। (চতুর্দ্দিকে চাহিয়া) যা গাড়ীচালক! যা। যদি কেহ জিজ্ঞাসা করে, তবে বলিস্ — চন্দনক ও বীরকের পরীক্ষিত

आर्य्यकः। खड्गं गृहीत्वा सहर्षमात्मगतम्।

अये! शस्त्रं मया प्राप्तं स्पन्दते दक्षिणो भुजः।
अनुकूलञ्च सकलं हन्त संरक्षितो ह्यहम्॥ २४॥

चन्द। अज्जए! (न)

एत्थ मए विस्सविदा, पच्चइदा चन्दणं पि सुमरेसि।
ण भणामि एस लुद्धो, णेहस्स रसेण वोल्लामो॥ २५॥

(न) आर्य्ये!

अत्र मया विश्रम्भा प्रत्ययिता चन्दनमपि स्मरसि।
न भणामि एष लुब्धः स्नेहस्य रसेन वदामः॥

वा राजविद्विष्टार्य्यकत्राणेन तं परित्यजेदिति बोध्यम्। अतएव खड्गदानादत्र संग्रहो नाम गर्भसन्ध्यङ्गम् "संग्रहः पुनः। सामदानार्थसम्पन्नः" इति दर्पण-लक्षणात्।

अये इति। सम्भ्रमे अयेशब्दः। हर्षे च हन्तशब्दः। मया शस्त्रं प्राप्तम्, अतः सहसा कोऽपि किमपि कर्त्तुं न शक्नुयादिति भावः। दक्षिणो भुजः स्पन्दते; सुतरां "दक्षिणभुजस्पन्दनमर्थलाभं बन्धुदर्शनं वा" इति गर्गवचनात् राज्यलाभस्यैव सम्भावनेति भावः। अन्यं सकलञ्च अनुकूलम्, अन्यरक्षानामकमनुष्यप्रवहण-लाभादिरित्याशयः। अतः अहं संरक्षितो हि दैवेन सम्यक् रक्षित एव।

अत्र शुभप्रतिपादनकार्य्यं प्रति बहुतरकारणोपन्यासात् समुच्चयोऽलङ्कारः। हिशब्दस्य निश्चयार्थत्वान्न निरर्थकत्वदोषः॥ २४॥

এই গাড়ী যাইতেছে।' আর্য্যে! বসন্তসেনে! এই চিহ্ন আপনাকে দিলাম। (ইহা বলিয়া তরোয়াল দিল)

আর্য্যক। (তরবারি গ্রহণ করিয়া আনন্দের সহিত স্বগত)

ওহে! আমি অস্ত্র পাইলাম, দক্ষিণ বাহুও স্পন্দিত হইতেছে এবং সকলই অনুকূল দেখিতেছি, সুতরাং বিধাতা আমাকে রক্ষা করিয়াছেন॥২৪॥

आर्य्यकः । चन्दनश्चन्द्रशीलाढ्यो दैवादद्य सुहृन्मम ।
चन्दनं भोः ! स्मरिष्यामि सिद्धादेशस्तथा यदि ॥२६॥

(न) चन्द इति । आर्य्ये इत्यपि पूर्ववदेव वसन्तसेनासम्बोधनच्छलेन आर्य्यकस्यैव सम्बोधनम् ।

अवेति । अव इदानीम्, मया विज्ञप्ता वक्ष्यमाणविषये त्वं निवेदिता, प्रत्ययिता 'राज्यं प्राप्य त्वं मां स्मरिष्यस्येव" इत्यर्थं विश्वस्ता च । कस्मिन् विषये निवेदिता इत्याह चन्दनमपि अन्यान्यवन्धुवत् मां चन्दनकमपि, स्मरसि राज्यं प्राप्य वन्धुत्वेन स्मरिष्यसीत्यर्थः । भविष्यत्सामीप्ये वर्त्तमाना । एषः अहम्, लुब्धः प्रत्युपकारलोभी सन्, इदं न भणामि ; किन्तु स्नेहस्य रसेन त्वद्विषयकस्नेहजनितानुरागेण ब्रूमः ।

अव भणामि ब्रूम इति वचनभेदात् भग्नप्रक्रमता दोषः 'स्नेहस्य रसेण एदन्तु" इति पाठेन समाधेयः । एतत्तु भणामीत्यन्वयः ।

तथा स्वस्मरणच्छलेन स्वोपकारकरणाभिप्रायपरिज्ञानादधिवलं नाम गर्भसन्ध्यङ्गम्—"अधिवलमभिसन्धिश्छलेन यः" इति दर्पणलक्षणात् ।

आर्य्या जातिः ॥ २५ ॥

चन्दन इति । चन्द्रवत् शीलेन परहिंसाशून्यतया शीतलेन स्वभावेन आढ्यो युक्तश्चन्दनः, अद्य दैवात् मम सुहृत् जात इति शेषः । यदि सिद्धादेशस्तथा फलिष्यति राज्यं प्राप्स्यामीत्यर्थः, तदा भो महोपकारिन् ! चन्दनं भवन्तं स्मरिष्यामि स्मृत्वा प्रत्युपकरिष्यामीत्यर्थः ॥ २६ ॥

চন্দনক। আর্য্যে! আমি এখন আপনাকে জানাইতেছি; আপনি আমার বিশ্বস্ত; ভবিষ্যতে আপনি চন্দনককেও স্মরণ করিবেন; ইহা আমি লুব্ধ হইয়া বলিতেছি না; স্নেহের টানে বলিতেছি ॥২৫॥

আর্য্যক। ভাগ্যবশতঃ আজ চন্দ্রের ন্যায় নির্ম্মলস্বভাব চন্দন, আমার বন্ধু হইলেন। সিদ্ধপুরুষের আদেশ যদি সফল হয়, তবে নিশ্চয়ই চন্দনকে স্মরণ করিব ॥২৬॥

चन्द । अभअं तुह देउ हरो, विण्हू वम्हा रवीअ चन्दो अ ।
हन्तूण सत्तुवक्खं, सुम्भ-णिसुम्भे जधा देवी ॥ २७ ॥

चेटः । प्रवहणेन निष्क्रान्तः ।

चन्द । नेपथ्याभिमुखमवलोक्य । अरे ! णिक्कमन्तस्स मे पिअवअस्सो सव्विलओ पिट्ठदो ज्जेव अणुलग्गो गदो । भोदु, पधाणदण्डधारओ वीरओ राअ-पच्चअ-आरो विरोधिदो । ता जाव अहं पि पुत्तभादु-पड़िवुदो एदं ज्जेव अणुगच्छामि ।

इति निष्क्रान्तः । (प)

---

२७ । अभयं तव ददातु हरो विष्णुर्ब्रह्मा रविश्च चन्द्रश्च ।
हत्वा शत्रुपक्षं शुम्भनिशुम्भौ यथा देवी ॥

(प) अरे ! निष्क्रामतो मम प्रियवयस्यः शर्विलकः पृष्ठत एवानु-

अभयमिति । देवी दुर्गा, यथा शुम्भ-निशुम्भौ दानवौ हत्वा, देवानामभयं दत्तवतीति शेषः; तथा हरो विष्णुर्ब्रह्मा रविश्च चन्द्रश्च, शत्रुपक्षं हत्वा, ते तव अभयं ददातु ।

अत्र 'देवानामभयं दत्तवती' इत्येतेषां पदानामनुक्तत्वेऽपि न न्यूनपदतादोषः प्रत्युत गुण एव; वक्तुस्त्रासमयत्वात् "उक्तावानन्दमग्नादेः स्यान्न्यूनपदता गुणः" इति दर्पणोक्तत्वात् । न वा ददात्विति विधिभेदेऽपि भग्नप्रक्रमतादोषः, 'हत्वा' इत्यंश एव साहश्यदयावसानात् । आर्य्या जातिः ॥ २७ ॥

(प) चन्द इति । अरे इति अधीरतया निकृष्टस्यात्मनः सम्बोधने । निष्क्रामतः

চন্দনক । দুর্গাদেবী শুম্ভনিশুম্ভকে বধ করিয়া যেমন দেবগণকে অভয় দান করিয়াছিলেন; সেইরূপ ব্রহ্মা, বিষ্ণু, মহেশ্বর, চন্দ্র ও সূর্য্য শত্রুপক্ষকে নাশ করিয়া আপনাকে অভয় দান করুন ॥২৭॥

(ভৃত্য গাড়ীর সহিত চলিয়া গেল)

চন্দনক । (নেপথ্যের দিকে দৃষ্টিপাত করিয়া) ওহে ! আমি চলিয়া

ইতি প্রবহণবিপর্য্যয়ো নাম ষষ্ঠোঽঙ্কঃ ॥০॥

স্থানান্তরং গতঃ। ভবতু, প্রধানদণ্ডধারকো বীরকো রাজপ্রত্যয়কারী বিরোধিতঃ। তদ্ যাবদহমপি পুত্রভ্রাতৃপরিবৃত এতমেবানুগচ্ছামি।

স্থানান্তরং গচ্ছতঃ। পৃষ্ঠত এব পশ্চাদেব, অনুলগ্নঃ অনুসৃতঃ,-গত আর্য্যকমনুসৃতঃ। প্রধানদণ্ডধারকঃ প্রধানসেনাপতিঃ। রাজ্ঞঃ প্রত্যয়কারঃ সর্ব্বেষ্বেব বিষয়েষু বিশ্বাসোৎপাদকঃ। এতমেব আর্য্যকমেব, অনুগচ্ছামি, ছিদ্রাদিষ্বিবিশ্বাসাদিতি ভাবঃ।

ইতি শ্রীহরিদাসসিদ্ধান্তবাগীশভট্টাচার্য্যবিরচিতায়াং মৃচ্ছকটিক—

টীকায়াং বসন্ততুষমা-সমাখ্যায়াং ষষ্ঠাঙ্কবিবরণং

সমাপ্তম্ ॥০॥

যাইতেছিলাম, এই অবস্থায় প্রিয়সুহৃদ শর্বিলক, পশ্চাৎ দিক্ হইতে আর্য্যকের অনুসরণ করিলেন। হউক, রাজার বিশ্বস্ত ও প্রধান সেনাপতি বীরকের সঙ্গে আমি বিরোধ করিয়াছি; সুতরাং আমিও, পুত্র ও ভ্রাতৃবর্গে পরিবৃত হইয়া ইহাঁরই অনুসরণ করি। (এই বলিয়া চলিয়া গেল)

প্রবহণবিপর্য্যয়নামক ষষ্ঠ অঙ্ক সমাপ্ত ॥০॥

—ः॰ः—

ततः प्रविशति चारुदत्तो विदूषकश्च ।

विदू । भो ! पेक्ख पेक्ख पुप्फकरण्डअ-जिण्णुज्जाणस्स सस्सिरीअदां । (क)

चारु । वयस्य ! एवमेतत् । तथाहि,

(क) भोः ! प्रेक्षस्व प्रेक्षस्व पुष्पकरण्डक-जीर्णोद्यानस्य सश्रीकताम् ।

(क) विदू इति । सश्रीकतां कान्तिमत्त्वं सौन्दर्य्यमिति यावत् ।

इतः प्रभृतिदशमाङ्कीयवसन्तसेनाप्रकाशपर्य्यन्तो विमर्शसन्धिः । तथा च शकार-प्रहारजनितस्य वसन्तसेनायास्तन्यलोपरूपविघ्नस्य चारुदत्तवधोद्यमरूपविघ्नस्य च भिक्षु-परिचर्य्यया वसन्तसेनाप्रकाशेन च अपगमात् परस्परानुरागवशादिदानीं परस्पर-प्राप्तिनिश्चयात् नियताप्तिर्नाम चतुर्थी कार्य्यावस्थाऽत्र द्रष्टव्या । यथा साहित्यदर्पणे—

"अपायाभावतः प्राप्तिर्नियताप्तिस्तु निश्चिता ।"

तथा चिरसम्मिलनरूपस्य मुख्यफलस्य उपायभूतः परस्परानुरागो वसन्तसेनायाः पुनरपि पुष्पकरण्डकजीर्णोद्यानगमनोद्यमात् चारुदत्तस्य च तस्याप्रवहणानयनाग्रहात्

তদনন্তর চারুদত্ত ও বিদূষকের প্রবেশ ।

বিদূষক । সখে ! দেখ দেখ পুষ্পকরণ্ডক জীর্ণোদ্যানের কি সৌন্দর্য্য হইয়াছে ।

চারুদত্ত । ইহা এইরূপই বটে । তাহাই বলিতেছি—

वणिज इव भान्ति तरवः, पण्यानीव स्थितानि कुसुमानि।
शुल्कमिव साधयन्तो, मधुकर-पुरुषाः प्रविचरन्ति ॥ १ ॥

विदू। भो! इमं असक्कार-रमणीअं सिलाअलं उवविसदु भवं। (ख)

(ख) भोः! इदमसत्काररमणीयं शिलातलमुपविशतु भवान्।

गर्भसन्ध्यपेक्षया अतिरिक्तोऽस्मिन्। स च शकारप्रहारजनितेन वसन्तसेनायाः सन्नतोपायान्तरायेण चारुदत्तवधोद्यमेन च सान्तराय इति। यथा तत्रैव—

"यत्र मुख्यफलोपाय उद्भिन्नो गर्भतोऽधिकः।
शापाद्यैः सान्तरायश्च स विमर्ष इति स्मृतः॥"

अस्य च अपवादादीनि त्रयोदशाङ्गानि यथास्थानं निवेश्य लक्षणानि वक्ष्यामः।

वणिज इति। तरवो वणिज इव भान्ति, पत्रसम्पत्तिवत् कुसुमसम्पत्तिमत्त्वादिति भावः। तदेवाह कुसुमानि, पण्यानीव विक्रेयवस्तूनीव स्थितानि, परागं दत्त्वादित्याशयः। मधुकरा भ्रमराः पुरुषा राजपुरुषा इव ते, शुल्कमिव वाणिज्ये राजग्राह्यं धनमिव, मध्विति शेषः, साधयन्तो गृह्णन्तः प्रविचरन्ति परिभ्रमन्ति, सर्वतः किञ्चित् किञ्चिद्ग्रहणादित्यभिप्रायः।

अत्र तरोपमासाहचर्यात् मधुकरपुरुषा इत्यत्रापि उपमितसमास एव व्याख्येः इत्युपमाचतुष्टयस्य परस्परसापेक्षतया गुणप्रधानभावेनाङ्गाङ्गिभावात् सङ्करः। तथा मधुशब्दस्यानुपादानात् न्यूनपदतादोषः; 'मधुशुल्कमाददानाः षट्पदपुरुषाः प्रविचरन्ति' इति पाठेन समाधेयः। आर्या जातिः ॥ १ ॥

(ख) विदू इति। असंस्कारे मार्जनादिसंस्काराभावेऽपि रमणीयम्।

বৃক্ষসমূহ, বণিকগণের ন্যায় শোভা পাইতেছে; পুষ্পসমূহ বিক্রেয় দ্রব্যের ন্যায় রহিয়াছে, এবং রাজপুরুষগণের ন্যায় ভ্রমরগণ শুল্কের ন্যায় মধু আহরণ করতঃ বিচরণ করিতেছে ॥১॥

বিদূষক। সখে! মার্জনাদি সংস্কার না করিলেও, স্বভাবতই

চারু। উপবিশ্য। বয়স্য ! চিরয়তি বর্দ্ধমানকঃ । (গ)

বিদূ। ভণিদো মএ 'বড্ঢমাণঅ ! বসন্তসেণিঅং গেণ্হিঅ লহুং লহুং আঅচ্ছ" ত্তি । (ঘ)

চারু। তৎ কিং চিরয়তি ? ।

কিং যাত্যস্য পুরঃ শনৈঃ প্রবহণং তস্যান্তরং মার্গতে ?
ভগ্নেঽক্ষে পরিবর্ত্তনং প্রকুরুতে ? ছিন্নোঽথবা প্রগ্রহঃ ? ।

(ঘ) ভণিতো ময়া-'বর্দ্ধমানক ! বসন্তসেনাং গৃহীত্বা লঘু লঘু আগচ্ছ' ইতি ।

(গ) চারু ইতি । বর্দ্ধমানকস্তদাখ্যঃ স্বভৃত্যঃ, চিরয়তি বিলম্বতে ।

(ঘ) বিদূ ইতি । লঘু লঘু শীঘ্রং শীঘ্রম্ ।

কিমিতি । অস্য বর্দ্ধমানকপ্রবহণস্য, পুরঃ অগ্রতঃ, প্রবহণম্ অন্যদ্ গোযানবৃন্দম্ কর্ত্তৃ, শনৈর্মন্দং মন্দং যাতি, তস্য অন্যপ্রবহণবৃন্দস্য, অন্তরং স্বগমনাবকাশম্, মার্গতে অন্বিষ্যতি কিং তত এব বিলম্বঃ কিমিত্যর্থঃ । অক্ষে কস্মিংশ্চিৎ চক্রে ভগ্নে সতি, পরিবর্ত্তনং চক্রান্তরযোজনম্, প্রকুরুতে কিম্ তৎকরণেনায়ং বিলম্বঃ কিম্ ? । অথবা প্রগ্রহো গোবন্ধনরজ্জুঃ, ছিন্নঃ, তদ্যোজ-

---

মনোহর এই শিলাতল রহিয়াছে, ইহাতে আপনি উপবেশন করুন।

চারুদত্ত। (উপবেশন করিয়া) বয়স্য ! বর্দ্ধমান বড়ই বিলম্ব করিতেছে ।

বিদূষক। আমি তাহাকে বলিয়াছিলাম — 'বসন্তসেনাকে লইয়া শীগ্গির শীগ্গির আয়।'

চারুদত্ত। তবে বিলম্ব করিতেছে কেন ? ।

অন্য গাড়ী, উহার আগে আগে, আস্তে আস্তে যাইতেছে, ও, তাহার ফাঁক খুঁজিতেছে কি ? কিংবা চাকা ভাঙ্গিয়া গিয়াছে, তাই

वर्त्मान्तोज्झित-दारु-वारित-गतिर्मार्गान्तरं याचते ?
स्वैरं प्रेरितगोयुगः किमथवा स्वच्छन्दमागच्छति ? ॥२॥

प्रविश्य गुप्तार्य्यकप्रवहणस्थश्चेटः । जाध गोणा ! जाध । (ङ)

आर्य्यकः । स्वगतम् ।

नरपतिपुरुषाणां दर्शनाद्भीतभीतः
सनिगडचरणत्वात् सावशेषापसारः ।

(ङ) यात गावौ ! यातम् ।

तेनायं विलम्बः ? । किं वा वर्त्मान्ते पथिमध्ये उज्झितेन त्यक्तेन केनचिच्छिन्न निपातितेनेत्यर्थः दारुणा काष्ठेन वारिता रुद्धा गतिर्यस्य स तादृशः सन् वर्द्धमानकः, मार्गान्तरम् अन्यं पन्थानम्, याचते प्रार्थयति गन्तुमिच्छति, तेनायं विलम्बः ? । अथवा स्वैरं शनैः प्रेरितं सञ्चालितं गोयुगं येन स तथोक्तो वर्द्धमानकः, किं स्वच्छन्दं निजाभिप्रायानुरूपं न पुनः प्रभोः सत्वरतया सत्वरमित्यर्थः, आगच्छति ? । किमपि निर्णेतुं न शक्नोमीत्यर्थः ।

शार्दूलविक्रीडितं वृत्तम् ॥ २ ॥

(ङ) प्रविश्येति । गुप्तो गुप्तभावेनावस्थित आर्य्यको यस्मिन् तस्मिन् तथोक्ते प्रवहणे तिष्ठतीति सः, चेटो वर्द्धमानको नाम भृत्यः ।

नरेति । नरपतिपुरुषाणां रक्षिभूतानां राजपुरुषाणाम्, दर्शनात् भीतभीतो

সে চাকা বদলাইতেছে ? অথবা দড়ি ছিঁড়িয়া গিয়াছে ? কিম্বা পথের মধ্যে নিপতিত বৃক্ষ, তাহার গতি রুদ্ধ করিয়াছে, তাই সে অন্য পথ খুজিতেছে ? অথবা গরু দুইটাকে ধীরে ধীরে চালাইয়া ইচ্ছানুসারে আসিতেছে ? ॥২॥

যাহাতে আর্য্যক গুপ্তভাবে রহিয়াছে, সেই গাড়ীতে থাকিয়া, ভৃত্য বর্দ্ধমান প্রবেশ করিয়া। যা গরু ! যা।

আর্য্যক। (স্বগত) আমি, রাজপুরুষগণের দর্শন হইতে অত্যন্ত

অবিদিতমধিরূঢ়ো যামি সাধোস্তু যানে
পরভৃত ইব নীড়ে রক্ষিতো বায়সীভিঃ ॥২॥

অহো ! নগরাৎ সুদূরমপক্রান্তোঽস্মি । তৎ কিমস্মাৎ প্রবহণাদবতীর্য্য বৃক্ষবাটিকাগহনং প্রবিশামি ? উতাহো প্রবহণস্বামিনং পশ্যামি । অথবা কৃতং বৃক্ষবাটিকাগহনেন । অভ্যুপপন্নবৎসলঃ খলু তত্রভবানার্য্যচারুদত্তঃ শ্রূয়তে ; তৎ প্রত্যক্ষীকৃত্য গচ্ছামি । (চ)

শিতাঙ্গমেব ত্রস্তঃ, নিগড়েন সংহতি সনিগড়ং কিঞ্চিৎ শৃঙ্খলাবদ্ধং চরণং যস্য তস্য ভাবস্তস্মাৎ সাবশেষঃ কিঞ্চিদবশিষ্টঃ অপসারঃ পলায়নং যস্য সঃ । যাবৎ নিগড়ং ন চ্যাবয়ামি তাবৎ পলায়নপূর্ণতা ন স্যাৎ অপরৈঃ পরিচিতত্বাদিত্যাশয়ঃ । নীড়ে কুলায়ে, বায়সীভিঃ কাকীভিঃ, অবিদিতং যথা স্যাত্তথা রক্ষিতঃ স্বশাবকত্বেন পালিতঃ, পরভৃতঃ কোকিলশাবক ইব, সাধোঃ সজ্জনস্য চারুদত্তস্য, যানে প্রবহণে, অন্যৈরবিদিতন্তু যথা স্যাত্তথা অধিরূঢ় আরূঢ়ঃ সন্ যামি গচ্ছামি ।

অত্র শ্রৌতীউপমালঙ্কারঃ । অবিদিতত্বাংশে সাদৃশ্যাৎ যামীতি পুরুষভেদেঽপি ন ভগ্নপ্রক্রমতাদোষঃ । মালিনী বৃত্তম্ ॥৩॥

(চ) অহো ইতি । অপক্রান্তঃ অপসৃতঃ । বৃক্ষবাটিকায়া বৃক্ষপূর্ণবাস্তুনঃ গহনং নিবিড়বনম্, প্রবিশামি, যথা রক্ষিণো মাং শতমন্বিষ্যাপি ন পশ্যেযুরিতি ভাবঃ ।

ভীত হইয়া পড়িয়াছি। এবং চরণে শৃঙ্খল রহিয়াছে বলিয়া এখনও আমার পলায়নের কিঞ্চিৎ অবশিষ্ট রহিয়াছে। এদিকে বাসাতে কাক পক্ষিণী-পরিরক্ষিত কোকিল শাবকের ন্যায় অন্যের অজ্ঞাত অবস্থায় আমি সজ্জনের গাড়ীতে উঠিয়া যাইতেছি ॥৩॥

আমি নগর হইতে বহুদূরে আসিয়া পড়িয়াছি ; তা এখন কি এই গাড়ী হইতে নামিয়া বৃক্ষবাটিকার বনের ভিতরে প্রবেশ করি ? না,

স তাবদস্মাদ্ব্যসনার্ণবোত্থিতং
নিরীক্ষ্য সাধুঃ সমুপৈতি নির্বৃতিম্ ।
শরীরমেতদ্গতমীদৃশীং দশাং
ধৃতং ময়া তস্য মহাত্মনো গুণৈঃ ॥৪॥

উতাহো কিংবা । "আহো উতাহো কিমুত বিকল্পে কিং কিমূত চ" ইত্যমরঃ । বৃক্ষবাটিকাগহনেন বৃক্ষবাটিকাগহনপ্রবেশেন, কৃতমলম্ । অভ্যুপপন্নবৎসলঃ শরণাগতবৎ শ্রুতঃ । তস্মাৎ ।

স ইতি । সাধুঃ স চারুদত্তঃ, অস্মাৎ অভ্যুপপন্নবৎসলত্বাদ্ধেতোঃ, ব্যসনার্ণবাদুত্থিতং বিপৎসাগরাদুত্তীর্ণং মামিতি শেষঃ, নিরীক্ষ্য দৃষ্ট্বা, তাবৎ সর্ব্বথা, নির্বৃতিং চিত্তপ্রসাদম্, সমুপৈতি সম্যক্ প্রাপ্স্যতি । পরোপকারপরায়ণস্য উপকার্য্যপ্রাপ্তৌ চিত্তপ্রসাদঃ স্যাদেবেতি ভাবঃ । ময়া, ঈদৃশীং দশাং পলায়িতত্বাৎ প্রচ্ছন্নীকরণাবস্থাম্, গতং প্রাপ্তম্, এতৎ শরীরম্ ; তস্য মহাত্মনশ্চারুদত্তস্য গুণৈঃ পরোক্ষমাহাত্ম্যৈঃ, ধৃতং রক্ষিতম্ ; তদীয়প্রবহণারোহণবশাদেব চন্দনকেন রক্ষণসুবিধাপ্রাপ্তেরিতি ভাবঃ ।

অত্র মামিত্যনুক্তাবপি ন ন্যূনপদতাদোষঃ, বক্তুরেব গম্যত্বাৎ ।

বংশস্থবিলং বৃত্তম্ ॥৪॥

গাড়ীর মালিকের সঙ্গে দেখা করি ? । অথবা বৃক্ষবাটিকার বনের ভিতরে প্রবেশ করিবার প্রয়োজন নাই ; মাননীয় চারুদত্তকে শরণাগতবৎসল বলিয়া শুনিতেছি ; সুতরাং তাঁহার সহিত সাক্ষাৎ করিয়াই যাই ।

সাধুপ্রকৃতি সেই চারুদত্ত, শরণাগতবৎসল বলিয়া, বিপৎসাগর হইতে উত্তীর্ণ আমাকে দেখিয়া, চিত্তপ্রসাদ লাভ করিবেন । ঈদৃশ অবস্থাপ্রাপ্ত এই শরীরকে, আমি সেই মহাত্মার গুণেই রক্ষা করিতে পারিয়াছি ॥৪॥

चेटः। इमं तं उज्जाणं, ता जाव उवसप्पामि। उपसृत्य। अज्जमित्तेअ!। (क)

विदू। भो! पिअं दे णिवेदेमि, वड्ढमाणओ मन्तेदि, आगदाए वसन्तसेणाए होदव्वं। (ख)

चारु। प्रियं नः प्रियम्।

विदू। दासीए पुत्ता! किं चिरइदोसि?। (ग)

चेटः। अज्ज! मित्तेअ! मा कुप्प, जाणत्थलके विस्सुमलिदे त्ति कदुअ गदागदिं कलेन्ते चिलइदेम्हि। (घ)

(क) इदं तदुद्यानम्, तद्यावदुपसर्पामि। आर्य्य मैत्रेय!।

(ख) भोः! प्रियं ते निवेदयामि, वर्द्धमानको मन्त्रयति, आगतया वसन्तसेनया भवितव्यम्।

(ग) दास्याःपुत्र! किं चिरायितोऽसि?।

(घ) आर्य्य! मैत्रेय! मा कुप्य, यानास्तरणं विस्मृतमिति ज्ञात्वा गतागतिं कुर्वन् चिरायितोऽस्मि।

(घ) चेट इति। गतागतिं कियद्दूरं गत्वा पुनर्गृहं प्रति गमनागमनम्।

ভৃত্য। এই সেই উদ্যান, তা উপস্থিত হই। (নিকটে যাইয়া) আর্য্য মৈত্রেয়!।

বিদূষক। সখে! তোমার প্রীতিকর সংবাদ জানাইতেছি, বর্দ্ধমান কথা বলিতেছে; সুতরাং বসন্তসেনা আসিয়া থাকিবে।

চারুদত্ত। প্রীতিকর, আমার প্রীতিকর বটে।

বিদূষক। দাসীর ছেলে! বিলম্ব করিলি কেন?।

ভৃত্য। আর্য্য! মৈত্রেয়! ক্রোধ করিবেন না। আমি গাড়ীর

चारु । वर्द्धमानक ! परिवर्त्त्य प्रवहणम् । सखे ! मैत्रेय ! अवतारय वसन्तसेनाम् । (ट)

विदू । किं णिअलेहिं बद्धा से गोड़ा ? । जेन सअं ण ओदरेदि । उत्थाय प्रवहणमुद्घाट्य । भो ! ण वसन्तसेणा, वसन्तसेणो क्खु एसो । (ठ)

चारु । वयस्य ! अलं परिहासेन, न कालमपेक्षते स्नेहः । अथवा स्वयमेवावतारयामि । इत्युत्तिष्ठति । (ड)

(ठ) किं निगड़ैर्बद्धावस्याः पादौ ? । येन स्वयं नावतरति । न वसन्तसेना, वसन्तसेनः खल्वेषः ।

(ट) चारु इति । परिवर्त्त्य—प्रवहणं घूर्णयित्वा तत्पश्चाद्भागं द्वाराभिमुखं कृत्वेत्यर्थः, यथा द्वारसोपान एवावतरणसुविधा स्यादिति भावः ।

(ठ) विदू इति । निगड़ैः शृङ्खलया । अस्याः वसन्तसेनायाः ।

वसन्तसेनः खल्वेषः पुरुषत्वादित्याशयः । यद्वा वसन्तः कालः सेना यस्य सः, साक्षात् कामदेव इत्यर्थः परमसुन्दरत्वादिति भावः ।

(ड) चारु इति । कालं परिहासविलम्बम्, नापेक्षते न सहते, स्नेहः अनुरागः ।

আস্তরণ আনিতে বিস্মৃত হইয়াছিলাম ; সেইজন্য যাতায়াত করিতে করিতে বিলম্ব করিয়া ফেলিয়াছি ।

চারুদত্ত । বর্দ্ধমান ! গাড়ী ফিরা । সখে ! মৈত্রেয় ! বসন্তসেনাকে নামাও ।

বিদূষক । উহার চরণযুগল কি শৃঙ্খল দ্বারা বদ্ধ রহিয়াছে ? যে নিজে নামিতে পারিতেছে না । (উঠিয়া গাড়ীর আবরণ তুলিয়া) ওহে ! বসন্তসেনা নহে, এ যে বসন্তসেন ! ।

চারুদত্ত । বয়স্য ! পরিহাসের প্রয়োজন নাই । কারণ, অনুরাগ

আর্য্যকঃ। দৃষ্ট্বা। অয়ে! অয়মেব প্রবহণস্বামী। ন কেবলং শ্রুতিরমণীয়ো দৃষ্টিরমণীয়োঽপি। হন্ত! রক্ষিতোঽস্মি। [ঢ]

চারু। প্রবহণমধিরুহ্য। অয়ে! তৎ কোঽয়ম্?।

করি-কর-সমবাহুঃ, সিংহপীনোন্নতাংসঃ,
পৃথুতর-সম-বক্ষাস্তাম্রলোলায়তাক্ষঃ।
কথমিদমসমানং প্রাপ্ত এবং বিধো যো
বহতি নিগড়মেকং পাদলগ্নং মহাত্মা ॥৫॥

(ঢ) আর্য্যক ইতি। শ্রুতৌ শ্রবণে রমণীয়ঃ নানাসদ্গুণশালিত্বাদিতি ভাবঃ; দৃষ্টৌ দর্শনে রমণীয়োঽপি, পরমসুন্দরাকৃতিত্বাদিত্যাশয়ঃ। রক্ষিতোঽস্মি, অস্য সাক্ষাৎকারলাভাদনেনৈব চ রক্ষিতব্যত্বাদিত্যভিপ্রায়ঃ।

করীতি। যো মহাত্মা, করিকরসমৌ হস্তিশুণ্ডাতুল্যৌ বাহূ যস্য সঃ, সিংহস্যেব পীনৌ স্থূলৌ উন্নতৌ চ অংসৌ স্কন্ধৌ যস্য সঃ, পৃথুতরম্ অতিবিস্তৃতং সমং সমস্তঞ্চ বক্ষো যস্য সঃ, তথা তাম্রে তাম্রবর্ণে লোলে চঞ্চলে আয়তে দীর্ঘে চ অক্ষিণী নেত্রদ্বয়ং যস্য

বিলম্ব সহ্য করিতে পারে না। অথবা নিজেই নামাই। (এই বলিয়া) উঠিলেন)

আর্য্যক। (দেখিয়া) ওহে! ইনিই গাড়ীর মালিক। ইনি, কেবল শুনিতেই সুন্দর নহে দেখিতেও সুন্দর!। রক্ষিত হইলাম।

চারুদত্ত। (গাড়ীতে উঠিয়া) ওহে! তা ইনি কে?।

যাঁহার বাহু হস্তি-শুণ্ডের সমান; স্কন্ধদেশ সিংহের ন্যায় স্থূল ও উন্নত; বক্ষোদেশ অত্যন্তবিস্তৃত ও সমান এবং নয়নদ্বয় তাম্রবর্ণ, চঞ্চল ও দীর্ঘ; এ হেন এই মহাত্মা, অযোগ্য চরণলগ্ন এই এক গাছি শিকল বহন করিতেছেন কেন? ॥৫॥

ततः को भवान्?।

आर्य्यकः। शरणागतो गोपालप्रकृतिरार्य्यकोऽस्मि। [ख]

चारु। किं घोषादानीय योऽसौ राज्ञा पालकेन बद्धः?।

आर्य्यकः। अथकिम्।

चारु। विधिनैवोपनीतस्त्वं चक्षुर्विषयमागतः।
अपि प्राणानहं जह्यां न तु त्वां शरणागतम् ॥६॥

स तादृशः स्थितः; एवंविधः स महात्मा इत्यर्थः इदं दृश्यमानम्, वहमानम् अयोग्यम् पादलग्नमेकं निगडं शृङ्खलाम्, कथं वहति। दीर्घसुत्रादीनां महापुरुषलक्षणत्वं सामुद्रिकादावनुसन्धेयम्।

अत्र प्रथमपादे लुप्तोपमयोर्मिथो निरपेक्षतया संसृष्टिः। मालिनी वृत्तम् ॥५॥

(ख) आर्य्यक इति। गोपालः प्रकृतिर्योनिः कारणं यस्य स गोपपुत्र इत्यर्थः।

विधिनेति। हे आर्य्यक! त्वं विधिना दैवेनैव उपनीत उपस्थापितः सन्, मम चक्षुर्विषयम् दृष्टिगोचरतामित्यर्थः, आगतः प्राप्तः। इदानीम् अहं प्राणानपि जह्यां त्यजेयम्, तव रक्षार्थमिति शेषः; तु किन्तु, शरणागतं त्वां न जह्याम्; सर्वथैव तव साहाय्यं करिष्यामीति भावः।

সুতরাং আপনি কে?।

আর্য্যক। আমি গোপপুত্র আর্য্যক, আপনার শরণাগত।

চারুদত্ত। রাজা পালক, গোয়ালপাড়া হইতে আনিয়া যাঁহাকে কারাগারে আবদ্ধ করিয়াছিলেন?।

আর্য্যক। হাঁ।

চারুদত্ত। আপনি বিধাতাকর্ত্তৃকই উপস্থাপিত হইয়া, আমার দৃষ্টিগোচর হইয়াছেন। এখন আমি প্রাণও ত্যাগ করিতে পারি, কিন্তু শরণাগত আপনাকে নহে ॥৬॥

आर्य्यकः। हर्षं नाटयति।

चारु। वर्द्धमानक! चरणान्निगड़मपनय।

चेटः। जं अज्जो आणवेदि। तथा कृत्वा। अज्ज! अवणीदाइं णिगलाइं। (त)

आर्य्यकः। स्नेहमयान्यन्यानि दृढ़तराणि दत्तानि। (थ)

विदू। सङ्कच्छेहि णिअड़ाइं, एसो वि मुक्को, सम्पदं अम्हे वज्झिस्सामो। (द)

(त) यदार्य्य आज्ञापयति। आर्य्य! अपनीतानि निगड़ानि।

(द) सङ्कच्छ निगड़ानि, एषोऽपि मुक्तः, साम्प्रतं वयं व्रजिष्यामः।

अत्र अद्य।मिति श्रुतिपरुषवर्णत्वात् पदांशगतो दुःश्रवत्वदोषः, स च 'आर्य्य-मप्यहं प्राप्यान्' इति पाठेन समाधेयः। तथा व्यवसायो नाम विमर्शसन्ध्यङ्ग—'व्यवसायश्च विज्ञेयः प्रतिज्ञाहेतुसम्भवः' इति दर्पणलक्षणात् ॥६॥

(थ) आर्य्यक इति। स्नेहमयानि स्नेहस्वरूपाणि, दृढ़तराणि एतन्निगड़ापेक्षया दृढ़ानि, वर्द्धमानकवत् केनापि छेत्तुमशक्यत्वादिति भावः, अन्यानि निगड़ानि, दत्तानि मयि योजितानीत्यर्थः, मया दुस्तरविपदि सर्वथा रक्षणाद्भोवारेण चिरस्थायि-सौहार्द्दोपजननादित्याशयः।

अत्र अपरस्य घातो नाम नाट्यलक्षणं— 'वर्णनापरस्य घातश्चिरार्थै रचनैर्निवः' इति दर्पणलक्षणात्।

आर्य्यक आनन्द अভিনয় করিল।

চারুদত্ত। বর্দ্ধমান! উহার চরণ হইতে শৃঙ্খল অপনীত কর।

ভৃত্য। আর্য্য যাহা আদেশ করেন।। (তাহা করিয়া) আর্য্য! শিকল খুলিয়াছি।

আর্য্যক। স্নেহময় আর কতকগুলি দৃঢ়তর শৃঙ্খল দিয়াছ।

चारु । धिक्, शान्तम् । (ध)

आर्य्यकः । सखे ! चारुदत्त ! अहमपि प्रणयेनेदं प्रवहणमारूढ़ः । तत् चन्तव्यम् । (न)

चारु । अलङ्कृतोऽस्मि स्वयंग्राहप्रणयेन भवता । (प)

(द) विदू इति । हे वर्द्धमानक ! निगड़ानि, सङ्क्रम्य चारुदत्तचरणे एव पुनर्योजय । एष आर्य्यकोऽपि मुक्तः, त्वमहञ्च मुक्ताविव स्थिताविति भावः, सुतरां साम्प्रतं वयं त्वं वर्द्धमानकः अयमार्य्यकः अहं विदूषकश्च इमे वयमित्यर्थः, व्रजिष्यामः; केवलमयमेव चारुदत्तो वसन्तसेनाया आगमनाशया अत्रैव वद्धस्तिष्ठतु इत्याशयः । अस्य राजनमोचनव्यस्तत्वात् वसन्तसेनाया अनागमनविषादाच्च सचोभकौतुकोक्तिरियम् ।

(ध) चारु इति । धिक् अस्य ईदृशविपद्यपि तव कौतुकं निन्दामीत्यर्थः; अतएव शान्तम् ईदृशकौतुककरणं विरतं भवत्विति शेषः ।

(न) आर्य्यक इति । प्रणयेन विश्रम्भेण अनुमतिं विनापि विपत्काले आरोहणे भवान् न क्रुद्धो भविष्यतीति विश्वासेनेत्यर्थः ।

(प) चारु इति । स्वयंग्राहप्रणयेन ममानुमतिं विनापि मम प्रवहणस्य यत् त्वया स्वयमेव ग्रहणं कृतम् तज्जनितसौहार्द्देनेत्यर्थः, अलङ्कृतोऽस्मि भाविमहाराजस्य भवतः सौहार्द्दलाभादिति भावः । 'प्रणयः प्रेम्णि विश्रम्भे याच्ञाप्रसरयोरपि' इत्यभयवाक्येऽपि विश्वः ।

বিদূষক। এই শিকলগুলি চারুদত্তের পায়ে লাগাইয়া দে; ইনিও, মুক্ত হইয়াছেন, এখন আমরা চলিয়া যাই।

চারুদত্ত। তোমার এই কৌতুক নিন্দনীয়; তুমি বিরত হও।

আর্য্যক। সখে! চারুদত্ত! আমিও বিশ্বাসবশতঃ এই গাড়ীতে উঠিয়াছিলাম। তা ক্ষমা করিবেন।

চারুদত্ত। আপনি নিজেই গাড়ী গ্রহণ করায় যে প্রণয় প্রকাশ পাইয়াছে; তাহা দ্বারা আপনি আমাকে অলঙ্কৃত করিয়াছেন।

आर्य्यकः। अभ्यनुज्ञातो भवता गन्तुमिच्छामि।

चारु। गम्यताम्।

आर्य्यकः। भवतु, अवतरामि।

चारु। सखे! नावतरितव्यम्। प्रत्यग्रापनीतसंयमनस्य भवतः अलघुसंचारा गतिः। सुलभपुरुषसञ्चारेऽस्मिन् प्रदेशे प्रवहणं विश्वासमुत्पादयति, तत् प्रवहणेनैव गम्यताम्। (फ)

आर्य्यकः। यथाह भवान्। (ब)

(फ) चारु इति। प्रत्यग्रं नूतनम् अपनीतं दूरीकृतं संयमनं बन्धनं यस्य तस्य। गतिर्गमनम्, अलघुर्महान् संचारः संरोधो यस्याः सा, भविष्यतीति शेषः। सुलभः पुरुषाणां सञ्चारो गमनागमनं यस्मिन् तस्मिन्।। प्रवहणं कर्त्तृ। तथा च इयन्तं कालं यावत् बन्धनसत्त्वात् तव पदद्वयस्य प्रायेण स्तब्धीभूततया गमनमपि संरुद्धमिव भविष्यति, इतस्ततः सञ्चरन्तश्च पुरुषास्त्वयि संशयिष्यन्ति; आवृतप्रवहणेन गमने तु काचित् स्त्री गच्छतीति मत्वा तेषां न संशयो भवेदिति भावः।

(ब) आर्य्यक इति। भवान् यथा आह तथैव करोमि प्रवहणेनैव गच्छामीत्यर्थः।

আর্য্যক। আপনার অনুমতি পাইলে আমি যাইতে ইচ্ছা করি।

চারুদত্ত। যান্।

আর্য্যক। হউক, অবতরণ করি।

চারুদত্ত। সখে! আপনি অবতরণ করিবেন না। কারণ, এই মাত্র আপনার বন্ধন খুলিয়া দেওয়া হইয়াছে; সুতরাং আপনার গমনে গুরুতর চরণরোধ উপস্থিত হইবে। বিশেষতঃ এই স্থানে লোকের গমনাগমন সর্ব্বদাই হইতেছে; অতএব এস্থানে গাড়ী বিশ্বাস উৎপাদন করিবে; সুতরাং গাড়ীতেই যান্।

আর্য্যক। আপনি যথার্থই বলিয়াছেন।

চারু। ক্ষেমেণ ব্রজ বান্ধবান্ ,—

আর্য্যকঃ ।—ননু ময়া লব্ধো ভবান্ বান্ধবঃ ,

চারু। স্মর্ত্তব্যোঽস্মি কথান্তরেষু ভবতা ,—

আর্য্যকঃ ।— স্বাত্মাপি বিস্মর্য্যতে ।

চারু। ত্বাং রক্ষন্তু পথি প্রযান্তমমরাঃ ,—

আর্য্যকঃ ।—সংরক্ষিতোঽহং ত্বয়া ,

চারু। স্বৈর্ভাগ্যৈঃ পরিরক্ষিতোঽসি ,—

আর্য্যকঃ ।—ননু হে ! তত্রাপি হেতুর্ভবান্ ॥৭॥

চারুদত্তার্য্যকয়োরুক্তিপ্রত্যুক্তী কবিরেকশ্লোকেন গ্রথ্নাতি ক্ষেমেণেতি । বান্ধবান্ পিতৃমাতৃপ্রভৃতিবন্ধুজনান্ , ক্ষেমেণ কুশলেন , ব্রজ প্রাপ্নুহি , পথি রক্ষিতস্ত্বা ন বাধন্তামিতি ভাবঃ । ময়া ভবান্ ননু ভবানেব বান্ধবঃ পরমোপকারিত্বাৎ বন্ধুজনো বান্ধবঃ ; অতঃ কিং বন্ধ্বন্তরপ্রাপ্ত্যপেক্ষেতি ভাবঃ । ভবতা কথান্তরেষু উপাখ্যানাবসরেষু অপি অহম্ স্মর্তব্যঃ , ইত্যেবেদানীং প্রার্থনেত্যাশয়ঃ । যদি ময়া ভবান্ বিস্মর্য্যতে , তদা স্বস্য আত্মাপি বিস্মর্য্যতে ইত্যর্থঃ ; পরমোপকারিতয়া ভবান্ মম আত্মবদেব প্রিয় ইতি কদাপি ন বিস্মর্তব্য ইতি ভাবঃ । অমরা দেবাঃ পথি প্রযান্তং গচ্ছন্তং ত্বাং রক্ষন্তু । ত্বয়ৈবাহং রক্ষিতঃ ; সুতরাং কুতোঽন্যরক্ষণাপেক্ষেত্যভিপ্রায়ঃ । স্বৈঃ স্বকীয়ৈরেব ভাগ্যৈস্ত্বং পরিরক্ষিতোঽসি , অতঃ 'ত্বয়া সংরক্ষিতোঽহম্ ' ইতি ব্যর্থঃ স্তুতিবাদ ইত্যা-

---

চারুদত্ত। আপনি মঙ্গলে মঙ্গলে বন্ধুগণকে প্রাপ্ত হউন।

আর্য্যক। আমি আপনাকেই ত বন্ধু পাইয়াছি।

চারুদত্ত। আপনি কথাপ্রসঙ্গে আমাকে স্মরণ করিবেন।

আর্য্যক। (আপনাকে বিস্মৃত হইলে) নিজের আত্মাকেও বিস্মৃত হইব।

চারুদত্ত। পথে যাইবার কালে আপনাকে দেবগণ রক্ষা করুন।

चारु। यत्, उद्यते पालके महती रक्षा न वर्त्तते, तत् शीघ्रमपक्रामतु भवान्। (भ)

आर्य्यकः। एवं पुनर्दर्शनाय। इति निष्क्रान्तः। (म)

चारु। कृत्वैवं मनुजपतेर्महद्व्यलीकं
स्थातुं हि क्षणमपि न प्रशस्तमस्मिन्।

अयः। हे साधो! तत्रापि भाग्यकृतं कारणमपि, भवान् ननु भवानेव हेतुः; भवदभावे तत्प्रवहणाभावस्तदभावे च कुतो मे रक्षणमिति कृतः स्तुतिवादः आर्य्यक एवेति भावः।

'प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु' इत्यमरः। शार्दूलविक्रीडितं वृत्तम् ॥७॥

(भ) चारु इति। पालके तदाख्ये राजनि, उद्यते दण्डयितुमुद्युक्ते महती सम्यक्, रक्षा रक्षोपायः। अपक्रामतु अपसरतु।

(म) आर्य्यक इति। एवम् अपक्रामामि, पुनर्दर्शनाय भवत इति शेषः। आमन्त्रणमेतत्।

कृत्वेति। हे मैत्रेय!। इति विदूषकसम्बोधनम्। एवमनेन प्रकारेण स्व-प्रवहणाद्वारेव आर्य्यकस्यानयनबन्धनमोचनादिना साहाय्यकरणेनेत्यर्थः, मनुजपतेः राज्ञः

আর্য্যক। আপনিই ত আমাকে রক্ষা করিলেন।

চারুদত্ত। নিজের ভাগ্যে আপনি রক্ষিত হইয়াছেন!

আর্য্যক। সখে! তাহাতেও আপনিই হেতু।৭।

চারুদত্ত। যে হেতু, রাজা পালক, দণ্ড করিতে উদ্যত হইলে রক্ষা করিবার বিশেষ উপায় নাই; অতএব আপনি শীঘ্র পলায়ন করুন।

আর্য্যক। পুনরায় আপনার দর্শনলাভের নিমিত্ত ইহাই করিতেছি।
(এই বলিয়া চলিয়া গেল)

চারুদত্ত। মৈত্রেয়! এইভাবে রাজার গুরুতর অপ্রিয় কার্য্য

मैत्रेय! क्षिप निगड़ं पुराणकूपे
पश्येयुः क्षितिपतयो हि चारदृष्ट्या ॥८॥

वामाक्षिस्पन्दनं सूचयित्वा। सखे! मैत्रेय! वसन्तसेनादर्शनोत्सुकोऽयं जनः। पश्य—(ब)

अपश्यतोऽद्य तां कान्तां वामं स्फुरति लोचनम्।
अकारणपरित्रस्तं हृदयं व्यथते मम ॥९॥

पालकस्य, महत् व्यलीकमप्रियं कृत्वा स्थितस्य ममेति शेषः, अस्मिन् स्थाने, क्षणमपि स्थातुं न हि नैव प्रशस्तमुचितम्, रक्षिभिरत्रैवास्माकमवस्थानदर्शने वृक्षवाटिकायामेवास्मागमनं गतम्, इत्यादिकथनासम्भवेन तादृशापराधस्य स्फुटीभावित्वादिति भावः। अतएव निगड़ं आर्य्यकचरणान्मोचितां शृङ्खलाम्, पुराणकूपे क्षिप, यथा तद्दृष्ट्वापि अस्माकं कार्य्यं नावबुध्येरन्नित्याशयः। ननु अस्माकमिदं कार्य्यमजानन् राजा कथं कुप्येदित्याह—हि यस्मात्, क्षितिपतयो राजानः, चारो गुप्तपुरुष एव दृष्टिस्तया, पश्येयुः गुप्तघटनामपीति शेषः। अत्रापि गुप्तचरस्थितिसम्भव इत्यभिप्रायः।

अत्र कारणेन कार्य्यसमर्थनरूपोऽर्थान्तरन्यासः, अप्रस्तुतक्षितिपतिसामान्यात् प्रस्तुतपालकरूपक्षितिपतिविशेषप्रतीतेरप्रस्तुतप्रशंसा, चारदृष्ट्येति रूपकञ्च इत्येतेषामङ्गाङ्गिभावेन सङ्करः।

प्रहर्षिणी वृत्तम् ॥८॥

(ब) वामेति। अयं जनः अहमित्यर्थः।

अपश्यत इति। अद्य इदानीम्, तां कान्तां वसन्तसेनाम्, अपश्यतो मम वामं

করিয়া আমাদের এখানে ক্ষণকালও থাকা উচিত নহে। সুতরাং পুরাতন কূপের ভিতরে এই শিকল নিক্ষেপ কর। কারণ, রাজগণ গুপ্তচররূপ দৃষ্টিদ্বারা সকলই দেখিয়া থাকেন ॥৮॥

(বাম-নয়ন-স্পন্দন সূচনা করিয়া) সখে! মৈত্রেয়! এই ব্যক্তি, বসন্তসেনাকে দেখিবার নিমিত্ত উৎকণ্ঠিত হইয়াছে। দেখ—

तदेहि गच्छावः। परिक्रम्य। कथमभिमुखमनाभ्युदयिकं श्रमणकदर्शनम्। विचार्य। प्रविशत्वयमनेन पथा, वयमप्यनेनैव पथा गच्छामः। इति निष्क्रान्तः।

इत्यार्य्यकापहरणं नाम सप्तमोऽङ्कः ॥७॥

लोचनं स्फुरति स्पन्दते। "वामाक्षिस्पन्दनमर्थनाशं बन्धुवियोगं वा" इति गर्गवचनादिदं वसन्तसेनारूपबन्धुवियोगसूचकमिवेति भावः। तथा अकारणपरित्रस्तं हृदयं व्यथते पीड़ामावहति ; अतोऽप्यमङ्गलमाशङ्के इत्याशयः।

अत्र कारणाभावेऽपि परित्रास-व्यथयोः कार्य्ययोरुत्पत्त्या विभावनालङ्कारः ॥९॥

(२) तदिति। अनाभ्युदयिकम् अनाङ्गलिकम्, श्रमणकस्य मुण्डितसर्व्वाङ्गस्य नग्नप्रायस्य च बौद्धसन्न्यासिनो दर्शनम्। अयं श्रमणकः, अनेन सम्मुखवर्त्तिना तेनैव। अस्मिन् श्रमणके प्रविश्य सम्मुखादपसृते तदनन्तरमस्माकं गमने दर्शनासम्भवान्न दोष इत्याशयः।

निर्लोमकपुरुषदर्शनादौ दोषमाह स्मृतिः —

> "अकेशं दुर्भगं नग्नमनपत्यञ्च पापिनम्।
> दृष्ट्वा त्वशुभमाप्नोति यात्रायां प्रातरेव वा ॥"

इति श्रीहरिदाससिद्धान्तवागीशभट्टाचार्य्यविरचितायां मृच्छकटिकटीकायां वसन्तसुषमा-समाख्यायां सप्तमाङ्कविवरणं समाप्तम् ॥७॥

আজ সেই প্রিয়তমাকে না দেখিয়া, বাম নয়ন স্পন্দিত হইতেছে এবং আমার হৃদয়, বিনা কারণে উদ্বিগ্ন হইয়া দুঃখ অনুভব করিতেছে ॥৯॥

অতএব আইস যাই। (পাদক্ষেপ করিয়া) হায়! সম্মুখেই অমঙ্গলসূচক বৌদ্ধসন্ন্যাসী-দর্শন হইল! (মনে মনে বিচার করিয়া) এই পথেই এ, প্রবেশ করুক, তাহার পর আমরাও, এই পথেই যাইব। (ইহার পর চলিয়া গেলেন)

अष्टमोऽङ्कः ।

—ः❀ः—

ततः प्रविशति आर्द्रचीवरहस्तो भिक्षुः । (क)

भिक्खुः । अज्ञा ! कलेध धम्मसञ्चअं । (ख)

संजम्मध णिअपोटं णिच्चं जग्गेध झाण-पडहेण ।
विसमा इन्दिअ-चोला, हलन्ति चिलसञ्चिदं धम्मं ॥१॥

(ख) अज्ञाः! कुरुत धर्म्मसञ्चयम् ।

(१) संयच्छत निजोदरं नित्यं जागृत ध्यानपटहेन ।
विषमा इन्द्रियचौरा हरन्ति चिरसञ्चितं धर्म्मम् ॥

तत इति । आर्द्रं चीवरं कौपीनं हस्ते यस्य सः, भिक्षुः सन्न्यासी । अयन्तु वसन्तसेनोपकृतः संवाहको नाम ।

संयच्छतेति । हे अज्ञाः, निजोदरं संयच्छत संयतं कुरुत, न तु यथेष्टं भोक्तुं प्रसारयतेति भावः । ध्यानं परमेश्वरचिन्तनमेव पटहो निद्राव्याघातकत्वात् ढक्का तेन, नित्यं सर्व्वदैव, जागृत ; नतु कदापि विषयोपभोगनिद्रया अभिभूता भव-तेत्याशयः । ननु कथं तत् जागरणमित्याह-विषमा भयङ्कराः, इन्द्रियाणि चक्षुरादि-न्येव चौराः, चिरसञ्चितं धर्म्मं हरन्ति । यथा गृहस्थस्य जागरणे चौराकान्तीयं चिर-

---

তদনন্তর আর্দ্রকৌপীনহস্তে ভিক্ষুর (বৌদ্ধ সন্ন্যাসীর) প্রবেশ ।

ভিক্ষু । হে মূর্খগণ ! ধর্ম্মসঞ্চয় কর ।

তোমরা নিজের উদর সংযত কর এবং ধ্যানরূপ ঢাকের শব্দে সর্ব্বদা

अवि अ, अणिच्चदाए पेक्खिअ णवलं दाव धम्माण' सल-
अम्हि । (ग)

पञ्चजणा जेण मालिदा,
इत्थिअ मालिअ गाम लक्खिदे ।
अवल अ चण्डाल मालिदे,
अवसं वि शे णल शग्ग गाहदि ॥ २ ॥१

(ग) अपि च, अनित्यतया प्रेच्य केवलं तावद्धर्म्माणां शरण-
मस्मि ।

(२) पञ्चजना येन मारिताः स्त्रियं मारयित्वा ग्रामो रक्षितः ।
अवलम्ब चाण्डालो मारितः अवश्यं स नरः स्वर्गं गाहते ॥

सञ्चितं धनं हर्त्तुं नार्हन्ति, तथा ध्यानात्मकजागरणे निगृहीतानीन्द्रियाणि पाप-
विधानद्वारा चिरसञ्चितं धर्म्मं हर्त्तुं नार्हन्तीति भावः ।

अत्र ध्यानेन्द्रिययोः पटह-चौरत्वारोपौ शाब्दौ धर्म्मे धनत्वारोपस्तु आर्थ इत्येकदेश-
विवर्त्ति रूपकम्, जागरणं प्रति परार्हणस्य हेतुत्वात् वाक्यार्थहेतुकं काव्यलिङ्गञ्च,
अनयोरङ्गाङ्गिभावेन सङ्करः

आर्य्या जातिः ॥१॥

(ग) अपि चेति । अनित्यतया विशिष्टं प्रेक्ष्य धर्म्मभिन्नं सर्व्वमनित्यं दृष्ट्वेत्यर्थः,
धर्म्माणां शरणम् अनुष्ठानेन रक्षकः । "शरणं गृहरक्षित्रोः" इत्यमरः ।

জাগরিত থাক ; (না হইলে) ইন্দ্রিয়রূপ দুষ্কর চৌরগণ তোমাদের
চিরসঞ্চিত ধর্ম্মধন অপহরণ করিবে ॥১॥

আর, জগতের সমস্ত পদার্থ অনিত্য দেখিয়া আমি কেবল নিত্য-
ধর্ম্মের রক্ষক হইয়াছি ।

१। पञ्चजण जेण मालिदा इत्थिअं मालिअ गामो लक्खिदे ।
अवल च चण्डालो मालिदो अवस्सं सि णलो सग्गं गाहदि ॥ इति पाठभेदः ।

शिल मुण्डिद तुण्ड मुण्डिदे,
चित्त ण मुण्डिद कीश मुण्डिदे।
जाह उणाअ चित्त मुण्डिदे,
शाहु शुट्ठु शिल ताह मुण्डिदे ॥२॥ *

(२) शिरो मुण्डितं तुण्डं मुण्डितं
चित्तं न मुण्डितं किं मुण्डितम्?।
यस्य पुनश्च चित्तं मुण्डितं
साधु सुष्ठु शिरस्तस्य मुण्डितम् ॥

पञ्चेति। येन नरेण, पञ्चजनाः चौररूपाणि पञ्चज्ञानेन्द्रियाणि, मारिता निगृह्य मारितवत् कृताः, स्त्री भोगासक्तिरूपिणीं स्त्रीरूपामविद्याम् ग्रामध्वंसकारिणीं डाकिनीञ्च, मारयित्वा तत्त्वज्ञानेन विनाश्य मन्त्रेण मृतवत् दूरीकृत्य च, ग्राम आत्मन आवासभूतो देहः पल्ली च रक्षितः शोधितः पालितश्च, तथा अबलः स्वपोषकाविद्यानाशात् दुर्व्वलीभूतः, चण्डालश्चण्डालरूपो दुर्द्धरो निकृष्टो वा कामश्च, मारितो विनाशितः, स नरः, अवश्यं स्वर्गं गाहते गच्छति, प्रतिबन्धकाभावादिति भावः।

अत्रेन्द्रियादिभ्यः पञ्चजनादीनां भेदेऽपि अभेदाध्यवसायादतिशयोक्तिरलङ्कारः, "कथमुपरि कलापिनः कलापः" इत्यादिदर्पणोदाहृतवत्। एवमश्लिष्टनिर्विघ्नस्य शब्दार्थयोः सौन्दर्य्ये ज्ञानाभिनिवेशयोरभावात् मारितपदस्य द्विरुपादानेऽपि न कथितपदतादोषः। एवमुत्तरत्रापि ज्ञेयम्।

वैतालीयं नाम छन्दः—"षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरन्तराः। न समात्र पराश्रिता कला वैतालीयेऽन्ते रलौ गुरुः।" इति लक्षणात् ॥२॥

যে লোক; পাঁচ জনকে মারিয়াছে, স্ত্রীটাকে মারিয়া গ্রাম রক্ষা করিয়াছে এবং দুর্ব্বল চণ্ডালকে মারিরা ফেলিয়াছে, সে লোক অবশ্যই স্বর্গে যাইতে পারে ॥২॥

* शिर मुण्डिदे तुण्ड मुण्डिदे चित्त ण मुण्डिदे कीश मुण्डिदे। जाह उणाअ चित्त मुण्डिदे शाहु शुट्ठु शिल ताह मुण्डिदे ॥ इति पाठान्तरम्।

गिहिद-कासाओदए एशे चीवले, जाव एदं लट्ठिअ-शाल-काहकेलकेँ उज्जाणे पविशिअ पोक्खलिणीए पक्खालिअ लहुं लहुं अवक्कमिश्शं । परिक्रम्य तथा करोति । (घ)

(घ) गृहीत-काषायोदकमेतत् चीवरम्, यावदेतत् राष्ट्रियश्याल-कस्य उद्याने प्रविश्य पुष्करिण्यां प्रक्षाल्य लघु लघु अपक्रमिष्यामि ।

शिर इति । यस्य नरस्य, शिरो मुण्डितं मस्तकं केशहीनीकृतम्, तुण्डं मुण्डितं मुखञ्च श्मश्रुरहितीकृतम्; किन्तु चित्तं न मुण्डितं कामक्रोधादिदोषं दूरीकृत्य न परिष्कृतम्; तस्य नरस्य किं मुण्डितम्? अपि तु किमपि नेत्यर्थः । चित्ते कामक्रोधादिदोषे सति बहिर्मस्तकादिमुण्डनम् अमुण्डनमेव वास्तविकमलाम-पगमादिति भावः । पुनः किन्तु, यस्य च जनस्य, चित्तं साधु सम्यक् मुण्डितं कामक्रोधादिदोषान् निरस्य परिष्कृतम्; तस्य जनस्य, शिरो मस्तकम्, उपलक्षण-मेतत् तुण्डस्येति बोध्यम्, सुष्ठु सम्यक्, मुण्डितम् । तथा च चित्ते सर्वथा कामादिदोषहीने कृते मस्तकादौ बहिर्लीभूतकेशादिसत्त्वेऽपि वास्तविकमलाप-गमात् मलापनयनरूपं शास्त्रोक्तं मुण्डनं निष्पन्नमेवेत्याशयः ।

अत्र उक्तरूपयोर्विरूपयोः संघटनया विषमालङ्कारः । मुण्डितशब्दस्य वारं वारमुपादानेऽपि प्रागुक्तयुक्तेर्नानवीकृतत्वदोषः ।

'भिक्षोर्मुण्डनादिकमुक्तं मनुना "कृत्तकेशनखश्मश्रुः पात्री दण्डी कुसुम्भवान् ।
विचरेन्नियतो नित्यं सर्वभूतान्यपीड़यन् ॥"

वैतालीयं छन्दः ॥३॥

(घ) गृहीतेति । गृहीतं काषायोदकम् आम्रादिनिर्य्यासाविलं जलं येन तत्

মস্তক মুণ্ডিত হইয়াছে এবং মুখও মুণ্ডিত হইয়াছে; কিন্তু যদি চিত্ত মুণ্ডিত না হইয়া থাকে, তবে কি মুণ্ডিত হইয়াছে?। যাহার চিত্ত সম্যকরূপে মুণ্ডিত হইয়াছে, তাহার মস্তক (বাহিরে মুণ্ডিত না হইয়া থাকিলেও) ভালরূপেই মুণ্ডিত হইয়াছে ॥৩॥

এই কৌপীনে গাছের কস মিশ্রিত জল লাগিয়া গিয়াছে, সুতরাং

नेपथ्ये। चिट्ठ, ले दुट्ठशमणका! चिट्ठ। (ङ)

भिक्षुः। दृष्ट्वा सभयम्। ही अविद माणहे! एशे शे लाअ-शाल-शण्ठाणे आअदे। एक्केण भिक्खुणा अवलाहे किदे अण्णं पि जहिं जहिं भिक्खुं पेक्खदि, तहिं तहिं गोणं विअ णासं विन्धिअ ओवाहेदि। ता कहिं अशलणे शलणं-गमिश्शं?। अधवा भट्टालके ज्जेव वुद्धे मे शलणे। (च)

(ङ) तिष्ठ, रे दुष्टश्रमणक! तिष्ठ।

(च) आश्चर्य्यम्। एष स राज-श्यालक-संस्थान आगतः। एकेन भिक्षुणा अपराधे कृते, अन्यमपि यस्मिन् यस्मिन् भिक्षुं प्रेक्षते, तस्मिन् तस्मिन् गामिव नासिकां विद्ध्वा अपवाहयति। तत् कस्मिन् अशरणः शरणं गमिष्यामि?। अथवा भट्टारक एव बुद्धो मे शरणम्।

दूषितजलाशये निमज्जनात् आमादिनिर्य्यासान्वितजलयुक्तमित्यर्थः, चीवरं कौपीनम्। लघु लघु शीघ्रं शीघ्रम्। अपक्रमिष्यामि उद्यानाद्बहिर्भविष्यामि।

(च) भिक्षुरिति। ही अविदमाणहे इत्येकमेवाव्ययमाश्चर्य्ये। आश्चर्य्यञ्च एकस्यापराधे अपरस्यापि दण्डनादिति बोध्यम्। नासां नासिकाम्, विद्ध्वा ताड़यित्वा, गामिव, अपवाहयति निष्काशयति, तमन्यं भिक्षुमिति शेषः। अशरणः स्वभावत एव रक्षकरहितः, शरणं रक्षकम्, गमिष्यामि प्राप्स्यामि। भट्टारको राजा सर्व्वनियन्तेत्यर्थः।

রাজার শালার উদ্যানে প্রবেশ করিয়া পুষ্করিণীতে ইহা প্রক্ষালন করিয়া তাড়াতাড়ি বাহির হইয়া আসি। (পাদক্ষেপপূর্ব্বক তাহা করিতে লাগিল)

নেপথ্যে। থাক্ রে দুষ্ট সন্ন্যাসী! থাক্।

ভিক্ষু। (দেখিয়া ভয়ের সহিত) ওহো! এই সেই; রাজার শালা

प्रविश्य खड्गहस्तेन विटेन सह शकारः । चिट्ठ ले दुट्ठशमणका ! चिट्ठ । आवाणअ-मज्झ-पविट्ठश्श विअ लत्तमूलअश्श शीशं दे मोड़इश्शं । इति ताड़यति । (छ)

विटः । काणेलीमातः ! न युक्तं निर्वेद-धृत-कषायं भिक्षुं ताड़यितुम् । तत् किमनेन । इदं तावत् सुखोपगम्य-मुद्यानं पश्यतु भवान् । (ज)

(छ) तिष्ठ रे दुष्टश्रमणक ! तिष्ठ । आपानक-मध्य-प्रविष्टस्येव रक्त-मूलकस्य शीर्षं ते भङ्क्ष्यामि ।

(छ) प्रविश्येति । आपीयते मद्यमस्मिन्निति आपानकं पानगोष्ठी मद्यपान-सभेत्यर्थः तस्य मध्ये प्रविष्टस्य मद्यपायिभिरेवानयनादुपस्थितस्य, रक्तं लोहित-वर्णं यत् मूलकं तस्येव, ते तव शीर्षं मस्तकम् उपरिभागञ्च । मद्यपायिनोहि मद्यपानकाले मूलकस्योपरिभागं खादन्ति ।

(ज) विट इति । काणेलीमातरिति शकारस्य सम्बोधनम् । अस्य व्युत्पत्तिस्तु प्रागेव दर्शिता । निर्वेदेन आत्मावमाननया विषयवैराग्येणेत्यर्थः, धृतं कषायं

সংস্থান আসিয়াছে। এক সন্ন্যাসী অপরাধ করিলে, যেখানে যেখানে অন্ত সন্ন্যাসীকেও দেখে; সেই থানে সেই থানেই নাসিকা বিদ্ধ করিয়া, গরুর মত তাহাকে বাহির করিয়া দিয়া থাকে। তা রক্ষকহীন আমি কোথায় যাইয়া রক্ষক পাইব। অথবা সর্ব্বনিয়ন্তা বুদ্ধদেবই আমার রক্ষক হইবেন।

খড়্গধারী বিটের সহিত প্রবেশ করিয়া শকার। থাক্ রে দুষ্টসন্ন্যাসী ! থাক্। মদ্যপানের সভার মধ্যে উপস্থিত রক্তবর্ণ মূলকের ন্যায় তোর মস্তক ভাঙ্গিয়া দিতেছি। (এই বলিয়া প্রহার করিতে লাগিল)

বিট। কাণেলীর পুত্র ! যে আত্মাবজ্ঞাবশতঃ গৈরিক বসন ধারণ

অশরণ-শরণ-প্রমোদভূতৈর্বনতরুভিঃ ক্রিয়মাণ-চারু-কর্ম্ম।
হৃদয়মিব দুরাত্মনামগুপ্তং নবমিব রাজ্যমনির্জিতোপভোগ্যম্
॥৪॥

ভিক্ষুঃ। শাঅদং?। পসীদদু উবাসকে। (ক)

(ক) স্বাগতম্?। প্রসীদতু উপাসকঃ।

গৈরিকং অনুমতং যেন তং নিতান্তনিঃসম্বলমিত্যর্থঃ, ভিক্ষুং সন্ন্যাসিনম্, তাড়-য়িতুং প্রহর্তুম্,? ন যুক্তং নোচিতম্, কাপুরুষতাপাতাদিতি ভাবঃ। অনেন ভিক্ষুণা কিং প্রয়োজনম্? কিমপি নেত্যর্থঃ, যথেচ্ছমেবায়ং গচ্ছত্বিত্যাশয়ঃ।

অশরণেতি। অশরণানাং গৃহরহিতানাং জনানাং শরণানি গৃহভূতানি গৃহ-রহিতৈস্তরুতলাশ্রয়ণাদিতি ভাবঃ প্রমোদন্তে এভিরিতি প্রমোদাস্তদ্ভূতাঃ তেষামেবা-শ্রয়দানাদামোদকরাশ্চেতি তৈঃ, বনতরুভির্বন্যবৃক্ষৈঃ, ক্রিয়মাণং চারু কর্ম্ম নিরাশ্রয়ায় আশ্রয়দানরূপং সৎ কার্য্যং যস্মিন্ তৎ তাদৃশমিদমুদ্যানম্, দুরা-ত্মনাং দুর্জ্জনানাং হৃদয়মিব, অগুপ্তমরক্ষিতমসংযতঞ্চ সর্ব্বৈরেব গম্যং যথেচ্ছব্যব-হারি চেত্যর্থঃ, তথা নবং নববিজিতং রাজ্যমিব, অনির্জিতানি অনায়ত্তীকৃতানি উপভোগ্যানি কূপারামাদিবস্তূনি ফলানি চ যস্মিন্ তৎ তাদৃশং স্থিতম্, একত্র রক্ষিহীনত্বাৎ অন্যত্র নবত্বেন তদানীমপি সুশাসনপ্রতিষ্ঠাऽভাবাদিতি ভাবঃ।

অত্রোপমাদ্বয়স্য মিথোনিরপেক্ষতয়া সংসৃষ্টিঃ। পুষ্পিতাগ্রা বৃত্তম্ ॥৪॥

(অ) শকার ইতি। আক্রোশতি মাং প্রতি গালিং দদাতি।

করিয়াছে, তাদৃশ ভিক্ষুককে প্রহার করা উচিত নহে। তা, উঁহাকে দিয়া কি হইবে। তুমি সুখবিহারযোগ্য এই উদ্যান দেখ।

এই বনে, আশ্রয়হীনের আশ্রয় দাতা ও আমোদের কারণ বন্য তরু-সমূহ সুন্দর কার্য্য করিতেছে এবং এই বন, দুরাত্মাদের হৃদয়ের মত অরক্ষিত এবং নববিজিত রাজ্যের ন্যায় ইহার ফলভোগ করা হয় নাই ॥৪॥

ভিক্ষু। আপনার শুভাগমন ত?। উপাসক প্রসন্ন হউন।

शकारः। भावे ! पेक्ख पेक्ख आक्कोशदि। (ञ)
विटः। किं ब्रवीति ?। (ट)
शकारः। उवाशके त्ति मं भणादि। किं हग्गे णाविदे ?। (ठ)
विटः। बुद्धोपासक इति भवन्तं स्तौति। (ड)
शकारः। शुणु शमनका ! शुणु। (ढ)
भिक्षुः। तुमं धग्णे, तुमं पुग्णे। (ण)

(ञ) भाव ! प्रेक्षस्व प्रेक्षस्व आक्रोशति।
(ठ) उपासक इति मां भणति। किमहं नापितः ?।
(ढ) शृणु श्रमणक ! शृणु।
(ण) त्वं धन्यः, त्वं पुण्यः।

(ट) विट इति। किं ब्रवीति किमुक्त्वा गालिं ददातीत्यर्थः।

(ठ) शकार इति। नापित एव चौरकरणेन नराणामुपासको भवति; तथाच मयि उपासकशब्दमुक्त्वा 'त्वं नापितः" इत्यमेव मां प्रति गालिं ददातीति भावः। किमहं नापितः ? कथमपि नेत्यर्थः। सुतरामिदमाक्रोशनं मिथ्यैवेत्याशयः।

(ड) विट इति। स्तौति प्रशंसति। तथा च हिंसापरित्यागादिसद्गुणशालितया बुद्धोपासना प्रशंसायोग्येति तदुपासकस्यापि प्रशंसायोग्यत्वमेवेति भिक्षोरभिप्राय इति भावः।

শকার। পণ্ডিত ! দেখুন দেখুন, গালি দিতেছে।
বিট। কি বলিতেছে ?।
শকার। আমাকে উপাসক বলিতেছে। আমি কি নাপিত ?।
বিট। তোমাকে বুদ্ধোপাসক বলিয়া স্তব করিতেছে।
শকার। শোন্ ভিক্ষু ! শোন্।

शकार.। भावे! धम्मे पुम्मे त्ति मं भणादि। किं हग्गे शलावके, कोश्टके, कोम्भकले वा?। (त)

विट:। काणेलीमात:! ननु धन्यस्त्वं पुण्यस्त्वमिति भवन्तं स्तौति। (थ)

शकार:। भावे! ता कीश एशे इध आमदे?। (द)

(त) भाव! धन्य: पुण्य इति मां भणति। किमहं श्रावक:, कोष्टक:, कुम्भकारो वा?।

(द) भाव! तत् केन एष इहागत:।

(थ) भिक्षुरिति। धन्य: प्राक्तनपुण्यवान् शुभादृष्टशालीत्यर्थ:, कथमन्यथा ईदृशसुखी सञ्जात इत्याशय:। इदं सत्यमेवाभिहितम्। पुण्य:—इह जन्मन्यपि पुण्यानुष्ठाता, सर्वदा सद्व्यवहारादिति भाव:। इदन्तु स्तुतिवादमात्रम्।

(त) शकार इति। श्रावक:— धनिभ्य: स्तुतिवादश्रावयिता बन्दीत्यर्थ:। स हि स्तुतिवादोच्चारणमात्रायासेनैव सुखेनैव जीविकानिर्वाहात् धन्य:, पुण्यवज्जनस्तावकत्वाच्च पुण्य इति भाव:। कोष्ठक: पाशकक्रीडव्यवहारी द्यूतकर इत्यर्थ:। सोऽपि च नितरामामोदलाभात् धन्य:, अन्यद्यूतकरेभ्य आमोददानाच्च पुण्य इत्याशय:। कुम्भकारोऽपि अनायासलभ्यमृत्तिकामात्रेणैव जीविकानिर्वाहात् धन्य:, दानादिपुण्यकर्मोपयोगिकुम्भादिनिर्म्माणाच्च पुण्य इत्यभिप्राय:। अन्ये तु शकारवचनत्वात् व्यर्था एवैते शब्दा इति वदन्ति।

(थ) विट इति। स्तौति ननु —प्रशंसत्येव।

ভিক্ষু। আপনি ধন্য; আপনি পুণ্যবান্।

শকার। পণ্ডিত! আমাকে ধন্য ও পুণ্যবান্ বলিতেছে। আমি কি স্তুতিপাঠক? না দ্যূতকর? না কুম্ভকার?।

বিট। ওহে কাণেলীর পুত্র!; তুমি ধন্য, তুমি পুণ্যবান্ এই কথা বলিয়া তোমার স্তব করিতেছে।

भिक्षुः। इदं चीवलं पक्खालिदुं। (ध)

शकारः। अले दुट्ठशमणका! एशे मह बहिणीपदिणा शव्वुय्याणाणं पवले पुप्फकलण्डुय्याणे दिण्णे, जहिं दाव शुणहका शिआला पाणिअं पिअन्ति। हग्गे वि पवलपुलिशे मणुश्शके ण ण्हाआमि। तहिं तुमं पुक्खलिणीए पुलाण-कुलुत्थ-जूश-शवलाइं-दुश्श-गन्धिआइं चीवलाइं पक्खालेशि। ता तुमं एक्कपहालिअं कलेमि। (न)

(ध) इदं चीवरं प्रक्षालयितुम्।

(न) अरे दुष्टश्रमणक! एतन्मम भगिनीपतिना सर्वोद्यानानां प्रवरं पुष्पकरण्डकोद्यानं दत्तम्, यस्मिन् तावत् शुनकाः शृगालाः पानीयं पिबन्ति, अहमपि प्रवरपुरुषो मनुष्यको न स्नामि। तस्यां त्वं पुष्करिण्यां पुराण-कुलुत्थ-यूष-सवर्णानि दूष्यगन्धीनि चीवराणि प्रक्षालयसि। तत् त्वामेकप्रहारिकं करोमि।

(न) शकार इति। भगिनीपतिना राज्ञा प्रवरं श्रेष्ठम्। शुनकाः कुक्कुराः। मनुष्यक इति शकारत्वादेव पुनरुक्तिः। न स्नामि 'जलं दूषितं भवेत्' इत्याशङ्कयेति भावः। पुराणः पुरातनो यः कुलुत्थः कलायशस्यविशेषः तस्य यूषवत् यूषवत् सव-र्णानि विचित्राणि धूलिधूसराणीत्यर्थः, दूष्यगन्धीनि मलतैलादिसंसक्तत्वात् दुर्ग-न्धानि। तत् तस्मात् उक्तविधचीवरप्रक्षालनेन जलस्य नितरां दूषणीयत्वात्। एकप्रहा-रिकम् एकप्रहारेणैव निहतम्।

শকার। পণ্ডিত! তা এ এখানে আসিল কেন?।

ভিক্ষু। এই কৌপীন প্রক্ষালন করিবার জন্য।

শকার। ওরে দুষ্টসন্ন্যাসী! আমার ভগিনীপতি, সমস্ত উদ্যানের মধ্যে শ্রেষ্ঠ পুষ্পকরণ্ডক নামে এই উদ্যানটী আমাকে দিয়াছেন; যেখানে কুকুর ও শৃগালগণ জলপান করিয়া থাকে, কিন্তু প্রধান

বিটঃ। কাণেলীমাতঃ! তথা তর্কয়ামি, যথা অনেন অচিরপ্রব্রজিতেন ভবিতব্যম্‌। (প)

শকারঃ। কধং ভাবে জাণাদি ?। (ফ)

বিটঃ। কিমত্র জ্ঞেয়ম্‌। পশ্য—[ব]

অদ্যাপ্যস্য[১] তথৈব কেশবিরহাদ্‌ গৌরী ললাটচ্ছবিঃ,
কালস্যাল্পতয়া চ চীবরকৃতঃ স্কন্ধে ন জাতঃ কিণঃ।
নাভ্যস্তা চ কষায়-বস্ত্র-রচনা, দূরং নিগূঢ়ান্তরো
বস্ত্রান্তশ্চ[২]পটোচ্ছ্রয়াত্‌ প্রশিথিলং স্কন্ধে ন সন্তিষ্ঠতে॥৫॥

(ফ) কথং ভাবো জানাতি ?।

(প) বিট ইতি। অচিরপ্রব্রজিতেন অত্যল্পকালং প্রব্রজ্যাশ্রমাবলম্বিনা।

(ব) বিট ইতি। কিমত্র জ্ঞেয়ং নৈপুণ্যেন জ্ঞেয়ম্‌ ? কিমপি নেত্যর্থঃ, স্পষ্টমেব তজ্‌জ্ঞায়ত ইতি ভাবঃ। তদেব দর্শয়িতুমাহ পশ্যেতি।

অদ্যেতি। কেশবিরহাত্‌ মুণ্ডনেন কেশাভাবাত্‌ পরম্‌, অস্য শ্রমণকস্য, ললাটস্য ছবিঃ কান্তিঃ, অদ্যাপি ইদানীমপি, তথৈব গৃহস্থাশ্রম ইব, গৌরী গৌরবর্ণা স্থিতা। দীর্ঘকালকেশাভাবে তু ললাটকান্তিঃ কথঞ্চিন্মলিনা ভবেদিতি ভাবঃ। কিণেতি

পুরুষ ও মনুষ্য হইয়া আমিও, ইহাতে স্নান করি না; আর তুই সেই পুষ্করিণীতেই পুরাতন কুলুত্থকলাইয়ের যূষের ন্যায় বিচিত্র (ধূলি-ধূসর) ও দুর্গন্ধ কৌপীন প্রক্ষালন করিতেছিস্‌! তা তোকে এক আঘাতেই মারিয়া ফেলিব।

বিট। কাণেলীর পুত্র! আমি ইহা মনে করি যে, এই ব্যক্তি শীঘ্রই প্রব্রজ্যা অবলম্বন করিয়াছে।

শকার। আপনি কি করিয়া জানিলেন ?।

বিট। ইহাতে অধিক কি জানিতে হইবে ?। দেখ—

---

(১) অদ্যাপ্যস্য। (২) নিগূঢ়ান্তরম্‌ বস্ত্রান্তশ্চ।

भिक्खुः। उवासआ ! एव्वं। अचिल-पव्वजिदे हग्गे। [भ]

(भ) उपासक ! एवम। अचिरप्रव्रजितोऽहम्।

चाथः कालस्य अल्पतया प्रव्रज्यावलम्बनादवधीत्यर्थः, चीवरेण स्कन्ध.दवधि धारणी येन कौपीनेन क्रतः, स्कन्धे किणः सततघर्षणचिह्नम्, न जातः। दीर्घकाल-चीवरधारणे तु स्कन्धे किणो जायेतैवेति भावः। कषायवस्त्रस्य गैरिकवसनस्य रचना निर्म्माणं गैरिकेण वसनस्य रञ्जनमित्यर्थः, नाभ्यस्ता, तादृशनैपुण्येन रञ्जनाभावा-दिति भावः। तथा दूरमत्यन्तं गुल्फपर्य्यन्तमित्यर्थः, निगूढं गुप्तमावृतम् अन्तरं स्कन्धावधिदेहमध्यभागो येन स तथोक्तः, वस्त्रान्तो वसननिर्म्मितकञ्चुकोपरिभागः, पटस्य तद्वस्त्रस्यैव उच्चयादौन्नत्यात् शरीरापेक्षया आधिक्यादित्यर्थः, प्रशिथिलं यथा स्यात्तथा सन्, स्कन्धे न सन्तिष्ठते स्खलन् पतति। दीर्घकालाभ्यासे तु ईदृशं देह-कञ्चुकयोः प्रमाणवैषम्यं न स्यादित्याशयः।

अत्राचिरप्रव्रजितत्वप्रतिपादनं प्रति बहुतरकारणोपन्यासात् समुच्चयः, तत्क्रत-विच्छित्त्या च गौरललाटच्छविप्रभृतिभिर्हेतुभिः अचिरप्रव्रजितत्वरूपसाध्यानादनुमान-मलङ्कारः। तथा वस्त्रशब्देन प्रक्रम्य पटशब्दप्रयोगाद्भग्नप्रक्रमतादोषश्च, 'तदुच्चयात्' इति पाठे तु तदभावः।

शार्दूलविक्रीडितं वृत्तम् ॥५॥

(भ) भिक्खुरिति। एवं भवदुक्तं सत्यमित्यर्थः।

কেশচ্ছেদনের পর এখনও ইহার ললাটের আকৃতি, পূর্ব্বের মতই গৌরবর্ণ রহিয়াছে; কালের অল্পতা নিবন্ধন ইহার স্কন্ধে, কৌপীন-কৃত কোন চিহ্ন হয় নাই; গৈরিক বস্ত্র নির্ম্মাণ করা ইহার অভ্যস্ত হয় নাই এবং স্কন্ধ হইতে গুল্ফ পর্য্যন্ত দেহের মধ্যভাগ আবরণকারী বস্ত্রের উপরিভাগ, অত্যন্ত বড় হওয়ায় শিথিল হইয়া স্কন্ধে থাকি-তেছে না ॥৫॥

ভিক্ষু। উপাসক! এইরূপই বটে; আমি শীঘ্রই প্রব্রজ্যা অব-লম্বন করিয়াছি।

शकारः । ता कीश तुमं जातमेत्तकज्जेव ण पव्वजिदे ?।
इति ताड़यति । (म)

भिक्षुः । णमो बुद्धश्श । [य]

विटः । किमनेन ताड़ितेन तपस्विना ?। मुच्यतां, गच्छतु । [र]

शकारः । अले चिट्ठ दाव, जाव शम्पधालेमि । (ल)

विट । केन साईम् ?।

(म) तत् केन त्वं जातमात्र एव न प्रव्रजितः ?।

(य) नमो बुद्धाय ।

(ल) अरे ! तिष्ठ तावत्, यावत् सम्प्रधारयामि ।

(म) शकार इति । जातमात्रमसारशिशुत्वेन प्रव्रज्यासम्भवात् शकारवचनतया अपार्थकं वाक्यमिदम् ।

(य) भिक्षुरिति । ताड़नेन मरणाशङ्कया इष्टदेवं बुद्धं स्मरति नमो बुद्धश्शेति । 'चतुर्थ्यर्थे षष्ठी' इति पिङ्गलसूत्रात् चतुर्थ्यर्थे षष्ठी ।

(र) विट इति । तपस्विना दीनेन । किं फलं किमपि नेत्यर्थः ।

(ल) शकार इति । सम्प्रधारयामि अस्य गमनविषये आलोच्य निर्द्धारयामि ।

শকার। তা কেন তুই জাতমাত্রই প্রব্রজ্যা অবলম্বন করিলি না ?। (এই বলিয়া প্রহার করিতে লাগিল)

ভিক্ষু। বুদ্ধকে নমস্কার।

বিট। এই ক্ষুদ্র লোককে তাড়ন করিয়া কি হইবে ? ছাড়িয়া দাও চলিয়া যাউক।

শকার। ওরে ! আলোচনা করিয়া আমি যে পর্য্যন্ত একটা নির্দ্ধারণ করি সে পর্য্যন্ত থাক।

शकारः । अत्तणो हडक्केण । (व)

विटः । हन्त ! न गतः । [श]

शकारः । पुत्तका ! हडक्का ! भट्टके ! पुत्तके ! एशे शमणके अवि णाम किं गच्छदु, किं चिट्ठदु ? । स्वगतम् । णावि गच्छदु णावि चिट्ठदु । प्रकाशम् । भावे ! शम्मधालिदं मए हडक्केण शह । एशे मइ हडक्के भणादि । [ष]

विटः । किं ब्रवीति ? ।

(व) आत्मनो हृदयेन ।

(ष) पुत्रक ! हृदय ! भट्टारक ! पुत्रक ! एष श्रमणक : अपि नाम किं गच्छतु ? । नापि गच्छतु, नापि तिष्ठतु । भाव ! सम्प्रधारितं मया हृदयेन सह । एतन्मम हृदयं भणति ।

(व) शकार इति । आत्मनो हृदयेन सह आलोच्य सम्प्रधारयामीत्यर्थः ।

(श) विट इति । हन्त खेदे । न गत इतो न प्रस्थितः, भिक्षुरिति शेषः । अयमितः परं नितरामेव प्रहारं प्राप्स्यतीत्येव दुःखमिति भावः ।

(ष) शकार इति । भट्टारकः ! राजन् ! अपार्थं सम्बोधनमिदम् पुत्रकेति सम्बोधनद्वयं पुनरुक्तमपार्थञ्च शकारवचनत्वात् । तत्प्रमाणमुक्तम् प्राक् । नापीत्यादापि अपार्थमेव ।

বিট । কাহার সহিত আলোচনা করিয়া ? ।

শকার । নিজের হৃদয়ের সহিত ।

বিট । হায় ! গেল না ।

শকার । পুত্র ! হৃদয় ! প্রভো ! পুত্র ! এই ভিক্ষু যাইবে ? না থাকিবে ? । (স্বগত) যাইবেও না , থাকিবেও না । (প্রকাশ্যে) পণ্ডিত ! আমি হৃদয়ের সহিত আলোচনা করিয়াছি । আমার হৃদয় ইহা বলিতেছে—

শকারঃ। মাবি গচ্ছদু, মাবি চিট্ঠদু, মাবি উশ্শশদু, মাবি ণীশশদু। ইধ জ্জেব ঝত্তি পড়িঅ মলেদু। [ম]

ভিক্ষুঃ। ণমো বুদ্ধস্স। শলণাগদম্হি। [ছ]

বিটঃ। গচ্ছতু।

শকারঃ। ণং শমএণ। [ঘ]

বিটঃ। কীদৃশঃ সময়ঃ?। [ক]

(ম) মাপি গচ্ছতু মাপি তিষ্ঠতু, মাপি উচ্ছ্বসিতু মাপি নিশ্বসিতু। ইহৈব ঝটিতি পতিত্বা ম্রিয়তাম্।

(ছ) নমো বুদ্ধায়। শরণাগতোঽস্মি।

(ঘ) ননু সময়েন।

(ম) শকার ইতি। অত্র সর্ব্বং বাক্যমপার্থম্ উচ্ছ্বসিতু বাহ্যং বায়ুমাকর্ষতু, নিশ্বসিতু কৌষ্ঠং বায়ুং নিঃসারয়তু।

(ঘ) শকার ইতি। নন্বিত্যবধারণে, সময়েন শপথেন একেন শপথেনৈব গচ্ছত্বিত্যর্থঃ।

(ক) বিট ইতি। সময়ঃ শপথঃ।

বিট। কি বলিতেছে?।

শকার। যাইবেও না, থাকিবেও না, প্রশ্বাসও করিবে না, নিশ্বাসও করিবে না; এইখানেই হঠাৎ পড়িয়া মরিয়া যাউক।

ভিক্ষু। বুদ্ধকে নমস্কার। আমি আপনার শরণাগত হইয়াছি।

বিট। যাউক?।

শকার। একটি শপথ করিয়া।

शकारः। तधा कद्दमं फेलदु, जधा पाणिअं पङ्काइलं ण होदि। अधवा पाणिअं पुञ्जीकदुअ कद्दमे फेलदु। (ख)

विटः। अहो मूर्खता?।

विपर्य्यस्तमनश्चेष्टैः शिला-शकल-वर्ष्मभिः।
मांसवृक्षैरियं मूर्खैर्भाराक्रान्ता वसुन्धरा॥६॥

(ख) तथा कर्द्दमं क्षिपतु, यथा पानीयं पङ्काविलं न भवति। अथवा पानीयं पुञ्जीकृत्य कर्द्दमे क्षिपतु।

(ख) शकार इति। पङ्काविलं कर्द्दमाक्तम्। कर्द्दमक्षेपे जलस्य कर्द्दमाक्तत्व-मवश्यम्भवति। विप्रकीर्णानामेव द्रव्याणां राशीकरणं, पुञ्जीकरणम्, तच्च जलस्य कदापि न सम्भवति चिरसंहतत्वात्। तेनेदं वाक्यद्वयमेव अपार्थम्।

विपर्य्यस्तेति। विपर्य्यस्ता विपरीता मनश्चेष्टा वृत्तिर्येषां तैः, शिलाशकलवत् प्रस्तरखण्डवत् वर्ष्म शरीरं येषां तैः सुदृढ़देहैरित्यर्थः, मांसे मांसफलोत्पादने तत्र वृक्षरूपास्तैः पुष्टिकरपानभोजनाभ्यां केवलदेहमांसवृद्धिकारिभिरिति तात्-पर्य्यम्, मूर्खैरीदृशशकारतुल्यैर्जनैः, इयं वसुन्धरा पृथिवी, भाराक्रान्ता जाता, न पुनरन्यः कश्चिदुपकार इति भावः।

বিট। কি রকম শপথ?।

শকার। সেই ভাবে কর্দ্দম নিক্ষেপ করুক, যাহাতে জল পঙ্কিল না হয়। অথবা জল স্তূপীকৃত করিয়া কর্দ্দমে নিক্ষেপ করুক।

বিট। কি অদ্ভুত মূর্খতা!।

যাহাদের মনের বৃত্তি বিপরীত এবং পাষাণের ন্যায় সুদৃঢ় শরীর, কেবল মাংসের বৃক্ষ সেই সকল মূর্খ দ্বারা, এই পৃথিবী ভারাক্রান্তা হইয়াছেন॥৬॥

भिक्षुः । नाट्येन आक्रोशति । (ग)

शकारः । किं भणादि ? (घ)

विटः । स्तौति भवन्तम् । (ङ)

शकारः । शुण शुण पुणोवि शुण । (च)

तथा कृत्वा निष्क्रान्तो भिक्षुः । (छ)

विटः । काणेलीमातः ! पश्योद्यानस्य शोभाम् । (ज)

(घ) किं भणति ? ।

(च) शृणु शृणु पुनरपि शृणु ।

अत्र द्वितीयपादे लुप्तोपमा, तृतीये निरङ्गं केवलरूपकम्, अप्रस्तुतमूर्खसामान्यात् प्रस्तुतमूर्खविशेषशकारप्रतीतेरप्रस्तुतप्रशंसा चेत्येतेषामङ्गाङ्गिभावेन सङ्करः । तथा अपवादो नाम विमर्शाङ्गमेतदङ्गम्—'दोषप्रख्यापवादः स्यात्" इति दर्पणलक्षणात् ॥६॥

(ग) भिक्षुरिति । नाट्येन कराङ्गुष्ठप्रदर्शनरूपया भङ्ग्या ।

(ङ) विट इति । स्तौति देवभोज्यकदलीमुद्राप्रदर्शनेन प्रशंसति ।

(छ) तथेति । तथा कृत्वा जले कियन्तं कर्द्दमं निक्षिप्येत्यर्थः, "मा शमएश" इत्यभिधानात् "तधा कद्दमं फेलदु" इत्यभिधानाच्चेति भावः ।

(ज) विट इति । भिक्षुणा जले कर्द्दमे निक्षिप्ते यावत् शकारः 'जलं पङ्काविलं जातं न वा" इति परीक्षितुमुद्युङ्क्ते तावदेव तन्नयनं पदार्थान्तरे नेतुमाह पश्येति ।

ভিক্ষু। (অঙ্গুষ্ঠ দেখাইয়া আক্রোশ করিল)

শকার। কি বলিতেছ ? ।

বিট। তোমার স্তব করিতেছে।

শকার। শোন্ শোন্ আবার শোন্।

ভিক্ষু সেইরূপ করিয়া (জলে কিছু কাদা ফেলিয়া) চলিয়া গেল।

বিট। কাণেলীর পুত্র! উদ্যানের শোভা দেখ।

अमी हि वृक्षाः फल-पुष्प-शोभिताः
कठोर-निष्पन्द-लतोपवेष्टिताः ।
नृपाज्ञया रक्षिजनेन पालिताः
नराः सदारा इव यान्ति निर्वृतिम् ॥७॥

शकारः । शुट्ठु भावे भणादि । (क)

बहु-कुशुम-विचित्तिदा अ भूमी
कुशुम-भलेण विणामिदा अ लुक्खा ।

(क) सुष्ठु भावो भणति ।

अमी इति । हि तथाहि । नृपस्य आज्ञया, रक्षिजनेन उद्यानपालकेन नगरपालकेन च पालिता रक्षिताः, फलपुष्पशोभिताः, कठोराभिः निष्पन्दाभिर्वायोरभावात् निश्चलाभिः लताभिः उपवेष्टिता आवृता आलिङ्गिताश्च, अमी वृक्षाः, सदाराः सभार्य्याः नरा इव, निर्वृतिं सुखम्, यान्ति प्राप्नुवन्ति । अत्र श्रौतोपमा, लता-वृक्षयोर्लिङ्गसाम्येन नायिकानायकव्यवहारसमारोपात् समासोक्तिश्च अनयोरङ्गाङ्गि-भावेन सङ्करः । वंशस्थविलं वृत्तम् ॥७॥

विटवचनमेव समर्थयन्नाह बह्विति । भूमिश्च अधः स्थितं भूतलञ्च, बहुभिः कुसुमैः स्वयमेव पतितैः पुष्पैः विचित्रिता विचित्रीकृता ; वृक्षाश्च कुसुमभरेण विनामिता अवनतीकृताः ; द्रुमशिखरस्य वृक्षाग्रस्य लता च, लम्बमाना अधोलम्बिता सती स्थिता ; तथा वानराः, पनसफलानीव कर्कटीफलानीव, ललन्ति अधो-

---

ফল-পুষ্প-শোভিত, পরিণত ও নিশ্চল লতাসমূহে পরিবেষ্টিত এবং রাজার আদেশে রক্ষিগণকর্তৃক রক্ষিত এই সকল বৃক্ষ, ভার্য্যাসমন্বিত মনুষ্যগণের ন্যায় নির্বৃতি লাভ করিতেছে ॥৭॥

শকার। পণ্ডিত ভাল বলিয়াছেন।

এই ভূতল, বহুতর পুষ্পে বিচিত্র হইয়াছে; পুষ্পের ভার, বৃক্ষ-

दुम-शिहल-लदा श्र लम्बमाणा
पणश-फला विश्र वाणला ललन्ति ॥८॥

विटः । काणेलीमातः ! इदं शिलातलमध्यास्यताम् । (ञ)

शकारः । एशे म्हि आशिदे । इति विटेन सह उपविशति । भावे! अज्जवि तं वसन्तशेणिअं शुमलामि ; दुज्जण-वश्रणं विश्र हडक्कादो ण ओशलदि । (ट)

(८) वसुकुसुमविचित्रिता च भूमिः कुसुमभरेण विनामिताश्च वृक्षाः ।

द्रुम-शिखर-लता च लम्बमाना, पनस-फलानीव वानरा ललन्ति ॥

(ट) एषोऽस्मि आसितः । भाव ! अद्यापि तां वसन्तसेनां स्मरामि, दुर्जनवचनमिव हृदयान्नापसरति ।

लम्बन्ते, वानराणां पनसफलसमानवर्णत्वात् शाखावलम्बनपूर्वकलम्बनकाले पनसफलवत् किञ्चिद्दीर्घगोलत्वाच्चेति भावः ।

अत्र उद्यानशोभां प्रति बहुतरकारणोपन्यासात् समुच्चयः श्रौती उपमा च अनयोरङ्गाङ्गित्वेन सङ्करः ।

विनामिता इति । प्राङ्निरुपगेस्य इनन्तनमधातोः "ज्वलह्वलह्मलनमोऽनुपसर्गा वा" इति पत्रे मानुबन्धत्वाभावात् ह्रस्वाभावः पश्चाच्च वेरुपसर्गस्य योगः । अन्यथा "सोपसर्गास्तु नित्यं मानुबन्धाः" इत्युक्तेर्नित्यह्रस्वत्वप्रसङ्ग इति दिक् ।

पुष्पिताग्रा वृत्तम् ॥८॥

(ञ) विट इति । "आधारोऽधिशीङ्स्थासां भौव्ये" इति शिलातलमित्यस्य कर्म्मत्वम् ।

সকলকে অবনত করিয়াছে ; গাছের আগায় লতা ঝুলিতেছে এবং বানরগুলিও কাঁঠালের মত ঝুলিতেছে ॥৮॥

বিট । কাণেলীর পুত্র ! এই পাথরের উপরে উপবেশন কর ।

विटः। स्वगतम्। तथा निरस्तोऽपि स्मरति ताम्। अथवा (ठ)

स्त्रीभिर्विमानितानां, कापुरुषाणां विवर्द्धते मदनः।
सत्पुरुषस्य स एव तु, भवति मृदुर्नैव वा भवति ॥८॥

(ट) शकार इति। आसित उपविष्टः। दुर्जनस्य वचनं कटुवाक्यम् नापसरति वसन्तसेनेति शेषः।

(ठ) विट इति। तथा तेन प्रकारेण अवज्ञयेत्यर्थः, निरस्तोऽपि वसन्तसेनया प्रत्याख्यातोऽपि।

स्त्रीभिरिति। स्त्रीभिः विमानितानां स्वरतिप्रार्थनायामपमानितानां कापुरुषाणाम् मदनः कामावेगो विवर्द्धते; तु किन्तु, सत्पुरुषस्य स्त्रीभिर्विमानितस्यैवेत्यर्थः, स एव मदनः, मृदुः पूर्वापेक्षया कोमलः न्यून इत्यर्थः भवति, अपमानेन खर्व्वीकरणा-दिति भावः; नैव वा भवति स एव मदनो नैव वा पुनरुत्पद्यते, नैराश्येन तद्वीजनाशात् अपमानक्षोभाच्चेति भावः।

अत्राप्रस्तुतकापुरुषसामान्याभिधानात् प्रस्तुतशकाररूपकापुरुषविशेषप्रतीतेरप्रस्तुत-प्रशंसालङ्कारः। आर्य्या जातिः ॥८॥

শকার। এই উপবিষ্ট হইলাম। (এই বলিয়া বিটের সহিত উপবেশন করিল) পণ্ডিত! আজিও, সেই বসন্তসেনাকে স্মরণ করি; দুর্জনের বাক্যের মত সে, মন হইতে যাইতেছে না।

বিট। (স্বগত) সেই ভাবে প্রত্যাখ্যাত হইয়াও, তাহাকে স্মরণ করিতেছে। অথবা—

স্ত্রীলোককর্তৃক অপমানিত কাপুরুষগণের কামবেগ বৃদ্ধি পায়; কিন্তু তৎকর্তৃকই অপমানিত সৎপুরুষগণের সেই কামবেগই কোমল হইয়া যায় কিম্বা একেবারেই উৎপন্ন হয় না ॥৮॥

शकारः । भावे ! कावि वेला थावडकचेडश्श भणिदश्श 'पवहणं गेण्हिअ लहुं लहुं आअच्छे त्ति"। अज्ज वि ण आअच्छदि त्ति, चिलम्हि वुभुक्खिदे । मज्झण्हे ण शक्कीअदि पादेहिं गन्तुं । ता पेक्ख पेक्ख । (ङ)

णहोमज्झगदे शूले, दुप्पेक्खे कुविद-वाणल-शलिच्छे ।
भूमी दढ़-शन्तत्ता, हद-पुत्त-शते व्व गन्धाली ॥१०॥

(ङ) भाव ! कापि वेला स्थावरकचेटस्य भणितस्य प्रवहणं गृहीत्वा लघु लघु आगच्छेति' । अद्यापि नागच्छतीति चिरमस्मि बुभुक्षितः

(१०) नभोमध्यगतः सूरः दुष्प्रेक्ष्यः कुपितवानरसदृक्षः ।
भूमिर्दृढ़सन्तप्ता हतपुत्रशतेव गान्धारी ॥

(ङ) शकार इति । प्रवहणं गोशकटं गृहीत्वा, लघु लघु शीघ्रं शीघ्रम्, आगच्छ ' इति भणितस्य उक्तस्य आदिष्टस्य , स्थावरको नाम चेटः स्वभृत्यस्तस्य , कापि दीर्घा वेला समयः, अतीतेति शेषः । चिरं बहुकालं यावत् बुभुक्षितः क्षुधार्त्तः । अथ पादाभ्यामेव गृहं गत्वा भुज्यतामित्याह मध्याह्न इति ।

ननु पादाभ्यां कथं गन्तुं न शक्यत इत्याह नभ इति । नभस आकाशस्य मध्यगतः

শকার। পণ্ডিত! ভৃত্য স্থাবরককে আমি বলিয়াছিলাম—'গাড়ী নিয়া শীগ্গির শীগ্গির আয়'। তথাপি তাহার অনেক সময় গেল, এখনও আসিতেছে না। আমি বহু সময় হইতেই ক্ষুধার্ত্ত হইয়াছি। এদিকে এই মধ্যাহ্নকালে পাদযুগল দ্বারা যাইতে পারিতেছি না। তা, দেখুন দেখুন—

আকাশের মধ্যবর্ত্তী সূর্য্য, কুপিত বানরের ন্যায় দুর্দ্দর্শনীয় হইয়াছে এবং ভূমি, হতপুত্রশতা গান্ধারীর ন্যায় অত্যন্ত সন্তপ্ত হইয়াছে ॥১০॥

विटः। एवमेतत्।

छायासु प्रतिमुक्तशष्पकवलं निद्रायते गोकुलं,
तृष्णार्त्तैश्च निपीयते वनमृगैरुष्णं पयः सारसम्।
सन्तापादतिशङ्कितैर्न नगरीमार्गो नरैः सेव्यते,
तप्तां भूमिमपास्य च प्रवहणं मन्ये क्वचित् संस्थितम् ॥११॥

सूरः सूर्य्यः, कुपितवानरस्य सदृक्चक्षुस्तुल्यः, दुर्प्रेक्ष्यः कष्टेन द्रष्टव्यः, एकत्र नितान्त-तीव्रत्वात् अन्यत्र कुपितत्वेन दन्ताघातादिभयादिति भावः। तथा हतं कुरुक्षेत्रयुद्धे भीमेन विनाशितं पुत्राणां दुर्य्योधनादीनां शतं यस्याः सा तादृशी गान्धारी धृतराष्ट्र-भार्य्येव, भूमिः दृढ़सन्तप्ता; एकत्र शोकेन अन्यत्र आतपतापेनेति भावः।

अत्र पूर्व्वार्द्धे श्रौती पूर्णोपमा, परार्द्धे तु श्रौती पूर्णोपमा, अनयोश्च मिथोनिरपेक्ष-तया संसृष्टिः। पूर्व्वार्द्धे सूर्य्यापेक्षया वानरस्य जात्या न्यूनत्वेऽपि नानौचित्यदोषः, शकारवचनत्वात्।

'शुलि' इत्यकारस्य पक्षे ऋखलाङ्गीकारादार्य्या जातिः ॥१०॥

छायास्विति। गोकुलं गोसमूहः, छायासु अनातपस्थानेषु, प्रतिमुक्तो निद्रा-प्रभावादेव परित्यक्तः शष्पकवलो घासग्रासो यस्मिन् कर्म्मणि तद्यथा तथा निद्रायते। तृष्णार्त्तैः वनमृगैर्व्वन्यपशुभिः, उष्णमेव, सरसः सरोवरस्येदमिति सारसं पयो जलम्, निपीयते। सन्तापादातपतापात् अतिशङ्कितैरत्यन्तभीतैः, नरैर्जनैः, नगर्य्या मार्गः पन्थाः, न सेव्यते न गम्यते। अतएव च प्रवहणं तव गोशकटम्, तप्तां भूमिम्, अपास्य परित्यज्य, क्वचित् छायास्थाने, संस्थितमवस्थितमिति मन्ये।

বিট। ইহা এইরূপই বটে।

গরুগণ ঘাসের গ্রাস পরিত্যাগ করিয়া ছায়াতে নিদ্রা যাইতেছে; বন্য পশুগণ পিপাসার্ত্ত হইয়া, সরোবরের উষ্ণ জল পান করিতেছে; মনুষ্যগণ রৌদ্রের ভয়ে অত্যন্ত ভীত হইয়া নগরের পথে গমনাগমন করিতেছে না। সুতরাং আমি মনে করি,— তোমার গাড়ীখানা,

शकारः। भावे!

शिलशि मम णिलीणे भाव! शुज्जस्स पादे,
शउणि-खग-विहङ्गा लुक्ख-शाहासु लीणा।
णल-पुलिश-मणुश्शा उण्हदीहं शशन्ता
घल-शलण-णिशण्णा आदवं णिव्वहन्ति ॥१२॥

---

(१२) भाव!

शिरसि मम निलीनो भाव! सूर्य्यस्य पादः,
शकुनि-खग-विहङ्गा वृक्षशाखासु लीनाः।
नर-पुरुष-मनुष्या उष्णदीर्घं श्वसन्तो
गृह-शरण-निषण्णा आतपं निर्वहन्ति ॥

अत्र समयस्य नितान्ततापाकुलत्वप्रतिपादनकार्य्यं प्रति बहुतरकारणोपन्यासात् समुच्चयः तत्कृतविच्छित्त्या च प्रवहणस्य क्वचिदवस्थानरूपसाध्यस्य तापातिरेकसाधनेन ज्ञानादनुमानालङ्कारः। तथा प्रथमे पादे कर्त्तरि द्वितीययोश्च कर्म्मणि प्रत्ययात् प्रत्ययविषयो भग्नप्रक्रमतादोषः, स तु 'निद्राय्यते गोकुलैः' इति पाठेन समाधेयः।

शार्द्दूलविक्रीडितं वृत्तम् ॥११॥

शिरसीति। हे भाव! विद्वन्! मम शिरसि सूर्य्यस्य पादः किरणः, निलीनः पतितः; शकुनि-खग-विहङ्गाः पक्षिण इत्यर्थः वृक्षशाखासु लीनाः प्रच्छन्नाः स्थिताः स्म तपतापभयादिति भावः। नर-पुरुष-मनुष्या मानुषा इति तात्पर्य्यम्, गृहं शरणमपि

সন্তপ্ত স্থান পরিত্যাগ করিয়া, কোথাও (ছায়াতে) অবস্থান করিতেছে ॥ ১১॥

শকার। পণ্ডিত! সূর্য্যের কিরণ, আমার মস্তকে পতিত হইতেছে; পক্ষিগণ বৃক্ষের শাখায় প্রচ্ছন্নভাবে অবস্থান করিতেছে, মনুষ্যগণ, উষ্ণ ও দীর্ঘ নিশ্বাস ত্যাগ করতঃ গৃহের ভিতরে বসিয়া রৌদ্র অতিবাহিত করিতেছে ॥১২॥

भावे! अज्ज वि शे चेड़े णाअच्छदि। अत्तणो विणो दणणिमित्तं किंपि गाइश्शं। इति गायति। भावे! भावे! शुदं तुए! जं मए गाइदं। (ढ)

विटः। किमुच्यते? गन्धर्वो भवान्। (ण)

शकारः। कधं गन्धव्वे ण भविश्शं?। (त)

हिङ्गुज्जले जीलका-भद्दमुत्थे
वचाह गण्ठी शगुड़ा अ शुण्ठी।

(ढ) भाव! अद्यापि स चेटी नागच्छति। आत्मनो विनोदननिमित्तं किमपि गास्यामि। भाव! श्रुतं त्वया?। यन्मया गीतम्।

(त) कथं गन्धर्वो न भविष्यामि?।

न तूभीव तत्र निषण्णाः स्थिताः, उष्णञ्च तत् दीर्घं चेति उष्णदीर्घं यथा स्यात्तथा श्वसन्तः श्वासं त्यजन्तश्च सन्तः, आतपं सूर्य्यतापम्, निर्व्वहन्ति अतिक्रामन्ति।

अत्र शकुनिखगविहङ्गा इति नरपुरुषमनुष्या इति ग़ृहशरणेति च पर्य्यायशब्दानां प्रयोगः शकारवचनस्य पौनरुक्त्याङ्गीकारान्न दोषावहः।

मालिनी वृत्तम् ॥१२॥

(ण) विट इति। किमुच्यते अधिकमिति शेषः, गन्धर्वो गन्धर्वस्वरूपपरमसुस्वरत्वादिति भावः। सोल्लुण्ठनोक्तिरियम्।

পণ্ডিত! এখনও সে চেটী আসিল না। সুতরাং আত্মবিনোদনের জন্য আমি কিছু গাই। (এই বলিয়া গাইতে লাগিল) পণ্ডিত! পণ্ডিত! আপনি শুনিলেন? আমি যাহা গাইলাম।

বিট। অধিক কি বলিব! তুমি একেবারে গন্ধর্ব।

শকার। আমি গন্ধর্ব্ব হইব না কেন?।

एशे मए शेविद गन्धजुत्ती
कधं ण हग्गे मधुल-श्शलेत्ति ॥१३॥

भावे! पुणोवि दाव गाइश्शं । तथा करोति । भावे! भावे! शुदं तुए? । जं मए गाइदं । (ख)

विटः । किमुच्यते? गन्धर्वो भवान् । (द)

हिङ्गूज्ज्वला जीरक-भद्रमुस्ता वचाया ग्रन्थिः सगुड़ा च शुण्ठी ।
एषा मया सेविता गन्धयुक्तिः कथं नाहं मधुरस्वर इति ॥

भाव! पुनरपि तावत् गास्यामि । भाव! भाव! श्रुतं त्वया? अन्मया गीतम् ।

हिङ्गूज्ज्वलेति । हिङ्गुभिङ्गदाख्यद्रव्यविशेषैः उज्ज्वला संयुक्तनया शोभिता, जीरकयुक्ता भद्रमुस्ता औषधिविशेषः जीरकभद्रमुस्ता, वचायास्तदाख्यद्रव्यस्य, ग्रन्थिः पर्वभागः गुड़ेन सहेति सगुड़ा शुण्ठो स्वनामख्यातो द्रव्यविशेषः,एषा एतत्समष्टिमिश्रिता, गन्धयुक्तिर्गन्धयोगः सुगन्धौषधमिति यावत्, मया सेविता भक्षिता ; सुतरां कथं नाहं मधुरस्वरो भवेयमिति शेषः ।

उक्तद्रव्याणां योगे सुगन्धिता गीतपद्यते न वा तत्सेवने कण्ठस्वरोऽपि मधुरो जायत इति शकारवचनत्वादपार्थमिदं सर्व्वम् । उपजातिर्वृत्तम् ॥१३॥

(द) विट इति । इदन्तु पूर्वतः प्रकारान्तरेणाभिहितं सत् चमत्कारातिशयं पुष्णाति ।

হিন্দু:শোভিত জীরক ও ভদ্রমুস্তা ,বচের পর্বভাগ এবং গুড়ের সহিত শুণ্ঠী, এই সকল গন্ধযোগ ঔষধ আমি সেবন করিয়াছি; সুতরাং মধুরস্বর না হইব কেন ॥১৩॥

পণ্ডিত! আবারও গাইব। (তাহাই করিল) পণ্ডিত! পণ্ডিত! আপনি শুনিলেন? আমি যাহা গাইলাম।

বিট। অধিক কি বলিব! তুমি সাক্ষাৎ গন্ধর্ব।

शकारः । कधं गन्धव्वे ण भवामि ? । (ध)

हिङ्गुज्जले दिम्म-मरीच-चुम्मे
वग्घालिदे(१) तेल्ल-घिएण मिश्शे ।
भुत्ते मए पालहुदीअ-मंशे
कधं ण हग्गे मधुलश्शले त्ति ॥ १४ ॥

भावे ! अज्जवि चेड़े णाग्रच्छदि । (न)

विटः । स्वस्थो भवतु भवान्, सम्प्रत्येव आगमिष्यति ।(प)

(ध) कथं गन्धर्वो न भवामि ? ।

(१४) हिङ्गूज्ज्वलं दत्तमरीचचूर्णं व्याघारितं तैलघृतेन मिश्रम् ।
भुक्तं मया परभृतीयमांसं कथं नाहं मधुरस्वर इति ॥

(न) भाव ! अद्यापि चेटो नागच्छति ।

हिङ्गूज्ज्वलमिति । हिङ्गुभिरुज्ज्वलं संयोगेन शोभितम्, दत्तं प्रक्षिप्तं मरीचचूर्णं यस्मिन् तत्, व्याघारितं दर्व्यादिना संघट्टितम्, तैलयुक्तं घृतं तैलघृतं तेन मिश्रं युक्तम्, परभृतीयं कोकिलसम्बन्धि मांसं, मया भुक्तम्; अतः कथं नाहं मधुरस्वरो भवेयमिति शेषः, परमसुस्वरकोकिलमांसभक्षणेन परमसुस्वरत्वस्यावश्यम्भावादिति भावः ।

इदमपि पूर्ववदेवार्थं बोध्यम् । उपजातिर्वृत्तम् ॥१४॥

(प) विट इति । स्वस्थः प्रकृतिस्थः ।

শকার। কেন গন্ধর্ব্ব না হইব ?।

হিঙ্গুশোভিত, মরীচচূর্ণসংযুক্ত এবং তৈল ও ঘৃত মিশ্রিত করিয়া আলোড়িত কোকিলের মাংস আমি খাইয়াছি; সুতরাং আমি মধুরস্বর না হইব কেন ? ॥১৪॥

পণ্ডিত ! এখনও ভৃত্য আসিতেছে না।

(१) वग्घालिदे ।

ततः प्रविशति प्रवहणादिरूढ़ा वसन्तसेना चेटश्च ।

चेटः । भीदे क्खु ह्मगे । मज्झण्णिके शुज्जे । मा दाणिं कुविदे लाअशाल-शण्ठाणे हुविश्शदि । ता तुलिदं वह्नामि । जाध गोणा ! जाध । (फ)

वस । हद्धी ! हद्धी ! ण क्खु वड्ढमाणअस्स अअं सरसंजोओ, किं ण्णेदं ? । किं ण्ण क्खु, अज्जचारुदत्तेण वाहणपरिस्समं परिहरन्तेण अण्णो मणुस्सो अस्सं पवहणं पेसिदं

(फ) भीतः खल्वहम् । माध्याह्निकः सूर्य्यः । मा इदानीं कुपितो राष्ट्रियश्यालसंस्थानो भविष्यति । तत् त्वरितं वहामि । यातम्, गावौ यातम् ।

(ब) हा धिक् ! हा धिक् न खलु वर्द्धमानकस्यायं स्वरसंयोगः । किन्नु इदम् ? किं खलु आर्य्यचारुदत्तेन वाहनपरिश्रमं परिहरता

(प) चेट इति । माध्याह्निको मध्याह्नसंसृष्टः सूर्य्यः, अतः पदाभ्यां गन्तुमशक्ततया मद्विलम्बेन च कोपसम्भव इति भावः ।

(फ) चेट इति । वर्द्धमानकस्य परिचितस्य तदाख्यचारुदत्तभृत्यस्य, अयं स्वरसंयोगः कण्ठ कण्ठध्वनिसम्बन्धो न खलु ; विभिन्नप्रकारत्वादिति भावः । वाहने शकटसञ्चालने परिश्रमो वर्द्धमानकस्यायामस्तम्, परिहरता परिहर्त्तुमिच्छतेत्यर्थः, पुनरपि

বিট । তুমি সুস্থ হও ; এখনই আসিবে ।

তাহার পর গাড়ীতে উঠিয়া বসন্তসেনা ও ভৃত্যের প্রবেশ ।

ভৃত্য । আমি ভীত হইয়া পড়িয়াছি । মধ্যাহ্নের সূর্য্য । তা, রাজার শালা সংস্থান, ক্রুদ্ধ না হ'ন ; এই জন্য আমি তাড়াতাড়ি যাই । যা গরু যা ।

भविस्सदि ?। फुरदि दाहिणं लोअणं वेवदि मे हिअअं, सुस्साओ दिसाओ, सव्वं ज्जेव विसंठुलं पेक्खामि। (ब)

शकारः। नेमिघोषमाकर्ण्य। भावे! भावे? आगदे पवहणे। (भ)

विटः। कथं जानासि ?।

शकारः। किं ण पेक्खदि भावे? वुड्ढशूअले विअ घुलघुलाअमाणं लक्खीअदि। [म]

अन्यो मनुष्योऽन्यत् प्रवहणं प्रेषितं भविष्यति ?। स्फुरति दक्षिणं लोचनम्, वेपते मे हृदयम्, शून्या दिशः, सर्वमेव विसंष्ठुलं पश्यामि।

(भ) भाव! भाव! आगतं प्रवहणम्।

(म) किं न प्रेक्षते भावः? वृद्धशूकर इव घुरघुरायमाणं लक्ष्यते।

वर्द्धमानकस्यैव प्रेरणे तस्य महान् परिश्रमो भवेदिति विविच्यार्थः। स्त्रीणां दक्षिणाक्षिस्पन्दनं विपत्सूचकम्। विसंष्ठुलं प्रतिकूलम्।

(भ) शकार इति। नेमिघोषं घूर्णमानचक्रप्रान्तशब्दम्।

বসন্তসেনা। হায়! হায়! এই স্বরসংযোগ ত বর্দ্ধমানের নহে! এ ঘটনাটা কি ?। তবে কি আর্য্য চারুদত্ত, যাতায়াতের পরিশ্রম না হইবার জন্য, অন্য মানুষ এবং অন্য গাড়ী পাঠাইয়াছেন?। আমার দক্ষিণ চক্ষু স্পন্দিত হইতেছে, হৃদয় কাঁপিতেছে এবং দিক্ সকল শূন্য বলিয়া বোধ হইতেছে; এইরূপ সকলই প্রতিকূল দেখিতেছি।

শকার। (চক্রপ্রান্তের শব্দ শুনিয়া) পণ্ডিত! পণ্ডিত! গাড়ী আসিয়াছে।

বিট:। হন্ত। সাধু লক্ষিতম্। অয়মাগত:।

শকার:। পুত্তকা! থাবলকা! চেড়া! আগদে শি ?। [য]

চেট:। অধই। [র]

শকার:। পবহণে বি আগদে ?। [ল]

চেট:। অধই। [ব]

শকার:। গোণা বি আগদে ?। [শ]

(য) পুত্রক! স্থাবরক! চেট! আগতোঽসি ?।

(র) অথকিম্।

(ল) প্রবহণমপ্যাগতম্ ?।

(ব) অথকিম্।

(শ) গাবাবপি আগতৌ ?।

(স) শকার ইতি। ঘুরঘুরায়মাণং 'ঘুর ঘুর' ইত্যেবমব্যক্তং শব্দং কুর্বাণম্, প্রবহণমিতি শেষ:, পথি ঘূর্ণমানচক্রঘর্ষণাদিতি ভাব:। বৃদ্ধশূকরোঽপি মৃত্তিকা-বিলিখনকালে 'ঘুর ঘুর' ইত্যেবং শব্দং করোতীতি দ্রষ্টব্যম্।

বিট। কি করিয়া জানিলে ?।

শকার। পণ্ডিত! আপনি কি দেখিতেছেন না ? বৃদ্ধ শূকরের ন্যায় 'ঘুর ঘুর' করিতেছে বলিয়া লক্ষ্য হইতেছে।

বিট। (দেখিয়া) ভাল লক্ষ্য করিয়াছ। এই আসিয়াছে।

শকার। পুত্র! স্থাবরক! ভৃত্য! আসিয়াছিস্ ?।

ভৃত্য। হাঁ।

শকার। গাড়ীও আসিয়াছে ?।

ভৃত্য। হাঁ।

চেটঃ। অধইঁ। [ষ]

শকারঃ। তুমং পি আগদে?। [স]

চেটঃ। সহাসম্। ভট্টকে! অহং পি আগদে। [হ]

শকারঃ। তা পবেসেহি পবহণং। [ক্ষ]

চেটঃ। কদলেণ মগ্গেণ?। [ক]

শকারঃ। এদেণ জ্জেব পাআলখণ্ডেণ। [খ]

(ষ) অথ কিম্।

(স) ত্বমপি আগতঃ?।

(হ) ভট্টারক! অহমপ্যাগতঃ!

(ক্ষ) তৎ প্রবেশয় প্রবহণম্।

(ক) কতরেণ মার্গেণ?।

(খ) এতেনৈব প্রাকারখণ্ডেন।

(হ) চেট ইতি। প্রত্যক্ষদর্শনে সত্যপি পুনরাগমনপ্রশ্নাৎ মার্গস্থমাসীদিতি প্রতীয়তে।

(খ) শকার ইতি। এতেনৈব সম্মুখবর্ত্তিনৈব, প্রাকারখণ্ডেন দণ্ডায়মানপ্রাচীরমার্গেণ তদুপরিত এবেত্যর্থঃ।

শকার। গরু দুইটাও আসিয়াছে?।

ভৃত্য। হাঁ।

শকার। তুইও আসিয়াছিস্?।

ভৃত্য। (হাস্যের সহিত) প্রভু! আমিও আসিয়াছি।

শকার। তবে গাড়ী খানা ভিতরে আন্!

ভৃত্য। কোন্ পথে?।

শকার। এই প্রাচীরের উপর দিয়াই আন।

चेटः। भट्टके ! गोणा मलेन्ति, पवहणे वि भज्जेदि, हग्गे वि चेडे मलामि। [ग]

शकारः। अले लाअशालए हग्गे; गोणा मले, अवले कीणिश्शं, पवहणे भग्गे अवलं घडाइश्शं, तुमं मले अण्णे पवहणवाहके हुविश्शदि। (घ)

चेटः। शव्वं उववण्णं हुविश्शदि, हग्गे अत्तणकेलके ण हुविश्शं। (ङ)

(ग) भट्टारक ! गावौ म्रियेते, प्रवहणमपि भज्यते, अहमपि चेटो म्रिये।

(घ) अरे ! राजश्यालकोऽहम्; गावौ मृतौ, अपरौ क्रेष्यामि; प्रवहणं भग्नम् अपरं घटयिष्यामि; त्वं मृतः, अन्यः प्रवहणवाहको भविष्यति।

(ङ) सर्वमुपपन्नं भविष्यति, अहमात्मीयो न भविष्यामि।

(ग) चेट इति। सर्वत्र प्राकारखण्डेन प्रवेशने इति सम्बध्यते, गोमरणादिकन्तु बलिनारोहणात् प्राकारोपरि ततः पतनाच्चेति बोध्यम्।

(घ) शकार इति। मृतौ स्यातामिति शेषः। एवं परत्रापि।

(ङ) चेट इति। उपपन्नं तव सम्पन्नम्। आत्मीय एतच्छरीरसम्बन्धी एतस्माच्छरीरान्निर्गतो जीवः पुनरेतन्न प्राप्स्यतीत्यर्थः।

"आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च।" इत्यमरः।

भृত্য। প্রভু! গরু দুইটা মরিবে, গাড়ীও ভাঙ্গিবে, আমি ভৃত্য বেটাও মরিব।

শকার। ওরে! আমি রাজার শালা; গরু মরে, আর, দুইট কিনিব; গাড়ী ভাঙ্গে, আর এক খানা গাড়ী গড়াইব; তুই মরিসত আর একজন গাড়ীচালক হইবে।

শকারঃ। অলে! শব্বং পি ণশ্শদু, পাআলখণ্ডেণ পবেশেহি পবহণম্। (চ)

চেটঃ। বিভজ্জ লে পবহণ! শমং শামিণা বিভজ্জ, অণ্ণে পবহণে ভোদু। ভট্টকে গদুঅ নিবেদেমি। প্রবিশ্য। কধং ণ ভগ্গে!। ভট্টকে! এশে উবত্থিদে পবহণে। (ছ)

শকারঃ। ণ ছিণ্ণা গোণা? ণ মলা লজ্জ? তুমং পি ণ মলে?। (জ)

(চ) অরে! সর্ব্বমপি নশ্যতু, প্রাকারখণ্ডেন প্রবেশয় প্রবহণম্।

(ছ) বিভংক্ষি রে প্রবহণ! সমং স্বামিনা বিভংক্ষি, অন্যৎ প্রবহণং ভবতু, ভট্টারকং গত্বা নিবেদয়ামি। কথং ন ভগ্নম্? ভট্টারক! এতদুপস্থিতং প্রবহণম্।

(জ) ন ছিন্নৌ গাবৌ? ন মৃতা রজ্জবঃ? ত্বমপি ন মৃতঃ?।

(ছ) চেট ইতি। বিভংক্ষি বিশ্লিষ্য ভগ্নং ভব; স্বামিনা সমং প্রভুণা শকারেণ সহ, বিভংক্ষি বিশ্লিষ্য ভগ্নং ভব; অন্যৎ প্রবহণং ভবতু ইতি গত্বা, ভট্টারকং মৎস্বামিনং শকারং নিবেদয়ামীত্যন্বয়ঃ।

ভৃত্য। আপনার সকলই সম্পন্ন হইবে; কিন্তু আমি ত আর নিজের হইব না।

শকার। ওরে! সকলই নষ্ট হউক, তথাপি প্রাচীরের উপর দিয়া গাড়ী আন।

ভৃত্য। ভাঙ্গ্ রে গাড়ী! প্রভুর সহিত ভাঙ্গ্, অন্য গাড়ী হউক, প্রভুকে যাইয়া জানাই। (প্রবেশ করিয়া) গাড়ী যে ভাঙ্গিল না?। প্রভু! এই গাড়ী উপস্থিত হইয়াছে।

चेटः। अधइं। (झ)

शकारः। भाव! आअच्छ,। पवहणं पेक्खामो। भावे तुमं पि मे गुलु पलमगुलु पेक्खीअशि शादलके अब्भन्तलके त्ति पुलक्कलणीएत्ति तुमं दाव पवहणं अग्गदो अहिलुह। (ञ)

विटः। एवं भवतु। इत्यारोहति।

शकारः। अधवा चिट्ठ तुमं। तुह बप्पकेलके पवहणे?

(झ) अथकिम्।

(ञ) भाव! आगच्छ, प्रवहणं पश्यावः। त्वमपि मे गुरुः परमगुरुः प्रेक्ष्यसे, सादरकः अभ्यन्तरक इति पुरस्करणीय इति त्वं तावत् प्रवहणमग्रतः अधिरोह।

(ट) अथवा तिष्ठ त्वम्। तव वप्रीयं प्रवहणम्? येन त्वमग्रतः अधि-

---

(ज) शकार इति। अत्र मृतौ गावौ, छिन्ना रज्जव इति व्यत्ययेनान्वयः।

(ञ) शकार इति। अपरिहार्यः त्वमेव त्वर्थः। सादरक आदरणीयः, अभ्यन्तरकः अन्तरङ्गश्च, इति हेतोः, पुरस्करणीयः सर्वत्र अग्रतः स्थापनीयः।

(ट) शकार इति। वप्रस्य पितुरिदमिति वप्रीयम्, प्रवहणं किमिति काकुः।

শকার। গরু ছিড়ে নাই? দড়ি মরে নাই? তুইও মরিস্ নাই?।

ভৃত্য। হাঁ।

শকার। পণ্ডিত! আসুন, গাড়ী দেখি। পণ্ডিত! আমি আপনাকে গুরু, এমন কি পরমগুরু বলিয়া দেখি এবং আদর করি ও অন্তরঙ্গ বলিয়া মনে করি; সুতরাং আপনাকেই আগে করা উচিত; অতএব আপনিই আগে আরোহণ করুন।

বিট। ইহাই হউক। (এই বলিয়া আরোহণ করিতে লাগিল)

जेण तुमं अग्गदो अहिलुअसि। हग्गे पवहणशामी अग्गदो पवहणं अहिलुहामि। (ट)

विटः। भवानेव ब्रवीति। (ठ)

शकारः। जइ वि हग्गे एव्वं भणामि, तधावि तुह एशे आदले अहिलुह भट्टके त्ति भणिदुं। (ड)

विटः। आरोहतु भवान्।

रोहसि। अहं प्रवहणस्वामी अग्रतः प्रवहणमधिरोहामि।

(ड) यद्यपि अहमेव भणामि, तथापि तव एष आदरः 'अधिरोह भट्टारक!' इति भणितुम्।

'वप्रलाते स्त्रियां घर्वे चरे रेणौ च रोधसि' इति त्रिकाण्डशेषः।

(ठ) विट इति। एवं 'त्वं तावत् प्रवहणमग्रतः अधिरोह' इत्थं भवानेव ब्रवीति। अतस्तदनुसारेणाहमग्रतोऽधिरोढुं गच्छन्न दोषीति भावः।

(ड) शकार इति। हे भट्टारक! स्वामिन्! अधिरोह—इति भणितुं वक्तुम्, आदरो यत्नः कर्त्तुमुचित आसीदिति शेषः। एवं सति विनयो रक्षितो भवतीति भावः।

শকার। অথবা তুমি থাক; তোমার বাপের গাড়ী? যে, তুমি আগে উঠিতেছ; আমি গাড়ীর মালিক; আমি আগে উঠিব।

বিট। তুমিই সে এইরূপ বলিয়াছিলে।

শকার। যদিও আমি এইরূপ বলিয়া থাকি, তথাপি আপনার এইরূপআদর করা উচিত ছিল যে, প্রভু! আপনি উঠুন।

বিট। আপনি উঠুন।

শকারঃ। এশে শম্পদং অহিলুহামি। পুত্তকা! থাবলকা! চেড়া! পলিবত্তাবেহি পবহণং। (ঢ)

চেটঃ। পরাবৃত্য। অহিলুহদু ভট্টালকে। (ণ)

শকারঃ। অধিরুহ্যাবলোক্য চ শঙ্কাং নাটয়িত্বা ত্বরিতমবতীর্য্য বিটং কণ্ঠে অবলম্ব্য। ভাবে! ভাবে! মলেশি মলেশি পবহণাধিলূঢ়া লক্খশী চোলে বা পড়িবশদি। জই লক্খশী তদো উভে বি মূশি, অধ চোলে ত উভে বি খজ্জে। (ত)

(ঢ) এষ সাম্প্রতমধিরোহামি। পুত্রক! স্থাবরক! চেট! পরিবর্ত্তয় প্রবহণম্।

(ণ) অধিরোহতু ভট্টারকঃ।

(ত) ভাব! ভাব! ম্রিয়সে ম্রিয়সে। প্রবহণাধিরূঢ়া রাক্ষসী চৌরো বা প্রতিবসতি। যদি রাক্ষসী, তদা উভাবপি মুষিতৌ; অথ চৌরঃ তদা উভাবপি খাদিতৌ।

(ত) শকার ইতি। উভাবপি ত্বমহঞ্চেতি দ্বাবপি, চেটস্য তু পূর্ব্বত এব স্থিতত্বাৎ স্থিতিসম্ভব ইতি ভাবঃ, মুষিতৌ অপহৃতৌ। অথ পক্ষান্তরে। অত্রাপি পূর্ব্ববদেব যোগ্যতামতিক্রম্যাভিহিতম্। তেন 'যদি রাক্ষসী, তদা উভাবপি খাদিতৌ। অথ চৌরঃ, তদা উভাবপি মুষিতৌ' ইত্যুক্তিঃ প্রত্যেতব্যা।

শকার। এই এখন উঠিতেছি। পুত্র! স্থাবরক! ভৃত্য! গাড়ী ফিরাও।

ভৃত্য। (গাড়ী ফিরাইয়া) প্রভু আরোহণ করুন।

শকার। (আরোহণ করিয়া, দেখিয়া, ভয় অভিনয় করিয়া তাড়াতাড়ি নামিয়া, গলদেশে বিটকে ধারণ করিয়া) পণ্ডিত! পণ্ডিত! মরিয়াছ মরিয়াছ। কারণ একটা রাক্ষসী; কিম্বা একটা চোর গাড়ীতে

विटः । न भेतव्यम् । कुतोऽत्र वृषभयाने राक्षस्याः सञ्चारः । मा नाम ते मध्याह्नार्क-ताप-च्छिन्न-दृष्टेः स्थावरकस्य सकञ्चुकां छायां दृष्ट्वा भ्रान्तिरुत्पन्ना ? । [थ]

शकारः । पुत्तका ! थावलका ! चेड़ा ! जीवेशि ? । (द)

चेटः । अधइं । (ध)

शकारः । भावे ! पवहणाधिलूढ़ा इत्थिआ पड़िवशदि । ता अवलोएहि । (न)

(द) पुत्रक ! स्थावरक ! चेट ! जीवसि ? ।

(ध) अथकिम् ।

(न) भाव ! प्रवहणाधिरूढ़ा स्त्री प्रतिवसति । तदवलोकय ।

(थ) विट इति । वृषभयाने गोशकटे । सञ्चारो गमनम् । मध्याह्नार्कस्य तापेन छिन्ना नाशिता दृष्टिर्दर्शनशक्तिर्यस्य तादृशस्य ते तव, स्थावरकस्य तदाख्यस्य प्रवहण-वाहकस्य भृत्यस्य, कञ्चुकेन वारवाणेन गात्रावरणेन सहेति ताम् । दृष्ट्वा विद्यमानस्य ते तव, मा नाम भ्रान्तिरुत्पन्ना न किं भ्रमो जातः ? अपि तु भ्रान्तिरेवोत्पन्ना, न पुनर्वस्तुत एव राक्षसी चौरी वेति भावः ।

উঠিয়া বসিয়া রহিয়াছে। যদি রাক্ষসী হয়, তবে আমাদের দুই জনকেই চুরি করিয়া নিয়াছে; আর যদি চোর হয়, তবে দুই জনকেই খাইয়া ফেলিয়াছে।

বিট। ভয় করিও না। এই গরুর গাড়ীতে রাক্ষসীর আগমন হইবে কিরূপে ?। মধ্যাহ্নের সূর্য্যের তাপে তোমার দৃষ্টিশক্তি নষ্ট হইয়াছে; তাহাতে অঙ্গরাখার সহিত স্থাবরকের ছায়া দেখিয়া, তোমার ভ্রম হয় নাই ত ? ।

শকার। পুত্র ! স্থাবরক ! ভৃত্য ! বাঁচিয়া আছিস্ ত ?।

विटः। कथं स्त्री!।

अवनतशिरसः प्रयाम शीघ्रं
पथि वृषभा इव वर्षताड़िताक्षाः।
मम हि सदसि गौरवप्रियस्य
कुलजनदर्शनकातरं हि चक्षुः ॥१५॥

वस। सविस्मयमात्मगतम्। कधं मम णअणाणं आआसअरो ज्जेव राअस्सालो। ता संसइदम्हि मन्दभाआ। एसो दाणिं मम

(प) कथं मम नयनयोरायासकर एव राजश्यालः। तत् संशयि-

अवनतेति। पथि वर्षैर्वृष्टिभिः ताड़िते पीड़िते अक्षिणी येषां ते तादृशा वृषभा इव, अवनतानि शिरांसि येषां ते तादृशाः परस्त्रीदर्शनभयादिति भावः, वयं शीघ्रं प्रयाम इतो गच्छाम। हि यस्मात्, सदसि सज्जनसमाजे, गौरवप्रियस्य सम्मानलाभाभिलाषिणः, मम चक्षुः, कुलजनस्य कुलस्त्रिया दर्शने कातरं हि असमर्थमेव। तथा च यदीदानीं परस्त्रियं पश्येयम्, तच्च प्रथेत, तदा सज्जनसमाजे मम गौरवं न स्यात्, तेनेतः प्रस्थानमेव मे श्रेय इति भावः।

अत्र कारणेन कार्य्यसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः श्रौतोपमया सङ्कीर्य्यते। पुष्पिताग्रा च वृत्तम् ॥१५॥

ভৃত্য। হাঁ।

শকার। পণ্ডিত! একটা স্ত্রীলোক গাড়ীতে উঠিয়া বসিয়া রহিয়াছে। তা দেখুন।

বিট। স্ত্রীলোক!। পথে বৃষ্টিপীড়িত-দৃষ্টি বৃষের ন্যায়, আমি অবনতমস্তক হইয়া, এখান হইতে শীঘ্র চলিয়া যাইব। কারণ আমি সজ্জনসমাজে গৌরবাভিলাষী, সুতরাং আমার নয়ন, কুলবধূদর্শনে অসমর্থ ॥১৫॥

मन्दभाइणीए ऊसरक्खेत्तपडिदो विअ वीअमुट्ठी णिप्फलो इध आगमणो संवुत्तो । ता किं एत्थ करइस्सम् ? । (प)

शकारः । कादले क्खु, एशे वुड्ढचेड़े पवहणं णावलोएदि । भावे ! आलोएहि पवहणं । (फ)

विटः । को दोषः । भवत्वेवं तावत् ।

तास्मि मन्दभागा । एतदिदानीं मन्दभागिन्या ऊषरक्षेत्रपतित इव वीजमुष्टिः निस्फलमिहागमनं संवृत्तम् । तत् किमत्र करिष्यामि ? ।

(फ) कातरः खल्वेष वृद्धचेटः प्रवहणं नावलोकयति । भाव ! आलोकय प्रवहणम् ।

(प) वस इति । सर्वथैवासम्भाविते शकारप्रवहणे आरोहणात् सहसा तद्दर्शनाच्च विस्मय इति बोध्यम् । संशयितास्मि जीवने इति शेषः; शकारस्य क्रूरत्वात् रक्षकान्तराभावाच्चेति भावः । ऊषरक्षेत्रे क्षारमृत्तिकामयभूमौ पतितः, वीजमुष्टिः मुष्टिपरिमितं धान्यादिवीजमिव, निष्फलं क्षारदत्तदर्शनासम्भवात् अङ्कुरोत्पत्त्यसम्भवाच्चेति भावः ।

(फ) शकार इति । वृद्धचेटः स्थावरकाख्यो वृद्धभृत्यः, कातरः परस्त्रीदर्शने भीतः; अत एव प्रवहणं नावलोकयति ।

বসন্তসেনা। (বিস্ময়ের সহিত স্বগত) আমার নয়নের দুঃখজনক রাজশ্যালকই (যে উপস্থিত); তা মন্দভাগ্য আমি সংশয়াপন্ন হইয়াছি। ঊষরক্ষেত্রে নিপতিত বীজমুষ্টির ন্যায়, এখন আমার এই আগমন নিষ্ফল হইয়াছে। তা, এখন আমি কি করি?।

শকার। এই বৃদ্ধ ভৃত্য কাতর হইয়া পড়িয়াছে; তাই গাড়ী দেখিতেছে না। পণ্ডিত! আপনি দেখুন।

বিট দোষ কি?। এইরূপই হউক।

शकारः । कधं शिआला उड्डेन्ति वाअशा वच्चेन्ति । ता जाव भावे अक्खीहिं भक्खीअदि, दन्तेहिं पेक्खीअदि, दाव हग्गे पलाइश्शं । [ब]

विटः । वसन्तसेनां दृष्ट्वा सविषादमात्मगतम् । कथमये मृगी व्याघ्रमनुसरति । भोः कष्टम् । [भ]

शरच्चन्द्रप्रतीकाशं पुलिनान्तरशायिनम् ।
हंसी हंसं परित्यज्य वायसं समुपस्थिता ॥१६॥

(ब) कथं शृगाला उड्डयन्ते वायसा व्रजन्ति । तत् यावत् भावः अक्षिभ्यां भक्ष्यते दन्तैः प्रेक्ष्यते, तावदहं पलायिष्ये ।

(ब) शकार इति । उड्डयन्ते विहायसा गच्छन्ति । वायसाः काकाः । व्रजन्ति भूतलेन विचरन्ति । अमङ्गलसूचकमेतत् । तद्यावदिति । शृगाला व्रजन्ति, वायसा उड्डयन्ते । तद्यावद्भावः अक्षिभ्यां प्रेक्ष्यते, दन्तैर्भक्ष्यते राक्षसा इति शेषः । तावदहं पलायिष्ये इति क्रमो बोद्धव्यः । अक्रमन्त्वभिधानं शकारस्वभावात् ।

(भ) विट इति । मृगी व्याघ्रमनुसरतीत्यनेन शकारद्वारा वसन्तसेनाया विपत्तिः सूचिता । अत एवात्र अप्रस्तुतप्रशंसालङ्कारः ।

शरदिति । हंसी पक्षिणी, शरच्चन्द्रप्रतीकाशं शरच्चन्द्रवत् शुभ्रवर्णम् ।

শকার। হায়! শিয়াল উড়িতেছে, কাক দৌড়াইতেছে। সুতরাং যে পর্য্যন্ত পণ্ডিতটাকে নয়নদ্বারা ভক্ষণ করে এবং দন্তদ্বারা দর্শন করে তাহার মধ্যে আমি পলাইব।

বিট। (বসন্তসেনাকে দেখিয়া, বিষাদের সহিত স্বগত) হরিণী যে ব্যাঘ্রের অনুসরণ করিতেছে। হায়! কি কষ্ট।

শরচ্চন্দ্রের ন্যায় শুভ্রবর্ণ এবং পুলিনদেশে অবস্থিত হংসকে পরিত্যাগ করিয়া হংসী, কাকের নিকট উপস্থিত হইয়াছে ॥১৬॥

जनान्तिकम्। वसन्तसेने! न युक्तमिदं नापि सदृशमिदम्। [म]

पूर्वं मानादवज्ञाय द्रव्यार्थे जननीवशात्।

वसन्तसेना। ण। इति शिरश्चालयति। (य)

विटः। अशौण्डीर्य्यस्वभावेन वेशभावेन मन्यते ॥१७॥

(य) न।

एतेन चारुदत्तस्य यशःशुभ्रत्वं नितान्तनिर्दोषत्वञ्च व्यज्यते। पुलिनान्तरे नद्याः स्रोतोत्थितदेशे शेते तिष्ठतीति तम्। अनेनापि चारुदत्तस्य निरापद्वर्त्तित्वं सूच्यते। हंसं परित्यज्य, वायसं काकम्, समुपस्थिता सम्प्राप्ता। तथा च हंस्या उक्तविधहंसपरित्यागानन्तरं वायसं प्रति समुपस्थानमिव तवापि चारुदत्तपरित्यागानन्तरं शकारं प्रति समुपस्थानं नितान्तायोग्यत्वात् महादुःखकरमिति भावः।

अत एवात्र अप्रस्तुतसमात प्रस्तुतसमप्रतीतिरूपा अप्रस्तुतप्रशंसा लुप्तोपमया सङ्कीर्य्यते। अभिप्रायो नाम नाट्यलक्षणञ्च। यथा दर्पणे—

"अभिप्रायस्तु सादृश्यादभूतार्थस्य कल्पना।॥१६॥

(म) जनेति। इदं तव समुपस्थानम्, न युक्तं नोचितम्, नापि सदृशं न योग्यम्, तव उत्तमाङ्गनात्वात् शकारस्य तु पुरुषाधमत्वादित्याशयः।

न युक्तं कथमित्याह पूर्वमिति। मामात् शकारापेक्षया आत्मन उत्तमत्वाभि-

(বসন্তসেনার নিকট চুপি চুপি) বসন্তসেনে! তোমার এই আগমন সঙ্গত হয় নাই এবং অনুরূপও হয় নাই। কারণ—

পূর্ব্বে অভিমানবশতঃ শকারকে অবজ্ঞা করিয়া, এখনে ধনের নিমিত্ত মাতার আদেশে—

বসন্তসেনা। না। (এই বলিয়া মস্তক সঞ্চালন করিল)

ননু ত্বামেব ময়া ভবতীং প্রতি—'সমমুপচর ভদ্রে ! সুপ্রিয়-ঞ্চাপ্রিয়ঞ্চ ।”

বস । পবহণবিপজ্জাসেণ আগদা সরণাগদম্হি । [র]

বিটঃ । ন ভেতব্যং ন ভেতব্যম্ । ভবত্বেনং বঞ্চয়ামি । শকারমুপগম্য । কাণেলীমাতঃ ! সত্যং রাক্ষস্যেবাত্র প্রতিবসতি ।

শকারঃ । ভাবে ! ভাবে ! জই লক্খসী পড়িবসদি,তা

(র) প্রবহণবিপর্য্যাসেনাগতা শরণাগতাস্মি ।

মানাৎ, পূর্ব্বং শকারমবজ্ঞায় ত্বয়া, দ্রব্যার্থং ধনলাভার্থং, জননীবশাৎ মাতু-রাদেশবশাৎ, অশৌণ্ডীর্য্যমনৌদার্য্যমেব স্বভাবো যস্মিন্ তাদৃশেন, বেশভাবেন বেশ্যা-লয়স্বভাবেন, মন্যতে তস্যৈব শকারস্যান্তিকে স্বয়মেবোপস্থানং ন্যায্যং সম্ভাব্যতে । তথা চ পূর্ব্বমযোগ্যত্বজ্ঞানেনাবজ্ঞাতস্য জনস্য কারণবিশেষেণ যোগ্যতোৎপত্ত্যভাবে কেবলধনলাভাশয়া তস্যাদরপ্রদর্শনমাত্মনো নীচাশয়তাপ্রকাশাদযুক্তমেবেতি ভাবঃ । অত্র বক্তুর্বিষাদমগ্নতয়া ন ন্যূনপদতা দোষঃ ॥১৩॥

বিট ।—এবং অনুদার বেশ্যালয়ের স্বভাববশতঃ নিজের আগমনই সঙ্গত বলিয়া মনে করিতেছ ॥১৩॥

আমি ত তোমাকে পূর্ব্বেই বলিয়াছিলাম যে—হে ভদ্রে ! তুমি প্রিয়জন ও অপ্রিয়জনকে সমান ভাবে সেবা কর ।'

বসন্তসেনা । ভ্রমবশতঃ অন্য গাড়ীতে উঠিয়া আসিয়া পড়িয়াছি । এখন আমি আপনার শরণাপন্ন হইলাম ।

বিট । ভয় করিও না, ভয় করিও না । হউক, ইহাকে বঞ্চিত করি । (শকারের নিকট যাইয়া) কাণেলীর পুত্র ! সত্যই এই গাড়ীতে রাক্ষসীই রহিয়াছে ।

कौश ण तुमं मुशेदि ?। अध चोल, ता किं ण तुमं भक्खिदे ?।[ल]

विटः। किमनेन निरूपितेन। यदि पुनरुद्यानपरम्परया पद्भ्यामेव नगरीमुज्जयिनीं प्रविशावः, तदा को दोषः स्यात् ?।(व)

शकारः। एव्वं किदे किं भोदि ?। (श)

विटः। एवं कृते व्यायामः सेवितो धुर्य्याणाञ्च परिश्रमः परिहृतो भवति। (ष)

(ल) भात्र! भाव! यदि राक्षसी, तत् कोन न त्वां मुष्णाति ? अथ चौरः तत् किं न त्वं भक्षितः ?।

(श) एवं कृते किं भवति ?।

(ल) शकार इति। मुष्णाति चोरयति। अत्रापि पूर्व्ववत् क्रम उन्नेयः।

(व) विट इति। अनेन प्रवहणस्थेन जनेन, निरूपितेन राक्षसतया चौरतया वा निश्चितेन किं फलमिति शेषः, किमपि नेत्यर्थः। उद्यानपरम्परया उपवनश्रेण्या। एतेनातपतापं विनापि गमनं सिध्यतीति दर्शितम्।

(ष) विट इति। व्यायामः स्वास्थ्यसम्पादकः कायिकपरिश्रमः, सेवितः अनुष्ठितः

শকার। পণ্ডিত! পণ্ডিত! যদি রাক্ষসীই রহিয়া থাকে, তবে আপনাকে চুরি করিল না কেন? আর যদি চোর রহিয়া থাকে, তবে ভক্ষণ করিল না কেন?।

বিট। উহার নিরূপণ করিয়া কি হইবে?। যদি এই বনশ্রেণীর ভিতর দিয়া পায়ে হাটিয়া, উজ্জয়িনীনগরে প্রবেশ করি, তা হইলে কি দোষ হয়?।

শকার। এরূপ করিলে কি ফল হইবে?।

বিট। এরূপ করিলে ব্যায়াম করা হইবে এবং গরুগুলির পরিশ্রম পরিত্যক্ত হইবে।

शकारः । एवं भोदु । थावलआ ! चेड़ा ! णेहि पवहणं । अथवा चिट्ठ चिट्ठ, देवदाणं बम्हणाणं च अग्गदो चलणेण गच्छामि । णहि णहि, पवहणं अहिलुहिअ गच्छामि । जेण दूलदो मं पेक्खिअ भणिश्शन्ति, "एशे शे लट्ठिअशाले भट्टालके गच्छदि" । (स)

विटः । स्वगतम् । दुष्करं विषमौषधीकर्त्तुम् । भवतु, एवं तावत् । प्रकाशम् । काणेलीमातः ! एषा वसन्तसेना भवन्तमभिसारयितुमागता । (ह)

(स) एवं भवतु । स्थावरक ! चेट ! नय प्रवहणम् । अथवा तिष्ठ तिष्ठ, देवतानां ब्राह्मणानाञ्चाग्रतः चरणेन गच्छामि । नहि नहि, प्रवहणमधिरुह्य गच्छामि । येन दूरतो मां प्रेक्ष्य भणिष्यन्ति — 'एष स राष्ट्रियश्यालो भट्टारको गच्छति ।

धुर्य्याणां प्रवहणवाहकानां गवाम् । प्रवहणवाहका गाव एकवारमागताः पुनर्गमने तेषां महान् परिश्रमः सम्भाव्यते, स च न स्यात् स्वास्थ्यकरो व्यायामश्च स्यादिति उभयथापि पद्भ्यामेव गमनमावयोरुचितमिति भावः ।

(स) शकार इति । भणिष्यन्ति लोका इति शेषः । राष्ट्रियस्य राज्यपालस्य राज्ञः श्यालः, भट्टारकः प्रभूतधनस्वामी ।

(ह) विट इति । विषम औषधीकर्त्तुं दुष्करमित्यन्वयः । तथा च प्राणना-

শকার। এইরূপই হউক। স্থাবরক! ভৃত্য! গাড়ী নিয়া যা। অথবা দাঁড়া দাঁড়া; দেবতা ও ব্রাহ্মণগণের সম্মুখ দিয়া পায়ে হাটিয়াই যাই। না; না; গাড়ীতে উঠিয়া যাইব। যেহেতু, দূর হইতে আমাকে দেখিয়া লোকে বলিবে—"এই সেই রাজার শালা প্রভু যাইতেছেন।"

वस। सन्तं पावं सन्तं पावं।

शकारः। सहर्षम्। भावे! भावे! मं पवलपुलिशं मनुश्शं वाशुदेवकम्?। (क)

विटः। अथकिम्।

शकारः। तेण अपुव्वा शिलि शमाशादिदा, तश्शिं काले मए लोशाइदा, शम्पदं पादेशुं पड़िअ पशादेमि। (ख)

(च) शान्तं पापं शान्तं पापम्।

(क) भाव! भाव! मां प्रवरपुरुषं मनुष्यं वासुदेवकम्?।

(ख) तेन हि अपूर्वा श्रीः समासादिता, तस्मिन् काले मया रोषिता, साम्प्रतं पादयोः पतित्वा प्रसादयामि।

शकारस्य विषमस्य प्राणरक्षकौषधतया परिणमनं दुष्करम्, तथा सर्व्वदा परप्रतिकूलस्य दुर्जनस्य परानुकूलतया परिणमनं दुष्करमेवेति भावः। अतएवात्र अप्रस्तुतप्रशंसालङ्कारः। अभिसारयितुम् अभिसारप्रकारेण रमयितुम्।

(च) वस इति। शान्तं पापम् "भवन्तमभिसारयितुमागता" इत्यनिष्टं श्रवमित्यर्थः, "शान्तं पापमनिष्टे स्यात्" इत्यभिधानात्। तस्यातिशये द्विरुक्तिः।

(क) शकार इति। अत्र काकुस्वरेण प्रश्नो व्यज्यते।

(ख) शकार इति। श्रीः श्रीरूपा रमणी। रोषिता रोषं प्रापिता।

বিট। (স্বগত) বিষকে ঔষধ করা দুষ্কর। হউক, এইরূপ বলি। (প্রকাশ্যে) কাণেলীর পুত্র! এই বসন্তসেনা তোমার অভিসারে আসিয়াছে।

বসন্তসেনা। ওরূপ বলিবেন না, ওরূপ বলিবেন না।

শকার। (হর্ষের সহিত) পণ্ডিত! পণ্ডিত! প্রধানপুরুষ, মনুষ্য ও বাসুদেবস্বরূপ আমার (অভিসারে আসিয়াছে?)।

বিট। হাঁ।

विटः। साधु अभिहितम्।

शकारः। एशे पादेशुं पडेमि। इति वसन्तसेनामुपसृत्य। अभिके! अम्बिके! शुणु मम विस्सत्तिं। (ग)

एशे पडेमि चलणेशु विशालणेत्ते!
हत्यञ्जलिं दशणहे! तव शुद्धदन्ति!।
जं तं मए अवकिदं मदणातुलेण
तं खम्मिदाशि, वलगत्ति! तव म्हि दाशे ॥१८॥

(ग) एष पादयोः पतामि। हे मातः! अम्बिके! शृणु मम विज्ञप्तिम्।

(१८) एष पतामि चरणयोर्विशालनेत्रे!
हस्ताञ्जलिं दशनखे! तव शुद्धदन्ति!।
यत्तन्मया अपकृतं मदनातुरेण
तत् क्षामितासि, वरगात्रि! तवास्मि दासः॥

(ग) शकार इति। अत्तिकेति जनन्यर्थ एव देशीयशब्दः, अम्बिकापि जनन्येव। तेनात्र पुनरुक्तत्वमपार्थत्वञ्चोभयमपि ज्ञेयम्।

एष इति। विशाले नेत्रे यस्यास्तत्सम्बोधनम्, दश नखाः पादनखरा यस्यास्तत्-

---

শকার। তাহা হইলে, আমি অপূর্ব্ব লক্ষ্মাকে লাভ করিয়াছি। সে সময়ে আমি উহাকে কুপিত করিয়াছিলাম, এখন পায়ে পড়িয়া প্রসন্ন করিব।

বিট। ভাল বলিয়াছ।

শকার। এই পায়ে পড়িতেছি। (এই বলিয়া বসন্তসেনার নিকট যাইয়া) হে মাতঃ! হে অম্বিকে! আমার নিবেদন শুনুন।

হে বিশালনেত্রে! হে দশ-নখ-সমন্বিতে! হে নির্ম্মলদন্তশালিনি!

वस। सक्रोधम्। अवेहि अणज्जं मन्तेसि। (घ) इति पादेन ताड़यति।

शकारः। सक्रोधम्।

जं चुम्बिदं अम्बिकमादुकेहिं
गदे ण देवाणं वि जं पणामं। (१९)

(घ) अपेहि ; अनार्य्यं मन्त्रयसि।

(१९) यच्चुम्बितमम्बिकामातृकाभि-
र्गतं न देवानामपि यत् प्रणामम्।

सम्बोधनम्। इदं व्यर्थमुक्तम्। शुद्धा निर्म्मला दन्ता यस्यास्तत्सम्बोधनञ्च। एष-अहं तव चरणयोः पतामि, तथा हस्ताभ्यामञ्जलिं करोमीति शेषः। अत्र हस्तशब्दः पुनरुक्तः, अञ्जलिशब्देनैव तयोर्योगबोधनात्। मदनातुरेण मया, तत् तत्कालीनम्, यत् अपकृतं विरागः कृतः, इदानीं तत् स्वामितासि चरणपतनेन अञ्जलिकरणेन च क्षमाविषयं कारितासि। वराणि उत्तमानि गात्राणि अङ्गानि यस्यास्तत्सम्बोधनम्। तव दासः अस्मि। सुतरां ममाभिलाषं पूरयेति भावः।

वसन्ततिलका वृत्तम् ॥१८॥

(घ) वस इति। अपेहि दूरं गच्छ। अनार्य्यम् असज्जनोचितम्।

यदिति। यत् मम मुखम्, अम्बिकामातृकाभिः मातृभिः। अत्र पौनरुक्त्यम्।

আমি এই তোমার পায়ে পড়িলাম এবং তোমার নিকট হাতযোড় করিলাম, আমি কামার্ত্ত হইয়া তোমার যে সেই অপকার করিয়াছিলাম, এখন তাহার ক্ষমা করাইতেছি। হে উত্তমাঙ্গি! আমি তোমার দাস হইলাম ||১৮||

বসন্তসেনা। (ক্রোধের সহিত) দূর হও, অসভ্যের কথা বলিতেছ। (এইরূপ বলিয়া চরণদ্বারা তাড়ন করিল)

শকার। (ক্রোধের সহিত) মাতৃগণ যাহা চুম্বন করিয়াছেন এবং

শে পাড়িদে পাদতলেণ মুণ্ডে
বণে শিআলেণ জধা মুদঙ্গে ॥ ১৮॥

অলে থাবলআ! চেড়া! কহিং তুএ এশা শমাশাদিদা?। (ভ)

চেটঃ। ভট্টকে! গাম-শঅলএহিং লুদ্ধে লাঅমগ্গে, তদো চালুদত্তশ্শ লুক্খবাড়িআএ পবহণং থাবিঅ, তহিং, ওদলিঅ

তৎ পাতিতং পাদতলেন মুণ্ডং
বনে শৃগালেন যথা মৃতাঙ্গম্ ॥

(ভ) অরে স্থাবরক! চেট! কস্মিন্ ত্বয়া এষা সমাদিতা?।

(খ) ভট্টক! গ্রামশকটৈ রুদ্ধে রাজমার্গে তদা চারুদত্তস্য বৃক্ষ-

স্বেনৈব চুম্বিতম্, যচ্চ দেবানামপি সকাশে, প্রণামম্ অবনতীভাবম্, ন গতং ন প্রাপ্তম্ অপমানভয়াদিতি ভাব; শৃগালেন বনে যথা মৃতস্য অঙ্গং শবগাত্রম্, পাদতলেন ভক্ষণায় পাতিতং জায়তে, তথা ত্বয়াপি তৎ মদীয়ং মুণ্ডং মস্তকম্, পাদতলেন অপমানায় পাতিত জাতম্। মহদন্যায্যমিদমিতি ভাবঃ।

অবোপজাতিবৃত্তে ষষ্ঠবর্ণস্য লঘুত্বাবশ্যকত্বেঽপি দ্বিতীয়পাদে তদভাবাৎ হতবৃত্ত-তাদোষঃ। ন চ শকারবচনত্বাদেব পুনরুক্ততাদিদোষবৎ হতবৃত্ততাদোষস্যাপি স্বীকার এবেতি বাচ্যম্, 'অপার্থমক্রমং ব্যর্থং পুনরুক্তং হতোপমম্। লোকন্যায়বিরুদ্ধঞ্চ শকার-বচনং বিদুঃ।" ইত্যত্র অপার্থত্বাদেরেব গ্রহণাদন্যস্য চাগ্রহণাৎ তেন 'দেবআ বি' ইতি পাঠো নাম্নো পরিহার্য্যঃ ॥১৮॥

যাহা দেবতার নিকটেও অবনত ভাবে প্রাপ্ত হয় নাই, বনে শিয়াল যেমন মৃতপ্রাণীর অঙ্গ, পাদতলে পাতিত করে, তেমন তুইও আমার সেই মুণ্ড পাদতলে পাতিত করিলি ॥১৯॥

ওরে স্থাবরক! ভৃত্য! তুই কোন্ জায়গায় এটাকে পাইলি?।

ভৃত্য। প্রভু! গ্রাম্য গাড়ীতে রাজপথ একে বারে রুদ্ধ হইয়া

जाव चक्कपलिवट्टिअं कलेमि, ताव एशा पवहण-विपज्जाशेण इह आलूढ़ेत्ति तक्केमि । (च)

शकारः । कधं पवहण-विपज्जाशेण आगदा, ण मं अहि-शालिदुं । ता ओदल ओदल मम केलकादो पवहणादो । तुमं तं दलिद्दशत्थावाह-पुत्तकं अहिशालेशि, मम केल-काइं गोणाइं वाहेशि, ता ओदल ओदल गब्भदाशि ! ओ-दल । [छ]

वस । तं अज्जचारुदत्तं अहिसारेसि त्ति जं सच्चं अल-ङ्किदम्हि इमिणा वअणेण । सम्पदं जं भोदु, तं भोदु । [ज]

वाटिकायां प्रवहणं स्थापयित्वा, तस्मिन्नवतीर्य्य, यावत् चक्रपरिवृत्तिं करोमि, तावदेषा प्रवहणविपर्य्यासेन इह आरूढ़ेति तर्कयामि ।

(छ) कथं प्रवहणविपर्य्यासेनागता, न मामभिसारयितुम् । तद-वतर अवतर मदीयात् प्रवहणात् । त्वं तं दरिद्र-सार्थवाह-पुत्रक-मभिसारयसि मदीयौ गावौ वाहयसि ; तदवतर अवतर गर्भदासि ! अवतर अवतर ।

গিয়াছিল, তখন আমি চারুদত্তের বৃক্ষবাটিকার নিকটে এই গাড়ী রাখিয়া, সেখানে নামিয়া, যাবৎ চক্রপরিবর্ত্তন করি, তাহার মধ্যে ইনি, গাড়ীর বৈপরীত্যে এই গাড়ীতে উঠিয়াছেন বলিয়া মনে করি।

শকার। ও! গাড়ীর বৈপরীত্যে আসিয়াছে, আমার অভিসারে নহে! তা, নাম্ নাম্ আমার গাড়ী হইতে। তুই সেই দরিদ্র বণিক্ পুত্রের অভিসরণ করিবি, আর আমার গরুর ঘাড়ে চড়িবি। তা, নাম্ নাম্ গর্ভদাসি! নাম্ নাম্।

शकारः । एदेहिं दे दशणहुप्पलमण्डलेहिं
हत्थेहिं चाडुशद-ताड़ण-लम्पड़ेहिं ।
कड़्ढामि दे वलतणुं णिअ-जाणकादो
केशेशु वालि-दइअं वि जहा जड़ाऊ ॥२०॥

(ज) तमार्य्यचारुदत्तमभिसारयसि इति यत् सत्यम् अलङ्कृतास्मि अनेन वचनेन । साम्प्रतं यद्भवतु तद्भवतु ।

(२०) एताभ्यां ते दशनखोत्पलमण्डलाभ्यां
हस्ताभ्यां चाटुशतताड़नलम्पटाभ्याम् ।
कर्षामि ते वरतनुं निजयानकात्
केशेषु वालिदयितामिव यथा जटायुः ॥

(ज) वस इति । अलङ्कृतास्मि वेश्यात्वेऽपि गुणग्राहित्वसूचनादिति भावः ।

एताभ्यामिति । दश नखानि उत्पलमण्डलानीव पद्मसमूहा इव ययोस्ताभ्याम्, तथा चाटुशतानीव प्रियवाक्यसमूहा इव ताड़नानि प्रहारास्तेषु लम्पटाभ्यामभिलाषिभ्यां एताभ्यां हस्ताभ्याम्, यथा जटायुः, वालिदयितां ताराम्, केशेषु गृहीत्वा ते तव वरतनुं सुन्दरशरीरम्, निजयानकात् स्वकीयप्रवहणात् कर्षामि आकृष्य पातयामि ।

अत्र लुप्तोपमाश्रौतोपमाः सर्व्वा एव हताः, सादृश्याभावात् वास्तविकत्वाभावाच्च । 'इव यथा' इति च पुनरुक्तम् । वसन्ततिलका वृत्तम् ॥२०॥

বসন্তসেনা। 'সেই আর্য্য চারুদত্তের অভিসরণ করিবি' এই কথাতে আমি সত্যই অলঙ্কৃত হইয়াছি। এখন যা হউক, তা হউক।

শকার। পদ্মসমূহের ন্যায় যাহার দশটি নখ রহিয়াছে এবং যাহা বহুতর প্রিয়বাক্য তুল্য প্রহারের অভিলাষী, সেই হস্তযুগল দ্বারা, জটায়ু যেমন বালির স্ত্রীকে কেশাকর্ষণ করিয়া পাতিত করিয়াছিল, আমিও

विटः। अग्राह्या मूर्द्धजेष्वेताः स्त्रियो गुणसमन्विताः।
न लताः पल्लवच्छेदमर्हन्त्युपवनोद्भवाः ॥२१॥

तदुत्तिष्ठ त्वम्। अहमेनामवतारयामि। वसन्तसेने! अवतीर्य्यताम्।

वसन्तसेना अवतीर्य्य एकान्ते स्थिता।

शकारः। स्वगतम्। जे शे मम वअणावमाणेण तदा लोशग्गी शन्धुक्खिदे, अज्ज एदाए पादप्पहालेन अणेण पज्जलिदे;

(क) यः स मम वचनेनापमानेन तदा रोषाग्निः सन्धुक्षितः, अद्य

अग्राह्या इति। गुणसमन्विता दयादिगुणविशिष्टाः, एताः सुन्दर्य्यः स्त्रियः, मूर्द्धजेषु केशेषु अग्राह्या न ग्रहणयोग्या ईदृशीनां स्त्रीणां केशाकर्षणं न कार्य्यमित्यर्थः, मानिन्या मानहरणस्य अमङ्गलजनकत्वादिति भावः। तथा च उपवनोद्भवा लताः, पल्लवच्छेदं नार्हन्ति; सुन्दरपदार्थस्य सौन्दर्य्यापहरणे विधिनियमव्यत्ययकरणापराधापातादित्याशयः।

अत्र दृष्टान्तोऽलङ्कारः। तथा अग्राह्या इत्यत्र प्रधानस्य नञर्थस्य समासे गुणीभावात् विधेयाविमर्शदोषः "असुक्ता भवता नाथ! मुहूर्त्तमपि सा पुरा" इति दर्पणोद्धृतवत्। न ग्राह्या इति पाठे तु तद्दोषाभावः ॥२१॥

(क) शकार इति। वचनेन "अवेहि अणज्जे मन्तेमि" इति वाक्येन योऽ-

সেইরূপ কেশাকর্ষণ করিয়া তোমার সুন্দর শরীরটিকে নিজের গাড়ী হইতে নিপাতিত করিব ॥২০॥

বিট। গুণান্বিত এই সকল স্ত্রীলোককে কেশে আকর্ষণ করিতে নাই। উপবনোৎপন্ন লতা, পল্লবচ্ছেদনের যোগ্য নহে ॥২১॥

অতএব তুমি উঠ। আমি ইহাকে নামাইব। বসন্তসেনা নাম।

বসন্তসেনা নামিয়া এক প্রান্তে থাকিল।

তং শম্মদং মালেমি ণং। ভোদু, এব্বং দাব। প্রকাশম্। ভাবে! ভাবে! [ফ]

জদিচ্ছশে লম্বদশা-বিশালং
পাবালঅং শুত্তশদেহি জুত্তম্।
মংশং চ খাদুং তহ তুট্ঠিং কাদুং,
চুহু চুহু চুক্কু, চুহু চুহু ত্তি ॥২২॥

এতয়া পাদপ্রহারেণাগ্নিঃ প্রজ্বালিতঃ; তৎ সাম্প্রতং মারয়াম্যেনাম্। ভবতু, এবং তাবৎ! ভাব! ভাব!

(২২) যদীচ্ছসি লম্বদশাবিশালং
প্রাবারকং সূত্রশতৈর্যুক্তম্।
মাংসঞ্চ খাদিতুং তথা তুষ্টিঞ্চ কর্ত্তুং
চুহু চুহু চুক্কু চুহু চুহু ইতি ॥

পমানস্তেন। সন্ধুক্ষিতঃ উদ্দীপিত উৎপাদিত ইত্যর্থঃ। এতয়া বসন্তসেনয়া প্রজ্বলিতঃ জ্বালাবান্ কৃতঃ।

যদীতি। যদি, লম্বাভির্দীর্ঘাভিঃ দশাভিঃ প্রান্তসূত্রৈ বিশালং লম্বমানীভূতম্, সূত্রশতৈর্যুক্তং প্রাবারকম্ একমুত্তরীয়বস্ত্রম্, ইচ্ছসি পারিতোষিকত্বেন লব্ধুমিতি শেষঃ, মাংসঞ্চ খাদিতুমিচ্ছসি, তথা মম তুষ্টিং সন্তোষঞ্চ কর্ত্তুমিচ্ছসি। 'তদোহি মালেহি বসন্তশেণি'' ইতি বক্তুমিচ্ছন্নপি ভয়সঙ্কোচবশাদপারয়ন্ যথা কথঞ্চিদিচ্ছার-

---

শকার। (স্বগত) তখন বাক্য দ্বারা অপমানে আমার সেই যে ক্রোধাগ্নি উৎপন্ন হইয়াছিল, আজ আবার এই মাগী এই পাদপ্রহার দ্বারা তাহাকে জ্বালাইয়া দিয়াছে; সুতরাং এখন ইহাকে মারিয়া ফেলিব। হউক, এইরূপ বলি। (প্রকাশ্যে) পণ্ডিত! পণ্ডিত!।

লম্বমান দশা দ্বারা দীর্ঘ এবং বহুতর সূত্রযুক্ত একখানা উত্তরীয় বস্ত্র

विटः। ततः किम्?। [ञ]

शकारः। मम पिअं कलेहि। [ट]

विटः। बाढम् करोमि वर्जयित्वात्वकार्य्यं।

शकारः। भावे! अकज्जाह गन्धे वि णत्थि, लक्खशी कावि णत्थि। [ड]

विटः। उच्यतां तर्हि।

शकारः। मालेहि वशन्तशेणिअं। (ढ)

(ट) मम प्रियं कुरु।

(ड) भाव! अकार्य्यस्य गन्धोऽपि नास्ति; राक्षसी कापि नास्ति।

चितशब्दैश्चतुर्थपादं पूरयन्नाह चुहु इति। अतएव चुहु इत्यादयः शब्दा अपार्थाः। मांसभोजनकालीनाव्यक्तशब्दानुकरणभूतानि इति केचित्। उपजातिर्वृत्तम् ॥२२॥

(ञ) विट इति। ततस्तदा, किं मया कर्त्तव्यमिति शेषः।

(ट) शकार इति। बाढमवश्यम्। अकार्य्यं गर्हितकार्य्यम्।

(ड) शकार इति। गन्धो लेशः। कापि राक्षसी नास्ति मम प्रवक्त्री इति शेषः अतश्च "लक्खशी पड़िवशदि" इति यत् प्रागुक्तं तदुपहासपरम्, तेन निःशङ्कमेनां मारयितुं प्रवर्त्तितुमर्हसीति भावः।

যদি লাভ করিতে ইচ্ছা করেন; আর মাংস খাইতে এবং আমার সন্তোষ জন্মাইতে যদি ইচ্ছা করেন, তবে চুহ্ চুহ্ চুক্ চুহ্ চহ্ ত্তি ॥২২॥

বিট। তাহা হইলে কি?।

শকার। আমার প্রিয় কার্য্য করুন।

বিট। নিশ্চয়ই করিব, কিন্তু অকার্য্য বর্জন করিয়া।

শকার। পণ্ডিত! অকার্য্যের গন্ধও নাই, কোন রাক্ষসীও নাই।

বিট। তা হইলে বল।

विटः। कर्णौ पिधाय।

बालां स्त्रियञ्च नगरस्य विभूषणञ्च
वेश्यामवेश-सदृश-प्रणयोपचाराम्।
एनामनागसमहं यदि मारयामि
केनोडुपेन परलोकनदीं तरिष्ये ॥२२॥

(ढ) मारय वसन्तसेनाम्।

बालामिति। अहं यदि, बालामल्पवयस्काम्। तेन सम्भावितदीर्घजीवनाया वधः अङ्कुरच्छेद इव गुरुतरदुःखकर इति भावः। स्त्रियञ्च। तथा च "अवध्याश्च स्त्रियं प्राहुस्तिर्य्यग्योनिगतेष्वपि" इति विशेषनिषेधेन स्त्रीहत्या गुरुतरपापहेतुरित्याशयः। नगरस्य विभूषणञ्च अलङ्कारस्वरूपाञ्च एतेनास्या वधे उज्जयिनीनगरस्यापि महती हानिरित्यभिप्रायः। वेश्याम्। तेन तद्वधे कश्चित् पुरुषकारोऽपि नास्तीति भावः। अवेशसदृशौ वेश्यालयायोग्यौ प्रणयोपचारौ चारुदत्ते प्रगाढ़प्रणयोऽनुरागः उपचारश्च सर्व्वत्र सद्व्यवहारो यस्यास्तां वेश्याजातीयामपि अवेश्यास्वभावामित्यर्थः। अनेन अस्या वधो दुर्लभरत्नध्वंस इव जगत एव चाविकर इत्याशयः। अनागसम् अनपराधाम्। तेन चास्या हत्यायां दस्योरपि प्रवृत्तिर्न जायत इत्यभिप्राय। एनां वसन्तसेनाम् मारयामि हन्मि, तदा केन उडुपेन प्लवेन, परलोकनदीं लोकान्तरगमने अवश्यतरणीयां वैतरणीं नाम नदीम्, तरिष्ये केनापि नेत्यर्थः। तथाच पापाभावे पुण्यमेव वैतरणीतारकम्, एवञ्च ईदृशपापसत्त्वे तत्प्रतिबन्धकतया सदपि पुण्यं न मां तारयितुं प्रभवतीति भावः।

শকার। বসন্তসেনাকে মারিয়া ফেলুন।

বিট। (কর্ণযুগল আচ্ছাদন করিয়া) অল্পবয়স্কা, স্ত্রীজাতি, নগরের অলঙ্কারস্বরূপা, বেশ্যা, বেশ্যালয়ের অনুপযুক্ত প্রণয় ও ব্যবহারশালিনী এবং অপরাধবিহীন এই বসন্তসেনাকে যদি আমি হত্যা করি; তবে কোন্ ভেলাদ্বারা আমি পরলোক-নদী উত্তীর্ণ হইব? ॥২২॥

शकारः। अह्ण ते भेड़कं दइश्शं। अस्सं च विविक्ते उज्जाणे इध मालन्तं को तुमं पेक्खिश्शदि। (ग)

विटः। पश्यन्ति मां दश दिशो, वनदेवताश्च,
चन्द्रश्च, दीप्तकिरणश्च दिवाकरोऽयम्।
धर्म्मानिलौ च गगनञ्च तथान्तरात्मा
भूमिस्तथा सुकृत-दुस्कृत-साक्षिभूता ॥२३॥

(ग) अहं ते उडुपं दास्यामि। अन्यच्च विविक्ते उद्याने इह मारयन्तं कस्त्वां प्रेक्षिष्यते?।

यथोक्तप्रकारेण विशेषणानामभिप्रायविशेषैः प्रयुक्तत्वात् परिकरोऽलङ्कारः "नवरत्न विभूषणञ्च" इति निरङ्गकेवलरूपकेण सङ्कीर्य्यते।

वसन्ततिलका वृत्तम् ॥२२॥

(ग) शकार इति। उडुपं परलोकनदीतरणाय प्लवम्। एवञ्च निःशङ्कमेनां मारयितुमर्हसीति भावः। विविक्ते विजने। "विविक्तौ पूतविजनौ" इत्यमरः।

पश्यन्तीति। सुकृत दुष्कृतयोः साक्षिभूता द्रष्टृरूपा। इदञ्च लिङ्गवचनव्यत्ययेन सर्व्वत्रैव सम्बध्यते। दश दिशः, वनदेवताश्च, चन्द्रश्च। दिवसतया अस्माभिरदृश्यमानोऽपि चन्द्र उपरिस्थराशिचक्रवर्त्तित्वात् सर्व्वं पश्यत्येवेति भावः दीप्ताः किरणा यस्य सः। एतेन दिवसे किरणानां गात्रस्पर्शितया सर्व्वैरेवानुभूयमान इति व्यज्यते। अयं दृश्यमानो दिवाकरः सूर्य्यश्च, धर्म्मः, अनिलो वायुश्च, तथा अन्तरात्मा कार्य्यकारकभाव-

শকার। আমি আপনাকে ভেলা দিব। আরও, এই নির্জ্জন উদ্যানে মারিলে আপনাকে কে দেখিবে?।

বিট দশদিক্, বনদেবতাগণ, চন্দ্র, প্রদীপ্তরশ্মি এই সূর্য্য, ধর্ম্ম, বায়ু আকাশ, অন্তরাত্মা এবং পাপ-পুণ্যের সাক্ষিস্বরূপা এই পৃথিবী,—ইহারা সকলেই আমাকে দেখিবেন ॥২৩॥

शकारः । तेण हि पड़न्तोवालिदं कदुअ मालेहि । [त]

विटः । मूर्ख ! अपध्वस्तोसि । (थ)

शकारः । अधम्मभीलू एशे वुडढकोले । भोदु, थावलअं चेड़ं अणुणेमि । पुत्तका ! थावलका ! चेड़ा ! शोवस्ख्खड़आइं दइश्शं । (द)

(त) तेन हि पटान्तापवारितां कृत्वा मारय ।

(द) अधर्म्मभीरुरेष वृद्धकोलः । भवतु, स्थावरकं चेटमनुनयामि । पुत्रक ! स्थावरक ! चेट ! सुवर्णकटकानि दास्यामि ।

स्यं व जीवात्मा च, तथा भूमिः आधारभूता पृथिवी च, मां पश्यन्ति । सुतरां मया अनुष्ठीयमानां वसन्तसेनाया हत्याममी पश्येयुरेव ; तेन च मनुष्याभावमात्रेण विजनतया किं फलमिति भावः ।

अत्र पश्यन्तीत्येकया क्रियया दिगादीनामप्रस्तुतानामभिसम्बन्धात् तुल्ययोगितालङ्कारः । उक्तार्थे आह्निकतत्त्वधृता स्मृतिरपि यथा—

'आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये धर्म्मोहि जानाति नरस्य वृत्तम् ॥'

वसन्ततिलका वृत्तम् ॥२३॥

(त) शकार इति । पटान्तेन वसनप्रान्तेन अपवारितां आवृतां ताम् । तेन च नासौ पश्येयुरिति भावः ।

(थ) विट इति । अपध्वस्तः अधःपातं गतः, निरपराधस्त्रीहत्यायामेव सर्वथा प्रवृत्तेरिति भावः ।

(द) शकार इति । वृद्धकोलः वृद्धशूकरः । स्ववचनानङ्गीकारोदाक्रोशेन वृद्धतया

শকার তা হইলে, বস্ত্রাবৃত করিয়া মারুন ।

বিট । মূর্খ তুমি একেবারে অধঃপাতে গিয়াছ ।

चेटः । अहं पि पलिहिश्शं । (ध)
शकारः । शोवस्सं दे पीढ़कं [१] कालइश्शं । [न]
चेटः । अहं उवविशिश्शं । [प]
शकारः । शव्वं दे उच्छिट्टं [२] दइश्शं । [फ]
चेटः । अहं पि खाइश्शं । [ब]

(ध) अहमपि परिधास्यामि ।
(न) सौवर्णं ते पीटकं कारयिष्यामि ।
(प) अहमपि उपवेक्ष्यामि ।
(फ) सर्वं ते उच्छिष्टं दास्यामि ।
(ब) अहमपि खादिष्यामि ।

शूकरतया च विटं प्रति उक्तिरियम् । 'वराहः शूकरो घृष्टिः कोलः पोत्री' इत्यमरः । सुवर्णकटकानि स्वर्णनिर्म्मितवलयानि ।

(न) शकार इति । पीठकमासनम् ।

(फ) शकार इति । उच्छिष्टं भोजनावशिष्टम् । आत्मनो भोजनीयनानामुत्तमत्वात् तदवशिष्टानामप्युत्तमत्वमिति भावः ।

শকার। এই বৃদ্ধ শূকরটা অধর্ম্মভীরু। হউক, ভৃত্য স্থাবরকের অনুনয় করি! পুত্র! স্থাবরক! ভৃত্য তোকে সোণার বালা দিব।

ভৃত্য। আমিও পড়িব।

শকার। তোর জন্য সোনার পীড়ি তৈয়ার করাইব।

ভৃত্য। আমি বসিব।

শকার। ভোজনের অবশিষ্ট সকল বস্তু তোকে দিব।

(१) पीठकम् ।

(२) उच्छिष्टम् ।

শকারঃ। শব্বচেড়াণং মহত্তলকং কলইশ্শং। (ভ)

চেটঃ। ভট্টকে! হুবিশ্শং। (ম)

শকারঃ। তা মণ্ণেহি মম বঅণং। [য]

চেটঃ। ভট্টকে! শব্বং কলেমি বজ্জিঅ অকজ্জং। [র]

শকারঃ। অকজ্জাহ গন্ধে বি ণত্থি। [ল]

চেটঃ। ভণাদু ভট্টকে। (ব)

(ভ) সর্ব্বচেটানাং মহত্তরকং করিষ্যামি।

(ম) ভট্টক! ভবিষ্যামি।

(য) তন্মন্যস্ব মম বচনম্।

(র) ভট্টক! সর্ব্বং করোমি বর্জয়িত্বা অকার্য্যম্।

(ল) অকার্য্যস্য গন্ধোঽপি নাস্তি।

(ব) ভণতু ভট্টকঃ।

(ভ) শকার ইতি। মহত্তরকং প্রধানতমমধ্যক্ষমিত্যর্থঃ, দুর্ম্মতৌ তর-তময়ো-র্দ্বাভিধানাৎ।

(য) শকার ইতি। মন্যস্ব অঙ্গীকুরু মম বচনানুসারেণ কার্য্যং কুর্ব্বিত্যর্থঃ।

ভৃত্য। আমিও থাইব।

শকার। সকল ভৃত্যের মধ্যে তোকে প্রধান করিব।

ভৃত্য। প্রভু! আমিও হইব।

শকার। তবে আমার আদেশ স্বীকার কর।

ভৃত্য। প্রভু! সকলই করিব, কিন্তু অকার্য্য বর্জ্জন করিয়া।

শকার। অকার্য্যের গন্ধও নাই।

ভৃত্য। প্রভু! বলুন।

शकारः । एणं वशन्तशेणिअं मालेहि । [श]

चेटः । पशीदटु भट्टके । इअं मए अणज्जेण अज्जा पवहणपलिवत्तणेण आणीदा । [ष]

शकारः । अले चेड़ा ! तवावि ण पहवामि ? । [स]

चेटः । पहवदि भट्टके शलीलाह, ण चालित्ताह । ता पशीदटु पशीदटु भट्टके । भाआमि क्खु अहं । (ह)

(श) एनां वसन्तसेनां मारय ।

(ष) प्रसीदतु भट्टकः । इयं मया अनार्य्येण आर्य्या प्रवहणपरिवर्त्तनेनानीता ।

(स) अरे चेट ! तवापि न प्रभवामि ? ।

(ह) प्रभवति भट्टकः शरीरस्य, न चारित्रस्य । तत् प्रसीदतु प्रसीदतु भट्टकः । बिभेमि खलु अहम् ।

(ष) चेट इति । अनार्य्येण अधमेन । इयं वसन्तसेना । स्वयमेवानीतायाः स्वयमेव हत्यायां व्याधहतिः स्यादिति कथमपि नाहमस्या हत्यां विधातुमर्हामीति भावः ।

(स) शकार इति । अपि तु गर्भदासत्वात् सर्वथैव तवाहं प्रभवामीत्याशयः ।

(ह) चेट इति । शरीरस्य प्रभवति, तस्मात् सर्वथैव कार्य्यकारत्वाङ्गीकारात्, किन्तु चारित्रस्य स्वभावस्य न प्रभवति, अमूर्त्तत्वेन कस्याप्यनधीनत्वात् सत्पथचालितत्वाच्चेत्यभिप्रायः ।

শকার। এই বসন্তসেনাকে মারিয়া ফেল্ ।

ভৃত্য। প্রভু ! প্রসন্ন হউন। আমি অসজ্জন ; তাই এই আর্য্যাকে গাড়ীর বৈপরিত্যে আনিয়াছি।

শকার। ওরে ভৃত্য ! তোর উপরেও আমার প্রভুত্ব নাই ?।

ভৃত্য। প্রভু ! আপনি আমার শরীরের প্রভু বটেন, কিন্তু

शकारः। तुमं मम चेडे भविअ कश्श भाआशि ?। (च)

चेटः। भट्टके ! पललोअश्श। (क)

शकारः। के शे पललोए ?। (ख)

चेटः। भट्टके ! शुकिद-दुक्किदश्श पलिणामे। [ग]

शकारः। केलिशे शुक्किदश्श पलिणामे ?। (घ)

चेटः। जादिशे भट्टके बहु-शोवण्ण-मण्डिदे। [ङ]

(च) त्वं मम चेटो भूत्वा कस्मात् बिभेषि ?

(क) भट्टक ! परलोकात्।

(ख) कः स परलोकः ?।

(ग) भट्टक ! सुकृत-दुष्कृतस्य परिणामः।

(घ) कीदृशः सुकृतस्य परिणामः ?।

(ङ) यादृशो भट्टकः बहुसुवर्णमण्डितः।

(च) शकार इति। अहं हि राज्ञः श्यालः; सुतरां तस्मिन् ममाधिपत्यसत्त्वेन मदिच्छया प्रचालितस्य जनस्य अन्यतो भयासम्भव एवेति भावः।

(ग) चेट इति। सुकृतयुक्तं दुष्कृतमिति सुकृतदुष्कृतम्। शाकपार्थिवादित्वान्मध्यपदलोपो समासः। पुण्यपापयोः फलभूत इत्यर्थः।

চরিত্রের নহে। তা প্রভু প্রসন্ন হউন, প্রসন্ন হউন। আমি ভয় করিতেছি।

শকার। তুই আমার ভৃত্য হইয়া কাহার ভয় করিতেছিস্ ?।

ভৃত্য। প্রভু ! পরলোকের।

শকার। সে পরলোকটা কি ?।

ভৃত্য। প্রভু ! পুণ্য-পাপের পরিণাম।

শকার। পুণ্যের পরিণাম কি রকম ?।

শকারঃ। দুক্কিদশ্শ কেলিশে ?। (চ)

চেটঃ। জাদিশে হগে পলপিণ্ডভক্খকে ভূদে। তা অক-জ্জং ণ কলইশ্শং। (ছ)

শকারঃ। অলে ! ণ মালিশ্শশি ?। ইতি বহুবিধং তাড়য়তি (জ)

চেটঃ। পিট্টদু ভট্টকে, মালেদু ভট্টকে; অকজ্জং ণ কলইশ্শং। [ঝ]

(চ) দুষ্কৃতস্য কীদৃশঃ ?।

(ছ) যাদৃশোঽহং পরপিণ্ডভক্ষকো ভূতঃ। তদকার্য্যং ন করিষ্যামি।

(জ) অরে ! ন মারয়িষ্যসি ?।

(ঝ) পীড়য়তু ভট্টকঃ, মারয়তু ভট্টকঃ; অকার্য্যং ন করিষ্যামি।

(ঙ) চেট ইতি। এতেন সুখমেব সুকৃতস্য পরিণাম ইতি ধ্বনিতম্।

(ছ) চেট ইতি। পরপিণ্ডভক্ষকঃ পরান্নভোজী। অনেনাপি দুঃখমেব দুষ্কৃতস্য পরি-ণাম ইতি সূচিতম্।

(ঝ) চেট ইতি। পীড়য়তু প্রহরতু, মারয়তু নিহন্তু।

ভৃত্য। বহু-স্বর্ণভূষিত যেমন প্রভু।

শকার। পাপের পরিণাম কি রকম ?।

ভৃত্য। আমি যেমন পরপিণ্ডোপজীবী হইয়াছি। অতএব আমি অকার্য্য করিব না।

শকার। ওরে ! তুই বসন্তসেনাকে মারিবি না ?। (এই বলিয়া নানারকম প্রহার করিতে লাগিল)

ভৃত্য। প্রভু পীড়ন করুন, কিম্বা প্রভু মারিয়া ফেলুন; তথাপি অকার্য্য করিব না।

जेण म्हि गब्भदाश्शे, विणिम्मिदे भाअधेअदोश्शेहिं।
अहिअं च ण कोणिस्सं, तेण अकज्जं पलिहलामि ॥२५॥

वस। भाव! सरणागदम्हि। (अ)

विटः। काणेलीमातः! मर्षय मर्षय। साधु स्थावरक! साधु।

अप्येष नाम परिभूतदशो दरिद्रः
प्रेष्यः परत्र फलमिच्छति, नास्य भर्त्ता।

(२५) येनास्मि गर्भदासः विनिर्म्मितो भागधेयदोषैः।
अधिकञ्च न क्रेष्यामि तेनाकार्य्यं परिहरामि ॥

(अ) भाव! शरणागतास्मि।

येनेति। येन हेतुना, भागधेयस्य भाग्यस्य पूर्व्वजन्मकृतदुष्कृतस्य दोषैः,— गर्भदास इह जन्मनि मातुर्गर्भतो निर्गमात् प्रभृत्येव तव दासः, विनिर्म्मितः कृतः अस्मि; तेन हेतुना, अधिकञ्च तत्पूर्व्वजन्मीयपापातिरिक्तं पापञ्च, न क्रेष्यामि वसन्तसेनाहत्यया मार्ज्जयिष्यामि; तथा सति नरकपातोऽपि भवेदिति भावः। अतएव अकार्य्यं वसन्तसेनाहत्यारूपमकर्त्तव्यं विषयम्, परिहरामि परित्यजामि। आर्य्या जातिः ॥२५॥

अपीति। परिभूता सर्व्वरवज्ञाता दशा अवस्था यस्य स तादृशः दरिद्रोऽपि

যে হেতু ভাগ্যের দোষ, আমাকে গর্ভদাস করিয়াছে, সেই হেতু আমি আর অধিক পাপ কিনিব না; সেই জন্যই অকার্য্য পরিত্যাগ করিতেছি ॥২৫॥

বসন্তসেনা। পণ্ডিত! আমি আপনার শরণাপন্ন হইয়াছি।

বিট। কাণেলীর পুত্র! ক্ষমা কর, ক্ষমা কর। ভাল স্থাবরক ভাল।

तस्मादमी कथमिवाद्य न यान्ति नाशं
ये वर्द्धयन्त्यसदृशं सदृशं त्यजन्ति ॥२५॥

अपि च,

रन्ध्रानुसारी विषमः कृतान्तः
यदस्य दास्यं तव चैश्वरत्वम् ।

सन्, एष प्रेष्यः शकारस्य दासः स्थावरकः, परत्र लोके, फलम् आत्मन ऊर्द्ध्वगतिम् इच्छति; किन्तु अस्य भर्त्ता प्रभुः शकारः न परत्र फलं नेच्छतीत्यर्थः। तथा च यस्य ज्ञानोदयसम्भावना, स शकारो नितरामज्ञानः; यस्य तु सा नास्ति, स प्रेष्यो ज्ञानी,—इत्याश्चर्य्यमिति भावः। तस्मात् हेतोः, अमी शकारादयः, अद्य सद्य एवेत्यर्थः, कथमिव नाशं न यान्ति न प्राप्नुवन्ति ?। ये जनाः, असदृशमकार्य्यम्, वर्द्धयन्ति बाहुल्येन कुर्व्वन्तीत्यर्थः; सदृशं योग्यं कर्त्तव्यञ्च त्यजन्ति।

अत्र नाशस्य हेतुभूते पापे सत्यपि नाशानुत्पत्तेर्विशेषोक्तिरलङ्कारः।

वसन्ततिलका वृत्तम् ॥२५॥

रन्ध्रेति। कृतान्तो दैवम्, विषमो विपरीतो विपरीतकार्य्यकारीत्यर्थः रन्ध्रानुसारी छिद्रान्वेषी यत्किञ्चित् क्षुद्रं छिद्रमात्रं प्राप्य कार्य्यकारीत्यर्थः। यद्-यस्मात्, अस्य स्थावरकस्य, दास्यं दासत्वम्, तव च शकारस्य ऐश्वरत्वम् एतत्

হীনাবস্থ দরিদ্র হইলেও এই ভৃত্য, পরকালে ফল ইচ্ছা করিতেছে; কিন্তু ইহার প্রভু নহে। অতএব কেন ইহারা অদ্যই ধ্বংস প্রাপ্ত হয় না; যাহারা অনুচিত কার্য্য অধিক পরিমাণে করিতেছে, উচিৎ কার্য্য, একেবারেই ত্যাগ করিতেছে ॥২৫॥

আরও ছিদ্রান্বেষী দৈব, বিপরীত কার্য্য করিয়া থাকে; যে হেতু ইহার (স্থাবরকের) দাসত্ব; আর তোমার (শকারের) প্রভুত্ব; আর

श्रियं त्वदीयां यदयं न भुङ्क्ते
यदेतदाज्ञां न भवान् करोति ॥२७॥

शकारः । स्वगतम् । अधम्मभिलुए वुड्ढखोड़े, पललोअ-भीलूएशे गवभदाशे । हग्गे लट्टिअशाले कश्श भाआमि वल-पुलिशमणुश्शे ? । प्रकाशम् । अलि गवभदाशे ! चेड़े ! गच्छ तुमं ओवलके पविशिअ वीशन्ते एअन्ते चिट्ठ । (अ)

(अ) अधर्मभीरुको वृद्धशृगालः, परलोकभीरुरेष गर्भदासः । अहं राष्ट्रियश्यालः कस्माद्बिभेमि वर-पुरुष मनुष्यः ? । अरे गर्भदास ! चेट ! गच्छ त्वम्, अपवारके प्रविश्य विश्रान्त एकान्ते तिष्ठ ।

प्रभुत्वम् ; तथा यत् , अयं स्थावरकः, धार्म्मिक इति भावः, त्वदीयां श्रियं सुखसम्पदम्, न भुङ्क्ते नानुभवति ; यच्च हेतोः, भवान् शकारः, एतस्य शकारस्य आज्ञां न करोति न पालयति । तथा च स्थावरको धार्म्मिकः, त्वञ्च-पापी ; एवञ्च त्वया भुज्यमाना सुखसम्पत् स्थावरस्यैव भोगयोग्या, त्वञ्चास्य-दासयोग्यः ; तच्चाकुर्वत् दैवं विषममेव ; तथा क्षुद्रपापेन स्थावरकं दासं कुर्वत्; क्षुद्रपुण्येन भवन्तञ्च प्रभुं कुर्वत् दैवं रन्ध्रानुसार्य्येवेति भावः ।

अत्र कारणाभावेऽपि स्थावरकस्य दासरूपकार्य्योत्पत्तेः किं विभावना ? उत धर्म्मरूपकारणसत्त्वे ईश्वरत्वरूपतत्कार्य्याभावाद्विशेषोक्तिः । एवं शकारस्येश्वरत्व-पक्षेऽपि सन्देह उन्नेयः । तेन विभावनाविशेषोक्त्योः सन्देहसङ्करोऽलङ्कारः । तथा स्थावरकस्य शकारीयश्रीभोगोपयोगिधर्म्मसत्त्वेऽपि तदभोगादिका शकारस्य च स्थावरकाज्ञाकरणोपयोगिपापसत्त्वेऽपि तदकरणाच्चापरा विशेषोक्तिरिति सजातीययोर्मिथोनिरपेक्षतया पुनः संसृष्टिः ।

उपजातिर्वृत्तम् ॥२७॥

যে হেতু, তুমি (শকার) ইহার (স্থাবরকের) আদেশ পালন করিতেছ না ॥২৭॥

चेटः। जं भट्टके आणवेदि। वसन्तसेनामुपसृत्य। अज्जए! एत्तिके मे विहवे। इति निष्क्रान्तः। (ट)

शकारः। परिकरं बध्नन्। चिट्ठ वसन्तसेणिए! चिट्ठ, मालइश्शं। (ठ)

(ट) यद्भट्टक आज्ञापयति। आर्य्ये! एतावान् मे विभवः।

(ठ) तिष्ठ वसन्तसेने! तिष्ठ, मारयिष्यामि।

(ञ) शकार इति। वृद्धः शृगाल इवेति वृद्धशृगालो विटः। भीरुत्वादेव शृगालौपम्यम्। अपवारकं स्थावरणकारिणि निकुञ्जादौ।

(ट) चेट इति। एतावान् तवापकारान्निवृत्तिमात्रः, विभवः क्षमता। इतोऽधिके साहाय्यकरणादौ तु विभवो नास्त्येव गर्भदासत्वादिति भावः।

(ठ) शकार इति। परिकरं कटिवस्त्रम्। "प्रगाढगात्रिकाबन्धे पर्य्यङ्कपरिवारयोः। प्रयुज्यते परिकरः समूहारम्भयोरपि।" इति शाश्वतः।

শকার। (স্বগত) এই বুড়ো শিয়ালটা (বিট) অধর্ম্মভীরু; আবার এই গর্ভদাসটা পরলোকভীত। তা, আমি রাজার শালা প্রধান পুরুষ ও মনুষ্য হইয়া কাহার ভয় করি?। (প্রকাশ্যে) ওরে গর্ভদাস! ভৃত্য! তুই যা, কোন আবৃত স্থানে প্রবেশ করিয়া, তাহার একদিকে বিশ্রাম করিতে থাক্।

ভৃত্য। প্রভু যাহা আদেশ করেন। (বসন্তসেনার নিকট যাইয়া) আর্য্যে! এই পর্য্যন্তই আমার ক্ষমতা। (এই বলিয়া চলিয়া গেল)

শকার। (কোমরের কাপড় বাঁধিতে বাঁধিতে) থাক্, বসন্তসেনা! থাক্, তোকে খুন করিব।

বিটঃ । আঃ ! মমাগ্রতো ব্যাপাদয়িষ্যসি ? । ইতি গলে গৃহ্লাতি (ড)

শকারঃ । ভূমৌ পততি । ভাবে ভট্টকং মালেদি । ইতি মোহং নাটয়তি । চেতনাং লব্ধ্বা । (ঢ)

শব্বকালং মএ পুট্টে মংশেণ অ ঘিএণ অ ।
অজ্জ কজ্জে শমুপ্পণ্ণে জাদে মে বেলিএ কধং ॥২৮॥

বিচিন্ত্য । ভোদু লদ্ধে মএ উবাএ । দিণ্ণা বুড্ঢখোড়েণ শিরস্সা-

(ঢ) ভাবো ভট্টকং মারয়তি ।

(২৮) সর্ব্বকালং ময়া পুষ্টো মাংসেন চ ঘৃতেন চ ।
অদ্য কার্য্যে সমুৎপন্নে জাতো মে বৈরিকঃ কথম্ ॥

ভবতু, লব্ধো ময়া উপায়ঃ । দত্তা বৃদ্ধশৃগালেন শিরশ্চালনসংজ্ঞা ;

(ড) বিট ইতি । ব্যাপাদয়িষ্যসীতি কাকুঃ, কথমপি নেত্যর্থঃ । গৃহ্লাতি দৃঢ়মিতি শেষঃ ।

(ঢ) শকার ইতি । পততি পতন্ বদতীত্যর্থঃ । ভট্টকং প্রভুম্ । ইদমত্যন্তমন্যায্যমিতি ভাবঃ ।

সর্ব্বেতি । বৈরিকঃ শত্রুঃ । স্বার্থে কপ্রত্যয়ঃ ॥২৮॥

বিট । আঃ ! আবার সম্মুখেই খুন করিবে ? । (এই বলিয়া দৃঢ়ভাবে গলদেশ ধারণ করিল)

শকার । (ভূতলে পড়িল) পণ্ডিত , প্রভুকে মারিলেন । (এই বলিয়া মূর্চ্ছা অভিনয় করিল ; পরে চৈতন্য লাভ করিয়া)

আমি সমস্ত সময়ে মাংস ও ঘৃত দ্বারা আপনাকে পোষণ করিয়া আসিতেছি ; কিন্তু আজ কার্য্য উপস্থিত হইলে, কেন আপনি আমার শত্রু হইলেন ॥২৮॥

स्वगतम्। ता एदं पेशिअ वशन्तशेणिअं मालइश्शं। एव्वं दाव। प्रकाशम्। भावे! जं तुमं मए भणिदे, तं कधं हग्गे एव्वं वड्ढकेहिं गल्लक्कप्पमाणेहिं कुलेहिं जादे अकज्जं कलेमि?। एव्वं एदं अङ्गीकलाविदुं मए भणिदं। (ण)

विटः। किं कुलेनोपदिष्टेन शीलमेवात्र कारणम्।

भवन्ति सुतरां स्फीताः सुक्षेत्रे कण्टकिद्रुमाः ॥२८॥

तदेतां पिश वसन्तसेनां मारयिष्यामि। एवं तावत्। भाव! यत् त्वं मया भणितः तत् कथमहमेवं वृहत्तरैः गल्लकप्रमाणैः कुलै-र्जातोऽकार्य्यं करोमि?। एवमेतदङ्गीकारयितुं मया भणितम्।

(ण) विचिन्त्येति। वृद्धशृगालेन पूर्ववत् समासात् विटेन, शिरश्चालनेन तिर्य्यङ्मस्तककम्पनेन संज्ञा वसन्तसेनाहत्यायाः सङ्केतः। तथाच वायुरोगवशादेव विटस्य मस्तकं तिर्य्यक् कम्पते; मूर्खः शकारस्तु तदेव हत्यानुमोदनं मन्यमानः-स्वगलधारणवत् गले धृत्वैव मारयेति सङ्केतो दत्त इत्यवधारयन् इदमुक्तवानिति बोध्यम्। एवं तावत् ब्रवीमीति शेषः। यत् "मालइश्शं" इति वाक्यम्। वृहत्तरैरुच्चैः, गल्लकप्रमाणैः कुक्कुरकुलतुल्यैः कुलैरिति करणे तृतीया। कथं करोमि कथमपि नेत्यर्थः। एतत् वसन्तसेनाया मारणम्। अङ्गीकारयितुं त्वयेति शेषः। तथाच सत्कुलजातत्वादहं मारयितुं नार्हामि, किन्तु त्वया मारणमङ्गी-कारयितुमेतदुक्तवानिति भावः।

(চিন্তা করিয়া) হউক, আমি উপায় পাইয়াছি। এই বুড়ো শিয়ালটা, মাথা কাঁপাইয়া আমাকে সঙ্কেত জানাইয়াছে। তা, নিষ্পেশন করিয়া, এই বসন্তসেনাকে মারিয়া ফেলিব। এইরূপ বলি। (প্রকাশ্যে) পণ্ডিত! আমি আপনাকে যে বলিয়াছিলাম, কুকুরের মত এইরূপ উচ্চবংশে জন্মিয়া আমি সেই অকার্য্য, কি প্রকারে করিব? আমি এই ভাবে ইহা স্বীকার করাইবার জন্যই বলিয়াছিলাম।

शकारः। भावे! एशा तव अग्गदो लज्जाअदि, ण मं अङ्गीकलेदि। ता गच्छ, थावलअचेड़े मए पिट्टिदे गदे वि। एशो पलाइअ गच्छदि, ता तं गेण्हिअ आअच्छदु भावे। (त)

विटः। स्वगतम्।

(त) भाव! एषा तवाग्रतो लज्जते, न मामङ्गीकरोति। तद् गच्छ, स्थावरकचेटो मया पीड़ितो गतोऽपि। एष पलाय्य गच्छति, तत् तं गृहीत्वा आगच्छतु भावः।

किमिति। कुलेन जनकीभूतवंशेन, उपदिष्टेन उत्कर्षकारणतया उदाहृतेन किं फलमिति शेषः, किमपि नेत्यर्थः। तथाच अत्र उत्कर्षे, शीलं स्वभाव एव कारणम्। उत्कृष्टकुले जातोऽपि दुष्टस्वभावान्निकृष्टो भवति, निकृष्टकुले जातश्च सत्स्वभावादुत्कृष्टो भवतीति भावः। तथाहि सुतरां स्फीता अतीवप्रवृद्धिं प्राप्ताः कण्टकिद्रुमा मन्दारादयः कण्टकवन्तो वृक्षाः, सुक्षेत्रे उत्कृष्टभूमौ भवन्ति जायन्ते। तथाच यथा सुक्षेत्रे जातानामपि मन्दारादिवृक्षाणां कण्टकसत्त्वादेव निकृष्टत्वम्, तथा सत्कुले जातस्यापि तव दुःस्वभावादेव निकृष्टत्वमित्याशयः।

अतएवात्र अप्रस्तुतसामान्यात् प्रस्तुतविशेषप्रतीतेरप्रस्तुतप्रशंसा, विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासश्च, अनयोर्मिथो निरपेक्षतया संसृष्टिः ॥२९॥

(त) शकार इति। अङ्गीकरोति रन्तुमिति शेषः। एष स्थावरकः, पलाय्य यदि गच्छतीत्यर्थः; तदा प्रवहणानयोगमनं न सम्भवतीति भावः।

বিট। বংশের উল্লেখ করিয়া কি হইবে? উৎকর্ষের প্রতি স্বভাবই কারণ। অতিশয় বৃদ্ধিপ্রাপ্ত কণ্টকশালী বৃক্ষ, উৎকৃষ্ট ক্ষেত্রে জন্মিয়া থাকে ॥২৯॥

শকার। পণ্ডিত! বসন্তসেনা আপনার সম্মুখে লজ্জিত হইতেছে;

अस्मत्समक्षं हि वसन्तसेना
शौण्डीर्य्यभावान्न भजेत मूर्खम्।
तस्मात् करोम्येष विविक्तमस्या
विविक्तविस्रम्भरसो हि कामः ॥३०॥

प्रकाशम्। एवं भवतु, गच्छामि।

वस। पटान्तं गृहीत्वा। णं भणामि सरणागदम्हि। (थ)

(थ) ननु भणामि शरणागतास्मि।

अस्मदिति। वसन्तसेना शौण्डीर्य्यभावात् आत्मन औदार्य्यात्, अस्मत्समक्षं हि निश्चितम्, मूर्खं शकारं न भजेत सन्तुमाश्रयेत्। तथात्वे परसमक्षमेव औदार्य्यभङ्गः स्यादिति भावः। तस्मात् हेतोः, एषः अहम्, अस्या वसन्तसेनायाः सम्बन्धे, विविक्तम् इदं स्थानं विजनं करोमि स्वयमपसृत्येति शेषः। हि यस्मात्, कामः, विविक्तं विजनस्थानं विस्रम्भः परस्परविश्वासश्च ताभ्यां रसोऽनुरागो यस्मिन् स तादृशो भवति।

अत्रापि सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः।

उपजातिर्वृत्तम् ॥३०॥

তাই, আমাকে স্বীকার করিতেছে না। সুতরাং আপনি যান, ভৃত্য স্থাবরককে আমি প্রহার করিয়াছি, তাই সে চলিয়া গিয়াছে; হয় ত সে পলাইয়া যাইবে। অতএব আপনি তাহাকে নিয়া আসুন।

বিট। (স্বগত) বসন্তসেনা, উদারস্বভাববশতঃ, আমার সমক্ষে এই মূর্খকে ভজনা করিবে না। সুতরাং আমি ইহার জন্য, এই স্থানটীকে নির্জন করিব। কারণ, নির্জন স্থান ও পরস্পর বিশ্বাস এই উভয়ে যে অনুরাগ জন্মে, তাহাতেই কামব্যবহার ঘটিয়া থাকে ॥৩০॥

(প্রকাশ্যে) এইরূপই হউক; আমি যাই।

বিটঃ। বসন্তসেনে! ন ভেতব্যং ন ভেতব্যম্। কাণেলীমাতঃ! বসন্তসেনা তব হস্তে ন্যাসঃ।

শকারঃ। এব্বং। মম হত্থে এশা ণাশেণ চিট্ঠদু। (দ)

বিটঃ। সত্যম্?।

শকারঃ। শচ্চং। (ধ)

বিটঃ। কিঞ্চিদ্‌ গত্বা। অথবা ময়ি গতে নৃশংসো হন্যাদেনাম্। তদপবারিতশরীরঃ পশ্যামি তাবদস্য চিকীর্ষিতম্। ইত্যেকান্তে স্থিতঃ।

শকারঃ। ভোদু, মালইশ্শং। কবড় কাবড়িকে এশে বম্-

(দ) এবং। মম হস্তে এষা ন্যাসেন তিষ্ঠতু।

(ধ) সত্যম্।

(ন) ভবতু, মারয়িষ্যামি। কপট-কাপটিক এষ ব্রাহ্মণো

(ন) শকার ইতি। কপটেন ছদ্মনা কাপটিকো ধূর্ত্তঃ। বৃদ্ধশৃগালস্তম

বসন্তসেনা। (বিটের বস্ত্রাঞ্চল গ্রহণ করিয়া) মহাশয়! আমি বলিতেছি, আমি আপনার শরণাপন্ন হইয়াছি।

বিট। বসন্তসেনা! ভয় করিও না, ভয় করিও না। কাণেলীর পুত্র! বসন্তসেনা তোমার হাতে গচ্ছিত থাকিল।

শকার। হাঁ। বসন্তসেনা আমার হাতে গচ্ছিত থাক্।

বিট। সত্য?।

শকার। সত্য।

বিট। (কিছু দূর যাইয়া) অথবা আমি গেলে, নৃশংস শকার, বসন্তসেনাকে মারিয়া ফেলিবে। অতএব লুক্কায়িতদেহ হইয়া দেখি—ইহার কি করিবার ইচ্ছা। (এই বলিয়া এক প্রান্তে থাকিল)

(छ) अधीति। अधिकरणिकैः सादृशैः प्राड्विवाकैः विचारकैरिति यावत्, व्यवहारपराधीनतया प्राक् प्रस्तुतविवादमीमांसायां तत्त्वनिर्णयव्यग्रचित्ततया, परयोः तदानीमुपस्थितयोर्वादिप्रतिवादिनोः, चित्तग्रहणं मनोभावज्ञानम्, दुष्करम्।

कुत इत्याह छन्नमिति। पुरुषा वादिनः प्रतिवादिनश्च जनाः, न्यायेन सङ्गतत्वेन, दूरीकृतं परित्यक्तम् अन्याय्यमपीत्यर्थः, कार्य्यमभियोगादिकम्, छन्नं न्यायेनावृतं यथा स्यात् तथा, उपक्षिपन्ति अधिकरणे उपस्थापयन्ति। तथा रागेण आत्मनो निर्दोषत्वप्रतिपादनेच्छया अभिभूता आक्रान्ताः सन्तः, पुरुषा इति पूर्वेणान्वयः, स्वयम्, अधिकरणे विचारालये, स्वान् स्वकीयान् दोषान्, न कथयन्ति। अतएव च परचित्तग्रहणं दुष्करमित्याशयः। तेन चाधिकरणिकानां यथार्थविचारासामर्थ्ये दोषान्तरमप्याह तैरिति। पक्षौ वादिपक्षः अपरपक्षश्च

শ্রেষ্ঠী ও কায়স্থ। আর্য্য! আদেশ করুন।

অধিকরণিক। তত্ত্ব-নির্ণয়ে নিবিষ্টচিত্ত থাকেন বলিয়া, বিচারকদিগের পক্ষে অন্যের অভিপ্রায় বোঝা বড়ই দুষ্কর। কারণ—

লোক সকল, অন্যায় কার্য্যকেও ন্যায়ের আবরণে আবৃতভাবে উপস্থিত করে এবং নিজেদের নির্দ্দোষিতা প্রতিপাদন করিবার ইচ্ছায় নিজেরা নিজেদের দোষ, বিচারালয়ে প্রকাশ করে না। বাদি ও প্রতিবাদি

(१) बी

तैः पक्षापरपक्ष-वर्द्धितबलैर्दोषैर्नृपः स्पृश्यते
संक्षेपादपवाद एव सुलभो द्रष्टुर्गुणो दूरतः ॥३॥

अपि च ।

छन्नं दोषमुदाहरन्ति कुपिता न्यायेन दूरीकृताः
स्वान् दोषान् कथयन्ति नाधिकरणे सन्तोऽपि नष्टा ध्रुवम् ।

प्रतिवादिपक्षः ताभ्यां वर्द्धितं बलम् अन्धकारजननसामर्थ्यं येषां तैः, तैरयथार्थ-निर्णयसम्बन्धिभिः, दोषैः पापैः, नृपः स्पृश्यते सम्बध्यते। राजप्रतिनिधिभूताना-मधिकरणिकानां स्पर्शेन मूलस्य राज्ञोऽपि स्पर्शसम्भवादिति भावः। तथा संक्षे-पात् पराजितपक्षेण दोषारोपात्, द्रष्टुर्व्यवहारदर्शिनो विचारकस्य, अपवाद एव सुलभः, किन्तु गुणो यशः, दूरत एव तिष्ठतीति शेषः। पराजितपक्षेण सर्वत्र दोषप्रकाशात् विजयिपक्षेण च तद्वत् गुणाप्रकाशादित्यभिप्रायः।

अत्र निन्दाप्रशंसारूपयोरपवादगुणयोरेकत्र संघटनया विषमालङ्कारः।

शार्दूलविक्रीडितं वृत्तम् ॥३॥

उक्तप्रायमेवार्थं किञ्चित्प्रकारान्तरेणाह छन्नमिति। कुपिताः परस्परं क्रुद्धा जनाः, न्यायेन दूरीकृता हीनाः अन्यायपरायणाः सन्तः, दोषं स्वस्वापराधम्, छन्नं गुणैरावृतं यथा स्यात्तथा उदाहरन्ति अधिकरणे प्रकाशयन्ति। परन्तु स

পক্ষকর্ত্তৃক পাপের প্রভাব বর্দ্ধিত হয়, সেই পাপে রাজাকে যাইয়া স্পর্শ করে; এদিকে পরাজিত পক্ষ দোষারোপ করে বলিয়া, বিচারকের পক্ষে নিন্দাই সুলভ হয়, কিন্তু প্রশংসা দূরে যায় ॥৩॥

আরও, পরস্পর ক্রুদ্ধ লোকসকল; অন্যায়পরায়ণ হইয়া, দোষকে গুণের আবরণে আবৃত করিয়া উল্লেখ করে; আর সাধু লোকেরাও, বিচারালয়ে নিজদোষ বলেন না, সেই পাপে তাঁহারা নিশ্চয়ই অধঃ-পাতে যান। যাহারা স্বপক্ষ ও পরপক্ষের দুরভিসন্ধিপ্রভৃতি দোষযুক্ত

ये पक्षापरपक्षदोषसहिताः पापानि संकुर्वते
संक्षेपादपवाद एव सुलभो द्रष्टुर्गुणो दूरतः ॥४॥

यतः । अधिकरणिकः खलु—

शास्त्रज्ञः कपटानुसारकुशलो वक्ता, न च क्रोधनः
तुल्यो मित्र-पर-स्वकेषु, चरितं दृष्ट्वैव दत्तोत्तरः ।

दोषः अस्मदादिभिरन्वेष्य एवेति भावः। तथा सन्तः सज्जना अपि, स्वान् दोषान्, अधिकरणे न कथयन्ति; अतएव ते ध्रुवं निश्चितमेव नष्टा अधःपातं गताः, भवन्तीति शेषः, सत्याप्रकाशनस्यापि मिथ्यावादतुल्यत्वादित्याशयः। तादृशाः के इत्याह—स्वपक्षापरपक्षयोर्दोषेण दुरभिसन्ध्यादिना सहिताः समन्विता ये जनाः, पापानि मिथ्याभाषणादिजनितानि, संकुर्वते सम्यग् विदधति, ते नष्टा इति पूर्वेणान्वयः। तेन च सर्वत्र तत्त्वनिर्णयासमर्थतया विचारकस्य निन्दैव सुलभा इत्याह संक्षेपात् पराजितपक्षेण आरोपात्, द्रष्टुर्व्यवहारदर्शिनो विचारकस्येति यावत्, अपवाद एव सुलभः, किन्तु गुणः प्रशंसा, दूरत एव तिष्ठतीति शेषः।

अत्र चतुर्थचरणार्थं प्रति पूर्ववाक्यार्थौ हेतुरिति वाक्यार्थहेतुकं काव्यलिङ्गं पूर्ववद्विषमालङ्कारस्य, अनयोरङ्गाङ्गिभावेन सङ्करः । ये इति यच्छब्दस्य उत्तर-वाक्यगतत्वेन न तच्छब्दापेक्षा ।

संकुर्वत इति भूषणार्थाभावात् "सुड्भूषणे संपर्युपात्" इति न सुडागमः।

शार्दूलविक्रीडितं वृत्तम् ॥४॥

शास्त्रज्ञ इति। शास्त्रज्ञः धर्म्म-नीत्यादिशास्त्राभिज्ञः, कपटस्य वादिप्रतिवादि-

---

হইয়া, মিথ্যা কথা দ্বারা পাপ করে, তাহারাও পূর্ব্ববৎ অধঃপাতে যায়। ইহাতেও, পরাজিত পক্ষ দোষারোপ করে বলিয়া, বিচারকের নিন্দাই সুলভ হয়, প্রশংসা দূরে যায় ॥৪॥

যেহেতু, বিচারক শাস্ত্রজ্ঞ, ছল বুঝিতে সক্ষম এবং বক্তা হইবেন;

क्लीवान् पालयिता, शठान् व्यथयिता, धर्म्मोऽतिलोभान्वितो,
द्वाभावे परतत्त्व-बद्ध हृदयो राज्ञश्च कोपापहः ॥५॥

प्रयुक्तस्य छलस्य अनुसारे अवधारणे कुशलो दक्षः, कथमन्यथा न्याय्यं विचारयेदिति भावः। वक्ता वाक्पटुः, इतरथा कथं वादिप्रतिवादिनोः सकाशात् वाचा यथार्थमर्थमाविष्कुर्य्यादित्याशयः। किन्तु क्रोधनः क्रोधशीलो न च भवेत्; क्रोधस्य बुद्धिवैषम्यजनकतया विचारस्य अन्याय्यतासम्भवादित्यभिप्रायः। मित्रं सुहृत्पक्षः परः शत्रुपक्षः स्वकाश्च पुत्रादिस्तेषु तुल्यस्तुल्यदर्शी, अन्यथा विचारस्यान्याय्यता स्यादिति भावः। चरितं वादिप्रतिवादिनोर्व्यवहारम्, दृष्ट्वैव सम्यगवधार्य्यैव दत्तमुत्तरं जयपराजययोर्निर्द्धारणवाक्यं येन सः। क्लीवान् विक्रमरहितान् दुर्व्वलानित्यर्थः, पालयिता तत्पालनशीलः शठान् धूर्त्तान् व्यथयिता दण्डेन तत्पीड़नशीलः, धर्म्मे धर्म्मादनपेते धार्म्मिके जने, अति लोभान्वितः तत्संसर्गादावतीवाभिलाषान्वितः, द्वारे उपायस्य परकीयवाक्यग्रहणादेः भावे विद्यमानत्वे सति, परस्य वादिनः प्रतिवादिनो वा तत्त्वे याथार्थ्यावबोधे बद्धम् अभिनिवेशितं हृदयं येन सः, तथा राज्ञः स्वनियोमकर्त्तुर्नृपतेः कोपम् अपहन्ति सद्विचारेण निरस्यतीति स तथाविधश्च भवेदिति शेषः।

"क्लीवो विक्रमहीनेऽपि" इति हलायुधः। "उपाये निर्गमे द्वारम्" इति त्रिकाण्डशेषः, द्वार्द्वारयोश्च नार्थान्तरम्।

शार्दूलविक्रीडितं वृत्तम् ॥५॥

কিন্তু ক্রোধী হইবেন না; মিত্র, শত্রু ও স্বজনের প্রতি সমানদর্শী হইবেন, লোকের আচরণ দেখিয়াই উত্তর দিবেন, দুর্ব্বলকে রক্ষা করিবেন; দণ্ড করিয়া ধূর্ত্তকে ব্যথিত করিবেন ধার্ম্মিকের প্রতি শ্রদ্ধান্বিত হইবেন; উপায় থাকিলে পরের তত্ত্ব নির্ণয় করিবার জন্য মনকে অভিনিবিষ্ট রাখিবেন এবং রাজার ক্রোধ পরিত্যাগ করিয়া চলিবেন ॥৫॥

श्रेष्ठि-कायस्थौ । अज्जस्स वि णाम गुणे दोसो त्ति वुच्चदि । जइ एव्वं ता चन्दालोएवि अन्धोआरो त्ति वुच्चदि । (ज)

अधि । भद्र ! शोधनक ! अधिकरणमण्डपस्य मार्ग-मादेशय ।

शोधनकः । एदु एदु अधिअरणभोइओ एदु । (झ)

इति परिक्रामन्ति । (ञ)

शोध । एदं अधिअरणमण्डवं, ता पविसन्तु अधिअरण-भोइआ । (ट)

(ज) आर्य्यस्यापि गुणे दोष इत्युच्यते यद्येवं, तदा चन्द्रालोकेऽपि अन्धकार इत्युच्यते ।

(झ) एतु एतु अधिकरणभोजक एतु ।

(ट) एतदधिकरणमण्डपम्, तत्प्रविशन्तु अधिकरणभोजकाः ।

(ज) अ इति । तथा च चन्द्रालोके अन्धकार इव भवतो गुणेऽपि कथमपि दोषो न सम्भवतीति भावः । अतएवात्र असम्भवद्वस्तुसम्बन्धा निदर्शनालङ्कारः ।

(ञ) इतीति । परिक्रामन्ति अधिकरणमण्डपप्रवेशाय पादक्षेपं कुर्व्वन्ति सर्वे इति शेषः ।

শ্রেষ্ঠী ও কায়স্থ। লোক, যদি আপনারও গুণের বেলায় দোষ বলে, তবে চন্দ্রলোকেও অন্ধকার আছে ইহা বলিবে।

অধিকরণিক। ভদ্র! শোধনক! বিচারালয়ের পথ বলিয়া দাও।

শোধনক। আসুন আসুন, বিচারক আসুন।

(ইহার পরে সকলে পদক্ষেপ করিতে লাগিল)

শোধনক। এই বিচারালয়, তা বিচারক প্রবেশ করুন।

সর্ব্বে চ প্রবিশন্তি।

অধি। ভদ্র শোধনক! বহির্নিষ্ক্রম্য জ্ঞায়তাং—কঃ কঃ কার্য্যার্থী ইতি। (ঠ)

শোধ। জং অজ্জো আণবেদি। ইতি নিষ্ক্রম্য। অজ্জা! অধিঅরণিআ ভণন্তি "কো কো ইধ কজ্জত্থী" ত্তি। (ড)

শকারঃ। সহর্ষম্। উবট্ঠিদে অধিঅলণিএ। সাটোপং পরিক্রম্য। হগ্গে বলপুলিশে মণুশ্শে বাশুদেবে লট্ঠিঅশালে লাঅশালে কজ্জত্থী। (ঢ)

(ড) যদার্য্য আজ্ঞাপয়তি। আর্য্যাঃ! অধিকরণিকা ভণন্তি—"কঃ ক ইহ কার্য্যার্থী" ইতি।

(ঢ) উপস্থিতঃ অধিকরণিকঃ। অহং বরপুরুষঃ মনুষ্যঃ বাসুদেবঃ রাষ্ট্রীয়শ্যালঃ রাজশ্যালঃ কার্য্যার্থী।

(ঠ) অধীতি। কার্য্যার্থী উদ্দিষ্টীভূতবিচারপ্রার্থী।

(ঢ) শকার ইতি। সাটোপং সদম্ভম্, পরিক্রম্য কিয়ন্তং পদক্ষেপং কৃত্বা।

(সকলে প্রবেশ করিল)

অধিকরণিক। ভদ্র! শোধনক! বাহিরে যাইয়া জান—কে কে বিচারার্থী আছে।

শোধনক। আর্য্য যাহা আদেশ করেন। (ইহার পর বাহিরে যাইয়া) মহাশয়গণ! বিচারক বলিতেছেন—"এখানে কে কে বিচারার্থী আছেন।"

শকার। (আনন্দের সহিত) বিচারক উপস্থিত হইয়াছে। (গর্বের সহিত পদক্ষেপ করিয়া) প্রধান পুরুষ, মনুষ্য, বাসুদেব, রাষ্ট্রিয়শালক রাজার শালা আমি বিচারার্থী।

शोध। (ससम्भ्रमम्) ह्योमादिके पढ़मं ज्जेव रट्ठिअसालो कज्जत्थी। भोदु, अज्ज! मुहुत्तं चिट्ठ, दाव अधिअरणि-आणं णिवेदेमि। (उपगम्य) अज्जा! एसो क्खु रट्ठिअसालो कज्जत्थी ववहारे उवत्थिदो। (ण)

अधि। कथं प्रथममेव राष्ट्रियश्यालः कार्य्यार्थी यथा—सूर्य्योदये उपरागो महापुरुषविनिपातमेव कथयति। शोध-नक! व्याकुलेनाद्य व्यवहारेण भवितव्यम्। भद्र! निष्क्रम्य उच्यताम्—गच्छ, अद्य न दृश्यते तव व्यवहार इति। (त)

(ण) हन्त! प्रथममेव राष्ट्रियश्यालः कार्य्यार्थी। भवतु, आर्य्य! मुहूर्त्तं तिष्ठ, तावदधिकरणिकानां निवेदयामि। आर्य्याः! एष खलु राष्ट्रियश्यालः कार्य्यार्थी व्यवहारे उपस्थितः।

(ण) शोध इति। ह्योमादिके इति देशीयभाषायां विस्मयविषादमूलकमव्ययम्। उदरम्भरेरखिलकार्य्यरहितस्यापि शकारस्य कार्य्यार्थितेति विस्मयः; नितान्तदुर्जनः कस्य किमनिष्टं विधास्यतीत्याशङ्कया च विषाद इति बोध्यम्। आर्य्येति शकारस्यैव सम्बो-धनम्। उपगम्य अधिकरणिकानां समीप इति शेषः। व्यवहारे विचारार्थं।

(त) अधि इति। उपरागो राहुणा सूर्य्यस्यैव ग्रहणम्। महापुरुषस्य प्रधान-जनस्य विनिपातं विध्वंसम् कथयति कथनवत् स्पष्टं सूचयति। तथा अत्यन्तदुर्जनस्य

শোধনক। (ব্যস্ততার সহিত) হায়! প্রথমেই রাজার শালা বিচা-রার্থী। হউক মহাশয়! একটু কাল থাকুন, আমি বিচারককে জানা-ইয়া আসি। (বিচারকের নিকট যাইয়া) আর্য্য! এই রাজার শালা বিচারার্থী হইয়া বিচারালয়ে উপস্থিত হইয়াছেন।

অধিকরণিক। হায়! প্রথমেই রাজার শালা বিচারার্থী!। উদয়-কালীন সূর্য্যগ্রহণ, মহাপুরুষের ধ্বংস সূচনা করে। শোধনক! অত্যকার

शोध। जं अज्जो आणवेदि। निष्क्रम्य शकारमुपगम्य। अज्ज! अधिअरणिआ भणन्ति—"अज्ज गच्छ, ण दीशदि तव ववहारो।" (थ)

शकारः। सक्रोधम्। किं ण दीशदि मम ववहाले?। जइ ण दीशदि, तदो आउत्तं लाआणं पालअं बहिणीवदिं विण्णविअ बहिणिं अत्तिकं च विण्णविअ एदं अधिअलणिअं दूले फेलिअ एत्थ अण्णं अधिअलणिअं ठावइश्शं। इति गन्तुमिच्छति। (द)

(थ) यदार्य्य आज्ञापयति। आर्य्य! अधिकरणिका भणन्ति—"अद्य गच्छ न दृश्यते तव व्यवहारः।"

(द) किं न दृश्यते मम व्यवहारः?। यदि न दृश्यते तदा आवुत्तं राजानं पालकं भगिनीपतिं विज्ञाप्य भगिनीं मातरञ्च विज्ञाप्य एतमधिकरणिकं दूरीकृत्य अत्र अन्यमधिकरणिकं स्थापयिष्यामि।

प्रथममेव व्यावहारप्रार्थना कस्यचित् महापुरुषस्य विनिपातमेव कथयतीति वाक्यशेषः। व्यवहारेण विचारेण, व्याकुलेन अस्यैव शकारस्य दुर्व्यवहारात् विषमेन। अर्थस्या-दृष्टार्थं प्रमाणं यथा ज्योतिषम्—

"प्रातर्ग्रहः सूचयते विनाशं रवेर्व्वरेण्यस्य जनस्य सद्यः।"

বিচার বিষম হইবে। সুতরাং ভদ্র! (শোধনক!) তুমি নির্গত হইয়া বল যে,—'যান্, আজ আপনার বিচার্য্য বিষয়ের আলোচনা করা হইবে না।"

শোধনক। আর্য্য যাহা আদেশ করেন। (নির্গত হইয়া, শকারের নিকট যাইয়া) মহাশয়! বিচারক বলিলেন যে, "আজ যান্; আজ আপনার বিচার্য্য বিষয়ের আলোচনা করা হইবে না।"

शोध। अज्ज! रट्टिअसालअ! मुहुत्तअं चिट्ठ, दाव अधिअरणिआणं णिवेदेमि। अधिकरणिकमुपगम्य। एसो रट्टिअसालो कुविदो भणादि। इति तदुक्तं भणति। (ध)

अधि। सर्वमस्य मूर्खस्य सम्भाव्यते। भद्र! उच्यताम्—आगच्छ, दृश्यते तव व्यवहारः। (न)

(ध) आर्य्य! राष्ट्रियश्यालं! मुहूर्त्तकं तिष्ठ, तावदधिकरणिकानां निवेदयामि। एष राष्ट्रियश्यालः कुपितो भणति।

(द) शकार इति। आवुत्तं भगिनीपतिम्। "भगिनीपतिरावुत्तः" इत्यमरः। अत्र द्विरुक्तिः शकारस्वभावादुपपन्ना।

(न) अधि इति। व्यवहारो व्यवहारविषयः, दृश्यते पर्य्यालोच्यते।

शकार। (ক্রোধের সহিত) কি! আমার বিচার্য্য বিষয়ের আলোচনা করিবে না? । যদি আলোচনা না করে তবে ভগিনীপতি রাজা পালককে জানাইয়া এবং ভগিনীকে ও মাতাকে জানাইয়া, এই বিচারককে দূর করিয়া দিয়া, এখানে অন্ত বিচারক স্থাপন করিব। (এই বলিয়া যাইতে ইচ্ছা করিল)

শোধনক। আর্য্য! রাজশ্যালক! একটু কাল থাকেন; বিচারককে জানাইয়া আসি। (বিচারকের নিকট যাইয়া) এই রাজার শালা ক্রুদ্ধ হইয়া বলিতেছেন। (এই বলিয়া শকারের উক্তিগুলি বলিল)

অধিকরণিক। এ মূর্খের সকলই সম্ভাবনা করা যায়। ভদ্র! বল যাইয়া যে,—"আইস তোমার বিচার্য্য বিষয়ের আলোচনা করা হইবে।"

शोध। शकारमुपगम्य। अज्ज! अधिअरणिआ भणन्ति- आअच्छ दीसदि तव ववहारो। ता पविसदु अज्जो। (१) (प)

शकारः। पढमं भणन्ति—"ण दीसदि" शम्पदं "दीशदि" त्ति। ता णाम भीदभीदा अधिअलणभोइआ। जं त्तिअं हग्गे भणिश्शं तत्तिअं पत्तिआवइश्शं। भोदु, पविशामि। प्रविश्योपसृत्य शुशुहं अम्हाणं, तुम्हाणं पि शुहं देमि ण देमि अ। (फ)

(प) आर्य्य! अधिकरणिका भणन्ति—'आगच्छ, दृश्यते तव व्यवहारः। तत् प्रविशतु आर्य्यः।

(फ) प्रथमं भणन्ति—"न दृश्यते", साम्प्रतं "दृश्यते" इति। तत् नाम भीतभीता अधिकरणभोजकाः। यावदहं भणिष्यामि, तावत् प्रत्याययिष्यामि। सुसुखमस्माकम् युष्माकमपि सुखं ददामि न ददामि च।

(फ) शकार इति। प्रथममित्यादिकं स्वगतवदुक्तम् प्रत्याययिष्यामि विश्वासयिष्यामि विश्वस्तवदेव कारयिष्यामीत्यर्थः। ददामि मम्मतानुसरणे दातुमर्हामि, न ददामि च मम्मतानतुसरणे नापि दातुमर्हामीत्यर्थः। एतेनात्मनः प्रभुत्वातिशयसूचनेन स्वमतानुसरणे युष्माकं महाविपत्तिरिति सूच्यते।

শোধনক। (শকারের নিকট যাইয়া) আর্য্য! বিচারক বলিলেন— "আসুন; আপনার বিচার্য্য বিষয়ের আলোচনা করিব।" সুতরাং আপনি প্রবেশ করুন।

শকার। প্রথমে বলিল, আলোচনা করিব না এখন বলিতেছে "আলোচনা করিব"। সুতরাং আমি মনে করি যে, বিচারক অত্যন্ত ভীত হইয়াছে। অতএব আমি যাহা বলিব, তাহাই বিশ্বাস করাইব।

---

(१) अज्ज! अधिअरणिआ भणन्ति—आअच्छ इतिमात्रः पाठः क्वचित्।

অধি। স্বগতম্। অহো! স্থিরসংস্কারতা ব্যবহারার্থিনঃ। প্রকাশম্। উপবিশ্যতাম্। [ব]

শকারঃ। আ! অত্তণকেলকা এশে ভূমী। তা জহিং মে লোঅদি তহিং উববিশামি। শ্রেষ্ঠিনং প্রতি। এশে উববিশামি। শোধনকং প্রতি। ণং এত্থ উববিশামি। ইত্যধিকরণিকমস্তকে হস্তং দত্ত্বা। এশে উববিশামি। ইতি ভূমৌ উপবিশতি। (ভ)

অধি। ভবান্ কার্য্যার্থী?। (ম)

শকারঃ। অধইং। (য)

(ভ) আঃ! আত্মীয়া এষা ভূমিঃ, তদ্ যস্মিন্ মে রোচতে, তস্মিন্নুপবিশামি। এষ উপবিশামি। নন্বত্র উপবিশামি। এষ উপবিশামি।

(য) অথকিম।

(ব) অধি ইতি। অহো আশ্চর্য্যে। ব্যবহারার্থিনো বিচারপ্রার্থিনঃ অস্য শকারস্যেতি শেষঃ, স্থিরসংস্কারতা সর্ব্বেষাং সুখদুঃখবিধানায় আত্মন এব সর্ব্বতোমুখী ক্ষমতাস্তীতি বিষয়ে দৃঢ়ধারণা। সর্ব্বথৈবাসম্ভবেয়মিতি ভাবঃ।

(ম) অধি ইতি। কার্য্যার্থী বিচারপ্রার্থী কিমিতি কাকুঃ।

হউক, প্রবেশ করি। (প্রবেশ করিয়া, নিকটে যাইয়া) আমাদের খুব সুখই আছে; তোমাদের সুখ দিতেও পারি, নাও দিতে পারি।

অধিকরণিক। বিচারার্থীর কি দৃঢ় সংস্কার!। (প্রকাশ্যে) বসুন।

শকার। আঃ, এ জায়গা ত আমার নিজের। তা আমার যেখানে ইচ্ছা হইবে, সেইখানে বসিব। (বণিকের প্রতি) এই বসি?। (শোধনকের প্রতি) ওহে; এইখানে বসি? (এই বলিয়া বিচারকের মাথায় হাত দিয়া) এই বসিলাম। (এই বলিয়া, মাটীতে বসিল)

অধিকরণিক। আপনি বিচারার্থী?।

শকার। হাঁ।

अधि। तत् कार्य्यं कथय।

शकारः। कस्से कज्जं कधइस्सं। एवं वड्ठके गल्लक-पमाणाह कुले हग्गे जादे। (२)

लाअशशुले मम पिदा, लाआ तादस्स होइ जामादा।
लाअशिआले हग्गे, ममावि वहिणीवदी लाआ ॥६॥

अधि। सर्वं ज्ञायते।

---

(२) कर्णे कार्य्यं कथयिष्यामि। एवं वृहति गल्लकंप्रमाणस्य कुले अहं जातः।

(६) राजश्वशुरो मम पिता, राजा तातस्य भवति जामाता।
राजश्यालोऽहं, ममापि भगिनीपती राजा ॥

---

(२) शकार इति। एवमनुपदमुच्यमानप्रकारेण। गल्लकंप्रमाणस्य कुक्कुरतुल्यस्य पितुरिति शेषः। इहशन्तु प्रागप्युक्तम्। हतोपममिदम्।

उक्तोपमया सूचितं स्वाभिमतं पितुः प्राशस्त्यं प्रमाणयितुमाह राजेति। मम पिता राज्ञः श्वशुरः। अत एवासौ गल्लकंप्रमाण इति प्रशस्त एवेति भावः। अनएवाहमतीव-गौरवित इति समुदायाशयः। आर्य्या जातिः ॥६॥

অধিকরণিক। তা হইলে বিচার্য্য বিষয় বলুন।

শকার। বিচার্য্য বিষয়টা আপনার কাণে বলিব। কুক্কুরতুল্য পিতার এইরূপ বৃহৎ কুলে আমি জন্মিয়াছি।

আমার পিতা, রাজার শ্বশুর হন; রাজা আমার পিতার জামাতা হন। আমি, রাজার শালা হই এবং রাজাও, আমার ভগিনী-পতি হন ॥৬॥

অধিকরণিক। সকলই জানি।

অধি। অথ জ্ঞায়তে কা স্ত্রী বিপন্নেতি ?।

শকারঃ। হংহো অধিঅলণভোইআ! কিংত্তি ণ জাণামি তং তাদিশিং ণঅলমণ্ডণং কঞ্চণশদভূশণিঅং কেণ কি কুপুত্তেণ অত্থকল্লবত্তশ্শ কালণাদো শুণ্ণং পুপ্ফকলণ্ডকং জিণ্ণুজ্জাণং পবেশিঅ বাহুপাশ-বলক্কালেণ বশন্তশেণিআ মালিদা, ণ মএ। ইত্যর্দ্ধোক্তে মুখমাচ্ছাদয়তি। (ব)

(ব) হংহো অধিকরণভোজকাঃ! কিমিতি ন জানামি তাং তাদৃশীং নগরমণ্ডনং কাঞ্চনশতভূষণাম্। কেনাপি কুপুত্রেণ অর্থকল্যবর্ত্তস্য কারণাৎ শূন্যং পুষ্পকরণ্ডকং জীর্ণোদ্যানং প্রবেশ্য বাহুপাশ-বলাৎকারেণ বসন্তসেনা মারিতা, ন ময়া।

মরণং যুষ্মাভির্ম্মত্তঃ প্রহারভয়মপি করণীয়মিতি সূচিতম্। ততস্তস্মাৎ বহুতরুভি জাতত্বাৎ। ক্রীড়িতুং বিহর্ত্তুম্। এতেন তদুদ্যানস্য বিজনত্বং ধ্বনিতম্। শোষয়িতুং তোলনাদিনা দুষ্টজনম্। শোধয়িতুং কন্দসারণাদিনা দুষ্টতৃণাদিকম্। পোষয়িতুং জলদানাদিনা রোপিতবৃক্ষাদিকং বর্দ্ধয়িতুম্। লাবয়িতুং কর্ত্তর্য্যাদিনা তুচ্ছতৃণাদিকং ছেদয়িতুম্। ন প্রেক্ষে বেতি অপার্থমুক্তম্।

(ব) শকার ইতি। নগরস্য মণ্ডনং উজ্জয়িন্যা ভূষণভূতাম, কাঞ্চনশতং বহুতর-

---

পতি রাজা, সন্তুষ্ট হইয়া, বিহার করা ও রক্ষা করার জন্য সকল উদ্যানের মধ্যে শ্রেষ্ঠ পুষ্পকরণ্ডকনামে জীর্ণোদ্যান আমাকে দিয়াছিলেন। আমি সেখানে দেখিবার জন্য, শুকাইবার জন্য, পরিষ্কার করিবার জন্য, পুষ্ট করিবার জন্য এবং ছেদন করিবার জন্য প্রত্যহ যাইয়া থাকি। দৈবযোগে দেখিলাম, অথবা দেখিলাম না, যে একটা স্ত্রীলোকের শরীর পড়িয়া রহিয়াছে।

অধিকরণিক। কোন্ স্ত্রীলোক মরিয়াছে, তাহা জানিয়াছেন কি ?।

শকার। ওহে বিচারকমহাশয়! নগরের অলঙ্কারস্বরূপা এবং

किं कुलेनोपदिष्टेन शीलमेवात्र कारणम्।
भवन्ति नितरां स्फीताः सुक्षेत्रे कण्टकिद्रुमाः ॥७॥

तदुच्यतां कार्य्यम्।

शकारः। एव्वं भणामि,—अवलद्धाह वि ण अ मे किंपि कलइश्शदि। तदो तेण वहिणीपदिणा परितुट्ठेण मे कीलिदुं लक्खिदुं शव्वुज्जाणाणं पवलं पुप्फकलण्डकं जिण्णुज्जाणं दिण्णे। तहिं च पेक्खिदुं अणुदिअहं शोशावेदुं शोधावेदुं पोत्थावेदुं लुणावेदुं गच्छामि। देव्वजोएण पेक्खामि ण पेक्खामि वा इत्थिअशलीलं णिवडिदं। (ल)

(ल) एवं भणामि—अपराध्यस्यापि न च मे किमपि करिष्यति ततस्तेन भगिनीपतिना परितुष्टेन मे क्रीड़ितुं रक्षितुं सर्वोद्यानानां प्रवरं पुष्पकरण्डकं जीर्णोद्यानं दत्तम्। तत्र च प्रेक्षितुमनुदिवसं शोषयितुं शोधयितुं पोषयितुं लावयितुं गच्छामि। दैवयोगेन प्रेक्षे न प्रेक्षे वा स्त्रीशरीरं निपतितम्।

किमिति। अष्टमाङ्के विवृतमेतत् ॥७॥

(ल) शकार इति। एवं 'वड्ढके' इत्याद्युक्तेन हेतुना, अपराद्धस्यापि कृतापराधस्यापि च मे, किमपि दण्डादिकं न करिष्यति राजेति शेषः। एतेन मम मतानन्-

কুলের উল্লেখ করিয়া কি হইবে? উৎকর্ষের প্রতি স্বভাবই কারণ। যে হেতু, অতিশয় বৃদ্ধিপ্রাপ্ত কণ্টকী বৃক্ষও, সুক্ষেত্রে জন্মিয়া থাকে ॥৭॥

সুতরাং বিচার্য্য বিষয়টা বলুন।

শকার। বলিতেছি—এই কারণে আমি অপরাধ করিলেও, রাজা আমার কিছুই করিবেন না। তাহার পর, সেই ভগিনী-

अधि। अहो नगररक्षिणां प्रमादः। भोः श्रेष्ठिकायस्थौ! न मयेति व्यवहारपदं प्रथममभिलिख्यताम्। (ग)

कायस्थः। जं अज्जो आणवेदि। तथा कृत्वा। अज्ज! लिहिदं। (घ)

शकारः। स्वगतम्। हीमादिके! उत्तलाअन्तेण विअ पाअशपिण्डालकेण अज्ज मए अत्ता एव्व णिखाणिदो। भोदु

(घ) यदार्य्य आज्ञापयति। आर्य्य! लिखितम्।

(ङ) हन्त! उत्ताम्यतेव पायसपिण्डारकेण अद्य मया आत्मैव निर्णा-

स्वर्णं बहुतरस्वर्णालङ्कारा भूषणं यस्यास्ताम्। अर्थकल्यवर्त्तस्य प्रागुक्तव्याख्यानात् अचिरस्थायिनो धनस्य। शून्यं विजनम्। बाहुपाशाभ्यां बलात्कारो बलपूर्वकः मारितेन। मुखावरणं न मयेत्यसम्पूर्णभाषित्वद्योतनार्थम्।

(ग) अधि इति। प्रमादः अनवधानता। तथा च यदि नगररक्षिणां प्रमादो न स्यात्तदेदृशी हत्या न स्यादिति भावः। व्यवहारपदं विचारास्पदीभूतः शब्दः। तथा चात्मनो हननकर्त्तृत्वप्रसक्त्याभावेऽपि कथं न मयेति निषेध इत्याशयः।

বহুতর স্বর্ণালঙ্কারে অলঙ্কৃতা সেইরূপ রমণীকে কি আমি চিনি না ?। কোনও দুর্জ্জন, অচিরস্থায়ী ধনের জন্য, নির্জ্জন পুষ্পকরণ্ডক জীর্ণোদ্যানে প্রবেশ করাইয়া, বাহুপাশদ্বারা বসন্তসেনাকে বলপূর্ব্বক মারিয়া ফেলিয়াছে; আমি নহে। (এই অর্দ্ধোক্তির পর মুখ আবৃত করিল)

অধিকরণিক। হায়! নগররক্ষকদিগের কি অনবধানতা! । শ্রেষ্ঠি ও কায়স্থ! 'আমি নহে, এই বিচার্য্য বিষয়টি প্রথম লিখুন।

কায়স্থ। আর্য্য! যাহা আদেশ করেন। (সেইরূপ করিয়া, আর্য্য! লিখিয়াছি।

এব্বং দাব। প্রকাশম্। অহো অধিঅলণভোইআ! ণং ভণামি, মএ জ্জেব দিট্ঠা, কিং কোলাহলং কলেধ?। ইতি পাদেন লিখিতং প্রোঞ্ছতি। (ঘ)

অধি। কথং ত্বয়া জ্ঞাতং যথা খল্বর্থনিমিত্তং বাহুপাশেন ব্যাপাদিতা?।

শকারঃ। হংহো! ণূণং পড়িসুণ্ণাএ (১) মোঘট্ঠাণাএ গীবালিআএ ণিস্সুবণ্ণকেহিং আহলণট্ঠাণেহিং তক্কেমি। (ঙ)

স্থিতঃ। ভবতু, এবং তাবত্ অহো অধিকরণভোজকাঃ! ননু ভণামি— ময়ৈব দৃষ্টা। কিং কোলাহলং কুরুত?।

(ঙ) হংহো! নূনং পরিশূন্যয়া মোঘস্থানয়া গ্রীবালিকয়া নিঃসুবর্ণকৈরাভরণস্থানৈস্তর্কয়ামি।

(ঘ) শকার ইতি। পাদস্বাপস্তং পরমান্নপক্কম্ কচ্ছত লভিন প্রাপ্নোতীতি পায়সপিণ্ডারকেণৈব পরমান্নলোভিনা জনেনেব, উত্তানমনা অনালোচিতেন ময়া, আত্মৈব নির্দোষিতো নিশ্চয়েন নাশং প্রাপিত, ন ময়েত্যভিধানেন মাং প্রত্যেব সন্দেহোদয়েন মমৈব হত্যাপরাধপ্রবর্ত্তিত্বমবাদিতি ভাবঃ। পূর্ব্বং 'ন ময়া' ইত্যস্য।

শকার। (স্বগত) হায়! পরমান্নলোভী লোকের ন্যায় আমি, উতলা হইয়া, আজ আপনিই আপনাকে নষ্ট করিলাম! হউক, এইরূপ করি। (প্রকাশ্যে) ওহে বিচারক! ঠিক বলিতেছি আমিই দেখিয়াছি। কেন তোমরা কোলাহল করিতেছ। (এই বলিয়া চরণ দ্বারা লেখা টুকু মুছিয়া ফেলিল)

অধিকরণিক। ধনের জন্য, বাহুপাশদ্বারা মারিয়াছে, ইহা আপনি কি প্রকারে জানিলেন?।

---

(১) সুণ্ণাএ।

श्रेष्ठिकायस्थौ। जुज्जदि विअ। (घ)

शकारः। स्वगतम्। दिट्ठिआ पच्चुज्जीविदम्हि। अविदमादिके!। (क)

(घ) युज्यत इव।

(क) दिष्ट्या प्रत्युज्जीवितोऽस्मि।

(ङ) शकार इति। परिशून्यया सर्वतः स्वर्णगुटिकारहितया, अतएव शोभां सौन्दर्यजननाभावात् व्यर्थं स्थानं स्थितिर्यस्यास्तया, ग्रीवाया आलिका हारसूत्रावली तया, तर्कयामीति शेषेणान्वयः। तथा निःसुवर्णकैः स्वर्णाभरणरहितैः, आभरणस्थानैः कर्णनासिकाप्रभृतिभिः, तर्कयामि अर्थात् अनेनैतेन सा चारुदत्तेनैव व्यापादितेति सम्भावयामि; कथमन्यथा तादृशी महाधनवती स्वर्णाभरणहीना सती मृता स्यात्, कथं वा शरीरे चिह्नमात्रमपि न स्यादित्याशयः। अत्र प्राप्तिर्नाम नाट्यलक्षणम्—

'प्राप्तिः केनचिदंशेन किञ्चिद्यत्रानुमीयते' इति लक्षणात्।

(घ) श्रेष्ठि इति। युज्यत इव, इदमुक्तमिति शेषः। अत्रापि पूर्व एव भावः।

(क) शकार इति। दिष्ट्या भाग्येन, प्रत्युज्जीवितोऽस्मि, ममैवापराधनिश्चयेन प्राणदण्डसम्भावनायामिति भावः। अविदमादिके इति हर्षसूचकमव्ययं शकारादिभाषायाम्।

শকার। ওহে! গলার হারের সুতাগুলি, নিরর্থক রহিয়াছে তাহাতে একটি গুটীও নাই এবং অলঙ্কারের স্থানগুলি, স্বর্ণবিহীন রহিয়াছে ইহা দ্বারা আমি (ঐরূপ) মনে করিয়াছি।

শ্রেষ্ঠী ও কায়স্থ। ইহা যেন সঙ্গত (বলিয়া মনে হয়)

শকার। (স্বগত) ভাগ্যবশতঃ বাঁচিলাম। বেশ! ।

श्रेष्ठिकायस्थौ। भो! कम्म एदो ववहारो अवलम्बदि?। (ख)

अधि। इह हि द्विविधो व्यवहारः। (ग)

श्रेष्ठिकायस्थौ। केरिसो?। (घ)

अधि। वाक्यानुसारेण अर्थानुसारेण च। यस्तावत् वाक्यानुसारेण, स खल्वर्थिप्रत्यर्थिभ्यः; यश्चार्थानुसारेण स चाधिकरणिकबुद्धिनिष्पाद्यः। (ङ)

(ख) भोः! कमेष व्यवहारोऽवलम्बते?।

(घ) कीदृशो?।

(ख) श्रेष्ठि इति। भो इत्यधिकरणिकसम्बोधनम्। व्यवहारो विवादनिर्णयः. कं जनम् अवलम्बते अपेक्षते, प्रमाणत्वेनेति शेषः।

(ग) अधि इति। व्यवहारो विवादनिर्णयः।

(ङ) अधि इति। अर्थिप्रत्यर्थिभ्यो वादिप्रतिवादिभ्यः, निर्णयात्मको व्यवहारो इति शेषः, तेषां वाक्यानुसारेणैव विवादनिर्णयः कर्त्तव्य इत्यर्थः। अधिकरणिक-बुद्धिनिष्पाद्यः विचारकबुद्धिसम्पाद्यः विचारकः स्वबुद्ध्या प्रमाणत्वेन यदपेक्षते तदु-पस्थाप्य तेन सम्पाद्य इत्यर्थः। सुतरामयं व्यवहारो द्वितीयविध एवेति भावः।

শ্রেষ্ঠী ও কায়স্থ। মহাশয়! এ বিচার কাহাকে অবলম্বন করিতেছে?

অধিকরণিক। এই জগতে বিবাদ নির্ণয় দুই রকম।

শ্রেষ্ঠীও কায়স্থ। কি কি রকম?।

অধিকরণিক। বাক্যানুসারে এবং অর্থানুসারে। যেটি, বাক্যানু-সারে হয়, তাহা বাদী ও প্রতিবাদী হইতেই হইয়া থাকে; আর যেটি অর্থানুসারে হয়, তাহা বিচারকের বুদ্ধিনিষ্পাদ্য হইয়া থাকে।

श्रेष्ठिकायस्थौ। ता वसन्तसेणामादरं अवलम्बदि ववहारो?। [च]

अधि। एवमिदम्। भद्र! शोधनक! वसन्तसेनामातरमनुद्वेजयन्नाह्वय। [छ]

शोधनकः। तह। इति निष्क्रम्य गणिकामात्रा सह प्रविश्य। एदु एदु अज्जा। (ज)

वृद्धा। गदा मे दारिआ मित्तघरअं अत्तणो जोव्वणं अणुभविदुं। एसो उण दीहाऊ भणादि—"आअच्छ, अधि-

(च) तत् वसन्तसेनामातरमवलम्बते व्यवहारः।

(ज) तथा। एतु एतु आर्य्या।

(झ) गता मे दारिका मित्रगृहमात्मनो यौवनमनुभवितुम।

(च) श्रेष्ठि इति। वसन्तसेनायाः परिचायकप्रभावत्वेनेति भावः।

(छ) अधि इति। अनुद्वेजयन् काञ्चिदपि विपदमभिधाय उद्वेगमजनयन्; तथात्वे व्याकुलचित्ततया किमपि तत्त्वं वक्तुं न शक्नुयादिति भावः।

(झ) वृद्धेति। यौवनं यौवनकालीनं सुखमित्यर्थः। अतएतदग्रं नाटीयं

শ্রেষ্ঠী ও কায়স্থ। তা হইলে এই বিচার, বসন্তসেনার মাতাকে আশ্রয় করিতেছে?।

অধিকরণিক। ইহা এইরূপই বটে। ভদ্র! শোধনক! তুমি উদ্বিগ্ন না করিয়া, বসন্তসেনার মাকে ডাক।

শোধনক। তাহাই। (এই বলিয়া নির্গত হইয়া, বসন্তসেনার মাতার সহিত প্রবেশ করিয়া) আর্য্যা! আসুন আসুন।

বৃদ্ধা। আমার কন্যা, যৌবনের সুখ অনুভব করিবার জন্য, বন্ধুর বাড়ী গিয়াছেন; এদিকে আবার এই দীর্ঘায়ু বলিতেছেন—

अरणिओ सद्दावेदि।" ता मोहपरवसम्मिव अत्ताणअं अवगच्छामि, हिअअं मे थरथरेदि। अज्ज! आदिसेहि मे अहिअरणमण्डवस्स मग्गं। (झ)

शोध। एदु एदु अज्जा। [ञ]

उभौ परिक्रामतः।

शोध। एदं अधिअरणमण्डवं, एत्थ पविसदु अज्जा। [ट]

इत्युभौ प्रविशतः।

वृद्धा। उपसृत्य। सुहं तुम्हाणं भोदु भावमिस्साणं। [ठ]

एष पुनर्दीर्घायु र्भणति—"आगच्छ, अधिकरणिक आह्वयति।" तन्मोहपरवशमिवात्मानमवगच्छामि, हृदयं थरथरायते। आर्य्य! आदिश मे अधिकरणमण्डपस्य मार्गम्।

(ञ) एतु एतु आर्य्या।

(ट) एतदधिकरणमण्डपम्, अत्र प्रविशतु आर्य्या।

(ठ) सुखं युष्माकं भवतु भावमिश्राणाम्।

[illegible]ो जात इति भावः। पुनरेष दीर्घायुरायुष्मान् शोधनक इत्यर्थः। शब्दापयति आह्वयति। तत्तस्माद्भयकारणादेवेत्यर्थः, आत्मानं मोहपरवशमिव मूर्च्छितमिव। थरथरायते 'थर-थर' इत्येवं कम्पते।

"আসুন, বিচারক ডাকিতেছেন।" সুতরাং আমি আপনাকে যেন মূর্চ্ছিত বলিয়া বোধ করিতেছি এবং হৃদয়, থর থর করিয়া কাঁপিতেছে। আর্য্য! আমাকে বিচারালয়ের পথ বলিয়া দিন।

শোধনক। আর্য্যা! আসুন আসুন।

দুই জনেই পাদক্ষেপ করিতে লাগিল।

শোধনক। এই বিচারালয়, আর্য্যা এইখানে প্রবেশ করুন।

ইহার পর দুই জনেই প্রবেশ করিল।

अधि । भद्रे ! स्वागतम् ? आस्यताम् ।

वृद्धा । तथा । इत्युपविष्टा । [ड]

शकारः । स-दर्पम् । आगदाशि बुड्ढकुट्टणि ! आगदाशि । [ढ]

अधि । अये ! त्वं किल वसन्तसेनाया माता ? ।

वृद्धा । अधइं । [ण]

अधि । अथेदानीं वसन्तसेना क्व गता ? ।

(ड) तथा ।

(ढ) आगतासि वृद्धकुट्टनि ! आगतासि ? ।

(ण) अथ किम् ।

---

(४) [illegible] इति । भावा विद्वांसः मिश्राश्च प्रधाना एषाम् अधिकरणोपस्थितानां बुधानामित्यर्थः । "भावो विद्वान्" इत्यमरः । "मिश्रः (पुं) श्रेष्ठ" इति शब्दकल्पद्रुमः ।

(५) शकार इति । वृद्धा चासौ कुट्टनी पर पुरुषेण सह परस्त्रीसंयोगकारिणी चेति सा तत्सम्बोधनम् । "कुट्टनी शम्भली समे" इत्यमरः ।

বৃদ্ধা। (নিকটে যাইয়া) অভিজ্ঞপ্রবর আপনাদের সুখ হউক।

অধিকরণিক। ভদ্রে ! আপনার শুভাগমন ত ? বসুন।

বৃদ্ধা। তাহা। (এই বলিয়া বসিল)

শকার। (আক্রোশের সহিত) আসিয়াছ ? বৃদ্ধকুট্টনি ! আসিয়াছ ?

অধিকরণিক। আপনি বসন্তসেনার মাতা ?।

বৃদ্ধা। হাঁ।

অধিকরণিক। বসন্তসেনা এখন কোথায় গিয়াছেন ?।

वृद्धा। मित्तघरस्स। (त)

अधि। किंनामधेयं तस्य मित्रम्?।

वृद्धा। स्वगतम्। हद्धी हद्धी अदिलज्जणीअं क्खु एदं। प्रकाशम्। जणस्स पुच्छणीओ अअं अत्थो, ण उण अधिअरणिअस्स। [थ]

अधि। अलं लज्जया, व्यवहारस्त्वां पृच्छति। [ट]

(त) मित्रगृहस्य।

(थ) हाधिक् हाधिक्, अतिलज्जनीयं खलु एतत्। जनस्य पृच्छनीयोऽयमर्थः, न पुनरधिकरणिकस्य।

(थ) हद्धीति। एतत्—अधिकरण एव स्वयमधिकरणिककर्त्तृकप्रश्नकरणम्, अतिलज्जनीयमत्यन्तलज्जाकरम्; विशेषतस्तु यानि-परमगौरविताधिकरणिककर्त्तृक-प्रश्नकर्थेन तदुत्तरस्याप्यवश्यदेयत्वात् नितान्तगोपनीयविषयस्य जनन्यैव प्रकाश्य-त्वात् अधिकरण एव प्रकाशेन च सर्वत्रैव प्रकाशसम्भवादिति भावः। अयम् अर्थः मम दारिकायाः "किंनामधेयं मित्रम्" इति विषयः, जनस्य साधारण-लोकस्य। न पुनरधिकरणिकस्य पृच्छनीय इत्यन्वयः। उभयत्रापि "वा कर्त्तरि कृत्ये" इति कर्त्तरि षष्ठी। तथा च ईदृशविषये प्रश्नकर्त्तुरपि लघुत्वापत्त्या गौरवितजनस्यापि लघुत्वापत्तिरित्याशयः।

अतिलज्जनीयमिति "कृत्यल्युटोऽन्यत्रापि" इति कर्त्तर्यनीयः।

(ट) अधि इति। व्यवहारः कस्यचिद्विवादस्य निर्णयः, त्वां तत्सम्बन्धि-

---

বৃদ্ধা। প্রণয়ীর বাড়ী।

অধিকরণিক। তাঁহার প্রণয়ীর নাম কি?।

বৃদ্ধা। (স্বগত) হায়! হায়! ইহা ত অত্যন্ত লজ্জাজনক। (প্রকাশ্যে) সামান্য লোকেরই এ বিষয় জিজ্ঞাসা করা উচিত; কিন্তু বিচারকের নহে।

श्रेष्ठिकायस्थौ। ववहारो पुच्छदि, णत्थि दोसो कधेहि। [घ]

वृद्धा। कधं ववहारो!। जइ एव्वं ता सुणन्तु अज्जमिस्सा। सो क्खु सत्थवाह-विणअदत्तस्स णत्तिओ, साअरदत्तस्स तणओ, सुगहिद-णामहेओ अज्जचारुदत्तो णाम सेट्ठिचत्तरे पडिवसदि; तहिं मे दारिआ जोव्वणसुहं अणुभवदि। [न]

(घ) व्यवहारः पृच्छति, नास्ति दोषः, कथय।

(न) कथं व्यवहारः? यद्येवं तदा शृण्वन्तु आर्य्यमिश्राः। स खलु सार्थवाहविनयदत्तस्य नप्ता (नाती), सागरदत्तस्य तनयः, सुगृहीतनामधेय आर्य्यचारुदत्तो नाम श्रेष्ठिचत्वरे प्रतिवसति; तत्र मे दारिका यौवनसुखमनुभवति।

अर्थः। तथा च कस्याचिद्विवादस्य निर्णयार्थं वयमिमं पृच्छामि, न पुनः व्यापारबन्धनवत् कौतुककरणायेति कुतोऽपि अधिकारिकस्य लघुत्वापत्तिरित्यभिप्रायः।

(घ) श्रेष्ठि इति। दोषः अधिकरणिकस्य लघुत्वापत्तिरूपः प्रकाशने जनन्याः निन्दात्मकरूपः, नास्ति; तस्मादेव छ्वेनोदितव्यम्।

अधिकरণিক। লজ্জা করিবেন না; বিচার, আপনাকে জিজ্ঞাসা করিতেছে।

শ্রেষ্ঠি ও কায়স্থ। বিচার, জিজ্ঞাসা করিতেছে; ইহাতে দোষ নাই; বলুন।

বৃদ্ধা। হায়! এটা বিচার!। যদি এইরূপই হয়, তবে অভিজ্ঞবরগণ শুনুন,—তিনি, বণিক্ বিনয়দত্তের পৌত্র, সাগরদত্তের পুত্র, প্রাতঃস্মরণীয়নামা আর্য্যচারুদত্তনামক; বণিক্ পাড়ায় বাস করেন। আমার কন্যা সেইখানে যৌবনসুখ অনুভব করেন।

शकारः। शुदं अज्जेहिं? । लिहीअदु एदे अक्खला। चालुदत्तेण शह मम विवादे। [प]

श्रेष्ठिकायस्थौ। चारुदत्तो मित्तो त्ति णत्थि दोसो। [फ]

अधि। व्यवहारोऽयं चारुदत्तमवलम्बते। [ब]

(प) श्रुतमार्य्यैः?। लिख्यन्तामेतान्यक्षराणि। चारुदत्तेन सह मम विवादः।

(फ) चारुदत्तो मित्रमिति नास्ति दोषः।

(न) शुदमिति। लिहीअदु कथं शब्दः, अतर्कितभावेन सहसा व्यवहार एवौ। पर्य्यवसानाच्च विस्मयः। तथा पौरः। मन्दहीनं नितान्तप्रगल्भतया सर्वैरेव प्रार्थनापितं नामधेयं यस्य सः। श्रेष्ठिचत्वरे वणिक्प्रसङ्ग।

(फ) श्रेष्ठि इति। मित्रं रतिबन्धुः। इति हेतोः। तथा च चारुदत्तः अतिमहान् पुरुषवरिष्ठो नितान्तदरिद्रश्च, गुणवाहितामात्रादेव च तस्मिन्नासक्तिरित्यतो वसन्तसेनाया वध एव न पुनर्विन्देति नास्ति ते तस्मात् किमपि सम्भावनमिति भावः।

(ब) अधि इति। अवलम्बते माश्रितत्वेन अपराधित्वेन वा अपेक्षते चारुदत्तस्य वचनात् परमेव हि वसन्तसेनाया व्यापत्त्यवधारणादिति भावः।

अहो कीदृशीयं तदानीन्तनी व्यवहारपद्धतिः यत गोमूत्रस्यापि नितान्तवठक व्यवहारे अभियोगमात्रादेव 'वसन्तसेना हता न वा, केन वा' इत्यादिकमविचार्य्यैव विचारमारमत इति।

শকার। আপনারা শুনিলেন ?। এই অক্ষরগুলি লিখুন। চারু-দত্তের সঙ্গে আমার বিবাদ !

শ্রেষ্ঠী ও কায়স্থ। চারুদত্তপ্রণয়ী—ইহাতে দোষ নাই

অধিকরণিক। এই মোকদ্দমা চারুদত্তকে আশ্রয় করিতেছে।

श्रेष्ठिकायस्थौ। एवं लिख। [भ]

अधि। धनदत्त! वसन्तसेना आर्य्यचारुदत्तस्य गृहं गतेति लिख्यतां व्यवहारस्य प्रथमः पादः। कथमार्य्यचारुदत्तोऽपि अस्माभि राह्वाययितव्यः। अथवा व्यवहारस्तमाह्वयति। भद्र! शोधनक! गच्छ, आर्य्यं चारुदत्तं स्वैरमसंभ्रान्तमनुद्विग्नं सादरमाह्वय,—'प्रस्तावेनाधिकरणिकस्त्वां द्रष्टुमिच्छति" इति। (म)

(भ) एवमिव।

(म) अधि इति। धनदत्त इति नाम्ना कायस्थस्य सम्बोधनम्। "अथ दानीं वसन्तसेना क्व गता" इति प्रश्नानन्तरम् "मित्रघरं" "अज्जचारुदत्तस्स णाम" इति च वृद्धाया उक्तेः 'वसन्तसेना आर्य्यचारुदत्तस्य गृहं गता' इति लिखस्व इति बोध्यम्। पादः अंशः। तथा च सति वसन्तसेनाहत्यायां चारुदत्तस्यापि संसर्गः सुनिर्णयः स्यादिति भावः। कथमिति। मादृशक्षुद्रजनेन तादृशस्य महत आह्वाने तद्गौरवहानिः स्यादित्याशयः। अथवेति। अन्यथा व्यावहारनिर्णयासम्भवात्तत्र दोष इत्यभिप्रायः। स्वैरं मन्दमनुपस्वरमित्यर्थः; अन्यथा तत्र न प्रतीत्या चारुदत्तस्य गौरवहानिस्स्यादेव इति भावः। असंभ्रान्तमत्वरम्; त्वराह्वानेऽपि तद्गौरवनाशः स्यादित्याशयः। अनुद्विग्नमिति। अन्यथा तव सम्भ्रमे हृदयस्य व्यस्ततया यथायथोत्तरप्रदानासम्भव इत्यभिप्रायः। सादरमिति। तथात्वे च तस्य गौरवं रक्षितं स्यादिति भावः। प्रस्तावेन व्यवहारप्रकरणेन तन्निर्णयावश्यकत्वेनेत्यर्थः। एतेनात्मन औद्धत्यं परिहृतमिति बोध्यम्।

শ্রেষ্ঠী ও কায়স্থ। এইরূপই বোধ হয়।

আধিকরণিক। ধনদত্ত! 'বসন্তসেনা আর্য্য চারুদত্তের বাড়ী গিয়াছিলেন' মোকদ্দমার এই প্রথম পাদ লেখ। হায়! আর্য্য চারুদত্তকেও আমাদের ডাকাইতে হইল। অথবা মোকদ্দমাই তাঁহাকে

शोध। जं अज्जो आणवेदि। इति निष्क्रम्य चारुदत्तेन सह प्रविश्य च। एदु एदु अज्जो।(थ)

चारु। विचिन्त्य।

परिज्ञातस्य मे राज्ञा शीलेन च कुलेन च।
यत्सत्यमिदमाह्वानमवस्थामभिशङ्कते ॥८॥

सवितर्कं स्वगतम्।

(थ) यदार्या आज्ञापयति। एतु एतु आर्यः।

(थ) शोध इति। निष्क्रम्य—मूर्च्छेति शेषः।

परीति। राज्ञा प्रतिनिधिना राजस्थानपालेन अधिकरणिकेनेत्यर्थः, शीलेन स्वभावेन, कुलेन वंशेन च, परिज्ञातस्य सर्व्वतोभावेनावगतस्य मे मम, इदमाह्वानम्, यत्सत्यं ध्रुवमेव, अवस्थां दारिद्र्यदशाम्, अभिलक्षीकृत्य शङ्कते शङ्कां जनयतीत्यर्थः। निरपराधस्यापि दरिद्रस्य प्रभुजनेनाह्वाने स्वत एवात्मदोषाशङ्का जायत इति भावः। यत्सत्यमित्येकमेव पदमिति प्रागप्युक्तम् ॥८॥

ডাকিতেছে। ভদ্র! শোধনক! যাও, আর্য্য চারুদত্তকে অনুচ্চস্বরে আস্তে আস্তে, অনুদ্বিগ্নভাবে এবং আদরের সহিত ডাক (এবং বল যে) 'বিচারক, আবশ্যকবশতঃ আপনাকে দেখিতে ইচ্ছা করেন।'

শোধনক। আর্য্য যাহা আদেশ করেন। (এই বলিয়া নির্গত হইয়া, চারুদত্তের সহিত পুনরায় প্রবেশ করিয়া) আর্য্য আসুন আসুন।

চারুদত্ত। (চিন্তা করিয়া) রাজপ্রতিনিধি বিচারক, স্বভাব অনুসারে এবং বংশমর্য্যাদায় আমাকে চিনেন; তথাপি এই আহ্বান, আমার অবস্থা অনুসারে নিশ্চয়ই আশঙ্কা জন্মাইতেছে ॥৮॥

ज्ञातो हि किन्नु खलु बन्धनविप्रयुक्तो
मार्गागतः प्रवहणेन मयापनीतः।
चारेक्षणस्य नृपतेः श्रुतिमागतो वा
येनाहमेवमभियुक्त इव प्रयामि ॥८॥

अथवा किं विचारितेन, अधिकरणमण्डपमेव गच्छामि। भद्र! शोधनक! अधिकरणस्य मार्गमादेशय।

ज्ञात इति। बन्धनात् कारागारे आवद्धाभवात् विप्रयुक्तो विभ्रष्टः, मार्गे च मद्वसमीपवर्त्तिना पथा आगतः, अनन्तरञ्च मया, प्रवहणेन स्वकीयेनैव गोशकटेन, अपनीतः कुत्राप्यपसारितः, आर्य्यक इति शेषः, किन्नु खलु ज्ञातो राज्ञा पालकेन कुतोऽपि स्वचक्षुषैव विदितः। वा अथवा, चारो गुप्तचर एव ईक्षणं चक्षुर्यस्य तस्य नृपतेः पालकस्य, श्रुतिमागतः श्रवणं प्राप्तः तेन चारेणैव ज्ञापित इत्यर्थः। येन हेतुना, अहम्, अभियुक्त इव अपराधित्वेन अधिकरणे उपस्थापित इव, एवं प्रयामि राजानुचरैः सह तदाहूतः सन् गच्छामि। आर्य्यकापसारणमेव किमेतदाह्वानस्य कारणमिति समुदायार्थः।

अत्र चारेक्षणस्येति निरङ्गं केवलरूपकम्, अभियुक्त इवेति क्रियोत्प्रेक्षा च, अनयोः परस्परनिरपेक्षतया संसृष्टिः। तथा केवलवृत्तिपूरणार्थमेव हिशब्दप्रयोगात् निरर्थकत्वदोषः, आर्य्यकशब्दस्यानुक्तत्वात् न्यूनपदतादोषश्च। 'ज्ञातार्य्यकः स विदितः किन्नु बन्धमुक्त' इति पाठेन तु तयोः परिहारः।

वसन्ततिलका वृत्तम् ॥८॥

(বিতর্কের সহিত স্বগত) বন্ধন হইতে বিমুক্ত হইয়া পথে উপস্থিত আর্য্যককে আমি গাড়ীতে করিয়া সরাইয়া দিয়াছি, ইহা কি রাজা দেখিতে পাইয়াছেন? অথবা গুপ্তচরই রাজাদের চক্ষু; তাই উক্ত ঘটনা রাজার কাণে আসিয়াছে?। যেহেতু, আমি অভিযুক্তের ন্যায় এই ভাবে যাইতেছি ॥৮॥

शोध। एदु एदु अज्जो। (र)

इति परिक्रामतः।

चारु। अयमहम्। तत् किमपरम्। (ल)

रूक्षस्वरं वाशति वायसोऽयममात्यभृत्या मुहुराह्वयन्ति।
सव्यञ्च नेत्रं स्फुरति प्रसह्य ममानिमित्तानि हि खेदयन्ति॥१०॥

(र) एतु एतु आर्य्यः।

(ल) चारु इति अपरं शुभसूचनं किम् नेत्यर्थः।

तदेवाह रूक्षेति। अयं वायसः काकः रूक्षः श्रुतिपरुषः स्वरो यस्मिन् तद् यथा तथा वाशति शब्दायते। इदमतिभयजनकम्, "दारुणनादस्तरुकोटरोपगो वायसो महाभयदः" इति बृहत्संहितावचनादिति भावः। अमात्यस्य अधिकरणिकरूपस्य राजसचिवस्य भृत्याः शोधनकादयः, मुहुर्वारं वारम्, आह्वयन्ति। अधिकरणे आह्वानं साक्षित्वाभावे भयसूचकमेवेत्याशयः। अत्र भृत्या इति बहुवचनात् शोधनकेन सह अन्योऽपि केचिद् भृत्यास्तत्र गता इति प्रतीयते। प्रसह्य हठात्, सव्यं वामं नेत्रञ्च स्फुरति स्पन्दते। "वामनेत्रस्पन्दनम् बन्धुविच्छेदं धनहानिं वा" इति गर्गवचनादिदमप्यशुभसूचकमेवेत्यभिप्रायः। हि तस्मात्, अनिमित्तानि इमानि दुर्लक्षणानि, मम खेदयन्ति पीडयन्ति हृदयमिति शेषः; अमङ्गलाशङ्कयेति भावः।

अत्रानिमित्तसूचनकार्य्यं प्रति बहुकारणाभिधानात् समुच्चयोऽलङ्कारः। तथा खेद-

---

অথবা তর্কের প্রয়োজন কি? বিচারালয়েই যাই। শোধনক! বিচারালয়ের পথ বলিয়া দাও।

শোধনক। আসুন আসুন।

ইহার পর দুইজনেই পদক্ষেপ করিতে লাগিলেন।

চারুদত্ত। (আশঙ্কার সহিত) তা, আর কি হইবে?।

এই কাক রুক্ষস্বরে শব্দ করিতেছে, রাজসচিব বিচারকের ভৃত্য

शोध । एदु एदु अज्जो सैरं असम्भन्तं । (क)

चारु । परिक्रम्याग्रतोऽवलोक्य च ।

शुष्कवृक्षस्थितो ध्वाङ्क्ष आदित्याभिमुखस्तथा ।
मयि चोदयते वामं चक्षुर्घोरमसंशयम् ॥११॥

(क) एतु एतु आर्य्यः स्वैरमसम्भ्रान्तम् ।

कर्मोक्तस्य कर्त्रानभिधानात् न्यूनपदतादोषः 'ममानिमित्तानि मनस्तुदन्ति' इति पाठेन समाधेयः । उपजातिर्वृत्तम् ॥१०॥

(क) शोध इति । स्वैरं मन्दम्, असम्भ्रान्तमत्यस्तञ्च यथा स्यात्तथा एतु आगच्छतु । भवतस्त्वराव्यस्तत्वयोर्न किञ्चित् कारणमस्तीति भावः ।

शुष्केति । शुष्कवृक्षस्थितः, तथा आदित्याभिमुखः, ध्वाङ्क्षः काकः घोरं भयङ्करम्, वामं चक्षुः, मयि मां प्रतीत्यर्थः, चोदयते प्रेरयति, अत्रासंशयं मां प्रत्येव वामं चक्षुश्चोदयते, नान्यन्तं प्रत्यर्थे संशयो नास्तीत्यर्थः । असंशयमिति अमार्थोऽयं भावः ।

इदञ्चातीवभयसूचकम् । यथा वृहत्संहितायां वराहः—

'छिन्नाग्रेऽरूक्षेऽदः कलहः शुष्कद्रुमस्थिते ध्वाङ्क्षे ।
पुरतश्च पृष्ठतो वा गोमयसंस्थे धनप्राप्तिः ॥
ऐन्द्रादिदिग्वलाकी सूर्य्याभिमुखो गृहे रुवन् गृहिणः ।
राजभय-चौर-बन्धन-कलहाः स्युः पशुभयञ्च ॥

বার বার ডকিতেছে এবং বামনেত্র স্পন্দিত হইতেছে; সুতরাং এই সকল দুর্লক্ষণ আমার চিত্তকে উৎপীড়িত করিতেছে ॥১০॥

শোধনক। আর্য্য! আসুন আপনি ধীরে ধীরে ও অব্যস্তভাবে আসুন।

চারুদত্ত। (পদক্ষেপপূর্ব্বক সম্মুখে দৃষ্টিপাত করিয়া)

पुनरन्यतोऽवलोक्य । अये ! कथमयं सर्पः ।

मयि विनिहितदृष्टिर्भिन्ननीलाञ्जनाभः—
स्फुरित-विततजिह्वः शुक्लदंष्ट्रा-चतुष्कः ।
अभिपतति सरोषो जिह्मिताध्मातकुक्षि—
र्भुजगपतिरयं मे मार्गमाक्रम्य सुप्तः ॥१२॥

अत्र ध्वाङ्क्ष इत्यस्य दुःश्रवत्वेऽपि भयानकरसत्वाद् गुणत्वमेव 'वक्तरि क्रोधसं-युक्ते' इत्यादिसाहित्यदर्पणोक्तेः ॥११॥

मयीति । मयि विनिहिता निक्षिप्ता दृष्टिर्येन सः, भिन्नं गलितं नीलञ्च यदञ्जनं कज्जलं तस्य आभा इव आभा देहकान्तिर्यस्य सः, स्फुरिता स्पन्दिता वितता लम्बिता च जिह्वा यस्य सः, शुक्लं शुभ्रवर्णं दंष्ट्राचतुष्कं दन्तचतुष्टयं यस्य सः, जिह्मितं वक्रीकृतम् आध्मातं वायुपूरितञ्च कुक्षि उदरं यस्य सः, तथा मे मम मार्गं गमनपथम्, आक्रम्य व्याप्य, सुप्तः सुप्तवत् पातितदेहः, अयं भुजगपति-र्महत्सर्पः, सरोषः सन् अभिपतति ममाभिमुखमागच्छति ।

अत्र प्रथमपादे लुप्तोपमालङ्कारः ।

सर्पस्याभिमुखागमनमपि गन्तुर्नानाविधभयं सूचयति । यथा तत्रैव वराहः—

শুষ্কবৃক্ষস্থিত এবং সূর্য্যাভিমুখ কাক, ভয়ঙ্কর বাম নয়ন, আমার প্রতি নিক্ষিপ্ত করিতেছে; ইহাতে সংশয় নাই ॥১১॥

(পুনরায় অন্যদিক্ দেখিয়া) ওহে! এই যে আর একটা সাপ!।

এই বৃহৎ সর্প ক্রোধের সহিত আমার অভিমুখে আসিতেছে; এ, আমার প্রতি দৃষ্টিনিক্ষেপ করিতেছে, গলিত নীল কজ্জলের ন্যায় ইহার বর্ণ, ইহার লম্বিত জিহ্বা স্পন্দিত হইতেছে, দন্তচতুষ্টয় শুভ্রবর্ণ, উদর বায়ুপূর্ণ এবং বক্রীকৃত এবং এ, পূর্ব্বে পথ আক্রমণ করিয়া শয়ন করিয়াছিল ॥১২॥

अपि च । इदम्— [श]

खलति चरणं भूमौ न्यस्तं, न चार्द्रतमा मही ;
स्फुरति नयनं, वामो बाहुर्मुहुश्च विकम्पते ।
शकुनिरपरश्चायं तावद्विरौति हि नैकशः
कथयति महाघोरं मृत्युं नचात्र विचारणा ॥१३॥

'फणिनोऽभिमुखागमोऽरिसङ्गं कथयति बन्ध-वधञ्च यातुः । '

मालिनी वृत्तम् ॥१२॥

(श) अपि चेति । इदं वक्ष्यमाणं सकलमपि अशुभसूचकमित्यर्थः ।

खलतीति । भूमौ न्यस्तम् अर्पितं चरणम्, खलति स्थानान्तरे अवसर्पते । ननु आर्द्रतया पिच्छिलायां भूमौ चरणं, खलत्येव तत्र को दोष इत्याह न चेति । मही सा भूमिश्च, न आर्द्रतमा अत्यन्तार्द्रतया न पिच्छिलेत्यर्थः । इदमेकं दुर्लक्षणमिति भावः । वाम इति काकाक्षिगोलकन्यायेन लिङ्गव्यत्ययेन पूर्वापरयोरुभयोरप्यन्वेति । तथा च वामं नयनं स्फुरति स्पन्दते । इदमपरं दुर्लक्षणमित्याशयः । वामो बाहुश्च मुहुर्वारं वारं विकम्पते स्पन्दते । इदमन्यत् दुर्लक्षणमित्यभिप्रायः । अपरश्च अयं शकुनिः पक्षी, नैकशो वारं वारम्, विरौति विरुद्धं शब्दायते । इदञ्चान्यत् दुर्लक्षणमिति भावः । महाघोरं नितान्तक्लेशपूर्वकत्वादतीवभयङ्करं मृत्युम्, कथयति कथनवत् स्पष्टं सूचयति, उक्तं समस्तं दुर्लक्षणमिति शेषः । अत्र मृत्युकथनविषये विचारणा वितर्को न प्रवर्त्तत इति शेषः, किन्तु निश्चय एवेति भावः ।

अत्रभूमेरार्द्रत्वरूपकारणाभावेऽपि खलनरूपकार्य्योत्पत्तेर्विभावना, तथा मृत्युसूचनरूपं कार्य्यं प्रति बहुतरकारणोपन्यासात् समुच्चयश्च, अनयोरङ्गाङ्गिभावेन सङ्करः ।

অথবা, এই ।

ভূতলে পদক্ষেপ করিবামাত্র তাহা স্খলিত হইতেছে ; কিন্তু সে ভূতল

सर्व्वथा देवताः स्वस्ति करिष्यन्ति। [ष]

शोध। एदु एदु अज्जो। इमं अधिअरणमण्डवं पविसदु अज्जो। [स]

(स) एतु एतु आर्य्यः। इममधिकरणमण्डपं प्रविशतु आर्य्यः।

तथा प्रथमे पादे भूमावित्यनेन प्रक्रम्य पुनर्महीत्युपादानात् प्रकृतिविषयो भग्नप्रक्रमता-दोषः, सच 'न साद्रं तमा पुनः' इति पाठेन समाधेयः। तृतीये हिशब्दस्य केवलवृत्ति-पूरणार्थत्वात् निरर्थकत्वदोषः, चतुर्थे च कथयतीत्यस्य कर्त्तृपदानुल्लेखात् न्यूनपद-तादोषश्च, 'शकुनिरपरश्चाय भूयो विरौत्यखिलं त्विदम्' इति पाठे तु तयोः परिहारः।

यात्राकाले गन्तुश्चरणस्खलने दुर्लक्षणत्वं यथा वसन्तराजशाकुने—

स्वपाद-यानस्खलनं नृपाणां भङ्गः क्वचिद्यानपलायनञ्च।

द्वाराभिघाताध्वग-शस्त्रपाताः प्रस्थानविघ्नं कथयन्ति यातुः॥"

अन्येषां प्रमाणन्तु प्रागेवोक्तम्।

नैकश इति "गमिकर्म्मीकृतनैकनीवृता" इत्यादिवत् अभावार्थकेन न-शब्देन समासात् "स्वरेऽक्षरविपर्य्ययः" इति न भवति। हरिणी वृत्तम्॥१३॥

(ष) सर्वथेति। स्वस्ति मङ्गलम् देवतानां चिराराधनेन सन्तोषितत्वादिति भावः।

অত্যন্ত আর্দ্র নহে। বাম নয়ন স্ফুরিত হইতেছে, বামবাহু বার বার কাঁপিতেছে এবং এই আর একটা পক্ষী বহুবার বিরুদ্ধ রব করিতেছে। অতএব এই সকল দুর্লক্ষণ, ভয়ঙ্কর মৃত্যু সূচনা করিতেছে; ইহাতে কোন সন্দেহ নাই॥১৩॥

নিশ্চয়ই দেবতারা মঙ্গল করিবেন।

শোধনক। আসুন আর্য্য আসুন; এই বিচারালয়ে প্রবেশ করুন।

चारु। प्रविश्य समन्तादवलोक्य। अहो! अधिकरणमण्डपस्य परा श्रीः। इह हि— (ह)

चिन्तासक्त-निमग्न-मन्त्रि-सलिलं दूतोर्म्मिशङ्खाकुलं
पर्य्यन्त-स्थित-चार-नक्र-मकरं नागाश्व-हिंस्राश्रयम्।

(ह) चारु इति। परा उत्तमा श्रीः शोभा। "दूरानात्मोत्तमाः पराः" इत्यमरः। हि यस्मात्, इह अधिकरणमण्डपे।

चिन्तेति। चिन्तायां राज्यविषयकविविधभावनायाम् आसक्ता निविष्टाः निमग्ना निमग्नवत् निश्चलमवस्थिता मन्त्रिणो नानाविधमन्त्रणादायका इदानीन्तनव्यवहाराजीवमानो जनाः सलिलानीव यत्र तत्, उभयोरपि तादृशमन्त्रिसलिलयोरगाधस्वभावत्वादिति भावः। दूताः, ऊर्म्मयस्तरङ्गाः शङ्खाश्च ते इवेति दूतोर्म्मिशङ्खास्तैराकुलं व्याप्तम्; दूतानामूर्म्मिशङ्खानाञ्च उभयेषामपि जङ्गमत्वादित्याशयः। पर्य्यन्ते प्रान्तदेशे स्थिताश्चारा गुप्तचराः, नक्राः कुम्भीराः मकराश्च स्वनामख्याता जलजन्तुविशेषा इव यत्र तत्; नक्रमकराणामिव गुप्तचराणामपि प्रथमं गुप्तभावेनावस्थाय पश्चात् सहसैवाक्रमणादित्यभिप्रायः। नागाश्वा हस्तिघोटका हिंस्रा ग्राहादिजलजन्तुविशेषा इव तैराश्रीयत इति तत्; उभयेषामपि विशालाकृतित्वादिति भावः। नाना विविधं वाशन्ति शब्दायन्ते इति नानावाशका वादिप्रतिवादिनो जनाः, कङ्कपक्षिणः (काङ्गिला इति ख्याताः) पक्षिविशेषा इव अविरतरवकारित्वादित्याशयः, तैः रुचिरं मनोहरम्। कायस्था लेखकजनाः सर्पा इव कुटिलस्वभावत्वादित्यभिप्रायः, तेषामास्पदं प्रतिष्ठास्थानम्। तथा

চারুদত্ত। (প্রবেশপূর্ব্বক সকলদিকে দৃষ্টিপাত করিয়া) বিচারালয়ের কি উৎকৃষ্ট শোভা হইয়াছে। কারণ, এখানে—

রাজার বিচারকার্য্যের গৃহটী, হিংসাচরণ দ্বারা সমুদ্রের ন্যায় আচরণ করিতেছে। কারণ, নানাবিধ চিন্তায় আসক্ত ও নিশ্চলভাবে অবস্থিত উকিলগণ, অগাধ জলরাশির ন্যায় রহিয়াছেন; তরঙ্গ ও শঙ্খের ন্যায় দূত-

नाना-वाशक-कङ्क-पक्षि-रुचिरं (१) कायस्थ-सर्पास्पदं
नीति-क्षुण्ण-तटञ्च राज-करणं (२) हिंस्रैः समुद्रायते ॥१४॥

नीतिर्नयः क्षुण्णतटं भग्नतीरमिव यत्र तच्च; उभयोरपि विषमत्वात् दुर्गमत्वाच्चेति भावः। राज्ञः करणं कर्म्म विचारात्मककार्य्यं गृहमित्यर्थः, हिंस्रैः हिंसास्वभावैराचरणैः एकत्र दैवप्रहारादिभिः अन्यत्र तरङ्गहारकताड़नादिभिः, समुद्रायते समुद्र इवाचरति।

अत्र समुद्रायत इत्युपमानुसारात् सर्व्वत्रैव उक्तविध उपमितसमास एव न्याय्य इति सर्व्वत्र लुप्तोपमाः समुद्रायत इति क्यङ्गतोपमा च इत्येतासामङ्गाङ्गिभावेन सङ्करः। अमरकोषटीकादिषु रव,नाद्यादिभिर्विशेषणैरेव विशेष्योपस्थापकत्वाङ्गीकारात् प्रथमहिंस्रपदेन वाशकपदेन च ग्राहादिजलजन्तूनां वादिप्रतिवादिनाञ्चोपस्थापनात् स्पष्टतत्तदनभिधानेऽपि न न्यूनपदत्वदोषः।

नागाश्वहिंस्राश्रयमिति ज्ञातानभिधानलक्षणत्वादस्यायामपि कर्म्मण्यल प्रत्ययः। अथवा नागाश्वहिंस्राणामाश्रयोऽवस्थितिर्यस्मिन्निति गत्यन्तराभावात् व्यधिकरणबहुव्रीहिरेवाश्रयणीयः। अन्यथा पुंलिङ्गत्वापत्तिरिति ध्येयम्।

अधिकरणमण्डपान्तर्गतं किञ्चिद् गृहमेव विचारस्थानं तस्यैव चेयं वर्णनेति न "इह हि" इति प्रागुक्तग्रन्थेन सह विरोधः।

"करणं हेतुकर्म्मणोः" इत्यादि मेदिनी। शार्द्दूलविक्रीडितं वृत्तम् ॥१४॥

গণে ইহা ব্যাপ্ত রহিয়াছে; কুম্ভীর ও মকরগণের ন্যায় গুপ্তচরগণ প্রান্তভাগে অবস্থান করিতেছে; হস্তী ও ঘোটকের ন্যায় হিংসকগণের ইহা আশ্রয়; কঙ্কপক্ষী (হাড়গিলা) সমূহের ন্যায় নানাবিধ শব্দকারী বাদি-প্রতিবাদিগণ দ্বারা ইহা মনোহর হইয়াছে; সর্পের ন্যায় কায়স্থগণের ইহা আশ্রয় এবং ভগ্ন তীরের ন্যায় ইহার নীতি অত্যন্ত দুর্গম ॥১৪॥

---

(१) ···रचितम्।

(२) राजभवनम्।

भवतु। प्रविशन् शिरोघातमभिनीय सवितर्कम्। अहह! इदमपरम्। (च)

सव्यं मे स्पन्दते चक्षुर्विरौति वायसस्तथा।
पन्थाः सर्पेण रुद्धोऽयं स्वस्ति चास्मासु दैवतः ॥१५॥

तावत् प्रविशामि। इति प्रविशति।

(च) भवत्विति। अपरं दुर्लक्षणमित्यर्थः। एतत्प्रमाणन्तु "स्वपादि"त्यादावुक्तमेव।

सव्यमिति। मे मम सव्यं वामं चक्षुः स्पन्दते, तथा वायसः काको विरौति शब्दायते; अयं पन्थाः सर्पेण रुद्धः, आसीदिति शेषः। अयं शिरोघातस्य अपरं दुर्लक्षणमित्याशयः। इदानीन्तु दैवत आराधितो देव एव अस्मासु स्वस्ति मङ्गलम् करिष्यति एभिः सूचितेष्वनिष्टेष्विति शेषः।

अत्र करिष्यतीत्यादीनां पदानामनुक्ततया प्रसक्तोऽपि न्यूनपदतादोषः वक्तुर्विषाद-मग्नतया प्रत्युत गुण एव, "उक्तावानन्दमग्नादेः स्यान्न्यूनपदता गुणः" इति साहित्यदर्पणात्। पूर्वं क्रमेणैकैकं दुर्लक्षणमभिधाय केवलमनिष्टमाशङ्कितम्, इदानीन्तु तत् सकलं युगपदुक्त्वा आशङ्कितस्य तस्यानिष्टस्य अवश्यम्भाविता प्रतिपादितेति न पौनरुक्त्यम् ॥१५॥

হউক। (প্রবেশ করতঃ, মস্তকে আঘাত অভিনয় করিয়া, বিতর্কের সহিত) অহহ! এই আর একটা দুর্লক্ষণ।

বাম নয়ন স্পন্দিত হইয়াছিল, কাক ডাকিয়াছিল এবং সেই পথ সর্পবিরুদ্ধ ছিল। যাহা হউক; ইষ্ট দেবতাই আমাদের মঙ্গল করিবেন ॥১৫॥

প্রবেশ করি। (এই বলিয়া প্রবেশ করিলেন)

अधि । अयमसौ चारुदत्तः । य एषः— (क)

घोणोन्नतं मुखमपाङ्गविशालनेत्रं
नैतद्धि भाजनमकारणदूषणानाम् ।
नागेषु गोषु तुरगेषु तथा नरेषु
नह्याकृतिः सुसदृशं विजहाति वृत्तम् ॥१६॥

(क) अधि इति । अत्र असावित्यदःशब्दस्तच्छब्दसमानार्थः । तथाच अयं स चारुदत्त इत्यर्थः । यथा दर्पणः— 'इदमेतददःशब्दास्तच्छब्दसमानार्थतया विधेया एव भवितुं युक्ताः' इति ।

घोणोन्नतमिति । घोणा नासिका उन्नता यत्र तत्, तथा अपाङ्गयोः प्रान्तयोः विशाले प्रान्तपर्य्यन्तविस्तृते इत्यर्थः नेत्रे नयनद्वयं यत्र तत् तादृशम् मुखम्, य एष बिभर्त्तीति शेषः । हि तस्मात्, एतत् चारुदत्तरूपं वस्तु, अकारणदूषणानां निष्कारणदोषारोपाणाम्, न भाजनम् न पात्रम् न विषय इत्यर्थः । तथा च नागेषु हस्तिषु गोषु, तुरगेषु अश्वेषु तथा नरेषु मनुष्येषु च, आकृतिः शुभः अशुभो वा आकारः, सुसदृशं सर्वथा योग्यं शुभत्वे सत् अशुभत्वे चासदित्यर्थः, वृत्तं चरित्रम्, नहि विजहाति न खलु परित्यजति । अतएवास्यापि शुभलक्षणा आकृतिरियं न सद्वृत्तमतिक्रामेदिति भावः ।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः नरेष्विति प्रस्तुतेन सह अप्रस्तुतानां नागादीनां वृत्तरूपैकधर्म्माभिसम्बन्धात् दीपकस्य, अनयोरङ्गाङ्गिभावेन सङ्करः ।

घोणोन्नतमिति 'आहिताग्न्यादिषु वा परम्' इत्युन्नतशब्दस्य परनिपातः । वसन्ततिलका वृत्तम् ॥१६॥

অধিকরণিক । এই সেই চারুদত্ত । যে ইনি—

উন্নত নাসিকাযুক্ত এবং অপাঙ্গপর্য্যন্ত-বিস্তৃত-নয়নযুগল-সমন্বিত

चारु । भोः ! अधिकृतेभ्यः स्वस्ति ? । हंहो नियुक्ताः ! अपि कुशलं भवताम् ? । (ख)

अधि । ससम्भ्रमम् । स्वागतमार्य्यस्य ? । भद्र ! शोधनक ! आर्य्यस्यासनमुपनय ।

शोध । आसनमुपनीय । एदं आसणं, एत्थ उवविसदु अज्जो । (ग)

शकारः । सक्रोधम् । आगदेसि ले इत्थिआघादआ ! आग-

(ग) इदमासनम्, अत्रोपविशतु आर्य्यः ।

(घ) आगतोऽसि स्त्रीघातक ! आगतोऽसि ? । अहो न्याय्यो व्यव-

(ख) चारु इति । अधिकृतेभ्यः व्यवहारदर्शने राज्ञा अधिकारीकृतेभ्यः अधिकरणिकेभ्य इत्यर्थः, 'नमः स्वस्ति—' इत्यादिना चतुर्थी । स्वस्ति मङ्गलं किम् । हंहो इत्येकमेव सम्बोधनसूचकमव्ययम् । नियुक्ता व्यवहारसम्पादने राज्ञा व्यापारिताः कायस्थादयः ॥

(घ) शकार इति । अहो इत्यादिकं सोल्लुण्ठनोक्तिद्वयम् । न न्याय्यो नापि धर्म्यो

মুখমণ্ডল ধারণ করিতেছেন। ইনি, অকারণ দোষারোপের পাত্র হইতে পারেন না। কারণ, হস্তী, গো, অশ্ব এবং মনুষ্য—ইহাদের আকৃতি, স্বযোগ্য চরিত্রকে পরিত্যাগ করে না ॥১৬॥

চারুদত্ত। বিচারকমহাশয়ের মঙ্গল ত ?। (কার্য্যবিশেষে) নিযুক্ত মহাশয়গণ! আপনাদেরও কুশল ত ?।

অধিকরণিক। (সম্ভ্রমের সহিত) আর্য্যের শুভাগমন ত ?। ভদ্র! শোধনক! আর্য্যের নিমিত্ত আসন আনয়ন কর।

শোধনক। (আসন আনয়ন করিয়া) এই আসন, আর্য্য ইহাতে উপবেশন করুন।

দেসি ?। অহো ণাএ ববহালে! অহো ধম্মে ববহালে! জং এদ-দাহ— ইত্থিআঘাদকাহ আশণে দীঅদি। সগর্ব্বম্। ভোদু, দং দীঅদু। (ঘ)

অধি। আর্য্য চারুদত্ত! অস্তি ভবতোঽস্যা আর্য্যায়া দুহিত্রা সহ প্রসক্তিঃ প্রণয়ঃ প্রীতির্বা ?। (ঙ)

চারু। কস্যাঃ ?।

অধি। অস্যাঃ। ইতিবসন্তসেনামাতরং দর্শয়তি।

হারঃ! অহো ধর্ম্ম্যো ব্যবহারঃ! যদেতস্মৈ স্ত্রীঘাতকায় আসনং দীয়তে। ভবতু, ননু দীয়তাম্।

ইত্যাশয়ঃ। তত্র কারণমাহ যদিতি তথা চ স্ত্রীঘাতকতয়া পাপিনো দণ্ডার্হস্য চ অধিকরণ এব আসনদানেন গৌরবসূচনাদন্যায্যঃ অধর্ম্ম্যশ্চায়ং ব্যবহার ইতি ভাবঃ। ননু দীয়তামিতি অচিরাদেবাস্য দুরাচরণস্য ফলং প্রাপ্স্যসীতি ভাবঃ।

(ঙ) অধি ইতি। প্রসক্তিঃ—সম্পূর্ণ এব রমণসংসর্গঃ; প্রণয়ঃ—পরস্পরোপকারনিবন্ধনা আন্তরিক্যেব প্রমাদবন্ধুতা; প্রীতিঃ— মধুরালাপাদিমাত্রেণ বহির্মাত্রেণৈব সৌহার্দ্দম্। অস্তীতি কাকুঃ, অস্তি কিমিত্যর্থঃ।

শকার। (ক্রোধের সহিত) আসিয়াছিস্ ? ওরে স্ত্রীহত্যাকারী! আসিয়াছিস্ ?। ওহে! কি ন্যায়সঙ্গত বিচারালয়! কি ধর্ম্মসঙ্গত বিচারালয়! যে, এই স্ত্রীহত্যাকারীকে আসন দেওয়া হইতেছে!। (গর্ব্বের সহিত) হউক, ওহে! দাও।

অধিকরণিক। আর্য্যচারুদত্ত! এই আর্য্যার কন্যার সহিত আপনার আসক্তি, উপকারনিবন্ধন প্রণয়, কিম্বা আলাপমাত্রের ভালবাসা আছে কি ?।

চারুদত্ত। কাহার ?।

चारु। उत्थाय। आर्य्ये! अभिवादये। (च)

वृद्धा। जाद! चिरं मे जीव। स्वगतम्। अअं सो चारुदत्तो। सुणिक्खित्तं क्खु दारिआए जोव्वणं। (छ)

अधि। आर्य्ये! गणिका तव मित्रम्?। (ज)

(च) जात! चिरं मे जीव। अयं स चारुदत्तः। सुनिक्षिप्तं खलु दारिकया यौवनम्।

अत्रार्य्याया इत्यभिधानादेतदेव प्रतीयते यत् इदानीमिव तदानीं वेश्यावृत्ति-मात्रेणैव वेश्यासु नावज्ञासीत्, प्रत्युत इतराचारस्य साधुत्वे तासां सम्मानगौरवमेवासीदिति।

(च) चारु इति। पत्नीस्थानवर्त्तिन्या वसन्तसेनाया मातृत्वेन वृद्धायाः श्वश्रूस्थानवर्त्तित्वादेवेदमभिवादनमिति बोध्यम्।

(छ) वृद्धेति। 'अयं स चारुदत्तः' इत्यनेन पूर्वं न दृष्ट इति प्रतीयते। दारिकया कन्यकया वसन्तसेनया, यौवनं सुनिक्षिप्तम् साध्वेवार्पितम्, अस्मिन्निक्षिप्तत्वात् अस्य च विनयसौजन्यसौन्दर्य्यादिना महापुरुषत्वेनैव भवितव्यत्वादिति भावः।

(ज) अधि इति। गणिका प्रकरणात् वसन्तसेना, तव मित्रं रतिबन्धुः किमिति काकुः।

অধিকরণিক। ইনি। (এই বলিয়া বসন্তসেনার মাতাকে দেখাইলেন)

চারুদত্ত। (উঠিয়া) আর্য্যে! নমস্কার করি।

বৃদ্ধা। বৎস! তুমি আমার চিরজীবী হও। (স্বগত) এই সেই চারুদত্ত। আমার কন্যা নিজের যৌবনকে ভাল স্থানেই নিক্ষেপ করিয়াছেন।

অধিকরণিক। আর্য্য! বেশ্যা আপনার প্রণয়িনী?।

चारु। लज्जां नाटयति। (भ)

शकारः। लज्जाए भीलुदाए वा
चालित्तं अलिए! णिगूहिदुं।
सअं मालिअ अत्थकालणा
दाणिं गूहदि ण तं हि भट्टके ॥१७॥

श्रेष्ठिकायस्थौ। अज्जचारुदत्त! भणाहि, अलं लज्जाए, ववहारो क्खु एसो। (ञ)

---

(१७) लज्जया भीरुतया वा चारित्रमलीक! निगूहितुम्।
स्वयं मारयित्वा अर्थकारणादिदानीं गूहति न तद्धि भट्टकम् ॥

(ञ) आर्य्यचारुदत्त! भण, अलं लज्जया, व्यवहारः खल्वेषः।

(भ) चारु इति। नाटयति मुखावनमनादिनेति शेषः।

लज्जयेति। हे अलीक! असत्कार्य्यकरणादेव लोकानामप्रिय! लज्जया भीरुतया वा, चारित्रम् आत्मचरित्रम्, णिगूहिदुं सम्वरीतुम्, इच्छसीति शेषः। नैतत् कदापि शक्यमिति भावः। अयं व्यवहारोऽपि न साधुरित्याह स्वयमिति। अर्थकारणात् धननिमित्तम्, स्वयं मारयित्वा स्त्रियं हत्वा, इदानीं गूहति तन्मारणं स्वं हन्तीति गोपायति भवानिति शेषः; तत् गूहनं न भट्टकं न भद्रजनोचितं न साधु अनयोग्यमित्यर्थः।

वैतालीयं छन्दः ॥१७॥

চারুদত্ত। (লজ্জা অভিনয় করিলেন)

শকার। হে অপ্রিয়; তুমি লজ্জা কিংবা ভয়বশতঃ চরিত্র গোপন করিতে ইচ্ছা করিয়াছ। ধনের জন্য নিজে স্ত্রী হত্যা করিয়া, এখন গোপন করিতেছ; তাহা ভাল হইবে না॥ ১৭॥

চারু। সলজ্জম্। ভো অধিকৃতাঃ! ময়া কথমীদৃশং বক্তব্যম্, যথা গণিকা মম মিত্রমিতি। অথবা যৌবনমত্রাপরাধ্যতি, ন চারিত্রম্। (ট)

অধি। ব্যবহারঃ সবিঘ্নোঽয়ং ত্যজ লজ্জাং হৃদি স্থিতাম্।
ব্রূহি সত্যমলং ধৈর্য্যং ছলমত্র ন গৃহ্যতে ॥১৮॥

(ট) চারু ইতি। অধিকৃতাঃ! ব্যবহারদর্শনাধিকারিণঃ!। ময়েতি। ঈদৃশবৃত্তান্তস্য আত্মনৈব প্রকাশনে গুরুতরলজ্জাবির্ভাবাত্ তেনৈব চ বাধ্যমানত্বাদিতি ভাবঃ। অত্র গণিকায়া মিত্রত্বে। চারিত্রং স্বভাবঃ। তথা চ উদ্দামযৌবনাবেগবশাদেব গণিকা মিত্রীকৃতা, ন পুনঃ স্বভাবদোষাদিত্যাশয়ঃ।

ব্যবেতি। অয়ং ব্যবহারঃ সবিঘ্নঃ, মহামূর্খেণাপি অত্যন্তধূর্ত্তেন শকারেণোপস্থাপিতত্বাদিতি ভাবঃ। অতএব হৃদি স্থিতাং লজ্জাং ত্যজ, সত্যং ব্রূহি, ধৈর্য্যমবলম্ব্য অলং ধৈর্য্যমবলম্ব্য তূষ্ণীমবস্থানেনালমিত্যর্থঃ, তথা অত্র ব্যবহারে ছলং কপটাচরণং ন গ্রহ্যতে, ময়েতি শেষঃ।

অত্র অবলম্ব্যেত্যনভিধানেন প্রসক্তোঽপি ন্যূনপদতাদোষঃ, বক্তুঃ সজ্জনাভিযোগদর্শনেন দুঃখময়ত্বাৎ প্রত্যুত গুণ এব, "উক্তাবানন্দমগ্নাদেঃ স্যান্ন্যূনপদতা গুণঃ" ইতি সাহিত্যদর্পণাৎ ॥১৮॥

শ্রেষ্ঠী ও কায়স্থ। আর্য্য চারুদত্ত! বলুন, লজ্জা করিবেন না; এটা মোকদ্দমা।

চারুদত্ত। (লজ্জার সহিত) বিচারকমহাশয়! আমি (নিজ মুখেই) এরূপ বলিব কি করিয়া, যে বেশ্যা আমার প্রণয়িনী। অথবা এ বিষয়ে যৌবনই অপরাধী, কিন্তু চরিত্র নহে।

অধিকরণিক। এই মোকদ্দমা স্বভাবতই বিঘ্নসমন্বিত; সুতরাং আপনি হৃদয়স্থিত লজ্জা পরিত্যাগ করুন; সত্য বলুন; ধীর হইয়া থাকিবেন না; ইহাতে কপটতা গ্রহণ করা হয় না॥ ১৮।

अलं लज्जया, व्यवहारस्त्वां पृच्छति । (ठ)

चारु । अधिकृत ! केन सह मम व्यवहारः ? ।

शकारः । साटोपम् । अले ! मए शह ववहाले । (ड)

चारु । त्वया सह मम व्यवहारः सुदुःसहः । (ढ)

शकारः । अलि इत्थिआघातआ ! तं तादिशिं लअण-शद-भूशणिअं वशन्तशेणिअं मालिअ, शम्पदं कवड़-कावड़िके भविअ णिगूहेशि ? । (ण)

(ड) अरे ! मया सह व्यवहारः ।

(ण) अरे स्त्रीघातक ! तां तादृशीं रत्न-शत-भूषणिकां वसन्त-सेनिकां मारयित्वा, साम्प्रतं कपट-कापटिको भूत्वा निगूहसि ? ।

(ठ) अलमिति । व्यवहार एव त्वां पृच्छति, न पुनः कौतुकम्, येन तदभिधानमनावश्यकं स्यादिति भावः ।

(ड) शकार इति । साटोपं सगर्वम् ।

(ढ) चारु इति । सुदुःसहः अतीवदुःसह इत्यर्थः, "समे विरोधो मैत्री च" इत्यादिमहाभारतोक्त्या दुर्जनेन सह सज्जनव्यवहारस्य नितान्तदुःखकरत्वादिति भावः ।

(ण) शकार इति । रत्नशतं स्वर्णादिबहुतररत्नं भूषणं यस्यास्ताम् । कपटेन

লজ্জা করিবেন না ; মোকদ্দমাই আপনাকে জিজ্ঞাসা করিতেছে ।

চারুদত্ত । বিচারকমহাশয় ; কাহার সহিত আমার মোকদ্দমা ?

শকার । (গর্বের সহিত) ওরে ; আমার সহিত ।

চারুদত্ত । তোমার সহিত আমার মোকদ্দমা যে বড়ই দুঃসহ ।

শকার । ওরে স্ত্রীঘাতক ; শতরত্নালঙ্কারে অলঙ্কৃত এবং তাদৃশ সুন্দরী

चारु। असम्बद्धः खल्वसि। [त]

अधि। आर्य्यचारुदत्त! अलमनेन। ब्रूहि सत्यम्। अपि-गणिका तव मित्रम्?। [थ]

चारु। एवमेव।

अधि। आर्य्य! वसन्तसेना क्व?।

चारु। गृहं गता।

छलेन कापटिको वञ्चकः। निगूहसि तं वृत्तान्तं गोपयसि। नैतत् न्याय्यं नवा-स्वोद्धारकमिति भावः।

(त) चारु इति। असम्बद्धः खल्वसि,—त्वं वसन्तसेनया सह सर्व्वथैव बन्धुतासम्बन्धरहितः मया सह च शत्रुतासम्बन्धरहितोऽसीत्यर्थः; तथापि कथ-मिममभियोगमुपस्थापयसीति भावः। केचित्तु अस्याभियोगस्य मिथ्यात्वादसम्बद्ध-प्रलापी असीत्यर्थं ब्रुवते।

(थ) अधि इति। अनेन, शकारेण सहालापेन, अलम्; निष्फलत्वा-दिति भावः।

সেই বসন্তসেনাকে হত্যা করিয়া, এখন কপটাচারী হইয়া, তাহা গোপন করিতেছ?

চারুদত্ত। এ ঘটনায় তুমি সম্পূর্ণ সম্পর্কবিহীন রহিয়াছ।

অধিকরণিক! আর্য্য চারুদত্ত, উহার সহিত আলাপে প্রয়োজন নাই। আপনি সত্য বলুন,—বেশ্যা কি আপনার প্রণয়িনী?।

চারুদত্ত। এইরূপই বটে।

অধিকরণিক। আর্য্য; বসন্তসেনা কোথায়? ।

চারুদত্ত। বাড়ী গিয়াছেন।

श्रेष्ठिकायस्थौ । कधं गदा ? कदा गदा ? गच्छन्तो वा केण अणुगदा ? । [द]

चारु । स्वगतम् । किं प्रच्छन्नं गतेति ब्रवीमि ? । [ध]

श्रेष्ठिकायस्थौ । अज्ज ! कधेहि । [न]

चारु । गृहं गता । किमन्यत् ब्रवीमि ।

शकारः । मम केलकं पुप्फकलण्डक-जिण्णुज्जाणं पविशिअ, अत्थणिमित्तं बाहु-पाश-बलक्कालेण मालिदा । अए ! शम्पदं वदशि घलं गदेत्ति । [प]

(द) कथं गता ? कदा गता ? गच्छन्ती वा केन अनुगता ? ।

(न) आर्य्य ! कथय ।

(प) मदीयं पुष्पकरण्डकजीर्णोद्यानं प्रविश्य अर्थनिमित्तं बाहु-पाशबलात्कारेण मारिता । अयि ! साम्प्रतं वदसि—गृहं गतेति ।

(द) श्रेष्ठि इति । केन जनेन । केन जनेन सह गतेत्यर्थः ।

(ध) चारु इति । प्रच्छन्नं गुप्तं यथा स्यात्तथा । प्रच्छन्नगमने 'कथमवलया सह रक्षको न गतः' इति सन्देहः ; तया सह कश्चिद्गत इत्युक्तौ तु सा मिथ्योक्तिः, समर्थयितुमप्यशक्येति किमिदानीं ब्रवीमीति भावः ।

(प) शकार इति । अर्थनिमित्तं धनार्थं तदीयभूषणराशिग्रहणार्थमित्यर्थः । बाहू एव पाशौ ताभ्यां यो बलात्कारो बलप्रयोगस्तेन ।

শ্রেষ্ঠী ও কায়স্থ । কি ভাবে গিয়াছেন ? কখন গিয়াছেন ? যাইবার সময়ইবা কে তাঁহার সঙ্গে গিয়াছে ? ।

চারুদত্ত । (স্বগত) 'গোপনে গিয়াছেন, ইহাই কি বলিব ? ।

শ্রেষ্ঠী ও কায়স্থ । আর্য্য ! বলুন ।

চারুদত্ত । বাড়ী গিয়াছেন । আর কি বলিব ? ।

শকার । আমার পুষ্পকরণ্ডক নামক জীর্ণোদ্যানে প্রবেশ করা-

চারু। আঃ, অসম্বদ্ধপ্রলাপিন্! ।

অভ্যুক্ষিতোঽসি সলিলৈর্ন বলাহকানাং
চাষাগ্রপক্ষসদৃশং ভৃশমন্তরালে।
মিথ্যৈতদাননমিদং ভবতস্তথাপি (১)
হেমন্তপদ্মমিব নিষ্প্রভতামুপৈতি ॥১৮॥

অভ্যুক্ষিত ইতি। বলাহকানাং মেঘানাম্, সলিলৈর্জলৈঃ, অন্তরালে মেঘপদবী-ভূতলয়োর্মধ্যভাগে আকাশে ইত্যর্থঃ, চাষঃ স্বর্ণচাতক ইতি খ্যাতঃ পক্ষিবিশেষস্তস্য অগ্রপক্ষঃ পক্ষাগ্রদেশস্তস্য সদৃশং তুল্যম্, ভৃশমত্যন্তঞ্চ যথা স্যাত্তথা, ন অভ্যুক্ষিতোঽসি ন সিক্তোঽসি; তথাপি ইদং ভবত আননং মুখং কর্ত্তৃ, হেমন্তপদ্মমিব, নিষ্প্রভতাং দ্যুতিহীনতাং মালিন্যমিতি যাবত্, উপৈতি প্রাপ্নোতি; অতএব এতত্ তব উক্তি-জাতম্, মিথ্যা। তথা চ বৃষ্টিজলসেকে চাষপক্ষিণাং পক্ষাগ্রদেশো মলিনীভবতীতি প্রসিদ্ধিঃ, তব তু মুখমালিন্যং প্রতি তাদৃশং কিঞ্চিদপি বিশিষ্টকারণং নোপলভ্যতে; তথাপি ইদং তবাননং হেমন্তকালীনং পদ্মমিব, মলিনং জাতম্, সুতরাং তবেদমুক্তিজাতং মিথ্যা; মিথ্যাবাক্যকথনসময়ে প্রায়েণ সর্ব্বেষামেব দুশ্চিন্তয়া উদ্বেগেন চ মুখমালিন্যদর্শনাদিতি সরলার্থোভাবার্থশ্চ।

অত্র কারণাভাবেঽপি নিষ্প্রভতাপ্রাপ্তিরূপকার্য্যোত্পত্তের্বিভাবনা, চাষাগ্রপক্ষসদৃশমিত্যত্র আর্থী সমাসগতোপমা, হেমন্তপদ্মমিব ইত্যত্র শ্রৌতী সমাসব্যাসগতোপমা চ, ইত্যেতাসা

ইয়া, ধনের নিমিত্ত, বলপূর্ব্বক বাহুপাশদ্বারা মারিয়া ফেলিয়াছ; ওরে! এখন বলিতেছ—'বাড়ী গিয়াছেন।'

চারুদত্ত। আঃ! অসম্বদ্ধ প্রলাপী!

মেঘপথ ও ভূতল ইহার মধ্য স্থানে চাষ পক্ষীর পক্ষাগ্রের ন্যায় তুমি, মেঘের জলে অত্যন্ত সিক্ত হও নাই; তথাপি তোমার

---

(১) তথাহি।

अधि । जनान्तिकम् ।

तुलनञ्चाद्रिराजस्य समुद्रस्य च तारणम् ।
ग्रहणञ्चानिलस्येव चारुदत्तस्य दूषणम् ॥२०॥

प्रकाशम् । **आर्य्यचारुदत्तः खल्वसौ कथमिदमकार्य्यं करिष्यति ।** घोणोन्नतमित्यादि पठति । (फ)

मङ्गाङ्गिभावेन सङ्करः । अस्य मुखनिष्प्रभतादर्शनेन 'वचनजातं मिथ्या' इत्यनुमानम्यमिति व्यज्यते इत्यलङ्कारेण वस्तुध्वनिः ।

वसन्ततिलका वृत्तम् ॥१९॥

तुलनमिति । अद्रिराजस्य हिमाचलस्य, तुलनमुत्तोलनमिव, समुद्रस्य तारणम् हस्ताभ्यामुत्तीर्य्य परपारगमनमिव, तथा अनिलस्य वायोः, ग्रहणं वस्त्रादिना आत्मसात्करणमिव च चारुदत्तस्य दूषणं तदुपरि स्त्रीहत्यादोषारोपणम्, सर्व्वथैवासम्भवमिति भावः ।

अत्र इवशब्दस्य सर्व्वत्रान्वये तात्पर्य्यात् मालोपमालङ्कारः प्रत्येकप्राधान्यसूचनार्थं प्रत्येकचकारोपादानमिति न दोषः ॥२०॥

(फ) प्रकाशमिति । एतेन चारुदत्तस्यातिसज्जनत्वप्रसिद्धिर्व्यज्यते ।

এ মুখমণ্ডল, হেমন্তকালের পদ্মের ন্যায় নিষ্প্রভতা প্রাপ্ত হইতেছে; সুতরাং তোমার এই সকল উক্তি মিথ্যা ॥১৯॥

অধিকরণিক। (শ্রেষ্ঠী ও কায়স্থের প্রতি চুপি চুপি)

হিমালয়ের উত্তোলন, হস্তসন্তরণে সমুদ্রের পরপারে গমন এবং বস্ত্রদ্বারা বায়ুর বন্ধন, — এই সমস্তের ন্যায় চারুদত্তের দূষণও অসম্ভব ॥২০॥

(প্রকাশ্যে) উনি, প্রসিদ্ধ সেই চারুদত্ত; সুতরাং এই অকার্য্য কি করিয়া করিবেন। (ঘোণোন্নতং ইত্যাদি শ্লোক পাঠ করিলেন)

शकारः । किं पक्खवादेण ववहाले दीशदि ? । (ब)

अधि । अपेहि मुक्ख ! ।

वेदार्थान् प्राकृतस्त्वं वदसि, न च ते जिह्वा निपतिता ;
मध्याह्ने वीक्षसेऽर्कं, न तव सहसा दृष्टिर्विचलिता ।

(ब) किं पक्षपातेन व्यवहारो दृश्यते ? ।

(ब) शकार इति । पक्षपातेन वादिप्रतिवाद्यन्यतरपक्षग्रहणेन, व्यवहारो दृश्यते विवाद्यविषयो निर्णीयते किम् ? कथमन्यथा विना कारणं तत्प्रशंसा, विना प्रमाणञ्च तस्मि-न्दोषित्वनिरूपणमिति भावः ।

अत्र द्युतिर्नाम विमर्शसन्ध्यङ्गम्, 'तर्जनोद्वेजने प्रोक्ता द्युतिः' इति लक्षणात् ।

वेदार्थानिति । त्वं प्राकृतः पामरः शूद्रादिरूपो नीचलोकः सन्नपीत्यर्थः वेदार्थान् वदसि विवृणोषि ; तथापि ते तव जिह्वा, न च ननु, निपतिता स्खलिता । शूद्रादिनीचलोकस्य वेदार्थविवरणं निषिद्धं तदाचरणे च जिह्वा-स्खलनमप्यर्थवादतया अभिहितम्, सुतरान्तु तव जिह्वास्खलनमुचितमेवासीदिति भावः । मध्याह्ने काले, अर्कं सूर्यम्, वीक्षसे अभिपश्यसि ; तथापि तव दृष्टिर्नयनम्, सहसा तत्क्षणादेव, न विचलिता न विकलीभूता । मध्याह्ने आभिमुख्येन सूर्यदर्शने दृष्टेर्वैकल्यं प्रत्यक्षसिद्धम्, तच्च तवाप्युप-युक्तमासीदित्याशयः । दीप्ताग्नौ अग्नेः प्रज्वलितवह्निमध्ये, पाणिं हस्तम्, क्षिपसि अर्प-

---

শকার। আপনি কি পক্ষপাতপূর্ব্বক বিবাদের পর্য্যালোচনা করিতেছেন ? ।

অধিকরণিক। দূর হও, মূর্খ ! ।

তুমি নীচলোক হইয়া বেদার্থ বলিতেছ, কিন্তু তোমার জিহ্বা খসিয়া পড়িতেছে না ; তুমি মধ্যাহ্নকালে সূর্য্যকে দেখিতেছ, কিন্তু তৎক্ষণাৎ

दीप्ताग्नौ पाणिमन्तः क्षिपसि, स च ते दग्धो भवति नो ;
चारित्र्याच्चारुदत्तं चलयसि, न ते देहं हरति भूः ॥२१॥

यसि ; तथापि ते तव, स च स तु पाणिः, दग्धो नो न भवति। प्रज्व-लितवह्निमध्ये हस्तार्पणे तस्य दाहः प्रत्यक्षसिद्ध एव, स च तवाद्भुत एवासीदित्यभिप्रायः। तथा चारित्र्यात् सत्स्वभावात्, चारुदत्तं चलयसि भ्रंशयसि मिथ्यादोषारोपणेन भ्रंशयितुमिच्छसीत्यर्थः, तथापि भूः पृथिवी, ते तव देहं न हरति मध्यादिना न विलुप्तीकरोति। "करोत्यमध्यमत्यन्तं ध्रुवं महदतिक्रमः" इति शास्त्रात् चारित्र्यच्चारुदत्तस्य चालनं गुरुतरपापकर्मेवेति तत्रो भुवा तव देह-हरणं सर्वथैवोचितमासीदिति भावः।

अत्र अलङ्कारः प्राकृतादिरूपः सन् न खलु तदानीं वैदग्ध्यवादादिकं प्रव-र्त्तितवान् वस्तुसम्बन्धः असम्भवन् चारित्र्याच्चारुदत्तस्य चालनं प्राकृतादीनां वैदग्ध्य-वादादिकमिव नितरामसम्भाव्यमिति सादृश्यं बोधयतीति निदर्शनालङ्कारः, स च बहुत्वान्मालारूपः ; तथा वैदग्ध्यवादादिरूपे हेतौ सत्यपि निर्वापणतादिरूपस्य कार्य्यानुत्पत्तेर्विशेषोक्तिश्च मालारूपा ; इत्यनयोः परस्परनिरपेक्षतया संसृष्टिः। तथापीत्यस्य अनुक्तावपि सामर्थ्यादिनायासेनावगतिरिति न न्यूनपदत्वदोषः। तथा च दर्पणः "क्वचिन्न दोषो न गुणः" इति।

चलयसीति भानुबन्धस्याङ्गीकारात् रूपम्। तदनङ्गीकारे तु 'चारित्र्याच्चारु-दत्तं हरसि, नतु ते' इत्येव पाठः साधीयान्।

"विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः।" इत्यमरः।

शूद्रादिप्राकृतानां वैदग्ध्यवादादिनिषेधमाह विधितत्त्वधृतं स्मृतिवचनमनीयम्। यथा ;

তোমার দৃষ্টি, বিকল হইতেছে না ; প্রজ্বলিত অগ্নির ভিতরে তুমি হস্ত ক্ষেপ করিতেছ, কিন্তু তোমার সে হাত দগ্ধ হইতেছে না এবং চারু-দত্তকে সদাচার হইতে পরিভ্রষ্ট করিবার ইচ্ছা করিতেছ, কিন্তু পৃথিবী তোমার দেহ হরণ করিতেছেন না ॥২১॥

आर्य्यचारुदत्तः कथमकार्य्यं करिष्यति— ।

कृत्वा समुद्रमुदकोच्छ्रयमात्रशेषं
दत्तानि येन हि धनान्यनपेक्षितानि ।
स श्रेयसां कथमिवैकनिधिर्महात्मा
पापं करिष्यति धनार्थमवैरिजुष्टम् ? ॥२२॥

"सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रयोर्नेच्छन्ति ।"

शौरागमश्च—"वेदवर्णं स शूद्रस्य जिह्वा स्खलति वै ध्रुवम् ।"

सुमधुरा वृत्तम्,—"म्रौ भ्रौ मो नौ गुरुश्चेद्वसु-शर-रसैर्वृत्ता सुमधुरा" इति लक्षणात् ॥२१॥

आर्य्येत्याद्युक्तार्थं समर्थयन्नाह कृत्वेति । हि तथाहि, येन चारुदत्तेन, समुद्रम्, उदकोच्छ्रयमात्रं जलोन्नतिमात्रं केवलजलप्राचुर्य्यमेवेत्यर्थः शेषम् अवशिष्टं यस्य तं तादृशं कृत्वा, अनपेक्षितानि आत्मभोगार्थं निरपेक्षाणि धनानि दत्तानि निजभोगार्थं किञ्चिदप्यरक्षता येन सर्वाण्येव धनानि प्रार्थिभ्यो दत्तानीत्यर्थः, श्रेयसां मङ्गलानां मङ्गलजनकधर्म्माणामित्यर्थः, एकनिधिः अद्वितीयाश्रयः, महात्मा स चारुदत्तः, धनार्थम् अलङ्कारमात्रहरणार्थम्, अवैरिजुष्टं चारुदत्तस्य शत्रुणापि न सेवितं न कृतमित्यर्थः, पापं स्त्रीहत्यारूपं पापकार्य्यम्, कथमिव करिष्यति ? कथमपि नेत्यर्थः, एकस्मिन्नेवाश्रये दयानृशंसतयोरवस्थानासम्भवादिति भावः ।

अत्र समुद्रस्य उदकोच्छ्रयमात्रशेषत्वासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः अर्थापत्तिश्च, अनयोरपि मिथो निरपेक्षतया संसृष्टिः ।

हेतुर्नाम नाट्यलक्षणञ्च "हेतुर्वाक्यं समासोक्तमिष्टकृद्धेतुदर्शनात्" इति लक्षणात् ।

वसन्ततिलका वृत्तम् ॥२२॥

আর্য্য চারুদত্ত, কি করিয়া অকার্য্য করিবেন ? !

যিনি, সমুদ্রের জলরাশিমাত্র শেষ রাখিয়া নিজ ভোগের অপেক্ষা না

शकारः । किं पक्खवादेण ववहाले दीशदि ? । [भ]

वृद्धा । हदास ! जो तदाणिं णासीकिदं सुवस्सभण्डअं रत्तिं चोरेहिं अवहिदं त्ति तस्स कारणादो चदुस्समुद्दसारभूदं रअणावलिं देदि, सो दाणिं अत्थकल्लवत्तस्स कारणादो इमं अकज्जं करेदि ? । हा जादे ! एहि मे पुत्ति ! । इति रोदिति ।(म

अधि । आर्य्यचारुदत्त ! किमसौ पद्भ्यां गता ? उत प्रवहणेनेति ? ।

(भ) किं पक्षपातेन व्यवहारो दृश्यते ? ।

(म) हताश ! यस्तदानीं न्यासीकृतं सुवर्णभाण्डकं रात्रिं चौरैरपहृतमिति तस्य कारणात् चतुःसमुद्रसारभूतां रत्नावलीं ददाति, स इदानीमर्थकल्यवर्त्तस्य कारणादिदमकार्य्यं करोति ? । हा जाते ! एहि मे पुत्रि ! ।

(म) हतेति । हता विधिनैव नाशिता आशा यस्य सः, तत्सम्बोधनम् । शकारं प्रति आक्रोशोक्तिरियम् । यश्चारुदत्तः । रात्रिं प्राप्येति शेषः । तस्य तदपरिशोधस्य । अर्थकल्यवर्त्तस्य पूर्ववत् व्याख्यानात् क्षणस्थायिनो धनस्य । करोतीति काकुवशात् करोति किमिति गम्यते, नैवेत्यर्थः ।

করিয়া, সমস্ত ধনই দান করিয়া ফেলিয়াছেন ; সৎকার্য্যের একমাত্র আধার সেই মহাত্মা চারুদত্ত, শক্রও যাহা না করে সেইরূপ পাপ..গা ধনের জন্য, কি করিয়া করিবেন ? ॥২২॥

শকার । আপনি কি পক্ষপাতপূর্ব্বক বিবাদের পর্য্যালোচনা করিতেছেন ? ।

বৃদ্ধা । হতাশ ! তখন গচ্ছিত রাখা সোণার অলঙ্কার, রাত্রিতে চোরে নিয়াছিল এই নিমিত্ত তাহার জন্য, যিনি চারি সমুদ্রের সারভূত

चारु। ननु! मम प्रत्यक्षं न गता; तन्न जाने किं पद्भ्यां गता, उत प्रवहणेनेति। [य]

प्रविश्य सामर्षो वीरकः।

पादप्पहार-परिभव-विमाणणा-बद्धगरुअ-वेरस्स।
अणुसोअन्तस्स इअं, कधं पि रत्ती पभादा मे ॥२२॥

---

(२२) पाद-प्रहार-परिभव-विमानना-बद्ध-गुरुक-वैरस्य।
अनुशोचत इयं कथमपि रात्रिः प्रभाता मे ॥

(य) चारु इति। नन्विति सम्बोधने। 'प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु" इत्यमरः।

पादेति। पादप्रहारेण चन्दनककृतपदाघातेन यः परिभवस्तिरस्कारः तेन या विमानना अपमानस्तया बद्धमुत्पादितं गुरुकं महत् वैरं चन्दनकेन सह शत्रुता यस्य तादृशस्य, अतएव अनुशोचतः 'चन्दनकेन कथमित्थं कृतम्, कथं वा मया तत्प्रतिक्रिया न कृता' इत्यमनुतापं कुर्वतः, मे मम, इयं रात्रिः, कथमपि गुरुतरकष्टेन प्रभाता। स्वमतत्वेन यथावदुक्तिरियम्।

आर्य्या जातिः ॥२२॥

রত্নমালা দিয়াছিলেন; তিনি এখন অচিরস্থায়ী ধনের জন্য, এই অকার্য্য করিতে পারেন কি?। হা বৎসে! আয় আমার কন্যা!। (এই বলিয়া কাঁদিতে লাগিল)

অধিকরণিক। আর্য্যচারুদত্ত! বসন্তসেনা কি পায়ে হাটিয়া গিয়াছেন, না গাড়ীতে?।

চারুদত্ত। বিচারক মহাশয়! আমার সমক্ষে যান নাই; অতএব আমি জানি না যে, কি পায়ে হাটিয়া গিয়াছেন, না গাড়ীতে।

প্রবেশ করিয়া ক্রোধের সহিত বীরক। পাদ প্রহারের তিরস্কার-

তা জাব অধিঅরণমণ্ডবং উবসপ্পামি। প্রবিশ্যাঙ্গেন। সুহং অজ্জমিস্সাণং?। (র)

অধি। অয়ে! নগররক্ষাধিকৃতো বীরকঃ!। বীরক! কিমাগমনপ্রয়োজনম্?। (ল)

বীরকঃ। হী! বন্ধন-ভেঅন-সম্ভমে অজ্জকং অণ্ণেসন্তো ওবারিদং পবহণং বচ্চদি ত্তি বিআরং করন্তো অণ্ণেসন্তো,

---

(র) ননু যাবদধিকরণমণ্ডপমুপসর্পামি। সুখম্ আর্য্যমিশ্রাণাম্?।

(ব) হী! বন্ধনভেদনসম্ভ্রমে আর্য্যকমন্বিষ্যন্, অপবারিতং প্রবহণং ব্রজতীতি বিচারং কুর্ব্বন্ অন্বিষ্যন্ 'অরে! ত্বয়াপি আলোকিতং

(র) তদিতি। প্রবেশ্যাঙ্গেন দক্ষিণভুজপ্রসারণেন। তৎপ্রসারণন্তু তথৈব শিষ্টাচারাৎ। "ভুজঃ প্রবেষ্টো দোর্বাহুঃ" ইত্যমরঃ। আর্য্যমিশ্রাণাং ... নিযুক্তানামধিকরণিকাদীনাং সুখং ... মিতি কাকুঃ।

(ল) অধি ইতি। নগররক্ষায়াম্ অধিকৃতো রাজ্ঞা নিযুক্তঃ।

(ব) বীরক ইতি। হী ইতি বিস্ময়ে। বন্ধনভেদনসম্ভ্রমে বন্ধনশৃঙ্খলাচ্ছেদন-

---

নিবন্ধন অপমানে, চন্দনকের সহিত গুরুতর শত্রুতা জন্মাইয়া দিয়াছে, তাহাতেই আমি অনুতাপ করিতেছিলাম, এই অবস্থায় আমার এই রাত্রি, কোন রকমে প্রভাত হইয়াছে ॥২৩॥

সুতরাং বিচারালয়ে যাই। (দক্ষিণবাহু প্রসারণ পূর্ব্বক) অভিজ্ঞপ্রবরদিগের সুখ ত?।

অধিকরণিক। ও! নগররক্ষাকার্য্যে নিযুক্ত বীরক! বীরক! তোমার আসিবার প্রয়োজন কি?।

বীরক। আমি বন্ধনচ্ছেদনের ব্যস্ততার সময় আর্য্যককে অন্বেষণ

'सरे। तुए वि आलोइदे मए वि आलोइदव्वो' त्ति भणन्तो ज्जेव चन्दणमहत्तरएण पादेण ताड़िदो म्हि। एदं सुणिअ अज्जमिस्सा पमाणं। (च)

अधि। भद्र! जानीषे कस्य तत् प्रवहणमिति?।

वीरकः। इमस्स अज्जचारुदत्तस्स। वसन्तसेणा आरूढ़ा पुप्फकरण्डकजिण्णुज्जाणं कीलिदुं णीअदि त्ति पवहणवाहएण कहिदं। [छ]

मयापि आलोकयितव्यः' इति भणन्नेव, चन्दनमहत्तरकेण पादेन ताड़ितोऽस्मि। एतत् श्रुत्वा आर्य्यमिश्राः प्रमाणम्।

(छ) अस्य आर्य्यचारुदत्तस्य, वसन्तसेना आरूढ़ा, पुष्पकरण्डक-जीर्णोद्यानं क्रीड़ितुं नीयत इति प्रवहणवाहकेन कथितम्।

आलीनतरायाम्। अपवारितम् आवृतम्। विचारम् 'अभिप्राय'को वर्त्तते न वा' इति वितर्कम्। अन्विष्यन् तस्मिन्नपवारितप्रवहणे आर्य्यकं मार्गयन्। त्वया चन्दन-केन। महत्तरकः सुमहान् सेनानीरित्यर्थः। महत्तरकश्चासौ चन्दनकश्चेति तेन। अधिक्षेपकाहिकम् विषये पदस्य परनिपातः आर्य्यमिश्रा भवन्तः, प्रमाणं कार्य्यनिर्धारकाः तस्य दण्डः कर्त्तव्यो न वेति निर्धारयितुमर्हन्तीत्यर्थः।

করিতেছিলাম; তখন আবৃত একখানা গাড়ী যাইতেছিল, তাই তাহার পরীক্ষা করতঃ অন্বেষণ করিতেছিলাম; 'ওহে! তোমার দেখা হইলে আমারও দেখা হইবে' ইহা বলিয়াছি, এমন অবস্থায় প্রধান সেনাপতি চন্দনক, আমাকে পাদপ্রহার করিয়াছে। ইহা শুনিয়া আপনারা কর্ত্তব্য নির্দ্ধারণ করিবেন।

অধিকরণিক। ভদ্র! সে গাড়ীখানা কাহার, তাহা জান কি?।

বীরক। এই আর্য্য চারুদত্তের। বসন্তসেনা আরোহণ করিয়াছিল

শকারঃ। পুণোবি শুদং অজ্জেহিং ?। (ষ)

অধি। এষ ভোঃ! নির্ম্মলজ্যোৎস্নো রাহুণা গ্রস্যতে শশী।
জলং কূলাবপাতেন প্রসন্নং কলুষায়তে ॥২৪॥

বীরক! পশ্চাদিহ ভবতো ন্যায়ং দ্রক্ষ্যামঃ। য এষোঽধিকরণদ্বারি অশ্বস্তিষ্ঠতি, তমেনমারুহ্য গত্বা পুষ্পকরণ্ডকোদ্যানম্ দৃশ্যতাম্ —অস্তি তত্র কাচিদ্বিপন্না স্ত্রী ন বেতি।

(ষ) পুনরপি শ্রুতমার্য্যৈঃ ?।

(ষ) শকার ইতি। এতেন চ বীরকবাক্যেন "মম কেলকং পুপ্ফকরণ্ডকজিণ্ণুজ্জাণং পবেশিঅ" ইতি পূর্ব্বোক্তং প্রমাণীকৃতমিত্যাশয়ঃ।

এষ ইতি। ভো ইতি দৈবসম্বোধনম্। নির্ম্মলা জ্যোৎস্না যস্য স তাদৃশঃ শশী চন্দ্রঃ, রাহুণা এষ গ্রস্যতে। নির্ম্মলকীর্ত্তিশ্চারুদত্তঃ খলেন স্ত্রীহত্যাপরাধেন সম্বধ্যত ইতি ভাবঃ। তথা প্রসন্নং নির্ম্মলং জলম্, কূলস্য তীরস্য অবপাতেন মজ্জনাদ্দলপতনেন, কলুষায়তে আবিলমিবাচরতি। চিরনির্ম্মলং চারুদত্তচরিতমিদানীং স্ত্রীহত্যাপবাদেন মলিনীভবতীত্যাশয়ঃ।

অত্র শশিরূপাৎ জলরূপাচ্চ অপ্রস্তুতাৎ সমাৎ চারুদত্তস্য তচ্চরিত্রস্য চ প্রস্তুতস্য প্রতীতেরপ্রস্তুতপ্রশংসালঙ্কারদ্বয়ং, তয়োশ্চ পরস্পরনিরপেক্ষতয়া সংসৃষ্টিঃ ॥২৪॥

বিহার করিবার জন্য, পুষ্পকরণ্ডকনামক জীর্ণোদ্যানে নীত হইতেছে; গাড়ীর চালক এই কথা বলিয়াছিল।

শকার। আপনারা পুনরায়ও শুনিলেন কি ?।

অধিকরণিক। হায়! নির্ম্মল-জ্যোৎস্নাশালী এই চন্দ্রকে, রাহু গ্রাস করিতেছে এবং নির্ম্মল জল, তীর ভাঙ্গিয়া পড়ায় আবিল হইয়া উঠিয়াছে ॥২৪॥

বীরক! তোমার মোকদ্দমা পরে দেখিব। বিচারগৃহের দ্বারে

वीरकः। जं अज्जो आणवेदि। इति निष्क्रान्तः। प्रविश्य च। गदो म्हि तहिं, दिट्ठं च मए—इत्थिआकलेवरं सावदेहिं विलुप्पन्तं। (घ)

श्रेष्ठिकायस्थौ। कधं तुए जाणिदं इत्थिआकलेवरं त्ति?। (ङ)

वीरकः। सावसेसेहिं केस-हत्थ-पाणि-पादेहिं उवलक्खिदं मए। (च)

(घ) यदार्य्य आज्ञापयति। गतोऽस्मि तस्मिन्, दृष्टञ्च मया स्त्री-कलेवरं श्वापदै र्विलुप्यमानम्।

(ङ) कथं त्वया ज्ञातं स्त्रीकलेवरमिति?।

(च) सावशेषैः केश-हस्त-पाणि-पादैरुपलक्षितं मया।

(च) वीरक इति। सावशेषैः श्वापदभुक्तावशिष्टैः, केशैः पुरुषविलक्षणैः सुदीर्घकुन्तलैः, हस्तपाणिपादैश्च अलङ्कारचिह्नचिह्नितैरित्याशयः, उपलक्षितं ज्ञातं स्त्रीकलेवरमिति पूर्व्वेणान्वयः।

এই যে ঘোড়াটা রহিয়াছে, ইহাতে আরোহণ করিয়া, পুষ্পকরণ্ডকোদ্যানে যাইয়া দেখ, সেখানে কোন স্ত্রীলোক মরিয়া আছে কিনা।

বীরক। আর্য্য যাহা আদেশ করেন। (এই বলিয়া নির্গত হইয়া পুনরায় প্রবেশ করিয়া) আমি সেখানে গেলাম এবং দেখিলাম একটী স্ত্রীলোকের শরীর রহিয়াছে, শ্বাপদজন্তুগণ তাহা ভক্ষণ করিতেছে।

শ্রেষ্ঠী ও কায়স্থ। আপনি, স্ত্রীলোকের শরীর কি করিয়া জানিলেন?।

বীরক। অবশিষ্ট কেশ, হস্ত, পাণিতল ও চরণ দর্শন করিয়া, আমি লক্ষ্য করিতে পারিয়াছি।

अधि। अहो! धिग् वैषम्यं लोकव्यवहारस्य। (क)

यथा यथेदं निपुणं विचार्य्यते
तथा तथा सङ्कटमेव दृश्यते।
अहो सुसन्ना व्यवहारनीतयो—
मतिस्तु गौः पङ्कगतेव सीदति ॥२५॥

(क) अधि। लोकव्यवहारस्य लोकाचरितस्य, वैषम्यं पूर्व्वापरवैपरीत्यम्, धिक् निन्दामीत्यर्थः। तथा च चारुदत्तः पूर्व्वं परमसच्चरित्र एवासीत्, इदानीन्तु धनलोभेन स्त्रीहत्याकरणात् नितान्तदुश्चरित्रो जात इति चरित्रवैषम्यमेव निन्दामीति भावः।

यथेति। यथा यथा येन येन प्रकारेण, इदं चारुदत्तकर्त्तृकस्त्रीहननम्, निपुणं सूक्ष्मम् विचार्य्यते; तथा तथा तेन तेनैव प्रकारेण, सङ्कटमेव दुर्बोधप्रकृतावस्थमेव, दृश्यते ज्ञायते। अहो इति विषादे। व्यवहारनीतयो विचारनियमाः, सुसन्नाः सुसंलग्नाः वादिकृताभियोगानुसारेणैव वीरकसाक्ष्यादिलाभात् चारुदत्तदोषं प्रति सम्यक् प्रमाणमेवोपस्थितमित्यर्थः, तु किन्तु, तथापि मतिर्मम बुद्धिः, पङ्कगता कर्द्दममग्ना गौरिव, सीदति अवसन्ना भवति कर्त्तव्यनिर्णयाक्षमा भवतीत्यर्थः, एतत्र दुर्व्वलीभूतत्वात् अन्यत्र संशयानपगमादिति भावः।

अत्र मतेरवसादस्य कारणाभावेऽपि तदुत्पत्तेः किं विभावना, उत व्यवहारनीतीनां सुसन्नत्वरूपकारणे सत्यपि कर्त्तव्यनिरूपणात्मकावसादाभावरूपकार्य्यानुत्पत्तेर्विशेषोक्तिरिति सन्देहादनयोः सन्देहसङ्करोऽलङ्कारः, अङ्गभूतया श्रौतोपमया पुनः संसृष्टिः।

वंशस्थविलं वृत्तम् ॥२५॥

অধিকরণিক। হায়! লোকচরিত্রের বৈষম্যকে আমি ধিক্কার করি। যে যে প্রকারে সূক্ষ্মভাবে এই বিষয়ের বিচার করিতেছি, সেই সেই প্রকারেই সঙ্কট দেখিতেছি। হায়! বিচারের নিয়মগুলি সুসং-

चारु । स्वगतम् ।

यथैव पुष्पं प्रथमे विकासे
समेत्य पातुं मधुपाः पतन्ति ।
एवं मनुष्यस्य विपत्तिकाले
छिद्रेष्वनर्था बहुलीभवन्ति ॥२६॥

अधि । आर्य्यचारुदत्त ! सत्यमभिधीयताम् ।

यथेति । मधुपा भ्रमराः, यथैव प्रथमे विकासे पुष्पस्यैव विकासारम्भ इत्यर्थः, समेत्य मिलित्वा, पातुं पुष्परसमिति शेषः, पुष्पं पतन्ति आगच्छन्ति ; एवं तथैव, विपत्तिकाले मनुष्यस्य, छिद्रेषु कार्य्यत्रुटिषु, अनर्था विपत्तयः, बहुलीभवन्ति बहुलीभूय उपस्थिता भवन्तीत्यर्थः । तथा च वसन्तसेनायाः स्वगृहप्रेरणकाले तया सह कस्यचित् रक्षिणः प्रेरणाभावेन मम यत् छिद्रं जातम्, तदुपादायैव अस्मिन् विपत्तिकाले शकाराभियोगवीरकसाक्ष्यादयोऽनर्था उपस्थिता इत्याशयः ।

अत्र एवाव अप्रस्तुतान्मनुष्यसामान्यात् प्रस्तुतस्य चारुदत्तरूपमनुष्यविशेषस्य प्रतीतेरप्रस्तुतप्रशंसालङ्कारः श्रौतोपमया च संसृज्यते ।

उपेन्द्रवज्रेन्द्रवज्रयोर्मेलनादुपजातिर्वृत्तम् ॥२६॥

স্পষ্টই হইতেছে ; কিন্তু তথাপি আমার বুদ্ধি, কর্দ্দমমগ্ন গরুর ন্যায় অবসন্ন হইয়া পড়িতেছে ॥২৫॥

চারুদত্ত। (স্বগত) প্রথম বিকাশ আরম্ভ হইলে, মধু পান করিবার জন্য সম্মিলিত হইয়া ভ্রমরগণ যেমন পুষ্পের উপরে পতিত হয়, এইরূপ মানুষের বিপদের সময় ফাঁক পাইয়া নানা অনর্থ, সম্মিলিত হইয়া উপস্থিত হয় ॥২৬॥

অধিকরণিক। আর্য্যচারুদত্ত! সত্য বলুন।

चारु । दुष्टात्मा परगुणमत्सरी मनुष्यो
रागान्धः परमिह हन्तुकामबुद्धिः ।
किं यो यद्वदति मृषैव जातिदोषात्
तद्ग्राह्यं भवति ? न तद्विचारणीयम् ॥२७॥

अपि च । योऽहं लतां कुसुमितामपि पुष्पहेतोः
आकृष्य नैव कुसुमावचयं करोमि ।

दुष्टात्मेति । इह जगति, दुष्टात्मा परहिंसादिना दूषितचित्तः, परस्य गुणे दयादाक्षिण्यादिजनितोत्कर्षे मत्सरी विद्वेषी, रागेण उत्कटविषयाभिलाषेण अन्धः कर्त्तव्यज्ञानहीनः, तथा परं जनम्, हन्तुं कामो यस्याः सा हन्तुकामा बुद्धिर्यस्य स परोपकारचिकीर्षुरित्यर्थः, यो मनुष्यः, जातिदोषात् दुर्जनजनितत्वरूपजन्मदोषात् मृषैव मिथ्यैव, यत् वदति, तत् किं ग्राह्यम् अवलम्ब्यं भवति ? कथमपि नेत्यर्थः । तर्हि तस्य किं कर्त्तव्यमित्याह नेति । तत् वदनं कथनम्, न विचारणीयं न वितर्कणीयमेव अग्राह्यमेव कर्त्तव्यमित्यर्थः । तथा च उक्तसकलदोषदुष्टः प्रकारो यद्वदति तन्न ग्राह्यं न वा विचार्यमिति भावः ।

अतएवात्रापि पूर्ववदेव अप्रस्तुतप्रशंसालङ्कारः ।

परमिति कारकसापेक्षत्वात् समासः । प्रहर्षिणी वृत्तम् ॥२७॥

य इति । यः अहम्, पुष्पहेतोः, कुसुमान्यस्याः सञ्जातानीति कुसुमिता तां लतामपि प्रार्थिन्या का कथा अप्रार्थिनीं लतामपीत्यर्थः, आकृष्य कुसुमावचयं पुष्प-

---

চারুদত্ত । দূষিতচিত্ত, পরগুণবিদ্বেষী, উৎকট বিষয়াভিলাষবশতঃ একেবারে অন্ধ এবং পরের অপকার করিবার অভিলাষী যে মানুষ, জন্মদোষনিবন্ধন একেবারে মিথ্যা যাহা বলিবে, এই জগতে তাহার তাহা কি গ্রাহ্য হইবে ? (কখনই নহে) এবং তাহা বিচার্য্যও নহে ॥২৭॥

सोऽहं कथं भ्रमरपक्षरुचौ सुदीर्घे
केशे प्रगृह्य रुदतीं प्रमदां निहन्मि ? ॥२८॥

शकारः । हंहो अधिअलणभोइआ ! किं तुम्हे पक्खवादिणा ववहालं पेक्खध ? जेण अज्जवि एशे हदाशचालुदत्ते आशणे धालीअदि । (ख)

(ख) हंहो अधिकरणभोजकाः ! किं युयं पक्षपातिना व्यवहारं प्रेक्षध्वम् ? येन अद्यापि एष हताशचारुदत्तः आसने धार्य्यते ।

चयनं न च करोमि ; आकर्षणे तस्या व्यथा स्यादित्याशयेनेति भावः । सः अहम् भ्रमरपक्षस्येव रुचिर्दीप्तिर्यस्य तस्मिन् प्रगाढ़कृष्णवर्णे इत्यर्थः सुदीर्घे केशे , प्रगृह्य धृत्वा , रुदतीं प्रमदां स्त्रियम् , कथं निहन्मि , कथमपि नेत्यर्थः , सदायाभयात् तादृशमिदं यत्वासम्भवास्तेति भावः ।

अत्र पूर्वापरवस्तुसम्बन्धः सम्भवन्नेव लताया इव प्रमदाया आकर्षणादौ व्यथा स्यादिति सादृश्यं बोधयतीति सम्भवद्वस्तुसम्बन्धा निदर्शनालङ्कारः , अर्थापत्तिश्च उपमा च , इत्थं तेषामङ्गाङ्गिभावेन सङ्करः । तथा कुसुमशब्देन प्रक्रम्य पुनः पुष्पपदप्रयोगेण प्रक्रमभेदात् प्रकृतिविषयो भग्नप्रक्रमतादोषः , स च 'वस्य हेतोः' इति पाठेन समाधेयः ।

वसन्ततिलका वृत्तम् ॥२८॥

(ख) शकार इति । धार्य्यते स्थाप्यते । तथा च वादिनः प्रतिवादिनो वा अपराधित्वनिश्चये तस्योच्चासने स्थापनं गौरवसूचकत्वादन्याय्यमिति भावः ।

আরও, যে আমি, পুষ্পের জন্য, পুষ্পিত লতাও আকর্ষণ করিয়া পুষ্প চয়ন করি না; সেই আমি, ভ্রমরপক্ষের ন্যায় কান্তিশালী এবং সুদীর্ঘ কেশে আকর্ষণ করিয়া, রোদনপরায়ণা অবলাকে কি হত্যা করিতে পারি ॥২৮॥

অধি। ভদ্র শোধনক! এবং ক্রিয়তাম্। (গ)

শোধনকস্তথা করোতি। (ঘ)

চারু। বিচার্য্যতাং ভো অধিকৃতাঃ! বিচার্য্যতাম্।

ইত্যাসনাদবতীর্য্য ভূমাবুপবিশতি।

শকারঃ। স্বগতম্। সহর্ষং নর্ত্তিত্বা। হী, অণেণ মএ, অত্তকে পাবে (১) অণ্ণস্স মত্থকে ণিবড়িদং (২)। তা জহিং চালুদত্তাকে উপবিশদি, তহিং হগ্গে উববিশামি। তথা কৃত্বা। চালুদত্তা! পেক্খ পেক্খ মং, তা ভণ ভণ মএ মালিদে ত্তি। (ঙ)

(ঙ) হী, অনেন ময়া কৃতং পাপমন্যস্য মস্তকে নিপাতিতম্। তদ্ যত্র চারুদত্ত উপবিশতি, তস্মিন্নহমুপবিশামি। চারুদত্ত! প্রেক্ষস্ব প্রেক্ষস্ব মাম্, তদ্ভণ ভণ ময়া মারিতেতি।

(গ) অধি ইতি। এবং ক্রিয়তাং চারুদত্ত আসনাদবতার্য্যতাম্, অপরাধিত্বস্যা-বগমাদিতি ভাবঃ।

(ঘ) শোধ ইতি। তথা করোতি চারুদত্তমাসনাদবতারয়তি।

শকার। ওহে বিচারকগণ! আপনারা কি পক্ষপাতপূর্ব্বক বিচার করেন, যে এখনও এই হতভাগা চারুদত্তকে আসনে রাখিতেছেন।

অধিকরণিক। ভদ্র! শোধনক! এইরূপ কর।

(শোধনক তাহা করিল)

চারুদত্ত। বিচার করুন, হে বিচারকগণ! বিচার করুন। (এই বলিয়া, আসন হইতে নামিয়া, ভূতলে বসিলেন)

(১) কিদং পাবং।

(২) ণিবড়িই।

চারু। ভো অধিকৃতাঃ!। দুষ্টাত্মা ইতি পূর্ব্বোক্তং পঠতি। সনিশ্বাসং স্বগতম্।

মৈত্রেয় ভোঃ! কিমিদমদ্য মমোপঘাতো
হা ব্রাহ্মণি! দ্বিজকুলে বিমলে প্রসূতা।
হা রোহসেন! নহি পশ্যসি মে বিপত্তিং
মিথ্যৈব নন্দসি পরব্যসনেন নিত্যম্ ॥২৮॥

(ঙ) শকার ইতি। হীয়শব্দো বিস্ময়ানন্দে। তস্মিন্ স্থানে উপবিশামি, গুহ্যং কিঞ্চিদুপদেষ্টুমিতি ভাবঃ তদুপদেশ্যমেবাহ চারুদত্তেত্যাদি।

মৈত্রেয়েতি। ভো মৈত্রেয়! তদাখ্যসখে! অদ্য ইদং বিপজ্জালং কিং কথম্, উপস্থিতমিতি শেষঃ। যতঃ, মম উপঘাতো বিনাশ এব আগত ইতি শেষঃ। হা ব্রাহ্মণি! পত্নি! ধূতে! বিমলে নির্দোষতয়া নিষ্কলঙ্কে দ্বিজকুলে ব্রাহ্মণবংশে, প্রসূতা উৎপাদিতা, তথাপীদানীং কলঙ্কিতাসীতি শেষঃ, অনেন মৎকলঙ্কেনৈব তবাপি কলঙ্কোদয়াদিতি ভাবঃ। হা রোহসেন! তদাখ্যপুত্র! মে মম বিপত্তিং নহি পশ্যসি; কিন্তু পরং কেবলং যদ্ ব্যসনং বাল্যখেলা তেন, মিথ্যৈব নিরর্থকমেব, নিত্যং নন্দসি আনন্দমনুভবসি, নাতঃ পরমপি তদনুভবিতব্যমিতি ভাবঃ।

অত্র উপস্থিতমিত্যাদিপদানামনুক্তত্বেঽপি ন ন্যূনপদতাদোষঃ, প্রত্যুত গুণ এব

শকার। (স্বগত। আনন্দের সহিত নৃত্য করিয়া) বাঃ! আমি পাপ করিয়াছিলাম, এই তাহা অন্যের মাথায় চাপাইলাম। তা, চারুদত্ত যেখানে বসিয়াছে, আমিও সেই খানে বসি। (তাহা করিয়া) চারুদত্ত! আমাকে দেখ্ দেখ্; তা, বল্ বল্ যে; "আমি মারিয়াছি।"

চারুদত্ত। হে বিচারকগণ! (দুষ্টাত্মা ইত্যাদি পূর্ব্বোক্ত শ্লোক পাঠ করিলেন; পরে নিশ্বাসের সহিত স্বগত)

হে মৈত্রেয়! আজ আমার এই কি উপস্থিত হইল! এ যে একে-

প্রেষিতশ্চ ময়া তদ্বার্ত্তান্বেষণায় মৈত্রেয়ো বসন্তসেনাসকাশম্, শকটিকানিমিত্তঞ্চ তস্য প্রদত্তান্যলঙ্করণানি প্রত্যর্পয়িতুম্। তৎ কথং চিরয়তি ?। (চ)

ততঃ প্রবিশতি গৃহীতাভরণো বিদূষকঃ।

বস্তুবিষাদময়ত্বাৎ 'উক্তাবানন্দমগ্নাদেঃ স্যান্ন্যূনপদতা গুণঃ' ইতি দর্পণোক্তেঃ। শোকবশেন মনঃসমুৎপন্নশ্রমাৎ খেদোনাম বিমর্শসন্ধেরঙ্গম্,

'মনশ্চেষ্টাসমুৎপন্নঃ শ্রমঃ খেদ ইতি স্মৃতঃ' ইতি দর্পণলক্ষণাৎ। আক্রন্দো নাম নাট্যালঙ্কারশ্চ 'আক্রন্দঃ প্রলপিতং শুচা' ইতি তল্লক্ষণাৎ।

বসন্ততিলকাবৃত্তম্ ॥২৫॥

(চ) প্রেষিত ইতি। তস্যা বসন্তসেনায়া এব বার্ত্তান্বেষণায় কীদৃগাস্তে ইতি বৃত্তান্তানুসন্ধানায়। মৈত্রেয়স্তদাখ্যো বিদূষকঃ। শকটিকানিমিত্তং রোহসেনস্য ক্রীড়নায় মৃদ্রবস্থাং শকটনির্ম্মাণার্থম্, তস্য রোহসেনস্যৈব নিমিত্তং, প্রদত্তানি বসন্তসেনায়া অর্পিতানি। চিরয়তি বিলম্বতে মৈত্রেয় ইতি শেষঃ।

অত্র প্রথমবাক্যে বসন্তসেনাপদাৎ পূর্ব্বং তদ্বার্ত্তান্বেষণায়েতি তৎপদাবস্থানাৎ 'তীর্থে তদীয়ে গজসেতুবন্ধাৎ' ইত্যাদিদর্পণোদাহরণবৎ অস্থানস্থপদতাদোষঃ,

---

থাকে মৃত্যুই উপস্থিত হইল !। হা ব্রাহ্মণি ! তুমি নির্ম্মল ব্রাহ্মণবংশে জন্মিয়াছিলে ! হা রোহসেন ! আমার বিপদ দেখিলে না ! তুমি কেবল বাল্যখেলায় সর্ব্বদা অনর্থক আনন্দ অনুভব করিতেছ ॥২৫॥

গাড়ী তৈয়ারি করিবার জন্য, বসন্তসেনা রোহসেনকে যে অলঙ্কারগুলি দিয়াছিলেন, তাহা ফিরাইয়া দিবার জন্য এবং বসন্তসেনার খবর লইবার জন্য, আমি মৈত্রেয়কে বসন্তসেনার নিকট পাঠাইয়াছিলাম। তা, তিনি (মৈত্রেয়) বিলম্ব করিতেছেন কেন ?।

তদনন্তর অলঙ্কার লইয়া বিদূষকের প্রবেশ।

विदू। पेसिदोम्हि अज्जचारुदत्तेण वसन्तसेणासआसं तहिं अलङ्करणाइं गेण्हिअ, जधा 'अज्जमित्तेअ! वसन्तसेणाए वच्छो रोहसेणो अत्तणो अलङ्कारेण अलङ्करिअ जणणीसआसं पेसिदो, इमस्स आहरणं दादव्वं, ण उण गेण्हिदव्वं, ता समप्पेहि त्ति। ता जाव वसन्तसेणासआसं ज्जेव गच्छामि। परिक्रम्यावलोक्य च आकाशे। कधं भावरेभिलो!। भो भावरेभिल! किं णिमित्तं तुमं उव्विग्गो उव्विग्गो विअ लक्खीअसि?। आकर्ण्य। किं भणासि? 'पिअवअस्सो चारु-

(छ) प्रेषितोऽस्मि आर्य्यचारुदत्तेन वसन्तसेनासकाशम्, तस्मिन्नलङ्कारणानि गृहीत्वा, यथा—'आर्य्यमैत्रेय! वसन्तसेनया वत्सो रोहसेन आत्मनोऽलङ्कारेणालङ्कृत्य जननीसकाशं प्रेषितः, अस्या आभरणं दातव्यम् न पुनर्ग्रहीतव्यम्, तत् समर्पयेति। तद् यावत् वसन्तसेनासकाशमेव गच्छामि। कथं भावरेभिलः। भो भावरेभिल!

स च 'प्रेषितश्च मया वसन्तसेनावार्त्तान्वेषणाय मैत्रेयस्तत्सकाशम्' इति पाठे न समाधेयः।

(छ) विदू इति। तस्मिन् वसन्तसेनासकाश एव। अस्या वसन्तसेनायाः। तत्तस्मात्।

आकाशे शून्ये विना पात्रमित्यर्थः। तथा च दर्पणः—

বিদূষক। আর্য্য-চারুদত্ত আমাকে বসন্তসেনার নিকট পাঠাইয়াছেন এবং বলিয়াছেন যে, "আর্য্যমৈত্রেয়! বসন্তসেনা, বৎস রোহসেনকে নিজের অলঙ্কার দিয়া অলঙ্কৃত করিয়া জননীর নিকট পাঠাইয়াছিলেন। ইহাঁর অলঙ্কার ফিরাইয়া দিতে হইবে, কিন্তু গ্রহণ করা

দত্তো অধিঅরণমণ্ডবে সদ্দাইদো ত্তি ?।” তা ণহু অপ্পেণ কজ্জেণ হোদব্বং। বিচিন্ত্য। তা। পচ্ছা বসন্তসেণাসআসং গমিস্সং। অধিঅরণমণ্ডবং দাব গমিস্সং। পরিক্রম্যাবলোক্য চ। ইদং অধিঅরণমণ্ডবং, তা জাব পবিসামি। প্রবিশ্য। সুহং অধিঅরণভোইআণং ?। কহিং মম পিঅবঅস্সো ?। (ক)

কিং নিমিত্তং ত্বমুদ্বিগ্ন উদ্বিগ্ন ইব লক্ষ্যসে ?। কিং ভণসি ? প্রিয়-বয়স্যশ্চারুদত্তঃ অধিকরণমণ্ডপে শব্দায়িত ইতি ?। তৎ ন খলু অল্পেন কার্য্যেণ ভবিতব্যম্। তৎ পশ্চাৎ বসন্তসেনাসকাশং গমিষ্যামি। অধিকরণমণ্ডপং তাবৎ গমিষ্যামি। অয়মধিকরণমণ্ডপঃ তদ্ যাবৎ প্রবিশামি। সুখমধিকরণভোজকানাম্ ?। কস্মিন্ মম প্রিয়-বয়স্যঃ ?।

‘কিং ব্রবীষীতি যন্নাট্যে বিনা পাত্রং প্রযুজ্যতে।
শ্রুত্বেবানুক্তমপ্যর্থং তৎ স্যাদাকাশভাষিতম্ ॥’

ভাবো বিদ্বান্। ‘ভাবো বিদ্বানিত্যমরঃ। রেভিলো গায়কত্বেন প্রাক্ পরিচিতঃ কশ্চিৎ চারুদত্তবন্ধুঃ। শব্দায়িত আহূতঃ। কার্য্যেণ প্রযোজনেন।

হইবে না, অতএব অলঙ্কারগুলি লইয়া, সেইখানে গিয়া সমর্পণ কর।” তা, বসন্তসেনার নিকটেই যাই। (পাদক্ষেপপূর্ব্বক দর্শন করিয়া, সম্মুখে) বিদ্বান্ রেভিল যে!। হে বিদ্বন্ রেভিল! আপনাকে অত্যন্ত উদ্বিগ্নের ন্যায় লক্ষ্য করিতেছি কেন ?। (শুনিয়া) কি বলিলেন— “প্রিয়বয়স্য চারুদত্তকে বিচারালয়ে ডাকান হইয়াছে, এই জন্য।” তা অল্প ঘটনা হইবে না। (চিন্তা করিয়া) সুতরাং বসন্তসেনার নিকট পরে যাইব, (আগে) বিচারালয়েই যাই। (পাদক্ষেপপূর্ব্বক দর্শন করিয়া)

অধি। নন্বেষ তিষ্ঠতি।

বিদূ। বঅস্স! সোত্থি দে ?। (জ)

চারু। ভবিষ্যতি। (ঝ)

বিদূ। অবি ক্খেমং দে ?। (ঞ)

চারু। এতদপি ভবিষ্যতি। (ট)

বিদূ। ভো বঅস্স! কিং ণিমিত্তং উব্বিগ্গো উব্বিগ্গো বিঅ লক্খীঅসি ? কুদো বা সদ্দাইদো ?। (ঠ)

(জ) বয়স্য! স্বস্তি তে ?।

(ঞ) অপি ক্ষেমং তে ?।

(ঠ) ভো বয়স্য! কিং নিমিত্তমুদ্বিগ্ন উদ্বিগ্ন ইব লক্ষ্যসে ? কুতো বা শব্দায়িতঃ ?।

(জ) বিদূ ইতি। স্বস্তি মঙ্গলং তে ইতি কাকুবর্ণেন প্রশ্নঃ।

(ঝ) চারু ইতি। ভবিষ্যতীত্যনেন বর্ত্তমানে অস্বস্তি বর্ত্তত ইতি ধ্বনিতম্।

(ঞ) বিদূ ইতি। ক্ষেমং সর্ব্বতো রক্ষা, ন কাচিদপি বিপত্তিরিত্যর্থঃ। 'ক্ষেমং কল্যাণরক্ষয়োঃ। ক্ষেমা চণ্ডা' ইতি বিশ্বকাণ্ডশেষঃ।

(ট) চারু ইতি। অত্রাপি পূর্ব্বব্যাখ্যানেন ধ্বনির্দ্রষ্টব্যঃ।

(ঠ) বিদূ ইতি। কুতঃ কস্মাদ্ধেতোঃ। শব্দায়িত আহূতঃ।

এই বিচারালয়, তা প্রবেশ করি। (প্রবেশ করিয়া) বিচারকমহাশয়দিগের মঙ্গল ত ?। আমার প্রিয়বয়স্য কোথায় ?।

অধিকরণিক। এই যে রহিয়াছেন।

বিদূষক। বয়স্য! আপনার মঙ্গল ত ?।

চারুদত্ত। হইবে।

বিদূষক। আপনার সব দিক্ রক্ষা আছে ত ?।

চারুদত্ত। ইহাও হইবে।

चारु। वयस्य !

मया खलु नृशंसेन परलोकमजानता ।
स्त्री रतिर्वाविशेषेण शेषमेषोऽभिधास्यति ॥३०॥

मयेति । नृशंसेन घातुकेन, परलोकं नरकाख्यलोकान्तरम्, अजानता, स्त्रीहत्यायां कृतायां घोरनरकयातना भवतीत्यबुध्यमानेनेत्यर्थः, मया खलु, स्त्री काचिन्नारी, वा अथवा स्त्रीमात्रकथनेन किमित्यर्थः, अविशेषेण अपार्थक्येन, रतिः मदनभार्य्येव लोकोत्तरसौन्दर्य्यात् साक्षात् कामभार्य्येवेत्यर्थः, शेषम् एतद्वाक्यावशिष्टांशम् मारितेतिपदमित्यर्थः, एष नयनभङ्ग्या निर्द्दिश्यमानो जनः शकार इति तात्पर्य्यम्, अभिधास्यति वक्ष्यति ; नितान्तामङ्गलव्यञ्जकत्वात् निरतिशयनिष्ठुरतासूचकत्वात् गुरुतरपापप्रत्यायकत्वाच्च मारितेति पदं मया नोच्चारयितुं शक्यत इति भावः । अतएव तद्विचारार्थमनेनाधिकरणिकेन शब्दायित इति समुदायाशयः ।

अत्र 'मया कथमपि न मारिता' इति विशेषप्रतिपत्तये स्त्रीहत्यारूपस्य अनिष्टार्थस्य शेषमित्यादिना सूचितेन मारितेति पदेन विध्याभ्यासकरणात् आक्षेपालङ्कारभेदः 'अनिष्टस्य तथार्थस्य विध्याभासः परो मतः' इति दर्पणलक्षणात्, तथा रतित्वमन्तरेणैवाभेदेऽपि अभेदाध्यवसायादतिशयोक्तिः, द्वितीयार्द्धे छेकानुप्रासो वृत्त्यनुप्रासश्च इत्येतेषां मिथो निरपेक्षतया संसृष्टिः ।

'उपकृतं बहु तत्र किमुच्यते' इत्यादिदर्पणोदाहरणवत वक्तव्यार्थस्य अत्यन्तासम्भवतासूचनाय गुरुतरदुःखक्षोभात् स्वीकारोक्तिरियम । अतएव तद्वदेव 'नाहं

विदूषक। वयস্য ! আপনাকে অত্যন্ত উদ্বিগ্নের ন্যায় লক্ষ্য করিতেছি কেন ? ডাকানই বা হইয়াছে কেন ? ।

চারুদত্ত। বয়স্য ! নৃশংস এবং পরলোকানভিজ্ঞ আমি, একটী স্ত্রীকে, অথবা সাক্ষাৎ রতিদেবীকে —। এই ব্যক্তি অবশিষ্ট অংশ বলিবে ॥৩০॥

विदू। किं किं। (ड)

चारु। कर्णे। एवमेवम्। (ढ)

विदू। को एव्वं भणादि ?। (ण)

चारु। संज्ञया शकारं दर्शयति। नन्वेष तपस्वी हेतुभूतः, कृतान्तो मां व्याहरति। (त)

(ड) किं किम्!

(ण) क एवं भणति ?।

नृशंसः नवा परलोकानभिज्ञः, अतएव हि सा स्त्री न मया मारिता' इति वस्तु व्यज्यते। अतएवात्र मनोरथो नाम नाट्यलक्षणञ्च। यथा दर्पणे—

'मनोरथस्त्वभिप्रायस्योक्तिर्भङ्ग्यन्तरेण यत्' इति॥३०॥

(ड) विदू इति। किं किमिति द्विरुक्त्या महानुद्वेगो व्यज्यते।

(ढ) चारु इति। एवमेवम् अलङ्कारापहरणार्थं मया वसन्तसेना व्यापादितेत्यनेनानेन प्रकारेण मां प्रत्यभियोग इत्यर्थः। कर्णे कथनन्तु तादृशस्थाने तथैव व्यवहारात्।

(त) चारु इति। संज्ञया अङ्गुलीसङ्केतेन। तपस्वी क्षुद्रः, हेतुभूतः प्रत्यक्षत इति शेषः। कृतान्तो दैवम्, व्याहरति उक्तमर्थं ब्रवीति। दैवं विना मादृशस्य विपन्नीकरणे अस्य क्षुद्रस्य का शक्तिरिति भावः।

বিদূষক। কি কি!।

চারুদত্ত। (কর্ণে) এই রূপ এই রূপ।

বিদূষক। কে এরূপ বলে ?।

চারুদত্ত। (অঙ্গুলিসঙ্কেত দ্বারা শকারকে দেখাইলেন) এই ক্ষুদ্র লোকটা হেতু বটে, (কিন্তু বাস্তবিক পক্ষে) দৈবই আমাকে এই কথা বলিতেছেন।

विदू । जनान्तिकम् । एव्वं कीस ण भणीअदि गेहं गदे-त्ति ? । (थ)

चारु । उच्यमानमप्यवस्थादोषान्न गृह्यते । (द)

विदू । भो भो अज्जा ! जेण दाव पुरट्ठावण-विहाराराम-देउल-तड़ाग-कूव-जूवेहिं अलङ्किदा णअरी उज्जइणी, सो अ-णोसो अत्थकल्लवत्तकारणादो एरिसं अकज्जं अणुचिट्ठदि-त्ति ? । सक्रोधम् । अरे रे काणेलीसुदा ! राअस्साल-सण्ठाणआ ! उस्सुङ्खलआ ! किद-जण-दोसभण्डआ ! बहु-सुवण्णमण्डिद-

(थ) एवं केन न भण्यते गेहं गतेति ? ।

(ध) भो भो, आर्य्याः ! येन तावत् पुरस्थापन-विहाराराम-देवकुल-तड़ाग-कूप-यूपैरलङ्कृता नगरी उज्जयिनी, सः अनीशः अर्थकल्यवर्त्तकारणादीदृशमकार्य्यमनुतिष्ठतीति ? । अरे रे काणेली-सुत ! राजश्यालसंस्थानक ! उच्छृङ्खलक ! कृतजनदोषभाण्ड !

(द) चारु इति । अवस्थादोषात् दारिद्र्यदशायाः सर्वावस्थ यत्नदोषात् न गृह्यते विचारपतिना सत्यतया नाङ्गीक्रियते ।

(ध) विदू इति । पुरस्थापनं पथिकदरिद्रादिनिवासार्थं भवननिर्म्माणम्, विहारो बौद्धभवनम्, आराम उपवनम्, देवकुलं देवगृहम्, तड़ागो वृहज्जला-शयः, कूपः क्षुद्रजलाशयः, यूपो यज्ञीयकाष्ठविशेषः यज्ञ इत्यर्थः तैः तेषां

বিদূষক। (চারুদত্তের প্রতি চুপি চুপি) এই রূপ বলেন নাই কেন ? যে বাড়ী গিয়াছে।

চারুদত্ত। বলিয়া থাকিলেও, অবস্থার দোষে গ্রাহ্য করেন নাই।

বিদূষক। ওহে ওহে মহাশয়গণ! যিনি পথিক ও দরিদ্রগণের বাসের জন্য ভবননির্ম্মাণ, বৌদ্ধশালা, উদ্যান, দেবগৃহ, পুষ্করিণী, কূপ

मक्कड़आ ! भण भण मम अग्गदो, जो दाणिं मम पिअवअस्सो कुसुमिदं माधवीलदं पि आकिड्डिअ कुसुमावचअं ण करेदि, कदावि आकिड्डिदाए पल्लवच्छेदो भोदित्ति, सो कधं एरिसं अकज्जं उहअलोअविरुद्धं करेदि ? । चिट्ठ रे कुट्टणिपुत्ता ! चिट्ठ, जाव एदिणा तव हिअअकुडिलेण दण्डकट्ठेण मत्थअं दे सदखण्डं करेमि । (घ)

वहुसुवर्णमण्डित मर्कटक ! भण भण ममाग्रतः, य इदानीं मम प्रियवयस्यः कुसुमितां माधवीलतामप्याकृष्य कुसुमावचयं न करोति आकृष्टतया पल्लवच्छेदो भवतीति, स कथमीदृशमकार्य्यमुभयलोकविरुद्धं करोति ? । तिष्ठ रे कुट्टनीपुत्र ! तिष्ठ, यावदेतेन तव हृदयकुटिलेन दण्डकाष्ठेन मस्तकं ते शतखण्डं करोमि ।

निर्म्माणैरिति तात्पर्य्यम् । अनीशः निर्धनतया अप्रभुः सन्, अर्थकल्यवर्त्तकारमात् चणस्थायिधनहेतोः, ईदृशं स्त्रीहत्यारूपम्, अकार्य्यमप्रशस्तकर्म्म, अनुतिष्ठतीति काकुः स्वयमपि नानुतिष्ठतीत्यर्थः । काणेलीति शकारमातुर्नाम सा च कुलटासीदिति तत्सुतसम्बोधनेन निन्दा व्यज्यते । उच्छृङ्खलक ! शास्त्रलोकव्यवहारादिभिरनियमितस्वभाव ! छलो जनानां दोषो येन स चासौ भण्डश्चेति तत्सम्बोधनम्, बहुभिः सुवर्णैः स्वर्णालङ्कारैर्मण्डितो भूषितश्चासौ मर्कटकः कुत्सितवानरश्चेति तत्सम्बोधनम् । उभयलोकविरुद्धं निन्दापापाभ्यामिहामुत्र विरुद्धम् । तव हृदयवत् कुटिलेन वक्रेण, दण्डकाष्ठेन मदीयकाष्ठनिर्म्मितलगुडेन ।

ও যজ্ঞানুষ্ঠান প্রভৃতি করিয়া, এই উজ্জয়িনী নগরীকে অলঙ্কৃত করিয়াছেন; তিনি এখন ধনাভাবে প্রভাবহীন হইয়া, অচিরস্থায়ী ধনের নিমিত্ত, এই রূপ অকার্য্যের অনুষ্ঠান করিতে পারেন কি ? । (ক্রোধের সহিত) ও রে রে কাণেলীর পুত! রাজার শালা সংস্থান ! উচ্ছৃঙ্খল !

শকারः। সক্রোধম্। সুণান্তু সুণান্তু অজ্জমিশ্শা! চালুদত্তাকেণ শহ মম বিবাদে ববহালে বা, তা কীশ এশে কাকপদশীশমত্থকা মম শিলে শদখণ্ডে কলেদি?। মা দাব লে দাশীএ পুত্তা! দুট্ট বড়ুকা!। (ন)

বিদূষকো দণ্ডকাষ্ঠমুদ্যম্য পূর্ব্বোক্তং পঠতি। শকারः সক্রোধমুত্থায় তাড়য়তি।

(ন) শৃণ্বন্তু শৃণ্বন্তু আর্য্যমিশ্রাः! চারুদত্তেন সহ মম বিবাদো ব্যবহারো বা, তৎ কেন এষ কাকপদশীর্ষমস্তকः মম শিরः শতখণ্ডং করোতি?। মা তাবৎ রে দাস্যাः পুত্র! দুষ্টবটুক!।

(ন) শকার ইতি। কাকপদবৎ বায়সচরণবৎ বিষমং ক্রমিকাঞ্চুং বা শীর্ষং শিরः মস্তকঞ্চ যস্য তৎসম্বোধনম্। শকারবচনাদেব শীর্ষমস্তকেতি দ্বিরুক্তিः। মা তাবৎ পুনরেবং ভণেতি শেষः।

লোকের দোষকারী! ভণ্ড! বহুস্বর্ণভূষিত বানর! তুই বল্ বল্ আমার সম্মুখে বল্। আকর্ষণ করায় পল্লব ছিন্ন হইতে পারে এই আশঙ্কায়, আমার যে প্রিয়বয়স্য, পুষ্পিত মাধবীলতাকেও, আকর্ষণ করিয়াও, পুষ্প চয়ন করেন না; তিনি এই রূপ উভয়লোকবিরুদ্ধ অকার্য্য কি করিয়া করিবেন?। থাক্ রে কুট্নীর ছেলে! থাক্; তোর মনের ন্যায় কুটিল এই দণ্ডকাষ্ঠ দিয়া তোর মাথা শতখণ্ড করিব।

শকার। (ক্রোধের সহিত) সভ্যপ্রবরগণ! শুনুন শুনুন। চারুদত্তের সঙ্গে আমার বিবাদ বা মোকদ্দমা; তা, কাকের পায়ের ন্যায় সরু মাথা এই লোকটা, আমার মাথা শতখণ্ড করিতে চায় কেন?। ওরে বাঁদীর পো! দুষ্টবামুন! ফের ওরূপ বলিস না।

(বিদূষক, দণ্ড উত্তোলন করিয়া পূর্ব্বোক্ত পাঠ করিল। শকার

विदूषकः प्रतीपं ताडयति। अन्योन्यं ताडयतः। विदूषकस्य कक्षदेशादाभरणानि पतन्ति।

शकारः। तानि गृहीत्वा दृष्ट्वा ससाध्वसम्। पेक्खन्तु पेक्खन्तु अज्जा। एदे क्खु ताए तवस्सिणीए केलका अलङ्काला। चारुदत्तमुद्दिश्य। इमश्श अत्थकल्लवत्तश्श कालणादो एशा मालिदा वावादिदा अ। (प)

अधिकृताः। सर्वे अधोमुखाः स्थिताः।

चारु। जनान्तिकम्।

(प) प्रेक्षन्तां प्रेक्षन्तामार्य्याः। एते खलु तस्यास्तपस्विन्या अलङ्काराः। अस्य अर्थकल्यवर्त्तस्य कारणादेषा मारिता व्यापादिता च।

(प) शकार इति। साध्वसेन भयेन सहेति ससाध्वसम्। स्वयमेव व्यापादिताया अलङ्कारदर्शनेन स्वस्यैवापराधस्मरणात् साध्वसमिति बोध्यम्। तस्यास्तपस्विन्याः शोच्याया वसन्तसेनायाः।

ক্রোধের সহিত উঠিয়া প্রহার করিল। বিদূষক প্রতিপ্রহার করিল। পরস্পর প্রহার করিতে লাগিল। বিদূষকের কক্ষদেশ হইতে অলঙ্কারগুলি পড়িয়া গেল)

শকার। (সেই অলঙ্কারগুলি লইয়া, দেখিয়া, ভয়ের সহিত) সভ্যগণ! দেখুন, সেই হতভাগিনীর এই অলঙ্কারগুলি। (চারুদত্তের প্রতি) অচিরস্থায়ী এই ধনের জন্যই বসন্তসেনাকে আগে প্রহার করিয়াছে, পরে খুন করিয়া ফেলিয়াছে।

(সকল বিচারকগণ অধোমুখে অবস্থান করিতে লাগিলেন।)

চারুদত্ত। (বিদূষকের প্রতি চুপি চুপি)

अयमेवंविधे काले दृष्टो भूषणविस्तरः।
अस्माकं भाग्यवैषम्यात् पतितः पातयिष्यति ॥२१॥

विदू। भो! कीस भूदत्थं ण णिवेदीअदि?। (फ)

चारु। वयस्य!

दुर्बलं नृपतेश्चक्षुर्नैतत् तत्त्वं निरीक्षते।
केवलं वदतो दैन्यमश्लाघ्यं मरणं भवेत् ॥२२॥

(फ) भोः! केन भूतार्थो न निवेद्यते?।

अयमिति। अस्माकं ममेत्यर्थः, भाग्यस्य अनुकूलदैवस्य वैषम्यात् वैपरीत्यात् दुर्दैवादिति तात्पर्य्यम्, एवंविधे काले मय्यपराधप्रवर्त्तनसमये, पतितस्तव कक्षात् विस्रस्तः, दृष्टो विचारपत्यादिभिः स्वयमेवावलोकितः, अयं भूषणविस्तरः अलङ्कारसमूहः, पातयिष्यति विपत्सागरे मामिति शेषः, एतद्दर्शनेन ममापराधस्य दृढ़निश्चयसम्भवादिति भावः ॥२१॥

(फ) विदू इति। भूतार्थः सत्यविषयः। यथा 'वसन्तसेनयैव मत्पुत्राय शकटिकानिर्म्माणार्थं दत्तानीमान्याभरणानि मया पुनस्तस्यै प्रत्यर्पयितुमस्य हस्ते समर्पितानि' इति कथं नोच्यत इत्यर्थः। "भूतं सत्योपमानयोः। प्राप्तेऽतीते पिशाचादौ पृथ्व्यादौ जन्तुकार्य्ययोः" इति हैमः।

दुर्बलमिति। नृपतेर्नृपतिप्रतिनिधिभूतस्य अस्य अधिकरणिकस्य, दुर्बलं तत्त्वनिर्णयाक्षमं चक्षुश्चक्षुःस्वरूपा बुद्धिः, एतत् तत्त्वं त्वयोपदिष्टं सत्यार्थम्, न निरीक्षते न पश्यति नावधारयितुं शक्नोतीत्यर्थः। तथाप्युक्ता परीक्षतामित्याह

আমার দুর্ভাগ্যবশতঃ এইরূপ সময়ে এই অলঙ্কারগুলি, সকলের দৃষ্টিগোচর হইয়া, পতিত হইল; সুতরাং আমাকেও, পাতিত করিবে ॥২১॥

বিদূষক। বয়স্য! সত্য ঘটনা জানাও না কেন?।

চারুদত্ত। বয়স্য! রাজপ্রতিনিধির (বিচারকের) চক্ষু, (জ্ঞান-

श्रेष्ठी । कष्टं भोः । कष्टम् ।

अङ्गारकविरुद्धस्य प्रक्षीणस्य बृहस्पतेः ।

ग्रहोऽयमपरः पार्श्वे धूमकेतुरिवोत्थितः ॥३३॥

श्रेष्ठिकायस्थौ । विलोक्य वसन्तसेनामातरमुद्दिश्य । अवहिदा

यदतस्तत्सत्यार्थं ब्रुवतो मम केवलं दैन्यं कातर्य्यमेव प्रकाशितं भवेदिति शेषः, तथात्वे च अश्लाघ्यम् अप्रशस्यं मरणं भवेत् । तथा च विचारकस्य यादृशी चित्तवृत्तिर्लक्ष्यते तयानुमीयते मम मृत्युदण्डं दद्यादेव, एवञ्च कातरताम-प्रकाश्य तेजस्विभावेन मरणमेव श्रेय इति भावः ॥३२॥

अङ्गारकेति । अङ्गारकेण मङ्गलग्रहेण विरुद्धस्य विरोधिभावेनाक्रान्तस्य, प्रक्षीणस्य मकरगतत्वेन नीचस्थतया दुर्व्वलीभूतस्य, बृहस्पतेस्तदाख्यग्रहस्य, पार्श्वे धूमकेतुरिव, अयमपरो ग्रहः, उत्थित उदितः । एवञ्च बृहस्पतेरस्तगमनमेव सर्व्वथा सम्भवपरम्, तथा शकारेणाभियुक्तस्य नष्टधनतया प्रक्षीणस्य च चारुदत्तस्य पार्श्वे धूमकेतुरिव तद-मङ्गलसूचकः अयमलङ्कारसमूह उपस्थित इति चारुदत्तस्याप्यस्तगमनमेव सम्भवपरमिति भावः ।

अतएवात्र अप्रस्तुतात् तस्मात् प्रस्तुतस्य तस्य प्रतीतेरप्रस्तुतप्रशंसालङ्कारः श्रौतोप-मया सङ्कीर्य्यते ।

अङ्गारकविरुद्धत्वादिफलं ज्योतिषशास्त्रेऽनुसन्धेयं, विस्तरभयान्न लिखितम् ॥३३॥

नयन) दुर्বল (যথার্থ নির্ণয় করিতে অক্ষম ;) সুতরাং যথার্থ ঘটনা বলায় কেবল কাতরতাই প্রকাশ পাইবে অধিকন্তু অশ্লাঘ্য মৃত্যু হইবে ॥৩২॥

অধিকবণিক । কষ্ট, হায় কি কষ্ট ।

বিরুদ্ধভাবে মঙ্গলকর্তৃক আক্রান্ত এবং ক্ষীণ বৃহস্পতির পার্শ্বে ধূম-কেতুর ন্যায় এই আর একটা গ্রহ উদয় পাইয়াছে ॥৩৩॥

दाव अज्जा एदं सुवस्सभण्डअं अवलोएदु, सो ज्जेव एसो ण वेत्ति । (ब)

वृद्धा । अवलोक्य । सरिसो एसो, ण उण सो । [भ]

शकारः । आं वुड्ढकुट्टणि ! अक्खीहिं मन्तिदं वाआए मूकिदं । [म)

वृद्धा । हदास ! अवेहि । [य]

(ब) अवहिता तावत् आर्य्या एतत् सुवर्णभाण्डकमवलोकयतु, तदेवेदं न वेत्ति ।

(भ) सदृश एषः, न पुनः सः ।

(म) आं वृद्धकुट्टनि ! अक्षिभ्यां मन्त्रितं वाचा मूकितम् ।

(य) हताश ! अपेहि ।

(म) शकार इति । अक्रमसुक्तमिदम् । क्रमस्तु अक्षिभ्यां मूकितम्, वाचा मन्त्रितमिति । तथा च अक्षिभ्यां मूकितं मूकवदाचरितं चक्षुर्भ्यां न दृष्टमित्यर्थः, वाचा वाक्येन मन्त्रितं 'सदृश एष, न पुनः सः' इत्युक्तम् । तथा च अक्षिभ्यां दृष्टञ्चेत्तदा नैवं ब्रूयाः, एतेषां तदलङ्कारत्वादेवेति भावः ।

শ্রেষ্ঠী ও কায়স্থ। (দেখিয়া, বসন্তসেনার মাতার প্রতি) আপনি মনোযোগ করিয়া, এই অলঙ্কারগুলি দেখুন যে, এগুলি সেই অলঙ্কারই কি না।

বৃদ্ধা। (দেখিয়া) এগুলি, সেই অলঙ্কারেরই সদৃশ বটে, কিন্তু তাহাই নহে।

শকার। আ বৃদ্ধকুট্টনি! তুমি নয়নদ্বারা বলিলে, বাক্য দ্বারা মূক হইলে। (টীকা দ্রষ্টব্য)

বৃদ্ধা। হতভাগা! দূর হ।

श्रेष्ठिकायस्थौ। अप्पमत्तं कधेहि, सो ज्जेव एसो ण वेत्ति। (र)

वृद्धा। अज्ज! सिप्पिकुसलदाए ओबन्धेदि दिट्ठिं, ण उण सो। (ल]

अधि। भद्रे! अपि जानासि एतान्याभरणानि? ।[व]

वृद्धा। णं भणामि,—णहु णहु अणभिजाणिदो अहवा कदावि सिप्पिणा घड़िदो भवे। [श]

(र) अप्रमत्तं कथय स एव एष न वेति।

(ल) आर्य्य! शिल्पिकुशलतया अवबध्नाति दृष्टिम्, न पुनः सः।

(श) ननु भणामि,— न खलु न खलु अनभिज्ञातः, अथवा कदापि शिल्पिना घटितो भवेत्।

(र) श्रेष्ठि इति। अप्रमत्तं सावधानम् अस्मिन् मनोयोगपूर्व्वकमित्यर्थः।

(ल) वृद्धा इति। शिल्पिन एतन्निर्म्माणकारकस्य कुशलतया नैपुण्येन, दृष्टिं मम नयनम्, अवबध्नाति गाढ़मासञ्जयति, परमसुसदृश इति भावः।

(व) अधि इति। जानासि परिचिनोषि?।

(श) वृद्धा इति। न खलु न खलु अनभिज्ञातः अपि तु अभिज्ञातः परिचित एवेत्यर्थः। शिल्पिना घटितो भवेत् मम वसन्तसेनाया एव निमित्तमिति शेषः।

শ্রেষ্ঠী ও কায়স্থ। সাবধানে বলুন, এগুলি সেই অলঙ্কারই কি না।

বৃদ্ধা। শিল্পীর নৈপুণ্যবশতঃ দৃষ্টি আকর্ষণ করিতেছে বটে; কিন্তু তাহাই নহে।

অধিকরণিক। ভদ্রে! আপনি এই অলঙ্কারগুলি চেনেন?।

বৃদ্ধা। আমি ত বলিতেছিই—ইহা যে চিনি না এমন নহে; অথবা কখনও শিল্পী গড়াইয়া থাকিবে।

অধিক। পশ্য শ্রেষ্ঠিন্!।

বস্ত্বন্তরাণি সদৃশানি ভবন্তি নূনং
রূপস্য ভূষণগুণস্য চ কৃত্রিমস্য।
দৃষ্ট্বা ক্রিয়ামনুকরোতি হি শিল্পিবর্গঃ
সাদৃশ্যমেব কৃতহস্ততয়া চ দৃষ্টম্ ॥২৪॥

বস্ত্বিতি। কৃত্রিমস্য কারণেন নির্বৃত্তস্য কৃতনিষ্পন্নস্য রূপস্য যস্য কস্যচিদাকারস্য তথাপি ভূষণগুণস্য সুন্দরালঙ্কারস্য চেত্যর্থঃ, সদৃশানি অনুরূপাণি, বস্ত্বন্তরাণি আকারভূষণাদীনি অন্যানি বস্তূনি, নূনং নিশ্চিতং ভবন্তি, হি যস্মাৎ, শিল্পিবর্গঃ কৃতহস্ততয়া শিল্পনৈপুণ্যেন, দৃষ্ট্বা পদার্থান্তরমবলোক্য, ক্রিয়াং তৎকরণম্ অনুকরোতি তদনুরূপমেব বস্ত্বন্তরং নির্ম্মিমীতে ইত্যর্থঃ, সুতরাঞ্চ তয়োঃ সাদৃশ্যং দৃষ্টমেব অস্মদাদিভিঃ সর্ব্বৈঃ প্রত্যক্ষীকৃতমেব। অত এবৈতানি বসন্তসেনায়া এবেতি নির্ণেতুং ন শক্যতে তদ্দর্শনেন অন্যস্যার্থেঽপি শিল্পিভিরেষাং ঘটনসম্ভবাদিতি ভাবঃ।

অত্রাপ্রস্তুতক্রিয়াসামান্যাভিধানাৎ প্রস্তুতবসন্তসেনালঙ্কারক্রিয়ারূপবিশেষপ্রতীতেরপ্রস্তুতপ্রশংসালঙ্কারঃ। তথা সাদৃশ্যমেব দৃষ্টম্ ইতি বাক্যমধ্যে পূর্ব্ববাক্যীয়স্য কৃতহস্ততয়েতি পদস্য অনুপ্রবেশাৎ সঙ্কীর্ণতাদোষঃ, স চ 'দৃষ্ট্বা ক্রিয়ামনুকরোতি হি দক্ষশিল্পী সাদৃশ্যমেব তু তয়োর্নিখিলৈশ্চ দৃষ্টম্' ইতি পাঠেন সমাধেয়ঃ। রূপস্যেত্যনেনৈব সামান্যাৎ ভূষণগুণলাভেঽপি ভূষণগুণস্যেত্যুক্তির্গোবৃষন্যায়াদিতি নার্থগতপুনরুক্ততাদোষঃ।

বসন্ততিলকা বৃত্তম্ ॥২৪॥

অধিকরণিক। দেখ শ্রেষ্ঠী!।

কৃত্রিম যে কোন আকৃতির অনুরূপ অন্য আকৃতি এবং সুন্দর অলঙ্কারের অনুরূপ অন্য অলঙ্কার, অবশ্যই হইতে পারে। কারণ, শিল্পিগণ

শ্রেষ্ঠিকায়স্থৌ ॥ অজ্জচারুদত্তস্স কেরকাইং এদাইং ?।[ষ]

চারু। ন খলু ন খলু।

শ্রেষ্ঠিকায়স্থৌ। তা কস্স ?। [স]

চারু। ইহাত্রভবত্যা দুহিতুঃ। [হ]

শ্রেষ্ঠিকায়স্থৌ। কধং এদাইং তাএ বিওঅং গদাইং ? [ক্ষ]

চারু। এবং গতানি। আঃ ইদম্। [ক]

(ষ) আর্য্যচারুদত্তীয়ান্যেতানি ?।

(স) তৎ কস্য ?।

(ক্ষ) কথমেতানি তস্যা বিয়োগং গতানি ?।

(হ) চারু ইতি। ইহ অস্মিন্নেব স্থানে বিদ্যমানায়া ইতি শেষঃ, অত্রভবত্যা মান্যায়া বৃদ্ধায়াঃ, দুহিতুঃ কন্যায়া বসন্তসেনায়াঃ।

(ক) চারু ইতি। এবমনেন প্রকারেণ। আমিতি স্মরণে। ইদম্ ইত্থং ঘটিতমিত্যর্থঃ। বসন্তসেনায়া অভাবে জীবনস্যানাবশ্যকতাং পর্য্যালোচ্য স্বীকারোক্তিপ্রায়মুক্তমিদমিতি বোধ্যম্।

শিক্ষানৈপুণ্যবশতঃ, একটী বস্তু দেখিয়া, তাহার নির্ম্মাণের অনুকরণ করিয়া থাকে ; তাহার পর সেই বস্তুদ্বয়ের সাদৃশ্যই দেখা যায় ॥৩॥

শ্রেষ্ঠী ও কায়স্থ। তবে এই অলঙ্কারগুলি আর্য্য চারুদত্তের ?।

চারুদত্ত। না না।

শ্রেষ্ঠী ও কায়স্থ। তবে কাহার ?।

চারুদত্ত। এইখানে উপস্থিত এই মাননীয়া বৃদ্ধার কন্যার।

শ্রেষ্ঠি ও কায়স্থ। এগুলি, তাহার বিচ্ছেদ প্রাপ্ত হইল কি প্রকারে ?

চারুদত্ত। এই ভাবে পাইয়াছে। ও! এইরূপ ঘটিয়াছে।

श्रेष्ठिकायस्थौ। अज्जचारुदत्त! एत्थ सच्चं वत्तव्वं। पेक्ख पेक्ख। [ख]

सच्चेण सुहं क्खु लब्भइ; सच्चालावि ण होइ पादई [१]।
सच्चं त्ति दुवेवि अक्खरा, मा सच्चं अलिएण गूहेहि ॥३५॥

चारु। आभरणानि आभरणानीति न जाने, किन्त्वस्मद्-गृहादानीतानीति जाने। (ग)

(ख) आर्य्यचारुदत्त! अत्र सत्यं वक्तव्यम्। प्रेक्षस्व प्रेक्षस्व।

(३५) सत्येन सुखं खलु लभ्यते सत्यालापी न भवति पातकी।
सत्यमिति द्वे अपि अक्षरे मा सत्यमलीकेन गूहय ॥

सत्येनेति। सत्येन सत्यवाक्येन खलु सुखं लभ्यते लोकैरिति शेषः, सत्येन धर्म्मजननात् धर्म्मेण च सुखोत्पादनादिति भावः। सत्यालापी सत्यभाषी जनः, पातकी न भवति तत् कारणाभावादित्याशयः। सत्यमिति द्वे अपि अक्षरे स्वरद्वयात्मकद्वावर्णोपहितमपि सत्यं जगत्सु सारमिति शेषः, तच्च सत्यम्, अलीकेन अनृतेन मा निगूहसि न तिरस्करिष्यसीत्यर्थः नितान्ततुच्छेन सारतिरस्करणस्यान्याय्यत्वादिति भावः। वैतालीयं नाम छन्दः ॥३५॥

(ग) चारु इति। आभरणानि इमानलङ्कारान्, आभरणानीति न जाने केवलालङ्कारत्वेन नावगच्छामि। तर्हि किं जानासीत्याह किन्त्विति।

শ্রেষ্ঠী ও কায়স্থ। আর্য্যচারুদত্ত! এখানে সত্য বলিতে হইবে। দেখুন দেখুন—

সত্যে সুখ পাওয়া যায়; সত্যবাদী, পাপী হন না এবং "সত্য" এই দুইটি অক্ষর হইলেও ইহা জগতের সার; মিথ্যা দ্বারা সেই সত্যকে গোপন করিবেন না ॥৩৫॥

---

(१) सच्चालावे ण होइ पावं।

শকারঃ। উজ্জাণং পবেশিঅ পঢমং মালেশি, কবড়-কাবড়িআএ শম্পদং ণিগূহেশি। (ঘ)

অধি। আর্য্যচারুদত্ত! সত্যমভিধীয়তাম্।

ইদানীং সুকুমারেঽস্মিন্ নিঃশঙ্কং কর্কশাঃ কশাঃ।
তব গাত্রে পতিষ্যন্তি সহাস্মাকং মনোরথৈঃ ॥৩৬॥

(ঘ) উদ্যানং প্রবেশ্য প্রথমং মারয়সি, কপট-কাপটিকয়া সাম্প্রতং নিগূহসি।

(ঘ) শকার ইতি। কপটস্য স্বভাবধূর্ত্তস্য কাপটিকা ছলব্যবহারস্তয়া।

ইদানীমিতি। সুকুমারে কোমলে, অস্মিন্ তব গাত্রে, কর্কশাঃ কঠিনাঃ, কশাঃ অশ্বতাড়নায় ব্যবহর্ত্তব্যা বেত্রদণ্ডবিশেষাঃ, অস্মাকং মনোরথৈঃ 'তব সর্ব্বথৈব নিষ্কৃতির্ভবতু' ইত্যেবমভিলাষৈঃ সহ, নিঃশঙ্কং নিরুদ্বেগং তব মরণভয়রহিতং যথা স্যাত্তথা ইদানীং পতিষ্যন্তি তব গাত্রে দারুণা বেত্রপ্রহারা ভবিষ্যন্তি অস্মাকং তব নিষ্কৃতিলাভাভিলাষা অপি লোপং যাস্যন্তীত্যর্থঃ।

অত্র সহোক্তিরলঙ্কারঃ ॥৩৬॥

চারুদত্ত। এই অলঙ্কারগুলিকে কেবল অলঙ্কার বলিয়া যে জানি তাহা নহে; কিন্তু আমাদের বাড়ী হইতে আনা হইয়াছে ইহা জানি।

শকার। প্রথম উদ্যানে প্রবেশ করাইয়া খুন করিয়াছ, এখন কপটাচারী হইয়া গোপন করিতেছ।

অধিকরণিক। আর্য্য চারুদত্ত! সত্য বলুন।

এখন নিঃশঙ্কভাবে আপনার এই কোমল অঙ্গে, আমাদের অভিলাষের সহিত, কঠিন কশাঘাত, পতিত হইবে ॥৩৬॥

चारु। अपापानां कुले जाते मयि पापं न विद्यते ।
यदि सम्भाव्यते पापमपापेन च किं मया ॥३७॥

स्वगतम्। न च मे वसन्तसेनाविरहितस्य जीवितेन कृत्यम् ।

प्रकाशम्।

भोः! किं बहुना। (ङ)
मया किल नृशंसेन लोकद्वयमजानता ।
स्त्री रतिश्च विशेषेण शेषमेषोऽभिधास्यति ॥३८॥

अपापानामिति। अपापानां पुरुषाणां कुले जाते मयि, पापम् उक्तस्त्रीहत्याजनितमिति भावः न विद्यते, मया अकृतत्वादित्याशयः। तथापि यदि पापं तत्स्त्रीहत्याजनितं दुष्कृतम्, सम्भाव्यते त्वया मन्यते ; तदा अपापेन तत्पापहीनेनापि मया किं मज्जीवनेन किं प्रयोजनम् किमपि नेत्यर्थः। भवादृशसविचारकस्य पापसम्भावनेन सर्वैरेव तत्सम्भावनीयतया जीवनापेक्षया मम मरणमेव श्रेय इति भावः।

अत्र आत्मनि पापविद्यमानत्वाभावं प्रति अपापकुलजातत्वं हेतुरिति पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥३७॥

(ङ) स्वगतमिति। जीवितेन जीवनेन, कृत्यं कार्य्यं किमपि प्रयोजनं न चेत्यर्थः, जीवने केवलतच्छोकदुःखानुभवसम्भवादिति भावः।

मयेति। नृशंसेन क्रूरेण, लोकद्वयमजानता इह लोके महती निन्दा परलोके च घोरनरक इत्यबुध्यमानेनेत्यर्थः, मया किल, स्त्री सा योषित् विशेषेण रतिस्तदनुरागश्च,

---

চারুদত্ত। আমি, নিষ্পাপ পূর্ব্বপুরুষদিগের বংশে জন্মিয়াছি; সুতরাং বস্তুতঃ আমাতে পাপ নাই। তবে আপনি যদি পাপের সম্ভাবনা করেন; তবে পাপবিহীন হইলেও আমাদ্বারা কি হইবে ॥৩৭॥

(স্বগত) বসন্তসেনাবিহীন আমার জীবনের প্রয়োজন নাই। (প্রকাশ্যে) মহাশয়! অধিক বলিয়া কি হইবে।

शकारः। वावादिदा। अले! तुमं पि भण—'मए वावादिदा" त्ति। (च)

चारु। त्वयैवोक्तम्। (छ)

शकारः। शुणोध शुणोध भट्टालका! एदेण मालिदा,

(च) व्यापादिता। अरे! त्वमपि भण—'मया व्यापादिता इति।

(ज) शृणुत शृणुत भट्टारकाः! एतेन मारिता एतेनैव संशयच्छिन्नः। एतस्य दरिद्र-चारुदत्तस्य शारीरो दण्डो धार्य्यताम्।

एषः अभियोक्ता शकारः, शेषम् एतद्वाक्यावशिष्टांशं व्यापादितेति पदमित्यर्थः, अभिधास्यति वक्ष्यति। वसन्तसेनाया अभावे जीवनेच्छाया अभावात् मर्त्तुमिच्छयैव स्वीकारोक्तिप्रायमिदम्। तत्र च व्यापादितेति पदस्य स्वयमेवाभिधाने मिथ्योक्तिदोषः, आत्महत्यायामात्मन एव च प्रयोजकत्वं स्यादित्यतो व्यापादितेति पदाभिधानभारः शकारोपरि समर्पित इति बोध्यम्।

अत्र प्रस्तुतायाः स्त्रिया अप्रस्तुतायाश्च रतेः सूचितव्यापादितेत्येककियाभिसम्बन्धाद्दीपकमलङ्कारः पूर्ववदनुप्रासश्चेति संसृष्टिः ॥३८॥

(च) शकार इति। "शेषमेषोऽभिधास्यति" इतीङ्गितकरणात् तच्छेषमेवाह व्यापादितेति।

(छ) चारु इति। सुतरां पुनर्मदुक्तेः प्रयोजनाभाव इत्याशयः।

(ज) शकार इति। भट्टारका राजानः राजप्रतिनिधित्वेन राजस्थानीया विचारका इत्यर्थः। "राजा भट्टारको देवः" इत्यमरः। संशयच्छिन्नः—'अनेन मारिता न वा' इति सन्देहो दूरीकृतः, व्यापादितेति पदस्य स्वयमनभिधानेऽपि मदुपरि तदभि-

---

নৃশংস এবং ইহলোক ও পরলোকে অনভিজ্ঞ আমি, একটী স্ত্রীকে এবং তাহার প্রতি অনুরাগকে,—অবশিষ্ট ইনি বলিবেন ॥৩৮॥

শকার। নষ্ট করিয়াছি। ওরে! তুমিও বল যে, 'আমি নষ্ট করিয়াছি।

চারুদত্ত। তুমিই ত বলিয়াছ।

एदेण ज्जेव शंशए छिण्णे। एदस्स दलिद्दचालुदत्तस्स शालीले दण्डे धालीअदु। (ज)

अधि। शोधनक! यथाह राष्ट्रियः। भो राजपुरुषाः! गृह्यतामयं चारुदत्तः। (झ)

राजपुरुषा गृह्णन्ति।

वृद्धा। पसीदन्तु पसीदन्तु अज्जमिस्सा। जो दाव चोरेहिं अवहिदस्स इत्यादि पूर्वोक्तं पठति। ता जदि वावादिदा मम दारिआ, वावादिदा; जीवदु मे दीहाऊ। अस्सं च—अत्थि-पच्चत्थिणं ववहारो, अहं अत्थिणी, ता मुञ्चध एदं। [ञ]

(ञ) प्रसीदन्तु प्रसीदन्तु आर्य्यमिश्राः। तद् यदि व्यापादिता मम दारिका, व्यापादिता; जीवतु मे दीर्घायुः। अन्यच्च-अर्थि-प्रत्यर्थिनोर्व्यवहारः, अहमर्थिनी, तत् मुञ्चत एतम्।

धारमारोपणात् मया च तदभिधानादिति भावः। शारीरो दैहिकः। धार्य्यता-मवधार्य्यताम्। दरिद्रतया अस्यार्थदण्डासम्भवादित्याशयः। अतएव दरिद्रविशेषणं दत्तम्।

(झ) अधि इति। राष्ट्रियो राजश्यालः, यथाह यथार्थमेव ब्रवीति। अत एवास्य शारीरो दण्ड एव मया विधेय इति भावः। अतएवाह भो इत्यादि।

শকার। রাজপ্রতিনিধিগণ! শুনুন শুনুন, ইনিই খুন করিয়াছেন, ইনিই সে সংশয়চ্ছেদ করিলেন। এখন এই দরিদ্র চারুদত্তের শারীরিক দণ্ড নির্দ্দেশ করুন।

অধিকরণিক। শোধনক! রাজশ্যালক, যথার্থই বলিয়াছেন। হে রাজপুরুষগণ! এই চারুদত্তকে ধর।

রাজপুরুষগণ ধরিল।

शकारः। अपेहि गर्भदासि! गच्छ, किं तव एतेन?। (ट)

अपेहि। आर्य्ये! गम्यताम्। हे राजपुरुषाः! निष्क्रामयतैनाम्। [ठ]

(ट) अपेहि गर्भदासि! गच्छ, किं तव एतेन?।

(ञ) हतेति। व्यापादितैव भवत्वित्यर्थः। इयन्तु सम्मत्युक्तिः। दीर्घायुश्चारुदत्तः। अन्यस्य चारुदत्तस्य प्राणदण्डाभावेन जीवने अपरस्य कारणं विद्यते इत्यर्थः। अर्थिप्रत्यर्थिनोर्वादिप्रतिवादिनोरेव व्यवहारः प्रसिद्ध इति शेषः; तत्र अहमेव अर्थिनी वादिनी, हताया वसन्तसेनाया जननीत्वेन तत्पक्षीयत्वात्, न पुनः शकार उदासीनत्वेन साक्षिस्थानीयत्वादित्याशयः। तत् तस्मात् वादिन्या मम प्रार्थनावशादित्यर्थः, एतं चारुदत्तं मुञ्चत। तथा च वादिपक्षस्य आपत्त्यभावादपराधिनो मुक्तिदानं युक्तमेवेति भावः।

(ठ) अपेहीति। एनां वृद्धाम्। तथा च हत्याद्यपराधे राजपक्षोऽपि वादी भवति; तेन वास्तविकवादिन्यास्तव आपत्त्यभावेऽपि राजपक्षस्य आपत्तिसम्भवाच्चारुदत्तस्य मुक्तिदानमसम्भवमेवेति भावः।

বৃদ্ধা। বিচারকপ্রবরগণ! প্রসন্ন হউন প্রসন্ন হউন। (চোরে যাহা নিয়াছিল তাহা দিনি ইত্যাদি পূর্ব্বোক্ত পাঠ করিল) তা যদি আমার মেয়েকে খুন করিয়া থাকেন, তা করিয়াছেন; আমার দীর্ঘায়ু (চারুদত্ত) বাঁচিয়া থাকুন। আরও এক কথা—বাদি-প্রতিবাদির মোকদ্দমা হইয়া থাকে; আমি বাদিনী; (আমি বলিতেছি) ইহাঁকে ছাড়িয়া দিন।

শকার। দূর হ, গর্ভদাসি! যা, তোর ইহা দিয়া প্রয়োজন কি?

অধিকরণিক। আর্য্যে! আপনি যান। রাজপুরুষগণ! এই বৃদ্ধাকে বহির্গত কর।

বৃদ্ধা। হা জাদ! হা পুত্তঅ!। ইতি রুদতী নিষ্ক্রান্তা।

[ড]

শকারঃ। স্বগতম্। কিদং মএ এদশ্শ অত্তণো শলিশং।
শম্পদং গচ্ছামি। ইতি নিষ্ক্রান্তঃ। (ঢ)

অধি। আর্য্যচারুদত্ত! নির্ণয়ে বয়ং প্রমাণম্, শেষে
তু রাজা। তথাপি শোধনক। বিজ্ঞাপ্যতাং রাজা পালকঃ—

(ণ)

(ড) হা জাত! পুত্রক!।

(ঢ) কৃতং ময়া এতস্য আত্মনঃ সদৃশম্। সাম্প্রতং গচ্ছামি।

(ঢ) শকার ইতি। সদৃশম্ উপযুক্তং কর্ম্মেত্যর্থঃ।

অহো! শকারস্যেদৃশং চরিতং দর্শয়িত্বা কবিনা দুর্জনচরিতস্য পরাকাষ্ঠা দর্শিতা।

(ণ) অধি ইতি। পূর্বসাধুতাস্মরণাৎ চারুদত্তস্য পুনরার্য্যেতি বিশেষণম্। নির্ণয়ে বাদিপ্রতিবাদিনোরন্যতরস্য অপরাধাদিনিশ্চয়ে, বয়মহমিত্যর্থঃ 'অস্মদস্য' ইতি বহুবচনাত, প্রমাণং সমর্থা ইত্যর্থঃ, রাজ্ঞা তন্মাত্রং কর্তুমেব নিযুক্তত্বাদিতি ভাবঃ। শেষে অপরাধিনো মুক্তিদানাদৌ রাজা প্রমাণমিত্যন্বয়ঃ।

বৃদ্ধা। হা বৎস! হা পুত্র! (এই বলিয়া, কাঁদিতে কাঁদিতে চলিয়া গেল)

শকার। (স্বগত) আমার এই স্বভাবের যোগ্য কার্য্য করিলাম, এখন যাই। (এই বলিয়া চলিয়া গেল)

অধিকরণিক। আর্য্যচারুদত্ত! আমরা যথার্থবিষয় নির্ণয়মাত্র করিবার অধিকারী; কিন্তু মুক্তি বা শাস্তি দিতে রাজাই পারেন। তথাপি, শোধনক! তুমি রাজা পালককে জানাও।

अयं हि पातकी विप्रो न वध्यो मनुरब्रवीत् ।
राष्ट्रादस्मात्तु निर्वास्यो विभवैरक्षतैः सह ॥३८॥

शोधनकः । जं अज्जो आणवेदि । इति निष्क्रम्य पुनः प्रविश्य साश्रम् । अज्जा ! गदम्हि तहिं । राआ पालओ भणादि— 'जेण अत्थकल्लवत्तस्स कारणादो वसन्तसेणा वावादिदा, तं ताइं ज्जेव आहरणाइं गले बन्धिअ डिण्डिमं ताडिअ दक्खिण मसाणं णइअ सूले भज्जेध त्ति । जो को वि अवरो एरिसं

(त) यदार्य्य आज्ञापयति । आर्य्याः ! गतोऽस्मि तस्मिन् । राजा पालको भणति "येन अर्थकल्यवर्त्तस्य कारणात् वसन्तसेना व्यापादिता, तं तान्येव आभरणानि गले बद्धा, डिण्डिमं ताड़यित्वा,

अयमिति । अयं विप्रश्चारुदत्तः, पातकी लोभेन स्त्रीहत्यया पापी सन्नपि, नहि वध्यः । तर्हि किं कर्त्तव्यमित्याह —तु किन्तु अक्षतैः प्रसह्यग्रहणादिभिरविनष्टैः सम्पूर्णैरेवेत्यर्थः विभवैर्धनैः सह, अस्मात् तु राष्ट्रात् राज्यात् निर्वास्यो वहिष्कार्य्यः, इति मनुरब्रवीत् । तथा च

'वपनं द्रविणादानं देशान्निर्यापनं तथा ।
एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः ॥'

इति स्मरणात् धनसम्पत्त्या सह अयं चारुदत्तो राज्यात् वहिष्क्रियताम्, न पुनर्वध्यतामिति राजा पालको विज्ञाप्यतामित्याशयः ॥३८॥

(त) शोधनक इति । अर्थकल्यवर्त्तस्य स्वल्पस्थायिनो धनस्य । तान्येव तदीया-

এই ব্রাহ্মণ পাপী হইলেও বধ্য নহে; তবে অক্ষুণ্ণ ধনসম্পত্তির সহিত ইহাকে এই রাজ্য হইতে নির্ব্বাসন করা উচিত, —একথা মনু বলিয়াছেন ॥৩৯॥

শোধনক। আর্য্য যাহা আদেশ করেন। (এই বলিয়া চলিয়া

অকজ্জং অণুচিট্ঠদি, সো এদিণা সণিআরদণ্ডেণ সাসীঅদি।' (ত)

চারু।' অহো! অবিমৃশ্যকারী রাজা পালকঃ। অথবা— (থ)

ঈদৃশে ব্যবহারাগ্নৌ মন্ত্রিভিঃ পরিপাতিতাঃ।
স্থানে খলু মহীপালা গচ্ছন্তি কৃপণাং দশাম্ ॥৪০॥

দক্ষিণ-শ্মশানং নীত্বা, শূলে ভঙ্‌ক্ত ইতি। যঃ কোঽপি অপরঃ ঈদৃশ মকার্য্যমনুতিষ্ঠতি, স এতেন সনিকারদণ্ডেন শিষ্যতে।

ন্যেব। ভঙ্‌ক্ত আমর্দ্দয়ত বিনাশয়তেত্যর্থঃ। নিকারেণ ধিক্কারেণ সহ সনিকারো যো দণ্ডস্তেন, শিষ্যতে শাসনবিষয়ীক্রিয়তে।

(থ) চারু ইতি। অবিমৃশ্যকারী অবিবেচনপূর্ব্বককার্য্যকারী, অধিকরণিককৃতনির্ণয়স্য সাধুত্বমসাধুত্বং বেতি বিবেচনস্য স্বয়মপ্যকৃতত্বাদিতি ভাবঃ।

ঈদৃশ ইতি। ঈদৃশে, ব্যবহারো বিচার এবাগ্নির্নিতরামুত্তাপকত্বাদিতি ভাবঃ তস্মিন্, মন্ত্রিভিরমাত্যাদায়কৈরাত্মনিরূপণেনৈব কর্ত্তব্যোপদেশকৈরধিকরণিকাদিভিরিত্যর্থঃ পরিপাতিতা নিক্ষিপ্তাঃ, মহীপালা রাজানঃ, কৃপণাং নির্দ্দয়ত্বরূপাং ক্ষুদ্রাম্, দশামবস্থাম্, গচ্ছন্তি প্রাপ্নুবন্তি, স্থানে খলু এতদ্যুক্তমেব; অন্যথা স্বতস্তেষাং কৃপণত্বাসম্ভব ইতি ভাবঃ।

যাইয়া পুনরায় প্রবেশ করিয়া, অশ্রুজলের সহিত) আর্য্য আমি সেখানে গিয়াছিলাম রাজা পালক বলিলেন—"অচিরস্থায়ী ধনের জন্য যে, বসন্তসেনাকে খুন করিয়াছে, তাহাকে সেই অলঙ্কারগুলিই গলায় বাঁধিয়া ঢেঁড়া বাজাইয়া, দক্ষিণ শ্মশানে নিয়া শূলে দিয়া হত্যা কর। অন্য যে কেহও এইরূপ অকার্য্য করিবে, তাহাকেও এইরূপ ঘৃণিত দণ্ডে শাসন করা হইবে।"

अपि च । ईदृशैः श्वेतकाकीयै राज्ञःशासनदूषकैः ।
अपापानां सहस्राणि हन्यन्ते च हतानि च ॥४१॥

सखे ! मैत्रेय ! गच्छ, मद्वचनादम्बामपश्चिममभिवादयस्व । पुत्रञ्च मे रोहसेनं परिपालयस्व । (ट)

अत्राप्रस्तुतमत्स्यौपालसामान्यात् प्रस्तुत-पालकरूप-मत्स्यौपालविशेषप्रतीतेरप्रस्तुतप्रशंसालङ्कारः ॥४०॥

ईदृशैरिति । श्वेतकाकीयैः श्वेतवर्णकाकतुल्यैः. श्वेतवर्णाः काका यथा बहिः सुन्दरा दर्शनमात्रेणैवामङ्गलसूचकतया अन्तरमङ्गलाः, तद्वदेव राज्ञो विचारकादयो बहिर्मधुरभाषिणः अन्तस्तु क्रूरा इत्याशयः, राज्ञः शासनं प्रवर्त्तितनियमं दूषयन्तीति तैः, ईदृशैरधिकरणिकादिभिर्जनैः, अपापानां निरपराधानां सहस्राणि, हन्यन्ते च वर्त्तमाने, हतानि च पूर्वम् । अत्राहमेव प्रमाणमिति भावः

अत्रापि पूर्ववदप्रस्तुतप्रशंसालङ्कारः ॥४१॥

চারুদত্ত। রাজা পালক, কি অবিমৃশ্যকারী! (বিবেচনা না করিয়া, কার্য্যকারী) অথবা—

মন্ত্রণাদায়ক বিচারকপ্রভৃতি, এই জাতীয় বিচাররূপ অগ্নিতে রাজগণকে নিক্ষিপ্ত করে; তাহাতে তাঁহারা হৃদয়ের ক্ষুদ্র অবস্থা প্রাপ্ত হন, ইহা সঙ্গতই বটে ॥৪০॥

আরও, দেখিতে সুন্দর অথচ অমঙ্গলসূচক শ্বেতবর্ণ কাকগণের ন্যায় এই জাতীয় রাজ-নিয়ম-দূষক বিচারকগণ, নিরপরাধ সহস্র সহস্র লোককে হত্যা করিয়াছে এবং হত্যা করিতেছে ॥৪১॥

সখে! মৈত্রেয়! যাও; আমার বাক্য অনুসারে মাতৃদেবীকে অদ্য হইতে অভিবাদন করিবে এবং আমার পুত্র রোহসেনকে পরিপালন করিবে।

विदू । मूले छिण्णे कुदो पादवस्स पालणं ? । [ध]

चारु । मा मैवम् । [न]

नृणां लोकान्तरस्थानां देहप्रतिकृतिः सुतः ।
मयि यो वै तव स्नेहो रोहसेने स युज्यताम् ॥४२॥

विदू । भो वअस्स ! अहं ते पिअवअस्सो भविअ, तुए विरहिदाइं पाणाइं धारेमि ? । (प)

(ध) मूले छिन्ने कुतः पादपस्य पालनम् ? ।

(प) भो वयस्य ! अहं ते प्रियवयस्यो भूत्वा, त्वया विरहितान् प्राणान् धारयामि ? ।

(न) मख इति । अम्बां मन्मातरम्, अपश्चिममशेषम्, इदमभिवादनमेव यथा शेषं न स्यात्तथा अभिवादयस्व । इतः परमपि मदर्थे चिरमभिवादयेति भावः ।

(ध) विदू इति । मूलीभूतस्य तवाभावे रोहसेनस्य रक्षणमसम्भवमेवेत्याशयः ।

(न) चारु इति । मा मैवं ब्रूहीति शेषः ।

तत्कारणमाह नृणामिति । सुतः मत्पुत्रो लोकान्तरस्थानां नृणां देहस्य प्रतिकृतिः प्रतिमूर्त्तिः, 'आत्मा वै जायते पुत्रः' इति स्मरणादिति भावः । अतएव तव मयि यः स्नेहः, रोहसेने स युज्यतामर्प्यताम् ।

अत्र पराईं प्रति पूर्व्वार्द्धवाक्यार्थो हेतुरिति काव्यलिङ्गमलङ्कारः । तथा वैशब्दस्य छन्दःपूरणमात्रार्थत्वात् निरर्थकत्वदोषः, 'मयि यो भवतः स्नेहः' इति पाठेनास्य समाधेयः ॥४२॥

বিদূষক । মূল ছিন্ন হইলে, কিরূপে বৃক্ষের রক্ষা হয় ? ।

চারুদত্ত । না না এরূপ বলিও না ।

পুত্রই, লোকান্তরগত মানবদিগের দেহের প্রতিমূর্ত্তি । সুতরাং আমাতে তোমার যে স্নেহ আছে ; তাহা রোহসেনে নিযুক্ত কর ॥৪২॥

বিদূষক । সখে ! আমি তোমার প্রিয়বয়স্য হইয়া, তোমাবিহীন প্রাণ ধারণ করিব ? ।

चारु । रोहसेनमपि तावद्दर्शय । (फ)

विदू । एव्वं जुज्जदि । (व)

अधि । भद्र ! शोधनक ! अपसार्य्यतामयं वटुः ।

शोधनकस्तथा करोति ।

अधि । कः कोऽत्र भोः ! चण्डालानां दीयतामादेशः ।

[भ]

इति चारुदत्तं विसृज्य निष्क्रान्ताः सर्वे राजपुरुषाः ।

शोध । इदो आअच्छदु अज्जो । [म]

चारु । सकरुणम् 'मैत्रेय भोः ! किमिदमद्य' इत्यादि पठति । आकाशे । (म)

(व) एवम् युज्यते ।

(म) इत आगच्छतु आर्य्यः ।

(फ) चारु इति । दर्शय जीवनोपायमिति शेषः ।

(व) विदू इति । एवं सति युज्यते, मम प्राणधारणमिति शेषः ।

(भ) अधि इति । आदेशो दीयताम्, अस्य वधायेति शेषः ।

(म) चारु इति । आकाशे प्रस्थानेनाहय्यमेवाधिकरणिकं प्रति वक्तव्यत्वात् शून्ये इत्यर्थः ।

চারুদত্ত। অন্ততঃ রোহসেনকেও জীবনের উপায় দেখাও।

বিদূষক। এরূপ হইলে প্রাণধারণ করা সঙ্গত বটে।

অধিকবণিক। এখানে কে কে আছ হে! চাণ্ডালগণকে আদেশ দাও।

(ইহার পর চারুদত্তকে পরিত্যাগ করিয়া, সকল রাজপুরুষগণ চলিয়া গেলেন)

শোধনক। আর্য্য এদিকে আসুন।

विष-सलिल-तुलाग्निप्रार्थिते मे विचारे
क्रकचमिह शरीरे वीक्ष्य दातव्यमद्य ।
अथ रिपुवचनात्त्वं ब्राह्मणं मां निहंसि
पतसि नरकमध्ये पुत्रपौत्रैः समेतः ॥४३॥

विषेति। अद्य, इह अस्मिन् मे मम शरीरे, क्रकचं करपत्रम् (करात इति यस्य बङ्गभाषा,) दातव्यं मत्प्राणदण्डाय चण्डालैः भर्त्सयितव्यम्, इति वीक्ष्य मनसि समालोच्य, विचारे एतद्विवादनिर्णये, विषं गरलम्, सलिलं जलम्, तुला मापनयन्त्रम्, अग्निर्वह्निश्च एभिः एतदन्यतमपरीक्षयेत्यर्थः प्रार्थिते कर्त्तव्यतया याचितेऽपि, अथानन्तरम्, रिपोः शत्रोः शकारस्य वचनाद्वाक्यात्, यदि ब्राह्मणं मां निहंसि तादृशपरीक्षाद्वारा निर्णयमकृत्वैव व्यापादयसि, तदा पुत्रपौत्रैः समेतः समन्वितस्त्वम्, नरकमध्ये पतसि पतिष्यसीत्यर्थः। भविष्यत-सामीप्ये वर्त्तमाना। अयथा ब्रह्महत्याकरणादिति भावः।

अत्र विचारकत्वेन गुरुभूतस्याधिकरणिकस्य शोकावेगादोद्दृशाक्रोशेनत्क्रमणात् द्रवो नाम विमर्शसन्ध्यङ्गम्। तथा च साहित्यदर्पणः—

'द्रवो गुरुव्यतिक्रान्तिः शोकावेगादिसम्भवा।"

अत्र निहंसीति तृतीयचरणान्तिमाक्षरस्य लघुत्वेऽपि पादान्तस्थत्वेन गुरुत्वाङ्गी-काराद्म हतवृत्तता दोषः। एतत् प्रपञ्चितमस्माभिः साहित्यदर्पणटीकायाम्।

विषादिविचारो यथा 'यदि पापी भवेयं तदा विषभक्षणे मम चैतन्यलोपो भवतु' इति सङ्कल्प्य विषं भक्षयेत्, तत्र पापसत्त्वे चैतन्यलोपः, इतरथा न इति विषपरीक्षा। तथैव सङ्कल्प्य सलिले प्रविशेत्, पापसत्त्वे निमज्जनम् अन्यथा नेति सलिलपरीक्षा। तादृशसङ्कल्पेन तुलामारोहेत्, पापित्वे गुरुः,

---

চারুদত্ত। (শোকের সহিত, হে মৈত্রেয়! আজ আমার এ, কি উপস্থিত হইল ইত্যাদি পাঠ করিলেন। পরে শূন্যে)

আজ আমার এই শরীরে করাত প্রবেশ করাইবে ইহা ধারণা

অয়মাগতোঽস্মি। [য]

ইতি নিষ্ক্রান্তাঃ সর্ব্বে।

ইতি ব্যবহারো নাম নবমোঽঙ্কঃ। (১)

অন্যথা লঘুঃ স্যাদিতি তুলাপরীক্ষা। সর্ব্বৈব সন্তপ্তেনাগ্নিপর্ব্বৌ পাণিভ্যাং ধরন্ দাহঃ, ইতরথা নেত্যগ্নিপরীক্ষা। যথা যাজ্ঞবল্ক্যঃ।

"তুলাগ্ন্যাপো বিষং কোষো দিব্যানীহ বিশুদ্ধয়ে।

মহাভিযোগেষ্বেতানি শীর্ষকস্থেঽভিযোক্তরি॥"

নিরপরাধস্য দণ্ডে নরকপাতমাহ মনু—

"অদণ্ড্যান্ দণ্ডয়ন্ রাজা দণ্ড্যাংশ্চৈবাপ্যদণ্ডয়ন্।

অযশো মহদাপ্নোতি নরকঞ্চৈব গচ্ছতি॥"

মালিনী বৃত্তম্ ॥৪৩॥

(য) অয়মিতি। ইতো আরভ্য অঙ্কো ইতি পূর্ব্বোক্তশোধনকবাক্যস্য উত্তরমাহ অয়মাগতোঽস্মীতি।

ইতি শ্রীহরিদাসসিদ্ধান্তবাগীশভট্টাচার্য্যবিরচিতায়াং মৃচ্ছকটিকটীকায়াং বসন্তসুন্দরসমাখ্যায়াং নবমাঙ্কবিবরণম্ সমাপ্তম্ ॥০॥

করিয়া, বিষ, জল, তুলা ও অগ্নি ইহার যে কোনটার দ্বারা পরীক্ষা করিয়া, বিচার করুন; এইরূপ প্রার্থনা করিলে পর শত্রু শকারের বাক্য অনুসারে, ব্রাহ্মণ আমাকে যদি হত্যা কর; তবে পুত্র-পৌত্রের সহিত নরকমধ্যে পতিত হইবে॥৪৩॥

এই আমি আসিতেছি।

(ইহার পর সকলে চলিয়া গেল)

ব্যবহার (মোকদ্দমা) নামে নবম অঙ্ক সমাপ্ত॥

---

(১) ব্যবহারো নাম নবমোঽঙ্কঃ সমাপ্তঃ।

দশমোঽঙ্কঃ

ততঃ প্রবিশতি চাণ্ডালদ্বয়েনানুগম্যমানশ্চারুদত্তঃ। (ক)

উভৌ। তক্কিং ণ কলধ কালণং,
ণব-বহ-বন্ধ-ণঅণে ণিউণা।
অচিলেণ শীশ-চ্ছেঅণ,
শূলালোবেশু কুশলম্হ ॥১॥

(১) তৎ কিং ন কলয় কারণং নব-বধ-বন্ধ-নয়নে নিপুণৌ। অচিরেণ শীর্ষচ্ছেদেন শূলারোপেষু কুশলৌ স্বঃ॥

(ক) অথ নবমাঙ্কে "চণ্ডালানাং দীয়তামাদেশঃ" ইত্যধিকরণিকোক্ত্যা সূচিতং চণ্ডালকর্তৃকচারুদত্তশ্মশাননয়নং দর্শয়িতুমাহ তত ইতি।

তদিতি। জিজ্ঞাসূন্ পশ্যতো জনান্ প্রতি উক্তিরিয়ম্। হে জনসঙ্ঘ! তৎ চিরপ্রসিদ্ধম্, কারণং দক্ষিণশ্মশানং প্রতি অস্য পুরুষস্য আকর্ষণহেতুম্, কিং ন কলয় স্বয়মেবাবধারয়। তথা চ নবৌ যৌ বধবন্ধৌ হত্যাবন্ধনযো তয়ো-

তদনন্তর চারুদত্তের এবং তৎপশ্চাৎ পশ্চাৎ চাণ্ডালদ্বয়ের প্রবেশ।

চাণ্ডালদ্বয়। হে দর্শকগণ! আপনারা, ইঁহাকে আকর্ষণ করিয়া নিয়া যাইবার কারণ বুঝিতেছেন না কেন? আমরা, সদ্যঃ বধ ও বন্ধনের জন্য নিয়া যাইতে নিপুণ এবং হঠাৎ মস্তকচ্ছেদনে ও শূলে আরোপণ করিতে দক্ষ ॥১॥

ओशलध अज्जा ! ओशलध । एशे अज्जचालुदत्ते [ख]

दिण्ण-कलवील-दामे ,
गहिदे अम्हेहि वज्झपुलिशेहिं ।
दोवे व्व मन्दणेहे ,
थोअं थोअं खअं जादि ॥२॥

(ख) अपसरत आर्य्याः ! अपसरत । एष आर्य्यचारुदत्तः—

(२) दत्त-करवीर-दामा गृहीत आवाभ्यां वध्यपुरुषाभ्याम् ।
दीप इव मन्दस्नेहः स्तोकं स्तोकं क्षयं याति ॥

मंयने तदर्थं तव तत्कार्य्ये निपुणौ आवां दक्षौ । तथा अचिरेण हठात्, शीर्षस्य मस्तकस्य छेदनानि शूलेषु आरोपाश्च तेषु कुशलौ स्व आवामिति शेषः । वधार्थमेवामुं पुरुषं दक्षिणश्मशानं नयाव इति भावः ।

अयं गाथाविशेषः ॥१॥

(ख) अपेति । अपसरत अस्माकं गमनपथादिति शेषः ।

दत्तेति । दत्तं करवीरदाम करवीरपुष्पमाल्यं यस्य सः, तथा आवाभ्यां वध्यपुरुषाभ्यां प्राणदण्डेण दण्डितानां जनानां वधाधिकृताभ्यां जनाभ्याम्, गृहीतो धृतः, एष आर्य्यचारुदत्तः, मन्दः अल्पः स्नेहस्तैलं यत्र स तादृशो दीप इव, स्तोकं स्तोकमल्पमल्पं क्षयं याति क्रमशः क्षीणोद्यताशश्च भवतीत्यर्थः ।

अत्र श्रौतोपमालङ्कारः । आर्य्या जातिः ॥२॥

সরিয়া যান হে আর্য্যগণ ! আপনারা সরিয়া যান ।

বধকার্য্যে নিযুক্ত পুরুষ আমরা ইহাঁকে ধরিয়াছি এবং ইহাঁর গলদেশে করবীরপুষ্পের মালা দেওয়া হইয়াছে ; এই অবস্থায় এই চারুদত্ত, অল্পতৈলযুক্ত প্রদীপের ন্যায় অল্প অল্প ক্ষয় পাইতেছেন ॥২॥

चारु। सविषादम्।

नयनसलिलसिक्तं पांशुरुक्षीकृताङ्गं
पितृवनसुमनोभिर्वेष्टितं मे शरीरम्।
विरसमिह रटन्तो रक्तगन्धानुलिप्तं
बलिमिव परिभोक्तुं वायसास्तर्कयन्ति ॥३॥

चाण्डालौ। ओशलध अज्जा! ओशलध। (ग)
किं पेक्खध छिज्जन्तं,
शप्पुलिशा! काल-पलशु-धालाहिं।

(ग) अपसरत आर्य्याः। अपसरत।

नयनेति। इह इदानीम्, विरसं रटन्तः कर्कशं शब्दायमानाः, वायसाः काकाः, नयनसलिलेन शोकवशादश्रुजलेन सिक्तम्, पांशुभिर्धूलिभिः रुक्षीकृतानि मार्जनादिसंस्काराभावात् अस्निग्धीकृतानि अङ्गानि यस्य तत्, पितृवनसुमनोभिः श्मशानपुष्पैः वेष्टितम्, तथा रक्तगन्धेन रक्तचन्दनेन अनुलिप्तम्, मे मम शरीरम् वधानन्तरं भूलुण्ठितं देहम्, बलिमिव स्वार्थप्रदत्तान्नपिण्डादिद्रव्यमिव, परिभोक्तुं तर्कयन्ति सम्भावयन्ति।

अत्र श्रौतोपमालङ्कारः। "श्मशानं स्यात् पितृवनम्" इत्यमरः।
मालिनी वृत्तम् ॥३॥

চারুদত্ত। (বিষাদের সহিত) কর্কশরবকারী বায়সগণ, অশ্রুজল-সিক্ত, ধূলি রুক্ষীকৃতগাত্র, শ্মশানপুষ্পে বেষ্টিত এবং রক্তচন্দনলিপ্ত আমার শরীরকে, দেবপূজায় দত্ত অন্নাদি দ্রব্যের ন্যায় ভোজন করিবার আশা করিতেছে ॥৩॥

চাণ্ডালদ্বয়। সরিয়া যান, আর্য্যগণ আপনারা সরিয়া যান।

सुअण-सउणाधिवासं,

सज्जण-पुलिस-द्दुमं एदं ॥४॥

आअच्छ ले चालुदत्ता! आअच्छ। (घ)

चारु। पुरुषभाग्यानामचिन्त्याः खलु व्यापाराः; यदहमीदृशीं दशामनुप्राप्तः। (ङ)

---

(४) किं प्रेक्षध्वे क्रियमाणं सत्पुरुषाः! काल-परशु-धाराभ्याम्।
सुजन-शकुनाधिवासं सज्जन-पुरुष द्रुममेतम् ॥

(घ) आगच्छ रे चारुदत्त! आगच्छ।

किमिति। हे सत्पुरुषाः पश्यन्तः सज्जनाः! कालपरशू साक्षाद्यमवत् कुठारद्वयं धारयत इति कर्म्मण्यण् ताभ्याम् धाराभ्यामित्यर्थः क्रियमानम्, एतम्, सुजनाः साधुजना एव शकुनाः नानादिग्भ्य आगतत्वात् पक्षिणस्तेषाम् अधिवास आवासभूतस्तम्, सज्जनपुरुषः साधुलोक एव द्रुमो वृक्षस्तम्, किं प्रेक्षध्वे यूयं पश्यत?। एतद्दर्शनं निषिद्धमिति भावः। [illegible] वध्यन्ते।

अत्र सुजने शकुनत्वारोपः सज्जनपुरुषे द्रुमत्वारोपस्य निमित्तमिति परम्परितरूपकमलङ्कारः। आर्य्या जातिः ॥४॥

(ङ) चारु इति। व्यापाराः परिवर्त्तनानि। यः पूर्वं सर्वसम्मानास्पदमासम् सोऽहमिति भावः।

হে সৎপুরুষগণ! যিনি সজ্জনরূপ পক্ষিগণের বাসস্থান ছিলেন, সেই সৎপুরুষরূপ এই বৃক্ষটীকে, কাল পরশুধারী আমরা ছেদন করিতেছি, ইহা আপনারা দেখিবেন কেন ॥৪॥

আয়, রে চারুদত্ত! আয়।

सर्वगात्रेषु विन्यस्तै रक्तचन्दनहस्तकैः।
पिष्टचूर्णावकीर्णश्च पुरुषोऽहं पशूकृतः॥५॥

अग्रतो निरूप्य। अहो! तारतम्यं नराणाम्। सकरुणम्। (च)

अमी हि दृष्ट्वा मदुपेतमेत-
न्मर्त्या धिगस्त्वित्युपजातवाष्पाः।
अशक्नुवन्तः परिरक्षितुं मां
स्वर्गं लभस्वेति वदन्ति पौराः॥६॥

कीदृशीं दशामित्याह सर्वेति। पुरुषो मनुष्यजातीयोऽप्यहम्, सर्वगात्रेषु विन्यस्तैरर्पितैः, रक्तचन्दनानां हस्तकैः प्रसारिताङ्गुलीकहस्तमुद्राभिः प्रसारिताङ्गुलीके हस्ते रक्तचन्दनमनुलिप्य तद्धस्तचिह्नैर्विशिष्ट इत्यर्थः, तथा पिष्टचूर्णैस्तण्डुलगुड़िकाभिः अवकीर्णः सर्वगात्रेषु विक्षिप्तः सन्, अपशुः पशुः कृत इति पशूकृतः बल्यर्थानीतच्छागादिवत् कृत इत्यर्थः॥५॥

(च) अग्रत इति। तारतम्यम् उत्तमाधमत्वरूपं वैषम्यम्।

अमी इति। हि तथाहि, अमी पौराः पुरवासिनो जनाः, एतत् मयि उपेतमुपस्थितं सनिकारमरणमिति शेषः, दृष्ट्वा, मर्त्या मरणधर्म्माणं प्राणिनं

চারুদত্ত। পুরুষের ভাগ্যের পরিবর্ত্তন, চিন্তাও করিতে পারা যায় না। যে হেতু, আমি এই রূপ অবস্থা প্রাপ্ত হইয়াছি।

আমি মানুষ হইলেও, আমার সমস্ত অঙ্গে, হস্তদ্বারা রক্তচন্দনের চিহ্ন দিয়াছে এবং তণ্ডুলচূর্ণ নিক্ষিপ্ত করিয়াছে; সুতরাং আমাকে পশুর ন্যায় করিয়াছে॥৫॥

(সম্মুখে দৃষ্টিপাত করিয়া) মানুষের কি আশ্চর্য্য তারতম্য। (শোকের সহিত)

ঐ সকল পুরবাসিগণ, আমার এই মৃত্যু উপস্থিত দেখিয়া, "মনু-

चाण्डालौ । ओशलध अज्जा ओशलध । किं पेक्खध ? । (क)

इन्दे प्पवाहिअन्ते, गोप्पसवे संकमं च तालाणं ।
शुपुलिश-पाण-विपत्तो, चत्तालि इमे ण दट्ठव्वा ॥७॥

(क) अपसरत आर्य्याः ! अपसरत । किं प्रेक्षध्वे ? ।

(७) इन्द्रः प्रवाह्यमाणो गोप्रसवः संक्रमश्च ताराणाम् ।
सत्पुरुषप्राणविपत्तिः चत्वार इमे न द्रष्टव्याः ॥

धिगस्तु । हन्त ! ईदृशोऽपि साधुः प्राणैर्म्रियते इति भावः । इति उक्तेति शेषः, उपजातवाष्पा उत्पन्नाश्रुजलाः, मां परिरक्षितुम् अशक्नुवन्तः उपायाभावात् शक्त्यभावाच्चेति भावः, हे चारुदत्त ! स्वर्गं लभस्व इति वदन्ति, तादृशशुभकामनाया एव शक्तिसाध्यत्वादिति भावः । सुतरामसौ उत्तमाः सत्सङ्कल्पत्वात् राजादयस्त्वधमा असत्सङ्कल्पत्वाद्विवेकाभावाच्चेति नराणां तारतम्यमिति भावः ।

उपेन्द्रवज्रेन्द्रवज्रयोर्मेलनादुपजातिर्वृत्तम् ॥६॥

इन्द्र इति । प्रवाह्यमाणो विसर्ज्जनाय नीयमानः, इन्द्र इन्द्रध्वजः, गोः प्रसवो गोर्वत्सस्य वत्सायाः वा गर्भान्निर्गमनम्, ताराणां नक्षत्राणां संक्रमः स्थानात् स्थानान्तरे सञ्चरणम्, सत्पुरुषस्य प्राणविपत्तिः रोगादिव्यतिरेकेण प्राणविनाशरूपा विपत्, इमे चत्वारो न द्रष्टव्याः ; दुरदृष्टोत्पत्तिसम्भवादिति भावः ।

থাকে ধিক্ ” এই কথা বলিয়া, অশ্রুপূর্ণ হইয়া, আমাকে রক্ষা করিতে না পারিয়া, ‘স্বর্গ লাভ কর ’ এই কথা বলিতেছে ॥৬॥

চাণ্ডালদ্বয় । সরুন, আর্য্যগণ ! সরুন । আপনারা দেখিতেছেন কেন ? ।

বিসৃজ্যমান ইন্দ্রধ্বজ, গরুর প্রসব, নক্ষত্রস্খলন এবং সৎপুরুষের হত্যা—এই চারিটী ঘটনা দেখিতে নাই ॥৭॥

एक: । हण्डे आहीन्ता ! पेक्ख पेक्ख । (ज)

णअली-पधाणभूदे, वज्झम्भन्ते कदन्तअस्साए ।

किं लुअदि अन्तलिक्खे ?, आदु अणब्भे पडति वज्जे ? ॥८॥

(ज) हण्डे आहीन्त ! प्रेक्षस्व प्रेक्षस्व ।

(८) नगरीप्रधानभूते वध्यमाने कृतान्ताज्ञया ।

किं रोदिति अन्तरिक्षम ? अथवा अनभ्रं पतति वज्रम ? ॥

अत्र सत्पुरुषप्राणविपत्ति: प्रस्तुता, अन्ये चाप्रस्तुतास्तेषामेकदर्शनक्रियाभि-सम्बन्धाद्दीपकमलङ्कार: । आर्य्या जाति: ।

उक्तार्थे प्रमाणं यथा। कालिकापुराणे-

"लक्ष्यापर्येकमूर्ध्वरवै: सर्वलोकस्य वै पुर: ।

वध्यो विमर्जयेत कीतु विशेषोऽयं प्रपूजने ॥"

"शीघ्रं तत्र गोप्रसवं कीतुपातं मतो वधम् ।

ननतायाम्बु सस्वार्थं शुभार्थी नावलोकयेत ॥" ७॥

(ज) एक इति । नीचत्वात् हण्डे इति सम्बोधनम । आहीन्त इति स्त्रियादिवत् रूढ़: शब्द: ।

नगरीति । कृतान्ताज्ञया दैवस्य आदेशेन, नगर्य्यां उज्जयिन्या: प्रधानभूते पुरुषे, वध्यमाने सति, किम अन्तरिक्षमाकाश:, रोदिति ? मेघं विना ततो जलपातदर्शनादिति भाव: । अथवा अनभ्रं निर्मेघं वज्रं पतति, तद्दिव महाशब्दश्रवणादित्याशय: ।

একজন চাণ্ডাল । ওরে আহীন্ত ! দেখ্ দেখ্ ।

বিধাতার আদেশে নগরের প্রধান লোককে বধ করিতে প্রবৃত্ত হইলে, আকাশ কি রোদন করিতেছে এবং বিনা মেঘে কি বজ্রপাত হইতেছে ॥৮॥

द्वितीयः । अले गोहा ! (क)

णअ लुअदि अन्तलिक्खे, णेअ अणब्भे पडदि वज्जे ।

महिलासमूह-मेहे, णिवडदि णअणम्बु धाराहिं ॥९॥

(क) अरे गोह !।

(९) न च रोदित्यन्तरिक्षं नैवानभ्रं पतति वज्रम् ।

महिलासमूहमेघात् निपतति नयनाम्बु धाराभिः ॥

अत्र स्त्रीणां रोदनजले आकाशरोदनजलत्वसम्भावनया क्रियोत्प्रेक्षा, तथा अभ्राभावेऽपि वज्रपतनादिभावना, इत्यनयोर्मिथो निरपेक्षतया संसृष्टिः । रोदनध्वनौ वज्रध्वनिसम्भावनया च गुणोत्प्रेक्षा व्यङ्ग्या । आर्या जातिः ॥८॥

(क) द्वितीय इति । गां हन्तीति गोहः प्रथमचाण्डालस्य नाम ।

नचेति । अन्तरिक्षमाकाशः, न च रोदिति, नैव वा अनभ्रं निर्मेघं वज्रं पतति ; किं तर्हीत्याह महिलानां दर्शनाय प्रासादशिखरमागतानां स्त्रीणां समूहो मेघ इव कालकुन्तलकलापेनावृतवदनत्वादिति भावः, तस्मात्, धाराभिरविच्छिन्नसम्पातैः, नयनाम्बु निपतति, वृष्टिजलमिवेति भावः ।

अत्र स्त्रीसमूहे मेघसाम्यं वाच्यम्, नयनाम्बुनि वृष्टिजलसाम्यञ्च गम्यम् इत्येकदेशविवर्त्त्युपमालङ्कारः । नत्वेकदेशविवर्त्ति रूपकम्, मेघान्नयनाम्बुपतनासम्भवात् । गीतिर्जातिः ॥९॥

দ্বিতীয় চাণ্ডাল। ওরে গোহ !।

আকাশও, রোদন করিতেছে না, বিনা মেঘেও, বজ্রপাত হইতেছে না ; তবে, মেঘের ন্যায় স্ত্রীসমূহ হইতে অবিচ্ছিন্ন ধারায় নয়নজল পতিত হইতেছে ॥৯॥

অবি অ। বজ্ঝম্মি ণীঅমাণে,
জণস্স সব্বস্স লোদমাণস্স ।
ণঅণসলিলেহিং সিত্তে,
লচ্ছাতো ণ উন্নমই রেণূ ॥১০॥

চারু। নিরূপ্য সকরুণম্ ।
এতাঃ পুনর্হর্ম্যগতাঃ স্ত্রিয়ো মাং
বাতায়নার্দ্ধেন বিনিঃসৃতাস্যাঃ ।
হা চারুদত্তেত্যভিভাষমাণা
বাষ্পং প্রণালীভিরিবোৎসৃজন্তি ॥১১॥

অপি চ। (১০) বধ্যে নীয়মানে জনস্য সর্বস্য রুদতঃ ।
নয়নসলিলসিক্তো রথ্যাতো ন উন্নমতি রেণুঃ ॥

বধ্য ইতি। বধ্যে চারুদত্তে নীয়মানে, রুদতস্তচ্ছোকেন ক্রন্দতঃ, সর্ব্বস্য জনস্য, নয়নসলিলেন সিক্তো রেণুর্ধূলিঃ, রথ্যাতো ন উন্নমতি নোত্তিষ্ঠতি ।

অত্র রথ্যাতো রেণূন্নমনসম্বন্ধেঽপি তদসম্বন্ধোক্তেরতিশয়োক্তিরলঙ্কারঃ ।

চতুর্থচরণান্তিমাক্ষরস্য দীর্ঘত্বেঽপি পক্ষে গুরুত্বাঙ্গীকারাদার্য্যা জাতিঃ ॥১০॥

এতা ইতি। বাতায়নার্দ্ধেন বিনিঃসৃতানি আস্যানি মুখানি যাসাং তাঃ, এতা দৃশ্যমানাঃ, পুনর্হর্ম্যগতাঃ প্রাসাদাভ্যন্তরস্থিতাঃ স্ত্রিয়ঃ, হা চারুদত্ত ! ইত্যভিভাষ-

আরও ; বধ্য চারুদত্তকে নিয়া যাইতে থাকিলে রোদনকারী সমস্ত লোকের নয়নজলে সিক্ত হইয়া, রাস্তা হইতে ধূলি উঠিতেছে না ॥১০॥

চারুদত্ত। (দেখিয়া শোকের সহিত) অট্টালিকাস্থিত এই সকল স্ত্রীলোকগণ, গবাক্ষ হইতে মুখমণ্ডল অর্দ্ধ বিনির্গত করিয়া, 'হা চারুদত্ত !' এই রূপ বলিতে থাকিয়া, প্রণালী (নর্দমা) দ্বারাই যেন নয়নজল মোচন করিতেছে ॥১১॥

चाण्डालौ । आअच्छ ले चालुदत्ता ! आअच्छ । इमं घोशणट्ठाणं, आहणेध डिण्डिमं, घोशेध घोशणं । [अ]

उभौ । शुणाध अज्जा ! शुणाध । एशे शत्थवाह-विणअ-दत्तश्श णत्तिके शाअलदत्तश्श पुत्तके अज्जचालुदत्ते णाम । एदिणा किल अकज्जकालिणा गणिआ वशन्तशेणा अत्थकल्लवत्तश्श कालणादो शुस्सं पुप्फकलण्डअ-जिस्सुज्जाणं पवेशिअ बाहुपाशबलक्कालेण मालिदेत्ति एशे शलोत्ते गहिदे, शअं च पडिवस्से । तदो लस्सा पालएण अम्हे आणत्ता एदं

(अ) आगच्छ रे चारुदत्त ! आगच्छ । इदं घोषणास्थानम्, आहत डिण्डिमं घोषयत घोषणाम् ।

(ट) शृणुत आर्य्याः ! शृणुत । एष सार्थवाह-विनयदत्तस्य नप्ता सागरदत्तस्य पुत्रकः आर्य्यचारुदत्तो नाम, एतेन किल अकार्य्य-कारिणा गणिका वसन्तसेना अर्थकल्यवर्त्तस्य कारणात् शून्यं पुष्प-करण्डकजीर्णोद्यानं प्रवेश्य बाहुपाशबलात्कारेण मारितेति, एष

साधाः सत्यः प्रणालीभिर्जलनिर्गमनमार्गैरिव, बाष्पमश्रुजलम्, उत्सृजन्ति परित्यजन्ति, मम शोकादिति भावः ।

अत्र जात्युत्प्रेक्षालङ्कारः । इन्द्रवज्रा वृत्तम् ॥११॥

(अ) चाण्डालाविति । आहत वादनाय ताड़यत । घोषणां राजोपदिष्टघो-षणावाणीम् ।

চণ্ডালদ্বয় । আয় রে চারুদত্ত ! আয় । এই ঘোষণার স্থান; সুত-রাং ডিণ্ডিম তাড়ন কর্ এবং ঘোষণাবাক্য প্রচার কর ।

চাণ্ডালদ্বয় । শুনুন মহাশয়গণ ! শুনুন । বণিক্ বিনয়দত্তের পৌত্র, সাগরদত্তের পুত্র ইনি আর্য্য চারুদত্তনামে প্রসিদ্ধ । অকার্য্যকারী এই

मारेदुं। जदि अवरे ईदिसं उभअलोअविरुद्धं अकज्जं करेदि, तं पि लाआ पालए एव्वं ज्जेव शाशदि। (ट)

चारु। सनिर्वेदं स्वगतम्।

मख-शत-परिपूतं गोत्रमुद्भासितं मे
सदसि निबिड़चैत्य-ब्रह्मघोषैः पुरस्तात्।

सलोप्त्रो गृहीतः, स्वयञ्च प्रतिपन्नः, ततो राज्ञा पालकेन वयमाज्ञप्ता एतं मारयितुम्। यद्यपर, ईदृशमुभयलोकविरुद्धमकार्य्यं करोति, तदपि राजा पालक एवमेव शास्ति।

(ट) उभाविति। लोप्त्रेण चोरितधनेन तदलङ्कारेण सहेति सलोप्त्रः। "चौरिका स्तैन्यचौर्य्ये च स्तेयं लोप्त्रन्तु तद्धने" इत्यमरः। प्रतिपन्नः स्वीकृतवान्।

मखेति। मखशतेन बहुतरयज्ञानुष्ठानेन परिपूतं पवित्रीकृतम्, मे मम यद् गोत्रं वंशः, सदसि यज्ञादिसभायाम्, निबिड़ेषु निमन्त्रितजनाकीर्णेषु चैत्येषु, यज्ञ-पूजाद्यायतनेषु ब्रह्मघोषैर्वेदध्वनिभिः, पुरस्तात् पूर्व्वम्, उद्भासितम् उत्कर्षेण प्रकाशितमासीदिति शेषः; मरणदशायां वर्त्तमानस्य मम तद् गोत्रम्, पापैः पापप्रसक्तैः धन-

চারুদত্ত, অচিরস্থায়ী ধনের নিমিত্ত, নির্জন পুষ্পকরণ্ডকনামক জীর্ণোদ্যানে প্রবেশ করাইয়া, বসন্তসেনানামে বেশ্যাকে বলপূর্ব্বক বাহুপাশ দ্বারা হত্যা করিয়াছেন; তার পর চোরিতধনের সহিত ইহাঁকে ধরা হইয়াছে এবং নিজেও, স্বীকার করিয়াছেন। সুতরাং রাজা পালক, ইহাঁকে হত্যা করিবার জন্য আমাদিগকে আদেশ করিয়াছেন। যদি অন্য লোক, এইরূপ উভয়লোকবিরুদ্ধ অকার্য্য করে, তবে তাহাকেও, রাজা পালক এই ভাবেই শাসন করিবেন।

চারুদত্ত। (আত্মাবজ্ঞার সহিত স্বগত) বহুতর যজ্ঞানুষ্ঠানে পবিত্র আমার যে বংশ, যজ্ঞপ্রভৃতির সভায় জনাকীর্ণ যজ্ঞ-পূজাদি-

मम मरणदशायां वर्त्तमानस्य पापैः
तदसदृशमनुष्यैर्घुष्यते घोषणायाम् ॥१२॥ (१)

उद्वीक्ष्य कर्णौ पिधाय। हा प्रिये! वसन्तसेने [ठ]

शशि-विमल-मयूख-शुभ्र-दन्ति!
सुरुचिर-विद्रुम-सन्निभाधरौष्ठि!।

योऽभिन वसन्तसेना व्यापादिता' इति पापसूचकवृत्तान्तप्रकाशैरित्यर्थः, असदृशमनुष्यैरयोग्यलोकैश्चाण्डालैः, घोषणायां घोषणास्थाने घुष्यते उदाक्रियते। तेन न केवलं ममात्मा कलुषितः, अपितु तदुपं गोत्रमपीति,महादुःखकारणमिदमिति भावः।

अत्र विरूपयोः पूर्वार्द्धपरार्द्धयोः संघटनया विषमालङ्कारः। तथा पितृपितामहादिगुरुज... कीर्त्तनात् "शृणाथ भज्जा!" इत्यारभ्य एतदन्ते प्रसङ्गो नाम विमर्शसन्ध्यङ्गम्—'प्रसङ्गो गुरुकीर्त्तनम्" इति दर्पणलक्षणात्। उदाहृतञ्चेदमेव दर्पणे।

मालिनी वृत्तम् ॥१२॥

उद्वीक्ष्यति। उद्वीक्ष्य ऊर्द्ध्वमवलोक्य। ऊर्द्ध्वदर्शनं मरणात् परमूर्द्ध्वगतवसन्तसेनासम्बोधनार्थम्।

शशीति। शशिनश्चन्द्रस्य विमला मयूखाः किरणा इव शुभ्रा दन्ता यस्यास्तत्सम्बो-

স্থানে বেদধ্বনিতে পূর্ব্বে উজ্জ্বল হইত; মরণদশায় বিদ্যমান আমার সেই বংশকে, অযোগ্য লোকে কুৎসিত বৃত্তান্ত দ্বারা ঘোষণা স্থানে প্রচার করিতেছে ॥১২॥

(উপরের দিকে দৃষ্টিপাতপূর্ব্বক কর্ণযুগল আবৃত করিয়া) হা প্রিয়ে! বসন্তসেনে!

চন্দ্রের নির্ম্মল কিরণের ন্যায় শুভ্র-দন্ত-সমন্বিতে! মনোহর প্রবালে

(१) उद्घोषितं यत्। निधनदशायाम्। इति दर्पणधृतः पाठः।

तव वदनभवामृतं निपीय
कथमवशो ह्ययशोविषं पिबामि ॥१३॥

उभौ । ओशलध अज्जा ! ओशलध । [ङ]

एशे गुण-लअण-णिहो, शज्जणदुक्खाणं उत्तलणशेदू ।
अशुवण्ण-मण्डणअं अवणीअदि अज्ज णअलीदो ॥१४॥

(ङ) अपसरत आर्य्याः ! अपसरत ।

(१४) एष गुणरत्ननिधिः सज्जनदुःखानामुत्तरणसेतुः ।
असुवर्णमण्डनकम् अपनीयतेऽद्य नगरीतः ॥

धरम् । तथा सुरुचिरौ ौ विद्रुमः प्रवालस्तत्सन्निभौ अधरोष्ठौ यस्यास्तत्सम्बोधनम् । तव वदनभवामृतं चुम्बनसमये मुखामृतं निपीय, अवशः स्वाधीनताहीनः अहम्, कथं हि केन प्रकारेणैव, अयश एभिरुक्ता निन्देव विषं तत् पिबामि, इति मुह्णीति भावः ।

अत्रापि अमृतपानविषपानयोर्विरूपयोः सङ्घटनया विषमालङ्कारः लुप्तोपमाद्वयम्, निरङ्गरूपकञ्चैकमिति समुदाये संसृष्टिः । पुष्पिताग्रा वृत्तम् ॥१३॥

एष इति । गुणा दयादाक्षिण्यादय एव रत्नानि तेषां निधिराश्रयः, तथा सज्जन-दुःखानाम् उत्तरणे अतिक्रमे सेतुस्तत्स्वरूपः, एनमवलम्ब्यैव तत्तरणादिति भावः । एष चारुदत्तः, अद्य नगरीतः सकाशात्, न विद्यते सुवर्णमण्डनं स्वर्णालङ्कारो यस्मिन् कर्म्मणि तद् यथा तथा अपनीयते बहिष्क्रियते । लोकानां मृत्युदशायां स्वर्णालङ्कारो दीयत इति व्यवहारः, दरिद्रत्वादस्य तु तन्नेति इदमपि महादुःखकारणमिति भावः ।

তুল্য অধরোষ্ঠশালিনি ! তোমার মুখামৃত পান করিয়া, এখন কি করিয়া নিন্দা-বিষ পান করিব ॥১৩॥

চণ্ডালদ্বয়। সরুন মহাশয়রা ! সরুন।

গুণরত্নের নিধি এবং সজ্জন-দুঃখের উত্তরণসেতু এই চারুদত্তকে আজ বিনা স্বর্ণালঙ্কারে নগর হইতে বাহির করিতেছি ॥১৪॥

अन्यं च। सव्वो क्खु होइ लोए,
लोएसुह-संठिदाणं तत्तिल्लो।
विणिपडिदाणं णराणं
पिअकालो दुल्लहो होदि ॥१५॥

चारु। सर्वतोऽवलोक्य।
अमी हि वस्त्रान्तनिरुद्धवक्त्राः
प्रयान्ति मे दूरतरं वयस्याः।

अन्यच्च। (१५) सर्व्वः खलु भवति लोके
लोकः सुखसंस्थितानां चिन्तायुक्तः।
विनिपतितानां नराणां
प्रियकारी दुर्लभो भवति ॥

अत्र निरङ्गं केवलरूपकमलङ्कारः। गाथा छन्द इति पृथ्वीधरः ॥१४॥

सर्व इति। लोके जगति, सर्वः खलु लोकः, सुखसंस्थितानां धनसम्पदादिना सुखिनां नराणाम्, चिन्तायुक्तः शुभानुध्यानपरायणो भवति। किन्तु विनिपतितानां विपन्नानां नराणाम्, प्रियकारी शुभानुष्ठानेन सन्तोषकारी लोकः दुर्लभो भवति। अत एवास्यापि चारुदत्तस्य सम्पत्समये बहव एव शुभानुध्यायिन आसन्, किन्त्विदानीमेकोऽपि नेति भावः।

अतएवात्र अप्रस्तुतात् नरसामान्यात् प्रस्तुतचारुदत्तरूपनरविशेषप्रतीतेरप्रस्तुतप्रशंसालङ्कारः। अत्रापि गाथा छन्द इति पृथ्वीधरः ॥१५॥

अमी इति। अमी दूरे दृश्यमानाः, वयस्या हि पूर्वोत्पन्नवन्धुभावा एव जनाः,

---

আরও, জগতে সকল লোকই, সুখীদিগের শুভানুধ্যানপরায়ণ হইয়া থাকে; কিন্তু বিপন্নলোকের প্রিয়কারী লোক দুর্লভ হয়॥১৫॥

চারুদত্ত। (সকলদিকে দৃষ্টিপাত করিয়া) ঐ সকল আমার বয়স্য-

परोऽपि बन्धुः समसंस्थितस्य
मित्रं न कश्चिद्विषमस्थितस्य ॥१६॥

चाण्डालौ । ओसालणं किदं, विवित्तं लाअमग्गं, ता आणेध एदं दिण्णवज्झ-चिह्नं । (ढ)

(ढ) अपसारणं कृतम्, विविक्तो राजमार्गः, तदानयतैनं दत्तवध्यचिह्नम् ।

वस्त्रान्तेन वसनाञ्चलेन निरुद्धवक्त्रा आवृतमुखाः सन्तः, मे मम दूरतरम् अतीव-दूरपथं प्रयान्ति अपसरन्ति । यदाहं परिचित्याह्वयेयमित्यतो वक्त्रनिरोधनम् दूरतरतः प्रयाणञ्चेति भावः । तथा च समसंस्थितस्य सम्पन्नावस्थस्य जनस्य सम्बन्धे, परोऽपि अनात्मीयोऽपि जनः, बन्धुर्भवति ; उपकारप्रत्याशयेति भावः, किन्तु विषमस्थितस्य विपन्नावस्थस्य जनस्य सम्बन्धे, कश्चिदात्मीयोऽपि, मित्रं बन्धुर्न भवतीति शेषः प्रार्थनीयसाहाय्ये परिश्रमादाशङ्कयेत्याशयः ।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः, तृतीयचतुर्थचरणार्थयोर्वैरूप्योः सङ्घटनया विषमालङ्कारश्च, अनयोरङ्गाङ्गिभावेन सङ्करः ।

उपेन्द्रवज्रेन्द्रवज्रयोर्मेलनादुपजातिर्वृत्तम् ॥१६॥

(ठ) चाण्डालाविति । विविक्तो निर्जनो जातः । एनं चारुदत्तम् ।

গণ, বস্ত্রাঞ্চল দ্বারা মুখমণ্ডল আবৃত করিয়া, অতিদূর দিয়া যাইতেছেন । কারণ, অনাত্মীয় লোকও, সম্পন্ন অবস্থায় বন্ধু হইয়া থাকে ; কিন্তু কোন লোকই ; বিপন্ন অবস্থায় লোকের বন্ধু হয় না ॥১৬॥

চণ্ডালদ্বয় । লোকদিগের অপসারণ করা হইয়াছে ; সুতরাং রাজ-পথ এখন নির্জ্জন । অতএব বধ্যচিহ্নসমন্বিত ইহাকে আনয়ন কর ।

चारु । निःश्वस्य 'मैत्रेय भोः ! किमिदमद्य ' इत्यादि पठति ।

नेपथ्ये । हा ताद ! हा पिअवअस्स ! । (ण)

चारु । आकर्ण्य सकरुणम् । भोः स्वजातिमहत्तर ! इच्छाम्यहं भवतः सकाशात् प्रतिग्रहं कर्त्तुम् । (त)

चाण्डालौ । किं अम्हाणं हत्यादो पडिग्गहं कलेशि ? । (थ)

चारु । शान्तं पापम् । नापरीक्ष्यकारी दुराचारः पालक इव चाण्डालः । तत् परलोकार्थं पुत्रमुखं द्रष्टुमभ्यर्थये । (द)

(ण) हा तात ! हा प्रियवयस्य ! ।

(थ) किमस्माकं हस्तात् प्रतिग्रहं करोषि ? ।

(ण) नेपथ्य इति । हा तातेति रोहसेनोक्तिः । हा प्रियवयस्येति विदूषकोक्तिः ।

(त) चारु इति । स्वजातिषु सर्वचाण्डालेषु महत्तर ! अतीवप्रधान ! । सामान्यतो महत्तरेति सम्बोधने उक्त पठनोक्तिप्रतीतिः स्यादित्यतः स्वजातिपदम् ।

(थ) चाण्डालाविति । अस्माकं चाण्डालानाम् । तथा च ब्राह्मणस्य भवतश्चाण्डालात् प्रतिग्रहकरणं किं प्रचलितमासीदित्यर्थः ।

(द) चारु इति । शान्तं पापम् उक्तरूपं न वाच्यमित्यर्थः, चाण्डालात् प्रतिग्रहनिषेधात् । तथा च मनुः—

চারুদত্ত। নিশ্বাস ত্যাগ করিয়া, 'হে মৈত্রেয় ! আজ এ কি উপস্থিত হইল ' ইত্যাদি পাঠ করিলেন)

নেপথ্যে। হা পিতঃ ! হা প্রিয়বয়স্য ! ।

চারুদত্ত। (শুনিয়া শোকের সহিত) হে স্বজাতিশ্রেষ্ঠ ! আমি আপনার নিকট হইতে প্রতিগ্রহ করিতে ইচ্ছা করি।

চণ্ডালদ্বয়। আপনি আমাদের হাত হইতে প্রতিগ্রহ করিয়া থাকেন ? ।

चाण्डालौ । एव्वं करोम्ह । (ध)

नेपथ्ये । हा ताद ! हा आवुक ! । (न)

चाण्ड । श्रुत्वा सकरुणम् । भोः सजातिमत्सरः । इत्यादि पठति ।

(ध) एवं क्रियताम् ।

(न) हा तात ! हा आवुक ! ।

'चाण्डालान्त्यास्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।

पतत्यज्ञानतो विप्रो ज्ञानात् साम्यन्तु गच्छति ॥'

एवञ्च 'इच्छाम्यहं भवतः सकाशात् प्रतिग्रहं कर्त्तुम्' इति मम पूर्वोक्तौ प्रतिग्रहपदम् अनुग्रहग्रहणार्थं प्रयुक्तम्; तेन अनुग्रहग्रहणं कर्त्तुमिच्छामीत्यर्थ इत्याशयः। नन्वपराधिनं ज्ञात्वा भवन्तं प्रति राजा निग्रहमेव कृतवान्, तत्किङ्करो भूत्वा कथमहमनुग्रहं करोमीत्याह नेति। दुराचारः, पालकस्तदाख्यो राजेव, चाण्डालोऽपि भवान्, न अपरीक्ष्यकारी सर्वताभावेन असमालोच्य न कार्य्यकारी तेन मुमूर्षुं प्रति अवश्यमनुग्रहः कर्त्तव्य इत्यालोच्य मत्प्रार्थना भवता पूरणीयेति भावः। ननु कोऽसावनुग्रह इत्याह तदिति। परलोकाय परलोके सद्गतिलाभार्थम्। 'सुखसन्दर्शनेनापि तद्‌त्पत्तौ यतेत सः' इति स्मृतेः पुत्रमुखदर्शनेऽपि पुण्योत्पत्तिरित्यभिप्रायः।

(न) नेपथ्य इति। अवति पालयतीति आवुकः, औणादिक उकण्। हे आवुक ! जनक ! । 'आवुको जनकः' इति नाट्योक्तावमरः।

চারুদত্ত। ওরূপ বক্তব্য নহে। দুরাচার পালকের ন্যায় চণ্ডাল পর্য্যালোচনা না করিয়া কার্য্য করেন না। অতএব পরলোকের নিমিত্ত আমি পুত্রের মুখ দেখিতে চাহি।

চণ্ডালদ্বয়। ইহা করুন।

নেপথ্যে। হা পিতঃ! হা জনক!

चाण्डालौ। अले पउला ! खणं अन्तलं देध। एशे अज्जचालुदत्ते पुत्तमुहं पेक्खदु। नेपथ्याभिमुखम्। अज्ज इदो इदो, आअच्छ्ले दालआ ! आअच्छ। (प)

ततः प्रविशति दारकमादाय विदूषकः।

विदू। तुवरदु तुवरदु भद्दमुहो, पिदा दे मारिदुं णीअदि। (फ)

दारकः। हा ताद ! हा आवुक ! । [ब]

(प) अरे पौराः ! क्षणमन्तरं दत्त। एष आर्य्यचारुदत्तः पुत्रमुखं प्रेक्षताम्। आर्य्य इत इतः, आगच्छ रे दारक ! आगच्छ।

(फ) त्वरतां त्वरतां भद्रमुखः, पिता ते मारयितुं नीयते।

(ब) हा तात ! हा आवुक ! ।

(प) चाण्डालाविति। अन्तरम् अनयोरागमनाय अवकाशम्। आर्य्येति विदूषकस्य सम्बोधनम्, दारकेति च रोहसेनस्य।

(फ) विदू इति। भद्रं मङ्गलं सुलक्षणादिना तत्सूचकं मुखं यस्य स रोहसेनः।

চারুদত্ত। (শুনিয়া শোকের সহিত। 'হে স্বজাতি শ্রেষ্ঠ!' ইত্যাদি পাঠ করিলেন)

চণ্ডালদ্বয়। হে পুরবাসিগণ! আপনারা ক্ষণকাল অবকাশ দেন; এই আর্য্য চারুদত্ত পুত্রের মুখ দর্শন করুন। (নেপথ্যের দিকে চাহিয়া) আর্য্য! এদিকে এদিকে (আসুন), আয় রে বালক! আয়।

তদনন্তর বালক লইয়া বিদূষকের প্রবেশ।

বিদূষক। রোহসেন! সত্বর হও সত্বর হও, তোমার পিতাকে হত্যা করিবার জন্য নিয়া যাইতেছে।

বালক। হা পিতঃ! হা জনক!।

विदू । हा पिअवअस्स ! कहिं मए तुमं पेक्खिदव्वो ? । [भ]

चारु । पुत्रं मित्रञ्च वीक्ष्य । हा पुत्र ! हा मैत्रेय ? । सकरुणम् ।

भोः ! कष्टम् ।

चिरं खलु भविष्यामि परलोके पिपासितः ।
अत्यल्पमिदमस्माकं निवापोदकभोजनम् ॥१७॥

(भ) हा प्रियवयस्य ! कस्मिन् मया त्वं प्रेक्षितव्यः ? ।

(भ) विदू इति । प्रेक्षितव्यः पुनर्द्रष्टव्यः । इह लोके कुत्रापि नेति भावः ।

चिरमिति । परलोके, चिरं खलु पिपासितस्तृष्णार्त्तो भविष्यामि । कुत इत्याह इदं प्रक्रंस्यमानलिङ्गत्वादयं पुत्र इत्यर्थः, अत्यल्पमेव अस्माकं ममेत्यर्थः, निवापोदकं पितृदेयजलं तस्य भोजनं मम तद्भोजनकारकमित्यर्थः । तथा चायं सप्तवर्षदेशीयः शिशुपुत्रः, इदानीमेव मन्मरणं अधुनैव च तर्पणमावश्यकम्, अयञ्च शिशुः तत्तर्पणजलं कियद्दातुं शक्नोति ? येन ततो मे पिपासानिवृत्तिः स्यात् । अतो यावदयं वयस्थः स्यात् तावदेव पिपासितो भविष्यामीति भावः ।

अत्र पूर्वार्द्धं प्रति पराद्धवाक्यार्थो हेतुरिति काव्यलिङ्गम्, तथा भोजनकारकार्थे भोजनपदप्रयोगेण हेतुहेतुमतोरभेदेनाभिधानात् हेतुर्नामालङ्कारश्च, अनयोः संसृष्टिः ।

'पितृदानं निवापः स्यात्' इत्यमरः ॥१७॥

বিদূষক। হা প্রিয়বয়স্য! আমি আবার কোথায় তোমাকে দেখিতে পাইব?।

চারুদত্ত। (পুত্র ও মিত্রকে দেখিয়া) হা পুত্র হা মৈত্রেয়! (শোকের সহিত) হায়! কি কষ্ট।

পরলোকে আমি দীর্ঘকাল যাবৎ পিপাসিত থাকিব। কারণ

किं पुत्राय प्रयच्छामि ?। आत्मानमवलोक्य । यज्ञोपवीतं दृष्ट्वा ।
आं, इदं तावदस्ति मम च । (म)

अमौक्तिकमसौवर्णं ब्राह्मणानां विभूषणम् ।
देवतानां पितॄणाञ्च भागो येन प्रदीयते ॥१८॥

इति यज्ञोपवीतं ददाति ।

(म) किमिति । आमिति स्मरणार्थमव्ययम् । स्मृतमिति चार्थः । मम तावदिदं यज्ञोपवीतरूपं द्रव्यमस्तीत्यर्थः ।

अमौक्तिकमिति । इदं यज्ञोपवीतम्, अमौक्तिकं मुक्ताभिरनिर्म्मितम्, असौवर्णं सुवर्णैरघटितम्, ब्राह्मणानां विभूषणं विशिष्टालङ्कारस्वरूपम्; एतेनैव सर्वत्र विशेषादरणीयकरणादित्याशयः । येन यज्ञोपवीतेन, देवतानां भागः पूजाद्यंशः, पितॄणां भागश्च श्राद्धाद्यंशः, प्रदीयते; 'सव्योपवीतिना भाव्यम्' 'प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणा । पित्र्यमानिधनात् कार्यं विधिवद्दर्भपाणिना' इत्यादिस्मृतेरिति भावः ।

अत्र मौक्तिकसौवर्णभिन्नत्वरूपाधिकवैशिष्ट्यस्य आरुढत्वादधिकारूढवैशिष्ट्यरूपकमलङ्कारः ॥१८॥

এই শিশুপুত্র, আমাকে অত্যল্পই তর্পণের জল পান করাইতে পারিবে ॥১৭॥

পুত্রকে কি দান করিব ?। (গাত্রের দিকে চাহিয়া যজ্ঞোপবীত দেখিয়া) ও! আমার এই যজ্ঞোপবীত রহিয়াছে।

ইহা, মুক্তা বা স্বর্ণনির্ম্মিত নহে, অথচ ইহা ব্রাহ্মণগণের অলঙ্কার, যাহা দ্বারা দেবতা ও পিতৃলোকের ভোগ্য অংশ দেওয়া হয় ॥১৮॥

(এই বলিয়া যজ্ঞোপবীত দান করিলেন)

চাণ্ডাল: । আঅচ্ছ লে চালুদত্তা । আঅচ্ছ । (য)

দ্বিতীয়: । অলে ! অজ্জচালুদত্তং ণিলুববদেশ ণামেণ আলবসি ? । অলে পেক্খ (র)

অব্ভুদএ অবশাণে,
তহ্ব অ লত্তিন্দিবং অহদমগ্গা ।
উদ্দামে ব্ব কিশোলী,
ণিঅদী ক্খু পড়িচ্ছিদং (১) জাদি ॥১৮॥

(য) আগচ্ছ রে চারুদত্ত ! আগচ্ছ ।

(র) অরে ! আর্য্যচারুদত্তং নিরুপপদেন নাম্না আলপসি ? । অরে ! প্রেক্ষস্ব ।

(১৮) অভ্যুদয়ে অবসানে তথৈব রাত্রিন্দিবমহতমার্গা ।
উদ্দামেব কিশোরী নিয়তিঃ খলু প্রতীষ্টং যাতি ॥

(র) দ্বিতীয় ইতি । নিরুপপদেন গৌরবসূচক-সন্নিহিতার্য্যাদিবিশেষণাভাবেন । নৈতৎ সঙ্গতমিতি ভাবঃ ।

অভ্যুদয় ইতি । অভ্যুদয়ে উন্নতৌ, তথৈব অবসানে ক্ষয়ে অবনতৌ, অহতঃ কেনাপি ন নিবারিতো মার্গঃ প্রবর্ত্তনপথো যস্যাঃ সা তাদৃশী, নিয়তির্দৈবম্, উদ্দামা উচ্ছৃঙ্খলা, কিশোরী প্রথমযৌবনস্থা হস্তিনীব, রাত্রিন্দিবং খলু সর্ব্বদৈব

চাণ্ডাল । আয় রে চারুদত্ত ! আয় ।

দ্বিতীয় চাণ্ডাল । ওরে ! নিরুপপদ নাম দ্বারা আর্য্য চারুদত্তের সহিত আলাপ করিতেছিস্ ! । ওরে ! দেখ—

লোকের উন্নতির বা অবনতির সময়ে এবং দিনে বা রাত্রিতে কেহই যাহার পথ রোধ করিতে পারে না ; সেই নিয়তি, উচ্ছৃঙ্খ-

(১) পড়ীচ্ছিদং ।

अस्सं च । सुक्खा ववदेसा (१) से ,
किं पणमिअ मत्थए ण कादव्वं ।
लाहुगहिदे वि चन्दे ,
ण वन्दणीए जणपदस्स ? ॥२०॥

अन्यच्च । (२०) शुष्का व्यपदेशा अस्य
किं प्रणम्य मस्तके न कर्त्तव्यम् ? ।
राहुगृहीतोऽपि चन्द्रो
न वन्दनीयो जनपदस्य ? ॥

प्रतीष्टं स्वाभीष्टविषयम् , याति प्राप्नोति । तथा च तादृशो नियतिरेवास्य ईदृशीं दशां कृतवती , न पुनर्गौरवमपि हृतवतीति गौरवहानिकरं न किञ्चित्कृत्यमिति भावः ।

अत्र श्रौतोपमालङ्कारः । आर्य्या च जातिः ॥१९॥

ननु धनलोभेन स्त्रीहत्याकारिणः किं गौरवमित्याह शुष्का इति । व्यपदेशाः कलङ्करूपा वसन्तसेनाहत्यापवादाः, शुष्काः शुष्कजलादिवदकिञ्चित्करा मिथ्या एवेत्यर्थः । अस्य चारुदत्तस्य , कुलनामादिकं किं वस्तु , प्रणम्य मस्तके न कर्त्तव्यम् ? अपि तु कुलनामादिकं सर्वमेव प्रणम्य मस्तके कर्त्तव्यमित्यर्थः । ननु प्रकारेण स्त्रीहत्यापवादेन दूषितस्य कथं तादृशः सम्मान इत्याह — राहुणा गृहीतो ग्रस्तोऽपि चन्द्रः , जनपदस्य तद्वासिनो जनस्य न वन्दनीयः किमिति काकुः , अपि तु वन्दनीय एवेत्यर्थः, सुतरामस्यापि नामादिकं तथैव वन्दनीयमिति भावः ।

বঞ্চনা যুবতি হস্তিনীর ন্যায় , নিজের অভীষ্ট বিষয় সম্পাদন করিয়া থাকেন ॥১৯॥

আরও , চারুদত্তের অপবাদ , শুষ্ক (মিথ্যা) ; সুতরাং চারুদত্তের

---

(१) सुक्खा वि ववदेसा ।

বালকঃ। অরে রে চাণ্ডালা! কহিঁ আবুত্তং ণেধ?। (ল)

চারু। বত্স!।

অংসেন বিভ্রত্ করবীরমালাং
স্কন্ধেন শূলং হৃদয়েন শোকম্।
আঘাতমদ্যাহমনুপ্রয়ামি
শামিত্রমালব্ধুমিবাধ্বরেঽজঃ ॥২১॥

(ল) অরে রে চাণ্ডালাঃ! কুত্র মম পিতরং নয়থ?।

অত্রার্থাপত্তিদ্বয়স্যান্যোন্যাঙ্গাঙ্গিভাবেন সঙ্করঃ। আর্য্যা চ জাতিঃ ॥২০॥

অংসেনেতি। অংসেন গলদেশেন, করবীরস্য পুষ্পস্য মালাম্, স্কন্ধেন শূলম্, হৃদয়েন শোকঞ্চ অকারণমাবিষ্কৃতাজনিতমিতি ভাবঃ, বিভ্রত্ ধারয়ন্ অহম্, অধ্বরে যজ্ঞে, অজশ্ছাগ ইব, আঘাতম্ প্রহারম্, আলব্ধুং প্রাপ্তুম্, অদ্য ইদানীম্, শামিত্রং বধ্যস্থানম্, অনুপ্রয়ামি অনয়োঃ পশ্চাত্ পশ্চাত্ গচ্ছামি, ন পুনরিমাবেব মাং তত্র নয়ত ইতি চাণ্ডালয়োঃ কশ্চিদ্দোষ ইতি ভাবঃ।

অত্র বিভ্রদিত্যেকয়া ক্রিয়যা অপ্রস্তুতানাং করবীরমালাদীনাং ত্রয়াণামভিসম্বন্ধাত্তুল্যযোগিতা শ্রৌতোপমা চানয়োর্মিথো নিরপেক্ষতয়া সংসৃষ্টিঃ।

'অংসঃ স্কন্ধে বিভাগে চ' ইতি বিশ্বঃ। 'শমিতা যজ্ঞে' ইতি সূত্রাত্ শামিতরি ভবং শামিত্রমিতি যজ্ঞীয়পশুবধস্থানমুচ্যতে। ইন্দ্রবজ্রা বৃত্তম্ ॥২১॥

কুলনামাদি কোন বস্তু, প্রণামপূর্ব্বক মস্তকে ধর্ত্তব্য নহে?। চন্দ্র রাহু-গ্রস্ত হইলেও, লোকের কি বন্দনীয় নহে?॥২০॥

বালক। ওরে চাণ্ডালগণ! আমার পিতাকে কোথায় নিয়া চলিয়াছ?।

চারুদত্ত। বৎস! গলদেশে করবীরপুষ্পের মালা, স্কন্ধে শূল এবং

चाण्डालः। दालआ!। ०

ण्हु अम्हे चाण्डाला, चाण्डालकुलम्मि जादपुव्वा वि (१)।

जे अहिभवन्ति साहुं, ते पावा ते अ चाण्डाला ॥२२॥

दारकः। ता कीस मारेध आवुकं?। (व)

०। दारक!

(२२) न खलु वयं चाण्डालाः चाण्डालकुले जातपूर्वा अपि।

ये अभिभवन्ति साधुं ते पापास्ते च चाण्डालाः॥

(व) तत् केन मारयत आवुकम्?।

नेति। चाण्डालकुले जातपूर्वा अपि वयम्, न खलु चाण्डालाश्चाण्डालवत् नृशंसकर्म्माणः। तर्हि नृशंसकर्म्मणापि चाण्डालाः के इत्याह—ये जनाः, साधुं जनम्, अभिभवन्ति उत्पीड़यन्ति, ते पापाः पापिनः, अतएव ते च चाण्डालाः।

अत्र चाण्डालकुले जातपूर्वत्वरूपकारणे सत्यपि चाण्डालत्वरूपतत्कार्य्याभावात् विशेषोक्तिरलङ्कारः। तथा आत्मनो नृशंसकर्म्मत्वाभावप्रतिपादनकार्य्यार्थं वालक-कृत-चाण्डाला इति सम्बोधन-जनितापमानस्य सहनात् छादनं नाम विमर्शसन्ध्यङ्गम्।

'तदाहुश्छादनं पुनः। कार्य्यार्थमपमानादेः सहनं खलु यद्भवेत्।' इति दर्पणवचनात्। आर्य्या जातिः ॥२२॥

হৃদয়ে শোক ধারণ করতঃ আমি, যজ্ঞে ছাগের ন্যায় আঘাত পাইবার জন্য আজ বধ্যস্থানে যাইতেছি ॥২১॥

চণ্ডাল। বালক! আমরা চণ্ডালবংশে জন্মিয়াও, চণ্ডাল নহি। যাহারা সাধু লোককে উৎপীড়িত করে, তাহারাই চণ্ডাল এবং তাহারাই পাপাত্মা ॥২১॥

(१) जादपुव्वा वा।

चाण्डालः। दीहाओ! अत्त लाअणिओओ क्खु अवरज्झदि, ण क्खु अम्हे। (अ)

दारकः। वावादेध मं, मुञ्चध आवुकं। (ब)

चाण्डालः। दीहाओ! एवं भणन्ते चिरं मे जीव। (स)

चारु। सास्रं पुत्रं कण्ठे गृहीत्वा।

इदं तत् स्नेहसर्वस्वं सममाढ्यदरिद्रयोः।
अचन्दनमनौशीरं हृदयस्यानुलेपनम् ॥२३॥

(अ) दीर्घायुः! अत्र राजनियोगः खलु अपराध्यति न खलु वयम्।

(ब) व्यापादयत माम्, मुञ्चत आवुकम्।

(स) दीर्घायुः! एवं भणन् चिरं मे जीव।

(अ) चाण्डाल इति। राजकिङ्करा वयं राजनियोगादेवैनं मारयाम इति भावः।

(ब) दारक इति। 'कञ्चित् पुरुषं मारयत' इत्येवं राजनियोगश्चेत् तर्हि मां व्यापादयत, तथात्वेऽपि तत्सिद्धेः, आवुकं पितरं मे मुञ्चतेत्याशयः।

इदमिति। इदं पुत्ररूपं वस्तु, तत् जगत्प्रसिद्धम्, स्नेहसर्वस्वं वात्सल्यरसस्य सर्वं धनम्, आढ्यदरिद्रयोर्धनिदरिद्रयोः, समं तुल्यं समानानन्दादिदायकम्, अचन्दनं चन्दनभिन्नम्, तथा अनौशीरं वीरणरसतोऽपि भिन्नम्'

বালক। তা তোমরা আমার পিতাকে হত্যা করিতেছ কেন?

চণ্ডাল। দীর্ঘায়ু! এ বিষয়ে রাজাজ্ঞাই অপরাধী; আমরা নহে।

বালক। আমাকে হত্যা কর, পিতাকে ছাড়িয়া দাও।

চাণ্ডাল। দীর্ঘায়ু! তুমি আমার এইরূপ বলিতে থাকিয়া চিরজীবী হও।

চারুদত্ত। (অশ্রুজলের সহিত পুত্রকে কণ্ঠে ধারণ করিয়া)

'यं तेन विधृत' इत्यादि पुनः पठति। अवलोक्य स्वगतम्। 'अमी हि वस्त्रान्त-निरुद्धवक्त्राः' इत्यादि पुनः पठति।

विदू। भो भद्दमुहा! मुञ्चध पिअवअस्सं चारुदत्तं, मं वावादेध। (छ)

चारु। शान्तं पापम्। दृष्ट्वा स्वगतम्। अद्य अवगच्छामि 'समम् स्थित' इत्यादि पठति। प्रकाशम्। 'एताः पुनर्हर्म्यगताः स्त्रियो माम्' इत्यादि पुनः पठति। (च)

(छ) भो भद्रमुखौ! मुञ्चतं प्रियवयस्यं चारुदत्तम्, मां व्यापादयतम्।

हृदयस्य वक्षसः, अनुलेपनम् अनुलेपनस्वरूपम्, उत्तमस्यापि परमशीतलताजनकत्वादिति भावः।

अत्रापि पूर्ववदेव अधिकारूढवैशिष्ट्यं रूपकमलङ्कारः ॥२३॥

(छ) विदू इति। भद्रमुखाविति चाण्डालयोः सम्बोधनम्।

(च) चारु इति। शान्तं पापं मद्वधोत्थं कुतोऽपि न कर्त्तव्यमित्यर्थः। अवगच्छामि 'परोऽपि बन्धुः सुसमं स्थितस्य मित्रं न कश्चिद्विषमस्थितस्य' इत्युक्तार्थं सम्यग् बुध्ये। 'समम् स्थित' इत्येकदेशेन तदात्मकश्लोकार्थं सूचितम्।

এই সেই স্নেহসর্ব্বস্ব; ইহা ধনী ও দরিদ্রের সমান এবং ইহা চন্দন ও বিদ্যা ভিন্ন হৃদয়ের অনুলেপন ॥২৩॥

(গলদেশে করবীরপুষ্পের মালা ইত্যাদি পুনরায় পাঠ করিলেন। দেখিয়া স্বগত। আমার ঐ বন্ধুগণ, বস্ত্রাঞ্চলদ্বারা মুখমণ্ডল আবৃত করিয়া ইত্যাদি পুনরায় পাঠ করিলেন)

বিদূষক। হে ভদ্রপ্রধানগণ! তোমরা প্রিয়বয়স্য চারুদত্তকে পরিত্যাগ কর, আমাকে হত্যা কর।

চাণ্ডালः। ওশলধ অজ্জা! ওশলধ। (ক)
কিং পেক্খধ শপ্পুলিশং, অজশবশেণ পণট্ঠজীবাশং।
কুবে খণ্ডিদপাশং, কঞ্চণকলশং বিঅ ভুব্বন্তং ॥২৪॥
চারু। সকরুণম্‌। 'শশিবিমলময়ূখ' ইত্যাদি পঠতি।

(ক) অপসরত আর্য্যাঃ! অপসরত।
(২৪) কিং প্রেক্ষধ্বে সত্পুরুষম্‌ অযশোবশেন প্রনষ্টজীবাশম্‌।
কূপে খণ্ডিতপাশং কাঞ্চনকলশমিব মজ্জন্তম্‌॥

কিমিতি। খণ্ডিতশ্ছিন্নঃ পাশো বন্ধনরজ্জুর্যস্য তম্‌, অতএব কূপে মজ্জন্তং কাঞ্চনকলসং স্বর্ণকুম্ভমিব, অযশোবশেন বসন্তসেনায়া হত্যাপবাদনিমিত্তেন প্রনষ্টা জীবস্য জীবনস্য আশা যস্য তম্‌, অতএব মজ্জন্তং মুবনাদ্বিলুপ্যমানং তাদৃশনিন্দায়া অসহ্যত্বাত্‌ স্বয়মেব মর্ত্তুমিচ্ছুমিত্যর্থঃ, সত্পুরুষম্‌ সাধুস্বভাবমিমং চারুদত্তম্‌, কিং প্রেক্ষধ্বে কথং পশ্যত, সত্পুরুষপ্রাণবিপত্তিদর্শননিষেধাদিতি ভাবঃ।

অত্র শ্রৌতোপমালঙ্কারঃ। কাঞ্চনপদেন কলসস্য উত্কর্ষং সূচয়িত্বা চারুদত্তস্যাপি উত্কর্ষঃ সূচ্যতে, ইতি নাপুষ্টার্থত্বদোষঃ। আর্য্যা জাতিঃ ॥২৪॥

চারুদত্ত। ওরূপ বলিও না। (দেখিয়া স্বগত) আজ বুঝিলাম ('সম্পন্ন অবস্থার লোকের' ইত্যাদি পাঠ করিলেন। প্রকাশ্যে। 'অট্টালিকাস্থিত এই স্ত্রীলোকগণ' ইত্যাদি পুনরায় পাঠ করিলেন)

চণ্ডাল। সরুন মহাশয়রা! সরুন।

ছিন্নরজ্জু, কূপে নিমগ্নপ্রায় স্বর্ণকুম্ভের ন্যায় অপবাদ বশতঃ জীবনাশাবিহীন সৎপুরুষকে আপনারা দেখিতেছেন কেন? ॥২৪॥

চারুদত্ত। (শোকের সহিত 'চন্দ্রের নির্ম্মল কিরণের ন্যায়' ইত্যাদি পাঠ করিলেন।)

अपरः । अले ! पुणो वि घोसेहि । (ख)

चाण्डालः । तथा करोति । (ग)

चारु । प्राप्तोऽहं व्यसनकृशां दशामनार्य्यां
यत्रेदं फलमपि जीवितावसानम् ।
एषा च व्यथयति घोषणा मनो मे
श्रोतव्यं यदिदमसौ मया हतेति ॥२५॥

ततः प्रविशति प्रासादस्थो बद्धः स्थावरकः ।

(ख) अरे ! पुनरपि घोषय ।

(ग) चाण्डाल इति । तथा करोति पुनरपि पूर्वोक्तं घोषयति ।

प्र प्त इति । अहम्, व्यसनेन शकाराभियोगरूपविपदा कृशां पूर्वं दरिद्र-दशातोऽपि हीनीकृताम्, अनार्य्यां नीचत्वापवादादसाध्वीम्, दशामवस्थाम्, प्राप्तः; यत्र दशायाम्, इदं फलमपि, जीवितस्य जीवनस्य अवसानं परिसमाप्तिरूपं चिह्नम् तत् ताद्दशं जातम् । किन्त्विति चार्थः । एषा घोषणा, मे मम मनो व्यथयति; यद् यस्मात्, असौ वसन्तसेना, मया हता, इति इत्थम्, इदं घोषणावाक्यम्, मया श्रोतव्यं भवति ।

प्रहर्षिणी वृत्तम् ॥२५॥

अपरচণ্ডাল। ওরে! পুনরায় ঘোষণা কর্।

চণ্ডাল। (তাহা করিল)

চারুদত্ত। আমি, বিপত্তিনিবন্ধন হীন এবং ঘৃণিত অবস্থা প্রাপ্ত হইয়াছি; যাহাতে জীবননাশপর্য্যন্ত এই ফলও, উপস্থিত হইয়াছে; বিশেষতঃ এই ঘোষণা আমার হৃদয়কে ব্যথিত করিতেছে; যেহেতু 'আমি বসন্তসেনাকে হত্যা করিয়াছি' ইহা শুনিতে হইল ॥২৫॥

তদনন্তর অট্টালিকার উপরে বদ্ধ অবস্থায় স্থাবরকের প্রবেশ।

स्थाव । घोषणामाकर्ण्य सवैक्लव्यम् । कधं अपावे चालुदत्ते वावादीअदि ? हग्गे णिअलेण शामिणा वन्धिदे । भोदु, आक्कन्दामि । शुणाध अज्जा ! शुणाध, एत्थ दाणिं मए पाविण पवहणपड़िवत्तेण पुप्फकलण्डअ-जिण्णुज्जाणं वशन्तशेणा णीदा, तदो मम शामिणा मं ण कामेशि त्ति कदुअ वाहुपाशवलक्कालेण मालिदा, ण उण एदिणा अज्जेण । कधं विदूलदाए ण कोवि शुणादि ?। ता किं कलेमि ?। अत्ताणअं पाडेमि ।

(ग) कथमपापश्चारुदत्तो व्यापाद्यते ? अहं निगड़ेन स्वामिना बद्धः । भवतु, आक्रन्दामि । शृणुत, आर्य्याः ! शृणुत, अत्र इदानीं मया पापेन प्रवहणपरिवर्त्तेन पुष्पकरण्डकजीर्णोद्यानं वसन्तसेना नीता, ततो मम स्वामिना मां न कामयसीति कृत्वा बाहुपाशबलात्कारेण मारिता, न पुनरेतेन आर्य्येण । कथं विदूरतया न कोऽपि शृणोति ? ।

(ग) स्थाव इति । वैक्लव्येन विह्वलतया, सह सवैक्लव्यम् । न विद्यते पापं वसन्तसेनाहत्याजनितं कलुषं यस्य सः । निगड़ेन शृङ्खलया, स्वामिना शकारेण । आक्रन्दामि आक्रन्दनं दूरत आह्वानं महदुच्चैर्ब्रवीमि । विदूरतया विशिष्टदूरतया ।

अत्र जनसाधारणश्रवणरूपस्य ईप्सितार्थस्य विशेषदूरत्वेन प्रतिघातात् प्रतिषेधो नाम विमर्शसन्ध्यङ्गम् । यथा दर्पणे—

স্থাবরক। (ঘোষণা শুনিয়া বিহ্বলতার সহিত) নিরপরাধ চারুদত্তকে হত্যা করিতেছে কেন ? প্রভু আমাকে শৃঙ্খলদ্বারা বদ্ধ করিয়াছেন। হউক, উচ্চৈঃস্বরে বলি। শুনুন মহাশয়রা ! শুনুন। এ বিষয়ে পাপাত্মা আমি, গাড়ীর পরিবর্তনক্রমে বসন্তসেনাকে পুষ্পকরণ্ডকনামক জীর্ণোদ্যানে আনিয়াছিলাম; তাহার পর আমার প্রভু

विचिन्त्य । जइ एव्वं कलेमि, तदा अज्जचालुदत्ते ण वावादीअदि । भोदु, इमादो पाशादबालग्ग-पदोलिकादो एदिणा जिस्सगवक्खेण अत्ताणअं णिक्खिवामि । वरं हगे उवरदे, ण उण एशे कुलपुत्तविहङ्गाणं वासपादवे अज्जचालुदत्ते । एव्वं जइ विवज्जामि, लद्धे मए पललोए । इत्यात्मानं पातयित्वा । ही ही ! ण उवलदम्हि । भग्गे मे दण्डणिअले । ता चाण्डालघोशं शमण्णेशामि । दृष्ट्वा उपसृत्य । हंहो चाण्डाला ! अन्तलं अन्तलं । (ग)

तत् किं करोमि ? । आत्मानं पातयामि । यद्येवं करोमि, तदा आर्य्य-चारुदत्तो न व्यापाद्यते । भवतु, अस्याः प्रासादबालाग्रप्रतोलिकातः एतेन जीर्णगवाक्षेण आत्मानं निक्षिपामि । वरमहमुपरतो न पुनरेष कुलपुत्रविहङ्गानां वासपादप आर्य्यचारुदत्तः । एवं यदि विपद्ये, लब्धो मया परलोकः । ही ही ! नोपरतोऽस्मि । भग्नो मे दण्डनिगडः । तच्चाण्डालघोषं समन्विष्यामि । हंहो चाण्डालौ ! अन्तरमन्तरम् ।

"ईप्सितार्थप्रतीघातः प्रतिषेध इतीष्यते ।"

आत्मानं स्वदेहम् । प्रासादे सद्मनि तत्र इत्यर्थः बाला क्षुद्रा या अग्रप्रतोलिका सम्मुखवर्त्तिनी रथ्या तस्याः । उपरतः एतावदुच्चदेशात् पतनेन मृतः । कुल-

---

(শকার) 'আমাকে কামনা করিস্ না' বলিয়া বলপূর্ব্বক বাহুপাশ দ্বারা বসন্তসেনাকে হত্যা করিয়াছেন ; কিন্তু এই আর্য্য চারুদত্ত হত্যা করেন নাই। হায়! অত্যন্ত দূর বলিয়া কেহই শুনিতেছে না। তা কি করি ?। নিজদেহকে নিপাতিত করি। (চিন্তা করিয়া) যদি এইরূপ করি, তবে আর্য্য চারুদত্তকে হত্যা করিবে না। হউক, এই অট্টালিকার নূতন রাস্তার সম্মুখ হইতে এই জীর্ণ গবাক্ষদ্বারা নিজ দেহকে নিক্ষেপ করি। আমার মৃত্যুও ভাল, কিন্তু সৎকুলোৎপন্নলোকরূপ-

चाण्डालौ। अले! के अन्तलं मग्गेदि?। [घ]

चेटः। सुखाय—इति पूर्वोक्तं पठति।

चारु। अये!

कोऽयमेवंविधे काले कालपाशस्थिते मयि।
अनावृष्टिहते शस्ये द्रोणमेघ इवोदितः? ॥२१॥

(घ) अरे! कः अन्तरं मार्गयति?।

सुखाः सदंशीलपमा जना एव विहगाः पक्षिणस्तेषाम्, वासाय पादपो वृक्षः। एवमनेन घातनेन। विपद्ये म्रिये। परलोकः स्वर्गः, निरपराधब्राह्मणस्य रक्षितत्वादिति भावः। दण्डनिगड़ः दण्डवत् स्थूला शृङ्खला। चाण्डालस्य घोषं घोषणास्थानम्।

का इति। शस्ये, अनावृष्ट्या हते हतप्राये सति, द्रोणमेघ इव शस्यवर्द्धको द्रोणाख्यो मेघविशेष इव, एवंविधे काले मयि कालपाशस्थिते कृतान्तस्य बन्धनरज्जुं संयते सतीत्यर्थः, अयं कः, उदितः उपस्थितः?। अप्रार्थितबन्धुरयं मे परमोपकारी भविष्यतीति भावः।

अत्र काले काल इति व्यञ्जनसंघस्य सकृदनेकधा साम्यात् छेकानुप्रासः शीलोपमानयोः संसृष्टिः। द्रोणमेघमाह ज्योतिस्तत्त्वे आसंघृतम्—

পক্ষিগণের বাসবৃক্ষ এই চারুদত্তের মৃত্যু ভাল নহে। ইহাতে যদি আমি মরিয়া যাই তবে আমি পরলোক লাভ করিলাম। (এই বলিয়া দেহ নিপাতিত করিয়া) কি আশ্চর্য্য! কি আশ্চর্য্য! আমি মরিলাম না; বরং আমার শিকল ভাঙ্গিল!। তা চাণ্ডালের ঘোষণাস্থান অন্বেষণ করি। (দেখিয়া নিকটে যাইয়া) ওহে চণ্ডাল! অবকাশ অবকাশ দাও।

চণ্ডালদ্বয়। ওরে! কে অবকাশ চাহিতেছে?।

ভৃত্য। ('শুহ্ন' ইত্যাদি পূর্ব্বোক্ত পাঠ করিল)

ভোঃ! শ্রুতং ভবদ্ভিঃ?। (ক)

ন ভীতো মরণাদস্মি, কেবলং দূষিতং যশঃ।

বিশুদ্ধস্য হি মে মৃত্যুঃ পুত্রজন্মসমো ভবেৎ ॥২৭॥

“বিদ্যুতে যাকবর্ত্তং তু চতুর্ভিঃ শোষিতদ্রুম তু।

আবর্ত্তং বিদ্ধি সংবর্ত্তং পুষ্করং দ্রোণমম্বুদম্ ॥

আবর্ত্তো নির্জ্জলো মেঘঃ সংবর্ত্তশ্চ বহূদকঃ।

পুষ্করঃ পুষ্করজলো দ্রোণঃ শস্যপ্রপূরকঃ ॥”২৫॥

(ক) ভো ইতি। ভবদ্ভির্দ্দ্রষ্টৃভিঃ শ্রুতং কিমিতি কাকুঃ। শ্রুতঞ্চেৎ মমাপরাধাভাব ইতি জ্ঞাতমপীতি ভাবঃ।

ননু কিং মরণাদ্ভীতোঽসি? যেনাত্মানমেবং ব্রবীষীত্যাহ নেতি। অহং মরণাৎ ন ভীতোঽস্মি। যদি এবং শ্রুত্বা কথমস্মান্ সাক্ষিণঃ পৃচ্ছসীত্যাহ কেবলং যশঃ সাধুজন-সুখ্যাতিঃ, দূষিতং স্ত্রীহত্যাপবাদেনেতি শেষঃ। তদ্যশোদূষণদূরীকরণায় ভবতঃ প্রতি সাক্ষিত্বমনুরোধ ইতি ভাবঃ। হি যথাহি, মে মম বিশুদ্ধস্য স্ত্রীহত্যাপবাদশূন্যস্য সতঃ, মৃত্যুঃ, পুত্রজন্মসমো ভবেৎ। আনন্দকর ইতি ভাবঃ।

অত্রার্থোপমালঙ্কারঃ ॥২৭॥

চারুদত্ত। ওহে! অনাবৃষ্টিবশতঃ শস্য হতপ্রায় হইলে শস্যবর্দ্ধক মেঘের ন্যায় এই কোন্ ব্যক্তি, এইরূপ সময়ে, আমি কালপাশে থাকিতে উপস্থিত হইল? ॥২৬॥

মহাশয়গণ! আপনারা শুনিলেন কি?।

আমি মরণ হইতে ভীত নহি; তবে কেবল যশ দূষিত হইয়াছে (সুতরাং এরূপ জিজ্ঞাসা করিতেছি)। নির্দ্দোষ অবস্থায় আমার মৃত্যু হইলে, তাহা পুত্রজন্মের তুল্য হইবে ॥২৪॥

অন্বয়। তেনাস্ম্যকৃতবৈরেণ ক্ষুদ্রেণাত্যল্পবুদ্ধিনা।
শরেণেব বিষাক্তেন দূষিতেনাপি দূষিতঃ ॥২৮॥

চাণ্ডালৌ। থাবলঅ! অবি সচ্চং ভণাসি?। (চ)

চেটঃ। সচ্চং। অহংপি মা কস্স বি কথইস্সসি ত্তি পাসাদবালগ্গ-পদোলিকাএ দণ্ডণিঅলেন বন্ধিঅ ণিক্খিত্তো (ছ)

(চ) স্থাবরক! অপি সত্যং ভণসি?।

(ছ) সত্যম্। অহমপি, মা কস্যাপি কথয়িষ্যসীতি প্রাসাদ-বালাগ্র-প্রতোলিকায়াং দণ্ডনিগড়েন বদ্ধ্বা নিক্ষিপ্তঃ।

তেনেতি। ন কৃতং বৈরং শত্রুতা যস্য তেন, ক্ষুদ্রেণ নীচস্বভাবেন, তথা অত্য-ল্পবুদ্ধিনা, অন্যথা বিনা কারণমেবং মমাপকারো ন ক্রিয়েতেতি ভাবঃ, দূষিতেন স্ত্রীহত্যা-পাপেনৈব বিষেণৈব চ স্বয়ং দোষযুক্তেনেত্যর্থঃ, বিষাক্তেন শরেণেব, তেন শকারেণ, অস্মি অহং দূষিতঃ স্ত্রীহত্যাপবাদবিষয়ীকৃতঃ। বস্তুতস্তত্রাপবাদো মিথ্যৈবেতি ভাবঃ।

অত্র শ্রৌতোপমালঙ্কারঃ ॥২৮॥

(ছ) চেট ইতি। অহমপি নিক্ষিপ্ত ইতি পরেণান্বয়ঃ। কস্যাপি সকাশে, মা কথয়িষ্যসি বসন্তসেনায়া হত্যাবৃত্তান্তমিতি শেষঃ। অয়ং শকারোক্তেরনুবাদঃ। নিক্ষিপ্তঃ স্থাপিতঃ।

আরও, আমি শকারের সহিত কোন শত্রুতা করি নাই; তথাপি সেই ক্ষুদ্র এবং অত্যল্পবুদ্ধি শকার, স্বয়ং দূষিত হইয়াও বিষাক্ত শরের ন্যায় আমাকে দূষিত করিয়াছে ॥২৮॥

চণ্ডালদ্বয়। স্থাবরক! তুমি কি সত্য বলিতেছ?।

ভৃত্য। সত্য। 'কাহারও সহিত বলিস্ না" এই কথা বলিয়া আমার প্রভু আমাকে অট্টালিকার নূতন রাস্তার সম্মুখভাগে দৃঢ়শৃঙ্খল দ্বারা বদ্ধ করিয়া রাখিয়াছিলেন।

প্রবিশ্য শকারঃ। সহর্ষম্।

মংশেণ তিক্খাম্বিলকেণ ভত্তে,
শাকেণ শূপেণ শমচ্ছকেণ।
ভুত্তং মএ অত্তণঅশ্শ গেহে
শালিশ্শ কূলেণ গুলোদণেণ ॥ ২৮ ॥

কর্ণং দত্ত্বা। ভিণ্ণ-কংশ-খঙ্খণাএ চাণ্ডালবাআএ শলশংজোএ জধা অ এশে উক্খালিদে বজ্ঝডিণ্ডিমশদ্দে পড়হাণং অ

(২৮) মাংসেন তিক্তাম্লেন ভক্তং শাকেন সূপেন সমৎস্যকেন।
ভুক্তং ময়া আত্মনো গেহে শালেঃ কূলেন গুড়ৌদনেন ॥
ভিন্ন-কাংস্য-খঙ্খনায়াশ্চাণ্ডালবাচায়াঃ স্বরসংযোগঃ, যথা চ এষ

মাংসেনেতি। ময়া আত্মনো গেহে, শালেঃ শালিসম্বন্ধীয়ং শালিধান্যতণ্ডুলনির্ম্মিতমিত্যর্থঃ, ভক্তমন্নম্ মাংসেন, তিক্তযুক্তমম্লং তিক্তাম্লং তেন, সমৎস্যকেন শাকেন সূপেন চ, তথা কূলেন স্তূপেন স্তূপীকৃতেন প্রচুরেণেত্যর্থঃ, গুড়ৌদনেন গুড়মিশ্রিতৌদনেন পায়সেনেতি তাৎপর্য্যম্, সহ ভুক্তম্! সুতরামহং প্রবর এব মনুষ্য ইতি ভাবঃ।

"কূলং স্তূপে তড়াগে চ সৈন্যপৃষ্ঠপ্রতীরয়োঃ" ইতি বিশ্বঃ। ইন্দ্রবজ্রা বৃত্তম্ ॥২৯॥

(অ) কর্ণমিতি। কর্ণং দত্ত্বা শ্রবণমভিনীয়েত্যর্থঃ। ভিন্নং প্রস্তরাদৌ পতনেন বিদীর্ণং যৎ কাংস্যং তদ্বৎ খঙ্খনায়াঃ খঙ্খন ইত্যেবং ধ্বনিবিশিষ্টায়াঃ, চাণ্ডাল-

শকার প্রবেশ করিয়া। (আনন্দের সহিত) আমি নিজের ঘরে মাংস, তিক্ত, অম্ল, শাক, ডাল, মৎস্য এবং প্রচুর পায়সের সহিত শালি-ধান্য তণ্ডুলের অন্ন খাইয়াছি ॥২৯॥

(কাণ দিয়া) বিদীর্ণ কাংস্যের ন্যায় "খঞ্জন"রূপ চাণ্ডালবাক্যের শব্দ শুনা যাইতেছে; আর যেহেতু এই বধ্য ডিণ্ডিমের শব্দ উঠিয়াছে

सुणीअदि, तधा तक्केमि, दलिद्द-चालुदत्ताके वज्झट्ठाणं णीअदि त्ति। ता पेक्खिस्सं। शत्तुविणाशे णाम महन्ते हलअस्स पलिदोशे होदि। सुदं अ मए, जोवि किल शत्तुं वावादअन्तं पेक्खदि, तस्स अण्णस्सिं जम्मन्तले अक्खिलोगे ण होदि। मए क्खु विशगण्ठिगब्भपविट्ठेण विअ कीडएण किंपि अन्तलं मग्गमाणेण उप्पादिदे ताह दलिद्द-चालुदत्ताह

उद्गीतो वध्यडिण्डिमशब्दः पटहानाञ्च श्रूयते, तथा तर्कयामि, दरिद्र चारुदत्तो वध्यस्थानं नीयत इति। तत् प्रेक्षिष्ये। शत्रु-विनाशो नाम महान् हृदयस्य परितोषो भवति। श्रुतञ्च मया, योऽपि किल शत्रुं व्यापाद्यमानं प्रेक्षते, तस्य अन्यस्मिन् जन्मान्तरे अक्षिरोगो न भवति। मया खलु विषग्रन्थिगर्भप्रविष्टेनेव कीटकेन, किमपि अन्तरं मार्गयता उत्पादितस्तस्य दरिद्रचारुदत्तस्य विनाशः।

वाचाया चण्डालस्य घोषणावाक्यं, स्वरसंयोगः श्रूयत इति परेणान्वयः। "अपि भागुरिरल्लोपमवाप्योरुपसर्गयोः। टापञ्चापि हलन्तानां क्षुधा वाचा निशा गिरा।" इति वाक्शब्दात् टाप्प्रत्ययेन वाचेति रूपम्। उद्गीत उच्चैरुत्थापितः। पटहानां ढक्कानाञ्च शब्द इति शेषः। अन्यस्मिन् जन्मान्तरे इत्यन्यपदं पुनरुक्तम्। विष—ग्रन्थिः विषवृक्षपर्वभागस्य गर्भे अभ्यन्तरे प्रविष्टेन, कीटकेन क्षुद्रकीटेनेव। यतो निर्गमावसरक्षणस्य छिद्रान्वेषिपरीलनार्थं विषपदम्। अन्तरस्य दुर्लभताप्रतिपाद-

---

এবং ঢাকের শব্দ শুনিতেছি; সেই হেতু বোধ করি দরিদ্র চারুদত্তকে বধ্যস্থানে নিয়া যাইতেছে। তা দেখি। শত্রুনাশে মনের গুরুতর সন্তোষ হয়। বিশেষতঃ আমি শুনিয়াছি—যে ব্যক্তি, শত্রুকে বধ করিতে দেখে, জন্মান্তরে তাহার নয়নরোগ হয় না। বিষবৃক্ষের গিটের

विश्वासे। सम्पदं अत्तणकेलिकाए [पासाद-बालग्ग-पदोलिआए अहिलुहिअ अत्तणो पलक्कमं पेक्खामि। तथा कृत्वा दृष्ट्वा च। हीहो! एदाह दलिद्द-चालुदत्ताह वज्झं णीअमाणाह एवड्ढे जणसम्मद्दे, जं वेलं अम्हालिसे पवले वलमनुस्से वज्झं णीअदि, तं वेलं कीदिसे भवे?। निरीक्ष्य। कधं एसे से णव-वलद्दके विअ मण्डिदे दक्खिणं दिसं णीअदि। अध किंणिमित्तं मम केलिकाए पासाद-बालग्ग-पदोलिकाए समीवे घोसणा णिवडिदा णिवालिदा अ?। विलोक्य। कधं थावलके चेडे वि णत्थि इध?। मा णाम

साम्प्रतमात्मीयायां प्रासाद-बालाग्र-प्रतोलिकायामधिरुह्य आत्मनः पराक्रमं प्रेक्षे। हीही! एतस्य दरिद्र-चारुदत्तस्य वध्यं नीयमानस्य एतावान् जनसम्मर्दः; यां वेलामस्मादृशः प्रवरो वरमनुष्यो वध्यं नीयते तां वेलां कीदृशो भवेत्। कथमेष स नव-बलीवर्द्द इव मण्डितो

नार्थस्य ग्रन्थिपदम्। कीटकेनेति चतुराथें कप्रत्ययः। अन्तरं छिद्रम्, मार्गयता अन्विष्यता मयेति सम्बन्धः। हीशब्दो विस्मये, तस्यातिशये द्विरुक्तिः। यां वेलां

ভিতরে প্রবিষ্ট কীটের ন্যায় আমি ফাঁক খুঁজিতে থাকিয়া, সেই দরিদ্র চারুদত্তের মৃত্যু ঘটাইয়াছি। এখন নিজের অট্টালিকার নূতন রাস্তার সম্মুখে আরোহণ করিয়া নিজের পরাক্রমটা দেখি। (তাহা করিয়া এবং দেখিয়া) কি আশ্চর্য্য! কি আশ্চর্য্য! এই দরিদ্র চারুদত্তকে বধ্যস্থানে লইয়া যাইতেছে, ইহাতেই এতলোকের ভিড়; যে সময়ে আমাদের মত প্রধান লোককে বধ্যস্থানে নিয়া যাইবে, তখনে কি রকম ভিড় হইবে। (দেখিয়া) নূতন বৃষের ন্যায় ভূষিত করিয়া

তেন হুদো গদুঅ মন্তভেদে কিদে ভবিস্সদি ?। তা জাব ণং অন্নেস্সামি। ইত্যবতীর্য্য উপসর্পতি। (ঙ)

চেটঃ। হস্স। ভট্টালকা ! এস্স সে আগড়ে। (ঝ)

চাণ্ডালৌ। ওসলধ, দেধ মগ্গং দালং ঢক্কেধ, হোধ তুণ্হীআ।

অবিণঅ-তিক্খ-বিসাণো, দুট্ঠবলদ্দে হুদো এদি ॥৩০॥

দক্ষিণাং দিশং নীয়তে। অথ কিং নিমিত্তং মদীয়ায়াঃ প্রাসাদ-বালাগ্র প্রতোলিকায়াঃ সমীপে ঘোষণা নিপতিতা নিবারিতা চ ?। কথং স্থাবরকচেটোঽপি নাস্তীহ ?। মা নাম তেন হুতো গত্বা মন্ত্র-ভেদঃ কৃতো ভবিষ্যতি। তদ্‌যাবদেনমন্বিষ্যামি।

(ঝ) ভট্টারকাঃ ! এষ স আগতঃ।

(৩০) অপসরত, দত্ত মার্গম্, দ্বারং পিধত্ত, ভবত তূষ্ণীকাঃ।

অবিনয়তীক্ষ্ণবিষাণো দুষ্টবলীবর্দ্দ ইত এতি ॥

সময় প্রাপ্যেত্যর্থঃ। পরস্বাম্যেবম্। এষ স চারুদত্তঃ। কাঙ্ক্ষিতো মুষিতঃ। নিপতিতা উপস্থিতা, নিবারিতা হঠাৎ নিবর্ত্তিতা চ। (ঙ) মন্ত্রভেদো মুগ্ধবসন্তসেনা-হত্যারূপাল্পপ্রকাশঃ। এবং স্থাবরকম্।

(ঝ) চেট ইতি। ভট্টারকা ইতি গৌরবপ্রকাশায় দুষ্টজনানাং সম্বোধনম্। এষ স বসন্তসেনায়াঃ মরণহন্তা শকারঃ।

এই সেই চারুদত্তকে দক্ষিণ দিকে নিয়া যাইতেছে। আমার অট্টালি-কার নূতন রাস্তার সম্মুখের নিকটে ঘোষণা বিরত ও নিবারিত হইল কেন ? (দেখিয়া) এখানে ভৃত্য স্থাবরক নাই কেন ? এখান হইতে যাইয়া, সেইস্থাবরকদ্বারা গুপ্ত বিষয় প্রকাশিত না হয়। তা ইহাকে অন্বেষণ করি। (এই বলিয়া নামিয়া ভিড়ের নিকটে গেল)

ভৃত্য। (দেখিয়া) মহাশয়গণ ! এই তিনি আসিয়াছেন।

शकारः। अले अले ! अन्तलं अन्तलं देध। उपसृत्य। पुत्तका! थावलका! चेड़ा! एहि गच्छम्ह। (ञ)

चेटः। ह्वी ह्वी! अणज्ज! वशन्तशेणिअं मालिअ ण पलितुट्टेशि, शम्पदं पणइजण-कप्पपादवं अज्जचालुदत्तं मालइदुं ववशिदेशि ?। [ट]

(ञ) अरे अरे! अन्तरमन्तरं दत्त। पुत्रक! स्थावरक! चेट! एहि गच्छावः।

(ट) ह्वी ह्वी! अनार्य्य! वसन्तसेनिकां मारयित्वा न परि-

अपेत। अपसरत अस्य सन्निधानादिति शेषः, मार्गम् अस्माकमपथम्, दत्त परित्यजतेत्यर्थः। अन्यथा आघातादनिष्टप्राप्तिसम्भव इति भावः। द्वारं पिधत्त आवृणुत। अन्यथा अभ्यन्तरेऽपि प्रवेशाशङ्केति भावः। तूष्णीका मौनावलम्बिनः, भवत। न चेत् स्वरमात्रश्रवणेऽपि समीपागमनसम्भावनेति भावः। कथमेतत् सर्वमित्याह— अविनयो दुर्व्यवहार एव तीक्ष्णं विषाणं शृङ्गं यस्य सः दुष्टबलीवर्द-तत्स्वरूपः शकारः, इत एति अत्रागच्छति।

अत्र परम्परितं रूपकमलङ्कारः। "तूष्णींशीलस्तु तूष्णीकः" इत्यमरः।

आर्य्या जातिः ॥३०॥

(ञ) शकार इति। अन्तरं गन्तुमवकाशम्। दृष्ट्वजनान् प्रति उक्तिरियम्।

चण्डालद्वय। सरুন, পথ দিন, দ্বার আবৃত করুন এবং নীরব হউন। কারণ অত্যাচাররূপ-তীক্ষ্ণ-শৃঙ্গসমন্বিত দুষ্ট বৃষ, এদিকে আসিতেছে ॥৩০॥

শকার। ওরে! ওরে! ফাঁক দাও, ফাঁক দাও। (নিকটে যাইয়া) পুত্র! স্থাবরক! ভৃত্য! আয়, আমরা যাই।

ভৃত্য। কি আশ্চর্য্য! অনার্য্য! বসন্তসেনাকে হত্যা করিয়া

শকারঃ। ণহি লত্তকুম্ভসদিশে হগ্গে ইত্থিঅং বাবা-দেমি। (ঠ)

সর্ব্বে। অহো! তুএ মারিদা, ণ অজ্জচারুদত্তেণ। (ড)

শকারঃ। কে এব্বং ভণাদি?। (ঢ)

সর্ব্বে। (চেটমুদ্দিশ্য) ণং এসো সাহু। (ণ)

তুষ্টোঽসি? সাম্প্রতং প্রণয়িজনকল্পপাদপম্ আর্য্যচারুদত্তং মার-যিতুং ব্যবসিতোঽসি?।

(ঠ) নহি রত্নকুম্ভসদৃশোঽহং স্ত্রিয়ং ব্যাপাদয়ামি।

(ড) অহো! ত্বয়া মারিতা, ন চারুদত্তেন।

(ঢ) ক এবং ভণতি?

(ণ) নন্বেষ সাধুঃ।

(ট) চেট ইতি। প্রণয়িজনানাং বন্ধুলোকানাং কল্পপাদপম্, সর্ব্বাভীষ্টপূরণাদিতি ভাবঃ। ব্যবসিতঃ প্রবৃত্তঃ।

(ঠ) শকার ইতি। রত্নকুম্ভসদৃশ ইত্যনেনাত্মন উত্তমত্বম্, উত্তমত্বাচ্চ স্ত্রী-হত্যাবৈমুখ্যং সূচিতম্।

সন্তুষ্ট হও নাই, এখন বন্ধুজনের কল্পবৃক্ষস্বরূপ আর্য্য চারুদত্তকে হত্যা করিতে প্রবৃত্ত হইয়াছ!।

শকার। রত্নকুম্ভের তুল্য আমি, স্ত্রীহত্যা করি নাই।

সকলে। ওহে! তুমিই হত্যা করিয়াছ, কিন্তু চারুদত্ত নহে।

শকার। কে এরূপ বলে?।

সকলে। (ভৃত্যকে লক্ষ্য করিয়া) ওহে! এই সাধু।

शकारः । अपवार्य सभयम् । अविदमादिके अविदमादिके ! । कधं थावलके चेडे सुट्ठु ण मए शञ्जदे । एशे क्खु मम अकज्जश्श शक्खी । विचिन्त्य । एव्वं दाव कलइश्शं । प्रकाशम् । अलिअं भट्टालका ! हंहो ! एशे चेडे शुवण्णचोलिआए मए गहिदे, पिट्टिदे, मालिदे, बद्धे अ । ता किदवेले एशे जं भणादि, किं शच्चं ? । अपवारितकेन चेटस्य कटकं प्रयच्छति । । स्वैरम् । पुत्तका ! थावलका ! चेडा ! एदं गेण्हिअ अण्णधा भणाहि । (त)

(त) हन्त ! कथं स्थावरकश्चेटः सुष्ठु न मया संयतः । एष खलु मम अकार्य्यस्य साक्षी । एवं तावत् करिष्यामि । अलीकं भट्टारकाः ! अहो ! एष चेटः सुवर्णचोरिकया मया गृहीतः, पीड़ितः, मारितः, बद्धश्च, तत् कृतवैर एष यद्भणति, किं सत्यम् ? । पुत्तक ! स्थावरक ! चेट ! एतद् गृहीत्वा अन्यथा भण ।

(ठ) शकार इति । अविदमादिके इत्यं कमेव भयविस्मयसूचकमव्ययम्, तस्यातिशये द्विरुक्तिः । सुष्ठु सम्यक् । संयतो बद्धः । हे भट्टारकाः द्रष्टारः । अलीकम् अनेन यदुक्तं तन्मिथ्या । सुवर्णचोरिकया स्वर्णचौर्य्यकरणेन हेतुना । गृहीतोधृतः, पीड़ितो भर्त्सनेन निर्यातितः, मारितः प्रहृतः । तत्तस्मात्, कृतं वैरं शत्रुता यस्य सः । किं सत्यं तदिति शेषः । अपवारितकेन अन्येषामदृश्यभावेन-

শকার। (গোপনে ভয়ের সহিত) হায়! হায়! ভৃত্য স্থাবরককে আমি ভাল করিয়া বাঁধিয়াছিলাম না। এ, আমার অকার্য্যের সাক্ষী। (চিন্তা করিয়া) এইরূপ করিব। (প্রকাশ্যে) মহাশয়গণ! মিথ্যা কথা। ওহে! এই ভৃত্য সোণা চুরি করিয়াছিল বলিয়া, আমি উহাকে ধরিয়াছিলাম, তিরস্কার করিয়াছিলাম, মারিয়াছিলাম

চেটঃ। গৃহীত্বা। পেক্খধ পেক্খধ ভট্টালকা! হং হো! শুবণ্ণেণ মং পলোভেদি। (থ)

শকারঃ। কটকমাচ্ছিদ্য। এশে শে শুবণ্ণকে, জশ্শ কালণাদো মএ বন্ধে। সক্রোধম্‌। হং হো চাণ্ডালা! মএ ক্খু এশে শুবণ্ণভণ্ডালে ণিউত্তে, শুবণ্ণং চোলঅন্তে মালিদে,

(থ) প্রেক্ষধ্বং প্রেক্ষধ্বং ভট্টারকাঃ! হং হো! সুবর্ণেন মাং প্রলোভয়তি।

(দ) এতৎ তৎ সুবর্ণকম্‌। যস্য কারণাৎ ময়া বদ্ধঃ। হং হো

ত্যর্থঃ। স্বরকং মন্দং সূক্ষ্মস্বরমিত্যর্থঃ। অত্র প্রথমবাক্যে পর্য্যায়োক্তি নাম অলিমবাক্যে চ মৌনব্যাহনং নাম নাট্যালঙ্কারঃ। "মৌক্তাবধীরিতার্থং যৎ পর্য্যায়ঃ স এব তু।" "মৌনব্যাহনং স্যাদুৎসাহনিরা কস্যাপি যৌঞ্জনাৎ।" ইতি দর্পণলক্ষণদর্শনাৎ।

(থ) চেট ইতি। হং হো আশ্চর্য্যম্‌। প্রলোভয়তি ছলাবিপরীতং বদ্ধমিতি ভাবঃ।

(দ) শকার ইতি। আচ্ছিদ্য আকৃষ্য নীত্বা। প্রত্যয়ধ্বং বিশ্বসিত। পূর্ব্বং মম

এবং বাঁধিয়া রাখিয়াছিলাম। সুতরাং ইহার সঙ্গে শত্রুতা করা হইয়াছে, তাহাতে এ, যাহা বলে তাহা কি সত্য হয়? (গোপনে ভৃত্যকে বলয় দান করিল; পরে চুপি চুপি) পুত্র! স্থাবরক! ভৃত্য! ইহা গ্রহণ করিয়া অন্যরূপ বল।

ভৃত্য। (গ্রহণ করিয়া) মহাশয়গণ দেখুন দেখুন, কি আশ্চর্য্য! সোণা দিয়া লুব্ধ করিতেছে।

শকার। (বলয় টানিয়া লইয়া) এই সেই সোণা; যাহার জন্য আমি বাঁধিয়াছিলাম। (ক্রোধের সহিত) ওহে চাণ্ডালগণ! আমি

पिट्ठिए ता अदि ण पत्तिआअध, ता पिट्टिं दाव पेक्खध। (ट)

चाण्डालौ। इत्ता। सोहणं भणादि। विसत्ते चेड़े किं ण प्पलवदि ?। (ध)

चेटः। हीमादिके ! ईदिशे दाशभावे, जं शच्चं कंपि ण पत्तिआअदि। सकरुणम्। अज्जचालुदत्त ! एत्तिके मे विहवे इति पादयोः पतति। (न)

चाण्डालौ ! मया खल्वेष सुवर्णभाण्डारे नियुक्तः सुवर्णं चोरयन् मारितः पौड़ितः। तद् यदि न प्रत्ययध्वे, तदा पृष्ठं तावत् प्रेक्षध्वम्।

(ध) शोभनं भणति। वितप्तश्चेटः किं न प्रलपति ?।

(न) हन्त ! ईदृशो दासभावः, यत् सत्यं कमपि न प्रत्याययति। आर्य्य चारुदत्त ! एतावान् मे विभवः।

प्रहारचिह्नसमन्वितमिति भावः। ततः किञ्चित्पूर्वमेव उच्चात् पतनेन चेटस्य पृष्ठे चिह्नमभूत्, तदेव प्रहारचिह्नत्वेन दर्शितमिति बोध्यम्।

अहो ! मूर्खशकारस्य प्रत्युत्पन्नमतित्वम्।

(ध) चाण्डालाविति। शोभनं सम्यगिव सुन्दरम्, भणति वाद्यिय इति शेषः। विसप्तः प्रहारेण सन्तप्तः प्रभुं प्रति क्रुद्ध इत्यर्थः। चेट एव रोषात् मिथ्या वदतीति भावः।

(न) चेट इति। हीमादिके इति दुःखविज्ञप्त्यर्थमव्ययम्। दाशभावो दासत्वम्

ইহাকে সুবর্ণভাণ্ডারে নিযুক্ত করিয়াছিলাম, তাহার পর এ, সুবর্ণ চুরি করিয়াছিল, তাই আমি উহাকে মারিয়াছিলাম এবং যন্ত্রণা দিয়াছিলাম। তা যদি বিশ্বাস না কর, তবে ইহার পিঠ দেখ।

চণ্ডালদ্বয়। (দেখিয়া) ভাল বলিতেছেন। ক্রোধে উত্তপ্ত হইয়া ভৃত্য কি না বলে।

चाह । उवलवम् ।

उत्तिष्ठ भोः ! पतितसाधुजनानुकम्पिन् !
निष्कारणोपगतबान्धव ! धर्मशील ! ।
यत्नः कृतोऽपि सुमहान् मम मोक्षणाय
दैवं न संवदति, किं न कृतं त्वयाद्य ॥२१॥

यद्वच्यात्, सत्यं वाक्यं व्यवहारं वा, कमपि जनम्, न प्रत्याययति विश्वासयति । स दासभाव इति शेषः । एभिर्वाक्यस्याविश्वसनादिति भावः । विभवः चमता । नातः परमपि किञ्चित् कर्त्तुमर्हामीति भावः ।

उत्तिष्ठेति । भोः, पतितान् विपत्सागरे मग्नान् साधुजनान् अनुकम्पते दयत इति तत्सम्बोधनम् । निष्कारणोपगतः विना हेतुमुपस्थितश्चासौ बान्धवश्चेति तत्सम्बोधनम् । हे धर्मशील ! उत्तिष्ठ । त्वया मम मोचणाय उद्धाराय, सुमहान् यत्नः कृतोऽपि ; दैवं न संवदति फलजननाय त्वद्यत्नेन सह न मिलितं भवति ; अतएव फलं न जातमिति भावः । किन्तु अद्य त्वया किं बन्धुकार्य्यं न कृतम् ? अपि तु सर्वमेव कृतमिति भावः ।

अत्र अप्राकरणिकार्थात् प्राकरणिकार्थस्यापतनरूपार्थापत्तिरलङ्कारः । तथा स्थावरकर्त्तृकचारुदत्तमोचणरूपे कार्य्ये शकारकर्त्तृकबाधाप्राप्तिर्विरोधनं नाम विमर्शसन्ध्यङ्गम् । यथा दर्पणे—

'कार्य्यात्ययोपगमनं विरोधनमिति स्मृतम् ।'

वसन्ततिलका वृत्तम् ॥२१॥

ভৃত্য। হায়! দাসত্বটা এইরূপই বটে, যে সত্য ঘটনাও কাহাকে বিশ্বাস করাইতে পারে না। (শোকের সহিত) আর্য্য চারুদত্ত আমার ক্ষমতা এই পর্য্যন্ত। (এই বলিয়া চরণে পতিত হইল)

চারুদত্ত। (শোকের সহিত) হে বিপন্ন-সজ্জনের প্রতি দয়াকারী!

चाण्डालौ । भट्टके ! पिट्टिअ एदं चेड़ं णिक्कालेहि । (प)

शकारः । णिक्कम लो ! । इति निष्क्रामयति । अले चाण्डाला ! किं विलम्बेध ? मालेध एदं । (फ)

चाण्डालौ । जदि तुवलसि, ता सअं ज्जेव मालेहि ! (ब)

रोहः । अले चाण्डाला ! म मारेध, मुञ्चध आवुकं । (भ)

(प) भट्टक ! पीड़यित्वा एतं चेटं निष्क्रामय ।

(फ) निष्क्राम रे ! । अरे चाण्डालौ ! किं विलम्बेथे ? मारयतमेनम् ।

(ब) यदि त्वरसे, तत् स्वयमेव मारय ।

(भ) अरे चाण्डालौ ! मां मारयतम्, मुञ्चतमावुकम् ।

(भ) रोह इति । अव चारुदत्तरक्षणाय रोहसेनेन याच्ञाकरणात् याच्ञा नाम नाट्यालङ्कारः । यथा दर्पणे—

হে অকারণবান্ধব ! হে ধর্ম্মশীল ! তুমি উঠ । আমার মুক্তির জন্য তুমি গুরুতর যত্ন করিলেও, দৈব তাহার সঙ্গে মিলিল না, কিন্তু তুমি কি না করিয়াছ ॥৩১॥

চণ্ডালদ্বয় । মহাশয় ! এই ভৃত্যটাকে প্রহার করিয়া বাহির করিয়া দিন ।

শকার । ওরে ! বাহির হ । (এই বলিয়া বাহির করিল) ওরে চাণ্ডালদ্বয় ! বিলম্ব করিতেছ কেন, ইহাকে মারিয়া ফেল ।

চাণ্ডালদ্বয় । যদি ত্বরা কর, তবে নিজেই মারিয়া ফেল ।

शकारः । सपुत्तं ज्जेव एदं मालेध । [म]

चारु । सर्वमस्य मूर्खस्य सम्भाव्यते । तद्गच्छ पुत्र ! मातुः समीपम् ।

रोह । किं मए गदेण कादव्वं ? । [य]

चारु । आश्रमं वत्स ! गन्तव्यं गृहीत्वाद्यैव मातरम् ।
मा पुत्र ! पितृदोषेण त्वमप्येवं गमिष्यसि ॥३२॥

(म) सपुत्रमेव एतं मारयतम ।

(य) किं मया गतेन कर्त्तव्यम ? ।

'याच्ञा तु क्वापि याच्ञा या स्वयं दूतमुखेन वा ।'

आश्रममिति । हे वत्स ! अद्यैव मातरं त्वज्जननीम्, गृहीत्वा आश्रमं तपोवनं गन्तव्यम् । हे पुत्र ! पितुर्दोषेण अपराधेन, त्वमपि एवं अकालमृत्युम्, मा गमिष्यसि मा प्राप्स्यसि; ममापराधेन तवानिष्टं यथा न स्यात् तथा इहस्थं गार्हस्थ्यं समाप्य अद्यैव तपोवनं गन्तव्यमिति भावः ।

अत एवात्र गार्हस्थ्योपसंहारप्रदर्शनात् प्ररोचना नाम विमर्शसन्ध्यङ्गम्, 'प्ररोचना तु विज्ञेया संहारार्थप्रदर्शिनी' इति दर्पणलक्षणात् ।

রোহসেন। ওরে চণ্ডালদ্বয়! আমাকে বধ কর, পিতাকে ছাড়িয়া দাও।

শকার। পুত্রের সহিতই ইহাকে মারিয়া ফেল।

চারুদত্ত। এ মূর্খের সকলই সম্ভব। অতএব হে পুত্র! তোমার মাতার নিকট যাও।

রোহসেন। আমি যাইয়া কি করিব?।

চারুদত্ত। বৎস! অদ্যই মাতাকে নিয়া তপোবনে যাইবে। হে পুত্র! পিতার দোষে তুমিও, এইরূপ অকালমৃত্যু পাইও না।৩২॥

तद्वयस्य ! एतेनैव व्रज।

विदू। भो वअस्स ! एव्वं तुए आणिदं, तुए विणा अहं पाणाइं धारेमि त्ति ? (र)

चारु। वयस्य ! स्वाधीनजीवितस्य न युज्यते प्राणपरित्यागः। (ल)

विदू। स्वगतम्। जुत्तं णेदं तधावि ण सक्कुणोमि पिअ-

(र) भो वयस्य ! एवं त्वया ज्ञातम्, त्वया विना अहं प्राणान् धारयामीति।

(ल) युक्तं नेदम्, । तथापि न शक्नोमि प्रियवयस्यविरहितः प्राणान्

'कां दिशं गन्तव्यम्' इतिवत् 'आश्रममित्यत 'न लघ्, कर्म्मप्रासौ' इत्यनेन कर्म्मणि षष्ठीनिषेधात् पारिशेष्यात् द्वितीयैव ॥३२॥

(ल) चारु इति। स्वाधीनम् आत्मायत्तम् इच्छानुसारेण रक्षितव्यं परित्यक्तव्यं वा जीवितं जीवनं यस्य तस्य तव, प्राणपरित्यागो न युज्यते, इतः परमपि बहुसुखभोगसम्भवात्; मम तु इदानीं पराधीनजीवनतया तद्रक्षणेच्छापि न सम्भवतीति भावः।

(व) विदू इति। इदं प्राणपरित्यजनम्, न युक्तम्, अयुक्तमिति भावः।

অতএব বয়স্য ! ইঁহাকে লইয়া যাও।

বিদূষক। বয়স্য ! তুমি এইরূপ বুঝিয়াছ যে, তোমা ব্যতীত আমি প্রাণ ধারণ করিব ?।

চারুদত্ত। বয়স্য ! যাহার জীবন স্বাধীন, তাহার প্রাণ পরিত্যাগ করা সঙ্গত নহে।

বিদূষক। (স্বগত) ইহা সঙ্গত নহে বটে ; তথাপি প্রিয় সখাকে

वयस्सविरहिदो पाणाइं धारेदुं त्ति। ता बम्हणीए दारअं समप्पिअ पाणपरिच्चाएण अत्तणो पिअवअस्सं अणुगमिस्सं। प्रकाशम्। भो वअस्स ! पराणेमि एदं लहुं। (व)

शकारः। अले ! णं भणामि शपुत्तकं चालुदत्तकं वावादेध त्ति। (श)

चारु। भयं नाटयति।

चाण्डालौ। णहि अम्हाणं ईदिशी लाआणत्ती, जधा

धारयितुमिति। तत् ब्राह्मण्या दारकं समर्प्य प्राणपरित्यागेनात्मनः प्रियवयस्यमनुगमिष्यामि। भो वयस्य ! परानयामि एनं लघु।

(श) अरे ! ननु भणामि सपुत्रकं चारुदत्तकं व्यापादयतमिति।

(च) नहि अस्माकमीदृशी राजाज्ञप्तिः, यथा सपुत्रं चारुदत्तं

ब्राह्मण्याश्चारुदत्तवध्वा धूतायाः समीपं। एनं तव पुत्रम्, लघु शीघ्रम्, परानयामि इतः अपसारयामि।

अत्र प्राणपरित्यागस्य कर्त्तव्यतानिश्चयात् व्यवसायो नाम विमर्शसन्ध्यङ्गम्, "व्यवसायश्च विज्ञेयः प्रतिज्ञाहेतुसम्भवः" इति दर्पणलक्षणात्।

ছাড়িয়া আমি জীবন ধারণ করিতে পারিব না। অতএব ব্রাহ্মণীর নিকট বালকটীকে দিয়া, প্রাণপরিত্যাগ দ্বারা নিজের প্রিয়বয়স্যের অনুগমন করিব। (প্রকাশ্যে) বয়স্য ! ইহাকে শীঘ্রই সরাইয়া নিতেছি।

শকার। ওরে ! আমি বলিতেছি — পুত্রের সহিত চারুদত্তকে হত্যা কর।

চারুদত্ত। (ভয় অভিনয় করিলেন)

চণ্ডালদ্বয়। আমাদের প্রতি রাজার এরূপ আদেশ নাই যে, পুত্রের

शपुत्तं चालुदत्तं वावादेध त्ति । ता णिक्कम ले दालआ ! णिक्कम । इति निष्क्रामयतः । [१]इमं तद्दअं घोशणट्ठाणं । ताड़ेध-डिण्डिमं । पुनर्घोषयतः । [ष]

शकारः । स्वगतम् । कधं एशे ण पत्तिआअन्ति पौला । प्रकाशम् । हं हो चालुदत्ता ! बड़ुका ! ण पत्तिआअदि एशे पौलजणे । ता अत्तणकेलिकाए जीहाए भणाहि 'मए वशन्तशेणा मालिदेत्ति । (स)

व्यापादयतमिति । तत् निष्क्रम रे दारक ! निष्क्रम । इदं तृतीयं घोषणास्थानम्, ताड़यत डिण्डिमम् ।

(स) कथमेतत् न प्रत्ययन्ते पौराः । अरे चारुदत्त ! बटुक ! न प्रत्ययते एष पौरजनः, तदात्मीयया जिह्वया भण 'मया वसन्तसेना मारिता ' इति ।

(ष) चाण्डालाविति । राज्ञ आज्ञाप्रदातारौ ।

(स) शकार इति । एतत्, चारुदत्तकर्त्तृकं वसन्तसेनाया हननम् । न प्रत्ययन्ते न विश्वसन्ति, चारुदत्तस्य परमसाधुत्वादिति भावः । आत्मीयया स्वकीयया ।

সহিত চারুদত্তকে হত্যা কর। তা চলিয়া যাও হে বালক ! চলিয়া যাও। (এই বলিয়া বাহির করিয়া দিল) এই তৃতীয় ঘোষণাস্থান ; তা ডিণ্ডিম বাজাও। (পুনরায় ঘোষণা করিল)

শকার। (স্বগত) পুরবাসিগণ ইহা বিশ্বাস করিতেছে না কেন ?। (প্রকাশ্যে) ওরে চারুদত্ত ! ব্রাহ্মণ ! এই পুরবাসিগণ বিশ্বাস করিতেছে

---

(१) चाण्डालाविति पुनरधिकः पाठः क्वचित् ।

चारु। तूष्णीमास्ते।

शकारः। अले चण्डालगोहे! ण भणादि चालुदत्तवडुके; ता भणावेध इमिणा जज्जल-वंशखण्डेण शङ्कलेण तालिअ तालिअ। [छ]

चाण्डालः। प्रहारमुद्यम्य। भो चालुदत्त! भणाहि। (ज)

चारु। सकरुणम्। प्राप्यैतद्व्यसनमहार्णवप्रपातं

न त्रासो न च मनसोऽस्ति मे विषादः।

(छ) अरे चाण्डालगोह! न भणति चारुदत्तबटुकः। तद्भाणयत अनेन जर्ज्जरवंशखण्डेन शङ्कुलेन ताडयित्वा ताडयित्वा।

(ज) भोः चारुदत्त! भण।

(छ) शकार इति। गोह इति चाण्डालयोरन्यतरस्य नाम इति प्राग्दर्शितम्। चाण्डालश्चासौ गोहश्चेति तत्सम्बोधनम्। शङ्कुलेन डिण्डिमताडनदण्डरूपेण। पृथ्वीधरोऽप्येवम्।

प्राप्येति। एतत् व्यसनं विपदेव महार्णवस्तस्मिन् प्रपातं पतनं प्राप्य, विद्यमानस्येति शेषः। एवञ्च न्यक्कारं कलङ्कादिः। मे मम, त्रासो भयं नास्ति, जन्मिनो मरणस्य ध्रुवत्वादिति भावः। मनसो विषादः अनुतापेनावसादश्च

না; তা নিজের জিহ্বা দ্বারা বল যে, "আমি বসন্তসেনাকে হত্যা করিয়াছি।"

চারুদত্ত। (নীরব রহিলেন)

শকার। ওরে চণ্ডালগোহ! চারুদত্ত ব্রাহ্মণ, বলিতেছে না; তা ডিণ্ডিম বাজাইবার দণ্ডরূপ এই জীর্ণ বংশখণ্ড দ্বারা তাড়ন করিয়া করিয়া উহা বলাও।

চারুদত্ত। (শোকের সহিত) এই বিপত্তিরূপ মহাসমুদ্রে নিমজ্জন

एको मां दहति जनापवादवह्निः
वक्तव्यं यदिह मया हता प्रियेति ॥३३॥

शकारः । पुनस्तथैव । (क)

चारु । भो भोः पौराः ! । 'मया खलु नृशंसेन" इत्यादि पुनः पठति ।

शकारः । वावादिदा । (ख)

(ख) व्यापादिता ।

नास्ति आत्मनोऽपराधाभावेन मनसो दृढ़प्रसन्नत्वादित्याशयः । एकः केवलः, जनानाम् अपवादः 'सुवर्णलोभेन स्त्रीहत्या कृता' इति निन्दैव वह्निः, मां दहति सन्तापयति ; तथा 'मया प्रिया वसन्तसेना हता' इति इह जनसमूहमध्ये, यत् वक्तव्यं तच्च दहतीति शेषः ; उभयत्रापि मिथ्यात्वादित्यभिप्रायः ।"

अत्र निरङ्गकेवलरूपकद्वयस्य परस्परनिरपेक्षतया संसृष्टिः । यत्तदोर्नित्यसम्बन्धात् चतुर्थपादे 'तच्च' इत्यनुक्तावपि न न्यूनपदतादोषः, वक्तुः शोकमग्नत्वाद्वा ।

प्रहर्षिणी वृत्तम् ॥३३॥

(क) शकार इति । तथैव 'भल शाब्बालमोहि' इत्यादिपूर्व्ववदेव वक्तीति शेषः ।

প্রাপ্ত হইয়াও, আমার ভয় বা মনের বিষাদ নাই ; তবে একমাত্র লোকাপবাদরূপ অগ্নি এবং আমি প্রিয়া বসন্তসেনাকে হত্যা করিয়াছি' ইহা যে বলিতে হইবে, তাহা, আমাকে দগ্ধ করিতেছে ॥৩৩॥

শকার। (পুনরায় সেই রূপ বলিল)

চারুদত্ত। হে পুরবাসিগণ! (নৃশংস আমি ইত্যাদি পুনর্ব্বার পাঠ করিলেন)

শকার। হত্যা করিয়াছি।

চারু। এবমস্তু।

প্রথমঃ (১)। অলে। তব অজ্জ বজ্ঝবালিআ। (গ)

দ্বিতীয়ঃ। অলে! তব। [ঘ]

প্রথমঃ। অলে! লেকখঅং কালেম্হ। ইতি বহুবিধং লেখকং কৃত্বা। অলে! জদি মমকেলিকা বজ্ঝবালিআ, তা চিট্ঠদু দাব মুহুত্তঅং। [ঙ]

(গ) অরে! তবাদ্য বধ্যপালিকা!

(ঘ) অরে! তব।

(ঙ) অরে! লেখকং কুর্ম্মঃ। অরে! যদি মদীয়া বধ্যপালিকা, তদা তিষ্ঠতু তাবন্মুহূর্ত্তম্।

(গ) প্রথম ইতি। অদ্য অস্মিন্ দিবসে, বধ্যস্য বধ্যহননস্য পালিকা বারঃ, ক্রমিকনিয়মাদিতি ভাবঃ।

(ঙ) প্রথম ইতি। লিখ্যতে ভণ্ণিষ্যতে ইতি লেখো গণনা তম্, অদ্য কস্য বধ্যহননবার ইতি গণনয়া নিরূপয়াম ইত্যর্থঃ। অল্পার্থে চ কপ্রত্যয়ঃ। তিষ্ঠতু অয়ং বধ্যশ্চারুদত্ত ইতি শেষঃ।

চারুদত্ত। এই রূপ হউক।

প্রথম চণ্ডাল। ওরে! আজ তোর বধ করিবার পালা।

দ্বিতীয় চণ্ডাল। ওরে! তোর।

প্রথম চণ্ডাল। ওরে! হিসাব করিতেছি। (ইহার পর নানারূপ হিসাব করিয়া) ওরে! যদি আমার বধ করিবার পালা হয়, তবে কিছু কাল থাক।

(১) প্রথমচাণ্ডালঃ।

द्वितीयः। किं णिमित्तं ?। (च)

प्रथमः। अले! भणिदोम्हि पिदुणा सग्गं गच्छन्तेण। जधा "पुत्त! वीरअ! जइ तुह वज्झवालो होदि, मा सहसा वावादइस्सि वज्झं।" (छ)

द्वितीयः। अले! किं णिमित्तं ?। (ज)

प्रथमः। कदावि कोवि साहू अत्थं दइअ वज्झं मोआवेदि। कदावि लग्ञो पुत्ते होदि, तेण वद्धावेण सव्ववज्झाणं

(च) किं निमित्तम् ?।

(छ) अरे! भणितोऽस्मि पित्रा स्वर्गं गच्छता। यथा "पुत्र! वीरक! यदि तव वध्यपालो भवति, मा सहसा व्यापादयसि वध्यम्।

(ज) किं निमित्तम् ?।

(झ) कदापि कोऽपि साधुरर्थं दत्त्वा वध्यं मोक्ष्यति। कदापि

(छ) प्रथम इति। वीरक इति प्रशंसायां कप्रत्ययः वीरस्य इत्यर्थः। वध्यपालो वध्यहननस्य वारः। व्यापादयसि व्यापादयिष्यसीत्यर्थः।

(झ) प्रथम इति। ताडगमोचनसम्बन्धेऽपि सहसैव हननं तत्सम्बन्ध इति।

দ্বিতীয় চণ্ডাল। কি জন্য ?।

প্রথম চণ্ডাল। অরে! স্বর্গে যাইবার কালে আমার পিতা আমাকে বলিয়া গিয়াছেন যে, "পুত্র! বীরক! যদি তোর বধ করিবার পালা হয়, তবে হঠাৎ বধ্যকে বধ করিস্ না।"

দ্বিতীয় চণ্ডাল। অরে! কি নিমিত্ত ?।

প্রথম চণ্ডাল। কখনও কোনও সাধু ধন দিয়া বধ্যকে মুক্ত করিয়া

मोक्खे होदि। कदावि हत्थी बन्धं खण्डेदि, तेण अन्भमेण वज्झे मुक्के होदि। कदावि लाअपलिवत्ते होदि, तेण शव्व-वज्झाणं मोक्खे होदि। [झ]

शकारः। किं किं लाअपलिवत्ते होदि ?। [ञ]

चाण्डालः। अले ! वज्झवालिआए लेक्खअं कलेम्ह। [ट]

राज्ञः पुत्रो भवति, तेन वृद्धिमहोत्सवेन सर्ववध्यानां मोक्षो भवति। कदापि हस्ती बन्धं खण्डयति, तेन सम्भ्रमेण वध्यो मुक्तो भवति। कदापि राजपरिवर्त्तो भवति, तेन सर्ववध्यानां मोक्षो भवति।

(ञ) किं किं राजपरिवर्त्तो भवति।

(ट) अरे ! वध्यपालिकाया लेखकं कुर्म्मः।

भावः। एवमन्यथापि। बन्धं बन्धनशृङ्खलादिकम्। तेन तज्जनितेनेत्यर्थः, सम्भ्रमेण त्वरया, वध्यो मुक्तो भवति रोधकानां हस्तपाद्य पलायनादिति भावः।

(ञ) शकार इति। अस्यैव राज्ञः परिवर्त्तो भविष्यति किमित्यर्थः। उद्वेगात् किं शब्दस्य द्विरुक्तिः।

(ट) चाण्डाल इति। वध्यपालिकाया वध्यहननवारस्य, लेखकं गणनाम्। तथा च वध्यहननवारगणनाक्रमेण चोत्थितोऽयं राजपरिवर्त्तप्रसङ्ग इति भावः। तथापि पालकस्यापि राज्ञः परिवर्त्तप्रतीतेस्तस्य च भावित्वादगुणवत्त्वाच्च दर्पणोक्त-प्रथमपताकास्थानमिदम्। यथा तत्रैव

থাকেন, কখনও রাজার পুত্র হয়, সেই মহোৎসবে সমস্ত বধ্যের মুক্তি হয় এবং কখনও রাজার পরিবর্ত্তন হয়, তাহাতে সকল বধ্যের মুক্তি হয়।

শকার। কি! কি! রাজার পরিবর্ত্তন হয়?।

শকারঃ। অলে! শিগ্‌ঘং মালেধ চালুদত্তং। ইত্যুক্তা চেটং গৃহীত্বা একান্তে স্থিতঃ। (ঠ)

চাণ্ডালঃ। অজ্জচালুদত্ত! লাঅণিওও ক্খু অবলজ্ঝদি, ণ ক্খু অম্হে চাণ্ডালা। তা সুমলেহি জং সুমলিদব্বং। [ড]

চারু। প্রভবতি যদি ধর্ম্মো দূষিতস্যাপি মেঽদ্য
প্রবলপুরুষবাক্যৈর্ভাগ্যদোষাৎ কথঞ্চিৎ।

(ঠ) অরে! শীঘ্রং মারয়ত চারুদত্তম্।

(ড) আর্য্যচারুদত্ত! রাজনিয়োগঃ খলু অপরাধ্যতি, ন খলু বয়ং চাণ্ডালাঃ। তৎ স্মর যৎ স্মর্ত্তব্যম্।

"সহসৈবার্থসম্পত্তির্গুণবত্যুপচারতঃ।
পতাকাস্থানকমিদং প্রথমং পরিকীর্ত্তিতম্॥"

প্রভবতীতি। অদ্য ভাগ্যদোষাৎ মমৈব দুরদৃষ্টবশাৎ, প্রবলপুরুষস্য বিচারকপদাধিরূঢ়ত্বেন প্রধানপুরুষীভূতস্য অধিকরণিকস্যেত্যর্থঃ, বাক্যৈঃ "অপরাধ্যতাময়ং বটুঃ" "দীয়তাং চাণ্ডালানামাদেশঃ" ইত্যাদিবচনৈঃ, দূষিতস্যাপি বসন্ত-

চণ্ডাল। ওরে! বধ্যের পালার হিসাব করি।

শকার। ওরে! চারুদত্তকে শীঘ্র মারিয়া ফেল। (এই বলিয়া ভৃত্যকে লইয়া একদিকে থাকিল)

চণ্ডাল। আর্য্য চারুদত্ত! রাজার আদেশই অপরাধী; কিন্তু আমরা চণ্ডালরা নহি। অতএব আপনার স্মর্তব্য বস্তুকে স্মরণ করুন।

চারুদত্ত। আজ আমার ভাগ্যের দোষে প্রধানপুরুষ বিচারকের

सुरपतिभवनस्था यत्र तत्र स्थिता वा
व्यपनयतु कलङ्कं स्वस्वभावेन सैव ॥३४॥

भोः ! क्व तावन्मया गन्तव्यम् ? ।

चाण्डालः । (अग्रतो दर्शयित्वा) अले ! एदं दीशदि दक्खिणमशाणं, जं पेक्खिअ वज्झा झत्ति पाणाइं मुञ्चन्ति । पेक्ख पेक्ख [ढ]

(ढ) अरे ! एतत् दृश्यते दक्षिणश्मशानम्, यत् प्रेक्ष्य वध्या झटिति प्राणान् मुञ्चन्ति । प्रेक्षस्व प्रेक्षस्व

तेनाहन्त्यापराधनिश्चयेन कलङ्कविषयीकृतस्यापि, मे मम, धर्मो यदि कथञ्चित् किञ्चिदपि, प्रभवति स्वप्रभावं प्रकाशयितुमर्हति; तदा सुरपतिभवनस्था इन्द्रालयस्था। ननु वेश्यापुत्री कथं सुरपतिभवने स्थातुमर्हतीत्याह—यत्र तत्र पर्वतादौ नरके वा स्थिता, सा वसन्तसेनैव, स्वस्वभावेन आत्मभावप्रकाशेन, कलङ्कं मम वधापवादम्, व्यपनयतु दूरीकरोतु। इत्थं च तं धर्मं प्रति प्रार्थनेति भावः।

अत्राशंसा नाम नाट्यालङ्कारः "आशंसनं स्यादाशंसा" इति लक्षणात्।

मालिनी वृत्तम् ॥३४॥

বাক্যে আমি অপরাধী বলিয়া নিশ্চিত হইলেও, আমার ধর্ম যদি একটু মাত্রও ক্ষমতা প্রকাশ করিতে পারেন, তবে স্বর্গস্থা কিম্বা যেখানে সেখানে স্থিতা সেই বসন্তসেনাই, আত্মভাব প্রকাশ করিয়া আমার কলঙ্ক দূর করুন ॥৩৪॥

ওরে! আমার কোথায় যাইতে হইবে? ।

চণ্ডাল। (সম্মুখে দেখাইয়া) ওহে! এই দক্ষিণ শ্মশান দেখ

অদ্ধং কলেবলং পড়িবুত্তং কড্ঢন্তি দীহগোমাআ।
অদ্ধং পি শূললগ্গং, বেশং বিঅ অট্টহাশশ্শ ॥২৫॥

চারু। হা! হতোঽস্মি মন্দভাগ্যঃ। ইতি সাবেগমুপবিশতি।

---

(২৫) অর্দ্ধং কলেবরং প্রতিবৃত্তং কর্ষন্তি দীর্ঘগোমায়বঃ।
অর্দ্ধমপি শূললগ্নং বেশ ইবাট্টহাসস্য ॥

অর্দ্ধমিতি। দীর্ঘাঃ শূলস্য কিঞ্চিদূর্দ্ধং অগ্রখুরচরণদ্বয়োত্থাপনেন দীর্ঘীভূতদেহাশ্চ তে গোমায়বঃ শৃগালাশ্চেতি তে, প্রতিবৃত্তং লম্বিতম্, অর্দ্ধং নিম্নার্দ্ধং কলেবরং শূলারোপিতস্য দেহম্, কর্ষন্তি ভক্ষণায় আকর্ষন্তি। শূললগ্নং শূলবিদ্ধম্, অর্দ্ধমপি দেহস্যোপরিভাগোঽপি, অট্টহাসস্য মুখব্যাদানপূর্ব্বকবিকটহাস্যস্য, বেশঃ শোভেব বর্ত্তত ইতি শেষঃ, অত্যন্তবিবৃতমুখত্বাৎ তেনৈব চ দন্তপঙ্ক্তিপ্রকাশাদিতি ভাবঃ।

অত্র গুণোৎপ্রেক্ষালঙ্কারঃ। তথা পূর্ব্বকৃতস্বকার্য্যস্য সংগৃহীতত্বাৎ আদানং নাম বিমর্শসন্ধ্যঙ্গম্, "কার্য্যসংগ্রহ আদানম্" ইতি লক্ষণাৎ।

আর্য্যা জাতিঃ ॥২৫॥

যাইতেছে; যাহা দেখিয়া বধ্যগণ হঠাৎ প্রাণ পরিত্যাগ করে। দেখ দেখ—

দীর্ঘদেহ শৃগালগণ, শূললম্বিত দেহার্দ্ধকে আকর্ষণ করিতেছে; আর শূললগ্ন অপর দেহার্দ্ধও, অট্টহাস্যের শোভার ন্যায় প্রকাশ পাইতেছে ॥২৫॥

চারুদত্ত। হায়! মন্দভাগ্য আমি নিহত হইলাম। [এই বলিয়া শোকাবেগের সহিত উপবেশন করিলেন]

शकारः । ण दाव गमिश्शं, चालुदत्ताकं वावादश्शन्तं दाव पेक्खामि । परिक्रम्य दृष्ट्वा । कधं उववि्ट्ठे । (ध)

चाण्डालः । चालुदत्त ! किं भोदेशि ?। (त)

चारु । सहसोत्थाय । मूर्ख ! न भीतो मरणादस्मि केवलं दूषितं यशः । इत्यादि पुनः पठति ।

चाण्डालः । अज्जचालुदत्त ! गअणदले पडिवशन्ता चन्दशुज्जा वि विपत्तिं लहन्ति, किं उण जणा मलणभीलुआ माणवा वा । लोए कोवि उट्ठिदो पडदि, कोवि पडिदो उट्ठेदि । (थ)

[ध) न तावद्गमिष्यामि, चारुदत्तं व्यापाद्यमानं तावत् प्रेक्षे कथम् उपविष्टः ।

(त) चारुदत्त ! किं भीतोऽसि ? ।

(थ) आर्य्यचारुदत्त ! गगनतले प्रतिवसन्तौ चन्द्रसूर्य्यावपि विपत्तिं लभेते; किं पुनर्जना मरणभीरुका मानवा वा । लोके कोऽपि उत्थितः पतति, कोऽपि पतित उत्तिष्ठति ।

(ध) शकार इति । कथमुपविष्टः, अत्र उत्थानमात्रेण मरणमेव नियतमिति भावः ।

(थ) चाण्डाल इति । विपत्तिम् अस्तगमनरूपाम् । जना जनपदवासिनः पश्वादयः । किं पुनर्विपत्तिं न लभन्ते ? अपितु लभन्त एवेत्यर्थः । /

শকার। যাইব না, চারুদত্তকে বধ করিতে দেখিব। [পাদক্ষেপ পূর্ব্বক দেখিয়া) বসিল কেন ? ।

চণ্ডাল। চারুদত্ত! ভীত হইয়াছ নাকি ? ।

চারুদত্ত। [তৎক্ষণাৎ] উঠিয়া) মূর্খ! "আমি মরণ হইতে ভীত নহি, কেবল যশ দূষিত হইল ইত্যাদি পুনরায় পাঠ করিলেন]

উট্ঠন্তপড়ন্তাহ, বসণপাড়িআ শবস্স উণ অত্থি।
এদাইঁ হিঅএ কদুঅ সন্ধালেহি অত্তাণঅং ॥২৬॥

---

[২৬] উত্তিষ্ঠৎপততো বসনপাতিকা শবস্য পুনরস্তি।
এতানি হৃদয়ে কৃত্বা সন্ধারয়াত্মানম্।

উত্তিষ্ঠদিতি। উত্তিষ্ঠংশ্চাসৌ পতংশ্চেতি তস্য, শবস্য মৃতদেহস্যাপি পুনঃ, বসনস্যেব ধ্বজাদৌ পতাকাদেরিব পাতিকা দৃষ্টিপথে পতনমস্তি। এতানি বিধিচরিত্রাণি, হৃদয়ে কৃত্বা বিভাব্য, আত্মানং মনঃ, সন্ধারয় স্থিরীকুরু। তথা চ ধ্বজাদৌ পতাকাদীনাং যথা কদাচিদুত্থানং কদাচিচ্চ পতনং দৃষ্টিপথে পততি; তদ্বদেব অদৃষ্টহীনস্য শবস্যাপি যদি উত্থানং ততঃ পতনঞ্চাস্তি; অদৃষ্টবতো জীবতো জনস্য তৎ কথং ন ভবেৎ। অতো বিধিনিয়মাদেব তবৈতাবন্তং কালমুত্থানমাসীৎ ইদানীন্তু পতনমিতি বিভাব্য মনঃ স্থিরীকুরু ইতি ভাবঃ।

অত্র ঘাতকত্বরূপবিরোধস্য প্রশমনাৎ শক্তির্নাম বিমর্শসন্ধ্যঙ্গম্—"শক্তিঃ পুনর্ভবেৎ। বিরোধস্য প্রশমনম্" ইতি লক্ষণাৎ।

পাতিকেতি "পর্য্যায়ার্হর্ণেষু চ" ইতি চকারাৎ পতধাতোর্ভাবে বুঞ্। তথা চ তত্রৈব বৃত্তিঃ—"ভাবমাত্রে চ দৃশ্যতে" ইতি।

'কদুঅ' ইত্যকারস্য চতুর্থপাদে প্রবেশাৎ আর্য্যৈব জাতিঃ ॥২৬॥

চণ্ডাল। আর্য্যচারুদত্ত! গগনতলে বাসকারী চন্দ্র-সূর্য্যও, বিপদ প্রাপ্ত হইয়া থাকেন; মরণভীরু পশুপক্ষী কিম্বা মানুষের কথা আর বলিব কি। জগতে কেহ উঠিয়া পড়িতেছে, কেহ বা পড়িয়া উঠিতেছে।

উত্থান ও পতনশীল শবদেহও, পতাকাদির ন্যায় দৃষ্টিপথে পতিত হইতেছে। এই সমস্ত মনে করিয়া, মন স্থির কর ॥৩৬॥

द्वितीयचाण्डालं प्रति। **एदं चउत्थं घोसणट्ठाणं। ता उग्घोसम्ह। (द)**

पुनस्तथैव उद्घोषयतः।

चारु। हा प्रिये! वसन्तसेने!। शशिविमलमयूख —इत्यादि पुनः पठति।

ततः प्रविशति ससम्भ्रमा वसन्तसेना भिक्षुश्च।

भिक्षुः। ह्वीमाणहे! अट्ठाणपरिस्सन्तं समस्सासिअ वसन्तसेणिअं णअन्ते अणुगहिदम्हि पव्वज्जाए। उवासिके! कहिं तुमं णइस्सं?। (ध)

[द] एतत् चतुर्थं घोषणास्थानम्। तदुद्घोषयावः।

[ध] हन्त! अस्थानपरिश्रान्तां समाश्वास्य वसन्तसेनिकां नयन् अनुगृहीतोऽस्मि प्रव्रज्यया। उपासिके! कुत्र त्वां नेष्यामि?।

(ध) भिक्षुरिति। ह्वीमाणहे इत्येकमेव देशीयभाषायां हर्षार्थकसूचकमव्ययम्। अस्थाने निर्जनजीर्णोद्यानत्वादप्रशस्तस्थाने परिश्रान्तां शकारताड़नेन अत्यन्तश्रान्ततया अचेतनीभूताम्, समाश्वास्य परिचर्य्यया सुस्थीकृत्य, नयन् वाञ्छितस्थानं प्रापयन्, प्रव्रज्यया बौद्धश्रमणकधर्म्मावलम्बनेन, अनुगृहीतोस्मि। तथा च प्रव्रज्यां विना तव मे

[দ্বিতীয় চণ্ডালের প্রতি) এই চতুর্থ ঘোষণাস্থান; তা ঘোষণা করি।

পুনরায় সেই ভাবেই ঘোষণা করিল।

চারুদত্ত। হা প্রিয়ে! বসন্তসেনে! 'চন্দ্রের নির্ম্মল কিরণের ন্যায় শুভ্র-দন্ত-শালিনি! ইত্যাদি পুনরায় পাঠ করিলেন]

তদনন্তর ব্যস্ততার সহিত বসন্তসেনার ও ভিক্ষুর প্রবেশ।

ভিক্ষু। ভাল! অস্থানে মূর্চ্ছিত বসন্তসেনাকে সুস্থ করিয়া

वस। अज्जचारुदत्तस्स ज्जेव गेहं। तस्स दंसणेण मिअ-लाञ्छणस्स विअ कुमुदिणिं आणन्देहि मं। (न)

भिक्खु। स्वगतम्। कदरेण मग्गेण पविसामि ?। विचिन्त्य। लाअ-मग्गेण ज्जेव पविसामि। उवासिके! एहि, इमं लाअमग्गं। आकर्ण्य। किं णु क्खु लाअमग्गे महन्ते कल-अले सुणीअदि ?। (प)

[न] आर्य्यचारुदत्तस्यैव गेहम्। तस्य दर्शनेन मृगलाञ्छनस्येव कुमुदिनीं आनन्दय माम्।

(प) कतरेण मार्गेण प्रविशामि ?। राजमार्गेणैव प्रविशामि। उपासिके! एहि, अयं राजमार्गः। किं नु खल्वेष राजमार्गे महान् कलकलः श्रूयते ?।

गमनासम्भवः, तदसम्भवे चास्या उद्धारासम्भव इति उपकारिण्याः प्रत्युपकारप्रयोजक-प्रव्रज्या मे परमानुग्राहिका जातेति भावः।

(न) वस इति। गेहं नयेत्यर्थः। मृगलाञ्छनस्य चन्द्रस्य दर्शनेन कुमुदिनीमिव, तस्य चारुदत्तस्य दर्शनेन मामानन्दयेत्यन्वयः।

আনয়ন করতঃ আমি প্রব্রজ্যা কর্ত্তৃক অনুগৃহীত হইয়াছি। উপাসিকে! আপনাকে কোথায় নিয়া যাইব ?।

বসন্তসেনা। আর্য্য চারুদত্তেরই বাড়ী। চন্দ্রের দর্শনে কুমুদিনীর ন্যায় তাঁহার দর্শন দ্বারা আমাকে আনন্দিত কর।

ভিক্ষু। (স্বগত) কোন পথে প্রবেশ করি ?। [চিন্তা করিয়া] রাজপথেই প্রবেশ করি। উপাসিকে! এই রাজপথ। [শুনিয়া] রাজ-পথে গুরুতর কোলাহল শুনিতেছি কেন ?।

বস। অগ্রতো নিরূপ্য। কধং পুরদো মহাজণসমূহো ?। অজ্জ! জাণাহি দাব কিম্ এদং ত্তি। বিসম-ভর-ক্কন্তা বিঅ বসুন্ধরা এক্কপাসোন্নদা উজ্জইণী বট্টদি। (ফ)

চাণ্ডালঃ। ইমং অ পচ্ছিমং ঘোশণট্ঠাণং। তা তালেধ ডিণ্ডিমং, উগ্‌ঘোশেধ ঘোশণং। তথা কৃত্বা। ভো চালুদত্ত! পডিবালেহি, মা ভাআহি, লহু জ্জেব মালীঅশি। (ব)

(ফ) কথং পুরতো মহান্ জনসমূহঃ ?। আর্য্য! জানীহি তাবত কিম্ ইদমিতি। বিষমভারাক্রান্তেব বসুন্ধরা একপার্শ্বোন্নতা উজ্জয়িনী বর্ত্ততে।

নৌকেব ৫

(ব] ইদঞ্চ পশ্চিমং ঘোষণাস্থানম। তত্ তাড়য়ত ডিণ্ডিমম্, উদ্‌ঘোষয়ত ঘোষণাম্। ভোঃ চারুদত্ত! প্রতিপালয়, মা ভৈঃ, শীঘ্রমেব মার্য্যসে।

(ফ) বস ইতি। বসুন্ধরাপি বিষমেণ সাতিশয়েন ভারেণ আক্রান্তা ইব বর্ত্ততে; তথা উজ্জয়িনী নগর্য্যপি, বিষমভারাক্রান্তা সতী, একপার্শ্বে জনসমূহভারাক্রমণাদপর-পার্শ্বে উন্নতা ইবেব বর্ত্তত ইত্যর্থঃ, নৌকাদেরিব ভারেণৈকপার্শ্বস্যাবনমনে অপরপার্শ্বস্যোন্নতত্বসম্ভবাদিতি ভাবঃ।

(ব) চাণ্ডাল ইতি। পশ্চিমং চরমম্ প্রতিপালয় প্রহারপ্রাপ্তয়ে প্রতীক্ষস্ব।

বসন্তসেনা। [সম্মুখের দিকে দেখিয়া] সম্মুখে অত্যন্ত লোকের ভিড় হইয়াছে কেন ?। আর্য্য! জানুন দেখি— এ ব্যাপারটা কি। পৃথিবী যেন গুরুতর ভারাক্রান্ত হইয়াছে, উজ্জয়িনীও যেন একপার্শ্বে উন্নত হইয়াছে।

চণ্ডাল। এই শেষ ঘোষণাস্থান। তা ডিণ্ডিম বাজাও এবং ঘোষণা

चारु। भगवन्त्यो देवताः!। (भ)

भिक्षुः। श्रुत्वा ससम्भ्रमम्। उवासिके! तुमं किल चारुदत्तेण मालिदासि त्ति चारुदत्तो मालिदुं णीअदि। (म)

वस। ससम्भ्रमम्। हद्धी हद्धी! कधं मम मन्दभाइणीए किदे अज्जचारुदत्तो वावादीअदि?। भो! तुविदं तुविदं आदेसेहि मग्गं। [य]

(म) उपासिके! त्वं किल चारुदत्तेन मारितासीति चारुदत्तो मारयितुं नीयते।

(य) हा धिक् हा धिक्! कथं मम मन्दभागिन्याः कृते आर्य्य-चारुदत्तो व्यापाद्यते। भोः! त्वरितं त्वरितम् आदिश मार्गम्।

शीघ्रमेव भार्य्यं से एकमावप्रहारेणेति शेषः। तेन च दीर्घकालयातनाया अननुभव इति भावः।

(भ) चारु इति। हे भगवन्त्यो देवताः! यथा मे सापवादो मृत्युर्न स्यात्; तथा क्रियतामिति शेषः।

(म) भिक्षुरिति। एतत्, जनसंघमुखादाकर्णानिश्चितमिति बोध्यम्।

বাক্য প্রচার কর। [তাহা করিয়া] চারুদত্ত! প্রতীক্ষা কর, ভীত হইও না, সত্বরই মারিয়া ফেলিব।

চারুদত্ত। হে মাহাত্ম্যশালী দেবতাগণ!।

ভিক্ষু। [শুনিয়া ব্যস্ততার সহিত] উপাসিকে! চারুদত্ত আপনাকে হত্যা করিয়াছেন, এই জন্য চারুদত্তকে বধ করিবার জন্য নিয়া যাইতেছে।

বসন্তসেনা। [ব্যস্ততার সহিত] হায়! হায়! মন্দভাগ্যা আমার

ভিক্ষুঃ। তুবলদু তুবলদু বুদ্ধোপাসিকা অজ্জচালুদত্তং জীঅন্তং সমস্সাসিদুং। অজ্জা! অন্তলং অন্তলং দেধ। (র)

বস। অন্তরং অন্তরং। (ল)

চাণ্ডালঃ। অজ্জচালুদত্ত! শামিণিওও অবলজ্ঝদি। তা শুমলেহি জং শুমলিদব্বং। (ব)

চারু। কিং বহুনা। প্রভবতি ইত্যাদিশ্লোকং পঠতি।

(র) ত্বরতাং ত্বরতাং বুদ্ধোপাসিকা আর্য্যচারুদত্তং জীবন্তং সমাশ্বাসয়িতুম্। আর্য্যাঃ! অন্তরমন্তরং দত্ত।

(ল) অন্তরমন্তরম্।

(ব) আর্য্যচারুদত্ত! স্বামিনিয়োগঃ অপরাধ্যতি। তৎ স্মর যৎ স্মর্ত্তব্যম্।

(র) ভিক্ষুরিতি। আর্য্যা ইতি উপস্থিতজনসংঘসম্বোধনম্। অন্তরম্ আবয়োর্মধ্যমবকাশম্, দত্ত, কিঞ্চিদপসরতেত্যর্থঃ।

(ব) চাণ্ডাল ইতি। স্বামিনিয়োগো রাজাদেশঃ, অপরাধ্যতি, ত্বদ্বধেন ন পুনর্বয়মিতি শেষঃ, স্বামিনিয়োগাদেবাস্মাভিঃ ক্রিয়মাণত্বাদিতি ভাবঃ।

জন্য আর্য্য চারুদত্তকে হত্যা করিতেছে। ওহে! তাড়াতাড়ি পথ ছাড়িয়া দিন।

ভিক্ষু। আর্য্য চারুদত্তকে জীবিত অবস্থায় আশ্বস্ত করিবার জন্য বুদ্ধোপাসিকা [আপনি] তাড়াতাড়ি করুন তাড়াতাড়ি করুন। মহাশয়গণ! ফাঁক দিন, ফাঁক দিন।

বসন্তসেনা। ফাঁক ফাঁক।

চণ্ডাল। আর্য্য চারুদত্ত! রাজার আদেশ অপরাধী। তা আপনার যাহা স্মরণীয়, তাহা আপনি স্মরণ করুন।

चाण्डालः। खड्‌गमाकृष्य। **अज्जचालुदत्त ! उत्ताणे भविअ समं चिट्ठ, एक्कप्पहालेण मालिअ तुमं सग्गं णेम्ह। (ग)**

चारुदत्तस्तथा तिष्ठति।

चाण्डालः। प्रहर्त्तुमीहते। खड्‌गपतनं हस्तादभिनयन्। **ही ! कधं !। (घ)**

आकड्‌ढिदे सलोसं मुट्‌ठिए मुट्‌ठिणा गहीदे वि।
धलणीए कीस पडिदे दालुणके असणिसलिसे खग्गे ॥२७॥

(ग) आर्य्य चारुदत्त ! उत्तानो भूत्वा समं तिष्ठ। एकप्रहारेण मारयित्वा त्वां स्वर्गं नयामः।

(घ) ही ! कथम् !।

(२७) आकृष्टः सरोषं मुष्टौ मुष्टिना गृहीतोऽपि।
धरण्यां केन पतितो दारुणकोऽशनिसन्निभः खड्‌गः॥

(ग) चाण्डाल इति। उत्तानो भूत्वा उपरिवदनः सन् ऊर्द्ध्वमुखः सन्, यद्वा उत्तानो भूत्वा ऊर्ध्वः, समं सरलकायं यथा स्यात्तथा स्थितः।

(घ) चाण्डाल इति। विस्मये ही शब्दः, वितर्के च कथं शब्दः।

চারুদত্ত। [বেশী বলিয়া কি হইবে।] 'ধর্ম্ম যদি ক্ষমতা প্রকাশ করিতে পারেন' ইত্যাদি শ্লোক পাঠ করিলেন।]

চণ্ডাল। [খড়্গ আকর্ষণ করিয়া] আর্য্য চারুদত্ত! চিৎ হইয়া সমানভাবে থাকুন; এক আঘাতেই ছেদন করিয়া আপনাকে স্বর্গে পাঠাইব।

চারুদত্ত সেই ভাবে থাকিলেন।

চাণ্ডাল। [প্রহার করিবার চেষ্টা করিল; পরে হস্ত হইতে খড়্গ পতন অভিনয় করিয়া] কি আশ্চর্য্য!

জধা এদং সংবুত্তং, তধা তক্কেমি ণ বিবজ্জদি অজ্জচারুদত্তে ত্তি। ভঅবদি! সজ্ঝবাসিণি! পসীদ পসীদ। অবি ণাম চারুদত্তস্স মোক্খে ভবে? তদো অণুগহিদং তুএ চাণ্ডালউলং ভবে। (ম)

(ম) যথা এতৎ সংবৃত্তং, তথা তর্কয়ামি ন বিপদ্যতে চারুদত্ত ইতি। ভগবতি সহ্যবাসিনি! প্রসীদ প্রসীদ। অপি নাম চারুদত্তস্য মোক্ষো ভবেৎ? ততঃ অনুগৃহীতং ত্বয়া চাণ্ডালকুলম্।

আকৃষ্ট ইতি। সরোষং সভ্রূকুট্যাদিকং রোষভাবমভিনায়েত্যর্থঃ। অন্যথা তদানীং কারণাভাবাৎ রোষানুপপত্তিঃ, প্রত্যুত পূর্বকৃতালাপপরম্পরাপর্য্যালোচনয়া দয়ায়া এব প্রতীতেঃ সরোষমিত্যুক্তিরেব নোপপদ্যতে। আকৃষ্টঃ কোষাদাকৃষ্য নিষ্কাশিতঃ, পরঞ্চ মুষ্টৌ খড়্গস্যৈব মুষ্টিদেশে, মুষ্টিনা গৃহীতোঽপি, অশনিসন্নিভো বজ্রতুল্যদৃঢ়ঃ, অত এব দারুণকোঽতীবভীষণঃ, খড়্গঃ, কেন হেতুনা, ধরণ্যাং ভূতলে পতিতঃ।

অত্র আর্থোপমালঙ্কারঃ। 'উদ্গীতিঃ' জাতিরিতি পৃথ্বীধরঃ ॥৩৭॥

(ম) যথেতি। ন বিপদ্যতে ন মরিষ্যতীতি ভবিষ্যৎসামীপ্যে বর্ত্তমানা। সহ্যবাসিনি! সহ্যাখ্যপর্ব্বতাধিষ্ঠাত্রি! দেবি!। সহ্যা এব তেষামারাধ্যত্বাত্তৎসম্বোধনম্। অনুগৃহীতমিতি। ঈদৃশমহাপুরুষস্য বধাকারণেন কলঙ্কানুৎপত্তেরিতি ভাবঃ।

মুষ্টিদ্বারা [খড়্গের] মুষ্টিদেশ ধরিয়া, ক্রোধের সহিত আকর্ষণ করিলাম, এই অবস্থায় বজ্রের তুল্য ভয়ঙ্কর খড়্গ, ভূতলে পড়িয়া গেল কেন! ॥৩৭॥

যখন এইরূপ হইল, তখন আমি মনে করি চারুদত্ত মরিবেন না। ভগবতি! সহ্যপর্ব্বতবাসিনি! প্রসন্ন হও প্রসন্ন হও। চারুদত্তের মুক্তি হইবে কি? তাহা হইলে তুমি চণ্ডালবংশকে অনুগৃহীত করিলে।

अपरः। जधाण्णत्तं अणुचिट्ठम्ह। (छ)

प्रथमः। भोदु। एव्वं करेम्ह। [च]

इत्युभौ चारुदत्तं शूले समारोपयितुमिच्छतः।

चारु। प्रभवति इत्यादि पुनः पठति। (क)

भिक्षुर्वसन्तसेना च। दृष्ट्वा। अज्जा! मा दाव मा दाव। अज्जा! एसा अहं मन्दभाइणी, जाए कारणादो एसो वावादीअदि। [ख]

(छ) यथाज्ञप्तमनुतिष्ठामः।

(च) भवतु। एवं कुर्वः।

(क) आर्य्याः! मा तावत् मा तावत्। आर्य्याः! एषा अहं मन्दभागिनी, यस्याः कारणादेष व्यापाद्यते।

(छ) अपर इति। आज्ञप्तं राजादिष्टम् अनतिक्रम्येति यथाज्ञप्तम्। तथा च 'चारुदत्तो व्यापाद्यताम्' इत्येव राजादेशः, तेन खड्गाघातस्य विघ्ने जाते शूले समारोपणेन व्यापादनीय इति भावः।

(च) प्रथम इति। एवं शूले समारोपणम्।

(क) चारु इति। इत्यन्तो विमर्शसन्धिः।

অপর চণ্ডাল। রাজার আদেশ পালন করিব।

প্রথম চণ্ডাল। হউক এইরূপই করিব।

[এই বলিয়া দুই জনেই চারুদত্তকে শূলে আরোপণ করিতে ইচ্ছা করিল]

চারুদত্ত। ধর্ম্ম যদি ইত্যাদি শ্লোক পুনর্ব্বার পাঠ করিলেন।

ভিক্ষু ও বসন্তসেনা। (দেখিয়া) মহাশয়গণ বধ করিবেন না, বধ

चाण्डालः ! हञ्ञा। तुलिद' का उण एशा,
अंशपडन्तेण चिउलभालेण ।
मा मेत्ति वाहलन्ती,
उद्धिदहत्था इदो एदि ? ॥३८॥

---

(३८) त्वरितं का पुनरेषा अंशपतता चिकुरभारेण ।
मा मेति व्याहरन्ती उत्थितहस्ता इत एति ॥

(ख) भिक्षुरिति। मा तावत् शम्र व्यापादयेति शेषः। एषाहं जीवामीति शेषः।

एतदारभ्य समाप्तिपर्यन्तं उपसंहारसन्धिः। तथा चात्र वसन्तसेनाचारुदत्तयोः चिरसमीहितप्राप्तिः फलागमो नाम पञ्चमकार्यावस्था निबद्धा। यथा—

'अवस्था फलयोगः स्याद् यः समग्रफलोदयः।'

तथा वसन्तसेनाचारुदत्तयोः परस्परानुरागरूपबीजवन्तो मुखसन्ध्यादिषु निक्षिप्ता नानार्था अत्र परस्परसम्मिलनरूपमुख्यफलोपयोगितया निबद्धाः। तथा च

'बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम्।
एकार्थमुपनीयन्ते यत्र निर्वहणं हि तत् ॥'

अत्र च सन्धिप्रभृतीनि चतुर्दश अङ्गानि यथास्थानं निवेश्य लक्षणानि वक्ष्यामः।

त्वरितमिति। अंसे स्कन्धे पतता अत्यन्तव्यस्ततावेगागमनात् विपर्यस्तेन, चिकुरभारेण केशकलापेन विशिष्टा, तथा उत्थितः चारुदत्तवधनिषेधसूचक...

করিবেন না। মহাশয়গণ ! যাহার জন্য ইহাকে বধ করিতেছেন, এই সেই আমি মন্দভাগ্যা রহিয়াছি।

চণ্ডাল। (দেখিয়া) কেশকলাপ স্কন্ধের উপর পতিত হইতেছে, এই অবস্থায় এই কে, হস্ত উত্তোলন করিয়া বধ করিবেন না, বধ করিবেন না এইরূপ বলিতে বলিতে তাড়াতাড়ি এই দিকে আসিতেছে ॥৩৮॥

वस। अज्जचारुदत्त! किण्णेदं? । उरसि पतति। (ग)

भिक्षुः। अज्जचालुदत्त! किण्णेदं? । इति पादयोः पतति। (घ)

चाण्डालः। सभयमुपसृत्य। कधं वसन्तसेणा!। णं क्खु अम्हेहिं साहू ण वावादिदे। (ङ)

भिक्षुः। उत्थाय। अले! जीवदि चालुदत्ते?। (च)

(ग) आर्य्य चारुदत्त! किन्नु इदम्?।

(घ) आर्य्यचारुदत्त! किन्नु इदम्?।

(ङ) कथं वसन्तसेना!। ननु खल्वस्माभिः साधुर्न व्यापादितः।

(च) अरे जीवति चारुदत्तः?।

प्रदर्शनाय उद्‌गतौ हस्तौ यस्याः सा, एषा का पुनर्नारी, मा मा इति व्याहरन्ती वदन्ती सती, इतः अस्यां दिशि, त्वरितम् एति आगच्छति?।

चिकुरभारेणेति। विशेषणे तृतीया। आर्य्या जातिः ॥३८॥

(ग) वस इति। अत्र उरसि पतनेन अनुरागरूपवीजोपगमनात् सन्धिर्नाम उपसंहारसन्ध्यङ्गम्। यथा दर्पणे—'वीजोपगमनं सन्धिः।'

(ङ) चाण्डाल इति। अत्राश्चर्य्ये कथं शब्दः। एतेन वसन्तसेना प्रागेव परिचितेति प्रतीयते। साधुश्चारुदत्तो न खलु व्यापादितः, सौभाग्यवशादेवेति भावः।

(च) भिक्षुरिति। उत्थाय चारुदत्तचरणादिति शेषः। अरे इति घातकचाण्डा-

---

বসন্তসেনা। আর্য্য চারুদত্ত! একি!। (এই বলিয়া বুকের উপর পড়িল)

ভিক্ষু। আর্য্যচারুদত্ত! একি!। (এই বলিয়া চরণে পতিত হইল)

চণ্ডাল। (ভয়ের সহিত নিকটে যাইয়া) বসন্তসেনা যে!। আমরা সাধু চারুদত্তকে হত্যা করি নাই!।

चाण्डालः। जीवदि वस्ससदं। (छ)

वस। सहर्षम्। पच्चुज्जीविदम्हि। (ज)

चाण्डालः। ता जाव एदं वुत्तं राइस्सो जञ्ञ-वाड-गदस्स णिवेदेम्ह। (झ)

इति निष्क्रान्तः। (ञ)

(छ) जीवति वर्षशतम्।

(ज) प्रत्युज्जीवितास्मि।

(झ) तद्यावदेतद्वृत्तं राज्ञो यज्ञवाटगतस्य निवेदयावः।

तस्य सम्बोधनम्। एतेन जीवति न वेति पूर्वमनालोच्यैव पादयोः पतित इति बोध्यम्।

(छ) चाण्डाल इति। वर्षशतं जीवति जीविष्यतीत्यर्थः, मरणप्रसक्तावप्यमरणादिति भावः।

(ज) वस इति। प्रत्युज्जीवितास्मि, जीवतश्चारुदत्तस्य दर्शनादित्याशयः। एतेनास्य मृत्यौ ममाप्यवश्यमेव मृत्युरभवदिति सूचितम्।

(झ) चाण्डाल इति। वृत्तं वसन्तसेनाया एवागमनरूपं वृत्तान्तम्। यज्ञवाटगतस्य यज्ञशालायामुपस्थितस्य।

(ञ) इतीति। निष्क्रान्तः निष्क्रमितुमारभेते इत्यर्थः, परत्र निष्क्रान्ताविति दर्शनात्। चाण्डालाविति शेषः।

ভিক্ষু। (উঠিয়া) ওহে! চারুদত্ত জীবিত আছেন?।

চণ্ডাল। শত বৎসর জীবিত থাকিবেন।

বসন্তসেনা। (আনন্দের সহিত) আমিও, ফিরিয়া জীবিত হইলাম।

চণ্ডাল। তা, এই বৃত্তান্ত যজ্ঞশালাস্থ রাজার নিকট জানাইব।

शकारः। वसन्तसेनां दृष्ट्वा सत्रासम्। ह्रीमादिके! केण गब्भ-दाशी जीवाविदा?। उक्कन्ताइं मे पाणाइं। भोदु, पलाइश्शं। इति पलायते। (ट)

चाण्डालः। उपसृत्य। अले! णं अम्हाणं ईदिशी लाआ-ण्णत्ती, जेण शा वावादिदा, तं मालेधेत्ति। ता लट्ठिअशा-लअं ज्जेव अण्णेशम्ह। (ठ)

(ट) हन्त! केन गर्भदासी जीविता?। उत्क्रान्ता मे प्राणाः। भवतु पलायिष्ये।

(ठ) अरे! नन्वस्माकमीदृशी राजाज्ञप्तिः, येन सा व्यापादिता, तं मारयतेति। तत् राष्ट्रियश्यालकमेवान्विष्यावः।

(ट) शकार इति। ह्रीमादिके इत्येकमेव भयविस्मयसूचकमव्ययम् शकारोक्तौ। जीवितेति इनन्तजीवधातोः कर्म्मणि क्तः। तेन जीवनं प्रापितेत्यर्थः। उत्क्रान्ता उड्डयिता नष्टा इत्यर्थः, इतः परमवश्यमेव वसन्तसेनया स्वमारणवृत्तान्तस्य राजद्वारे वक्तव्यमाणत्वात् तव च मद्व्यस्यैव स्थावरकस्य भित्तीय साक्षिरूपत्वात् तेन च वसन्तसेनामारणापराधस्य मय्येव वर्त्तिष्यमाणत्वादिति भावः।

(ठ) चाण्डाल इति। राष्ट्रियस्य राज्ञः श्यालकं शकारम्। अन्विष्यावः—मारयितुं-

---

(এই বলিয়া যাইতে আরম্ভ করিল)

শকার। (বসন্তসেনাকে দেখিয়া ভয়ের সহিত) কি আশ্চর্য্য! গর্ভদাসী বসন্তসেনাকে বাঁচাইল কে?। আমার প্রাণ গিয়াছে। হউক, পলায়ন করি। (এই বলিয়া পলায়ন করিল)

চণ্ডাল। (নিকটে যাইয়া) ওহে! আমাদের প্রতি রাজার এইরূপ

इति निष्क्रान्तौ। (ङ)

चारु। सविस्मयम्।

कोऽयमभ्युद्यते शस्त्रे मृत्युवक्त्रगते मयि।
अनावृष्टिहते शस्ये द्रोणवृष्टिरिवागता ॥३८॥

अवलोक्य च।

वसन्तसेना किमियं द्वितीया ?
समागता सैव दिवः किमित्यम् ? !

मिति शेषः। एतच्च आक्रोशात् कौतुकाच्चाभिहितमिति बोध्यम। अन्यथा घातकमात्रस्य चाण्डालस्य वध्यनिर्वाचनयोग्यताविरहादिदमनुपपन्नं स्यात्।

अत्र शकारमारणकार्य्यस्यान्वेषणात् विबोधो नाम उपसंहारसन्ध्यङ्गम्, 'विबोधः कार्य्यमार्गणम' इति दर्पणलक्षणात्।

(ङ) इतीति। निष्क्रान्तौ चाण्डालाविति शेषः।

केति। शस्त्रे खड्गे, अभ्युद्यते मत्कण्ठच्छेदनार्थमुत्तोलिते, अतएव मयि मृत्युवक्त्रगते सति, इयं का नाम नारी, शस्ये अनावृष्ट्या हते हतप्राये सति द्रोणस्य पूर्वप्रमाणितद्रोणनामकमेघस्य वृष्टिरिव आगता उभयोरपि मृत्युनिवर्त्तकत्वात्तुल्यत्वमिति भावः,

अत्र श्रौतोपमालङ्कारः ॥३८॥

আদেশ আছে যে, 'যে ববন্তসেনাকে মারিয়াছে, তাহাকে মারিবে' তা রাজার শালাকে অন্বেষণ করি।

(এই বলিয়া চাণ্ডালদ্বয় চলিয়া গেল)

চারুদত্ত। (বিস্ময়ের সহিত) অস্ত্র উত্তোলন করিয়াছে, আমিও মৃত্যুর মুখে গিয়াছি, এই অবস্থায়, শস্য অনাবৃষ্টিতে হতপ্রায় হইলে শস্যবর্দ্ধক মেঘের ন্যায় এ কে আসিল? ॥৩৮॥

भ्रान्तं मनः पश्यति वा ममैनां ?
वसन्तसेना न मृताथ सैव ॥४०॥

अथवा—किन्नु स्वर्गात् पुनः प्राप्ता मम जीवातुकाम्यया।
तस्या रूपानुरूपेण किमुतान्ययमागता ? ॥४१॥

वसन्तेति। इयं दृश्यमाना नारी, किं द्वितीया वसन्तसेना ? सर्वथा तत्सदृश-तयैव दृश्यमानत्वादिति सर्वत्र भावः। अथवा सैव वसन्तसेना, किं दिवः स्वर्गात् दृश्यमनेन प्रकारेण समागता ?। वा अथवा, भ्रान्तं मृत्युचिन्ताक्रान्तत्वात् भ्रमविशिष्टं मम मनः, एनां स्त्रियम्, पश्यति वसन्तसेनात्वेनैवावलोकयति ?। अथवा वसन्तसेना न मृता, इयं सैव पूर्वानुभूता वसन्तसेनैव; पूर्वोक्तान्यरूपाः सम्भवादित्याशयः।

अत्र शेषे निश्चयात् निश्चयान्तसन्देहोऽलङ्कारः। उपजातिर्वृत्तम् ॥४०॥

ननु वसन्तसेनाया मरणं निश्चित्यैव राजपुरुषैस्तव दण्डो विहितस्तत् कथं तन्मरणाभावनिश्चय इत्याह अथवा किन्नु इति। मम जीवातुकाम्यया जीवनरक्षणेच्छया, स्वर्गात् पुनः किन्नु प्राप्ता अत्रोपस्थिता सा वसन्तसेनेति शेषः। अथवा इयमन्या काचिन्नारी, तस्या वसन्तसेनायाः, रूपस्य आकृतेः अनुरूपेण तुल्येन आकारेण विशिष्टा सतीत्यर्थः, किमुत आगता। अन्यथा तस्वत एव तस्या आगमनं न सम्भवति मृतत्वादिति भावः।

अत्र पूर्वार्द्धे क्रियोत्प्रेक्षा, परार्द्धे तु शुद्धसन्देहः, अनयोः परस्परनिरपेक्ष-

(দেখিয়া) একি দ্বিতীয় বসন্তসেনা ? অথবা সেই বসন্তসেনাই স্বর্গ হইতে এই ভাবে আসিয়াছে ? কিম্বা আমার ভ্রান্ত চিত্ত, ইহাকে বসন্তসেনা বলিয়া দেখিতেছে ? অথবা বসন্তসেনা মরে নাই; এ সে-ই ॥৪০॥

অথবা আমার জীবন রক্ষা করিবার জন্য বসন্তসেনা স্বর্গ হইতে

বস । সাস্রমুত্থায় পাদয়োর্নিপত্য । অজ্জচারুদত্ত ! সা জ্জেব অহং পাবা, জাএ কারণাদো তুম্মং তুএ অসরিসী অবত্থা পাবিদা । (ঢ)

নেপথ্যে । অচ্চরিঅং অচ্চরিঅং জীবদি বসন্তসেনা ! ।

ইতি সর্বে পঠন্তি । (ণ)

চারু । আকর্ণ্য, সহসোত্থায ; স্পর্শসুখমভিনীয, নিমীলিতাক্ষ এব হর্ষগদ্গদাক্ষরম্ । প্রিয়ে ! বসন্তসেনা ত্বম্ ? । (ত)

(ঢ) আর্য্যচারুদত্ত ! সৈবাহং পাপা, যস্যাঃ কারণাত্ ত্বয়ং ত্বয়া অসদৃশী অবস্থা প্রাপ্তা ।

(ণ) আশ্চর্য্যমাশ্চর্য্যম, জীবতি বসন্তসেনা ! ।

তয়া সংহৃতিঃ । কিংমিত্যারভ্য হৃয়্যন্তসন্দর্ভে উপগূহনং নাম উপসংহারসর্ন্ধ্যঙ্গম্, 'তদ্ভবেদুপগূহনম্ । যত্ স্যাদদ্ভুতসম্প্রাপ্তিঃ' ইতি দর্পণলক্ষণাত্ ।

'জীবে জীবনমর্ত্ত্যজ্জ্যৌ জীবাতুঃ পুংনপুংসকম্' ইতি রভসঃ ॥৪১॥

(ঢ) বস ইতি । অসদৃশী অযোগ্যা, আত্মনঃ পরমসাধুত্বাদিতি ভাবঃ ।

(ত) চারু ইতি । স্পর্শসুখং বসন্তি পতনাদালিঙ্গনজনিতসুখানুভবপ্রকার

পুনরায় আসিয়াছে ? কিম্বা অন্য কেহ বসন্তসেনার অনুরূপ রূপ ধারণ করিয়া এই আসিয়াছে ? ॥৪১॥

বসন্তসেনা । (অশ্রুপাতের সহিত উঠিয়া, চরণে পতিত হইয়া) আর্য্যচারুদত্ত ! সেই পাপিষ্ঠাই আমি, যাহার জন্য আপনি এই অযোগ্য অবস্থা প্রাপ্ত হইয়াছেন ।

নেপথ্যে । আশ্চর্য্য আশ্চর্য্য ! । বসন্তসেনা বাঁচিয়া আছেন । (এই বলিয়া সকলে দেখিতে লাগিল)

চারুদত্ত । (শুনিয়া, তৎক্ষণাৎ উঠিয়া, স্পর্শসুখ অভিনয় করিয়া

वस । सा त्वेव अहं मन्दभाग्या । (थ)

चारु । निरूप्य सहर्षम् । कथं वसन्तसेनैव । सानन्दम् ।

कुतो वाष्पाम्बुधाराभिः स्नपयन्ती पयोधरौ ।
मयि मृत्युवशं प्राप्ते विद्येव समुपागता ? ॥४२॥

प्रिये ! वसन्तसेने !

त्वदर्थमेतद्विनिपात्यमानं
देहं त्वयैव प्रतिमोचितं मे ।

(थ) सैवाहं मन्दभागा ।

रोमाञ्चादिकमित्यर्थः । निमीलिताक्ष एव मुद्रितनयन एव । वसन्तसेना त्वमिति काकुवशात् प्रश्नो गम्यते ।

कुत इति । मयि मृत्युवशं प्राप्ते सति, वाष्पाम्बुधाराभिः अश्रुजलासारैः पयोधरौ स्तनौ, स्नपयन्ती सती, विद्या सञ्जीवनी त्वमिव, कुतः कस्मात् देशात् समुपागता आयाता । त्वया आगतयैवाहं जीवित इत्याशयः ।

अत्र श्रौतोपमालङ्कारः ॥४२॥

त्वदर्थमिति । त्वदर्थं त्वद्धननिमित्तमित्यर्थः, विनिपात्यमानं निहन्यमानम्, एतत् मे मम देहम्, त्वयैव प्रतिमोचितं मुक्तीकृतम् । तव दर्शनाभावे कथमपि

মুদ্রিতনয়ন অবস্থাতেই আনন্দবশতঃ অস্পষ্ট অক্ষরে) প্রিয়ে! তুমি কি বসন্তসেনা ?।

আমি মৃত্যুর বশতা প্রাপ্ত হইলে, তুমি নয়নজলবৃষ্টি দ্বারা স্তনদ্বয় সিক্ত করতঃ সঞ্জীবনী বিদ্যার ন্যায় কোথা হইতে আসিলে ? ॥৪২॥

প্রিয়ে! বসন্তসেনে !

তোমার জন্যই আমার এই দেহ নিপাতিত হইতেছিল; আবার

अहो ! प्रभावः प्रियसङ्गमस्य
मृतोऽपि को नाम पुनर्ध्रियेत ? ॥४३॥

अपि च । प्रिये ! वसन्तसेने !

रक्तं तदेव वरवस्त्रमियञ्च माला
कान्तागमेन हि वरस्य यथा विभाति ।

न मुक्तिर्भवेदिति भावः । प्रियसङ्गमस्य प्रियजनसम्मिलनस्य, अहो आश्चर्यः प्रभावः सामर्थ्यम् । को नाम जनः, मृतः सन्नपि, पुनर्ध्रियेत जीवित एवावतिष्ठेत, अपि तु कोऽपि नेत्यर्थः । तथाचाहं मृतप्रायः सन्नपि यज्जीवित एवावतिष्ठे, तत्तव सम्मिलनप्रभावादेवेति भावः ।

अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः अर्थापत्तिश्च, अनयोर्मिथोनिरपेक्षतया संसृष्टिः ।

'कायो देहः क्लीवपुंसोः' इत्यमरः । उपजातिवृत्तम् ॥४३॥

रक्तमिति । कान्तागमेन प्रियतमालाभेन परिणयावस्थयेत्यर्थः, वरस्य परिणेतुः, यथा हि यथैव, विभाति रक्तवरवस्त्रादिकमिति शेषः ; तथैव, तदेव वध्यावस्थायां मया परिहितमेव, रक्तं लोहितवर्णम्, वरवस्त्रम् इदमुत्तमवसनम्, इयं माला च विभाति शोभते । एवम् एते वध्यपटहध्वनयश्च वध्यकालीनढक्काशब्दाश्च, विवाहपटहध्वनिभिः समानास्तुल्या जाताः ; उभयत्रापि त्वत्समागमात्, तव च कान्तास्थानवर्त्तित्वात् मम च वरस्थानपातित्वादित्याशयः ।

अत्र पूर्वार्द्धे श्रौती परार्द्धे चार्थी उपमा, अनयोश्च मिथोनिरपेक्षात् संसृष्टिः ।

তুমিই তাহা মুক্ত করিয়াছ। প্রিয়সম্মেলনের কি আশ্চর্য্য প্রভাব ! (না হইলে) কোন্ ব্যক্তি, মরিয়া আবার জীবিত হয় ? ॥৪৩॥

আরও, প্রিয়ে ! বসন্তসেনে !

প্রিয়তমা সম্মেলনে (বিবাহে) বরের যেমন হয়, সেই রূপই

एते च वध्यपटहध्वनयस्तथैव
जाता विवाहपटहध्वनिभिः समानाः ॥४४॥

वस। अदिदक्खिणदाए किं क्खेदं ववसिदं अज्जेण ?। (द)

चारु। प्रिये! त्वं किल मया हतेति—
पूर्वानुबद्धवैरेण शत्रुणा प्रभविष्णुना।
नरके पतता तेन मनाग्‌स्मि निपातितः ॥४५॥

(द) अतिदक्षिणतया किन्नु इदं व्यवसितमार्य्येण ?।

…थाशब्दान्वयिना हिशब्देन निश्चयार्थबोधनान्न निरर्थकत्वदोषः। पूर्वार्द्धान्वयिनस्तथै-वेत्यस्य परार्द्धगतत्वेऽपि पदद्वयात्मकतया नार्द्धान्तरैकपदतादोषः। पटहशब्दस्य द्विःपाठेऽपि उद्देश्यप्रतिनिर्द्देश्यविषयत्वान्न कथितपदतादोषश्च।

- एतेनात्मनोभाविविवाहसूचनादिदमपि दर्पणोक्तं प्रथमपताकास्थानम्। तल्लक्षणन्तु नाम्। वसन्ततिलका वृत्तम ॥४४॥

(द) वस इति। अतिदक्षिणतया नितान्तसरलस्वभावतया, आर्य्येण भवता, इदमात्मविनाशनम्, किन्नु कथम्, व्यवसितमारब्धम्। तया चात्यन्तसरलस्वभाववशा-देव भवता मिथ्यामद्वधापराधमङ्गीकृत्यान्याय्यं कृतमित्याशयः।

पूर्वेति। पूर्वम् अनुबद्ध 'त्वं मय्येवानुरक्ता, न पुनः शकारे' इत्यतो बद्धमूली-

রক্তবর্ণ সেই উত্তম বস্ত্র এবং এই মালা শোভা পাইতেছে এবং এই বধ্য-বাদ্যের শব্দও, বিবাহ-বাদ্যধ্বনির সমান হইয়াছে ॥৪৪॥

বসন্তসেনা। অত্যন্তসরলতানিবন্ধন আপনি, একি আরম্ভ করিয়া-ছিলেন ?।

চারুদত্ত। প্রিয়ে! পূর্ব্ব হইতেই বৈরভাবসম্পন্ন এবং প্রভাব-শালী সেই শত্রু শকার, 'তোমাকে আমি হত্যা করিয়াছি' এইরূপ

বস। কর্ণৌ পিধায়। সন্তং পাবং। তেন ম্হি রাঅসালেণ বাবাদিদা। (ঘ)

চারু। ভিক্ষুং দৃষ্ট্বা। অয়মপি কঃ?।

বস। তেণ অণজ্জেণ বাবাদিদা, এদিণা অজ্জেণ জীবাবিদম্হি। [ন]

চারু। কস্ত্বমকারণবন্ধুঃ?।

(ঘ) শান্তং পাপম্। তেনাস্মি রাজশ্যালেন ব্যাপাদিতা।

(ন) তেন অনার্য্যেণ ব্যাপাদিতা, এতেন আর্য্যেণ জীবিতাস্মি।

কৃতং বৈরং শত্রুতা যেন তেন, প্রভবিষ্ণুনা রাজ্ঞঃ শ্যালকতয়া প্রভাবশালিনা। অতএবাহং পূর্ব্বং পরিত্রাণায় চেষ্টমানোঽপি ন ফলং প্রাপ্ত ইতি ভাবঃ। নরকে পততা, অকারণবন্ধু-হত্যাপ্রযোজকত্বাদিত্যাশয়ঃ। তেন শকারেণ, 'ত্বং কিল ময়া হত' ইতি অভিযুজ্য লিপ্তেষঃ, মনাক্ অল্পম্, নিপাতিতো বিনাশিতোঽস্মি। কেবলোদ্যমমাত্রত্বাদস্য এবায়ং নিপাত ইতি ভাবঃ ॥৪৫॥

(ঘ) বস ইতি। শান্তং পাপম্—উক্তরূপং ন বাচ্যং ত্বয়াহং নৈব হতেত্যর্থঃ।

(ন) বস ইতি। জীবিতা জলদানাদিপরিচর্য্যয়া জীবনং প্রাপিতা।

অভিযোগ করিয়া, আপনি নরকে পতিত হইতে থাকিয়া, আমাকে একটু নিপাতিত করিতেছিল ॥৪৫॥

বসন্তসেনা। (কর্ণদ্বয় আবৃত করিয়া) ওরূপ বক্তব্য নহে। সেই রাজার শ্যালাই আমাকে মারিয়াছিল।

চারুদত্ত। (ভিক্ষুকে দেখিয়া) ইনি আবার কে?।

বসন্তসেনা। সেই নিকৃষ্ট লোক, আমাকে মারিয়াছিল, আর এই উৎকৃষ্ট লোক, আমাকে বাঁচাইয়াছেন।

চারুদত্ত। অকারণ বন্ধু আপনি কে?।

भिक्षुः । ण पच्चभिआणादि मं अज्जो । अहं सो अज्जअस्स चलण-सं वाहण-चिन्तए संवाहके णाम । जूदिअलेहिं गहिदे एदाए उवासिआए अज्जअस्स केलकेत्ति अलङ्काल-पण-णिक्कीदेम्हि तेण अ जूद-णिव्वेदेण सक्कसमणके संवुत्ते म्हि । एशावि अज्जा पवहण-विपज्जासेण पुप्फकलण्डकजिण्णुज्जाणं गदा, तेण अ अणज्जेण 'ण मं बहु मण्णेसि' त्ति बाहुपाशबलक्कालेण मालिदा, मए दिट्ठा । (प)

(प) न प्रत्यभिजानाति मामार्य्यः । अहं स आर्य्यस्य चरण-संवाहन-चिन्तकः संवाहको नाम । द्यूतकरैर्गृहीतः एतया उपासिकया आर्य्यस्य आत्मीय इति अलङ्कार-पण-निष्क्रीतोऽस्मि । तेन च द्यूतनिर्वेदेन शाक्यश्रमणकः संवृत्तोऽस्मि । एषापि आर्य्या प्रवहण-विपर्य्यासेन पुष्पकरण्डकजीर्णोद्यानं गता, तेन च अनार्य्येण—'न मां बहु मन्यसे' इति बाहु-पाश-बलात्कारेण मारिता मया दृष्टा ।

(प) भिक्षुरिति । न प्रत्यभिजानाति पूर्वपरिचितमपि वेशवैषम्यादिदानीं परिचिनोति । चरणयोर्वाहं पादमर्द्दनं चिन्तयति केन रूपेण सुखकरं भवेदिति विभावयतीति चरणसंवाहचिन्तकः । उपासिकया बुद्धसेविकया वसन्तसेनया । अलङ्कार एव पणस्तेन तद्दानेनेत्यर्थः निष्क्रीतोऽस्मि क्रीतप्रायोऽस्मि । शाक्यश्रमणको बौद्धसन्न्यासी । अनार्य्येण असज्जनेन शकारेण । न बहु मन्यसे इमथाय नाद्रियसे ।

ভিক্ষু। আপনি আমাকে চিনিতে পারিতেছেন না। আমি চরণসংবাহনের চিন্তাকারী সেই সংবাহক। দ্যূতকরগণ আমাকে ধরিয়াছিল, আর এই বুদ্ধসেবিকা বসন্তসেনা, 'আমি আপনার বলিয়া

नेपथ्ये कलकलः। जयति वृषभकेतुर्दक्षयज्ञस्य हन्ता
तदनु जयति भेत्ता षण्मुखः क्रौञ्चशत्रुः।
तदनु जयति कृत्स्नां शुभ्र-कैलास-केतुं
विनिहत-वर-वैरी चार्य्यको गां विशालाम् ॥४६॥

"पूर्व्वानुबन्धवैरेण" इत्यारभ्य एतदन्तसन्दर्भे निर्णयो नाम उपसंहारसन्ध्यङ्गम्, "निर्णयः पुनः। अनुभूतार्थकथनम्" इति दर्पणलक्षणात्।

जयतीति। दक्षयज्ञस्य हन्ता वृषभकेतुर्वृषध्वजो महादेवः, जयति अमरेषु सर्व्वोत्कर्षेण वर्त्तते। तदनु तदनन्तरम्, भेत्ता शत्रुदेहभेदनकर्त्ता, तथा क्रौञ्चशत्रुः क्रौञ्चपर्व्वतविदारणकारी, षण्मुखः कार्त्तिकेयः, जयति सेनापतिषु उत्कर्षेण वर्त्तते। तदनु च तत्परञ्च, विनिहतो विनाशितः वरः प्रधानो वैरी शत्रुः पालको येन सः, आर्य्यकस्तदाख्यो गोपालदारकः, शुभ्रो रजतमयत्वात् धवलः कैलासः पर्व्वत एव केतुर्ध्वजो यस्यास्ताम्, कृत्स्नां समस्ताम्, विशालां महतीम्, गां पृथिवीम्, जयति जित्वा मानवेषु उत्कर्षेण वर्त्तते।

अत्र आर्य्यकः प्रभावे शिवेन वले च कार्त्तिकेयेन तुल्य इति सूचनाय पूर्व्वपादद्वयोपादानम्। तदनु इत्यस्य, पूर्व्वोक्त जयतीत्यस्य च समानार्थस्य द्विःपाठात् कथितपदता दोषद्वयम्; "तदनु रिपुविभेत्ता" "अथ तु जयति कृत्स्नाम्" इति द्वितीयतृतीयचरणयोः

অলঙ্কার-পণ দিয়া আমাকে কিনিয়াছিলেন। সেই দ্যূতের অপমানে আমি বৌদ্ধ সন্ন্যাসী হইয়াছি। এই আর্য্যা বসন্তসেনাও, গাড়ীর পরিবর্ত্তনে পুষ্পকরণ্ডকনামক পুরাতন উদ্যানে গিয়াছিলেন, এবং সেই নিকৃষ্টলোক শকার, 'আমাকে আদর করিতেছিস্ না' এই বলিয়া, বলপূর্ব্বক বাহুপাশ দ্বারা মারিয়াছিল; আমি তাহা দেখিয়াছিলাম।

নেপথ্যে কোলাহল। দক্ষযজ্ঞবিনাশী বৃষধ্বজ মহাদেব জয়যুক্ত হইতেছেন; তাহার পর শত্রুহন্তা এবং ক্রৌঞ্চপর্ব্বতবিদারণকারী

প্রবিশ্য সহসা শর্ব্বিলকঃ।

হত্বা তং কুনৃপমহং হি পালকং ভোঃ!
তদ্রাজ্যে দ্রুতমভিষিচ্য চার্য্যকং তম্।
তস্যাজ্ঞাং শিরসি নিধায় শেষভূতাং
মোক্ষ্যেঽহং ব্যসনগতস্থ চারুদত্তম্ ॥৪৭॥

পাঠমন্দৈন তয়োর্নিরাসঃ। তৃতীয়ে চরণে জয়তীত্যস্য ব্যাখ্যানোক্তার্থমিদান্ সতস্বর্ব্বেঽপি ন কথিতপদতাদোষান্তরম্, একার্থকশব্দকানুপূর্ব্বীকানেকমন্দপাঠ এব তদ্দোষবিষয়ত্বাৎ।

মালিনী বৃত্তম্ ॥৪৬॥

হত্বেতি। ভোঃ কোলাহলকারণজিজ্ঞাসুজনাঃ! অহম্, তং কুনৃপং পালকাখ্যং দুষ্টনৃপতিম্, হত্বা হি বিনাশ্যৈব, তস্য রাজ্যে, তম্ আর্য্যকং দ্রুতমভিষিচ্য চ, তস্য আর্য্যকস্য, শেষভূতাং প্রসাদদত্তনিজনির্ম্মাল্যরূপাম্, আজ্ঞাং 'চারুদত্তমুদ্ধর' ইত্যেবংরূপমাদেশম্, শিরসি নিধায়, ব্যসনগতং বধায় নীতত্বাৎ বিপদাপন্নম্, চারুদত্তঞ্চ মোক্ষ্যে উদ্ধরিষ্যামি; ইতঃ কোলাহলোঽয়মিতি ভাবঃ।

অত্র অহমিত্যস্য দ্বিঃপাঠাদধিকপদতাদোষঃ, স তু 'কুনৃপমহম্' ইত্যত্র 'কুনরপতিম্' ইতি পাঠেন সমাধেয়ঃ।

"প্রসাদান্নিজনির্ম্মাল্যদানে শেষেতি কীর্ত্তিতা।" ইতি বিশ্বঃ।

প্রহর্ষিণী বৃত্তম্ ॥৪৭॥

কার্ত্তিকেয়, জয়যুক্ত হইতেছেন; আবার তাহার পর আর্য্যক, প্রধান শত্রুকে নিহত করিয়া, শুভ্র-কৈলাস-পর্ব্বতরূপধ্বজশালিনী বিশালা সমস্তা পৃথিবীকে জয় করিলেন ॥৪৬॥

শর্ব্বিলক, হঠাৎ প্রবেশ করিয়া। হে কোলাহল-কারণ-জিজ্ঞাসুগণ! আমি, সেই দুষ্টরাজা পালককে হত্যা করিয়া, তাঁহার রাজ্যে সেই

हत्वा रिपुं तं बलमन्त्रिहीनं
पौरान् समाश्वास्य पुनःप्रकर्षात्।
प्राप्तं समग्रं वसुधाधिराज्यं
राज्यं बलारेरिव शत्रुराज्यम्॥४८॥

हत्वेति। प्रकर्षात् भाग्योत्कर्षात्, बलैः सैन्यैः मन्त्रिभिश्च हीनम् एकाकिस्थितमित्यर्थः, रिपुं सिद्धादेशश्रवणमात्रेणैव कारायामाबद्धीकरणात् शत्रुम्, तं पालकम्, हत्वा मद्द्वारा विनाश्य, अन्यथा 'हत्वा तं कुनृपकम्' इत्युक्तविरोधः। पुनः पौरान् तद्वधेन भयाकुलानिति भावः, समाश्वास्य अभयदानादिनेति शेषः, बलारेः बलनामकदैत्यवैरिण इन्द्रस्य राज्यमिव, वसुधायां पृथिव्याम् अधिराज्यम् अधिकराजत्वं श्रेष्ठत्वम् यस्मिन् तत् तादृशम्, समग्रं सकलम्, शत्रोः पालकस्य राज्यं प्राप्तम् आर्य्यकेणेति शेषः।

अत्र श्रौतोपमालङ्कारः। 'आर्य्यकेण' इत्यादिपदानामनुक्तत्वेऽपि वक्तुः सम्भ्रमसत्त्वान्न न्यूनपदतादोषः, राज्यमित्यस्य द्विःपाठेऽपि उद्देश्यप्रतिनिर्देश्यविषयत्वान्न कथितपदतादोषश्च।

इन्द्रवज्रा वृत्तम्॥४८॥

আর্য্যককে শীঘ্র অভিষিক্ত করিয়া, অনুগ্রহদত্ত নির্ম্মাল্যের ন্যায় তাঁহার (আর্য্যকের) আদেশ মস্তকে ধারণ করিয়া, বিপন্ন চারুদত্তকে মুক্ত করিব ॥৪৭॥

আর্য্যক, [illegible]-সৈন্য ও মন্ত্রি-বিহীন সেই শত্রু পালককে (আমা দ্বারা) হত্যা করিয়া, পুরবাসিদিগকে আশ্বস্ত করিয়া, পৃথিবীর মধ্যে শ্রেষ্ঠরাজ্য, এবং ইন্দ্রের রাজ্যের ন্যায় (মনোহর) শত্রু পালকের সমগ্র রাজ্য, সৌভাগ্যবশতঃ লাভ করিয়াছেন ॥৪৮॥

अग्रतो निरूप्य। भवतु, अत्र तेन भवितव्यम्, यत्रायं जन-पद-समवायः। अपि नामायमारम्भः चितिपतेरार्य्यकस्य आर्य्यचारुदत्तस्य जीवितेन सफलः स्यात्?। त्वरिततरमुपसृत्य। अपयात जाल्माः!। दृष्ट्वा सहर्षम्। अपि ध्रियते चारुदत्तः सह वसन्तसेनया?। सम्पूर्णा खल्वस्मत्स्वामिनो मनोरथाः। (क)

दिष्ट्या भो व्यसनमहार्णवादपारात्
उत्तीर्णं गुणधृतया सुशीलवत्या।

(क) अग्रत इति। तेन चारुदत्तेन। जनपदानां जनपदवासिनां जनानां समवायः सम्मेलनम्। चितिपतेरार्य्यकस्य अयमारम्भः राजत्वोपक्रमः, आर्य्यचारुदत्तस्य जीवितेन जीवनरक्षणेन, अपि नाम सफलः स्यादित्यन्वयः। हे जाल्माः असमीक्ष्यकारिणो घातकादयः! अपयात अपसरत। ध्रियते जीवित एवावतिष्ठते। अस्मत्स्वामिन आर्य्यकस्य मनोरथाः चारुदत्तस्य जीवनरक्षाविषयकाभिलाषाः, सम्पूर्णाः तस्य जीवनरक्षणादिति भावः।

दिष्ट्येति। भो इति सहचरसम्बोधनम्। गुणा दयासौन्दर्य्यादयो धृता

(সম্মুখে দৃষ্টিপাত করিয়া) হউক, এইখানে চারুদত্ত থাকিবেন, যেখানে এই সকল লোক সমবেত হইয়াছে। রাজা আর্য্যকের এই আরম্ভ, চারুদত্তের জীবনরক্ষা দ্বারা সফল হইবে কি?। (তাড়াতাড়ি নিকটে যাইয়া) ওরে অবিবেচকগণ! সরিয়া যা। (দেখিয়া আনন্দের সহিত) বসন্তসেনার সহিত চারুদত্ত জীবিত আছেন কি?। আমাদের রাজার অভিলাষ পূর্ণ হইয়াছে।

নৌকার ন্যায় গুণবতী ও সচ্চরিত্রা প্রিয়তমা বসন্তসেনা দ্বারা অপার

नावेव प्रियतमया चिरान्निरीक्षे (१)
ज्योत्स्नाढ्यं शशिनमिवोपरागमुक्तम् ॥४८॥

तत् कृतमहापातकः कथमिवैनमुपसर्पामि ?। अथवा सर्वत्रार्जवं शोभते। प्रकाशमुपसृत्य बद्धाञ्जलिः। आर्य्य चारुदत्त !। (ब)

यया तया। अस्मिन् पक्षे आहिताग्न्यादित्वात् धृतशब्दस्य परनिपातः। अन्यत्र तु गुणेन रश्मिना धृता बद्धा तया। सुशीलवत्या सच्चरितया मत्स्वभावया मनोहरया चेत्यर्थः, नावा नौकयेव, प्रियतमया वसन्तसेनया द्वारा, दिष्ट्या भाग्येन, अपारादन-न्तरणीयात्, व्यसनं विपत् महार्णव इव तस्मात्, उत्तीर्णम् अतएव उपरागात् राहु-ग्रासात् मुक्तम्, ज्योत्स्नाढ्यं कौमुदीयुक्तम्, शशिनं चन्द्रमिव, चारुदत्तमिति शेषः, चिराद्बहुकालात् परम्, निरीक्षे पश्यामि।

अत्र नावेवेत्युपमानुसारात् 'व्यसनमहार्णवात्' इत्यत्रापि उपमितसमास एव न्याय्य इति लुप्तोपमा, नावेवेति च पूर्णोपमा, अनयोरङ्गाङ्गिभावेन सङ्करः शशिनमिवेति चै-श्रौतीपूर्णया पुनः संसृज्यते तथा चारुदत्तजीवनरूपवाञ्छितलाभात् आनन्दो नाम उपसंहारसन्ध्यङ्गस्य —'आनन्दो वाञ्छितागमः' इति लक्षणात्।

प्रहर्षिणी वृत्तम् ॥४८॥

বিপদ-সাগর হইতে উত্তীর্ণ, সুতরাং রাহুগ্রাস হইতে মুক্ত জ্যোৎস্না-সমন্বিত চন্দ্রের ন্যায় চারুদত্তকে বহুকালের পর ভাগ্যবশতঃ দেখিতেছি ॥৪৯॥

তা মহাপাপ করিয়া, ইহার নিকট কি করিয়া উপস্থিত হইব ?। অথবা সর্ব্বত্রই সরলতা শোভা পায়। (নিকটে যাইয়া, কৃতাঞ্জলি হইয়া, প্রকাশ্যে) আর্য্য চারুদত্ত !।

---

(१) निरीक्षे।

चारु। ननु! को भवान्?।

शर्वि। येन ते भवनं भित्त्वा न्यासापहरणं कृतम्।

सोऽहं कृतमहापापस्त्वामेव शरणं गतः ॥५०॥

चारु। सखे! मैवम्। त्वया असौ प्रणयः कृतः।

इति कण्ठे गृह्णाति। (भ)

(ब) तदिति। कृतं महापातकं ब्राह्मणसुवर्णहरणात् महापापं येन सः। एवं चारुदत्तम्। तथा च समानभावेनैव रक्षणीयत्वात् न्यासोऽपि स्वत्ववद्धनमिव। तेन ब्राह्मणहस्तगतन्यासहरणान्महापातकमेव कृतम्। तथा यस्य न्यासमपहृत्य महाहानिः कृता, तदन्तिक एवोपसर्पणं गुरुतरलज्जाप्रतिबन्धकत्वादशक्यमेवेति भावः। आर्जवं सरलता। तथा च सरलभावेन पूर्ववृत्तान्तं विस्मृत्योपस्थितिः सम्भवत्येवेत्याशयः। प्रकाशं ब्रवीतीत्यर्थः।

महापातकमाह मनुः—"ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ॥"

ब्राह्मणस्वामिकाशीतिरत्तिकापरिमितसुवर्णान्यूनसुवर्णहरणस्य महापातकत्वं शूलपाणिना प्रायश्चित्तविवेके व्यवस्थापितं द्रष्टव्यम्।

येनेति। येन जनेन, ते तव, भवनं भित्त्वा सन्धिनिर्म्माणाय गृहभित्तिं विदार्य्य, न्यासस्य वसन्तसेनाकृतालङ्कारनिक्षेपस्य अपहरणं कृतम्, कृतमहापापस्तत्सुवर्णहरणादेवेति भावः, सोऽहं शर्व्विलकः, त्वामेव शरणं गतः, तदपराधमार्ज्जनार्थमित्याशयः ॥५०॥

(भ) चार्विति। मैवं तदपहरणेनात्मनोऽपराधावधारणं न कर्त्तव्यमित्यर्थः।

চারুদত্ত। মহাশয়! আপনি কে?।

শর্বিলক। যে ব্যক্তি, আপনার গৃহ বিদীর্ণ করিয়া, গচ্ছিত ধন অপহরণ করিয়াছিল; মহাপাপকারী সেই ব্যক্তিই আমি আপনার শরণাপন্ন হইলাম ॥৫০॥

শর্বি। অন্যচ্চ।

আর্য্যকেণার্য্যবৃত্তেন কুলং মানঞ্চ রক্ষতা।
পশুবদ্‌যজ্ঞবাটস্থো দুরাত্মা পালকো হতঃ ॥৫১॥

চারু। কিম্?।

শর্বি। ত্বদ্‌যানং যঃ সমারুহ্য গতস্ত্বাং শরণং পুরা।
পশুবদ্বিততে যজ্ঞে হতস্তেনাদ্য পালকঃ ॥৫২॥

তৎকারণমাহ ত্বয়েতি। অসৌ ন্যাসাপহরণব্যাপারঃ, প্রণয়ো ময়া মহাত্মনঃ, সৌহার্দ্দং ম কৃতঃ, তেন হি তব মম চ যথাক্রমমুপকার্য্যোপকারকভাবজননাৎ সৌহার্দ্দস্য চ তদ্‌মূলত্বাদিত্যাশয়ঃ।

আর্য্যকেণেতি। আর্য্যবৃত্তেন সাধুচরিত্রেণ আর্য্যকেণ, কুলং বংশম্, মানং গৌরবঞ্চ রক্ষতা, জনানামিতি শেষঃ। পালকেন তু তদুভয়মপি জনানাং প্রায়েণ বিনাশিতমিতি ভাবঃ। যজ্ঞবাটস্থো যজ্ঞশালাস্থিতঃ, দুরাত্মা পালকো হতঃ, মদ্দ্বারেতি শেষঃ, অন্যথা "হত্বা তং কুনৃপমহম্" ইতি পূর্ব্বোক্তবিরোধাপত্তিঃ ॥৫১॥

ত্বদিতি। যঃ, তব যানং প্রবহণমারুহ্য পুরা পূর্ব্বং ত্বাং শরণং গতঃ; অদ্য তেন আর্য্যকেণ, যজ্ঞে কর্ম্মণি বিততে বিস্তৃতে বহুতরাঙ্গানুষ্ঠানেন পূর্ণপ্রায়ে সতি, পালকঃ, পশুবৎ যজ্ঞীয়পশুবৎ হতো মদ্দ্বারা ব্যাপাদিতঃ। অত্র শ্রৌতোপমালঙ্কারঃ ॥৫২॥

চারুদত্ত। সখে! এরূপ বলিও না। তুমি উহা প্রণয়ই করিয়াছ। (এই বলিয়া কণ্ঠে ধারণ করিলেন)

শর্বিলক। আরও,

লোকের কুল ও সম্মান রক্ষাকারী এবং সচ্চরিত্র আর্য্যক, পশুর ন্যায় যজ্ঞশালায় দুরাত্মা পালককে হত্যা করিয়াছেন ॥৫১॥

চারুদত্ত। কি?।

শর্বিলক। যিনি আপনার গাড়ীতে উঠিয়া, পূর্ব্বে আপনার

चारु। शर्विलक! योऽसौ पालकेन घोषादानीय निष्कारणं कूटागारे बद्ध आर्य्यकनामा त्वया मोचितः?। (म)

शर्वि। यथाह तत्रभवान्। (य)

चारु। प्रियं नः प्रियम्।

शर्वि। प्रतिष्ठितमात्रेण तव सुहृदा आर्य्यकेण उज्जयिन्यां वेणातटे कुशावत्यां राज्यमतिसृष्टम्। तत् प्रतिमान्यतां प्रथमः सुहृत्प्रणयः। परिवृत्य। अरे रे! आनीयतामयं पापो राष्ट्रियशठः। (र)

(म) चारु इति। घोषात् आभीरपल्लीतः। कूटागारे कारागारे।

(य) शर्वि इति। तत्रभवान् माननीयो भवान्, यथाह यथार्थमेवोक्तवानिति अतीतसामीप्ये वर्त्तमाना।

(र) शर्वि इति। उज्जयिन्यां प्रतिष्ठितमात्रेणेत्यन्वयः वेणा नाम काचिन्नदी तस्यास्तटे, कुशावत्यां तदाख्यायां नगर्य्याम्. कुशावतीनामनगरीस्थराजशासनाधीन-मित्यर्थः, राज्यम्, अतिसृष्टं भवते प्रदत्तम्। तत्तस्मात् सुहृद आर्य्यकस्य प्रणय इयं

শরণাগত হইয়াছিলেন, তিনি (আর্য্যক) আজ যজ্ঞ পূর্ণপ্রায় হইতে চলিলে, পশুর ন্যায় পালককে হত্যা করিয়াছেন ॥৫২॥

চারুদত্ত। শর্বিলক! রাজা পালক, সেই আর্য্যকনামে যাহাকে গোপপল্লী হইতে আনিয়া অকারণ কারাগারে আবদ্ধ করিয়াছিলেন; পরে তুমি মুক্ত করিয়াছিলে?।

শর্বিলক। মাননীয় আপনি যথার্থ বলিয়াছেন।

চারুদত্ত। প্রিয়, আমাদের বড়ই প্রিয় (এই ঘটনা)

শর্বিলক। আপনার সুহৃৎ আর্য্যক, উজ্জয়িনীতে প্রতিষ্ঠিত হইয়াই বেণানদীর তীরে কুশাবতী নগরীর রাজার শাসনাধীন রাজ্য, আপ-

নেপথ্যে। যথাজ্ঞাপয়তি শর্ব্বিলকঃ।

শর্ব্বি। আর্য্য! নন্বয়মার্য্যকো রাজা বিজ্ঞাপয়তি, ইদং ময়া যুষ্মদ্‌গুণোপার্জ্জিতং রাজ্যম্, তদুপযুজ্যতাম্। (ল)

চারু। অস্মদ্‌গুণোপার্জ্জিতং রাজ্যম্!।

প্রার্থনা, প্রতিমান্যতামঙ্গীক্রিয়তাম্। রাষ্ট্রিয়শঠঃ রাজশ্যালরূপী ধূর্ত্তঃ। ইত্যনুচরান্ প্রতি আদেশ ইতি বোধ্যম্।

অত্র চারুদত্তায় রাজ্যদানাৎ ভাষণং নাম উপসংহারসন্ধ্যঙ্গম্,—
"সামদানাদি ভাষণম্" ইতি দর্পণলক্ষণাৎ।

(ল) শর্ব্বি ইতি। যুষ্মাকং তব চারুদত্তস্যেত্যর্থঃ গৌরবাদ্বহুবচনম্, গুণেন দয়য়া উপার্জ্জিতম্। তথা চ ত্বয়া দয়য়া অপসরণায় তৎ প্রবহণং দত্তম্, তেন চাহমা রক্ষিতঃ, তেন চেদং রাজ্যমুপার্জ্জিতমিতি পরম্পরয়া ত্বদ্দয়ারূপগুণ এব তদ্রাজ্যোপার্জ্জনে কারণমিতি ভাবঃ। তত্তস্মাৎ উপযুজ্যতাং এতদ্রাজ্যং ভুজ্যতামিতি সন্তোষমাত্রার্থমুক্তিঃ; অন্যথা "কুশাবত্যাং রাজ্যমতিসৃষ্টম্" ইতি পূর্ব্বোক্তিবিরোধ ইতি বোধ্যম্।

(ব) চারু ইতি। অত্র কাকুবশাৎ কথমপি নাস্মদ্‌গুণোপার্জ্জিতং রাজ্যমিতি প্রতীয়তে। তেন, যেনার্জ্জিতং তেনৈবোপযুজ্যতামিত্যাশয়ঃ।

নাকে দান করিয়াছেন। অতএব প্রিয়সুহৃদের প্রথম প্রার্থনা আপনি স্বীকার করুন। (ফিরিয়া) ওরে! পাপাত্মা ও শঠ ঐ রাজার শালাকে আন।

নেপথ্যে। শর্ব্বিলক যাহা আদেশ করেন।

শর্ব্বিলক। আর্য্য! রাজা আর্য্যক নিবেদন করিতেছেন যে, আমি এই রাজ্য, আপনার গুণেই উপার্জ্জন করিয়াছি; তা, আপনি ভোগ করুন।

नेपथ्ये। अरे रे राष्ट्रियश्यालक! एह्येहि स्वस्याविनयस्य फलमनुभव। (म)

ततः प्रविशति पुरुषैरधिष्ठितः पश्चाद्बाहुबद्धः शकारः। (य)

शकारः। हीमादिके! (न)

एव्वं दूलमदिक्कन्ते उद्दामे विअ गद्दहे।
आणीदे क्खु हगे वधे कुक्कुले अस्से व्व दुक्कले ॥५३॥

(न) हन्त!।

(५३) एवं दूरमतिक्रान्तः उद्दाम इव गर्द्दभः।
आनीतः खल्वहं बद्धः कुक्कुरोऽन्य इव दुष्करः ॥

(म) नेपथ्य इति। अविनयस्य दुर्व्यवहारस्य स्वयंकृतस्त्रीहत्यायाः परोपर्य्यारोपणस्येत्यर्थः।

(य) शकार इति। पुरुषैः अर्थिलकानुचरैः, अधिष्ठितः अवलम्बितः।

एवमिति। उद्दाम उन्मुक्तबन्धनशृङ्खलः, गर्द्दभ इव, एवमनेन प्रकारेण एषामाकर्षणेनेत्यर्थः, दूरं वासभवनाद्विप्रकृष्टम्, अतिक्रान्तः अतीतः, तथा दुष्करो दुष्कराकर्षणः, अन्यः कुक्कुर इव, बद्धोऽहम्, खलु आनीतः वध्यस्थानमिति शेषः।

अत्र शकारवचनत्वादुपमागतानौचित्यदोषो नानुसन्धेयः ॥५३॥

চারুদত্ত। আমার গুণে উপার্জ্জিত রাজ্য!।

নেপথ্যে। ওরে রে রাজার শালা! আয় আয় নিজের দুর্ব্যবহারের ফল ভোগ কর্।

তদনন্তর পুরুষগণ কর্তৃক ধৃত ও পশ্চাদ্বাহুবদ্ধ অবস্থায় শকারের প্রবেশ।

শকার। হায়!।

উদ্দাম গর্দ্দভের ন্যায় আমি বাড়ী হইতে এইভাবে দূরে আসি-

দিশোঽবলোক্য। সমন্তদো উবট্ঠিদে এসে লট্ঠিঅবন্ধে। তা কং দাণিং অসলণে সলণং বজামি?। বিচিন্ত্য। ভোদু, তং জেব অব্‌ভুব-বস্ম-সলণ-বচ্ছলং গচ্ছামি। উপসৃত্য। অজ্জচালুদত্ত! পলিত্তাআহি পলিত্তাআহি। ইতি পাদয়োঃ পততি। (প)

নেপথ্যে। অজ্জচালুদত্ত! মুঞ্চ মুঞ্চ, বাবাদেম্হ এদং। (ফ)

(প) সমন্তত উপস্থিত এষ রাষ্ট্রীয়বন্ধঃ। তৎ কমিদানীমশরণঃ শরণং ব্রজামি?। ভবতু, তমেব অভ্যুপপন্নশরণবৎসলং গচ্ছামি। আর্য্য চারুদত্ত! পরিত্রায়স্ব পরিত্রায়স্ব।

(ফ) আর্য্য চারুদত্ত! মুঞ্চ মুঞ্চ, ব্যাপাদয়াম এতম্।

(প) সমন্তত ইতি। রাষ্ট্রিয়স্য রাজশ্যালস্য বন্ধো বন্ধনানুজ্ঞা, সমন্তত উপস্থিতঃ সর্ব্বাভ্য এব দিগ্‌ভ্য উত্থিতঃ। অশরণো রক্ষকশূন্যঃ, শরণং রক্ষকম্। অভ্যুপন্নানামাশ্রিতানাং জনানাং শরণং রক্ষকো বৎসলঃ স্নেহবাংশ্চ তম্, তমেব চারুদত্তমেব, গচ্ছামি শরণার্থং প্রাপ্নোমি।

য়াছি এবং দুর্দ্ধর অপর কুর্কুরের ন্যায় বদ্ধ অবস্থায় আনীত হইয়াছি ॥৫৩॥

(সকলদিকে দৃষ্টিপাত করিয়া) সকল দিক হইতেই আমার বন্ধনের অনুমোদন উপস্থিত হইতেছে। তা এখন রক্ষকহীন আমি কাহার শরণাপন্ন হই?। (চিন্তা করিয়া) হউক, আশ্রিতদিগের রক্ষক ও তাদের প্রতি স্নেহকারী সেই চারুদত্তেরই শরণাগত হই। (এই বলিয়া নিকটে যাইয়া) আর্য্য! চারুদত্ত! রক্ষা করুন, রক্ষা করুন; (এই বলিয়া চরণে পতিত হইল)

शकारः। चारुदत्तं प्रति। भो अशरणशरण! परित्ता-अहि। (ब)

चारु। सानुकम्पम्। अहह! अभयमभयं शरणागतस्य। (भ)

शर्वि°। सावेगम्। आः, अपनीयतामयं चारुदत्तपार्श्वात्। चारुदत्तं प्रति। ननु! उच्यतां किमस्य पापस्यानुष्ठीयता-मिति। (म)

आकर्षन्तु सुबध्वैनं ? श्वभिः सं खाद्यतामथ ?।
शूले वा तिष्ठतामेषः पाट्यतां क्रकचेन वा ॥५४॥

(ब) भो अशरणशरण! परित्रायस्व।

(भ) चारु इति। अहहेत्यद्भुते खेदे वा। भयस्याभाव इत्यभयम्। अभावार्थे अव्ययीभावः।

(म) शर्वि इति। अपनीयतामपसार्य्यताम्। अन्यथा चारुदत्तोऽयम् मोचना याद्यनुरोद्धुमर्हतीति भावः।

आकर्षन्त्विति। एनं शकारम् सुबध्वा सम्यग् बद्धा, आकर्षन्तु तथा सति तीक्ष्णा-ग्रप्रस्तरखण्डैरस्याङ्गानि क्षतविक्षतानि भविष्यन्तीत्याशयः। अथ अनन्तरम्, श्वभिः

নেপথ্যে। আর্য্য চারুদত্ত! ছাড়ুন ছাড়ুন, ইহাকে মারিয়া ফেলি।

শকার। (চারুদত্তের প্রতি) হে রক্ষকহীনের রক্ষক! রক্ষা করুন।

চারুদত্ত। (দয়ার সহিত) হায়! শরণাগতের ভয় নাই ভয় নাই

শর্বিলক। (আবেগের সহিত) আঃ! চারুদত্তের নিকট হইতে ইহাকে সরাইয়া নাও। চারুদত্তের প্রতি) আর্য্য! (বলুন এই পাপাত্মার কি করিবে।

ইহাকে সম্যক্‌রূপে বন্ধন করিয়া আকর্ষণ করিবে? কিম্বা কুকুর

चारु। किमहं यद् ब्रवीमि तत् क्रियते ?। (य)

शर्वि। कोऽत्र सन्देहः ?।

शकारः। भट्टालआ! चालुदत्त! शलणागदेम्हि, ता पलित्ताआहि पलित्ताआहि। जं तुए शलिशं, तं कलेहि। पुणो ण ईदिशं कलिश्शं। [र]

(र) भट्टारक! चारुदत्त! शरणागतोऽस्मि, तत् परित्रायस्व परित्रायस्व। यत्तव सदृशम्, तत् कुरु पुनर्न ईदृशं करिष्यामि।

कुक्कुरैः, सं खाद्यताम्। अत्र ण्यन्तात् खादतेः कर्म्मणि प्रत्ययः। वा अथवा, एष शकारः, शूले तिष्ठताम् अस्माकमारोपणेन शूले स्थितिमभ्युपगच्छतु इत्यर्थः। "प्रतिज्ञानिर्णयप्रकाशनेषु स्थाः" इति प्रतिज्ञार्थे कथादित्वादात्मनेपदम्। वा अथवा क्रकचेन करपत्रेण, पाट्यतां द्विभागः क्रियताम्। एतेषामेकतमः प्रकार उच्यतामिति भावः।

अत्र कर्त्तव्यविषयाणामुपन्यासाद् ग्रथनं नाम उपसंहारसन्ध्यङ्गम्,

"उपन्यासस्तु कार्य्याणां ग्रथनं" इति लक्षणात्॥५४॥

(य) चारु इति। तत् क्रियते किं युष्माभिरित्यर्थः। अन्यथा हत्वा वाक्यव्ययेन लज्जाप्राप्तस्ततो निवृत्तिरेव श्रेयसीति भावः।

(र) शकार इति। भट्टारक! देव!। अहो दशाकालयोः परिवृत्तिरेव लोकाना-

দিয়া খাওয়াইবে? অথবা এ, শূলে আরোপিত থাকিবে? না, করাত দিয়া দুইভাগ করিবে?॥৫৪॥

চারুদত্ত। আমি যাহা বলিব, তাহা কি করিবে?।

শর্বিলক। এবিষয়ে সন্দেহ কি?।

শকার। রাজা! চারুদত্ত! আমি শরণাগত হইয়াছি; তা,

नेपथ्ये पौराः। वावादेध, किं णिमित्तं पादकी जीवावीअदि ?। (ल)

वस। वध्यमालां चारुदत्तस्य कण्ठादपनीय शकारस्योपरि क्षिपति।

शकारः। गब्भदाशीधीए! पशीद पशीद, ण उण मालइश्शं, ता पलित्ताआहि। [व]

(ल) व्यापादयत, किं निमित्तं पातकी जीव्यते ?।

(व) गर्भदासीपुत्रि! प्रसीद प्रसीद, न पुनर्मारयिष्यामि, तत् परित्रायस्व।

व्यवहारपरिह्रसितमङ्गुतामेव साधयति। तथा च येनेतः पूर्वमेव 'अले चालुदत्ता' इति सम्बोधितम्, तेनेदानीं 'भट्टालका ! चालुदत्त !' इति सम्बोध्यते।

(ल) नेपथ्ये इति। जीव्यते जीवितो रक्ष्यते। इतस्मात् जीवघातीभावि प्रत्ययः। अत्र परिभाषणं नाम उपसंहारसन्ध्यङ्गम् —'वदन्ति परिभाषणम्। परिवादकृतम् वाक्यम्' इति लक्षणात्।

(व) शकार इति। गर्भदास्या आजन्मदासीत्वप्राप्तायाः पुत्री कन्या, तत्सम्बोधनम्। इदमपि गालिदानमेव।

রক্ষা করুন রক্ষা করুন। আপনার যাহা যোগ্য, তাহা করুন। আমি আর এরূপ করিব না।

নেপথ্যে পুরবাসিগণ। মারিয়া ফেল, পাপিষ্ঠকে বাচাইয়া রাখিতেছ কেন?

বসন্তসেনা। । (চারুদত্তের কণ্ঠ হইতে বধ্যমালা আনিয়া শকারের উপর নিক্ষেপ করিল)

শকার। গর্ভদাসীর মেয়ে! প্রসন্ন হ প্রসন্ন হ। আর মারিব না, আমা রক্ষা কর্।

शर्वि॰। अरे रे ! अपनयत । आर्य्यचारुदत्त ! आज्ञाप्यताम्—किमस्य पापस्यानुष्ठीयताम् ।

चारु। किमहं यद् ब्रवीमि तत् क्रियते ? ।

शर्वि॰। कोऽत्र सन्देहः ।

चारु। सत्यम् ? ।

शर्वि॰। सत्यम् ।

चारु। यद्येवम्, शीघ्रमयम् ।

शर्वि॰। किं हन्यताम् ? ।

चारु। नहि नहि । मुच्यताम् ।

शर्वि॰। किमर्थम् ? ।

अहो दुर्जनदुर्मुखस्यायं स्वभावः, यदनुनयसमयेऽपि स्वत एव परुषं पदमाननादाविर्भवति ।

শর্বিলক। ওরে! শকারকে সরাইয়া নাও। আর্য্যচারুদত্ত! আদেশ করুন—এই পাপাত্মার কি করিতে হইবে।

চারুদত্ত। আমি যাহা বলিব তাহা করিবে কি ? ।

শর্বিলক। এ বিষয় সন্দেহ কি ? ।

চারুদত্ত। সত্য ? ।

শর্বিলক। সত্য।

চারুদত্ত। যদি এইরূপ হয়, তবে শীঘ্র ইহাকে—।

শর্বিলক। কি হত্যা করিবে ?।

চারুদত্ত। না না। মুক্ত কর।

শর্বিলক। কি নিমিত্ত ?।

चारु। शत्रुः कृतापराधः शरणमुपेत्य पादयोः पतितः शस्त्रेण न हन्तव्यः। [अ]

शर्वि। एवम्। तर्हि श्वभिः खाद्यताम्। [ब]

चारु। नहि। उपकारहतस्तु कर्त्तव्यः। [स]

शर्वि। अहो आश्चर्य्यम्। किं करोमि— वदत्वार्य्यः।

चारु। तन्मुच्यताम्।

शर्वि। मुक्तो भवतु।

(अ) चारु इति। 'शरणागत-बाल-स्त्री-हिंसकान् संवसेन्न तु।
चीर्णव्रतानपि सदा कृतघ्नसहितानिमान्॥

इति याज्ञवल्क्यवचनादित्याशयः।

(ब) शर्वि इति। एवम् इत्यमेव शास्त्रमित्यर्थः। तर्हि शस्त्रेणाहन्तव्यत्वे सति, श्वभिः कुक्कुरैः।

(स) चारु इति। उपकारेण उपकारकरणेन हतो हतप्रायः। तथा च अपकृता-दुपकारं प्राप्नुवन्नेव जन आत्मावज्ञया हतप्रायो भवति। एवञ्च एतस्यार्थोऽपि रक्षितः, अपकारिणे यातना च दत्ता स्यादिति भावः।

চারুদত্ত। শত্রু, অপরাধ করিয়া শরণাগত হইয়া চরণে পতিত হইলে, অস্ত্রদ্বারা তাহাকে হত্যা করিতে নাই।

শর্বিলক। এরূপ বটে, তবে কুকুর দিয়া খাওয়াউক্।

চারুদত্ত। না। উপকার-হত করিবে।

শর্বিলক। কি আশ্চর্য্য!। কি করিব, আপনি বলুন।

চারুদত্ত। তবে মুক্ত কর।

শর্বিলক। মুক্ত হউক।

শকারঃ। হীমাদিকে পচ্চুজ্জীবিদম্হি। ইতি পুরুষৈঃ সহ নিষ্ক্রান্তঃ। (ছ)

নেপথ্যে কলকলঃ।

পুনর্নেপথ্যে। এসা অজ্জচারুদত্তস্স বহুআ অজ্জা ধূদা পদে বসনাঞ্চলে বিলগ্গন্তং দারঅং আক্খিবন্তী বাপ্ফ-ভরিদ-ণঅণেহিং জণেহিং ণিবারিজ্জমাণা পজ্জলিদে পাবএ পবিসদি। (জ)

(ছ) হন্ত! প্রত্যুজ্জীবিতোঽস্মি।

(জ) এষা আর্য্যচারুদত্তস্য বধূরার্য্যা ধূতা পদে বসনাঞ্চলে বিলগন্তং দারকমাক্ষিপন্তী বাষ্পভরিত-নয়নৈর্জনৈর্নিবার্য্যমাণা প্রজ্বলিতে পাবকে প্রবিশতি।

(জ) পুনরিতি। বিলগন্তং নিবারণায় সংসজন্তম্, দারকং পুত্রং রোহসেনম্, আক্ষিপন্তী দূরে অপসারয়ন্তী। বাষ্পৈরশ্রুজলৈর্ভরিতানি পূরিতানি নয়নানি যেষাং তৈঃ।

শকার। আহা! ফিরিয়া বাঁচিলাম। (এই বলিয়া পুরুষগণের সহিত চলিয়া গেল)

নেপথ্যে কোলাহল।

পুনরায় নেপথ্যে। আর্য্যচারুদত্তের ভার্য্যা এই আর্য্যা ধূতা, চরণে ও বসনাঞ্চলে লগ্ন বালকটিকে ঠেলিয়া দিতে থাকিয়া এবং অশ্রুপূর্ণনয়ন জনসমূহকর্ত্তৃক নিবারিত হইতে থাকিয়া, প্রজ্বলিত অগ্নির মধ্যে প্রবেশ করিতেছেন।

शर्वि। आकर्ण्य नेपथ्याभिमुखमवलोक्य। कथं चन्दनकः!। चन्दनक! किमेतत्?।

चन्दनकः प्रविश्य। किं ण पेक्खदि अज्जो? महाराअप्पासादं दक्खिणेन महन्तो जणसंमद्दो वट्टदि। एसा इत्यादि पुनः पठति। कधिदं अ मए तोए, जधा—अज्जे! मा साहसं करेहि, जीवदि अज्जचारुदत्तो त्ति। परन्तु दुक्ख-वावुडदाए को सुणेदि? को पत्तिआअदि?। [क]

(क) किं न प्रेक्षते आर्य्यः? महाराजप्रासादं दक्षिणेन महान् जनसम्मर्द्दो वर्त्तते। कथितञ्च मया तस्यै यथा—'आर्य्ये! मा साहसं कुरु, जीवति आर्य्यचारुदत्त इति। परन्तु दुःखव्यापृततया कः शृणोति? कः प्रत्ययते?।

(क) चन्दनक इति। महाराजप्रासादाददूरे दक्षिणे इति तस्मिन्। 'अदूरे एनोऽपञ्चम्याः' इत्येनप्रत्ययः, 'द्वितीयैनेन' इति द्वितीया। तस्यै धूतायै। दुःखव्यापृततया दुःखेनाकुलिततया। प्रत्ययते चारुदत्तजीवनं विश्वसिति. अपि तु कोऽपि नेत्यर्थः।

শর্বিলক। (শুনিয়া, নেপথ্যের দিকে চাহিয়া) চন্দনক যে! চন্দনক! এ ঘটনাটা কি?।

চন্দনক। (প্রবেশ করিয়া) আপনি কি দেখিতেছেন না?। মহারাজের অট্টালিকার নিকটে দক্ষিণদিকে লোকের গুরুতর ভিড় হইয়াছে। আমি তাঁহাকে (ধূতাকে) বলিয়াছিও যে, "আর্য্যে! আপনি সাহস করিবেন না; আর্য্য চারুদত্ত বাঁচিয়া আছেন।" সকলেই দুঃখে আকুল বলিয়া, কে শোনে? কে বিশ্বাস করে?।

चारु। (सोद्वेगम्) हा प्रिये! जीवत्यपि मयि किमेतत् व्यवसितम्। (ऊर्द्ध्वमवलोक्य दीर्घं निःश्वस्य च।)

न महीतलस्थितिसहानि भव-
च्चरितानि चारुचरिते! यदपि।
उचितं तथापि परलोकसुखं
न पतिव्रते! तव विहाय पतिम् ॥५५॥

अत्र पूर्ववाक्यं नामोपसंहारसन्धेरङ्गम्, —'पूर्ववाक्यन्तु विज्ञेयं यथोक्तार्थोपदर्शनम्' इति लक्षणात्।

नेति। हे चारुचरिते! निर्मलस्वभावे! प्रिये! यदपि यद्यपि, भवत्यास्तव चरितानि मनोव्यवहाराः, महीतले मर्त्ये स्थितिसहानि अवस्थानयोग्यानि न भवन्ति, अत्युत्कर्षात् स्वर्ग एव स्थितियोग्यानीति भावः। तथापि, पतिः पतिशुश्रूषणमेव व्रतं यस्यास्तत्सम्बोधनम्। पतिं विहाय विद्यमानायाः तव, परलोके स्वर्गे सुखम् एकाकिन्या एव सुखभोगः, नोचितं न सङ्गतं भवति, तत्र पत्यभावात् तच्छुश्रूषणस्यासम्भवेन पातिव्रात्यभङ्गप्रसङ्गादिति भावः।

अत्र परलोकसुखभोगानौचित्यं प्रति 'पतिव्रते' इति पदस्यार्थो हेतुरिति पदार्थ-

---

চারুদত্ত। (উদ্বেগের সহিত) হা প্রিয়ে! আমি জীবিত থাকিলেও এ কি আরম্ভ করিলে?। (উপরের দিকে চাহিয়া এবং দীর্ঘনিশ্বাস ত্যাগ করিয়া)

হে সচ্চরিত্রে! যদিও, তোমার চরিত্র ভূতলে থাকিবার যোগ্য নহে; তথাপি হে পতিব্রতে! পতিকে পরিত্যাগ করিয়া, একাকী তোমার পরলোকসুখ ভোগ করা উচিত নহে ॥৫৫॥

इति मोहमुपगतः ।

शर्वि । अहो प्रमादः । [ख]

त्वरया सर्पणं मोहमार्य्योऽत्र चागतः ।

हाधिक् प्रयत्नवैफल्यं दृश्यते सर्वतोमुखम् ॥५६॥

हेतुकं काव्यलिङ्गमलङ्कारः । तथा यदापीत्यर्थे यदपीत्यत्रापकमित्यवाचकत्वदोषः, स तु 'यदि च' इति पाठेन समाधेयः ।

प्रमिताक्षरा वृत्तम् 'प्रमिताक्षरा सजससैः कथिता' इति लक्षणात् ॥५५॥

(ख) शर्वि इति । प्रमादो महाविपत् । यद्यपि 'प्रमादोऽनवधानता' इत्यमरः तथापि महाविपदर्थे अस्य कविरूढ़ः, उत्तररामचरितादावप्येवं दर्शनात् ।

त्वरयेति । अत्र धूताया अग्निप्रवेशस्थाने, त्वरया सर्पणं गमनम् अस्माकमावश्यकमिति शेषः, अन्यथा धूताया मृत्युसम्भव इति भावः । अत्र स्थाने च, आर्य्यः चारुदत्तः मोहमागतो मूर्च्छां प्राप्तः; सुतरामत्राप्यवस्थानमावश्यकम्, अन्यथा अस्यापि मृत्युरनिवार्य्य इत्याशयः । हाधिक् इत्येकमेव गुरुतरदुःखसूचकमव्ययम् । सर्वतोमुखं सकलदिग्वर्त्ति, प्रयत्नस्य चारुदत्तनिवारणादिचेष्टायाः वैफल्यं दृश्यते सम्भाव्यते । तथा च धूताया मृत्युसम्भावनया चारुदत्तमरणेऽपि तन्मरणम्, वस्तुत एव धूताया मरणे च चारुदत्तमरणमवश्यम्भावीति उभयमरणमेव अनिवार्य्यं जातमित्यभिप्रायः ॥५६॥

(এই বলিয়া মূর্চ্ছিত হইলেন)

শর্বিলক। হায়! কি গুরুতর বিপদ!।

সেখানে তাড়াতাড়ি যাওয়া আবশ্যক; এখানে আর্য্য চারুদত্ত মূর্চ্ছিত হইলেন। হায়! সর্বপ্রকারেই চেষ্টার নিষ্ফলতা দেখিতেছি ॥৫৬॥

বস। সমস্সসিদু অজ্জো। তত্ত গদুঅ জীবাবেদু অজ্জাং। অণ্ণধা অধীরত্তণেণ অণত্থো সম্ভাবীঅদি। [গ]

চারু। সমাশ্বস্য সহসোত্থায়। হা প্রিয়ে! ক্বাসি? দেহি মে প্রতিবচনম্।

চন্দ। ইদো ইদো অজ্জো। [ঘ]

ইতি সর্ব্বে পরিক্রামন্তি। (ঙ)

ততঃ প্রবিশতি যথানির্দ্দিষ্টা ধূতা চেলাঞ্চলমাকর্ষন্ বিদূষকেণানুগম্যমানো রোহসেনো রদনিকা চ।

(গ) সমাশ্বসিতু আর্য্যঃ। তত্র গত্বা জীবয়তু আর্য্যাম্। অন্যথা অধীরত্বেন অনর্থঃ সম্ভাব্যতে।

(ঘ) ইত ইত আর্য্যঃ।

(গ) বস ইতি। অধীরত্বেন ধৈর্য্যাভাবেন, অনর্থো ধূতায়া মৃত্যুঃ।

(ঙ) ইতীতি। পরিক্রামন্তি ধূতায়া বহ্নিপ্রবেশস্থানে গন্তুং পাদক্ষেপং কুর্ব্বন্তি।

বসন্তসেনা। আর্য্য আশ্বস্ত হউন। সেখানে যাইয়া আর্য্যা ধূতাকে বাচান; না হইলে অধীরতাবশতঃ বিপদের সম্ভাবনা করি।

চারুদত্ত। (আশ্বস্ত হইয়া হঠাৎ উঠিয়া) হা প্রিয়ে! তুমি কোথায় আছ? আমাকে প্রত্যুত্তর দাও।

চন্দনক। এদিকে এদিকে আসুন আর্য্য।

(ইহার পরে সকলে পাদক্ষেপ করিতে লাগিল)

তদনন্তর নির্দ্দিষ্টরূপে ধূতার, তাহার বস্ত্রাঞ্চল আকর্ষণকরতঃ রোহসেনের এবং তাহার পশ্চাৎ পশ্চাৎ বিদূষক ও রদনিকার প্রবেশ।

ধূতা। সাস্রম্। জাদ! মুঞ্চেহি মং, মা বিগ্‌ঘং করেহি। ভীআমি অজ্জউত্তস্স অমঙ্গলাআণ্ণণাদো। (চ)

সত্বরোত্থায় অঞ্চলমাকৃষ্য পাবকাভিমুখং পরিক্রামতি।

রোহ। মাদ! অজ্জএ! পড়িবালেহি মং, তুএ বিণা ণ সক্কুণোমি জীবিদং ধারেদুং। ইতি ত্বরিতমুপসৃত্য পুনরঞ্চলং গৃহ্লাতি।

(ছ)

(চ) জাত! মুঞ্চ মাম্, মা বিঘ্নং কুরু, বিভেমি আর্য্যপুত্রস্য অমঙ্গলাকর্ণনাৎ।

(ছ) মাতরার্য্যে! প্রতিপালয় মাম্, ত্বয়া বিনা ন শক্নোমি জীবিতং ধারয়িতুম্।

(চ) ধূতেতি। অমঙ্গলাকর্ণনাৎ মৃত্যুরূপাশুভশ্রবণাৎ।

(ছ) রোহ ইতি। আত্মানং প্রতি পুত্রস্নেহাবির্ভাবায় মাতরিতি সম্বোধনম্। দয়য়াপি স্বপ্রতিপালনায় আর্য্যে ইতি সম্বোধনম্, আর্য্যস্য দয়াদিসাধুস্বভাবত্বাৎ। তথা চ আর্য্যে! সাধুস্বভাবে! প্রতিপালয় প্রতীক্ষস্ব মাং রক্ষিতুং জীবনং ধারয়েত্যর্থঃ।

ধৃতা। (অশ্রুপাতের সহিত) বৎস! আমাকে ছাড়, বিঘ্ন করিও না। আমি আর্য্যপুত্রের অমঙ্গল শ্রবণ হইতে ভীত হইতেছি। (এই বলিয়া উঠিয়া, বস্ত্রাঞ্চল আকর্ষণ করিয়া লইয়া, অগ্নির সম্মুখে পাদক্ষেপ করিতে লাগিলেন)

রোহসেন। মা! আর্য্যে! আমার প্রতীক্ষা কর, তুমি ভিন্ন আমি জীবনধারণ করিতে পারিব না। (এই বলিয়া তাড়াতাড়ি উঠিয়া পুনরায় অঞ্চল ধারণ করিল)

ধূতা। বরং পাবাচরণং, (১) ণ উণ অজ্জউত্তস্স অমঙ্গলাকণ্ণণং। (জ)

শর্ব্বি। পুরোঽবলোক্য। আসন্নজ্বলনা আর্য্যা। তৎ ত্বর্য্যতাং ত্বর্য্যতাম্।

চারু। ত্বরিতং পরিক্রামতি।

ধূতা। রঅণিএ! অবলম্ব দারঅং, জাব অহং সমীহিদং করেমি। (ঝ)

চেটী। সকরুণম্। অহং পি জধোপদেসিণি ম্হি ভট্টিণীএ। [ঞ]

(জ) বরং পাপাচরণম্, ন পুনরার্য্যপুত্রস্য অমঙ্গলাকর্ণনম্।

(ঝ) রদনিকে! অবলম্বস্ব দারকম্, যাবদহং সমীহিতং করোমি।

(ঞ) অহমপি যথোপদিষ্টান্যস্মি ভর্ত্ত্র্যাঃ।

(জ) ধূতেতি। পাপাচরণং বহ্নিপ্রবেশেনাত্মহত্যারূপপাপকরণম্।

(ঝ) ধূতেতি। সমীহিতং সঙ্কল্পিতং বহ্নিপ্রবেশমিত্যর্থঃ।

ধূতা। পাপকার্য্যের অনুষ্ঠান করা বরং ভাল; কিন্তু আর্য্যপুত্রের অমঙ্গল শ্রবণ নহে।

শর্ব্বিলক। (সম্মুখে দৃষ্টিপাত করিয়া) আর্য্যা ধূতা অগ্নির সন্নিহিত হইয়াছেন; অতএব তাড়াতাড়ি করুন, তাড়াতাড়ি করুন।

চারুদত্ত। (তাড়াতাড়ি পাদক্ষেপ করিতে লাগিলেন)

ধূতা। রদনিকা! তুই বালকটিকে ধর, আমি অভীষ্ট-সম্পাদন করি।

---

(১) পাবাঅরণং।

धूता। विदूषकमवलोक्य। अज्जो दाव अवलम्बेदु। (ट)

विदू। सावेगम्। समीहिद-सिद्धिए पढमं ण बम्हणो अग्गदो कादब्बो। अदो भोदिए अहं अग्गणो होमि। (ठ)

धूता। कधं पच्चादिट्ठ म्हि दुवेहिं। बालकमालिङ्ग्य। जाद! तुमं ज्जेव पज्जवट्ठावेहि अत्ताणं अम्हाणं तिलोदअदाणाम।

(ट) आर्य्यस्तावदवलम्बताम्।

(ठ) समीहितसिद्धये ब्राह्मणः अग्रतः कर्त्तव्यः। अतो भवत्या अहमग्रणीर्भवामि।

(ड) कथं प्रत्यादिष्टास्मि द्वाभ्याम्। जात! त्वमेव पर्य्यवस्थापय

(ञ) चेटीति। भर्त्रा: सम्बन्धे, यथोपदेशिनी तद्वदेवोपदेशकारिणी भाव्या। तथा च वैधव्ये सत्यपि जीवन्मात्रतवायं पुत्र एवाश्वासस्थानम्, मम तु न कश्चिदिति त्वमेव दारकमवलम्बस्व, अहमेव वह्नौ प्रविशामीति भावः।

(ठ) विदू इति। समीहितसिद्धये सङ्कल्पितकार्य्यनिष्पत्तये, प्रथमं ननेन, ब्राह्मणः अग्रतः कर्त्तव्यः 'ब्राह्मणं पुरतः कृत्वा कुर्वीत फलसिद्धये' इति स्मृतेरित्याशयः। अग्रणीरग्रवर्त्ती। अतस्त्वमेव दारकमवलम्बस्व, अहमेवादौ वह्नौ प्रविशामीत्यभिप्रायः।

(ड) धूतेति। द्वाभ्यामुभाभ्यामेव रदनिकाविदूषकाभ्याम्। पर्य्यवस्थापय रक्ष।

दासी। (শোকের সহিত) আমিও আপনাকে ঐরূপ উপদেশ দিতে পারি।

ধূতা (বিদূষকের প্রতি দৃষ্টিপাত করিয়া) আপনি ধরুন।

বিদূষক। (আবেগের সহিত) অভীষ্টকার্য্য-সিদ্ধির জন্য ব্রাহ্মণকে অগ্রে করিতে হয়। অতএব আপনার অগ্রগামী আমি হই।

ধূতা। হায়! দুই জন দ্বারাই আমি প্রত্যাখ্যাত হইলাম

अदिक्कन्ते किं मणोरहेहिं । सनिःश्वासम् । ण क्खु, अज्जउत्तो तुमं पज्जवट्ठाविस्सदि । (ड)

चारु । आकर्ण्य सहसोपसृत्य । अहमेव पर्य्यवस्थापयामि बालिशम् । इति बालकं बाहुभ्यामुत्थाप्य वक्षसालिङ्गति । (ढ)

धूता । विलोक्य । अम्महे । अज्जउत्तस्स ज्जेव सरसञ्जोओ । पुनर्निपुणं निरूप्य सहर्षम् । दिट्ठिआ अज्जउत्तो ज्जेव एसो । पिअं मे पिअं । (ण)

आत्मानम् अस्माकं तिलोदकदानाय । अतिक्रान्ते किं मनोरथैः । न खल्वार्य्यपुत्रस्त्वां पर्य्यवस्थापयिष्यति ।

अतिक्रान्ते त्वय्यपि पुत्रे गते मृते सतीत्यर्थः, मनोरथैः किं 'त्वमेव तिलोदकदानप्रत्याशास्थानम्, इत्यभिलाषैः किं प्रयोजनम्, किमपि नेत्यर्थः, मृतस्य तत्सम्भवादिति भावः। अथ पितैव मां पर्य्यवस्थापयिष्यति किमन्यं प्रत्यनुरोधेनेत्याह न खल्विति। पर्य्यवस्थापयिष्यति रक्षिष्यति, तस्य प्रागेव गतत्वादित्याशयः।

(ढ) चारु इति। अहमेव स तवार्य्यपुत्र एवेति भावः। बालिशं शिशुम्।
'शिशावज्ञे च बालिशः' इत्यमरः।

(বাল[illegible] আলিঙ্গন করিয়া) বৎস! আমাদের তিলোদক দানের জন্য তুমি আপনিই আপনাকে স্থির কর। তুমিও গেলে, তিলোদকের কেবল অভিলাষ দ্বারা কি হইবে। আর ত; আর্য্যপুত্র তোমাকে স্থির করিবেন না।

চারুদত্ত। (শুনিয়া, হঠাৎ নিকটে যাইয়া) আমিই শিশুকে স্থির করিতেছি। (এই বলিয়া বাহুযুগলদ্বারা বালকটীকে উঠাইয়া বক্ষে আলিঙ্গন করিলেন)

বালকঃ। (বিলোক্য সহর্ষম্।) অম্মো! আবুকো মং পরিস্সজদি। (ধৃতাং প্রতি।) অজ্জএ! বড্ঢবীঅসি আবুকো জ্জেব মং পজ্জবট্ঠাবেদি। (ইতি প্রত্যালিঙ্গতি।) (ত)

আহ। (ধৃতাং প্রতি।)

হা প্রেয়সি! প্রেয়সি বিদ্যমানে
কোঽয়ং কঠোরো ব্যবসায আসীৎ।

(থ) অহো! আর্য্যপুত্রস্যৈব স্বরসংযোগঃ। দিষ্ট্যা আর্য্যপুত্র এবৈষঃ। প্রিয়ং মে প্রিয়ম্।

(ত) অহো! আবুকো মাং পরিষ্বজতি। আর্য্যে! বর্দ্ধসে। আবুক এব মাং পর্য্যবস্থাপয়তি।

(থ) ধৃতেতি। অম্মহে ইতি বিস্ময়দ্যোতকমব্যয়ং শৌরসেন্যাং ভাষায়াম্। স্বরসং-যোগঃ কণ্ঠস্বরসম্পর্কঃ। দিষ্ট্যা ভাগ্যেন।

(ত) বালক ইতি। আবুকো জনকঃ। আর্য্যে! পূজ্যে! মাতঃ! বর্দ্ধসে দৈবেন বৃদ্ধিং নীয়সে। পূর্ব্বং ধৃতাবাক্যাদারভ্য ইত্যন্তং সময়ো নাম উপসংহারসন্ধ্যঙ্গম্। "সময়ো দুঃখনির্যাণম্" ইতি লক্ষণাৎ।

ইতি। হা প্রেয়সি! হে প্রিয়তমে! প্রেয়সি প্রিয়তমে অতিপ্রিয়ে ...

ধৃতা। (দেখিয়া) ওহে! আর্য্যপুত্রেরই যেন স্বর (শুনিতেছি)। (পুনরায় বিশেষভাবে দেখিয়া আনন্দের সহিত) ভাগ্যবশতঃ ইনি আর্য্যপুত্রই বটেন। প্রিয়! আমার বড়ই প্রিয়!।

বালক। (দেখিয়া আনন্দের সহিত) ওহে! পিতা আমাকে আলিঙ্গন করিতেছেন। (ধৃতার প্রতি) আর্য্যে! আপনি বৃদ্ধি প্রাপ্ত হইতেছেন। পিতাই আমাকে স্থির করিতেছেন। (এই বলিয়া প্রত্যালিঙ্গন করিল)

অম্ভোজিনী লোচনমুদ্রণং কিং
ভানাবনস্তং গমিতে করোতি ? ॥৫৭॥

ধূতা । অজ্জউত্ত ! অদো জ্জেব সা অচেতণেত্তি বুচ্চ্যদি । (থ)

(থ) আর্য্যপুত্র ! অতএব সা অচেতনেতি উচ্যতে ।

বিদ্যমানে জীবত্যপি ময়ি, কঠোরো দারুণঃ, অয়ং কো ব্যবসায়ো মরণোদ্যম আসীত্ তবেতি শেষঃ । দৃষ্টান্তমাহ্যমিতি ভাবঃ । তথা চ ভানৌ সূর্য্যে, অনস্তং গমিতে বিধিনা অস্তাচলমপ্রাপিতে সত্যপি, অম্ভোজিনী পদ্মিনী, কিং লোচনমুদ্রণং স্বসঙ্কোচরূপং নেত্রনিমীলনম্, করোতি ন বেত্যর্থঃ ।

অত্র দৃষ্টান্তোঽলঙ্কারঃ, তথা অম্ভোজিনীভান্বোর্লিঙ্গসাম্যেন নায়িকানায়কব্যবহারসমারোপাত্ সমাসোক্তিরর্থাপত্তিশ্চ, এষামঙ্গাঙ্গিভাবেন সঙ্করঃ; এবং 'প্রেয়সি প্রেয়সি' ইত্যনয়োঃ শব্দার্থয়োঃ পৌনরুক্ত্যাত্ তাত্পর্য্যমাত্রতো ভেদাচ্চ লাটানুপ্রাসঃ, ন তু যমকং শব্দার্থভেদ এব তদ্বিষয়ত্বাদত্র শব্দার্থভেদাভাবাত্ । তেন সমুদায়ে সংসৃষ্টিঃ ।

ইন্দ্রবজ্রা বৃত্তম্ ॥৫৭॥

(থ) অচেতনেতি । সা অম্ভোজিনী । উচ্যতে লোকাপবাদেন সম্বধ্যতে ।

চারুদত্ত । (ধূতার প্রতি) হা প্রিয়তমে ! প্রিয়তম বিদ্যমান থাকিতে, তোমার এ কি কঠিন অধ্যবসায় হইয়াছিল । সূর্য্য অস্ত না গেলেও, পদ্মিনী কি নয়নমুদ্রণ করে ? ॥৫৭॥

ধূতা । আর্য্যপুত্র ! এই জন্যই লোকে তাহাকে অচেতন বলে ।

विदू । (दृष्ट्वा सहर्षम्) । ही ही भो ! एदेहिं ज्जेव अच्छीहिं पिअवअस्सो पेक्खीअदि । अह्मो ! सदीए पहावो । जदो जलण-प्पवेस-व्ववसाएण ज्जेव पिअसमागमं पाविदा । (चारुदत्तं प्रति ।) जेदु जेदु पिअवअस्सो । (द)

चारु । एहि मैत्रेय ! । (इत्यालिङ्गति ।)

चेटी । अह्मो ! संविधाणअं । अज्ज ! वन्दामि । (इति चारुदत्तस्य पादयोः पतति ।) (ध)

(द) ही ही भोः ! एताभ्यामेवाक्षिभ्यां प्रियवयस्यः प्रेक्ष्यते । अहो ! सत्याः प्रभावः । यतो ज्वलन-प्रवेश-व्यवसायेनैव प्रियसमागमं प्रापिता । जयतु जयतु प्रियवयस्यः ।

(ध) अहो ! संविधानकम् । आर्य्य ! वन्दे ।

(द) विदू इति । एताभ्यामेव जीवत्सम्बन्धिभ्यामेव, न तु लोकान्तरे जन्मान्तरीयाभ्यामित्याशयः, अक्षिभ्यां नयनाभ्याम् । इतोऽधिकं किमानन्दकारणमिति भावः । सत्याः सतीरूपाया धूतायाः, प्रभावो माहात्म्यम् । ज्वलने वह्नौ प्रवेशे यो व्यवसाय उद्यमस्तेनैव । सतीप्रभावादेवायं वैपरीत्येन प्रियसमागमलाभ इति भावः ।

(ध) चेटीति । संविधानकं दैवकृतं शुभसम्पादकम् । सर्वेषामेव जीवनलाभादित्याशयः । स्वार्थे कप्रत्ययः ।

বিদূষক (দেখিয়া আনন্দের সহিত) কি আশ্চর্য্য হে ! কি আশ্চর্য্য ! এই চক্ষু দ্বারাই প্রিয়বয়স্যকে দেখিতেছি। ওহে ! সতীর কি প্রভাব ! । যেহেতু অগ্নিতে প্রবেশের চেষ্টাতেই পতিসম্মেলন পাওয়াইল। (চারুদত্তের প্রতি) প্রিয়বয়স্যের জয় হউক, জয় হউক।

চারুদত্ত। আইস মৈত্রেয় ! । (এই বলিয়া আলিঙ্গন করিলেন।)

চারু। পৃষ্ঠে করং দত্ত্বা। রদনিকে! উত্তিষ্ঠ। ইত্যুত্থাপয়তি। (ন)

ধূতা। বসন্তসেনাং দৃষ্ট্বা। দিট্ঠিআ কুসলিণী বহিণীআ ?। (প)

বস। অহুণা কুসলিণী সংবুত্তম্হি। ইত্যন্যোন্যমালিঙ্গতঃ। (ফ)

শর্বি। দিষ্ট্যা জীবিতসুহৃদ্বর্গ আর্য্যঃ। (ব)

(প) দিষ্ট্যা কুশলিনী ভগিনী ?।

(ফ) অধুনা কুশলিনী সংবৃত্তাস্মি।

(ন) চারু ইতি। অত্র প্রসাদো নাম উপসংহারসন্ধ্যঙ্গম্ —

'শুশ্রূষাদিঃ প্রসাদঃ স্যাৎ' ইতি দর্পণলক্ষণাৎ।

(প) ধূতেতি। অত্র কাকুবশাৎ প্রশ্নো গম্যতে।

(ফ) বস ইতি। অধুনা তবাপি জীবনস্থিতিকালে। ইতঃ পূর্ব্বন্তু চারুদত্তজীবন-নাশত্রাপি তব জীবনসন্দেহাদকুশলিন্যেবাসমিতি ভাবঃ।

(ব) শর্বি ইতি। জীবিতঃ সুহৃদ্রামাত্মীয়ানাং ধূতা-রদনিকা-বিদূষকাণাং বর্গঃ সমূহো যস্য সঃ, আর্য্যো মান্যশ্চারুদত্তঃ। সুতরামধুনা সর্ব্বথৈবাস্মত্প্রিয়ো ভবিতুমর্হতীতি ভাবঃ।

দাসী। কি শুভসম্পাদন!। আর্য্য! প্রণাম করি। (এই বলিয়া চারুদত্তের চরণে পতিত হইল)

চারুদত্ত। (রদনিকার পৃষ্ঠে হস্ত অর্পণ করিয়া) রদনিকা! উঠ। (এই বলিয়া উঠাইলেন)

ধূতা। (বসন্তসেনাকে দেখিয়া) ভাগ্যবশতঃ ভগিনীর মঙ্গল ত ?।

বসন্তসেনা। এখন মঙ্গলবতী হইয়াছি। (এই বলিয়া উভয়ে আলিঙ্গন করিল)

শর্বিলক। ভাগ্যবশতঃ আপনার বন্ধুগণ বাঁচিয়াছেন।

चारु। युष्मत्प्रसादेन। [भ]

शर्वि। आर्य्ये! वसन्तसेने! परितुष्टो राजा भवतीं वधू-शब्देनानुगृह्णाति। (म)

वस। अज्ज! किदत्थम्हि [१]। [य]

(य) आर्य्य! कृतार्थास्मि।

अत्र सुहृदां जीवनरूपलब्धार्थेन मनसः स्थिरीकरणात् कृतिर्नाम उपसंहार-सन्ध्यङ्गम् —'लब्धार्थशमनं कृतिः' इति लक्षणात्।

(भ) चारु इति। युष्माकं शर्विलकार्य्यकचन्दनकानां प्रसादेन अनुग्रहेण जीवितसुहृद्वर्गोऽस्मीत्यर्थः। तथा च आर्य्यकशर्विलकाभ्यां राजहत्यातः परं मन्मोचना-दहं जीवितः, जीवितेन च मया चन्दनकात् वृत्तान्तमाकर्ण्य च तादृशामग्निप्रवेशो-द्यतानां निवारणादिमे च जीविता इत्याशयः।

(म) शर्वि। परितुष्टः, वेश्यातनयाया अपि तव लोभाभावात् गुणमात्राकृष्ट-त्वादेकमात्रपुरुषगामित्वाच्चेति भावः, राजा आर्य्यकः। वधूशब्देन वधूनामदानेन; तथा च त्वं चारुदत्तस्य परिणीतेव वधूरेवेति राज्ञ इच्छेत्यभिप्रायः। कलियुगेऽपि ब्राह्मणस्य जात्यन्तरकन्यापरिणयनानुपपत्तिसमाधानन्तु प्रागेव दर्शितम्।

(य) वस इति। कृतार्थास्मि,—प्रियतमेन च परिणयनात् वेश्यापवादनिरासाच्चेति भावः।

চারুদত্ত। তোমাদের অনুগ্রহে।

শর্বিলক। আর্য্যে বসন্তসেনে! রাজা সন্তুষ্ট হইয়া আপনাকে "বধূ" উপাধি দ্বারা অনুগৃহীত করিতেছেন।

বসন্তসেনা। আর্য্য! কৃতার্থ হইয়াছি।

(१) कृदत्थम्हि।

शर्वि । वसन्तसेनामवगुण्ठ्य चारुदत्तं प्रति । आर्य्य ! किमस्य भिक्षोः क्रियताम् ? । [र]

चारु । भिक्षो ! किं तव बहुमतम् ? । [ल]

भिक्षुः । इमं ईदिशं अणिच्चत्तणं पेक्खिअ दिउणो मे पव्वज्जाए बहुमाणे संवुत्ते । [व]

चारु । सखे ! दृढोऽस्य निश्चयः । तत् पृथिव्यां सर्व्व-विहारेषु कुलपतिरयं क्रियताम् । (श)

(व) इदमीदृशमनित्यत्वं प्रेक्ष्य द्विगुणो मे प्रव्रज्यायां बहुमानः संवृत्तः ।

(र) शर्वि इति । इदानीं वसन्तसेनोपरि प्रक्रान्तवधलोपस्थितेलज्जावरणादेरा-वश्यकत्वात् तदवगुण्ठनमिति बोध्यम् । भिक्षोः सन्न्यासिनः संवाहकस्य ।

(ल) चारु इति । बहुमतम् अत्यादृतम् । तदेव तव करोमीति भावः ।

(व) भिक्षुरिति । अनित्यत्वं संसारस्याचिरस्थायित्वम् । बहुमानो विशेषा-दरः । सुतरां प्रव्रज्यानुमतिरेव मे देयेति भावः ।

(श) चारु इति । निश्चयः प्रव्रज्यायामेवेति शेषः, अतो भोगे नाग्रहः करणीय इत्याशयः । सर्वविहारेषु समस्तबौद्धमठेषु, कुलपतिः श्रमणकाधिपतिः ।

শর্বিলক। (বসন্তসেনার অবগুণ্ঠন দিয়া, চারুদত্তের প্রতি) আর্য্য ! এই সন্ন্যাসীর কি করিব ? ।

চারুদত্ত । ভিক্ষু ! তোমার অভীষ্ট কি ? ।

ভিক্ষু । (সংসারের) এইরূপ এই অনিত্যতা দেখিয়া, প্রব্রজ্যার প্রতি আমার দ্বিগুণ অভিলাষ হইয়াছে ।

চারুদত্ত । সখে ! প্রব্রজ্যাতে ইহার দৃঢ় নিশ্চয় রহিয়াছে ।

शर्वि०। यथाह आर्य्यः। [ष]

भिक्षुः। पिअं ण पिअं। [स]

वस। सम्पदं जीवाविदम्हि। (ह)

शर्वि०। स्थावरकस्य किं क्रियताम्। (च)

चारु। सुवृत्त! अदासो भवतु। ते चाण्डालाः सर्व-चाण्डालानामधिपतयो भवन्तु। चन्दनकः पृथिवीदण्डपालको

(स) प्रियं नः प्रियम्।

(ह) साम्प्रतं जीवितास्मि।

(ष) शर्वि इति। यथाह सत्यं ब्रवीति। तथैव करणीयमित्यभिप्रायः।

(ह) वस इति। जीवितास्मि यथार्थत एव जीवनं प्रापिता, जीवनरक्षणेनोपकारिण्या यथानुरूपप्रत्युपकारकरणात, तथैव च जीवनस्य सफलत्वावगमादिति भावः।

(च) शर्विं इति। स्थावरकस्य तदाख्यस्य शकारभृत्यस्य। तस्यापि सत्यसाक्ष्यदानेन पुरस्कारदानौचित्यमित्याशयः।

(क्ष) चारु इति। हे सुवृत्त! सदाचार! शर्विलक! अदासो भवतु

সুতরাং পৃথিবীর সমস্ত বৌদ্ধমঠে ইহাকে বৌদ্ধসন্ন্যাসীর অধিপতি কর।

শর্বিলক। আপনি যাহা বলিবেন (তাহাই করিব)।

ভিক্ষু। প্রিয় আমার বড়ই প্রিয় হইয়াছে।

বসন্তসেনা। এখন আমার জীবন দান করা হইল।

শর্বিলক। স্থাবরকের কি করিব?।

চারুদত্ত। হে সৎকার্য্যকারী! স্থাবরক দাসত্ব হইতে মুক্ত হউক।

भवतु। तस्य राष्ट्रियश्यालस्य यथैव क्रिया पूर्वमासीत्, वर्त्तमाने तथैवास्य अस्तु। [क]

शर्वि। एवं यथाह आर्य्यः। परमेनं मुञ्च मुञ्च, व्यापादयामि। (ख)

चारु। अभयं शरणागतस्य। शत्रुः कृतापराधः—इत्यादि पठति।

शर्वि। तदुच्यतां किं ते भूयः प्रियं करोमि?। [ग)

शकारस्य क्रीतदासोऽपि स्थावरकस्तद्दास्यान्मुक्तो भवतु। ते, मम घातनाय नियुक्ताः। मम मुक्तये तेषामभिप्रायनिश्चयेन सदाशयत्वनिश्चयादिति भावः। पृथिवीदण्डपालकः सर्वप्रधानसेनापतिः, राज्ञ आर्य्यकस्य यथेष्टमानुकूल्यकरणात् धूतायाः अग्निप्रवेशोद्यमस्थापनेन ममाप्युपकारकरणाच्चेत्याशयः। राष्ट्रियश्यालस्य, शकारस्य क्रिया भोगमाया। शकारं प्रति तु मद्दानयमनुग्रह इति बोध्यम्।

(ख) शर्वि इति। एवमित्थं सकलम् यथाह तथ्यं ब्रवीति। किन्तु, परं केवलम्, एनं शकारम्। तदपराधस्यामार्ज्जनीयत्वादित्यभिप्रायः।

(ग) शर्वि इति। भूय इतोऽतिरिक्तम्, प्रियं प्रीतिकरं कार्य्यम्। अत्र काव्य·

সেই চণ্ডালগণ, সকল চণ্ডালের অধিপতি হউক; চন্দনক প্রধান সেনাপতি হউক; আর সেই রাজার শালার পূর্ব্বে যেমন কার্য্য ছিল, এখনও তেমনি কার্য্য হউক।

শর্ব্বিলক। আপনি যাহা যাহা বলিলেন, এইরূপই করিব; কিন্তু এই শকারকে ত্যাগ করুন, উহাকে হত্যা করিব।

চারুদত্ত। (শরণাগতের ভয় নাই। শত্রু অপরাধ করিয়া ইত্যাদি পাঠ করিলেন)।

শর্ব্বিলক। তা বলুন,—আপনার আর কি প্রিয় কার্য্য করিব?।

चारु । अतः परमपि प्रियमस्ति ? । (घ)

लब्धा चारित्रशुद्धिश्चरणनिपतितः शत्रुरप्येष मुक्तः
प्रोत्खातारातिमूलः प्रियसुहृदचलामार्य्यकः शास्ति राजा ।

संहारो नाम उपसंहारसन्धिरङ्गम्—"वरप्रदानसम्प्राप्तिः काव्यसंहार इष्यते" इति लक्षणात् ।

(घ) चारु इति । अतः परमपि प्रियमस्ति ? इति काकुः, कथमपि नेत्यर्थः, सर्व्वस्यैव आशानुरूपफलत्वादिति भावः ।

ननु कथमतः परं प्रियं नास्तीत्याह लब्धेति । चारित्रस्य सर्व्वत्र प्रथितसच्चरित्रस्य शुद्धिर्निर्दोषता लब्धा मया प्राप्ता, साक्षादेव वसन्तसेनाया उपस्थित्या, धनलोभेन तदीयहत्यापवादनिरासादिति भावः । एष शत्रुरपि शकारः, चरणनिपतित आत्मरक्षार्थं मम पादयोर्लुण्ठितः सन्, मुक्तो मया रक्षितः । प्रथमं शत्रोरेव स्वचरणे पतनं परञ्च दयया तन्मोचनं महागौरवकरमेवेत्याशयः । प्रोत्खातं पालकनृपतिनिधनकरणेन उत्पाटितम् अरातीनां मूलं येन स तादृशः प्रियसुहृत् आर्य्यकः, राजा सन्, अचलां पृथिवीम्, शास्ति दुष्टनिग्रहशिष्टानुग्रहादिना पालयति । अभूतपूर्व्वा सुहृदः सम्पत्तिरतीवप्रीतिकरीत्यभिप्रायः । भूयः पुनरपि, इयं प्रिया वसन्तसेना प्राप्ता मया लब्धा मृतत्वेनैवावगतायाः प्रियायाः पुनः प्राप्तिरप्रत्याशितवस्तुप्राप्तिरिव निरतिशयानन्दजनिकेति भावः । तथा मे मम वयस्यः सुहृदेव भवान् शर्व्विलकः, प्रियसुहृदि आर्य्यके, सङ्गतः सुहृद्भावेनैव मिलितः । वन्धौ बन्धुवरेण सह मिलनं शश्वदत्यन्तकाल-

চারুদত্ত। ইহার পরও কি প্রিয়কার্য্য থাকিতে পারে ? ।

আমি চরিত্রের নির্দ্দোষতা লাভ করিয়াছি ; এই শত্রু শকারও, চরণে পতিত হইয়া মুক্ত হইয়াছে ; প্রিয়সুহৃদ আর্য্যক, শত্রুর মূল উৎপাটন করিয়া, রাজা হইয়া পৃথিবী শাসন করিতেছেন ; পুনরায় এই

प्राप्ता भूयः प्रियेयं प्रियसुहृदि भवान् सङ्गतो मे वयस्यो
लभ्यं किञ्चातिरिक्तं यदपरमधुना प्रार्थयेऽहं भवन्तम् ॥৫৮॥
काश्चित्तुच्छयति प्रपूरयति वा काश्चिन्नयत्युन्नतिं
काश्चित् पातविधौ करोति च पुनः काश्चिन्नयत्याकुलान्।

योर्मिलनमिव परमप्रीतिकरमित्याशयः। अतएव अतिरिक्तम् एभ्योऽधिकम्, किञ्च किं ननु लभ्यं मया प्राप्यमस्ति? अधुना अहं भवन्तम्, यदपरम् एभ्यो भिन्नं वस्तु प्रार्थये।

अत्र प्रीतिलाभकार्य्यं प्रति बहुतरकारणानामुपन्यासात् समुच्चयोऽलङ्कारः, तथा चतुर्थचरणार्थं प्रति पूर्व्वचरणत्रयार्थानां हेतुत्वात् वाक्यार्थहेतुकं काव्यलिङ्गञ्च अनयोर्मिथो निरपेक्षतया संसृष्टिः।

चरित्रमेव चारित्रमिति प्रज्ञादित्वात् स्वार्थे अण् इति मूलमेव।

स्रग्धरा वृत्तम्—"म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयम्" इति लक्षणात् ॥৫৮॥

अन्योऽन्यमीभूयसामेव युगपद्व्यापरिवृत्तिः कुत इत्याह काश्चिदिति। इमां दृश्यमानाम्, लोकस्थितिं जनसमाजावस्थाम्, अन्योन्यप्रतिपक्षाणाम् एकस्यैव वस्तुनो भिन्न-भिन्नप्रार्थित्वात् परस्परविरोधिनां जनानां संहतिः सम्मिलनं यस्यां तां तथोक्ताम्, बोधयन् एकविधप्रार्थनाया एव प्रदर्शनेन लोकेषु ज्ञापयन्, कूपयन्त्रं कूपाज्जलोत्तो-

---

প্রিয় বসন্তসেনাকে পাইয়াছি এবং প্রিয় সখা তুমি, অপর প্রিয়সখা আর্য্যকের সঙ্গে মিলিত হইয়াছ। সুতরাং এই সকল অপেক্ষা অধিক প্রিয় আর কি প্রাপ্য আছে; যে, আমি এখন তোমার নিকট প্রার্থনা করিব ॥৫৮॥

কূপ হইতে জল তুলিবার যন্ত্রের রজ্জুতে নিবদ্ধ ঘটের ন্যায় এই

अन्योन्यप्रतिपक्षसंहतिमिमां [१] लोकस्थितिं बोधयन्
एष क्रीड़ति कूपयन्त्रघटिकान्यायप्रसक्तो विधिः ॥५८॥

खनयन्त्रं तस्य या घटिका तदीयरज्जुबद्धः क्षुद्रो घटः तस्या न्यायः सादृश्यं तत्र प्रसक्तः संसृष्टः कूपयन्त्ररज्जुबद्धः क्षुद्रो जलोत्तोलनघट इवेत्यर्थः, एष विधिर्द्दैवम् कांश्चित् जनान्, तुच्छयति तुच्छीकरोति दारिद्र्यादिसम्पादनेन, अन्येन ग्रहणादात्मनः प्राप्त्य-भावेन च अवज्ञेयान् करोतीत्यर्थः। यथा पालके राजनि स्थिते शकारः क्षतिभयेन सर्व्वेषामेव गौरवास्पदमासीत्, इदानीन्तु सर्व्वथा तुच्छ एव सञ्जात इति भावः। कांश्चिद्वा जनान् प्रपूरयति धनजनादिजननेन जलप्रदानेन च परिपूर्णान् करोति। यथा कुम्भावत्या राजजननेनाहं प्रपूरित इत्याशयः। कांश्चित् जनान्, उन्नतिमभ्युदयं जलोत्तोलनार्थं च कूपप्राचीरोपर्य्युत्थानञ्च नयति प्रापयति। यथेदानीमेव भवन्तः शर्व्विलकादय आर्य्यकोन्नत्या उन्नतिं नीता इत्यभिप्रायः। कांश्चिच्च जनान्, पातविधौ निपातकार्य्ये सोपानादवरोहणकार्य्ये च करोति प्रवृत्तान् विदधाति। यथा आर्य्यकावरोधरूपे स्वनिपातकार्य्ये पालकं प्रवृत्तं कृतवानिति भावः। पुनस्तथा कांश्चित् जनान्, आकुलान् आकस्मिकदुर्घटनया स्वजलपात्रविघटनेन च विह्वलान्, नयति करोतीत्यर्थः। यथा पालकवधेन तत्पक्षीया वीरकादयः कर्त्तव्यमूढतया आकुलीकृता इत्याशयः। अतो विधिर्न्नैवेयं युगपदेव भूयसी दशापरिवृत्तिः कृतेति न किञ्चिदाश्चर्य्यमिति श्लोकसमुदायाभिप्रायः।

अत्र आर्थी पूर्णोपमालङ्कारः, अप्रस्तुतात् कांश्चिदिति जनसामान्यात् प्रस्तुतानां शकारादिजनविशेषाणां प्रतीतेरप्रस्तुतप्रशंसा, तथा तुच्छयतीत्याद्यनेकक्रियाणां विधिर-

বিধাতা, 'এই লোকসমাজে লোক সকল, পরস্পরের প্রতিপক্ষ রহিয়াছে' ইহা বুঝাইয়া, কতকগুলি লোককে অবজ্ঞার পাত্র করেন;

(१) अन्योन्यं प्रतिपक्षसंहतिमिमाम्।

तथापीदमस्तु । [ङ]

भरतवाक्यम् । (च)

क्षीरिण्यः सन्तु गावो भवतु वसुमती सर्व्वसम्पन्नशस्या
पर्ज्जन्यः कालवर्षी सकल-जन-मनोनन्दिनो वान्तु वाताः ।

त्वेकस्य कारकत्वात् दीपकञ्च, इत्थं तेषामेकाश्रयानुप्रवेशरूपः सङ्करः। तत्र 'पातविधौ करोति' इत्यत्र प्रकृतानिति पदस्यानभिधानात् न्यूनपदतादोषः, नयतीत्यस्य द्विःपाठात् कथितपदतादोषः, परवर्त्मनि नयतीत्यत्र रूढ़िप्रयोजनयोरभावेऽपि करोत्यत्र लक्षणाकरणात् नेयार्थतादोषश्च 'कांश्चित् पातविधौ प्रवर्त्तयति वा कांश्चित् करोत्याकुलान्' इति पाठे तु तेषां निरासः। उक्तपाठे च परवाशब्दस्य समुच्चयार्थकतया न पुनः कथितपदतादोषः, एकार्थकानुपूर्वीकानेकशब्दपाठ एव तद्विषयत्वात् पूर्व्ववाशब्दस्य तु विकल्पार्थत्वात् ।

शार्दूलविक्रीड़ितं वृत्तम् ॥५९॥

(ङ) तथापीति । यद्यपि अतः परमपि प्रियं अस्ति, तथापीदं वक्ष्यमाणमस्तु इति काकुप्रत्यायितार्थकपूर्व्ववाक्येनान्वयः।

(च) भरतेति। भरतानां नटानां वाक्यं वचनं स्वरूपेणाविर्भूयैव नटानामपीदं पाठ्यमित्यर्थः, आदौ नान्दीवत् अन्तेऽपि मङ्गलाचरणस्य कर्त्तव्यत्वादित्याशयः। प्रस्तावनातः परं स्वरूपेण भरतानां प्रवेशासम्भवात् पुनर्मङ्गलार्थं पाठायात तत्स्वरूपेणाविर्भावार्थं भरतवाक्यमित्युक्तमिति बोध्यम् ।

কতকগুলিকে পরিপূর্ণ করেন; কতকগুলিকে উন্নত করেন; কতকগুলিকে অবনত করেন এবং কতকগুলিকে একেবারে বিহ্বল করিয়া ফেলেন ॥৫৯॥

তথাপি ইহা হউক। (নটদিগের উক্তি)

मोदन्तां जन्मभाजः सततमभिमता ब्राह्मणाः सन्तु सन्तः
श्रीमन्तः पान्तु पृथ्वीं प्रशमितरिपवो धर्म्मनिष्ठाश्च भूपाः ॥६०॥

चौरिण्य इति । गावो धेनवः, चौरिण्यः प्रचुरदुग्धशालिन्य एव सन्तु न पुनरल्पदुग्धा निर्दुग्धा वा इति भावः । वसुमती पृथिवी, सर्वस्मिन्नेव काले सम्पन्नानि निष्पन्नानि शस्यानि यस्यां सा तादृशी, भवतु न तु कस्मिंश्चित् कालमात्रे इत्याशयः । पर्जन्यो मेघः, काले यथाकाले वर्षतीति कालवर्षी भवत्वित्यन्वयः न पुनरयथाकालवर्षीत्यभिप्रायः । वाता वायवः, सकलजनानां मनांसि नन्दयन्तीति तथाभूताः सन्तो वान्तु प्रवहन्तु, न पुनर्वात्यारूपेणोद्वेजकाः सन्तो वान्त्विति भावः । जन्मभाजः प्राणिनः अभिमताः परस्परं सम्मता विद्वेषरहिताः सन्त इत्यर्थः, सततं मोदन्तामामोदमनुभवन्तु । ब्राह्मणाः सन्तः सद्व्यावलम्बनेन साधवः सन्तु, न पुनरसद्व्यावलम्बनेनासाधव इत्याशयः । तथा भूपा राजानः श्रीमन्तो राजलक्ष्मीवन्तः, न तु नाममात्रसारा इति भावः, प्रशमिताः सामदामादिना शान्तिं नीता रिपवो यैस्ते तादृशाः, ननु परस्परविद्वेषिण इत्याशयः, तथा धर्म्मनिष्ठाः प्रजाहितसाधनादिस्वधर्म्मे स्थिताश्च सन्तः, न पुनरत्याचारादधर्म्मनिष्ठा इत्यभिप्रायः, पृथ्वीं राज्यं पान्तु पालयन्तु ।

अत्र गावः चौरिण्य एव सन्तु, न पुनरल्पदुग्धा इत्यादिव्याख्यातरूपेण अन्यव्यपोहनादार्थी परिसंख्यालङ्कारः । तथा बहुवचनान्तपदमध्ये वसुमतीति पर्जन्य इति च एकवचनान्तपदद्वयप्रयोगात् परस्मैपदप्रयोगमध्ये मोदन्तामित्यात्मनेपदप्रयोगाच्च भग्नप्रक्रमता दोषः, एवं सन्त्वित्यस्य द्विःपाठात् कथितपदतादोषश्च । 'गावः चीरं किरन्तु प्रचुरमपि भुवो भान्तु सम्पन्नशस्याः, पर्जन्याः कालवर्षा⋯नन्दन्तु प्राणिनोऽमी इति पाठे तु तेषां निरासः । प्रशस्तिर्नाम उपसंहारसन्ध्यङ्गम् —'नृपदेशादिशान्तिस्तु प्रशस्तिरभिधीयते"
इति लक्षणात् ।

चौरिण्य इति भूमार्थे मत्वर्थीय इन्प्रत्ययः । स्रग्धरा वृत्तम् ॥६०॥

इति निष्क्रान्ताः सर्वे ।

संहारो नाम दशमोऽङ्कः ॥ (क)

समाप्तमिदं मृच्छकटिकं नाम प्रकरणम् ॥०॥

—:०:—

(क) संहार इति । संहार उपसंहारः समाप्तिरिति यावत् ।

जानकीविक्रमं नाम नाटकं वीररौद्रवत् ।
नाटिकामुज्ज्वलरसां श्रीविराजसरोजिनीम् ॥१॥
वियोगवैभवाख्यानं खण्डकाव्यमनन्तरम् ।
नानावर्ण्यं महाकाव्यं रुक्मिणीहरणाभिधम् ॥२॥
स्मृतिचिन्तामणिं नाम संक्षिप्तस्मृतिसंग्रहम् ।
उत्तररामचरितटीकां सर्वार्थबोधिनीम् ॥३॥
मालविकाग्निमित्रस्य मालतीमाधवस्य च ।
टीकां दशकुमारस्य तथा कादम्बरीगताम् ॥४॥
श्रीवङ्गीयप्रतापाख्यं नाटकं वङ्गगौरवम् ।
साहित्यदर्पणे टीकां निर्म्माय च सुनिर्म्मलाम् ॥५॥
कोटालीपाड़ोनग्रियानिवासी नदीपुरेशस्य सभाप्रवासी ।
सत्काव्यपोऽध्यापनमुख्यकर्म्मा व्यधादिमां श्रीहरिदासशर्म्मा ॥६॥
पञ्च-वेद-वसु-चन्द्र-सम्मिते वत्सरे शकमहीपतेरभूत् ।
भास्वतो मिथुनसंक्रमे दिने श्रीवसन्तसुषमा समापिता ॥७॥

इति श्रीगङ्गाधरविद्यालङ्कारभट्टाचार्य्यात्मज-श्रीहरिदाससिद्धान्तवागीशभट्टाचार्य्य-
विरचितायां मृच्छकटिकटीकायां वसन्तसुषमासमाख्यायां
दशमाङ्कविवरणं समाप्तम् ॥०॥

মেঘ যথাসময়ে বর্ষা করুক, বায়ু, লোকদিগের মনের আনন্দজনক হইয়া, বহিতে হউক; প্রাণিগণ পরস্পর পরস্পরের অভিমত হইয়া, সর্ব্বদা আমোদ করুক; ব্রাহ্মণগণ সাধু হউন এবং রাজগণ সমৃদ্ধিসম্পন্ন হইয়া, শত্রু দমন করিয়া এবং স্বধর্ম্মে থাকিয়া, পৃথিবী পালন করুন ॥৬০॥

(ইহার পরে সকলেই চলিয়া গেল)

উপসংহার নামে দশম অঙ্ক সমাপ্ত ॥০॥

মৃচ্ছকটিকনামক

প্রকরণ সমাপ্ত ॥০॥